श्रीगणेशाय नमः ॥ श्रीदक्षिणामूर्तये नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ शुभमस्तु ॥ ॥ॐ॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ॥ यं न
त्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥ १ ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ २ ॥ यत्कटाक्षेण तद्रूपं द
धद्बुक्कमहीपतिः ॥ आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने ॥ ३ ॥ उक्तको माधवार्येण ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात ॥ कृपालुर्माधवाचा
र्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥ उक्तको माधवार्येण वीरबुक्कमहीपतिः ॥ अन्वशात्सायणाचार्यं वेदार्थस्य प्रकाशने ॥ ५ ॥ आह मे प्राह नृपतिं राजन्सायणा
र्यो ममानुजः ॥ सर्वं वेत्त्येष वेदानां व्याख्यातृत्वेन युज्यतां ॥ ६ ॥ आध्वर्यवस्य यज्ञेषु प्राधान्याद्व्याकृतः पुरा ॥ यजुर्वेदोऽथ होत्रार्थमृग्वेदो व्याकरिष्यते ॥ ७ ॥
तस्मिन्प्रथमाध्यायः श्रोतव्यः संप्रदायतः ॥ व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति बुद्धिमान ॥ ८ ॥ अत्र केचिदाहुः ॥ ऋग्वेदस्य प्राथम्येन सर्वत्राम्नातत्वाद
भ्यर्हितं पूर्वमिति न्यायेनाभ्यर्हितत्वात्तद्व्याख्यानमादौ युक्तं ॥ प्राथम्यं च पुरुषसूक्ते विस्पष्टं ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ॥ छंदांसि जज्ञि
रे तस्माद्यजुस्तस्मादजायतेति ॥ सहस्रशीर्षा पुरुष इत्युक्तत्वात्परमेश्वराद्यज्ञनाम्नः पुरुषाज्जनितत्वात्सर्वहुतः सर्वैर्हूयमानात् यद्यपींद्रादयस्तत्र तत्र हूयंते
तथापि परमेश्वरस्यैवेंद्रादिरूपेणावस्थानादविरोधः ॥ तथा च मंत्रवर्णः ॥ इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान ॥ एकं सद्विप्रा बहुधा
वदंत्यग्निं यमं मातरिश्वानमाहुरिति ॥ वाजसनेयिनश्चामनंति ॥ तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा इति ॥
तस्मात्सर्वैरपि परमेश्वर एव हूयते ॥ न केवलमृचां पाठप्राथम्येनाभ्यर्हितत्वं ॥ किंतु यज्ञांगदार्ढ्यहेतुत्वादपि ॥ तथा च तैत्तिरीया आमनंति ॥ यद्वै
यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्यदृचा तद्दृढमिति ॥ तथा सर्ववेदगतानि ब्राह्मणानि स्वाभिहितेऽर्थे विश्वासदार्ढ्याय तदेतदृचाभ्युक्तमित्यृचमे
वोदाहरंति ॥ मंत्रकांडेऽपि यजुर्वेदगतेषु तत्र तत्राध्वर्युणा प्रयोज्या ऋच एव बहव आम्नाताः ॥ साम्नां तु सर्वेषामृगाश्रितत्वं प्रसिद्धं ॥ आथर्वणिकैरपि स्व
कीयसंहितायामृच एव बाहुल्येनाभिधीयंते ॥ अतो ऽन्यैः सर्वैर्वेदैरादृतत्वादभ्यर्हितत्वं ॥ छंदोगाश्च प्राथम्येन सनत्कुमारं प्रति नारदवाक्यमेव
मामनंति ॥ ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमिति ॥ मुंडकोपनिषद्यप्येवमाम्नायते ॥ ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति ॥
तापनीयोपनिषद्यपि मंत्रराजपादेषु क्रमेणाध्ययनमेवमामनंति ॥ ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः सांगाः सशाखाश्चत्वारः पादा भवंती
ति ॥ एवं सर्वत्रोदाहरणीयं ॥ तस्मादृग्वेदस्याभ्यर्हितस्यादौ व्याख्यानमुचितमिति ॥ तान्प्रत्येतदुच्यते ॥ अस्त्वेवं सर्ववेदाध्ययनतत्पारायणब्रह्म
यज्ञजपादावृग्वेदस्यैव प्राथम्यं ॥ अर्थज्ञानस्य तु यज्ञानुष्ठानार्थत्वात ॥ तत्र तु यजुर्वेदस्यैव प्रधानत्वात्तद्व्याख्यानमेवादौ युक्तं ॥ तत्प्राधान्यं च कैश्चि
दुदाहृतं ॥ ऋचां त्वः पोषमास्ते पुपुष्वान् उत इति ॥ एतस्या ऋचस्तात्पर्यं निरुक्तकारो यास्कः संक्षिप्य दर्शयति ॥ ऋत्विक्कर्मणां विनियोगमाचष्ट इति
पुनरपि स एव प्रथमपादं विवृणोति ॥ ऋचामेकः पोषमास्ते पुपुष्वान्होता ऋग्वचनीति अस्यायमर्थः ॥ त्वशब्द एकशब्दपर्यायो होतृविशेषणं
॥ होतृनामक एक ऋत्विक्प्रयोगकाले स्वकीयवेदगतानामृचां पुष्टिं कुर्वन्नास्ते ॥ भिन्नप्रदेशेष्वाम्नातानामृचां संघातमेकत्र संपाद्य ॥ तावदिदं शा
स्त्रमिति पुष्टिं करोति ॥ सेयं पुष्टिः अर्चनीत्यमुमर्थमृक्शब्द आचष्टे ॥ अर्चते प्रशस्यतेऽनया देवविशेषः क्रियाविशेषस्तत्साधनविशेषो
वेत्यृक्शब्दव्युत्पत्तेरिति ॥ अथ द्वितीयं पादं विवृणोति ॥ गायत्रमेको गायति शक्वरीषूद्गाता गायत्रं गायतेः स्तुतिकर्मणः शक्वर्य ऋचः शक्नो
तेस्तद्यदाभिर्वृत्रमशकद्धंतुं तच्छक्वरीणां शक्वरीत्वमिति विज्ञायत इति ॥ अस्यायमर्थः ॥ उद्गातृनामक एक ऋत्विक् गायत्रं शक्वरीष्वभि

धेयं स्तोत्रं शक्वरीशब्दाभिधेयास्वृक्षु गायति ॥ धातूनामनेकार्थत्वेन स्तुतिक्रियावाचिनो गायतिधातोरयं शब्दो गायत्रशब्दः ॥ शक्वरीशब्दस्तु
शक्नोतिधातोरुत्पन्नः ॥ वृत्रं हंतुं शक्नोत्याभिरृग्भिरित्येवं व्युत्पत्तिः कैश्चिद्ब्राह्मणे विज्ञायत इति ॥ अथ तृतीयपादं विवृणोति ॥
ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा सर्वविद्य इति ॥ अस्यायमर्थः ॥ ब्रह्मनामक एक ऋत्विक् जाते जाते तदोत्पन्ने यज्ञे प्रसक्ते प्रणयनादिकर्मणि वि
द्यामनुज्ञां वदति ब्रह्मन्नपः प्रणेष्यामीत्येवं संबोधितः सन्नोंप्रणयेत्यनुजानाति स च ब्रह्मा वेदत्रयोक्तसर्वकर्माभिज्ञः ॥ तस्माद्योग्यतां दृष्ट्वा तत्त
दनुज्ञातुं सति प्रमादे समाधातुं च समर्थ इति ॥ तच्च सामर्थ्यं छंदोगा आमनंति ॥ एष एव यज्ञः तस्य मनश्च वाक्च वर्तनी तयोरन्यतरां मनसा संस्करो
ति ब्रह्मा वाचा होताध्वर्युरुद्गातान्यतरामिति ॥ स्त्रैणो यज्ञः प्रमादराहित्याय मनसा सम्यगनुसंधेयः ॥ वाचा च वेदत्रयोक्तमंत्राः पठनीयाः तत्र हो
त्रादयस्त्रयो मिलित्वा वाग्रूपं यज्ञमार्गं संस्कुर्वंति ब्रह्मा त्वेक एव मनोरूपं यज्ञमार्गं संस्करोति ॥ ब्रह्मा त्वेक एव मनोरूपं यज्ञमार्गं कृत्स्नमपि संस्करो
ति ॥ तस्मादस्यास्ति सामर्थ्यमिति ॥ अथ चतुर्थपादं विवृणोति ॥ यज्ञस्य मात्रां विमिमीत एको ऽध्वर्युरध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेतेति ॥
अस्यायमर्थः ॥ अध्वर्युनामक एक ऋत्विक् यज्ञस्य मात्रां स्वरूपं विमिमीते विशेषेण निष्पादयति मीयते निर्मीयत इति मात्रा स्वरूपं तन्निष्पादक
त्वाध्वर्योर्नामवचनादवगम्यते ॥ अध्वर्युरित्यत्र छांदस्या प्रक्रियया लुप्तकारं पुनः प्रक्षिप्याध्वरयुरिति नाम संपादनीयं ॥ अध्वरं युनक्तीत्यय
वार्थः ॥ अध्वरस्य नेतेति तात्पर्यार्थ इति ॥ एतदेवाभिप्रेत्याध्वर्युवेदस्य यागनिष्पादकत्वद्योतकं निर्वचनं यास्को दर्शयति ॥ संवादमननाच्छंदांसि
च्छादनात्स्तोमः स्तवनाद्यजुर्यजतेरित्येवं सत्यध्वर्युसंबंधिनि यजुर्वेदे निष्पन्नं यज्ञशरीरं उपजीव्य तदपेक्षितौ स्तोत्रशस्त्ररूपावयवावितरेण
वेदद्वयेन पूर्यते इत्युपजीव्यस्य यजुर्वेदस्य प्रथमतो व्याख्यानं युक्तं ॥ तत ऊर्ध्वं साम्नामृगाश्रितत्वादुभयोर्मध्ये प्रथमतः ऋग्व्याख्यानं युक्त
मित्यृग्वेद इदानीं व्याख्यायते ॥ ननु वेद एव तावन्नास्ति ॥ कुतस्तदवांतरविशेष ऋग्वेदः ॥ तथा हि को ऽयं वेदो नाम ॥ न हि तस्य लक्षणं प्रमाणं वास्ति ॥ न
च तदुभयव्यतिरेकेण किंचिद्वस्तु प्रसिध्यति ॥ लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्यायविदां मतं ॥ प्रत्यक्षानुमानागमेषु प्रमाणविशे
षेषु अंतिमो वेद इति तल्लक्षणमिति चेत ॥ न मन्वादिस्मृतिष्वतिव्याप्तेः ॥ समयबलेन सम्यक्परोक्षानुभवसाधनमित्येतस्यागमलक्षणस्य त
त्रापि सद्भावात ॥ अपौरुषेयत्वे सतीति विशेषणादोष इति चेन्न मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणादिति ॥ सजातीयविजातीयव्याव
र्तको लक्ष्यगतः कश्चिल्लोकप्रसिद्धः आकारो लक्षणं ॥ तेन च लक्षणेन लक्ष्यं वस्तु निसंभावनानुसारेण ज्ञातायां प्रमातुमुद्योगवान् प्रमाणेन त
दवगच्छति ॥ तद्यथा ॥ सास्नादिमान्गौरित्येकपथकृत्य चतुष्पात्सु जीवेषु तल्लक्षणलक्षितं पदार्थमन्विष्यायं गौरिति चक्षुषावगच्छंति ॥ वेदस्या
पि परमेश्वरनिर्मितत्वेन ॥ पौरुषेयत्वात ॥ शरीरधारिजीवपुरुषनिर्मितत्वाभावादपौरुषेयत्वमिति चेत ॥ न ॥ सहस्रशीर्षा पुरुष इत्यादिश्रुतिभिरीश्व
रस्यापि शरीरित्वात कर्मफलशरीररूपधारिजीवनिर्मितत्वाभावमात्रेणापौरुषेयत्वं विवक्षितमिति चेत ॥ न ॥ जीवविशेषैरग्निवाय्वादित्यैर्वेदाना
मुत्पादितत्वात ॥ ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यादिति श्रुतेरीश्वरस्याग्न्यादिप्रेरकत्वेन निर्मातृत्वं द्रष्टव्यं ॥ मंत्रब्राह्मणा
त्मकः शब्दराशिर्वेद इति चेत ॥ ईदृशं मंत्र ईदृशं ब्राह्मणमित्यनयोरद्याप्यनिर्णीतत्वात् ॥ तस्मान्नास्ति किंचिद्वेदस्य लक्षणं नापि तत्सद्भावे प्र
माणं पश्यामः ॥ ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमित्यादिवाक्यं प्रमाणमिति चेत ॥ न तस्यापि वाक्यस्य वेदांतःपातित्वे
नात्माश्रयत्वप्रसंगात ॥ न खलु निपुणोऽपि स्वस्कंधमारोढुं प्रभवति ॥ वेद एव द्विजातीनां निःश्रेयसकरः पर इत्यादिस्मृतिवाक्यं प्रमाणमिति चेन्न

3
1924

140775

न। तस्याप्युक्तप्रकारेण मूलत्वेन निराकृतत्वात्॥ प्रत्यक्षादिकं तु न तु मध्ये योग्यं। वेदविषया तु लोकप्रसिद्धिः सा वंजनीनाप्यनीलं नभ इत्यादिवद्भ्रांता॥
तस्माल्लक्षणप्रमाणरहितस्य वेदस्य सद्भावो नांगीकर्तुं शक्यत इति पूर्वः पक्षः॥ अत्रोच्यते॥ मंत्रब्राह्मणात्मकं तावददुष्टं लक्षणं॥ अत एवापस्तंबो
यज्ञपरिभाषायामेवमाह॥ मंत्रब्राह्मणयोर्वेदनामधेयमिति॥ तयोस्तु रूपमुपरिष्टान्निर्णेष्यते॥ अपौरुषेयवाक्यत्वमिदमपि यादृशमस्मा-
भिर्विवक्षितं तादृगुत्तरत्र स्पष्टीभविष्यति॥ प्रमाणान्यपि यथोक्तश्रुतिस्मृतिलोकप्रसिद्धिरूपाणि वेदसद्भावे द्रष्टव्यानि॥ यथा घटपटादिद्रव्या-
णां स्वप्रकाशत्वाभावेपि सूर्यचंद्रादीनां स्वप्रकाशत्वमविरुद्धं॥ तथा मनुष्यादीनां स्वस्कंधारोहासंभवेप्यकुंठितशक्तेर्वेदस्येतरवस्तुप्रतिपादकत्व-
वत्स्वप्रतिपादकत्वमप्यस्तु॥ अत एव संप्रदायविदोऽकुंठितां शक्तिं वेदस्य दर्शयंति॥ चोदना हि भूतं भवंतं भविष्यंतं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजा-
तीयकमर्थं शक्नोत्यवगमयितुमिति॥ तथा सति वेदमूलायाः स्मृतेस्तदुभयमूलाया लोकप्रसिद्धेश्च प्रामाण्यं दुर्वारं॥ तस्माल्लक्षणप्रमाणसिद्धो
वेदो न केनापि चार्वाकादिनापह्नोतुं शक्य इति स्थितं॥ नन्वस्तु नाम वेदाख्यः कश्चित्पदार्थः तथापि नासौ व्याख्यानमर्हति अप्रमाणत्वेनानुपयुक्तत्वात्।
नहि वेदः प्रमाणं॥ तल्लक्षणस्य तत्र दुःसंपादत्वात्॥ तथाहि सम्यगनुभवसाधनं प्रमाणमिति केचिल्लक्षणमाहुः॥ अपरे त्वनधिगतार्थगंतृ प्रमा-
णमित्याचक्षते॥ न चैतदुभयं वेदे संभवति॥ मंत्रब्राह्मणात्मको हि वेदः॥ तत्र मंत्राः केचिदबोधकाः॥ अम्यक्सात इंद्र ऋष्टिरस्मे इत्येको मंत्रः॥ यादृश्मिन्धायि
तमपस्यया विददित्यन्यः॥ सृण्येव जर्भरी तुर्फरीतू इत्यपरः॥ आपांतमन्युस्तृपलप्रभर्मेत्यादय उदाहार्याः॥ न ह्येतैर्मंत्रैः कश्चिदप्यर्थोऽवबुध्यते॥ एतेष्वनुभव
एव यदा नास्ति तदा तस्य सम्यक्त्वं तदीयसाधनत्वं च दूरापेतं॥ अधः स्विदासी३दुपरि स्विदासी३दिति मंत्रस्य बोधकत्वेपि स्थाणुर्वा पुरुषो वेत्यादिवाक्यवत्संदिग्धार्थ-
बोधकत्वान्नास्ति प्रामाण्यं॥ ओषधे त्रायस्वैनमिति मंत्रो दर्भविषयः॥ स्वधिते मैनं हिंसीरिति क्षुरविषयः॥ शृणोत ग्रावाण इति पाषाणविषयः॥ एतेष्वचे-
तनानां दर्भक्षुरपाषाणानां चेतनवत्संबोधनं श्रूयते॥ ततो द्वौ चंद्रमसाविति वाक्यवद्विपरीतार्थबोधकत्वादप्रामाण्यं॥ एक एव रुद्रो न द्वितीयाय तस्थे।
सहस्राणि सहस्रशो ये रुद्रा अधि भूम्यामित्यनयोर्मंत्रयोर्यावज्जीवमहं मौनीति वाक्यवद्व्याघातबोधकत्वादप्रामाण्यं॥ आप उंदंत्विति मंत्रो यजमा-
नस्य क्षौरकाले जलेन शिरसः क्लेदनं ब्रूते॥ शुभिके शिर आरोह शोभयंती मुखं ममेति मंत्रो विवाहकाले मंगलाचरणार्थं पुष्पनिर्मितायाः शुभिका-
या वरवध्वोः शिरस्यवस्थानं ब्रूते॥ तयोश्च मंत्रयोर्लोकप्रसिद्धार्थानुवादित्वादनधिगतार्थगंतृत्वं नास्ति॥ तस्मान्मंत्रभागो न प्रमाणं॥ अत्रोच्यते॥
अम्यगादिमंत्राणामर्थो यास्केन निरुक्तग्रंथे बोधितः॥ तत्परिचयरहितानामबोधो न मंत्राणां दोषमावहति॥ अत एवात्र लौकिकन्यायमुदाहरंति॥ नै-
ष स्थाणोरपराधो यदेनमंधो न पश्यति पुरुषापराधः स भवतीति। अधः स्विदासी३दिति मंत्रश्च न संदेहप्रबोधनाय प्रवृत्तः॥ किं तर्हि। जगत्कारणस्य प-
रवस्तुनोऽतिगंभीरत्वं निश्चेतुं प्रवृत्तः॥ तदर्थमेव हि गुरुशास्त्रसंप्रदायरहितैर्दुर्बोधत्वमधः स्विदित्यनयोपन्यस्यति॥ स एवाभिप्राय
उपरितनेषु को अद्धा वेदेत्यादिमंत्रेषु स्पष्टीकृतः॥ ओषध्यादिमंत्रेष्वपि चेतना एव तत्तदभिमानिदेवतास्तेन तेन नाम्ना संबोध्यंते॥ ताश्च देवता भग-
वता बादरायणेनाभिमानिव्यपदेशस्त्विति सूत्रे सूत्रिताः॥ एकस्यापि रुद्रस्य स्वमहिम्ना सहस्रमूर्तिस्वीकारान्नास्ति परस्परव्याघातः॥ जलादिद्रव्ये-
णा शिरः क्लेदनादेर्लोकप्रसिद्धत्वेपि तदभिमानिदेवतानुग्रहस्याप्रसिद्धत्वात्तद्विषयत्वेनाज्ञातार्थज्ञापकत्वं॥ ततो लक्षणसद्भावादस्ति मंत्रभागस्य २
प्रामाण्यं॥ एतदेवाभिप्रेत्य भगवान् जैमिनिर्मंत्राधिकरणे मंत्राणां विवक्षितार्थत्वमसूत्रयत्॥ तानि च सूत्राणि क्रमेणोदाहृत्य व्याख्यास्यामः॥

तत्र पूर्वपक्षं सूत्रयति॥ तदर्थशास्त्रादिति॥ तस्यार्थस्याभिधाने समर्थो मंत्रः। स एवाभिधेयोऽस्य शास्त्रस्य ब्राह्मणवाक्यस्य तदिदं वाक्यं तदर्थशास्त्रं
तस्मात् शास्त्रात् अविवक्षितार्थो मंत्र इत्यवगम्यते॥ तथाहि। उरु प्रथस्वेति मंत्रेण पुरोडाशप्रथनमभिधीयते पुरोडाशं प्रथयतीति ब्राह्मणेनापि त- 5
देवाभिधीयते॥ तथा सति मंत्रेणैव प्रतीतत्वात्तदर्थबोधनाय प्रवृत्तं ब्राह्मणवाक्यमनर्थकं स्यात्॥ मंत्रस्याविवक्षितार्थत्वे तु विनियोगबोधनाय ब्रा- 1924
ह्मणमुपयुक्तं॥ तस्मान्मंत्रा उच्चारणेनैवानुष्ठानमुपकुर्वंति॥ ननूच्चारणार्थत्वे सति अदृष्टं प्रयोजनं परिकल्प्येत अर्थाभिधायकत्वे तु दृष्टं लभ्यते।
तस्माद्ब्राह्मणस्यानुवादकत्वमभ्युपेत्यापि मंत्रस्याभिधानार्थत्वमेष्टव्यमित्याशंक्योत्तरं सूत्रयति॥ वाक्यनियमादिति॥ अग्निर्मूर्धा दिवः ककुदित्येवमे-
व वाक्यं पठितव्यमिति॥ मंत्रे नियम उपलभ्यते॥ अर्थप्रत्यायनं तु मूर्धाग्निरित्येवं व्युत्क्रमपाठेपि भवत्येव॥ तस्मान्नियतपाठक्रमसाफल्यायोच्चार-
णमेव मंत्रप्रयोजनं। ननु पाठक्रमनियममात्रस्यादृष्टार्थत्वेपि मंत्रपाठोऽर्थबोधार्थ एवेत्याशंक्य तत्र दोषांतरं सूत्रयति॥ बुद्धशास्त्रादिति॥ अग्नी-
दग्नीन्विहरेति प्रैषमंत्रः प्रयोगकाले पठ्यते॥ तत्राग्निविहरणादिकमाग्नीध्रेणाध्ययनकाल एव स्वकर्तव्यत्वेन बुद्धं तस्य च बुद्धस्यार्थस्य पुनर्मंत्रो-
च्चारणेन शासनमनर्थकं॥ नहि सोपानत्कः पादेषु पुनरप्युपानहं प्रतिमुंचति॥ ननु बुद्धस्यार्थस्य प्रामादिकविस्मरणपरिहाराय मंत्रेण स्मारणमस्त्वित्या-
न्य शंक्य दोषं सूत्रयति॥ अविद्यमानवचनादिति॥ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्येति मंत्र आम्नायते॥ न खलु चतुःशृंग-
त्वाद्युपेतं किंचिद्यज्ञसाधनं विद्यते तेन मंत्रपाठेनानुस्मर्यते॥ नन्वीदृशी काचिद्देवतास्त्वित्याशंक्यान्यदोषं सूत्रयति॥ अचेतनेऽर्थबंधनादिति॥
ओषधे त्रायस्वैनं शृणोत ग्रावाण इत्याद्यचेतने द्रव्ये चेतनोचितं रक्षणश्रवणाद्यर्थं बध्नाति॥ स चायुक्तः॥ नन्वभिमानिव्यपदेशस्त्विति वैयासिक-
शास्त्रे सूत्रितत्वादोषध्याद्यभिमानि चेतनदेवतात्र विवक्षितामित्याशंक्य दोषांतरं सूत्रयति॥ अर्थविप्रतिषेधादिति॥ अदितिर्द्यौरदितिरंतरि-
क्षमिति मंत्र आम्नायते यदेव द्यौस्तदेवांतरिक्षमित्ययमर्थो विप्रतिषिद्धः। एक एव रुद्रः सहस्राणि सहस्रशो ये रुद्रा इत्यादिकमप्युदाहर्त-
व्यं। ननु त्वमेव माता च पिता त्वमेवेत्यादिवदंतरिक्षादिरूपत्वेनादितिः स्तूयते॥ एवमेकस्यापि रुद्रस्य योगसामर्थ्याद्बहुमूर्तिस्वीकारोऽस्तु
ततो नार्थविप्रतिषेध इत्याशंक्य दोषांतरं सूत्रयति॥ स्वाध्यायवदवचनादिति॥ पूर्णिका नाम काचिद्योषिदवघातं करोति॥ तत्समीपे माण-
वकः स्वाध्यायग्रहणार्थं कृत्स्नमवघातमंत्रमधीते॥ न च तस्यार्थप्रकाशनविवक्षास्ति प्रतिमुसलप्रहारं तस्य मंत्रस्यापठ्यमानत्वात्स्व-
ग्रहणायैव तं मंत्रमन्यांश्च मंत्रानभ्यस्यति। तत्र स्वाध्यायकाले पठितोऽप्यवघातमंत्रो यथा पूर्णिकां प्रति स्वार्थं न ब्रूते॥ तथा कर्मकालेपि
स्वार्थं न वक्ष्यति॥ ननु तत्र माणवकस्यार्थविवक्षा नास्ति॥ पूर्णिकाप्यवबोधुमक्षमा। कर्मणि त्वध्वर्योरर्थविवक्षा विद्यते॥ बोधश्च संभव-
तीत्याशंक्य दोषांतरं सूत्रयति॥ अविज्ञेयादिति॥ केषांचिन्मंत्राणामर्थो विज्ञातुं न शक्यते॥ यथा अम्यक्सात इंद्र ऋष्टिरस्मे इत्येको मंत्रः॥ सृ-
ण्येव जर्भरी तुर्फरीतू इत्यपरो मंत्रः॥ नन्वीदृशमंत्रार्थबोधायैव निघंटुनिरुक्तव्याकरणानि प्रवृत्तानीत्याशंक्य दोषांतरं सूत्रयति॥ अनित्यसंयो-
गान्मंत्रानर्थक्यमिति॥ किं ते कृण्वंति कीकटेषु गाव इति मंत्रे कीकटो नाम जनपद आम्नातः॥ तथा नैचाशाखं नाम नगरं॥ प्रमगंदो नाम राजेत्येते अर्थाः
अनित्या आम्नाताः॥ तथा च सति प्राक्प्रमगंदान्नायं मंत्रो भूतपूर्व इति गम्यते॥ तदेवमेतैस्तदर्थशास्त्रादिभिर्हेतुभिर्मंत्राणामर्थप्रत्यायना-

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

र्थत्वं नास्ति॥ किंतूच्चारणादृष्टार्था एवेति॥ पूर्वः पक्षः तत्र सिद्धांतं सूत्रयति॥ अविशिष्टस्तु वाक्यार्थ इति॥ तुशब्देन मंत्राणामदृष्टार्थमु
च्चारणमात्रं वारयति॥ क्रियाकारकसंबंधेन प्रतीयमानो वाक्यार्थो लोकवेदयोरविशिष्टः॥ तथा सति यथा लोके अर्थप्रत्यायनायैव वा
क्यमुच्चार्यते॥ तथा। वैदिके याग प्रयोगे पि द्रव्यं मंत्रेणाप्रकाशितं तत्त्वतो नुष्ठातुं शक्यते॥ न त्वप्रकाशितः॥ तस्मान्मंत्रोच्चारणस्या
र्थप्रकाशनरूपं दृष्टमेव प्रयोजनं॥ नन्वश्विरसिनारीरसीत्यारभ्य त्रैष्टुभेन त्वा छंदसा ददे इति मंत्र आम्नातः॥ तेनैव मंत्रेण प्रतीतेप्य
भ्यादाने पुनर्ब्राह्मणेन तां चतुर्भिरभ्रिमादत्त इति विधीयते॥ न देतद्विधानं तस्य पक्षे व्यर्थं स्यादित्याशंक्योत्तरं सूत्रयति॥ गुणार्थेन पुनः
श्रुतिरिति। मंत्रेण प्रतीतस्यैवार्थस्य ब्राह्मणे यत्पुनः श्रवणं तदेतच्चतुः संख्यालक्षणगुणविधानार्थत्वेनोपयुज्यते॥ एतस्याविधानस्या
भावे चतुर्णां मंत्राणां मध्ये येन केनाप्येकेनाभ्रिरादीयेत॥ नन्विमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र मंत्रसामर्थ्यादेव
प्राप्तस्य रशनादानस्य पुनर्ब्राह्मणवाक्यं विनियोजकमाम्नायते॥ तदेतत्। त्वनातेन्यर्थमित्याशंक्योत्तरं सूत्रयति॥ परिसंख्येति॥ गर्दभा
भिधानीं नादत्त इति निषेधः परिसंख्या॥ तदर्थमिदं ब्राह्मणवाक्यं॥ ननु परिसंख्यायां त्रयो दोषाः प्राप्नुयुः॥ आदत्त इति शब्दः रशनाद
नलक्षणं स्वार्थं जह्यात्तन्निषेधलक्षणः परार्थो स्य शब्दस्य कल्प्येत॥ रशनात्वसामान्येन च प्राप्तं गर्दभरशनाया आदानं बाध्येतेति त्रयो
दोषाः॥ मैवं। गर्दभरशनाया अप्राप्तत्वात्॥ तथाहि त्वत्पक्षे प्रकरणपाठान्यथानुपपत्त्या मंत्रेणानेनादानं कुर्यादिति वाक्यं परिकल्प्यते तेन
च वाक्येन मंत्रादानयोः संबंधे सिद्धे सति पश्चाल्लिंगविषयमादानमिति वीक्षायां लिंगाद्रशनामात्रस्यादानमुपेत्य गर्दभरशनायाः प्राप्ति
र्वक्तव्या॥ सा च विलंब्यते॥ इत्यश्वाभिधानीमिति प्रत्यक्षेण वाक्येन मंत्रादानयोः संबंधे सति लिंगाद्रशनामात्रे प्राप्तमादानमश्वाभिधानी
मिति श्रुत्या विशेषेण व्यवस्थाप्यते॥ ततो मंत्रस्य निराकांक्षत्वात्। गर्दभरशनाया अप्राप्तत्वान्नास्ति प्राप्तबाधः अत एव निषेधार्थो न
कल्प्यते विध्यर्थश्च न त्यज्यते॥ तत्र कुतो दोषत्रयं ईदृशमप्राप्तिरूपमेव गर्दभरशनाया निवारणमभिप्रेत्य परिसंख्येति सूत्रितं॥ ननूरु प्र
थस्वेति प्रथयतीति ब्राह्मणस्य वैयर्थ्यं तदवस्थमेवेत्याशंक्योत्तरं सूत्रयति॥ अर्थवादो वेति॥ वा शब्दो वैयर्थ्यं वारयति। अंशस्त्वार्थवा
दः यज्ञपतिमेव तत्प्रथयतीति॥ तेनार्थवादेन संबंधाय ब्राह्मणे विधिः पठ्यते॥ ननु प्रथयतीत्यनेनैव विधिशब्देन प्रथनमनूद्य यज्ञ
पतिमेवेत्यादिनार्थवादेन स्तोतव्यं तदेव तु प्रथनं कुतः प्राप्तमित्याशंक्योत्तरं सूत्रयति॥ मंत्राभिधानादिति। अध्वर्युः पुरोडाशमुद्दि
श्य मंत्रे प्रथस्वेत्येवमभिधत्ते तस्मादभिधानादध्वर्युकर्तृकं प्रथनं प्राप्तं यथा लोके यः कुर्विति ब्रूते॥ स करोत्येव॥ तथात्रापि यः
प्रथस्वेति ब्रूते। स प्रथयत्येव॥ यदुक्तं॥ अग्निर्मूर्धा दिव इति पाठक्रमनियमाददृष्टार्थो मंत्र इति॥ तत्रोत्तरं सूत्रयति। अविरुद्धं परमि
ति॥ परं द्वितीय सूत्रोक्तो क्रमस्मृत्यर्थत्वाद्विरुद्धं॥ नहि वयं पाठक्रमनियमाददृष्टं निवारयामः किं तर्हि मंत्रोच्चारणेन ज्ञायमानमर्थ
प्रत्यायनं दृष्टप्रयोजनत्वान्नोपेक्षितव्यमित्येतावदेव ब्रूमः॥ ननु प्रोक्षणीरासादयेति मंत्रो बुद्धमेवार्थं ब्रवीति॥ तदुक्तं। सोपानत्कस्य 3
पादस्योपानदंतरासंभवादित्युक्तमिति चेन्न॥ तस्य परिहारं सूत्रयति॥ संप्रैषकर्मणोगर्हानुपलंभः संस्कारत्वादिति॥ संप्रैषकर्म

णो गर्हत्वादुक्तदोषो नोपलभ्यते॥ बुद्धस्याप्यर्थस्य मंत्रेणैवानुस्मरणे सति नियमादृष्टलक्षणसंस्कारस्य सद्भावात्॥ तच्चोक्तं। चत्वारि शृं
गेति मंत्रो संतमेवार्थमभिधत्त इति तस्योत्तरं सूत्रयति॥ अभिधानेर्थवाद इति असतो र्थस्याभिधायके वाक्ये गौणस्यार्थस्योक्तिर्द्रष्टव्या॥ I
तद्यथा। चत्वारो होत्रध्वर्यूद्गातृब्राह्मणोस्य कर्मणः शृंगाणि प्रातःसवनादयः पादाः पत्नीयजमानौ द्वे शीर्षे गायत्र्यादीनि सप्त छंदां 1924
सि हस्ता ऋग्वेदादिभिस्त्रिभिर्वेदैस्त्रेधा बंधनं॥ कामान्वर्षतीति वृषभः रोरवीति स्तोत्रशस्त्रादिशब्दान्पुनः पुनः करोति॥ महो देवः
सोयं प्रौढो यज्ञरूपो देवो मर्त्यानाविवेशेति मनुष्या एवात्राधिकारिणः लोके प्येवं गौणप्रयोगा दृश्यंते चक्रवाकस्तनी हंसदंतावली
काशनस्यान्द्रोपलिकेशिनीत्येवं नद्यास्तूयमानत्वात् एवमोषधे त्रायस्वैनमित्यत्र ग्रावाण इत्यादावचेतनसंबोधनानि स्तुतिपरत्वेन
योजनीयानि तस्मिन्वपने ओषधिरपि त्रायते वपनकर्ता त्रायत इति किमु वक्तव्यं॥ तथा ग्रावाणोपि प्रातरनुवाकं शृण्वंति। किमु
तविद्वांसो ब्राह्मणा इत्यादि मंत्राणामभिप्रायः॥ योप्यदितिर्द्यौरदितिरंतरिक्षमिति विप्रतिषेध उक्तः तस्योत्तरं सूत्रयति॥ गुणादवि
प्रतिषेधः स्यादिति। यथा त्वमेव पिता त्वमेव माता त्वमेवेत्यत्र गौणप्रयोगाद्विरोधः तद्वत्। एक एव रुद्रो देवत्ये कर्मण्येको रुद्रः शतरुद्रदेव
त्ये शतं रुद्रा इत्यविरोधः॥ यदप्युक्तं॥ स्वाध्यायमधीयानो माणवकः पूर्णिकाया अवहतिं न प्रकाशयितुमिच्छतीति॥ तत्रोत्तरं सूत्रय
ति॥ विद्यावचनमसंयोगादिति॥ वेदविद्याग्रहणकाले र्थस्य यद्वचनं तद्यज्ञसंयोगादुपपद्यते॥ नहि पूर्णिकाया अवघातो यज्ञ
संयुक्तः॥ नापि माणवको यज्ञमनुतिष्ठति अतो यज्ञानुपकारात् न तत्रार्थविवक्षा॥ यदप्युक्तं॥ अम्यक्सा त इंद्र ऋष्टिरस्मे सृण्येव जर्भरी तुर्फ
रीतू इत्यादावर्थस्य ज्ञातुमशक्यत्वान्नास्त्येवार्थ इति। तत्रोत्तरं सूत्रयति॥ सतः परमविज्ञानमिति विद्यमान एवार्थः प्रमादालस्या
दिभिर्न विज्ञायते॥ तेषां निगमनिरुक्तव्याकरणवशेन धातुतोर्थः परिकल्पयितव्यः॥ तद्यथा॥ जर्भरी तुर्फरीतू इत्येवमादीन्यश्विनो
रभिधानानि। तेषु तद्द्विवचनांतत्वं लभ्यते॥ आश्विनं चेदं सूक्तं॥ अश्विनोः काममप्रा इति दर्शनात्। एतदेवाभिप्रेत्य निरुक्तकारो व्याच
ष्टे॥ जर्भरी भर्तारावित्यर्थः॥ तुर्फरीतू हंतारावित्यर्थ इति। एवमम्यक्सात इत्यादावप्युन्नेयं। यदप्युक्तं प्रमगंदाद्यनित्यार्थसंयोगा
न्मंत्रस्यानादित्वं न स्यादिति तत्रोत्तरं सूत्रयति॥ उक्तश्चानित्यसंयोग इति॥ प्रथमपादस्यांतिमाधिकरणे सोयमनित्यसंयोगदोष
उक्तः परिहृतः तथाहि तत्र पूर्वपक्षे॥ वेदानां पौरुषेयत्वं वर्कुकाठकं कालापकमित्यादिपुरुषसंबंधाभिधानहेतूक्त्यानित्यदर्शनाच्चेति
हेत्वंतरं सूत्रितं॥ तस्यायमर्थः॥ बबरः प्रावाहणिरकामयतेत्यनित्यानां बबरादीनां अर्थानां दर्शनात्॥ ततः प्रागसत्त्वात्पौरुषेयो वे
द इति॥ तस्योत्तरमेवं सूत्रितं॥ परंतु श्रुतिसामान्यमात्रमिति॥ तस्यायमर्थः॥ यत्काठकादिसमाख्यानं तत्प्रवचननिमित्तं यत्तु प
रं बबराद्यनित्यदर्शनं॥ तच्छब्दसामान्यमात्रं न तु तत्रोतैर्नित्यो बबराख्यः कश्चित्पुरुषो विवक्षितः॥ किंतु बबर इति शब्दानुकृतिः॥ तथा सति ब
बरेति शब्दं कुर्वन्वायुरभिधीयते॥ स च प्रावाहणिः प्रकर्षेण वहनशीलः एवमन्यत्राप्यूहनीयं॥ तदेवं कस्यचिदपि दोषस्यासंभवात् वि
वक्षितार्था मंत्राः स्वार्थप्रकाशनायैव प्रयोक्तव्याः नन्वर्थप्रकाशनार्थत्वे सति दृष्टप्रयोजनं लभ्यत इति युक्तिमात्रमिदमुच्यते॥ नन्वेतदु
पोद्बलकं किंचित् श्रौतं लिंगं पश्याम इत्याशंक्योत्तरं सूत्रयति॥ लिंगोपदेशश्च तदर्थवदिति॥ आग्नेय्याग्नीध्रमुपतिष्ठत इति॥ श्रूयते॥

भा॰ प्र॰ तस्यायमर्थः॥ अग्निर्देवता यस्या ऋचः सेयमाग्नेयी॥ तयाग्नीध्रस्थानमुपतिष्ठतेति॥ अत्र स्वरूपस्थानमुपस्थिंद्ब्राह्मणमग्नेनैतयेत्यनयोपतिष्ठे
४ तेति मंत्रप्रतीकं पठित्वानोपदिश्यति॥ किंत्वाग्नेयीत्वलिंगेनोपदिश्यति॥ यदा तस्यामृच्यग्निः प्राधान्येन प्रतिपाद्यते तदा तस्या ऋचोग्निर्देवता भ
वति॥ तथा सत्याग्नेय्येति देवतावाचितद्धितांतनिर्देश उपपद्यते॥ तस्मादयमुपदेशस्तन्मंत्रवाक्यमर्थवदिति बोधयति॥ अतो विवक्षिता
र्थत्वादर्थप्रत्यायनार्थं प्रयोगकाले मंत्रोच्चारणं॥ तस्मिन्नेव विवक्षितार्थत्वे लिंगांतरं सूत्रयति॥ ऊहइति॥ प्रकृतावाम्नातस्य मंत्रस्य विकृतौ स
मवेतार्थत्वाय तदुचितपदांतरस्य प्रक्षेपेण पाठ ऊहः॥ तद्यथा॥ अन्वेनं मातामन्यतामनु पितानु भ्रातेति प्रकृतिपशुविषयो मंत्रपाठः तस्य
च मंत्रस्य विकृतौ पशुद्वये सत्यन्वेनौ मातामन्यतामित्यूहः॥ पशुबहुत्वे सति अन्वेनान्मातामन्यतामित्यूहः कर्तव्यः एतन्मंत्रव्याख्यानरूपं
ब्राह्मणमेवमाम्नायते॥ न माता वर्धते न पितेति॥ तत्रेदं चिंतनीयं॥ किमत्र शारीरवृद्धिर्निषिध्यते॥ अहोस्वित् शब्दवृद्धिरिति एकवचनांतस्य
मातृशब्दस्य मातराविति द्विवचनांतत्वेन मातर इति बहुवचनांतत्वेन वा प्रयोगः शब्दवृद्धिः तत्र न तावच्छरीरवृद्धिर्निषेद्धुं शक्यते॥ बाल्यकौमा
र्यौवनादिवयोनुसारेण वृद्धिनिषेधादितस्त्वैरेन मितिशब्दस्यार्थानुसारिणी वृद्धिः सूचिता भवति॥ तत्रत यथैनौ नाविवक्ष्येत॥ तथापशु
द्वित्वे द्विवचनं॥ पशुबहुत्वे बहुवचनं कथमूह्येत॥ तस्माद्विवक्षितार्थमंत्राः॥ तस्मिन्नेवार्थे लिंगांतरं सूत्रयति॥ विधिशब्दाच्चेति मंत्रव्याख्या
नरूपो ब्राह्मणगतः शब्दो विधिशब्द इत्युच्यते॥ स चैवमाम्नायते॥ शतं हिमाः शतं वर्षाणि जीव्यास्मेत्येवैतदाहेति॥ तत्र शतं हिमा इ
त्येतस्याख्येय मंत्रस्य प्रतीकं अवशिष्टं तु तस्य तात्पर्यव्याख्यानं॥ मंत्रस्याविवक्षितार्थत्वे तु विना मतात्पर्ये मंत्रे व्याख्याते॥ तस्माद्विव
क्षितार्था मंत्राः प्रयोगकाले स्वार्थप्रकाशनायैवोच्चारयितव्याः॥ तत्र संग्रहश्लोकौ॥ मंत्रा उरु प्रथस्वेति किमदृष्टैकहेतवः॥ यागे पु
पुरोडाशप्रथनादेश्च भासकाः॥ ब्राह्मणेनापि तज्ज्ञानात् मंत्राः पुण्यैकहेतवः॥ न तज्ज्ञानस्य दृष्टत्वात् दृष्टं वरमदृष्टतः॥ नन्वस्तु मंत्रभा
गस्य प्रामाण्यं ब्राह्मणभागस्य न तद्युज्यते॥ तथाहि द्विविधं ब्राह्मणं॥ विधिरर्थवादश्चेति॥ तथा चापस्तंबः॥ कर्मचोदना ब्राह्मणा
नि ब्राह्मणशेषोर्थवाद इति विधिरपि द्विविधः अप्रवृत्तप्रवर्तनमज्ञातज्ञापनं चेति॥ आग्नावैष्णवं पुरोडाशं निर्वपंति॥ दीक्षणीया
यामित्यादयः कर्मकांडगताः विधयोप्रवृत्तप्रवर्तकाः॥ आत्मा वा इदमेक एवाग्र आसीदित्यादयो ब्रह्मकांडगताः विधयो अज्ञातज्ञाप
काः॥ तत्र कर्मकांडगतानां जर्तिलयवाग्वा वा जुहुयात् गवीधुकयवाग्वा वेत्यादिविधीनां नास्ति प्रामाण्यं प्रयत्नयोग्यद्रव्यविधानेन सम्य
गनुभवसाधनत्वाभावात्॥ अयोग्यत्वं च वाक्यशेषे समाम्नातं॥ अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेति॥ तत्र ह्यारण्यतिला
नां आरण्यगोधूमानां चाहुतिद्रव्यत्वं निषिद्धं॥ तस्माद्बाधितो जर्तिलादिविधिरप्रमाणं॥ एवमैतरेयिणां तैत्तिरीयादिब्राह्मणेषु तत्त
त्रादत्वं तत्तथा न कार्यमिति वाक्याभ्यां बहवो विधयो निषिद्धाः॥ अपि चैतरेयब्राह्मणे अनुदिते होमं बहुधा निंदित्वा तस्मादुदिते
होतव्यमित्यसकृच्चिगदितं तैत्तिरीयाश्च तत्रैवामनंति॥ यदनुदिते सूर्ये प्रातर्जुहुयात्॥ उभयमेवाग्नेयं स्यात्॥ उदिते सूर्ये प्रात
र्जुहोति॥ तिपुनरपि तत एवोदितहोमे दोषमामनंति॥ य उदिते सूर्ये प्रातर्जुहुयात्॥ यथातिथये प्रद्रुताय शून्यायावसथायाहार्यं हरंति ५
तादृगेव तदिति॥ तथैवातिरात्रे षोडशिनं गृह्णातीति विधिः॥ नातिरात्रे षोडशिनं गृह्णातीति निषेधेन बाध्यते॥ ज्योतिष्टोमादिषुः

प्यनुष्ठानानंतरमेव स्वर्गादिफलं नोपलभ्यते न हि भोजनानंतरं तृप्तेरनुपलंभोस्ति॥ तस्मात् कर्मविधिषु प्रामाण्यं दुःसंपादनीयं॥ अज्ञातज्ञापकेषु 9
ब्रह्मविधिष्वपि परस्परविरोधान्नास्ति प्रामाण्यं॥ आत्मा वा इदमेक एवाग्र आसीदित्यैतरेयिण आमनंति॥ असद्वा इदमग्र आसीदिति तैत्ति
रीयाः सायं विरोधः॥ तस्माद् द्विविधोपि भागः सर्वोप्यप्रमाणमिति प्राप्ते ब्रूमः॥ अस्त्वेवं जर्तिलादिविधेरप्रामाण्यं॥ तदर्थस्याननुष्ठेयत्वात्॥ अनुष्ठे 1924
यस्त्वर्थ उपरितनेनाक्षीरेण जुहोतीति वाक्येन विधीयते॥ तत्प्रशंसार्थमत्र जर्तिलादिकं अनूद्य निंद्यते॥ यथा गवामश्वानां च प्रशंसार्थमपशवो वा
अन्ये गोअश्वेभ्य इति वाक्येनार्थवादरूपेणाजादीनां पशुत्वं निंद्यते॥ तद्वत्॥ एवं तर्हि अजादेर्यथावस्तुतः पशुत्वमस्ति॥ तथा जर्तिलादिविधिर
पि निषिध्यमानोपि क्वचित् शाखांतरे भवेदिति चेत्॥ भवतु नाम प्रामाण्यमपि तत्र॥ शाखाध्यायिनं प्रति भविष्यति तथा ब्रह्मचाश्रमे निषिद्धमपि प
राह्नभोजनं आश्रमांतरेषु प्रामाणिकं॥ तद्वत्॥ अनेन न्यायेन सर्वत्र परस्परविरुद्धौ विधिनिषेधौ पुरुषभेदेन व्यवस्थापनीयौ॥ यथा मंत्रे
षु पाठभेदः शाखाभेदेन व्यवस्थितत्वात्॥ तैत्तिरीया वायवः स्थोपायवः स्थेति मंत्रमामनंति। वाजसनेयिनस्तूपायवः स्थेत्येतं भागं न समामनंति।
प्रकृतशतपथब्राह्मणे सभागान् पठित्वा ततः तथा सप्तहोताकमंत्रे शाखांतरगतं निराकृत्य पाठांतरं तैत्तिरीया आमनंति। यद्भूयांसमपाससा
वसध्यवसानात्त्विति प्रमायुको यजमानः स्यादिति तन्निराकरणं सप्तवरणा वस्वधिवरणाचेत्येव ब्रूयादिति पाठांतरोपदेशः॥ तत्रानुष्ठानं पुरुषभे
देन व्यवस्था। तद्विधिपुरुषव्यपोडशिग्रहणादिदूषणं च कृतमीमांसायां तं तस्यतं चैव शोभते। पूर्वमीमांसायां दशमाध्यायस्याष्टमपादे षोडशिनो
ग्रहणाग्रहणविकल्पो निर्णीतः॥ द्वितीयस्याध्यायस्य प्रथमपादे कालांतरभाविफलसिद्ध्यर्थमपूर्वं निर्णीतं। तदुत्तरमीमांसायां प्रथमाध्या
यस्य चतुर्थपादे कारणत्वेनाकाशादिषु यथाव्यपदिष्टोक्तेरित्यस्मिन् सूत्रे जगत्कारणे परस्परमात्मानिश्चितत्वे प्रतिपन्ने निराकृतं। द्वितीयाध्या
यस्य प्रथमपादारंभाधिकरणे न मद्भपदेशादिति चेन्न धर्मांतरेण वाक्यशेषादिति सूत्रे तैत्तिरीयवाक्यगतस्यासच्छब्दस्य न शून्यपरत्वं किं त
व्यक्तावस्थापरत्वमिति निर्णीतं। तथा जैमिनिश्चोदनासूत्रे विधिवाक्यं धर्मे प्रमाणमिति प्रतिज्ञायौत्पत्तिकसूत्रे तत्प्रामाण्यं समर्थयामा
स॥ व्यासोपि शास्त्रयोनित्वादिति सूत्रे वेदांतानां ब्रह्मणि प्रामाण्यं प्रतिज्ञाय तत्तु समन्वयादिति सूत्रेः समर्थयामास। तस्माद्मीमांसकस्य
तव पूर्वोक्तस्वाध्यायोदुःपरिहरः। अतो विधिभागस्य प्रामाण्यं सुस्थितं अर्थवादभागस्य प्रामाण्यं महता प्रयत्नेन जैमिनिः समर्थया
मास। तत्सूत्राणि व्याख्यास्यंते॥ तत्र पूर्वपक्षं सूत्रयति। आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यत इति॥ आ
म्नायस्य सर्वस्य क्रियाप्रतिपादनाय प्रवृत्तत्वात् क्रियाप्रतिपादकानामर्थवादानां नास्ति कश्चिद्विवक्षितः स्वार्थः। ते चार्थवादा एवमाम्नायंते।
सोरोदीत् यदरोदीत्तद्रुद्रस्य रुद्रत्वं आत्मनो वपामुदखिदत्। देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्नित्यादयः इत्यस्य वाक्यस्य वि
वक्षितोर्थः कश्चिदपि दृष्टोपि नास्ति। तस्मादिदं वाक्यमनित्यमुच्यते। यद्यप्यनादित्वात् स्वरूपेणानित्यत्वं नास्ति तथापि धर्मावबोधनलक्ष
णस्य नित्यकार्यस्याभावात्॥ अनित्यैः काव्यालापैः समानत्वादप्रमाणमित्यर्थः। ननु दोहतानामर्थवादानामनुष्ठेयधर्मे प्रामाण्याभा
वेपि स्वार्थे प्रामाण्यमस्तु तत्प्रत्यायकत्वेन स्वतः प्रामाण्यस्यापवदितुमशक्यत्वादित्याशंक्यान्ये पुनरर्थवादेषु मानांतरविरोधदर्श
नादप्रामाण्ये सति तद्दृष्टांतेन सर्वेषामप्यर्थवादानामप्रामाण्यमभिप्रेत्य सूत्रयति। शास्त्रदृष्टविरोधाच्चेति। शास्त्रविरोधो दृष्टविरोधः

भा॰ प्र॰

ऽन्यद्दृष्टविरोधइतिद्विविधोविरोधोऽर्थवादेषूपलभ्यते॥ तथाहि। स्तेयं मनोऽनृतवादिनी वागित्यत्र श्रूयमाणं मानसं चौर्यं वाचिकमनृतवदनं च प्रति
षेधशास्त्रेण विरुद्धं। तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिरित्यादिरेवाग्नेर्नक्तं दर्शनेन धूमदर्शनेन प्रत्यक्षदृष्टविरोधः॥ तथा न चैतद्विद्मो वयं ब्राह्मणा वा
स्मोऽब्राह्मणा वेत्यत्रापि प्रत्यक्षविरोधः। को हि तद्वेद यदमुष्मिंल्लोकेऽस्ति वा न वेत्यत्र शास्त्रदृष्टेन विरोधः। स्वर्गकामो यजेतेत्यादिशास्त्रेणामुष्मि
कफलं दृश्यते॥ तस्माद्विरोधादर्थवादानामप्रामाण्यं॥ ननु सोऽरोदीदित्यादीनां निःप्रयोजनत्वात् स्तेयं मन इत्यादीनां च विरोधादप्रामाण्येऽपि फल
प्रतिपादकानामर्थवादानां तु शुभ एव लक्षण्यात्तु प्रामाण्यमित्याशंक्योत्तरं सूत्रयति। तथा फलाभावादिति। यथा मानोत्तरविरुद्धमर्थवादैरु
क्तं॥ तथा फलमप्यविद्यमानमेवोत्तरं रक्ष्यते॥ तथाहि॥ गर्गत्रिरात्रं प्रकृत्य श्रूयते॥ शोभतेऽस्य मुखं य एवं वेदेति। दर्शपूर्णमासयोर्वेदाभिमर्शनं प्र
कृत्य श्रूयते। आस्य प्रजायां वाजी जायते य एवं वेदेति॥ न चैतयोर्वेदितॄणां तत्फलमुपलभामहे न लौकिकफलवाक्यानां विसंवादादप्रामाण्येऽप्यामु
ष्मिकफलवाक्यानामप्रामाण्यमित्याशंक्योत्तरं सूत्रयति॥ अन्यानर्थक्यादिति॥ एवं हि श्रूयते॥ पूर्णाहुत्या सर्वान् कामानवाप्नोति॥ पशुबंधया
जी सर्वांल्लोकानभिजयति। तरति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेति। तत्राग्न्याधेयगतया पूर्णाहुत्या सर्वका
मप्राप्तेरन्यान्यग्निहोत्रादीनि फलरहितानि अनर्थकानि स्युः। तथा निरूढपशुबंधानुष्ठानेन सर्वलोकाभिजयात् ज्योतिष्टोमादीनामानर्थक्यं।
अध्ययनकाले नैवाश्वमेधवेदनेन ब्रह्महत्यादितरणात्तदनुष्ठानं च व्यर्थं स्यात्। तस्मादामुष्मिकफलवाक्यानामप्यप्रामाण्यं॥ ननु मा भूत्फलवा
क्यानां प्रामाण्यं॥ तथापि निषेधवाक्येषु विरोधानुपलंभात्तु प्रामाण्यमित्याशंक्योत्तरं सूत्रयति॥ अभागिप्रतिषेधादिति॥ न पृथिव्यामग्नि
श्चेतव्यो नांतरिक्षे न दिवीत्यत्रांतरिक्षस्य दिवश्च प्रतिषेधभागित्वं नास्ति। तच्चयनप्रसंगस्यैवाभावात्। मा भूत्तर्हि निषेधानां प्रामाण्यं। चव
रः प्रावहणिरकामयनेत्यादीनां पूर्वपुरुषवृत्तांताभिधायिनां विरोधानुपलंभात्तु प्रामाण्यमित्याशंक्योत्तरं सूत्रयति॥ अनित्यसंयोगा
दिति॥ बबरादिरूपेणानित्येनार्थेन संयोगे सत्यस्य वाक्यस्य ततः पूर्वमभावात् कालिदासादिवाक्यवत् पौरुषेयत्वं प्रसज्येत। किं बहुना सर्वथा
पि नास्त्येवार्थवादानां प्रामाण्यमिति पूर्वपक्षः॥ सिद्धांतं सूत्रयति। विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरिति। तुशब्दोऽर्थवादानामप्रा
माण्यं वारयति॥ वायुर्वै क्षेपिष्ठा देवतेत्यादीनामर्थवादानां वायव्यं श्वेतमालभेतेत्यादिना विधिना सहैकवाक्यता स्तुतिधर्मे प्रामाण्यं। न च विधि
वाक्यस्यार्थवादनिरपेक्षेण पदान्वयसंपूर्तेस्तत्त्वार्थवादानां नास्त्युपयोग इति शंकनीयं॥ तेऽप्यर्थवादाः पुरुषप्ररोचनामाकांक्षंतो विधीनां
स्तुत्यर्थत्वेनोपयुक्ताः स्युः। स्तुत्या च प्ररोचितः पुरुषस्तत्र प्रवर्तते॥ नन्वर्थवादानां प्रमादपठितत्वेनोपेक्षणीयत्वात्। किमनेनैकवाक्यताप्रयासेने
त्याशंक्याह॥ तुल्यं च सांप्रदायिकमिति॥ अनध्यायवर्जनादिनियमपुरःसरं गुरुसंप्रदायादध्ययनं यत्तत्सांप्रदायिकं तद्विधीनामर्थवादानां च समा
नं॥ तस्माद्विधिवदेतेषामपि प्रमादपाठो न भवति॥ ननु शास्त्रदृष्टविरोधाख्ये स्तेयमर्थवादेऽनुपपत्तिरुक्तेत्याशंक्याह॥ अप्राप्ता चानुपपत्तिः ५
प्रयोगे हि विरोधः स्याच्छब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्येतेति तत्र वार्तिके तत्सूत्रमध्याहृत्य त्रिधा व्याख्यातं॥ अप्राप्ता च उपपत्तिः अप्रा
प्ता चानुपपत्तिः अप्राप्तं चानुपपन्नमिति। स्तेयं मन इत्यादौ शास्त्रविरोधाद्यनुपपत्तिरप्राप्ता प्रयोगस्यानुक्तत्वात्॥ प्रयोगे हि स्तेयादीना

नामुच्यमाने शास्त्रविरोधः स्यात्॥ न चात्र स्तेयं कर्तव्यमिति प्रयोग उच्यते॥ किंतु स्तेयशब्दार्थ एवोच्यते। न च स्तेयशब्दार्थः प्रयोगभूतस्तस्मा
च्छब्दार्थवचनमात्रेण शास्त्रविरोधाभावादयमर्थवाद उपपन्न एव॥ ननु स्तुत्यर्थेन विधीनां स्युरिति युक्तं॥ तदसत्॥ वैयधिकरण्यात्॥
वेतसशाखयावकाभिश्चाग्निं विकर्षत्यापो वै शांता इत्यत्र वेतसावके विधीयेते॥ आपश्च स्तूयंते इति वैयधिकरण्यमित्याशंक्याह॥ गु
णवादस्त्विति॥ तुशब्दो वैयधिकरण्यदोषं वारयति गुणवादो ह्यत्र विवक्षितः। यथा लोके काश्मीराभिजनो देवदत्तः॥ काश्मीरदेशे पुरुषमा
ने पुरुषस्तत्मात्मानं मन्यते। एवमत्रापि अप्सु जातत्वेन सावके अप्स्तुतता सत्यैव स्तुते भवतः शांता ह्यापस्तज्जातत्वात्तु सावकेऽस्य शम
यितृत्वे सत्यैव यजमानस्याग्निर्दाहमयत इत्येतादृशस्य गुणस्य वादोऽत्राभिप्रेतः सोऽरोदीदित्यत्रापि रजतस्य पतिताश्रुरूपत्वाद्रजतदाने गृहे
ऽपि रोदनप्रसंगात् बर्हिषि रजतं न देयमिति तन्निषेधेन विधेयेनार्थवादस्यैकवाक्यत्वं॥ तत्र रजतदानाभावे रोदनाभावरूपो गुणोऽत्र वि
वक्षितः॥ तेन च गुणेन रजतदाननिवारणरूपो विधिः स्तूयते॥ यद्यपि रजतस्याश्रुप्रभवत्वमत्यंतमसत्॥ तथापि प्रयोक्तृत्वाद् विधेः स्तु
तिः संपद्यते॥ यः प्रजाकामः पशुकामः स्यात्॥ स एतं प्राजापत्यमजं तूपरमालभेतेत्ययं विधिः। प्रजापतिर्वपोत्खेदनेन स्तूय
ते॥ तस्मात्प्रजापतिः स्वां वपामुदखिदत्तामग्नौ प्रहृत्य ततो जातं तूपरमजमालभ्य प्रजाः पशूंश्चालभ्यवान्॥ तस्मात्प्रजादिसंपादकोऽयं तू
पर इति तूपरगुणस्य वादोऽत्र विवक्षितः॥ आदित्यः प्रायणीयश्चरुरित्येष विधिर्दिशो न प्राजानन्नित्यनेन दिग्मोहेन स्तूयते॥ यदियमादितिर्दे
वता दिग्मोहमप्यपनीय दिग्विशेषं ज्ञापयति॥ तथा बहुविधकर्मसमुदायरूपे सोमयागेऽनुष्ठानविषयं भ्रममपनयतीति किमुत वक्तव्य
मित्येवमादितिदेवतागतस्य गुणस्य वादोऽत्र विवक्षितः॥ स्वकीयवपोत्खेदादेव यजनाध्यवसानमात्रेण अविद्यमानेनाप्यर्थेन लोके स्तुतिदर्शनात्।
दिग्मोहश्चैतत्कभयमस्त्वभावाभावा॥ सर्वथापि स्तुतिपरत्वमभ्युपगतवतामस्माकं न किंचिद्धीयते॥ शिरः वाते वर्धते वत्सगुडूचीश्चेद्यपि
वेत्यादावविद्यमानेनाप्यर्थेन लोके स्तुतिदर्शनात्॥ अथ पूर्वपक्षिणा शास्त्रविरोधं दर्शयितुं यदुदाहृतं स्तेयं मनोऽनृतवादिनी वागिति त
त्रोत्तरं सूत्रयति॥ रूपात्प्रायादिति॥ हिरण्यं हस्ते भवत्यथ गृह्णातीत्येनं विधिं स्तोतुमयमर्थवाद उच्यते। तथा लोकेऽपि कुरूपिणा दे
वदत्त एव पूजयितव्य इत्यनेन देवदत्तपूजां स्तोतुमेवोदासीन्यमस्यायुपन्यस्यते॥ ननु पूज्यत्वमस्ये वारयितुं॥ एवमत्रापि हस्ते हिरण्य
ग्रहणं प्रशंसितुं मनसस्तेनरूपत्वं वाचोऽनृतवादिनीत्वं चोपन्यस्यते॥ तत्र गुणवादेन शब्दार्थो योजनीयः। यथा स्तेनाः प्रच्छन्नरूपाः ए
वं मनोऽपीति प्रच्छन्नरूपत्वमत्र गुणः प्राचुर्येण वागनृतं वदतीति प्राचुर्यिकत्वं तत्र गुणः हस्तस्तु न प्रच्छन्नः॥ नाप्यनृतबहुलः॥ अतो हस्ते हि
रण्यधारणं प्रशस्तमिति स्तूयते॥ तद्वापि दृष्टविरोधाय धूम एवाग्नेर्दिवा ददृश इत्यादिकं उदाहृतं॥ तत्रोत्तरं सूत्रयति॥ दूरभूयस्त्वा
दिति अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति एतौ विधी स्तोतुं सोऽर्थवादः॥ यस्माद्दार्चि
र्दिवा न दृश्यते तस्मात्सूर्यमंत्र एव प्रातः प्रयोक्तव्यः॥ यस्माद्रात्रावर्चिरेव दृश्यते तस्मादग्निमंत्रो रात्रौ प्रयोक्तव्यः सूर्यमंत्रश्च दिवा उत्प
न्नतयोर्मंत्रयोः स्तुतिर्धूमार्चिषोरदर्शनोपन्यासस्तु दूरभूयस्त्वगुणनिमित्तः॥ भूयसि हि दूरे पर्वताग्रे रसावस्थायां पि न विस्पष्टं दृश्यते।
किंतु तृणसादृश्येन तेषां दर्शनाभास एव तद्वदत्रापि। यदन्यद्दृष्टविरोधायैवोदाहृतं न चैतद्विद्मो वयं॥ ब्राह्मणा वास्मो ब्राह्मणा

11/1924

भा॰ प्र॰
६

वेतितओत्तरंसूत्रयति॥स्यपराधात्कर्तुश्चपुत्रदर्शनादिति॥प्रवरेप्रव्रीयमाणेब्रूयात॥देवाःपितरइत्यस्यविधेयस्तावकोयमर्थवादः॥यदियजमानोदे
वाःपितरइत्यादिमंत्रेणप्रवरमनुमंत्रयत॥तदानीमब्राह्मणोपिब्राह्मणोभवेदितितस्यस्तुतिः॥नचैतद्विरुद्धंएतद्रत्नानवचनंदुर्ज्ञानत्वगुणेनतत्र
प्रयुज्यते॥यतस्त्रियोपराधोभवतितत्रकर्तुरस्यादृयितुर्जारस्यापिपुत्रोदृश्यतेअतःपरुषकपपत्योरुभयोःपुत्रदर्शनात्स्वकीयज्ञानकीदृशमि
तिदुर्ज्ञानंअनेनाभिप्रायेणप्रयुक्तत्वान्नास्तितत्रदृष्टविरोधः॥नहितत्रदृश्यमानंस्वब्राह्मण्यमपवदितुंनचैतद्विरुद्धंइत्युपपन्यस्तं॥यदपिश्म
शानीयदर्शनविरोधायोदाहृतं॥कोहितद्वेदयद्यमुष्मिंलोकेस्तिवानवेतितओत्तरंसूत्रयति॥अकालिकेप्सति॥दिदृक्षतीकश्चानकरोतीतिमात्री
नवंशस्यद्वारविधिःतस्यशेषोयंकोहितद्वेदेतिधूमाद्युपद्रवपरिहारेणप्रत्यक्षेणफलेनद्वारविधिःस्तूयते॥स्वर्गप्राप्तिरूपंतुफलमाकालिकंअ
कालेभवमाकालिकंविप्रकृष्टकालीनंनत्विदानीतनमित्यर्थः॥तस्येप्सातस्यप्राप्तुमिच्छासाचकोहितद्वेदेत्यनिश्चयोपन्यासेकारणंयथाभाविका
लीनःपुत्रपौत्रादिरुतांतोतानिश्चेतुंनशक्यते॥तद्वत्स्वर्गप्राप्तिर्भाविकालीनेतिगुणयोगादनिश्चयोपन्यासःधूमादिपरिहारस्तुप्रत्यक्षत्वान्निश्चितइ
त्यभिप्रायः॥यदप्यन्यदृष्टविरोधायोदाहृतं॥शोभतेस्यमुखंयएवंवेदेति।तत्रोत्तरंसूत्रयति॥विद्याप्रशंसेति॥सोयंगर्गत्रिरात्रविधेःशेषःत
द्विषयंवेदनमपिमुखशोभाहेतुःकिमुतानुष्ठानमितिस्तूयते॥तथाकर्णाभरणादिनामुखंशोभितंभवति॥एवंवेदितुरुत्साहेनविकसितंवदनं
शोभितमिवशिष्यैरुद्वीक्ष्यते॥अतःशोभासादृश्यगुणयोगात्शोभतइत्युच्यते॥यदप्यन्यद्विरोधायोदाहृतं॥आस्यप्रतायांवाजीजायतेय
एवंवेदेति॥सोपिवेदानुमंत्रणविधेःशेषःअत्रापिकैमुतिकन्यायेनस्तुतिःपूर्ववद्योतनीयावेदितुःपुत्रःपितुरशिक्षयास्वयमपिविद्वान्भवति।
ततःप्रतिग्रहेणान्नंप्राप्नोति॥तस्मादिदृशंगुणमभिप्रेत्यवाजीजायतइत्युक्तं।यदप्यन्यानर्थक्यायोदाहृतं॥पूर्णाहुत्यासर्वान्कामानवाप्नोती
तितत्रोत्तरंसूत्रयति॥सर्वत्वमाधिकारिकमितिपूर्णाहुतिंजुहुयादित्यस्यविधेःशेषोयंसर्वकामावाप्तिहेतुत्वात्प्रशस्तेयमाहुतिरितिस्तूयतेय
थासर्वेब्राह्मणाभोजयितव्याइत्यत्रसर्वत्वंस्वगृहागतब्राह्मणविषयंएवंपूर्णाहुत्याकर्मसांगत्वंयत्फलंतस्मिन्नधिकारेप्रस्तावेसंभावितंतद्वि
षयमेवसर्वत्वंद्रष्टव्यं॥पूर्णाहुतेरभावेसत्याधानरूपंकर्मांगविफलंभवतितत्सर्वंवैकल्यंपूर्णाहुत्यासमाधीयतइत्येकःकामःतस्मिन्समाहितेस
त्यासत्याहवनीयादयग्नयोग्निहोत्रादिकर्मसुयोग्याभवंतीत्ययमन्यःकामःतैश्चकर्मभिस्तत्फलंप्राप्यतइतिकामांतरंईदृशीसर्वकामप्राप्ति
राहुत्यंतरेष्वपिविद्यतइतिचेन्नविद्यतांनामकिंनःछिन्नंनखलुएतावतापूर्णाहुतिस्तुतेःकाचिद्धानिरस्तिननुपूर्णाहुतेरंगस्वभावत्वान्नदी
यफलश्रुतेरर्थभावत्वेनस्तावकत्वंभवतु॥द्रव्यसंस्कारकर्मसुपरार्थत्वात्फलश्रुतिरर्थवादइतिसूत्रेणनिर्णीतत्वात्।पशुबंधवाक्यस्यतुक
र्मविधायकत्वात्॥सर्वत्वेकाभिप्रायस्यमुख्यफलत्वादन्यानर्थक्यंदुर्वारमित्याशंक्योत्तरंसूत्रयति॥फलस्यकर्मनिष्पत्तेस्तेषांलोकवत्परिमाण
तःसारतोवाफलविशेषःस्यादिति।पृथिव्यंतरिक्षद्युलोकेष्वन्यतमलोकवत्परिमाणतःसारतोवाफलविशेषस्याभिप्रायरूपंफलंपशुबंध
कर्मणानिष्पद्यते॥तेषांचपृथिव्यादीनांफलानांकर्मांतरेणपरिमाणाधिक्यंसारत्वंवासंपद्यते॥ततःफलविशेषःस्यादितिनास्त्यानर्थक्यंलो
कवदित्युक्तार्थदृष्टांतःयथालोकेनिष्केणखारीपरिमितानव्रीहीनविक्रीयनिष्कांतरेणपुनःक्रेसतिपरिमाणाधिक्यंभवतियथावानिष्केणवस्त्रमा
त्रंलभ्यतेनिष्कद्वयेनतुसारवत्तदुकूलंतथाभोगाधिक्यंभोगसारत्वंवाकर्मांतरेणद्रष्टव्यं॥ब्रह्महत्यायाअपिमानस्याःस्वल्पायावेदनमात्रेण

तरणंकाचिक्याकृतमहत्याअश्वमेधेनेतिनास्त्यानर्थक्यंयोपिनांतरिक्षेनइतीत्यप्रसक्तप्रतिषेधउदाहृतः॥तथाबबरःप्रावाहणिरित्यनित्यसंयोगउदाहृ
तः॥तत्रोभयत्रोत्तरंसूत्रयति॥अंत्ययोर्यथोक्तमिति॥अंत्ययोरनयोःउदाहरणयोरुत्तरंपूर्वोक्तमेवद्रष्टव्यं॥अंतरिक्षशाठेचयननिंदारूपोर्थवादोहिरण्यं 13
निधायचेतव्यमित्यस्यविधेःशेषः।अतोत्रस्तुत्यर्थत्वेनविधीनांस्फुरितकृत्यमेवोत्तरं॥अंतरिक्षेचयनप्रसक्त्यभावात्तन्निषेधानित्यानुवादोस्तु।तेनापि 1924
विधिःस्तोतुंशक्यतेनित्यसिद्धार्थानुवादिनावायोःक्षेपिष्ठत्वेनपशुविधिस्तुतत्वात्॥बबरःप्रावाहणिरकामयतेत्यत्रापिबबरनामकःकश्चिदनित्यः
पुरुषोमनुष्यानविवक्षितःकिंतुबबरध्वनियुक्तःप्रकर्षेणवहनशीलोवायुर्वचनहारदृशार्थानित्यएवार्थोविवक्षितइत्येतदुत्तरंप्रथमपादस्यांतिमा
धिकरणेप्रोक्तं॥तस्मात्संभावितदोषाणांपरिहृतत्वादर्थवादानामस्तिप्रामाण्यंतत्रसंग्रहश्लोकाः॥वायुर्वाइत्ययमादेरर्थवादस्यमानता॥नविधेयेस्ति
धर्मेकिंचिद्वासोतत्रविद्यते॥विध्यर्थवादशब्दानांमिथोपेक्षापरिक्ष्याया॥नारुपेकवाक्यताधर्मप्रामाण्यंसंभवेत्तुनः॥विध्यर्थवादोसार्थेप्र
त्रास्तपुरुषार्थयोः।तेनैववाक्यतानस्माद्वादानांधर्ममानितेतिनतदेवंचेदेविद्यमानानांत्रयाणांमंत्रविध्यर्थवादभागानांअप्रामाण्यकारणाभावाद्बो
धकानांतेषांप्रामाण्यस्यस्वतस्त्वांगीकाराच्चकृत्स्नस्यापिवेदस्यप्रामाण्यंप्रसिद्धं॥नचैवमपिवेदस्यपौरुषेयत्वेनविप्रलंभकवाक्यवदप्रामाण्यंस्यात्तेषा
रुपेयत्वंचप्रथमपादेपूर्वपक्षत्वेनजैमिनिःसूत्रयामास।वेदांश्चैकेसंनिकर्षंपुरुषाख्याःइतिएकेवादिनोवेदान्प्रतिसंनिकर्षंमन्यंतेकालिदासादिभिर्नि
र्मितानांरघुवंशादिग्रंथानांसमुत्पत्त्यर्थश्चकारःतेस्मत्रदृष्टांततयासमुत्कीर्त्यंतेतथारघुवंशादयइदानींतनास्तथावेदाअपिनतुवेदाअनादयः
अतएववेदकर्तृत्वेनपुरुषाआख्यायंते।वैयासिकंभारतंवाल्मीकीयंरामायणमित्यत्रयथाभारतादिकर्तृत्वेनव्यासादयआख्यायंते॥तथा
काठकंकौथुमंतैत्तिरीयमित्येवंतत्तद्वेदशाखाकर्तृत्वेनकठादीनामाख्यानात्तद्वेदाःपौरुषेयाः।ननुनित्यानामेवसतांवेदानामुपाध्यायवत्संप्र
दायप्रवर्तकत्वेनकाठकादिसमाख्यास्यादित्याशंक्यसूत्रयंतरंसूत्रयति॥अनित्यदर्शनाच्चेति॥अनित्यानांजननमरणवतांबबरादयोवेदाःश्रू
यंते॥बबरःप्रावाहणिरकामयत॥कुसुरुबिंदुरौद्दालकिरकामयतेतितथासतिबबरादिभ्यःपूर्वमभावादनित्यावेदाःविमतंवेदवाक्यंपौ
रुषेयंवाक्यत्वात्कालिदासादिवाक्यवदित्याद्यनुमानसमुच्चयार्थश्चकारःसिद्धांतंसूत्रयति।उक्तंतुशब्दपूर्वत्वमिति।तुशब्दोवेदानामनित्यत्वं
वारयति॥शब्दस्यवेदरूपस्यकठादिपुरुषेभ्यःपूर्वत्वमनादित्वंप्राचीनैरेवसूत्रैरुक्तं॥औत्पत्तिकस्तुशब्दस्यार्थेनसंबंधइत्यस्मिन्सूत्रेऔत्प
त्तिकशब्देनसर्वेषांशब्दानांवेदानांतदर्थानांतदुभयसंबंधानांचनित्यत्वंप्रतिज्ञाय्योत्तराभ्यांशब्दाधिकरणवाक्याधिकरणाभ्यामुपपादितत्वा
तकानर्हिकाठकाद्याख्याख्यायिकाख्यायातिरित्याशंक्यसंप्रदायप्रवर्तनात्सेयमुपपद्यते॥इत्युत्तरंसूत्रयति॥आख्याप्रवचनादिति॥अस्तीय
माख्यायिकाख्यागतिःततःपरंबबरादिअनित्यदर्शनंयदुक्तं।तस्यकिमुत्तरमित्याशंक्योत्तरंसूत्रयति॥परंतुश्रुतिसामान्यमात्रमिति॥
यत्परंबबरादिकंतच्छब्दसामान्यमेवनतुमनुष्योबबरनामकोत्रविवक्षितःबबरध्वनियुक्तस्यप्रवहणस्वभावस्यवायोरत्रवक्तुंशक्य
त्वात्।ननुवेदेकश्चिदेवंश्रूयते।वनस्पतयःसत्रमासतसर्पाःसत्रमासतेति॥तत्रवनस्पतीनामचेतनत्वात्सर्पाणांचेतनत्वेपिविद्याराहि
त्यात्तत्तदनुष्ठानंसंभवति।अतोजरद्गवःकंबलपादुकाभ्यांद्वारिस्थितोगायतिमद्रकाणि।तत्राब्राह्मणीपृच्छतिपुत्रकामाराजनरुमायांलूसक
स्यकोर्थःजरद्गवोगायतिमद्रकाणीत्येतद्वन्नबालवाक्यसदृशत्वात्केनचित्कृतोवेदइत्याशंक्योत्तरंसूत्रयति॥कृतेवाविनियोगःस्यात्कर्मणः

भा॰ भू॰
७

समत्वादिति॥ यदि ज्योतिष्टोमादिवाक्यं केनचित्पुरुषेण क्रियेत॥ तदानीं कृते तस्मिन्वाक्ये स्वर्गसाधनत्वे ज्योतिष्टोमस्य विनियोगो न स्यात्॥ साध्य-
साधनभावस्य पुरुषेण ज्ञातुमशक्यत्वात् श्रूयते तु विनियोगः॥ ज्योतिष्टोमेन स्वर्गकामो यजेतेति॥ तेन चेत् उन्मत्तवाक्यसदृशं कोपि कश्चिद्विधिवाक्यवद्भास-
करणेतिकर्तव्यतारूपैस्त्रिभिरंशैरूपेता या भावना सा अवगम्यमाना॥ लोके हि ब्राह्मणान्भोजयेदिति विधौ किं केन कथमित्याकांक्षायां तृप्तिमुद्दिश्यौद-
नेन द्रव्येण पाककृतादिपरिवेषणप्रकारेणेति यथा व्याख्याने॥ ज्योतिष्टोमविधावपि स्वर्गमुद्दिश्य सोमेन द्रव्येण दीक्षणीयाद्यंगोपकारप्रकारेण कथं तस्य
मुन्मत्तवाक्यसदृशं भवेदिति॥ वनस्पत्यादिसत्रवाक्यमपि तत्सदृशं तस्य सत्रकर्मणो ज्योतिष्टोमादिना समत्वात्॥ घटशब्दः कंबुग्रीवाद्यमानोर्थं बोधय-
ति॥ यत्परो हि शब्दः स शब्दार्थ इति न्यायविद आहुः ज्योतिष्टोमादिवाक्यस्य विधायकत्वादनुष्ठाने तात्पर्यं वनस्पत्यादिसत्रवाक्यस्यार्थवादत्वात्॥ प्रशं-
सायां तात्पर्यं सा चाबाधितमानेनापि कर्तुं शक्यते॥ अचेतना अविद्वांसोपि सत्रमनुष्ठितवंतः किं पुनश्चेतना विद्वांसो ब्राह्मणा इति सत्रस्तुतिश्च कारः प्र-
र्थपक्षोक्तस्य वाक्यत्वहेतोः कर्त्रनुपलंभेन प्रामाण्यं समुच्छिनोति॥ तस्माच्छास्ति वेदस्यापौरुषेयत्वं॥ अत्रैतौ संग्रहश्लोकौ॥ पौरुषेयं न वा वेदवाक्यं स्या-
त्पौरुषेयता॥ काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत्॥ समाख्यानं प्रवचनाद्वाक्यत्वं तु पराहतं॥ तत्कर्त्रनुपलंभेन स्यात्ततोपौरुषेयता ननु
भगवता बादरायणेन वेदस्य ब्रह्मकार्यत्वं सूचितं॥ शास्त्रयोनित्वादिति॥ ऋग्वेदादिशास्त्रकारणत्वाद्ब्रह्म सर्वज्ञमिति सूत्रार्थः॥ बाढं नैतावता पौ-
रुषेयत्वं भवति मनुष्यनिर्मितत्वाभावात् ईदृशमपौरुषेयत्वमभिप्रेत्य व्यवहारदशायामाकाशादिवन्नित्यत्वं बादरायणेन देवताधिक-
रणे सूत्रितं॥ अत एव च नित्यत्वमिति॥ श्रुतिस्मृती चात्र भवतः॥ वाचा विरूपनित्ययेति श्रुतिः॥ अनादिनिधना नित्या वागुत्सृष्टा स्वयंभु-
वेति स्मृतिः॥ तस्मात्कर्तृदोषशंकाया अनुदयान्मंत्रब्राह्मणात्मकस्य वेदस्य निर्विघ्नं प्रामाण्यं सिद्धं॥ ननु मंत्रब्राह्मणात्मकत्वं वेदस्य न युक्तं
॥ तयोः स्वरूपस्य निर्णेतुमशक्यत्वात्॥ मैवं॥ द्वितीयाध्यायस्य प्रथमपादे समाम्नमयोरधिकरणयोर्निर्णीतत्वात्॥ तत्र मंत्राधिकरणमा-
रचयति॥ अहे बुध्निय मंत्रं म इति मंत्रस्य लक्षणं॥ नास्त्यस्ति वास्य नास्त्येतद्व्याप्त्यादेरवारणात्॥ याज्ञिकानां समाख्यानं लक्षणं दोषव-
र्जितं॥ तेनुष्ठानस्मारकाद्यो मंत्रशब्दं प्रयुंजते॥ आधान इदमाम्नायते॥ अहे बुध्निय मंत्रं मे गोपायेति तत्र मंत्रस्य लक्षणं नास्ति॥ अव्या-
प्त्यतिव्याप्त्योर्वारयितुमशक्यत्वात्॥ नहि तावदभिधायको मंत्र इत्युक्ते वसंताय कपिंजलानालभत इत्यस्य मंत्रस्य विधिरूपत्वादव्याप्तिः॥
मननहेतुर्मंत्र इत्युक्ते ब्राह्मणेतिव्याप्तिः॥ एवमसिपादांतो मंत्र उत्तमपुरुषांतो मंत्र इत्यादिलक्षणानां परस्परमव्याप्तिरिति चेत्॥ मैवं॥ या-
ज्ञिकसमाख्यानस्य निर्दोषलक्षणत्वात्॥ तच्च समाख्यानमनुष्ठानस्मारकादीनां मंत्रत्वं गमयति॥ उरु प्रथस्वेत्यादयोनुष्ठानस्मारकाः॥ अ-
ग्निमीळे पुरोहितमित्यादयः स्तुतिरूपाः इषे त्वेत्यादयस्त्वांताः॥ अग्न आयाहि वीतय इत्यादय आमंत्रणोपेताः॥ अग्नीदग्नीन्विहरेत्यादयः
प्रैषरूपाः॥ अधः स्विदासीदुपरि स्विदासीदित्यादयो विचाररूपाः॥ अंबे अंबाल्यंबिके न मा नयति कश्चनेत्यादयः परिदेवनरूपाः॥ पृच्छा-
मि त्वा परमंतं पृथिव्या इत्यादयः प्रश्नरूपाः॥ वेदिमाहुः परमंतं पृथिव्या इत्यादय उत्तररूपाः॥ एवमन्यदुदाहार्यं॥ ईदृशं स्वत्यंतविज्ञा- ७
तीयेषु समाख्यानमंतरेण नान्यः कश्चिदनुगतो धर्मोस्ति॥ यस्य लक्षणत्वमुच्येत लक्षणस्य चोपयोगः पूर्वाचार्यैर्दर्शितः॥ ऋषयोपि
पदार्थानां नांतं यांति पृथक्त्वशः॥ लक्षणेन तु सिद्धानामंतं यांति विपश्चित इति॥ तस्मादभियुक्तानां मंत्रोयमिति समाख्यानं लक्ष-

णं॥ अथ समाधिकरणमारचयति॥ नास्त्येतद्ब्राह्मणान्यत्र लक्षणं विद्यतेथवा॥ नास्तीयत्तो वेदभागा इति क्लृप्तेरभावतः॥ मंत्रश्च ब्राह्मणं चेति द्वौ भा- 15/1924
गौ तेन मंत्रतः॥ अन्यद्ब्राह्मणमित्येतद्भवेद्ब्राह्मणलक्षणं॥ चातुर्मास्येष्विदमाम्नायते एतद्ब्राह्मणान्येव पंच हवींषीति तत्र ब्राह्मणलक्ष-
णं नास्ति॥ कुतः॥ वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु लक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितुमशक्यत्वात्॥ पूर्वो-
क्तमंत्रभागोप्युक्तः॥ भागांतराणि कानिचित्॥ पूर्वैरुदाहृतं संगृहीतानि॥ हेतुर्निर्वचनं निंदा प्रशंसा संशयो विधिः॥ परक्रिया पुराकल्पो व्यव-
धारणकल्पना इति॥ तेन ह्यन्नं क्रियत इति हेतुः॥ तद्दध्नो दधित्वमिति निर्वचनं॥ अमेध्या वै माषा इति निंदा॥ वायुर्वै क्षेपिष्ठा देवतेति प्रशं-
सा॥ तद्व्यचिकित्सज्जुहवानी३ मा हौषा३मिति संशयः॥ यजमानेन संमितौदुंबरी भवतीति विधिः॥ माषानेव मह्यं पचतेति परकृतिः॥ पुरा
ब्राह्मणा अभैषुरिति पुराकल्पः॥ यावतोश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति विशेषावधारणकल्पना॥ एवमन्यदु-
प्युदाहार्यं॥ नच हेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणं॥ मंत्रेष्वपि हेत्वादिसद्भावात्॥ इंद्रवो वामुशंति हीति हेतुः॥ उदानिषुर्महीरिति तस्मा-
दुदकमुच्यत इति निर्वचनं॥ मोघमन्नं विंदते अप्रचेता इति निंदा॥ अग्निर्मूर्धा दिव इति प्रशंसा॥ अधः स्विदासीदिति संशयः॥ वसंताय कपिं-
जलानालभत इति विधिः॥ सहस्रमयुतं ददामीति परकृतिः॥ यज्ञेन यज्ञमयजंत देवा इति पुराकल्पः॥ इतिकरणबहुलं ब्राह्मणमिति चे-
त्॥ न॥ इत्यवदद् इत्ययजथा इत्यपचद् इति ब्राह्मणो गायेदित्यस्मिन्ब्राह्मणेन गातव्ये मंत्रेतिव्याप्तेः॥ इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्म-
णमिति चेत्॥ न॥ राजा चिद्यं भगं भक्षीत्याहेत्यो वा रक्षा॥ ऋचिरस्मीत्यादेरनयोर्मंत्रयोरतिव्याप्तेः॥ आख्यायिकारूपं ब्राह्मणमिति चे-
त्॥ न॥ यमीयमसंवादसूक्तादिष्वतिव्याप्तेः॥ तस्मान्नास्ति ब्राह्मणस्य लक्षणमिति प्राप्ते ब्रूमः॥ मंत्रब्राह्मणरूपौ द्वावेव वेदभागावित्यंगीकारात्॥
मंत्रलक्षणस्य पूर्वमभिहितत्वात्॥ अवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति॥ तदेतल्लक्षणं जैमिनिः सूत्रयामास तथा चोदकेषु मं-
त्राख्या शेषे ब्राह्मणशब्द इति॥ तस्मिन्वेदके पुनरभिधायकेषु वाक्येषु मंत्र इति समाख्या संप्रदायविद्भिर्व्यवस्थिता॥ मंत्रान्धीमह इति॥ मंत्रव्यति-
रिक्ते भागे तु ब्राह्मणशब्दस्तेन व्यवह्रियत इत्यर्थः॥ ननु ब्रह्मयज्ञप्रकरणे मंत्रब्राह्मणव्यतिरिक्ता इतिहासादयो भागा आम्नायंते॥ यद्ब्राह्मणानीति-
हासपुराणानि कल्पान्गाथा नाराशंसीरिति॥ मैवं॥ विप्रपरिव्राजकन्यायेन ब्राह्मणावांतरभेदानामेवेतिहासादीनां पृथगभिधानात्॥
देवासुराः संयत्ता आसन्नित्यादय इतिहासाः॥ इदं वा अग्रे नैव किंचिदासीदित्यादिकं जगतः प्रागवस्थामुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पु-
राणं॥ कल्पस्त्वारणकेनुकवयनप्रकरणे समाम्नायत इति मंत्राः कल्पोत ईर्ध्वयस्विलिंहरोदिति॥ अग्निचयने यम गाथाभिः परिगायंतीति वि-
हिता मंत्रविशेषा गाथाः॥ मनुष्यवृत्तांतप्रतिपादिका ऋचो नाराशंस्यः॥ तस्मान्मंत्रब्राह्मणव्यतिरिक्तभागाभावान्मंत्रब्राह्मणात्मकस्य
वेदस्य लक्षितत्वान्न दुर्भणत्वमिति वेदस्य सुस्थितं॥ मंत्रावांतरविशेषश्च तस्मिन्नेव पाद इत्थं विचारितः॥ ऋक्सामयजुषां लक्ष्म सांकर्यादिति शंकि-
ते पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्त्यसंकरः॥ इदमाम्नायते॥ अहे बुध्निय मंत्रं मे गोपाय यमृषयस्त्रैविदा विदुः॥ ऋचः सामानि यजूंषीति॥ सा हि श्री-
र्वेदानवर्द्धतीति त्रिविदः॥ त्रिविदां संबंधिनोध्येतारस्त्रैविदाः॥ ते च यं मंत्रभागमृगादिरूपेण त्रिविधमाहुः॥ तं गोपायेति योजना॥ तत्र त्रिविधा-
नामृक्सामयजुषां व्यवस्थितं लक्षणं नास्ति॥ कुतः॥ सांकर्यस्य दुःपरिहरत्वात्॥ अध्यापकप्रसिद्धिपुरःसरमृग्वेदादिषु पठितो मंत्र इति हि लक्षणं वक्त-

भा॰ प्र॰ ८

यं॥ तत्र सर्वार्णादिशेषः सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरित्ययं मंत्रो यजुर्वेदे संप्रतिपन्नः यजुःषु पठितः॥ न चैतस्य
जुष्ट्वमस्तितत्र ब्राह्मणे सावित्र्या ऋचो वेदस्य बहुत्वात् एतत्सामगाथ भागत इति प्रतिज्ञाय किंचित्साम यजुर्वेदे गीयते अच्छिद्रमस्यच्युतमसि
प्राणसंज्ञितमसीति त्रीणि यजूंषि सामवेदे समाम्नातानि॥ तथा गीयमानस्य साम्न आश्रयभूता ऋचः सामवेदे समाम्नाताः॥ तस्मान्ना
म्नानलक्षणमिति चेत्॥ न॥ पादादीनामसंकीर्णलक्षणत्वात्॥ पादेनार्धर्चेन चोपेता वृत्तबद्धा मंत्रा ऋचः गीतिरूपा मंत्राः सामानि वृत्तगीति
वर्जितत्वेन प्रश्लिष्टपठिताः मंत्राः यजूंषीत्येवं नैव क्वापि संकरः॥ तदेतत्त्रैविध्यं जैमिनिना सूत्रत्रयेण लक्षितं॥ तेषामृग्यत्रार्थवशेन पादव्य
वस्थागीतिषु सामाख्या शेषे यजुःशब्द इति॥ एतमेव मंत्राणां तरविशेषमुपजीव्य वेदानामृग्वेदो यजुर्वेदः सामवेद इति त्रैविध्यं संपन्नं॥ ते
षां च वेदानां सर्वेषामन्यतमस्य वा स्वप्रज्ञानुसारेणाध्ययनमुपनीतेन कर्तव्यं॥ तथा च याज्ञवल्क्यः स्मरति॥ वेदानधीत्य वेदौ वा वेदं वापि य
थाक्रममिति॥ एवं वेदपक्षे पितृपितामहादिपरंपराप्राप्तस्ववेदोऽध्येतव्य इत्यप्रेत्य स्वाध्यायोऽध्येतव्य इति॥ स्वशब्द आम्नातस्तत्राध्ययनं
न काम्यं॥ किंतु नित्यं अत एव पुरुषार्थानुशासने सूत्रितं॥ वेदस्याध्ययनं नित्यमनध्ययने पातादिति॥ पातित्यं चैवमाम्नायते॥ अथ यस्तपा
यः स्वाध्यायो वेदः पवित्रं वा एतत्तस्य न तत्रात्य भागो वाचि भवत्य भागो नाकेतदेषा भुक्त॥ यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि
भागो अस्ति॥ यदीं शृणोत्यलकं शृणोति न हि प्रवेद सुकृतस्य पंथामिति॥ तस्मात्स्वाध्यायोऽध्येतव्य इति॥ अध्येतारं पुरस्तन्दीय प्रयासाभि
ज्ञानेन सस्त्रिवत्यालयतीति सखिविदः ब्रह्म ब्रह्म प्रयाससाध्यक्रतुफलस्याध्ययनमात्रेण संपादनं तत्त्याज्यं तदृष्याम्नायते॥ यं यं क्र
तुमधीते तेन तेन हास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छतीति य एवं तत्र ब्रह्मयज्ञ स्वाध्याय फलं तथापि ग्रहणार्थाध्ययनमंतरेण
ब्रह्मयज्ञासंभवात्॥ तदीयमपि फलं संपद्यते॥ इदं त्वां सखिविदं वेदरूपं सखायं यः पुमानध्ययनमकृत्वा त्यजति॥ तस्य वाच्यपि भाग्यं
नास्ति फले भाग्यं नास्तीति किमु वक्तव्यं॥ सकलदेवतानां धर्मस्य परब्रह्मतत्त्वस्य च प्रतिपादकं वेदमनुच्चार्य परनिंदानृतकलहादौ तु लौकिक
वार्तां सर्वत्रोच्चारितः स्यात् एव वाचि भाग्याभावः॥ अत एवाम्नायते॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदिति॥ यच्चाप्ययं लोके
व्यनादृतं शृणोति॥ तथापि निरर्थकमेव तच्छ्रवणं॥ तेन सुकृतमार्गज्ञानाभावादित्यर्थः॥ स्मृतिरपि॥ योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमं॥
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वय इति॥ एवमन्यान्यपि बहूनि वचनान्यत्रोदाहर्तव्यानि॥ नन्वधीतवेदपश्चादध्ययनविध्यर्थज्ञानं
ज्ञाने च सति पश्चादध्ययनप्रवृत्तिरित्यन्योन्याश्रयतीति बाढं॥ अत एव गुरुमतानुसारिण आचार्यकर्तृकाध्ययनेन प्रवृत्तिं युक्तिमाण
वकाध्ययनस्य मन्यता प्रयासेन संपादयंति॥ मतांतरानुसारिणस्तु प्रकारांतरेणाध्ययनात्प्रागेव संध्यावंदनादिविधिज्ञानवत्तिवादि
भ्योऽध्ययनविधिज्ञानं वर्णयंति॥ व स्वाध्यायनविधिप्रयुक्तिः यद्यपि स्वविधिप्रयुक्तिः सर्वथाप्युपनीतेरध्येतव्य एव वेदः॥ तस्य चाध्य
यनस्य दृष्टार्थत्वं साधयितुमक्षरग्रहणांतत्वं च पुरुषार्थानुशासने सूत्रितं॥ तानि सूत्राणि तद्विने वोदाहरामः॥ अध्ययनस्य दृष्टार्थ ८
त्वं साधयितुं पूर्वपक्षयति॥ अदृष्टार्थमधीतिर्विहितत्वादिति दृष्टफलसाधने भोजनादौ विध्यदर्शनाद्विहितमध्ययनमदृष्टार्थमवगं
तव्यं॥ अदृष्टविशेषोऽनश्रुत इति चेत्तत्राह॥ घृतकुल्याद्यतिदेशः स्वर्गकल्पनं चेति॥ ब्रह्मयज्ञजपाध्ययनार्थवादैर्नित्याध्ययनेऽतिदि

श्यतत्त्वं घृतकुल्यादिकं रात्रिसत्रन्यायेन फलत्वेन कल्पनीयं॥ येत्वर्थवादातिदेशं नेच्छंति॥ तैर्विश्वजिन्न्यायेन स्वर्गः कल्पनीयः॥ दृष्टफलयोः
संस्कारप्राप्त्योः संभवे कथमदृष्टकल्पनेत्यत आह॥ अयुक्तं संस्कारप्राप्तीति॥ संस्कृतस्वाध्यायस्य क्वचित्क्रतौ विनियोगादर्शनात्प्रा 17/1924
प्तेः स्वयमपुरुषार्थत्वाच्चेत्यर्थः॥ स्वाध्यायप्राप्तिरर्थप्रमितिहेतुस्तथा पुरुषार्थ इत्याचांस्यर्थविपनिर्हरणादिक्रियार्थविनियुक्तमंत्रवदध्यय
नांगतया विनियुक्तानां शेषाति शेषाणां दिवाक्यानां न स्वार्थे प्रामाण्यमित्याह॥ अन्यांगत्वान्नार्थप्रमापकमिति अध्ययनविधायकं तु वाक्य
स्वविहिताध्ययनस्येवांगमिति स्वार्थे प्रमाणमित्याह॥ अध्ययनवाक्यमनन्यांगमिति नन्वेवमदृष्टार्थत्वे कर्मकारकभूतस्वाध्या
यगतफलाभावादध्येतव्य इति कर्मवाचीतव्यप्रत्ययो विरुध्येतेत्यत आह॥ सक्तुवत्कारणपरिणाम इति सक्तूञ्जुहोतीत्यत्र कर्मत्वेन प्रधा
नभूतान्सक्तूनुद्दिश्य होमसंस्कारविधाने प्रतीयमानेऽपि होमसंस्कृतानां भस्मीभूतानां सक्तूनामन्यत्र विनियोगाभावात्कर्मप्रा
धान्यं हित्वा सक्तुभिर्जुहोतीति करणपरिणामः कृतः॥ एवमत्रापि कर्मगतयोः संस्कारप्राप्त्योरसंभावात्स्वाध्यायेनाधीयेतेति करण
परिणामः कर्तव्यः॥ इदानीं दृष्टफलसत्त्वे दृष्टफलं न कल्प्यमिति सिद्धांतयति दृष्टेनुनादृष्टमिति किंतद्दृष्टं फलमिति तत्राह॥ दृष्टो प्राप्तिसंस्कारा
विति॥ अक्षरप्राप्तेः परंपरया पुरुषार्थत्वमाह॥ प्राप्त्यर्थोऽवबोध इति॥ जायत इति शेषः॥ न च भोजनादिवदन्वयव्यतिरेकसिद्धत्वाद्वि
धिवैयर्थ्यमिति शंकनीयं॥ अवघातादिवन्नियमादृष्टायविध्युपपत्तेरित्याह॥ विधिर्निष्पत्त्या इति॥ यत्तूक्तं संस्कृतस्य विनियोगादर्शना
न्न संस्कार इति तत्राह॥ संस्कारसिद्धिः क्रत्वध्ययनविधिद्वयोपादानादिति क्रतुविधयो विषयावबोधमपेक्षमाणास्तदवबोधे स्वाध्या
यं विनियुंजते अध्ययनविधिश्च लिखितपाठादिव्यावृत्ताध्ययनसंस्कृतत्वं स्वाध्यायस्य गमयति॥ अत उभयोपादानात्तत्सिद्धिरनु
संस्कारेनामादृष्टातिशयः॥ स च न स्वाध्यायगतः तव्यप्रत्ययेन स्वपदोपात्तप्रकृत्यर्थभूताध्ययनोपरक्तापूर्वाभिधानात्ततः कथं स्वाध्याय
स्य संस्कृतत्वमिति तत्राह॥ तव्यः कर्मगादृष्टवाचीति॥ अत्र तव्यत्वे प्रेयस्य कर्माभिधायितया कर्मकारकस्य तव्यप्रत्ययं प्रति प्रकृत्यर्थादध्यय
नाद्भिन्नत्वासंनतास्वाध्यायगतमेवापूर्वं तव्यप्रत्ययो वक्ति अपूर्वस्य धात्वर्थस्य न्यत्वनियमेऽपि तदुपरक्तत्वानियमादिति भावः॥ यच्चोक्तम
न्यांगत्वान्नार्थप्रमापकमिति अदृष्टांतरं॥ तदसत् यतो मंत्राणां स्वतंत्रादृष्टशेषत्वेन तथात्वं युज्यते॥ इदं तु स्वाध्यायाश्रितमदृष्टं तस्य च स्वा
ध्यायगताक्षरसामर्थ्यात्सिद्धार्थावबोधे फले सति अदृष्टकल्पने वा फलांतरकल्पनायोगात्प्रामाण्यस्यापरं हेतुकमेवादृष्टेन तु प्रतिबंधकमि
त्याह॥ स्वतंत्रादृष्टाशेषत्वाच्च स्वार्थप्रमा प्रतिबध्यत इति॥ सक्तुन्यायेन कर्मकारकप्राधान्यपरित्यक्ते स्वतंत्रादृष्टमेवास्तापि स्यादि
त्यत आह॥ यथाश्रुतोपपत्तेर्न सक्तुन्याय इति॥ सक्तुन्यायेन कर्मेति॥ सक्तुषु गत्यभावात् श्रुतं परित्यज्य प्रकृतं कल्पितं नाम न तु धुकप्र
दर्शितत्वादित्यर्थः॥ इत्थमध्ययनविधेर्दृष्टार्थत्वं प्रसाध्यार्थावबोधपर्यंततां निराकर्तुं पूर्वपक्षयतीति॥ वेधमर्थानिर्णयं भट्टगुरू विधेः
पुमर्थावसानादिति॥ सर्वत्र विधेः पुरुषार्थपर्यवसायित्वनियमादत्रापि पुरुषार्थभूतं फलवदर्थनिश्चयमध्ययनविधिप्रयुक्तं भट्टगु
रू मन्यंते॥ ननु सकृदध्ययनादावृत्तिसहिताद्वार्थनिश्चयानोपलभ्यते इत्याशंक्य तथा सति तत्सिद्ध्यै सोऽध्ययनविधिरर्थनिश्चयहे
तुं विचारं कल्पयिष्यतीत्याह॥ स विचारमाक्षिपेदिति॥ ननु स्वविधेयतदुपकारिणोरेव विधिः प्रयोजक इति सर्वत्र नियमः॥ तथा सति

भा॰प्र॰

९

तादृशं कथमत्राध्ययनविधिराशंक्यत इत्यत आह ॥ अविधेयानुपकार्याक्षेपेणावघातावृत्तिवदिति ॥ व्रीहीनवहंतीत्यत्रावघातमात्रं विधेयं न तु
तदावृत्तिः तस्या अवघातस्यार्थत्वात नापि साविधेयोपकारिणी अंतरेणावृत्तिं सकृदनुष्ठितावघातमात्रादेवावघातसिद्धेः तथापि तंदुलनिष्पत्तिफ
लसिद्धये स विधिरावृत्तिं यद्वदाक्षिपति तद्वदत्र कृतेऽप्यवगंतव्यं ॥ ननु वेदमात्राध्यायिनोर्थावबोधानुदयेपि व्याकरणाद्यंगसहितवेदा
ध्यायिनस्तदुभयसद्भावात्प्रतिभ्यर्थं विचारं विधिर्न कल्पयेदित्याशंक्यार्थगतविरोधपरिहाराय पक्षितएव विचार उत्पाद्य ॥ सांगाध्य
यनात्तद्भावेपि विचारोर्थविरोधापनुदिति ॥ सिद्धांतयति ॥ प्राप्ते स्वर्गवादियत्कर्मफलतादृविधिस्तदंत इति ॥ यथाफलभृतस्य व्रीहीरादेहेतोर्योग
वादयोपि पुरुषार्थते ॥ तथा फलवदर्थावबोधहेतोरक्षरप्राप्तेरपि पुरुषार्थतादध्ययनविधिरक्षरप्राप्त्यवसानो वगंतव्यः ॥ नन्वक्षरप्राप्ते पुरुषा
त्वं र्थफलवदर्थावबोधप्रयुक्तत्वे तर्हि तद्बोधकस्य मुख्यपुरुषार्थताद्बोधांत एव विधिः किं न स्यादित्यत आह ॥ फलवद्बोधांतत्वे अध्ययनाकांक्षिता त्स्य
बोधस्य हि फलं कर्मानुष्ठानं ॥ तथा सति यस्य ब्राह्मणादेर्यस्मिन् गृहस्थिति सवादावधिकारस्तस्य तद्वाक्यमात्राध्ययनं स्यात ॥ न तु राजसूयादि
प्रकरणवाक्याध्ययनं तत्र प्रवृत्यादिफलाभावात्स्वपक्षे तु नायं दोष इत्याह ॥ अक्षरप्राप्तिर्न पार्थेति ॥ न चाबोधकत्वेर्थावबोध एव न सिध्येदिति शंकनी
यं ॥ प्रमाणस्य प्रमेयबोधकत्वस्वाभाव्यात ॥ लौकिकाप्तवाक्यानामंतरेणैव विधिं बोधकत्वस्य दर्शनादित्याह ॥ लोकवत्तद्बोध इति ॥ ननु बो
धस्य विधिफलत्वे बोधकाममुद्दिश्य विधातुं शक्यत्वात ॥ सकलबोधिकारी स्यादित्याशंक्य प्राप्तिपक्षेपि प्राप्तिकाममुद्दिश्यतामष्टवर्षं ब्राह्मणोत्राधिका
री सकल एव वितिपरिहारं स्वपक्षत्वादुपेक्ष्य बोधस्य काम्यत्वं दूषयति ॥ सोकाम्यः प्राक्प्रबोधभानाभानयोरिति ॥ बोधस्याग्निहोत्रलक्षणवेदार्थ
स्याध्ययनात प्राक् संध्योपासनादिवत्सिद्धरूपदेशत एव भाने सिद्धत्वादेव सोर्थबोधो न काम्यः ॥ अभाने कामयितुमशक्यः ॥ ज्ञात एव हि विषये
कामना नियमात ननु सामान्यतो ज्ञाते विशेषतश्चाभुत्सा संभवति ॥ यद्वा विशेषतोपि पित्राद्युपदेशादवगते सत्योपदेशिकज्ञानस्य प्रामाण्यनि
र्णयाय पुनर्बोधकामना युक्तेत्याशंक्यैवमप्यर्थावबोधमुद्दिश्याध्ययनविधानं न संभवतीत्याह ॥ उद्देश्यायोगादिति ॥ अग्निहोत्रादिविशेष
ज्ञानानामानंत्याद्वेकबुध्या विशेषाकारेणोद्देशः संभवति ॥ अनंतत्वात्सामान्याकारेणोद्देशे सामान्यस्येव विधिफलं स्यान्न तु ज्ञानविशेषः ॥ ततो ना
उद्देशो युक्तः ॥ नन्वर्थावबोधमुद्दिश्य वारणाभावे वेदस्य स्वार्थे तात्पर्यं न स्यादित्याशंक्योपक्रमादिलिंगगम्यं तात्पर्यं शब्दफलादेव सिध्य
तीत्याह ॥ तात्पर्यं शब्दादिति ॥ न ह्यर्थज्ञानमुद्दिश्य शब्दोच्चारणं दोषघ्नं लोके व्यर्थं स्यादिति चेत ॥ न ॥ पुरुषसंबंधदोषाख्यप्रतिबंधप
रिहारार्थत्वादित्याह ॥ उद्देश्योच्चारणं दोषघ्नं लोक इति ॥ नन्वध्ययनविधेर्बोधांतत्वाभावे विचारशास्त्रं न प्रवर्तेत ॥ प्रयोजनाभावादित्या
शंक्याह ॥ विचार उत्तरविधिप्रयुक्त उपपद्यत इति ॥ क्रतुबोधविधयः सांगवेदाध्ययनादापाततः प्रतिपन्नाः विरोधपरिहारेण प्र
तिष्ठितं निर्णयज्ञानमंतरेणानुष्ठापयितुमशक्नुवंतः तन्निर्णयाय क्रतुविचारं प्रयोजयंति ॥ श्रवणविधिस्तु साक्षादेव ब्रह्मविचारं
विधत्ते एवं च सति श्रवणविधेः स्वविधेयप्रयोजकत्वं क्रतुविधीनां चाविधेयो यजमानः कारि अर्थवादादयप्रयोजकत्वमित्युपपद्यते
तरां ॥ अध्ययनविधिप्रयुक्तिपक्षे तु तद्विधेः अर्थज्ञानस्य क्रतुद्वारा स्वर्गसिद्धिपर्यंतत्वात्क्रतुनुष्ठानस्यापि तत्प्रयुक्तौ बोधविधिरार्थानि
धियस्य स्यर्थमापद्येत ॥ नन्वध्ययनविधेस्त्रैवर्णिकमात्रं प्रति नित्यत्वात्तत्प्रयुक्तो विचारस्यापि तत्त्वं स्यान्नान्यथेति चेत क्रतुविचार उक्तत्रै

वर्णिकमात्रेपि नित्यत्वसिद्धिः किं चात्र ब्रह्मविचारस्य ॥ तत्र योसम्नमनेपि सम इत्याह ॥ अतो नित्यः क्रतुविचारस्त्रैवर्णिकमात्रस्येति ॥ यतोकरणे प्रत्यवाय 19
श्रवणात ॥ क्रतवस्त्रैवर्णिकानां नित्याः ॥ अत इत्यर्थः ॥ द्वितीयो निश्च इत्याह ॥ ब्रह्मविचारः पुनः परमहंसस्यैवेति नित्यो अनुषंग इति ननु कर्तव्याध्य 1924
यनस्याक्षरग्रहणांतत्वेर्थज्ञानमविहितं स्यात ॥ मैवं ॥ वाक्यांतरेण तद्विधानात ब्राह्मणेन निःकारणो धर्मः षडंगो वेदोध्येयो ज्ञेयश्चेति तद्विधिः तत्र नि
ष्कारणशब्देनाध्ययनज्ञानयोः काम्यत्वं निवार्यते ॥ अर्थज्ञाने पुरुषप्रवृत्तिकरं वचनद्वयं यास्कांतरगतं निरुक्तकारो यास्क एवमुदाजहार ॥ अथापि
ज्ञानप्रशंसा भवत्यज्ञाननिंदा च ॥ स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योर्थं ॥ योर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपा
प्मा ॥ यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते ॥ अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचिदिति ॥ अस्मिन्मंत्रद्वये यो अर्थज्ञ इत्यनेनार्धेन वेदार्थज्ञानं प्रश
स्यते ॥ इतरेणार्धत्रयेण ज्ञानराहित्यं निंद्यते ॥ यो वेदार्थं जानाति सोयमिहलोके सकलं श्रेयः प्राप्नोति ॥ तथा ज्ञानेन पापक्षये सति मृतः स्वर्गमा
प्नोति ॥ तदेतदैहिकामुष्मिकं च ज्ञानफलं ॥ तैत्तिरीयाः मंत्रोदाहरणेन तदीयतात्पर्याभिधायिब्राह्मणेन च स्पष्टीचक्रुः ॥ तदेषाभ्युक्ता ॥ ये अर्वांङुत वा पु
राणे वेदं विद्वांसमभितो वदंत्यादित्यमेव ते परिवदंति सर्वे अग्निं द्वितीयं तृतीयं च हंसमिति यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंति ॥ तस्मा
द्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणातीति ॥ वेदविद्वान्नर्थाभिज्ञः पुरुषः स च द्विविधः ॥ अर्वाचीनकाले
समुत्पन्नश्चतुर्दशविद्यास्थानकुशलः कश्चिदुपाध्यायः ॥ पुरातनकाले समुत्पन्नो व्यासादिश्च ॥ तमेतमुभयविधं विद्वांसं विद्यामदेन मदकुलमदो
पेताः पंडितंमन्याः ये पुरुषा अभितो विद्यायिषु दूषयंति ॥ ते सर्वेप्यादित्यमेव प्रथमं दूषयंति ॥ आदित्यापेक्षया द्वितीयमग्निं दूषयंति ॥ तदुभया
पेक्षया तृतीयं हंसं दूषयंति ॥ हंति सदा गच्छतीति हंसो वायुः अग्न्यादिरूपत्वं च वेदविद आम्नातं ॥ अग्नेर्वा अयौ तादित्यस्य सायुज्यं गच्छतीति न केव
लमेतद्देवतात्रयं ॥ किंतु सर्वा अपि देवता वेदविदि वसंति ब्राह्मणान्वेदविदो दृष्ट्वा स्मृत्वा वा प्रतिदिनं नमस्कुर्यात ॥ न तु तस्मिन् विद्यमानमपि दोषं
कीर्तयेत ॥ एवं सति तत्र मंत्रार्थभूताः सर्वा अपि देवता वेदार्थविदं स्मर्यमाणतया तदीयहृदयेवस्थिता अर्थं नमस्कर्ता तोषयति ॥ न चैतदध्ययन
स्यैव फलमिति शंकनीयं ॥ विद्वांसमित्याम्नातत्वात ॥ अन्यथा वेदमधीयानमित्याम्नायेत ॥ तस्मात्सर्वदेवताबुध्या प्राणिभिः पूज्यस्य वेदार्थवि
दो लोकद्वयेपि श्रेयःप्राप्तिरुपपद्यते ॥ यस्तु वेदमधीत्यार्थं न विजानाति सोयं पुमान् भारमेव हरति धारयति स्थाणुरिति दृष्टांतः छिन्नशाखं शुष्कं
वृक्षमूलं स्थाणुशब्देनोच्यते ॥ स च यथैधनार्थमेवोपयुज्यते ॥ न तु पुष्पफलार्थं तथा केवलपाठकस्याप्यत्यंतं न भवतीत्येवं वेदनस्यानुष्ठानं स्वर्गा
दिफलसिद्धिर्वास्ति ॥ किं च त्वनेन लोकप्रसिद्धिर्यत्वं कीपि पाठकस्य भवतीत्येतावदेव यावती धनादिप्राप्तिः ज्ञानतोप्यधिका विदुषि दृश्यते किं च
यद्वेदवाक्यमाचार्याद्गृहीतमर्थज्ञानरहितं पाठरूपेणैव पुनः पुनरुच्चार्यते तत ॥ क्वचिदपि न ज्वलति स्वार्थं न प्रकाशयति ॥ यथा अग्निरहितप्र
देशे प्रक्षिप्तं शुष्ककाष्ठं न ज्वलति ॥ तद्वत्तथा सति तस्य वाक्यस्य वेदत्वमेव मुख्यं न स्यात ॥ अलौकिकपुरुषार्थोपायं वेत्त्यनेनेति वेदशब्दनिर्व
चनं ॥ तथा चोक्तं ॥ प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ॥ एनं विदंति वेदेन तस्माद्वेदस्य वेदतेति ॥ अतो मुख्यवेदत्वसिद्धये ज्ञातव्य एव तद
र्थः ॥ किं चात्र यास्केन काचिदृगप्युदाहृता ॥ उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां ॥ उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उ
शती सुवासा इति ॥ तत्र पूर्वार्धस्य तात्पर्यं स एव दर्शयति ॥ अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनामित्यविद्वांसमाहार्ध

भा॰ प्र॰ मिति॥ अस्यायमर्थः। यः पुमान् अर्थं न वेत्ति तं प्रति पूर्वार्धेन मंत्रो ब्रूते॥ एकः पुरुषः पाठमात्रपर्यवसितो वेदरूपां वाचं पश्यन्नपि न सम्यक्प
श्यति। एकवचनबहुवचनादिविवेकाभावात्पाठमपि कर्तुमशक्यत्वात्। वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति आदि
१० स्थाने ये स्वेन भागधेयेनोपधावति। त एवैनं भूतिं गमयतीत्यादावयुक्तसंबन्धः कथं पाठं निश्चिनुयात्॥ अन्यः कश्चिदर्थज्ञानाय व्याकरणादीं
गानि शृण्वन्नपि मीमांसाराहित्याद्वेदरूपां वाचं न सम्यक् शृणोति॥ यावतोंऽशान् प्रतिशृणुयात् तावतोंऽशानन्वतुकत्वात्स्वयं परीक्षि
अत्र व्याकरणमात्रेण प्रतिशृण्वतस्तु शिष्टिः प्रतीयते॥ मीमांसायां तु न्यायेन दातुरिति निर्णीतं॥ तस्मादुभयविधमपि विद्वांसं प्रैत्येन माहेति॥
तृतीयपादतात्पर्यं दर्शयति। अप्येकस्मै तन्वं विसस्र इति। स्वमात्मानं विवृणुते ज्ञानं प्रकाशयेन्मर्त्यस्याह्नन याचा इति। अस्यायमर्थः॥
अपिशब्दः पर्यायः उतशब्दः स च पूर्वोक्तानभिज्ञवैलक्षण्यार्थात्र प्रयुक्तः॥ निपातानामनेकार्थत्वात्। यः पुमान् व्याकरणाद्यंगैः स्वबुद्ध्यार्थं
मीमांसया तात्पर्यं च शोधयितुं प्रवृत्तस्तस्मा एकस्मै वेदः स्वकीयां तनुं विसस्रे। स्वमित्यादिकं परव्याख्यानं ज्ञानमित्यादिकं तात्पर्यव्याख्या
नं वेदार्थं प्रकाशनक्षमं सम्यक् ज्ञानमनयात् तृतीयपादरूपया वाचा मंत्र आहेति॥ चतुर्थपादतात्पर्यं दर्शयति। उपमानमयाना चाजायेप
त्ये कामयमाना सुवासाः ऋतुकालेषु सुवासाः कल्याणवासाः कामयमानाः ऋतुकालेषु यथा स एनां पश्यति स शृणोतीत्ययं ह प्रसंगोति॥ अस्या
यमर्थः। उक्तमप्या चतुर्थपादरूपया वाचा तृतीयपादार्थस्योपमोच्यते॥ उशतीत्येतस्य व्याख्यानं कामयमानेति सुवासा इत्यस्य कल्याणवासा इति। अन्यवेला
यां मलिनवासाः तथापि संभोगकालेषु कल्याणवासा भवति। तत्र हेतुः कामयमाना ऋतुकाले स्थितिश्च यथा स पतिरेनां जायां सा कन्येनोरस्युकः
पश्यति। किंच॥ तथा न अर्थं हितबुध्या शृणोति। तथायं चतुर्दशविद्यास्थानपरिशीलनोपेतः पुरुषो वेदार्थरहस्यं सम्यक् पश्यति। वेदोक्तं
च धर्मब्रह्मरूपमर्थं हितबुध्या स्वीकरोति। सेयमुक्ता वेदार्थाभिज्ञस्य प्रशंसेति॥ पुनरप्यगतं यास्क उदाजहार॥ तस्यां न राभूयसे निर्व
चनाय॥ उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वंत्यपि वाजिनेषु॥ अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पामिति॥ अयम
र्थः॥ पूर्वोदाहृताया उत त्वः पश्यन्नित्यादिकाया ऋचोऽनन्तरमेषाम्नाता काचिदृक् स्यपूर्वोक्तमंत्रस्यार्थस्य भूयसे निर्वचनाय संपद्य
ते॥ तमर्थमतिशयेन प्रतिपादयितुं प्रभवति॥ कथमिति चेत्॥ तदुच्यते अपि चैकं चतुर्दशविद्यास्थानकुशलं पुरुषं वेदरूपाया
वाचः सख्ये स्थिरत्वेन वेदार्थाः सख्ये पानयुक्तमाहुः॥ अभिज्ञाः कथयंति सखिविदं सखायमिति मंत्रे वेदस्य सखित्वमुदा
हृतं॥ यद्वा स्वर्गलोके देवानां सख्ये स्थिरत्वातिशयेन पीतामृतमाहुः वाचामिनाः वाजिनोऽर्थराः सभासु प्रगल्भा वा वाजिनः॥ तेषु
मध्येप्येनं वेदार्थकुशलं चोदयितुं न हिन्वंति न केपि प्राप्नुवंति॥ तेन सह विवदितुमसमर्थत्वात् यस्त्वन्यः पाठमात्रपरः पुष्परहितां वा
चं शुश्रुवान् भवति॥ पूर्वकांडोक्तस्य धर्मस्य ज्ञानं पुष्पं॥ उत्तरकांडोक्तस्य ब्रह्मणो ज्ञानं फलं॥ तथा लोके पुष्पं फलस्योत्पादकं तथा
वेदानुवचनादिधर्मज्ञानमनुष्ठानद्वारा फलात्मकब्रह्मज्ञाने फलं जनयति तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन त
पसानाशकेनेति श्रुतेः॥ तथा च फलं तृप्तिहेतुस्तथा ब्रह्मज्ञानं कृतकृत्यत्वहेतुः यत्पूर्णानंदैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो
भवतीति श्रुतेः॥ तादृशपुष्पफलरहितं वेदपाठकः सोऽयं पुमान् धेन्वा मायया सह चरति नवप्रसूतिका क्षीरस्य दोग्ध्री गौः प्री १०
तिहेतुत्वाद्धिनोतीति स्तुत्यत्वाद्धेनुरित्युच्यते तथा च मात्रपरं प्रति वेदरूपा वाक् धर्मब्रह्मज्ञानरूपं क्षीरं दोग्ध्रीत्यधेनुः अत एवासौ

२१
1924

मायाकपटरूपा ऐंद्रजालिकनिर्मितगोसदृशा गोरूपत्वात्॥ तया मायया सह चरन्नयं परमपुरुषार्थं न लभत इत्यर्थः॥ इत्थं यास्केन ज्ञानस्तु
त्यर्थः अज्ञाननिंदोदाहरणस्य प्रपंचितत्वाद्वयमस्तूयते॥ तद्धीयत इति न्यायेनाध्ययनवदर्थज्ञानस्यापि विधिरभ्युपगंतव्यः॥ किंच
नक्षत्रेष्टिकांडप्रतीष्टिफलवाक्यं यागतद्वेदनयोः समानमेवाम्नायते॥ तथा हवा अग्निर्देवानां नामासं नारद एवं हवा एष मनुष्याणां भव
ति य एतेन हविषा यजते य उ चैनदेवं वेदेति॥ यतो यागवत्फलाय तद्वेदनमपि विधीयते अनेन न्यायेन सर्वेष्वपि ब्राह्मणेषु वेदनविध
यो द्रष्टव्याः ननु विद्याप्रशंसेति सूत्रे वेदनफलानां प्रशंसारूपत्वं जैमिनिना सूत्रितमिति चेत्॥ अस्तु नाम विद्यमानेनापि फलेन प्रशं
सितुमशक्यत्वात् दर्शयागस्य पूर्णमासयागस्य चातिपाते सति प्रायश्चित्तरूपां वैश्वानरेष्टिं विधातुं विद्यमानेनैव स्वर्गफलेन स्तुतिः
क्रियते॥ स्वर्गाय लोकाय दर्शपूर्णमासाविज्येते इति एतच्चाचार्यैर्ब्रह्मज्ञानफलवाक्यस्य स्वार्थे पितात्पर्यं दर्शयितुमुदाहृतं॥ उद्धा
स्येवार्थवादत्वं वचसोऽन्यपरत्वतः॥ यथावस्त्वभिधायित्वात् भूतार्थवादता॥ इज्येते स्वर्गलोकाय दर्शादर्शो यथा तथा॥ नन्वभूतार्थवाद
त्वं पाश्लोक कथं अतिर्दर्शयति॥ न च वेदमात्रेण फलसिद्धावनुष्ठानं व्यर्थमिति शंकनीयं॥ फलभूयस्त्वेन परिहृतत्वात् उदाहृतं चात्र जैमि
नि सूत्रं॥ फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः सारतो वा फलविशेषस्यादिति॥ एतच्चास्माभिस्तरति ब्रह्महत्यां योऽश्वमेधेन
यजते य उ चैनमेवं वेदेत्युदाहरणे न व्याख्यातं॥ छांदोग्यश्च केवलादनुष्ठानाद्विद्यासहितेनुष्ठाने फलातिशयमामनंति। तेनोभौ कु
रुतो यश्चैतदेवं वेद यश्च न वेद॥ नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति॥ उत्तरमि
ति द्वितीयाल तृतीयपादे यद्यप्यंगावबद्धोपास्तिस्त्र विद्याशब्देन विवक्षिता तथापि न्यायः सर्वोऽपि विद्यासु समानः कुतस्त्वेतावती वे
दने भक्तिरिति चेत्॥ कुतो यातवेयात्र प्रद्वेषः प्रशंसा त्वस्माभिर्भूयसी दर्शिता॥ निंदा तु न क्वाप्युपलभामहे॥ किंतु कर्मजन्यमपूर्वमा
थामरणादूर्ध्वं जीविनं सह गच्छति। तथा विद्याजन्यमप्यपूर्वं गच्छति तथा च वाजसनेयिन आमनंति तं विद्याकर्मणी समन्वारभे
ते॥ पूर्वप्रज्ञा चेति। तस्मादध्ययनवदर्थज्ञानस्यापि विहितत्वादर्थज्ञानाय वेदो व्याख्यातव्यः॥ विषयप्रयोजनसंबंधाधिकारिणस्तान
मंतरेण श्रोतृप्रवृत्त्यभावाद्विषयादयो निरूप्यंते॥ व्याख्यानस्य व्याख्येयो वेदो विषयः॥ तदर्थज्ञानं प्रयोजनं॥ व्याख्यानव्याख्येय
भावः संबंधः॥ ज्ञानार्थी चाधिकारी यद्यप्येतावत्प्रसिद्धं॥ तथापि वेदस्य विषयाद्यभावे व्याख्यानस्यापि परमविषयादिकं न स्या
त्॥ अतो वेदस्य चतुष्टयमुच्यते॥ वेदपूर्वोत्तरकांडयोः क्रमेण धर्मब्रह्मणी विषयः॥ तयोरनन्यलभ्यत्वात्॥ तथा च पुरु
षार्थानुशासने सूत्रितं धर्मब्रह्मणी वेदैकवेद्ये इति जैमिनीयेन द्वितीयसूत्रे चोदनैव धर्मे प्रमाणं चोदनाप्रमाणमेवेति नियम
द्व्यंसंप्रदायविद्भिरभिहितं॥ चोदनैवेत्यमुमर्थमुपपादयितुं चतुर्थसूत्रे प्रत्यक्षविषयत्वं धर्मस्य निराकृतं। प्रत्यक्षमनि
मित्तं विद्यमानोपलंभनत्वादिति॥ अनुष्ठानादूर्ध्वमुत्पत्स्यमानस्य धर्मस्य पूर्वमविद्यमानत्वात् प्रत्यक्षयोग्यता नास्ति॥ उत्तर
कालेपि रूपादिराहित्यान्नेंद्रियैरवगम्यते॥ अत एवादृष्टमिति सर्वैरभिधीयते। लिंगरहितत्वान्नानुमानविषयत्वमप्यस्ति॥
सुखदुःखे धर्माधर्मयोर्लिंगमिति चेत्॥ बाढं॥ अयमपि लिंगलिंगिभावो वेदेनैवावगम्यते ततश्चोदनैव धर्मे प्रमाणं॥ वेधा

सिद्धस्य तृतीयसूत्रस्य द्वितीयवर्णकेत्र लक्षणैः सिद्धवस्तुनोपि शास्त्रविषयत्वं भाष्यकृद्भिर्व्याख्यातं तस्माद्वेदप्रमाणाद्गतो तन्मात्रिकवर्णं ब्रह्माधिगम्यत इत्यभिप्रायः। इतिश्रुतिश्च भवति। नावेदविन्मनुते तं बृहंतमिति तथोपपत्तिः पूर्वाचार्यैरेवमुदीरिता प्रत्यक्षेणानुमित्या वा स्यमानोनंतरयोग्यतेति। तस्मादनन्यलभ्यत्वादुक्तिधर्मब्रह्मणी वेदविषयत्वेन तदुभयज्ञानं वेदस्य साक्षात्प्रयोजनं न च तस्य ज्ञानस्य सुलभबुद्धीपायसमता राज्ञासौगच्छतीत्यादिज्ञानवदपुरुषार्थपर्यवसायित्वं शंकनीयं धर्मप्रयुक्तस्य पुरुषार्थस्य दृश्यमानत्वात्। धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पंति। धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं। तस्माद्धर्मं परमं वदंतीति इदं उस्पराज्ञोनित्यामकृत्वाद्भुवदमानयोः पुरुषार्थमध्ये दौर्बल्याप्रियात्सकाशात्स्वबलस्य हेतुत्वाच्च धर्मः पुरुषार्थः। तथा च वाजसनेयिनः षष्ठिप्रकरणे समामनंति। ततः श्रेयोरूपमत्यसृजत धर्मं तदेतत् क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान् बलीयांसमाशंसते। धर्मेण यथा राज्ञैवमिति। ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भवति। तरति शोकमात्मविदित्यादिश्रुतिषु ब्रह्मज्ञानप्रयुक्तः पुरुषार्थः प्रसिद्धः तदुभयज्ञानार्थं वेदेधिकारीस त्रैवर्णिकः पुरुषः स्त्रीशूद्रयोस्तु सत्यामपि ज्ञानापेक्षायामुपनयनाभावेनाध्ययनराहित्यात् वेदेधिकारः प्रतिषिद्धः। धर्मब्रह्मज्ञानं तु पुराणादिमुखेनोत्पद्यते। तस्मात्त्रैवर्णिकपुरुषाणां वेदमुखेनार्थज्ञानेधिकारः। संबंधस्तु वेदस्य धर्मब्रह्मभ्यां सह प्रतिपाद्यप्रतिपादकभावः तदीयज्ञानेन सह जन्यजनकभावः त्रैवर्णिकपुरुषैः सहोपकार्योपकारकभावः तदेवंविधयानुबंधचतुष्टयमवगत्य समाहितधियः श्रोतारो वेदव्याख्याने प्रवर्तंते। अतिगंभीरस्य वेदस्यार्थमवबोधयितुं शिक्षादीनि षडंगानि प्रवृत्तानि अत एव तेषामपरविद्यारूपत्वं मुंडकोपनिषद्याथर्वणिका आमनंति। द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदंति। परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति अथ परा यया तदक्षरमधिगम्यत इति साधनभूतधर्मज्ञानहेतुत्वात् षडंगसहितानां कर्मकांडानामपरविद्यात्वं। परमपुरुषार्थभूतब्रह्मज्ञानहेतुत्वादुपनिषदां परविद्यात्वं। वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा तथा च तैत्तिरीया उपनिषदारंभे समामनंति। शिक्षां व्याख्यास्यामः। वर्णः स्वरः मात्रा बलं साम संतानः इत्युक्तः शिक्षाध्याय इति वर्णोकारादिः स चांगभूतशिक्षाग्रंथे स्पष्टमुदीरितः। त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः। प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवेत्यादिना स्वर उदात्तादिः। सोपि तत्रोक्तः उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रय इति। मात्रा ह्रस्वादिः सोपि तत्रोक्तः ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचीति। बलं स्थानप्रयत्नौ अत्र अष्टौ स्थानानि वर्णानामित्यादिना स्थानमुक्तं। अचोस्पृष्टा यणस्त्वीषदित्यादिना प्रयत्न उक्तः। साम शब्दे साम्यं उक्तं अतिद्रुतातिविलंबितगीत्यादिदोषराहित्येन माधुर्यादिगुणयुक्तत्वेनोच्चारणं साम्यं। गीती शीघ्री शिरःकंपीत्यादिनोपांशुदष्टं त्वरितमित्यादिना दोषा उक्ताः। माधुर्यमक्षरव्यक्तिरित्यादिना गुणा उक्ताः। संतानः संहिता वायवायाहीत्यत्र वायवा याहि। इंद्राग्नी आगतमित्यत्र प्रकृतिभावः एतच्च व्याकरणेभिहितत्वात् शिक्षामुपेक्षितं। शिक्ष्यमाणवर्णादिविवेकस्याभावे बाधस्तत्रोदाहृतः। मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधादिति। इंद्रशत्रुर्वर्धस्वेत्यस्मिन्मंत्रे इंद्रस्य शत्रुर्घातक इत्यस्मिन्विवक्षिते तत्पुरुषसमासे समासस्येति सूत्रेण तत्पुरुषत्वादंतोदात्तेन भवितव्यं। आद्युदात्तस्तु प्रयुक्तः। तथा सति पूर्वपदप्रकृतिस्वरत्वेन बहुव्रीहिश्चादिष्टोपा ११

तत्पुरुषस्येत्यर्थः संपन्नः। तस्मात्स्वरवर्णाद्यपराधपरिहाराय शिक्षाग्रंथोपेक्षितः। कल्पसूत्राण्याश्वलायनापस्तंबबौधायनादिसूत्रं कल्प्यंते समर्प्यंते। योगप्रयोगोत्रेति व्युत्पत्तेः। नन्वाश्वलायनः किं मंत्रकांडमनुसृत्य प्रवृत्तः। किं वा ब्राह्मणमनुसृत्य नाद्यः दर्शपूर्णमासौ पूर्वं व्याख्यास्यामः इत्येवं तेनोपक्रांतत्वात्। न ह्यग्निमीळे इत्यादयो मंत्रा दर्शपूर्णमासयोः कश्चिद्विनियुक्ताः न द्वितीयः। आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपंति दीक्षणीयायामित्येवं दीक्षणीयेष्टिब्राह्मणे प्रक्रांतत्वात्। अत्रोच्यते। मंत्रकांडो ब्राह्मणयज्ञादिकं यत्क्रमेण प्रवृत्तो न तु यागानुष्ठानक्रमेण ब्राह्मणयज्ञस्त्वेवं विहिते। यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञ इति सोयं ब्रह्मयज्ञो अग्निमीळे इत्याम्नायक्रमेणैवानुष्ठेयः। तथा सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाचस्तोमे पारिप्लवं शंसंतीति विधीयते। तथाश्विने शस्यमाने सूर्यो नोदियादपि सर्वा दाशतयीरनुब्रूयादिति विधीयते। तथा रिच्यत इव वा एष प्रेव रिच्यते। यो याजयति प्रति वा गृह्णाति याजयिता प्रतिगृहीता वानश्नन्त्रिः स्वाध्यायं वेदमधीयीतेति प्रायश्चित्तरूपं वेदपारायणं विहितं इत्यादिषु कृत्स्नमंत्रकांडविनियोगेषु संप्रदायपारंपर्यागत एव क्रम आदरणीयः विशेषविनियोगमंत्रविशेषाणां श्रुतिलिंगवाक्यादिप्रमाणान्युपजीव्याश्वलायनो दर्शयति। अतो मंत्रकांडक्रमाभावेपि न कश्चिद्विरोधः। इषे त्वेत्यादिमंत्रास्तु कल्पानुष्ठानक्रमेणैवाम्नाता इत्यापस्तंबादयस्तेनैव क्रमेण सूत्रनिर्माणे प्रवृत्ताः। आम्नातत्वादेव तैत्तिरीयादिष्वपि स एव क्रमः। यद्यपि ब्राह्मणे दीक्षणीयेष्टिरुपक्रांता। तथापि तस्या इष्टेर्दर्शपूर्णमासविकृतित्वेन तदपेक्षत्वादाश्वलायनस्यादौ तद्व्याख्यानं युक्तं। अतः कल्पसूत्रं मंत्रविनियोगेन कल्पानुष्ठानमुपदिश्योपकरोति। तर्हि प्र वो वाजा इत्यादीनां सामिधेनीनामृचामेव विनियोगमाश्वलायनो ब्रवीतु। नमः प्रवक्त्र इत्यादयस्त्वनाम्नाताः कुतोत्र विनियुज्यंत इति चेत्। नायं दोषः शाखांतरसमाम्नातानां ब्राह्मणांतरसिद्धस्य विनियोगस्य गुणोपसंहारन्यायेनान्वेक्ष्यत्वात्। सर्वशाखाप्रत्ययमेकं कर्मेति न्यायविदः। तस्माच्छिक्षेव कल्पोप्यपेक्षितः। व्याकरणमपि प्रकृतिप्रत्ययाद्युपदेशेन पदस्वरूपतदर्थनिश्चयायोपयुज्यते। तथा चैंद्रवायवग्रहब्राह्मणे समाम्नायते। वाग्वै पराच्यव्याकृतावदत्ते देवा इंद्रमब्रुवन्निमां नो वाचं व्याकुर्विति। सोब्रवीद्वरं वृणे मह्यं चैवैष वायवे च सह गृह्याता इति। तस्मादैंद्रवायवः सह गृह्यते। तामिंद्रो मध्यतोपक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यत इति। अग्निमीळे पुरोहितमित्यादिवाक्पूर्वस्मिन्काले पराची समुद्रादिध्वनिवदेकात्मिका सती आव्याकृता प्रकृतिप्रत्ययः पदवाक्यमित्यादिविभागकारिग्रंथसंगरहितासीत्। तदानीं देवैः प्रार्थित इंद्र एकस्मिन्नेव पात्रे वायोः स्वस्य च सोमरसग्रहणरूपेण वरेण तुष्टस्तामखंडां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययादिविभागं सर्वत्राकरोत्। तस्मादियं वागिदानीमपि पाणिन्यादिमहर्षिभिर्व्याकृता सर्वैः पठ्यत इत्यर्थः। तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्त्तिके दर्शितः। रक्षोहागमलघ्वसंदेहाः प्रयोजनमिति एतानि रक्षादिप्रयोजनानि प्रयोजनांतराणि च महाभाष्ये पतंजलिना स्पष्टीकृतानि रक्षार्थं वेदानामध्येयं व्याकरणं। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति। वेदार्थं चाध्यवस्यति ऊहः खल्वपि न सर्वैर्लिंगैर्न सर्वाभिर्विभक्तिभिर्वेदे मंत्रा निगदिताः। ते चावश्यं यज्ञगतेन यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति विपरिणमयितुं। तस्मादध्येयं व्याकरणं। आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोध्येयो ज्ञेयश्च। प्रधानं च षट्स्वंगेषु व्याकरणं। प्रधाने च कृतो 23 1974

भा॰ प्र॰ १२

यत्नः फलवान्भवति। लघ्वर्थं चाध्येयं व्याकरणं॥ बृहस्पतिरिंद्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नांतं जगा-
म बृहस्पतिश्च वक्ता॥ इंद्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालः अंतं च न जगाम किं पुनरद्य यदि परमायुर्भवति। स वर्षशतं जी॥ इति
।तत्र कुतः प्रतिपदपाठेन शब्दपारागमः कुतस्तरां प्रयोगेण॥ असंदेहार्थं चाध्येयं व्याकरणं॥ याज्ञिकाः पठंति॥ स्थूलपृषतीमाग्निवा-
रुणीमनड्वाहीमालभेतेति॥ तत्र न ज्ञायते॥ किं स्थूलानि पृषंति यस्याः सा स्थूलपृषती॥ किं वा स्थूला चासौ पृषती च स्थूलपृषतीति॥ तां नावै-
याकरणः स्वरतोध्यवस्यति। यदि समासांतोदात्तत्वं ततः कर्मधारयः॥ अथ पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिरिति॥ इमानि च भू-
यः शब्दानुशासनस्य प्रयोजनानीति॥ तेसुराः दुष्टः शब्दः यदधीतं यस्तु प्रयुंक्ते॥ कुशलः अविद्वांसो विभक्तिं कुर्वंति॥ यो वा इमां च-
त्वारि। उत त्वः सक्तुमिव सारस्वतीं दशम्यां पुत्रस्य सुदेवो असि वरुणेति तेसुराः हेलयो हेलय इति कुर्वंतः पराबभूवुः तस्माद्ब्राह्मणेन
न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः॥ म्लेच्छा मा भूमेत्यध्येयं व्याकरणं दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तम-
र्थमाह॥ स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधादिति॥ दुष्टाञ्छब्दान्मा प्रयुंक्ष्महीत्यध्येयं व्याकरणं यदधीतमविज्ञातं
निगदेनैव शब्द्यते॥ अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥ अविज्ञातार्थकं माध्यगीष्महीत्यध्येयं व्याकरणं॥ यस्तु प्रयुंक्ते कु-
शलो विशेषे शब्दान्यथावद्व्यवहारकाले॥ सोनंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः॥ कः वाग्योगविदेव यो हि शब्दा-
न् जानाति॥ अपशब्दानप्यसौ जानाति॥ यथैव शब्दज्ञाने धर्म एवमपशब्दज्ञानेप्यधर्मः प्राप्नोति॥ अथवा भूयानधर्मः प्राप्नोति॥ भूयां-
सो ह्यपशब्दा अल्पीयांसः शब्दाः एकैकस्य बहवोपभ्रंशा यथा गौरित्येतस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयः। अथ यः अवाग्योगवि-
त्। अज्ञानं तस्य शरणं विषम उपन्यासः नात्यंतायाज्ञानं शरणं भवितुमर्हति। यो ह्यजानन्वै ब्राह्मणं हन्यात् सुरां वा पिबेत्॥ सोपि मन्ये पतितः स्या-
त् एवं तर्हि कः अवाग्योगविदेव अथ यः वाग्योगविज्ज्ञानं तस्य शरणं अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः॥ कामं तेषु विप्रोष्य स्त्रीष्वि-
वायमहं वदेदिति॥ स्त्रीवन्मा भूमेत्यध्येयं व्याकरणं विभक्तिं कुर्वंति॥ याज्ञिकाः पठंति॥ प्रयाजाः सविभक्तिकाः कर्तव्या इति॥ न चांतरेण व्याक-
रणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुं तस्मादध्येयं व्याकरणं॥ यो वा इमां पदशः स्वरशो वर्णशश्च वाचं विदधाति॥ स आर्त्विजीनो भव-
ति नार्त्विजीनाः स्यामेत्यध्येयं व्याकरणं॥ चत्वारि शृंगेति। चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य॥ त्रिधा बद्धो वृषभो रो-
रवीति महो देवो मर्त्याँ आविवेश॥ चत्वारि शृंगा चत्वारि पदजातानि॥ नामाख्यातोपसर्गनिपाताश्च॥ त्रयो अस्य पादाः॥ त्रयः कालाः॥ द्वे
शीर्षे नित्यः कार्यश्च सप्त हस्तासः सप्त विभक्तयः॥ त्रिधा बद्धः त्रिषु स्थानेषु बद्धः उरसि कंठे शिरसि॥ वृषभो वर्षणात् कामानां रोरवीति॥ रौ-
तिः शब्दकर्मा॥ महो देवो मर्त्याँ आविवेश॥ महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणं॥ अथ वा चत्वारि वाक्परिमिता पदानि॥
तानि विदुर्ब्राह्मणा ये मनीषिणः॥ गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति॥ ये मनीषिणः मनस ईषिणो मनीषिणः गुहा १२
यानि त्रीणि निहितानि। नेंगयंति न चेष्टंते॥ तुरीयं वाचो मनुष्या वदंति॥ तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्तते॥ उत त्वः पश्यन्न ददर्श वाचमु-

त त्वः शृण्वन्न शृणोत्येनां॥ उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः॥ अपि खल्वेकः पश्यन्नपि न पश्यति अपि खल्वेकः शृण्वन्न शृणोत्येनां 25
अविद्वांसमहार्थं तत्र अन्यस्मै तन्वं विसस्रे तनुं विवृणुते॥ जायेव पत्य उशती सुवासाः यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृ- 1924
णुते। एवं वाग्विदे स्वमात्मानं विवृणुते वाङ् नो विवृणुयादित्यध्येयं व्याकरणं। सक्तुमिवेति सक्तुमिव तितउना पुनंतो यत्र धीरा मनसा वाचमक्रत॥ अत्रा सखायः
सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि॥ सक्तुः सचतेर्दुर्धावो भवति कसतेर्वा स्याद्विपरीतस्य विक सारस्वतीं चाहिताग्निरपशब्दं प्रयुंजानः
सारस्वतीं याममिष्टिं निर्वपेत्सारस्वतीयामा भूयसितो भवति तितउ परिपवनं भवति ततवद्वा तुन्नवद्वा धीराः प्रज्ञावंतो ध्यानवंतो मनसा प्रज्ञानेन वा-
चमक्रत वाचमकृषत अत्रा सखायः सख्यानि जानते॥ अत्र सखायः सख्यानि संजानते सायुज्यानि जानते क एष दुर्गो मार्गः एकगम्यो वाग्विष-
यः। के पुनस्ते वैयाकरणाः कुत एतत् भद्रैषां लक्ष्मीर्निहिताधि वाचि॥ एषां वाचि भद्रा लक्ष्मीर्निहिता भवति लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति। सा-
रस्वतीं याज्ञिकाः पठंति आहिताग्निरपशब्दं प्रयुंजानः प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणं॥ दशम्यां पुत्रस्य
नाम विदध्यात्॥ घोषवदाद्यंतरंतस्थं दीर्घाभिनिष्ठानं त्र्यक्षरं चतुरक्षरं वा कृतं नाम कुर्यात्॥ न तद्धितं तमिति न चांतरेण व्याकरणं कृतः तद्धिता वा
शक्या विज्ञातुं तस्मादध्येयं व्याकरणं॥ सुदेवो असि वरुणेति सुदेवो असि वरुण यस्य ते सप्त सिंधवः अनुक्षरंति काकुदं सूर्म्यं सुषिरामिव॥ सप्त सिंधवः सप्त वि-
भक्तयः॥ काकुतं जीह्वा सास्मिन्नुद्यत इति काकुदं तालु स्वर्णा कल्याणी सूर्मिः सुषिरा लोह॥ प्रति मा ति एवं सिद्धे शब्दार्थसंबंध इत्यादिवार्तिकोक्तान्यपि प्रयो-
जनान्यत्र संधेयानि॥ अथ निरुक्तप्रयोजनमुच्यते॥ अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तं गौः ग्मा। ज्मा। क्ष्मा। क्षा क्षमेत्यारभ्य व-
सवः वाजिनः देवपत्न्यो देवपत्न्य इत्यंतो यः पदानां समाम्नायः समाम्नातः तस्मिन्नर्थे पदार्थावबोधाय परापेक्षा न विद्यते एतावंति पृथिवीनामा-
न्येतावंति हिरण्यनामानीत्येवं तत्र तत्र विस्पष्टमभिहितत्वात् तदेतन्निरुक्तं त्रिकांडं। तच्चानुक्रमणिकाभाष्ये दर्शितं॥ आद्यं नैघंटुकं कांडं द्वितीयं
नैगमं तथा। तृतीयं दैवतं चेति समाम्नायस्त्रिधा मतः॥ गौरित्याद्यपारपर्यंतमाद्यं नैघंटुकं मतं॥ जहाद्युलूकं सर्वांसांतं नैगमं संप्रचक्षते॥ अग्न्यादि दे-
वपत्न्यंतं दैवतकांडमुच्यते॥ अग्न्यादिदेवीर्ऊर्जाहुत्यंतः क्षितिगतो गणः वाय्वादयो भगांता मध्यस्थानदेवताः सूर्यादिदेवपत्न्यंता द्युस्थाना देव-
ता इति। गवादि देवपत्न्यंतं समाम्नायमधीयत इति एकार्थवाचिनां पर्यायशब्दानां संघातः प्रायेणोपदिश्यते॥ तत्र निघंटुशब्दः प्रसिद्धः तादृशोयम-
र्थं निर्वचयंती हला युध्यादिषु शब्दा निघंटव इति व्यवहारात् एवम्। आपि पर्यायशब्दसंख्योपदेशात् आद्यकांडस्य नैघंटुकत्वं तस्मिन्कांडे त्रयोध्यायाः॥
ते पुनः प्रथमे पृथिव्यादिलोकदिक्कालादिद्रव्यविषयाणि नामानि द्वितीये मनुष्यतदवयवादिद्रव्यविषयाणि तृतीये तदुभयद्रव्यगततनुबहुत्वस्नेह-
त्वादिधर्मविषयाणि निगमशब्देन वेदवाची यास्केन तत्र तत्र आपि निगमो भवतीत्येवं वेदवाक्यानामवतारितत्वात्॥ तस्मिन्निगमे ये प्रोच्यावर्त-
मानानां शब्दानां चतुर्थाध्यायरूपे द्वितीये अस्मिन्कांडे उपदिष्टत्वात् तस्य कांडस्य नैगमत्वं पंचमाध्यायरूपस्य तृतीयकांडस्य दैवतत्वं॥ पं-
पंचाध्यायरूपकांडत्रयात्मके अस्मिन्ग्रंथे परनिरपेक्षतया पदार्थस्योक्तत्वात् तस्य ग्रंथस्य निरुक्तत्वं तद्व्याख्यानं च॥ समाम्नायः समाम्ना-
त इत्यारभ्य तस्यास्तस्याः ताद्भाव्यमनुभवत्यनुभवतीत्यंते द्वादशभिरध्यायैर्यास्को निर्ममे तदपि निरुक्तमित्युच्यते॥ एकैकस्य पदस्य संभावि-
ता अवयवार्थास्तत्र निःशेषेणोच्यंत इति व्युत्पत्तेः॥ तत्र हि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्चेति प्रतिज्ञायोक्ताश्च वर्ण्ये पु

भा॰प्र॰ निपतंतीति निपातस्वरूपं निरुक्तेमुदाहृतं। नेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्यायं नेंद्रं देवममंसतेति प्रतिषेधार्थीय इति दुर्मदासो न सुरायामि
त्युपमार्थीय इति च तत्र लौकिकप्रयोगे प्रतिषेधार्थीयस्यापि नकारस्य वेदे प्रतिषेधोपमालक्षणोभयार्थोदाहरणमस्मिन् ग्रंथे वक्ष्यते। एवं ग्रंथकारेण
१३ तास्तनंत्यदनिर्वचनविशेषास्तत्र मंत्र व्याख्यानावसर एवास्माभिरुदाहरिष्यंते तेन च निर्वचनानां निर्मूलत्वं शंकनीयं। एतन्व्युत्पत्त्यर्थमेव ब्राह्मणेषु
पदनिर्वचनानां केषांचिदुक्तत्वात्। तदाहुतीनामाहुतत्वमिति। तमिदं द्रं संतमिंद्र इत्याचक्षत इति। यदप्रथयत तत्पृथिव्यै पृथिवीत्वमिति च ग्रंथकारेण
तत्र स्वोक्तनिर्वचनमूलभूतब्राह्मणान्युदाहरिष्यंति। केषांचिन्निर्वचनानां व्याकरणबलेन सिद्धावपि न सर्वेषां सिद्धिरस्ति। अत एव ग्रंथकार आह। त
दिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं चेति तस्माद्वेदार्थावबोधायोपयुक्तं निरुक्तं। तथा छंदोग्रंथोप्युपयुज्यते। छंदोविशेषाणां तत्र त
त्र विहितत्वात्। तस्मात्सप्त चतुरुत्तराणि छंदांसि प्रातरनुवाकेनूच्यंत इति ह्याम्नातं गायत्र्युष्णिगनुष्टुप् बृहती पंक्तिस्त्रिष्टुप् जगतीत्येतानि सप्त छंदां
सि चतुर्विंशत्यक्षरा गायत्री। ततोपि चतुर्भिरक्षरैरधिका विंशत्यक्षरोष्णिक्। एवमुत्तरोत्तराधिका। अनुष्टुबादयोवगंतव्याः। तथान्यत्रापि श्रूयते।
गायत्रीभिर्ब्राह्मणस्यादध्यात्। त्रिष्टुब्भी राजन्यस्य जगतीभिर्वैश्यस्येति। तत्र मगणयगणादिसाध्यो गायत्र्यादिविवेकः छंदोग्रंथमंतरेण न
सावित्तेयः। किंच। यो ह वा अविदितार्षेयछंदोदैवतब्राह्मणेन मंत्रेण याजयति वाध्यापयति वा स्थाणुं वर्छति गर्तं वा पात्यते प्रमीयते वा पापी
यान्भवति। तस्मादेतानि मंत्रे मंत्रे विद्यादिति श्रूयते। तस्माद्वेदनाय छंदोग्रंथोपयुज्यते। ज्योतिषस्य प्रयोजनं तस्मिन्नेव ग्रंथेभिहितं। यतो
कालार्थसिद्ध्यै प्रतिकालविशेषविधयश्च श्रूयंते। संवत्सरमेतद्व्रतं चरेत्। संवत्सरमुख्यभृत्वेमादयः संवत्सरविधयः। वसंते ब्राह्मण
मग्निमादधीत। ग्रीष्मे राजन्य आदधीत। शरदि वैश्य आदधीतेत्याद्यृतुविधयः। मासि मासि सत्त्रप्रस्थान्युपयंति। मासि मास्यतिग्रा
ह्या गृह्यंत इत्याद्या मासविधयः। यं कामयेत वसीयान्स्यादिति तं पूर्वपक्षे याजयेदित्याद्याः पक्षविधयः। एकाष्टकायां दीक्षेरन् फल्गुनीपू
र्णमासे दीक्षेरन्नित्याद्यास्तिथिविधयः। अतः कालविशेषानवगमयितुं ज्योतिषमुपयुज्यते। एतेषां च वेदार्थोपकारिणां षण्णां ग्रंथानां
वेदांगत्वं शिक्षायामेवमुदाहृतं। छंदः पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणं तु वेदस्य
मुखं व्याकरणं स्मृतं। तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयत इति। षडंगवत्पुराणादीनामपि वेदार्थज्ञानोपयोगो याज्ञवल्क्येन स्मर्यते
॥ पुराणन्यायमीमांसा धर्मशास्त्रांगमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति। इतिहासपुराणाभ्यां समुपबृंहयेदिति। अन्यत्रा
पि स्मर्यत इति। ऐतरेयतैत्तिरीयकाठकादिशाखासु क्वानिदेहरिश्चंद्रनाचिकेताद्युपाख्यानानि धर्मब्रह्मावबोधोपयुक्तानि तेष्वितिहा
सग्रंथेषूपस्पष्टीकृतानि। उपनिषत्काश्च सृष्टिस्थितिलयादयो ब्राह्मणपाठ्यास्ते ब्रह्मवादिपुराणेषूपस्पष्टीकृताः। सर्गश्च प्रतिसर्गश्च वंशो
मन्वंतराणि च। वंशानुचरितं चेति पुराणं पंचलक्षणमिति। स्मृत्यादेः पुराणप्रतिपाद्यत्वावगमात् न्यायशास्त्रं प्रमाणप्रमेयसंशयप्र
योजनदृष्टांतादीनां षोडशपदार्थानां निरूपणात्तदनुसारेणेदं वाक्यमस्मिन्नर्थे प्रमाणं भवति। नेतरदिति निर्णयः कर्तुं शक्यते। पूर्वो १३
त्तरमीमांसयोर्वेदार्थोपयोगोतिस्पष्ट एव। मन्वत्रिविष्णुहारीतादिप्रोक्तासु स्मृतिषु वेदोक्तसंध्यावंदनादिधर्माः प्रपंचिताः। तदु ह वा ए
ते ब्रह्मवादिनः पूर्वाभिमुखाः संध्यायां गायत्र्याभिमंत्रिता आप ऊर्ध्वं विक्षिपंतीत्यादिकः संध्यावंदनविधिः पंच वा एते महायज्ञाः स

ततं प्रतीयंत इत्यादिको महायज्ञविधिः एवं विध्यंतराणि द्रष्टव्यानि। उक्तप्रकारेण पुराणादीनां वेदार्थज्ञानोपयोगाद्विद्यास्थानत्वं युक्तं। एतैः पुरा 27
णादिभिश्चतुर्दशभिर्विद्यास्थानैरुपबृंहितायां विद्यायां ग्रहणेधिकारविशेषः। शाखांतरगतैश्चतुर्भिर्मंत्रैरुपदर्शितः। तांश्च मंत्रान्यास्क 1929
उदाजहार। तत्रायं प्रथमो मंत्रः। विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेहमस्मि। असूयकायानृजवेयताय न मा ब्रूया वीर्यव
मा तीतथा स्यामिति। विद्याभिमानिनी देवता ब्राह्मणमुपदेष्टारमाचार्यमाजगाम आगत्यैवं प्रार्थयामास हे ब्राह्मण मामनधिकारिणेनुपदिश्यपा
लयन् बाहं निधिवत्पुरुषार्थहेतुरस्मि तादृश्यां मयि विलद्रुपदेष्टारं लब्धयोस्यां करोति। अश्रद्धावते विद्यां नाभ्यस्यति। योपि स्नानाचम नथिच
नाद्याचारनियतो न भवति। तादृशेभ्यः शिष्याभासेभ्यो मां न ब्रूयाः। तथा सति तव हृदये स्थिता फलप्रदा भवेयं। अथ द्वितीयो मंत्रः। य आ
तृणत्यवितथेन कर्णाविदुःखं कुर्वन्नमृतं संप्रयच्छन्। तमन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्चनाहेति। पूर्वस्मिन्मंत्रे आचार्यस्य नियम
मभिधायास्मिन्मंत्रे शिष्यस्य नियमोभिधीयते। वितथमनृतमपुरुषार्थभूतं लौकिकवाक्यं तद्विपरीतं सत्यं वेदवाक्यं। अवितथं तादृ
शेन वाक्येन य आचार्यः शिष्यस्य कर्णावातृणत्ति सर्वतस्तद्ध्वनिपूरणं करोति। उपसर्गवशादेवित्याद्यातृणत्तिर्धातोरर्थांतरे वृत्तिः। स
र्वदा वेदं श्रावयतीत्यर्थः। किं कुर्वन्। अदुःखं कुर्वन्। मंदप्रज्ञस्य माणवकस्याद्यावधं वा गृहीतुमशक्तस्य। यथा दुःखं न भवति। तथा पादं
पादैकदेशं वा पाठयन्। किंच अमृतं संप्रयच्छन्। अमृतत्वस्य देवत्वस्य मोक्षस्य वा प्रापकत्वादमृतं वेदार्थस्तस्य प्रदानं कुर्वन्। तेनाद्रूपमाचार्यं
स तच्छिष्यो मुख्यं मातापितृरूपं मन्येत। पूर्वसिद्धौ तु मातापितरावधमस्य मनुष्यशरीरस्य प्रदानादमुख्यौ तस्मै मुख्यमातापितृरूपायाचा
र्यायैकमपि द्रोहं न कुर्यात्। अथ तृतीयो मंत्रः। अध्यापिता ये गुरुं नाद्रियंते विप्रा वाचा मनसा कर्मणा वा। यथैव ते न गुरोर्भोजनीयास्तथैव
तान्न भुनक्ति श्रुतं तदिति। ये विधमा विप्रा गुरुणाध्यापिताः संतोपि विनयोन्नयातदीयहिताचिंतनेन शुश्रूषया वा गुरुं नाद्रियंते। आदररहि
तास्ते शिष्याभासा गुरोर्न भोजनीयाः। अनुभवयोग्या न भवंति। न हि तेषु गुरुः कृपां करोति यथैव गुरुणा नैव पालनीयाः। तथैवेता
नधमान्शिष्यान् तच्छ्रुतं गुरूपदिष्टं वेदवाक्यं न पालयति फलप्रदं न भवतीत्यर्थः। अथ चतुर्थो मंत्रः। यमेव विद्याः शुचिमप्रमत्तं मेधा
विनं ब्रह्मचर्योपपन्नं। यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्निति। हे आचार्य यमेव मुख्यं शिष्यं शुचित्वादिगुणोपेतं जा
नीयाः। किंच यो मुख्यशिष्यस्तुभ्यं कदाचिदपि न द्रुह्येत् तस्मै तु मुख्यशिष्याय तदीयनिधिपालकाय ब्रह्मवेदरूपां विद्यां ब्रूयाः। इत्थं वि
द्यादेवतया प्रार्थितत्वादाचार्येण मुख्यशिष्याय वेदविद्योपदेष्टव्यानदर्थमृग्वेदोस्माभिः षडंगानुसारेण व्याख्यायते। मंत्रब्राह्मणात्मके
वेदे ब्राह्मणस्य मंत्रव्याख्यानोपयोगित्वादादौ ब्राह्मणमारण्यकांडसहितं व्याख्यातं। अथ तत्र तत्र ब्राह्मणोदाहरणेन मंत्रात्मिका संहिताद्य
व्याख्यातव्या। सा चाग्निमीळ इत्यारभ्य यथा वः सुसहासतीत्यंता सकांडैर्दशमंडलैश्चतुःषष्ट्यध्यायैः ईषदधिकसहस्रसूक्तैरीषद
धिकद्विसहस्रवर्गैरीषदधिकाभिर्दशसहस्रसंख्याभिरृग्भिश्चोपेता तस्य तस्य च ग्रंथस्य ऋक्सामस्याध्याम्नातक्रमेण वसामान्यविनियोगो
ब्रह्मयज्ञजपादौ पूर्वमेवाभिहितः। विशेषविनियोगस्तु तत्र तत्र सूत्रकारेण प्रदर्शितः। स च त्रिविधः। सूक्तविनियोगस्तृचादिविनियोग
एकैकस्या ऋचो विनियोगश्चेति। तत्राग्निमीळ इति सूक्तं प्रातरनुवाक आग्नेयक्रतौ विनियुक्तं। स विनियोग आश्वलायनेन चतुर्थाध्याये

भा॰ प्र॰ योदेशोवंदेसन्नितः॥ अथानोअग्न इतिषडग्निमीळेग्निंदूतंइतितत्रहीनपादग्रहणात्सूक्तनिश्चयः॥ सूक्तंसकादौहीनेपादइतिपरिभाषितत्वात्
तस्मिन्सूक्ते प्रथमायाऋचोद्वितीयस्यांपवमानेष्टौस्विष्टकृतोयाज्यात्वेनविनियोगः॥ सचद्वितीयाध्यायस्यप्रथमखंडेसूत्रितः॥ साक्षानिश्वा
१४ अभियुक्तोअग्निमीळेपुरोहितमितिसंयाज्येइतितत्रसकलपादग्रहणात्ऋगित्यवगम्यते॥ ऋचंपादग्रहणइतिपरिभाषितत्वात्॥ तथासं
याज्येइत्युक्ते सौविष्टकृतीएतेप्रतीयादितिपरिभाषितत्वात्स्विष्टकृत्संबंधनिश्चयः॥ तत्रापिद्वितीयमंत्रत्वेनाशङ्कितत्वात्पाठ्यात्वेपसिप्सा
व्यानित्यनयापुरोनुवाक्ययैवदेवतायाअनुस्मरणरूपसंस्कारसिद्धेः॥ तथापियाज्यानुवाक्ययोःसमुच्चयोद्वादशेऽध्यायेचतुर्थपादेमीमां
सितः॥ पुरोनुवाक्यायाज्यायाविकल्पोवासमुच्चितो॥ पुरोनुवाक्याविकल्पान्यतरेणैवदेवतायाःप्रकाशनात्तत्रसमारभ्यानाडुच्यनात्॥
समुच्चयः॥ देवताप्रकाशनकार्यस्यैकत्वात्युग्मयोर्यथाविकल्पस्तथैवैकयुग्मगतयोरितिचेत्॥ मैवंपुरोनुवाक्याप्रतिसमाख्यानाउत्तरकाली
नयाज्यामंत्रेणानुपपत्तेः॥ किंचपुरोनुवाक्यामनूच्ययाज्ययायजतीतिप्रत्यक्षवचनेनदेवतोपलक्षणहविःप्रदानकार्यभेदात्पुरःसरंसाहि
त्यंविधीयते॥ तस्मात्समुच्चयइति॥ एतच्चाग्निमित्यादिसूक्तंनवर्चंअग्निंनवमधुच्छंदावैश्वामित्रइतिअनुक्रमणिकायामुक्तत्वाद्विश्वामित्रपु
त्रोमधुच्छंदानामकःतस्यसूक्तस्यद्रष्टात्वान्दरीयत्वर्षिः॥ ऋषगतावितिधातुर्वेदप्राप्त्यर्थंतपोनुतिष्ठतः॥ पुरयानस्यस्वयंभूर्वेदपुरुषःप्रादात्॥
तथाचश्रूयते॥ अजान्हवैपृश्नींस्तपस्यमानान्ब्रह्मस्वयंभ्वभ्यानर्षत्तदृषयोभवन्निति॥ तथाअतीन्द्रियस्यवेदस्यपरमेश्वरानुग्रहेण
प्रथमतोदर्शनात्॥ ऋषित्वमित्यप्येतत्स्मर्यते॥ युगांतेंतर्हितान्वेदान्सेतिहासान्महर्षयः॥ लेभिरेतपसापूर्वमनुज्ञातान्स्वयंभुवेति॥ स्मृत्यादिताना
भावप्रत्यवायःस्मर्यते॥ अविदित्वाऋषिच्छंदोदैवतंयोगमेववायोऽध्यापयेज्जपेद्वापिपापीयाञ्जायतेतुसः॥ ऋषिच्छंदोदेवतानिब्राह्मणार्थंस्वरा
द्यपिअविदित्वाप्रयुंजानोमंत्रकंटकउच्यतइति॥ वेदेनाविधिश्चस्मर्यते॥ स्वरवर्णाक्षरमात्राविनियोगोर्थमेवच॥ मंत्रंजिज्ञासमानेनवेदितव्यंपदेपदइ
ति॥ अग्निमित्यादिसूक्तस्यछंदोनुक्रमणिकायांयद्यप्यत्रेनोक्तं॥ तथापिपरिभाषायामेवोक्तं॥ आदौगायत्रंप्राक्हिरण्यस्तूपादिति॥ हिरण्यस्तूपाख्य
ऋषिः॥ येषांमंत्राणांवक्ष्यतेततःप्राचीनेषुमंत्रेषुसामान्येनगायत्रंछंदइत्यर्थः॥ पुरुषस्यपापसंबंधंवारयितुमाछादकत्वात्छंदइत्युच्यते॥ तच्चा
रण्यकांडेसमाम्नायते॥ छादयंतिनाहवाएनंछंदांसिपापात्कर्मणइति॥ अथवार्चीयमानाग्निसंतापस्याछादकत्वात्छंदः॥ तच्चतैत्तिरीयाआम
नंति॥ प्रजापतिरग्निमचिनुत॥ सक्षुरपविर्भूत्वातिष्ठत्॥ तंदेवाबिभ्यतोनोपायन्॥ तेछंदोभिरात्मानंछादयित्वोपायन्॥ तच्छंदसांछंदस्त्वमि
ति॥ यद्वापमृत्युंवारयितुमाछादयंतीतिछंदः॥ तदपिछांदोग्योपनिषदिआम्नातं॥ देवावैमृत्योर्बिभ्यतस्त्रयींविद्यांप्राविशंस्तेछंदोभिरात्मान
माछादयन्यदेभिराछादयंस्तच्छंदसांछंदस्त्वमिति॥ तथाद्योतनार्थाद्दीव्यतिधातुनिष्पन्नोदेवशब्दः॥ एतदाम्नातंदेवावैनोभूदिति॥ तद्देवानांदेवत्व
मिति॥ अतोदीव्यतीतिदेवः॥ मंत्रेणद्योततइत्यर्थः॥ प्रथमेमंडलेप्रथमानुवाकेत्रीणिसूक्तानितत्राद्येनवर्चेसूक्ते॥ अग्निनामकंस्तूयमानत्वाद
ग्निर्देवः॥ तथाचानुक्रमणिकायामुक्तं॥ मंडलादिष्वाग्नेयमंत्राद्विति॥ तस्यसूक्तस्यप्रथमामृचंभगवान्वेदपुरुषआह॥ ॥ ॐ अग्निमीळेपुरो १४
हितंयज्ञस्यदेवमृत्विजं॥ होतारंरत्नधातमं॥ अग्निनामकंदेवमीळेस्तौमि॥ ईडस्तुताविति धातुः॥ डकारस्यळकारोबह्वृचाध्येतृसंप्रदायप्राप्तः॥
तथाचपठ्यते॥ अज्मध्यस्थडकारस्यळकारंबह्वृचाजगुःअज्मध्यस्थढकारस्यळ्हकारंवैयथाक्रममितिमंत्रस्यहोत्राप्रयोज्यत्वादहंहोतास्तौ

मीतिरुच्यते॥ कीदृशमग्निंयज्ञस्यपुरोहितं यथाराज्ञःपुरोहितःतदभीष्टंसंपादयति तथाग्निरपियज्ञस्यापेक्षितंहोमंसंपादयति यद्वायज्ञस्यसंबं 29
धिनिपूर्वभागेआहवनीयरूपेणावस्थितंपुनःकीदृशंदेवंदानादिगुणयुक्तं॥ पुनःकीदृशंहोतारमृत्विजंदेवानांयज्ञेषुहोतृनामकऋत्विङ्ना 1924
मकश्चयज्ञेत्विगग्निरेव तथाचश्रूयते॥ अग्निर्वैदेवानांहोतेति॥ पुनरपिकीदृशं॥ रत्नधातमं॥ यागफलरूपाणांरत्नानामतिशयेनधारयि
तारं॥ पोषयितारंवा॥ अत्राग्निशब्दस्ययास्कोयद्व्यानिर्वचनंदर्शयति॥ अथातोनुक्रमिष्यामोग्निःपृथिवीस्थानस्तंप्रथमंव्याख्यास्यामोग्नि
निःकस्मादग्रणीर्भवत्यग्रंयज्ञेषुप्रणीयतेअंगंनयतिसंनममानोक्नोपनोभवतीतिस्थौलाष्ठीविर्नक्नोपयतिनस्नेहयतित्रिभ्यआख्यातेभ्यो
जायतइतिशाकपूणिरितादक्ताद्दग्धाद्वानीतात्सक्खल्वेतेरकारमादत्तेगकारमनक्तेर्वानीःपरस्तस्यैषाभवतीति॥ अग्निमीळइति॥ अस्या
यमर्थः॥ सामान्येनसर्वदेवतानांलक्षणस्याभिहितत्वात्॥ अनंतरंयतःप्रतिपदंविशेषेणवक्तव्यत्वमाकांक्षितमतोनुक्रमेणवक्ष्यामः॥
तत्रपृथिवीलोकोक्तोग्निःप्रथमंव्याख्यास्यतेकस्मात्प्रवृत्तिनिमित्तात्अग्निशब्देनदेवताभिधीयते॥ इतिप्रश्नस्याग्रणीरित्यादिकमुत्त
रं॥ देवसेनामग्रेस्वयंनयतीत्यग्रणीः॥ एतदेकमग्निशब्दस्यप्रवृत्तिनिमित्तं॥ तथाचब्राह्मणांतरं॥ अग्निर्देवानांसेनानीरिति॥ एतदेवा
भिप्रेत्यबह्वृचामंत्रब्राह्मणेआमनंति अग्निर्मुखंप्रथमोदेवतानामितिचमंत्रः॥ अग्निर्वैदेवानामवमइतिब्राह्मणं॥ तथाचतैत्तिरीया
आमनंति॥ अग्निरग्रेप्रथमोदेवतानामिति॥ अग्निरवमोदेवतानामितिच॥ वाजसनेयिनस्त्वेवमामनंति॥ सवाएषोग्रेदेवतानामजाय
तत्स्मादग्निर्नामेति यज्ञेष्वग्निहोत्रेष्टिपशुसोमरूपेष्वग्रंपूर्वदिग्वर्त्याहवनीयदेशंप्रतिगार्हपत्यात्प्रणीयतइतिद्वितीयंप्रवृत्तिनिमि
त्तं॥ संनममानःसम्यक्स्वयमेवप्रह्वीभवन्नंगंस्वकीयंशरीरंनयतिकाष्ठदाहहविःपाकेचप्रेरयतीतितृतीयंप्रवृत्तिनिमित्तं॥ स्थौलाष्ठी
विनामकस्यमहर्षेःपुत्रोनिरुक्तकारःकश्चिदक्नोपनइत्यग्निशब्दंनिर्वक्ति॥ तत्रनक्नोपयतीत्यक्नोपनःस्नेहयति॥ किंतुकाष्ठादिकंरूक्षयती
त्युक्तंभवति॥ शाकपूणिनामकोनिरुक्तकारोधातुत्रयादग्निशब्दनिष्पत्तिंमन्यते॥ इतइणगतावितिधातुः॥ अक्तोञ्जूव्यक्तिम्रक्षणकां
तिगतिष्वितिधातुः॥ दग्धोदहभस्मीकरणइतिधातुः॥ नीप्रापणइतिधातुः॥ अग्निशब्दोह्यकारगकारनिशब्दानपेक्षमाणइति॥
एतिधातोरयंनारायणशब्दादकारमादत्ते॥ अनक्तिधातुगतस्यककारस्यगकारादेशंकृत्वातमादत्ते॥ यद्वादहतिधातुजन्याद्दग्धश
ब्दाद्गकारमादत्ते॥ नीरिति॥ नयतिधातुः॥ सचह्रस्वोभूत्वापरोभवति॥ ततोधातुत्रयमिलित्वाग्निशब्दोभवति॥ यज्ञभूमिंगत्वास्वकीयसं
गंनयति॥ काष्ठदाहहविःपाकेचप्रेरयतीतिसमुदायार्थः॥ तस्याग्निशब्दार्थस्यदेवताविशेषस्यप्राधान्येनस्तुतिप्रदर्शनायवाग्निमी
ळइतिऋग्भवतीति॥ तामेतामृचंयास्कएवंव्याख्यातवान्॥ ७॥ अग्निमीळेग्निंयाचामीळिरध्येषणाकर्मापूजाकर्मावापुरोहितोव्याख्या
तोयज्ञश्चदेवोदानाद्वादीपनाद्वाद्योतनाद्वाद्युस्थानोभवतीतिवायोदेवःसादेवता होतारंह्वातारंजुहोतेर्होतेत्यौर्णवाभोरत्नधातमंरमणीया
नांधनानांदातृतममिति॥ अस्यायमर्थः॥ इडइतिधातोःस्तुत्यर्थत्वंप्रसिद्धं॥ धातूनामनेकार्थत्वमितिन्यायमाश्रित्ययाच्ञाध्येषणापूजा
अप्यत्रोचितत्वात्तदर्थतयाव्याख्याताः॥ पुरोहितशब्दोद्वितीयाध्यायेयद्देवापिःशंतनवेपुरोहितइत्येतामृचमुदाहृत्यपुरएनंदधतीतिव्याख्या
तः॥ तैत्तिरीयाश्चपौरोहित्येस्पर्धमानस्यपरशुनाबाणंविधायतत्फलत्वेनपुरएनंदधतइत्यामनंति॥ देवशब्दोदानदीपनद्योतनाना

भा॰ष्य॰प्र॰ मन्यतममर्त्यमाचक्षे ॥ यज्ञस्य दातारं दीपयितारं द्योतयितारं वा यजमानस्य कं भवति दीपनद्योतनयोरेकार्थत्वेप्यस्ति धातुभेदः ॥ यद्यप्यग्निः पृथिवी
१५ स्थानस्तथापि देवान्यज्ञे तद्धविर्वहनाद् द्युस्थानो भवति ॥ देवशब्ददेवताशब्दयोः पर्यायत्वात् मंत्रप्रतिपाद्यत्वाच्चेंद्रियातिरिक्ता देवता नान्ने व
णीया ॥ होतृशब्दस्य ह्वयतिधातोः सेनत्वेन देवानामाह्वातारमिति ॥ और्णवाभनामकस्तु मुनिर्जुहोतिधातोरस्य होतृशब्द इतिमन्य
ते ॥ अग्नेश्च होतृत्वं होमाधिकरणत्वेन द्रष्टव्यं ॥ रत्नशब्दो द्वितीयाध्याये भद्रमित्यादिषु सार्धेषु त्रिंशतौ धननामसु पठितः रमणीयत्वाद्रत्न
त्वं दधातिधातुरत्र दानार्थवाचीति ॥ तदिदं निरुक्तकारस्य यास्कस्य मंत्रव्याख्यानं ॥ अथ व्याकरणप्रक्रियोच्यते ॥ अगि धातो गत्यर्थो द
गार्निर्नलोपश्चेत्यौणादिकसूत्रेण निप्रत्ययः ॥ इदितो नुम् धातोरिति नुमागमे प्राप्तस्य नकारस्य लोपश्च भवति ॥ अंगति स्वर्गं गच्छतीत्यग्निर्नेतुमित्यः
निः ॥ तत्र धातोः स्वरः अकार उदात्तः ॥ आद्युदात्तश्चेति प्रत्ययगत इकारोप्युदात्तः ॥ अनुदात्तं पदमेकवर्जमिति द्वयोरन्यतरमुदात्तमवशिष्यतरस्या
नुदात्तत्वं प्राप्तं ॥ तत्र धातुस्वरे प्रथमं तावत्सिद्धे सति पश्चादुपदिश्यमानः प्रत्ययस्वरो बलीयान् इति हि न्यायः ॥ ततो
तोदात्तमग्निप्रातिपदिकं ॥ अनुदात्तौ सुप्पितावित्यमि त्वेतद्द्वितीयैकवचनमनुदात्तं ॥ तस्यामि पूर्वः इति पूर्वरूपत्वे तदुदात्तं ॥ एकादेश उदा
त्तेनोदात्त इति सवित्वादग्निशब्दोंतोदात्त इति मतेनैषा प्रक्रिया सर्वापि द्रष्टव्या ॥ मतद्वयं यास्केन प्रदर्शितं ॥ नामान्याख्यातजानीति शाकटायनो नैरुक्त
समयश्च न सर्वाणीति गार्ग्यो वैयाकरणानां चैके इति गार्ग्यस्य मतेग्निशब्दस्याखंडप्रातिपदिकत्वात् फिषोंत उदात्त इत्यंतोदात्तत्वं ॥ पूर्वोक्ते च यणीरित्या
दिनिर्वचनेषु प्रकृतिप्रत्ययाद्यंशप्रक्रिया पृथगेवोचितं कल्पनीया ॥ एतदेवाभिप्रेत्य यास्क आह ॥ अथानिर्वचनं तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रा
देशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादथानन्विते र्थे प्रादेशिके विकारे र्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येप्य
क्षरवर्णसामान्यान्निर्ब्रूयान्न त्वेव न निर्ब्रूयादिति ॥ ७ ॥ अस्यायमर्थः ॥ तत्र निर्वचनीयपदसमूहमध्ये येष्वग्न्यादिपदेषु पूर्वोक्तरीत्या स्वरसंस्का
रौ समर्थौ व्याकरणसिद्धौ स्यातां ॥ स्वर उदात्तादिः संस्कारो निप्रत्ययादिः ॥ किंच तौ स्वरसंस्कारौ प्रादेशिकेन गुणेनान्वितौ स्यातां ॥ शब्दस्यैकदेशः
पूर्वोक्तो अगि धातुः प्रादेशः ॥ तत्र भवो गुणो गतिरूपोर्थः ॥ तेनान्वितौ ॥ तान्यग्न्यादिपदानि तथा व्याकरणानुसारेण निर्ब्रूयात ॥ तच्च निर्वचनम
स्माभिः प्रदर्शितं ॥ अथ पूर्वोक्तवैलक्षण्येन कश्चित्स्वरो विवक्षितोर्थो नान्वितस्तस्मिन् शब्देनुगतो भवेत् ॥ तस्यैव व्याख्यानमप्रादेशिके विकार इ
ति ॥ अग्न्यनयनादिरूपः क्रियाविशेषो विकारः ॥ स च प्रदेशो नाम्नि शब्दैकदेशे नात्र नाभिधीयत इत्यप्रादेशिकः ॥ एवं सति यः पुमानर्थनित्यः स विव
क्षितेर्थे नियतो निर्बंधवान् शास्त्रानुसारेण वा देवतांतरविशेषणत्वेन योजयन्नुपासनिर्बंधः ॥ तदानीं स पुमान् केनचिद्वृत्तिसामान्येन स्वविव
क्षितमर्थं परीक्षेत ॥ तस्मिन् शब्दे योजयेत् ॥ वृत्तिः क्रिया तद्रूपेण सामान्यं सादृश्यं अस्माभिश्चाग्रनयनादिरूपं क्रियात्वसाम्यमुपजीव्याग्रणीत्वाद्य
र्थो योजितः ॥ तदिदं यास्काभिमतं निर्वचनं ॥ क्रियाकार्थाविरहे क्षरसामान्यान्निर्वक्ति ॥ अक्नोपनशब्दस्यादौ निषेधार्थमकाररूपमक्षरं विद्यते ॥ अग्नि
शब्दस्याप्यादावकारोस्ति ॥ तदिदमक्षरसाम्यं ॥ क्नूयी शब्दे इति वर्णसाम्यान्निर्ब्रूते ॥ दग्धशब्दाग्निशब्दयोर्गकारवर्णेन साम्यं ॥ सर्वथापि निर्वचनं १५
न त्याज्यमिति ॥ ईळ इत्येतस्य रूपमप्यनुदात्तं ॥ तिङ्ङतिङ इति अतिङंतादग्निशब्दात्परस्य तिङंतस्य निघातविधानात् ॥ संहितायां तु ईका
रस्य धातुगतस्योदात्तादनुदात्तस्य स्वरितः इति स्वरितत्वं तस्मादूर्ध्वभाविनः एकारस्य तिङ्प्रत्ययरूपस्य स्वरितात् संहितायामनुदात्तानामि

त्येकृत्स्नं प्रचयनामकं भवति। पुरःशब्दोंतोदात्तः अयं पुरो भुव इत्यत्र तथैवाम्नातत्वात् पूर्वाधरावराणामसि पुरधवश्चैषामिति पूर्वशब्दादस्प्रत्ययः
पुरादेशश्च ॥ ततोत्र प्रत्ययस्वरः ॥ धाञो निष्ठायां दधातेर्हिरित्यादेशे सति प्रत्ययस्वरेणांतोदात्तो हितशब्दः पुरादेशश्च ॥ ततोत्र प्रत्ययस्वरः ॥ धायोर्यर
धातेर्हिरित्यत्र समासांतोदात्तत्वे प्राप्ते तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः इत्यव्ययपूर्वपदप्रकृतिस्वरत्वं। यद्वा पुरोव्ययमिति गतिसंज्ञायां गतिरनंतर इति
पूर्वपदप्रकृतिस्वरत्वं। तत्रोकार उदात्तः ॥ अवशिष्टानामनुदात्तस्वरितप्रचयाः पूर्ववद्द्रष्टव्याः। आद्याक्षरस्य संहितायां प्रचयप्राप्तावुदात्तस्वरि
तपरस्य संनतर इत्यतिनीचोनुदात्तः ॥ यजयाचेत्यादिना यजतेर्नङ्प्रत्यये सत्यंतोदात्तो यज्ञशब्दः ॥ विभक्तेः सुप्स्वरेणानुदात्तत्वे सति पश्चात्स्वरि
तत्वं ॥ देवशब्दः पचाद्यजंतः ॥ स च चित्स्वरेण प्रत्ययस्वरेण चित्स्वरेण वांतोदात्तः ॥ ऋत्विक्शब्द ऋतौ यजतीति विग्रहे सति ऋत्विग्दधृगिति निपा
तितः गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तः विभक्तिस्वरः पूर्ववद्धोतृशब्दस्तृन्प्रत्ययांतो नित्स्वरेणाद्युदात्तः ञ्नित्यादिर्नित्यमि
तिस्वरितप्रचयौ पूर्ववत् ॥ रत्नशब्दो न विषयस्यानिसंतस्येत्याद्युदात्तः ॥ तथा चाम्नायते। रत्नधातेति। रत्नानि दधातीति विग्रहः। रत्नधःत्ते
तिस्वरितप्रचयौ पूर्ववत् ॥ रत्नशब्देन षष्ठ्यंतस्य समासे सति तत्पुरुषे तुल्यार्थ... रत्नशब्दः ॥ यद्वा। कृदुत्तरपदप्रकृतिस्वरः ॥ तमप्प्रत्ययस्य पित्स्वरेणानुदात्ते सति स्वरितप्रचयौ ॥ संहितायामाद्यक्ष
रस्य प्रचयः ॥ द्वितीयाक्षरस्य संनतरत्वं वेदावतार आद्याया ऋचोर्थश्च प्रपंचितः ॥ विस्तरेण वेदगांभीर्यमथ संक्षिप्य वर्ण्यते ॥ आग्नेयस्तत्र
द्वितीयामृचमाह ॥ ॥ २ ॥ अग्निः पूर्वेभिरृषिभिरीड्यो नूतनैरुत ॥ स देवाँ एह वक्षति ॥ अयमग्निः पूर्वेभिः पुरातनैर्भृग्वंगिरःप्रभृति
भिरृषिभिरीड्यः स्तुत्यः ॥ नूतनैरुत इदानींतनैरस्माभिरपि स्तुत्यः सोग्निः स्तुतः सन् इह यज्ञे देवान् हविर्भुजः आ वक्षति ॥ वह प्रापणे
इति धातुः आवहतीत्यर्थः ॥ पूर्वेभिरित्यत्र बहुलं छंदसीति भिस ऐसादेशाभावः पूर्वं पर्व भरणे पूरणे इति धातुः ॥ पूर्व इति धातोरच्प्रत्ययः
औणादिकः ॥ इन्प्रत्ययांत ऋषिशब्दः ॥ ऋष्यंधकेतिनिपातनाल्लघूपधगुणाभावः कित्प्रत्ययानात्रत्यय ॥ तोश्चाद्यौ नित्स्वरेणाद्युदात्तौ ई
औणादिकः ॥ इन्प्रत्ययांत ऋषिशब्दः ॥ ऋष्यंधकेतिनिपातनाल्लघूपधगुणाभावः ॥ नवशब्दस्य नू इत्या
भ्राद्यस्य ण्यप्रत्ययांतत्वात्तित्स्वरितमिति स्वरितत्वे प्राप्ते तत्पुरुषे तुल्यार्थेत्यादिना प्रादेशे तनब्ध्यामनेन मनुदात्तत्वं ॥ नवशब्दस्य नू इत्या
देशः तनप्प्रत्ययश्च महावार्तिकविहितः ॥ ततो नित्स्वरेणाद्युदात्तः ॥ अवशिष्टस्वरा अग्न्यादिषु नूतनांतेषु पूर्ववदुन्नेयाः ॥ उतशब्दोयं पः
पिविकल्पार्थप्रसिद्धः ॥ तथापि निपातत्वेनानेकार्थत्वाद्रौचित्येनात्र समुच्चयार्थो द्रष्टव्यः ॥ इवादयश्च पर्युनिपतंतीति निपातत्वं तर्हि नि
पाता आद्युदात्ता इत्येकाकारस्योदात्तत्वमिति चेत् न। प्रातःशब्दवदंतोदात्तत्वात् ॥ यथा प्रातःशब्दोंतोदात्तस्तेनैव स्वरादिषु पठितः ॥ एवमु
तशब्दस्यापि पाठो द्रष्टव्यः। स्वरादेराकृतिगणत्वात् ॥ एवादीनामंतः इत्यंतोदात्तत्वं। यद्वा। सदृशस्वरः ॥ देवशब्दः पूर्ववत् ॥ देवानित्यत्र
नकारस्य संहितायां दीर्घादटि समानपादे इति रुत्वं ॥ अत्रानुनासिकः पूर्वस्य तु वा आतोटि नित्यमित्याकारः सानुनासिकः ॥ भोभगो इति रोर्यकारः ॥ सबलो
पः शाकल्यस्येति लुप्यते ॥ तस्मात्सिद्धत्वान्न पुनः संधिकार्यं आङो निपातत्वादाद्युदात्तत्वं ॥ इदमोऽदंप्रत्यये सति निष्पन्नत्वादिह शब्दप्रत्ययस्व
रः ॥ वह इति धातोर्लेटि र्थ छांदसो लृट् ॥ स्यप्रत्ययगतस्य यकारस्य लोपो पि छांदसः ॥ यद्वा लेटि सिब्बहुलमिति सिप्प्रत्ययः ॥ लेटोडाटावित्यडा
गमश्च। ततो वक्ष्यतीति संपद्यते ॥ तस्य तिङ्ङतिङ इति तिङंतत्वान्निघातः संहितास्वराः पूर्ववत् ॥ आधाने तृतीये प्रथमानुवाक्या
नुवाक्यास्तु ऋग्वातानुवचनीयामेतां तृतीयामृचमाह ॥ ॥ ३ ॥ अग्निना रयिमश्नवत्पोषमेव दिवेदिवे ॥ यशसं वीरवत्तमं ॥ योयं होत्रा स्तुतो

मिः तेनाग्निनानिमित्तभूतेन यजमानो रयिं धनमश्नवत् ॥ प्राप्नोति ॥ कीदृशं रयिं ॥ दिवेदिवे पोषमेव प्रतिदिनं पुष्यमाणमेव यावर्धमानमेव न तु कदा

भाष्य॰ प्र॰ चिदपि क्षीयमाणं ॥ यशसं दानादिना यशोयुक्तं ॥ वीरवत्तमं अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतं ॥ सति हि धने पुरुषाः संपद्यंते ॥ रयिरिति

१६ यमित्यादि धननामसु पठितं ॥ तत्र फिट्स्वरः अश्नोतेर्धातोर्लेट्यडागमः ॥ इतश्च लोप इतीकारलोपः ॥ ह्रस्वादिस्वरमनुः ॥ ततोऽस्य

दिति भवति ॥ तस्य निघातः ॥ घञन्तत्वात्पोषशब्द आद्युदात्तः ॥ एवशब्दस्य निपातत्वेप्येवादीनामंत इत्यंतोदात्तत्वं ॥ वकारांतादिवशब्दात्पर

स्याः सप्तम्याः सुपां सुलुगित्यादिना शे भावे सति सावेकाच इत्यादिनोदिवं पदादीत्यादिना वा तस्योदात्तत्वं ॥ नित्यवीप्सयोरिति द्विर्भावे सत्युत्तर

भागस्यानुदात्तत्वं चेत्यनुदात्तं ॥ यशो स्यास्तीति विग्रहे सप्तर्षा आदिभ्योऽचित्यन्प्रत्ययः ॥ चित्स्वरं प्रत्ययेन बाधित्वा मध्योदात्तत्वं ॥ फिट्स्वरेणांतो

दात्ताद्वीरशब्दादुत्तरयोः मतुप्तमपोः पित्वादनुदात्तत्वं ॥ अग्निं पूर्वपद इत्यस्य मध्यवर्तिपूषस्थे पुत्रतीयसवने मैत्रावरुणस्याग्नेयं यज्ञमित्याद्यो

के कल्पिकोनुरूपस्तृचः ॥ एतच्च सप्तमाध्याये कृषिरत्यादिखंडे सूचितं ॥ अग्निं वो रथंतममग्ने यं यज्ञमध्वरमिति ॥ तस्मिन्सूक्ते या प्रथमासा

सूक्ते चतुर्थर्क् ॥ तामेतां चतुर्थीमृचमाह ॥ ॥ अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ॥ स इद्देवेषु गच्छति ॥ हे अग्ने त्वं यं यज्ञं विश्वतः सर्वासु दिक्षु परि

भूः परितः प्राप्तवानसि ॥ स इत् स एव यज्ञो देवेषु तृप्तिं जनयितुं स्वर्गं गच्छति ॥ प्राच्यादिचतुर्दिक्षु आहवनीयमार्जालीयगार्हपत्याग्नीध्रीयस्था

नेष्वग्निरस्ति ॥ परिग्रहेन होत्रियादिधिष्ण्येष्वामिति विवक्षिता ॥ कीदृशं यज्ञं ॥ अध्वरं हिंसारहितं ॥ न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिं

सितुं प्रभवंति ॥ अग्निशब्दस्य पाष्टिकमामंत्रिताद्युदात्तत्वं ॥ नविद्यते ध्वरो यस्येति बहुव्रीहौ नञ्सुभ्यामित्यंतोदात्तत्वं ॥ विश्वत इत्यत्र तसिलप्र

त्ययस्वरत्वं बाधित्वा पूर्वं वर्णस्याकितीकंदत्तत्वं ॥ परिभूरित्यत्राव्यय पूर्वपदप्रकृतिस्वरत्वे प्राप्ते तदपवादत्वेन कृदुत्तरपदप्रकृतिस्वरत्वं ॥ असी

तितिङंतस्य पदत्वान्नित्यमितिनिघाताभावः ॥ ॥ पंचमीमृचमाह ॥ अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ॥ देवो देवेभिरागमत ॥

अयमग्निर्देवो अन्यैर्देवैः हविर्भोक्तृभिः सहागमत ॥ अस्मिन्यज्ञे समागच्छतु ॥ कीदृशोग्निः होता होमनिष्पादकः ॥ कविक्रतुः कविशब्दः क्रां

तवचनो न तु मेधाविनामसु ॥ क्रतुः प्रज्ञानस्य कर्मणो वा नाम ॥ ततः क्रांतप्रज्ञः क्रांतकर्मा वा ॥ सत्यः अनृतरहितः फलमवश्यं प्रयच्छतीत्यर्थः ॥ चित्र

श्रवस्तमः श्रूयत इति श्रवः ॥ कीर्तिः अतिशयेन चित्रकीर्तियुक्तः ॥ कविक्रतुः चित्रश्रवस्तम इत्यत्रोभयत्र बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वर

त्वं ॥ लोडंतस्य गच्छतितिशब्दस्य छंदस्याभावउकारलोपश्छांदसः ॥ ततो रूपं गमत्विति भवति स्यमन्यत ॥ ॥ इत्यृक्संहितायां वेदार्थप्रकाशे

प्रथमकांडस्य प्रथमाध्याये प्रथमो वर्गः ॥ आग्नेयसूक्ते षष्ठीमृचमाह ॥ ॥ यदंग दाशुषे त्वमग्ने भद्रं करिष्यसि ॥ तवेत्तत्सत्यमंगिरः ॥ अं

गीत्यभिमुखीकरणार्थो निपातः ॥ अंगाग्ने हे अग्ने त्वं दाशुषे हविर्दत्तवते यजमानाय तत्प्रीत्यर्थं यद्भद्रं वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि तद्भ

द्रं तवेत् तवैव सुखहेतुरिति शेषः ॥ हे अंगिरोग्ने एतच्च सत्यं न त्वत्र विसंवादोस्ति ॥ यजमानस्य वित्तादिसंपत्तौ सत्यामुत्तरक्रत्वनुष्ठानेनाग्नेरेव सु

खं भवति ॥ भद्रशब्दार्थं शाट्यायनिनः समामनंति ॥ यद्वै पुरुषस्य वित्तं तद्भद्रं गृहा भद्रं प्रजा भद्रं पशवो भद्रमिति ॥ अंगशब्दस्य निपातत्वेप्य १६

भ्यादित्वादंतोदात्तत्वं ॥ दाशुष इति दाश्वान्साह्वानिति सूत्रेण दाशृ दाने इति धातोः क्वसुप्रत्ययो निपातितः ॥ तत्र प्रत्ययस्वरः ॥ आमंत्रितान्निरा

कृतस्य पदात्परत्वेनाष्टमिकानुदात्तत्वं न शंकनीयं ॥ अपादादाविति पर्युदस्तत्वात्ततः षाष्ठिकमाद्युदात्तत्वमेव भद्रशब्दस्य न विषयत्वेनाद्युदा

त्तत्वं प्रसक्तायपि भदि कल्याण इति धातोरपरि रक् प्रत्ययेन निपातनादंतोदात्तत्वं ॥ अग्निनाग्नेय यच्छब्दप्रयोगान्निपातैर्यद्यदि हंतेति निघाते 33

प्रतिषिद्धे स्य प्रत्ययस्वरेण सति शिष्टेन करिष्यसिशब्द उपांत्योदात्तः ॥ तवेत्यत्र युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं ॥ अंगिरा अंगारा इति यास्कः 1929

॥ एतद्रयिणोपि प्रजापतिदुहितृध्यानोपाख्याने समामनंति ॥ ये गारा आसंस्तेंगिरसोभवन्निति तस्मादंगिरोनामकमुनिकारणत्वादंगा

ररूपस्याग्नेरंगिरस्त्वं ॥ अत्र पदात्परत्वेनाष्टमिकानुदात्तत्वं ॥ अग्नीषोमप्रणयने उपत्वाग्न इत्यादिकोनुवचनीयस्तृचः ॥ एतच्च ब्राह्मणे

समाम्नातं ॥ उपत्वाग्ने दिवेदिव उपप्रियं पनिप्नतमिति तिस्रश्चैकां चान्वाहेति तस्मिन्नृचे या प्रथमा सा सूक्ते सप्तमी ॥ तामेतां सप्तमीमृच

माह ॥ ॥ उपत्वाग्ने दिवेदिवे दोषावस्तर्धिया वयं ॥ नमो भरंत एमसि ॥ हे अग्ने वयमनुष्ठातारो दिवेदिवे प्रतिदिनं दोषावस्तः रात्रा

वहनि च धिया बुद्ध्या नमो भरंतः नमस्कारं संपादयंतः ॥ उपसमीपे त्वा एमसि त्वामागच्छामः ॥ उपशब्दस्य निपातस्वरः ॥ त्वामौ द्वि

तीयाया इति युष्मच्छब्दस्यानुदात्तः त्वादेशः ॥ दोषावस्तरिति रात्रिवाचीवस्त इत्यहर्वाची द्वंद्वसमासेकार्तकोजपादित्वादाद्युदात्तः ॥ सावेका

च इति धियो विभक्तिरुदात्ता ॥ नम इति निपातः ॥ भरंत इत्यत्र शपः पित्वाच्छतुर्लसार्वधातुकत्वाच्चानुदात्तत्वे सति धातुस्वर उतिष्ठ

ष्यते ॥ इमसीत्यत्र इदंतो मसिरिति मसिरित्यादेशो निघातश्च ॥ अष्टमीमृचमाह ॥ ॥ राजंतमध्वराणां गोपामृतस्य दीदिविं ॥ व

र्धमानं स्वे दमे ॥ पूर्वमंत्रे त्वामुपेम इत्यग्निमुद्दिश्योक्तं कीदृशं त्वां राजंतं दीप्यमानं ॥ अध्वराणां राक्षसकृतहिंसारहितानां यागानां र

क्षकं ऋतस्य सत्यस्यावश्यंभाविनः कर्मफलस्य ॥ दीदिविं द्योतकं ॥ आहुत्या धारमग्निं द्दष्ट्वा शास्त्रप्रसिद्धकर्मफ

लं स्मर्यते ॥ स्वे दमे स्वकीयगृहे यज्ञशालायां हविर्भिर्वर्धमानं ॥ राजंतं वर्धमानमित्यत्रोभयत्र पूर्ववद्धातुस्वरः शिष्यते ॥ दीदिवि

शब्दस्याभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ दमशब्दो वृषादित्वादाद्युदात्तः ॥ नवमीमृचमाह ॥ ॥ स नः पितेव सूनवेग्ने सूपायनो

भव ॥ सचस्वा नः स्वस्तये ॥ हे अग्ने स त्वं नोस्मदर्थं सूपायनः शोभनप्राप्तियुक्तो भव ॥ तथा नोस्माकं स्वस्तये विनाशराहित्यर्थं

सचस्व समवेतो भव तत्रोभयत्र दृष्टांतः यथा सूनवे पिता पुत्रार्थं सुप्रापः प्रायेण समवेतो भवति ॥ तद्वत ॥ अस्मच्छब्दे द्वयस्य न

इत्येतस्यानुदात्तं सर्वमित्यनुदात्तत्वं ॥ चादयोनुदात्ता उतीवशब्दोनुदात्तः ॥ इवेन समित्यसमासः पूर्वपदप्रकृतिस्वरत्वं च न कव्यमितिस

मस्तः पितेव तिशब्दो मध्योदात्तः ॥ शोभनमुपायनं यस्येति बहुव्रीहौ नञ्सुभ्यामित्यंतोदात्तत्वं ॥ सचस्वेत्यत्र पदात्परत्वेनास्तीति निनि

घातः ॥ लसार्वधातुकानुदात्तत्वे सति धातुस्वरावशेषः ॥ इति प्रथमस्य प्रथमे द्वितीयो वर्गः ॥ ॥ इग्निमीळ इत्यादिसूक्तमग्निष्टोम

स्य प्रातरनुवाके यथाविनियुक्तं तथा वाय्वायाहीत्यादयस्तृचाः प्रउगशस्त्रे विनियुक्ताः तत्रेदं चिंत्यते ॥ शस्त्राणि किं देवतास्मरणरूप

संस्कारकर्म ॥ किंवा अदृष्टफलं प्रधानकर्मेति ॥ तत्र पूर्वपक्षं जैमिनिः सूत्रयामास ॥ स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधा

नत्वादिति ॥ आज्यैः स्तुवते पृष्ठैः स्तुवते प्रउगं शंसति निष्केवल्यं शंसतीति श्रूयते ॥ तत्र स्तुतिः शंसनं च गुणिनिष्ठगुणाभिधानं ॥ इंद्र

स्य नु वीर्याणि प्रवोचमित्यत्र दृष्टत्वात् एवं सति याज्यान्यायेन गुणिन्या देवताया अभिधायकत्वेन स्तुतशस्त्रयोः संस्काररूपत्वमभ्यु

पेयं याज्यापास्तदृपतं दृशमाध्यायस्य चतुर्थपाद दृष्टार्थलाभे नानिषादृतं इदत्रापि तु शब्दः प्रधानकर्मत्वं व्यावर्तयति ॥ सिद्धांतितं

भाष्य॰१॰ पक्षं दूषयति॥ अर्थैकत्वेन देवताप्रकाशनार्थस्य गुणभूतत्वादिति तु शब्देन संस्कारत्वं वारयति॥ संस्कारपक्षं प्रयोजनवत्त्वेन मंत्रः स्वरूपेणाद्युपल
१७ भ्यते॥ कुतः मंत्रगतं देवताचाचकं यदिंद्रादि नाम स्तितं चोदनया मंत्ररूपया प्रतिपाद्यस्य देवतारूपस्यार्थस्य गुणभूतं॥ तस्मादेव प्रधानभूतदेव
ताभिधानत्वं गुणभूतो मंत्रो नेतव्यः॥ तद्यथा माहेंद्रग्रहसंनिधावभिश्रेयस्य प्रगाथ्यं तेन संभवति॥ इंद्र साकं दः प्रगाथः॥ प्रगाथ आम्नातः॥ स
चेंद्रं प्रकाशयति॥ ननु महेंद्रं॥ ततो यन्माहेंद्रं कर्म तत्रायं प्रगाथो पकर्षणीयः॥ तथा सति क्रमसंनिधीबाध्येयातां॥ तदेतत् सिद्धांतिनाभिहितं॥ दूष
णं पूर्वपक्षी समाधत्ते॥ वशाद् द्वा गुणार्थं स्यादिति वा शब्दः प्रगाथस्यान्यत्र नयनं वारयति॥ मंत्रे यदेतदिंद्रशब्दाभिधानं॥ तदेतन्महत्वगुणो
पलक्षणार्थं स्यात्॥ यथा साचाप्यासर्वदेवत्याय दशा वशा वायव्यामालभेत तत्राजा वशा वंध्या शब्देन चोदितकर्मणि छागशब्देन केवलेनयुक्त
निगमाः॥ वशात्वगुणमप्युपलक्षयंतित द्वत॥ तस्मान्महत्वगुणयुक्ते चोदितकर्मणि निर्गुणेनेंद्रशब्देनाभिधानमविरुद्धं॥ लोकेपिमहाराज
ते केवलराजशब्दप्रयोगमपि पश्यामः॥ तदेतत्समाधानं सिद्धांती दूषयति॥ मश्रुतिसमवायित्वादिति॥ न द्रुतं वशान्यायेन राजन्यायेन वास्य
प्रगाथस्येंद्रो देवता युज्यत इति॥ तेन देवतात्वस्य तद्धितश्रुतिसमवायित्वात्॥ माहेंद्रग्रह इत्यत्र सा स्यव देनेत्यस्मिन्नर्थे महेंद्रशब्दाच्चेति महेंद्र
शब्दात् दण प्रत्ययो विहितः तस्मान्महेंद्रएव देवता नत्विंद्रः विपक्षे बाधमाह॥ गुणश्चानर्थकः इति॥ यदींद्रो देवता स्यात्॥ तदानीमिंद्रग्रह इत्येता
वतैवार्थावगतौ माहेंद्र इति महत्वगुणोनर्थकः स्यात्॥ चकारः पूर्वहेतुना समुच्चयार्थः हेत्वंतरमाह॥ तथा याज्यापुरोरुचोरिति॥ इंद्र महें
द्रयोर्देवतयोर्भेदे यथा महत्वगुणः सार्थकस्तथा याज्यापुरोनुवाक्ययोर्भेदोप्यस्मिन्नेव पक्षे उपपद्यते॥ एंद्र सानसिमित्यादिकेंद्रस्य याज्या
पुरोनुवाक्ये॥ महां इंद्रो य ओजसेत्यादिके महेंद्रस्य पूर्वपक्षिणोक्तं वशादृष्टांते वैषम्यमाह॥ वशायामर्थसमवायादिति॥ यावशा विधिवाक्ये श्रुता त
स्याएव निगमेषु छागशब्देन व्यवहारो न विरुद्धः॥ २॥ छागत्वलक्षणार्थस्य वशायां समवेतत्वात्॥ तच्च प्रत्यक्षेणोपलभ्यते॥ इंद्र इंद्रमहेंद्रयोस्तु भेद उपपा
दितः॥ तस्माद्विषमो दृष्टांतः॥ एवं संस्कारपक्षे प्रगाथस्येंद्रकर्मण्यपकर्षप्रसंगान्निवारयितुं स्तोत्रशस्त्रयोः प्रधानकर्मत्वमिति सिद्धांतिनो मतं॥ पुनर
पि पूर्वपक्षी तदेतन्मतं अभि त्वा शूरनोनुमइत्यत्र इत्यस्ते सर्वेजना स्तुतिमव गच्छंति॥ गुणस्योपसर्जनत्वेतु नः स्तुतिः प्रतीयेत यश्च तु वेदोगीराच एतत्रैति
वार्थवत्त्वात् स्यादिति॥ वाशब्दः सिद्धांतिमत व्यावृत्यर्थः॥ तत्रेंद्रं कर्म तत्र प्रगाथो नेतव्य इत्ययमेव पक्षः स्यात्॥ कुतः अर्थवत्त्वात्॥ ऐंद्रो
मंत्र इंद्रं प्रकाशयितुं समर्थ इत्यर्थवान् स्यात् माहेंद्रं तु प्रकाशयितुमसमर्थत्वादनार्थक्यं प्रगाथस्य प्रसज्येत तस्माद्देवताप्रकाशनरूप
संस्कारकर्मत्वमेव स्तोत्रशस्त्रयोर्युक्तमिति स्थितः पूर्वपक्षः॥ अथ सिद्धांतमाह॥ अपि वा श्रुतिसंयोगात् प्रकरणे स्तौतिशंसती क्रियोत्प
त्तिं विदध्यातामिति॥ अपिवेत्यनेन संस्कारकर्मत्वं व्यावर्त्यते॥ स्तौतिधातुः शंसतिधातुश्चेत्येतावुभावपस्य प्रकरणएवकस्याश्चित्प्रधानक्रि
याया उत्पत्तिं विदध्यातां॥ कुतः श्रुतिसंयोगात्॥ तयोर्धात्वोर्वाच्योर्थः श्रुतिरित्युच्यते॥ तत्संयोगः प्रधानकर्मत्वे सिद्ध्यति॥ तथाहि गुणि
नमुपसर्जनीकृत्य तन्निष्ठानां गुणानां प्राधान्येन कथनं स्तुतिः॥ यो देवसंजः अभि त्वा शूरनोनुम इत्यस्ते सर्वेजनाः स्तुतिमवगच्छंति॥ गुणस्योपसर्जन
त्वेतुनः प्रतीयेत यश्च तुर्वेदा सचतुर्वेदा अभि त्वा स्तमाकारयेत् स्वकेस्तुतिं न मन्यते॥ किं त्वाह्वानप्राधान्यमेव बुध्यंते॥ एवं मंत्रेष्वपि यावद्देवता १७
स्य मीदृशो गुणे रूपे तति गुणप्राधान्यविवक्षायां मुख्यः स्तौतिधात्वर्थो विधीयते॥ त्वत्पक्षे तु य एयमीदृक्गुणयुक्तास्येंद्रं देवतेति देवता

स्मरणस्य प्राधान्याद्यथार्थस्तुतिर्न स्यात्॥ ततः श्रुतिवशाद्देते प्रधानकर्मणि तथा सति देवताप्रकाशनेतात्पर्याभावादैंद्रोपि प्रगाथः स्वप्रकरणगतो 35
माहेंद्रकर्मण्यवतिष्ठते॥ यदि देवतानुस्मरणरूपं दृष्टं प्रयोजनं न लभ्येत तर्ह्यदृष्टमेव प्रधानकर्मत्वे हेत्वंतरमाह॥ शब्दपृथक्त्वाच्चेति॥ द्वादशा 1924
न्यग्निष्टोमस्य स्तोत्राणि द्वादशशस्त्राणीत्यत्र द्वादशशब्देन स्तोत्राणां पृथक्त्वमवगम्यते॥ देवताप्रकाशनपक्षे सर्वैरपि मंत्रसंघैः कृतस्य प्रकाशस्यै
कत्वेन द्वादशसंख्यानस्यभ॥ प्रधानकर्मणां त्वाज्यस्तोत्रपृष्ठस्तोत्रादिनामकानां भिन्नत्वात् द्वादशत्वसंख्योपपद्यते एवं शस्त्रवाक्येपि योज्यं॥ विपक्षे
बाधमाह॥ अनर्थकं च तद्वचनमिति॥ अग्निस्तुतिः श्रूयते॥ आग्नेयाय ग्रहाभवंतीति॥ तत्रैव पुनरप्यन्यदुच्यते॥ आग्नेयी पुरस्तु वते॥ आग्नेयीः शंस
तीति तत्पक्षेत दुवचनमनर्थकं स्यात् चोदकप्राप्तेषु स्तोत्रशस्त्रमंत्रेष्वाग्नेयग्रहानुसारेण देवतापदस्योहे सत्याग्नेयत्वसिद्धेः प्रधानकर्मपक्षे तु देवता
प्रकाशनरूपत्वाभावेनोहाभावादाग्नेयमंत्रांतरविधिवचनमर्थवद्भवति॥ पुनरपि हेत्वंतरमाह॥ अन्यश्चार्थः प्रतीयत इति॥ संबंधे पैस्तोत्रशस्त्रे
इति स्याम्नातं॥ संबंधश्च द्वयोर्भवति न त्वेकस्य॥ तस्मात्स्तोत्रशस्त्रयोरर्थभेदः प्रतीयते॥ स च संस्कारपक्षेन संभवति॥ देवताप्रकाशनरूपस्या
र्थस्यैकत्वात्॥ प्रधानकर्मपक्षे तु स्तोत्रकर्म शस्त्रकर्म चेत्यर्थभेद उपपद्यते॥ यद्यपि स्तौति शंसती स्तुवनार्थे कार्थौ॥ तथापि प्रगीतमंत्र
साध्यं स्तोत्रं॥ अप्रगीतमंत्रसाध्यं शस्त्रमिति तयोर्विवेकः॥ हेत्वंतरमाह॥ अभिधानं च कर्मवदिति॥ यथा प्रधानकर्माग्निहोत्रं जुहोतीति द्वितीयासंयो
गेनाभिहितं॥ तथा प्रउगं शंसतीत्यभिधीयते॥ अतस्तत्सादृश्यात् प्रधानकर्मत्वं॥ हेत्वंतरमाह॥ फलनिर्वृत्तिश्चेति॥ स्तुतस्य स्तुतमसीति स्तोत्रानुमंत्रणस
मावाक्यशेषे स्तोत्रफलमेवाम्नातं॥ इंद्रियावंतो मनामहे भक्षीमहि प्रजामिषमिति॥ न तु देवताप्रयुक्तं फलमाम्नातं॥ अतो न देवतासंस्कारः किंतु प्र
धानकर्मेति स्थितं॥ अनेन तु निर्णयेन प्रयोजनं विकृतिषूहाभावः॥ संस्कारपक्षे तु यस्यां विकृतौ देवतांतरं तत्र तद्वाचकं पदमूहनीयं स्यात् तन्मा भूदि
ति प्रधानकर्मत्वमुक्तं॥ एतच्च द्वादशाध्याये सूत्रितं ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यादिति॥ अत्र संग्रहश्लोकौ॥ प्रउगं शंस
तीत्यादौ गुणतो न प्रधानता॥ दृष्टादेव स्मृतिस्तेन गुणता स्तोत्रशस्त्रयोः॥ स्मृत्यर्थत्वे स्तौतिशंस्योर्द्वयोः श्रौतार्थबाधनं॥ तेनादृष्टमुपेत्यापि प्रा
धान्यं श्रुतये मतमिति॥ अग्निष्टोमे सत्यादिनेस्य यदि स्यात्पूर्वं प्रेषितो होता प्रातरनुवाकमनुब्रूयात्॥ एतच्चैतरेयब्राह्मणे प्रपंचितं॥ देवेभ्यः प्रा
तर्यावभ्यो होतरनुब्रूहीत्याहाध्वर्युरित्यादिब्राह्मणं तस्मिंश्च प्रातरनुवाके अग्निमीळ इत्यादिसूक्तमंतर्भूतं॥ एतच्च व्याख्यातं॥ प्रातःसवने वैश्वदेव
ग्रहणादूर्ध्वं प्रउगशस्त्रं होत्रा शंसनीयं तच्च शस्त्रं वायवायाहीत्यादि सप्ततृचात्मकं॥ एतच्च ब्राह्मणे ग्रहोक्थमित्यादिखंडे प्रपंचितं॥ ७॥ तथा
पंचमाध्याये स्तोत्रमग्रे शस्त्रादित्यादिखंडे सूत्रितं च॥ अत्रेयमनुक्रमणिका॥ वायो वायव्यैंद्रवायव मैत्रावरुणास्तृचा आश्विना द्वादशाश्विनेंद्र
वैश्वदेवसारस्वतास्तृचाः संसिताः प्रउगदेवता इति॥ अस्यायमर्थः॥ वायवायाहीत्यादिकं नवर्चं द्वितीयं सूक्तं अग्निना वेत्यतो न वशाद्दस्यानुवृत्तिः
तत्राद्यस्तृचो वायुदेवताकः द्वितीय ऐंद्रवायुदेवताकः तृतीयो मैत्रावरुणदेवताकः अश्विनेत्यादिकं द्वादशर्चं सूक्तं॥ तत्राद्यस्तृचे आश्विनः॥ द्वितीय
ऐंद्रः॥ तृतीयो वैश्वदेवः॥ चतुर्थः सारस्वतः॥ तेषु तृचेषु प्रतिपाद्या वाय्वादयः सरस्वत्यंताः सप्तसंख्याकाः प्रउगशस्त्रस्य देवता इति॥ मधुच्छंदसो
नुवर्तनान्मध एवऋषिः तथैवानुवृत्ता गायत्रं छंदः॥ व्याख्यास्यते प्रथमाग्रहस्यैंद्रवायवस्यैका पुरोनुवाक्या एतच्च ब्राह्मणे समाम्नातं॥ वायव्या पूर्वा
पुरोनुवाक्यैंद्रवायव्युत्तरेति॥ तथा सूत्रितं च॥ वायवायाहि दर्शतेंद्रवायू इमे सुता इत्यनुवाक्ये इति॥ वायव्यतृचे प्रथमामृचमाह॥ ॥ओम् वायं

भा॰ प्र॰ वा याहि दर्शतेमे सोमा अरंकृताः ॥ तेषां पाहि श्रुधी हवं ॥ हे दर्शनीय वायो कर्मण्येतस्मिन्नायाहि आगच्छ ॥ तदर्थमिमे सोमा अरंकृताः ॥ अभिषवा
दिसंस्कारेणालंकारस्तेषां सोमानां यद्भागं तेषामेकदेशमित्यध्याहारः ॥ पाहि स्वकीयं भागं पिबेत्यर्थः ॥ तत्पानार्थं हवमस्मदीयमाह्वानं श्रुधि शृणु ॥ अत्रया
१८ स्कः ॥ वायवा याहि दर्शतेति ये मे सोमा अरंकृता अलंकृतास्तेषां पिब शृणु नो ह्वानमिति ॥ दर्शतेत्यत्र भृमृदृशीत्यादिसूत्रेणातच्प्रत्ययः औणादि
कः ॥ चित्वादंतोदात्तस्यामंत्रितानुदात्तत्वं ॥ अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्नित्यादिना मन्प्रत्ययांतस्य सोमशब्दस्य नित्स्वरः ॥ अलमित्यत्र छांदसो रेफादेशः ॥ अरंकृतशब्दे स
मासांतोदात्तत्वं बाधित्वाव्ययपूर्वपदप्रकृतिस्वरः प्रकृतिस्वरप्राप्तौ भूषणेलमित्यलंशब्दस्य गतिसंज्ञायां गतिकारकेत्यादिकृदुत्तरपदप्रकृतिस्वरत्वे
प्राप्ते तदपवादत्वेन गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं निपातत्वादलंशब्द आद्युदात्तः ॥ पाहीत्यत्रापि वादेशाभावश्छांदसः ॥ श्रुधीत्यत्र श्रुशृणुभ्यश्छंदसीत्या
दिना हेर्धिभावः ॥ तिङ्ङतिङ इति निघातो नास्ति ॥ सोपि च्वेतिपितानिषेधादनुदात्तनिवारिते प्रत्ययस्वरः ॥ हवमित्यत्र ह्वयतिधातोर्बहुलं छंदसीति सं
प्रसारणे सत्युकारांतत्वादृदोरबित्यप्प्रत्ययः तस्यापित्वादनुदात्ते सति धातुस्वरः शिष्यते ॥ संहितायां श्रुधीत्यस्मान्येषामपि दृश्यत इति दीर्घः ॥ द्वितीया
मृचमाह ॥ ॥२॥ वाय उक्थेभिर्जरंते त्वामच्छा जरितारः ॥ सुतसोमा अहर्विदः ॥ हे वायो जरितारः स्तोतारः ऋत्विग्यजमानास्त्वामच्छाभिलक्ष्य उक्थेभिराश
प्रउगादिशस्त्रैर्जरंते ॥ स्तुवंति ॥ कीदृशाः सुतसोमाः अभिषुतेन सोमेनोपेताः अहर्विदः अहःशब्द एकेनाह्ना निष्पाद्याग्निष्टोमादिक्रतौ वैदिकव्यवहारे
ण प्रसिद्धः क्रतुभिज्ञा इत्यर्थः ॥ अर्चतिगायतीत्यादिषु चतुश्चत्वारिंशदर्चतिकर्मसु धातुषु जरते रत्यर्चतीति पठितं ॥ ऋतेरप्यर्चनार्थत्वात्तदंतो जरिता
मस्तुत्यर्थो जॄ इति धातुः ॥ अच्छशब्दस्य संहितायां निपातस्य चेति दीर्घः ॥ सुतसोमा इत्यत्र बहुव्रीहौ तत्पूर्वपदप्रकृतिस्वरः ॥ अहर्विद इत्यत्र समासस्व
रं बाधित्वा तत्पुरुषे तुल्यार्थेत्यादिना पूर्वपदप्रकृतिस्वरे प्राप्ते तदपवादत्वेन गतिकारकोपपदात्कृदुत्तरपदप्रकृतिस्वरः ॥ ॥ तृतीयामृचमाह ॥ वायो
तव प्रपृंचती धेना जिगाति दाशुषे ॥ उरूची सोमपीतये ॥ हे वायो तव धेना वाक् सोमपीतये सोमपानार्थं दाशुषे दाश्वांसं हविर्दत्तवंतं यजमानं जिगा
ति गच्छति ॥ हे यजमान त्वया दत्तं सोमं पास्यामीत्येवं वायुर्ब्रूत इत्यर्थः ॥ कीदृशी धेना ॥ प्रपृंचती प्रकर्षेण सोमसंपर्कं कुर्वती ॥ सोमगुणं वर्णयं
तीत्यर्थः ॥ उरूची उरु बहून् यजमानान् गच्छंती ये ये सोमयाजिनस्तान्सर्वाननुवर्णयंतीत्यर्थः ॥ प्रपृंचतीत्यत्र शतुरनुम इति ङीपुदात्तः ॥
श्लोकः धारेत्यादिषु सप्तपंचाशत्संख्याकेषु वाङ्नामसु गणाः धेनाग्ना इति पठितं ॥ वर्तते तन्नयत इत्यादिषु द्वाविंशत्यधिकशतसंख्येषु गतिकर्मसु
गाति जिगातीति पठितं ॥ दाशुष इत्यत्र गत्यर्थकर्मणीति चतुर्थी ॥ उरूचीत्यत्र गौरादित्वेन ङीषि कृते प्रत्ययस्वरः ॥ सोमपीतये इत्यत्र बहुव्री म
हिलाभावेपि व्यत्ययेन पूर्वपदप्रकृतिस्वरः ॥ ऐंद्रवायवग्रहे चेत् प्रथमामृचमाह ॥ ॥ इंद्रवायू इमे सुता उप प्रयोभिरागतं ॥ इंदवो वामुशं
ति हि ॥४॥ एतस्याश्चैंद्रवायवग्रहे द्वितीया पुरोनुवाक्यारूपेण विनियोगः ॥ पूर्वमेवोक्तः ॥ हे इंद्रवायू भवदर्थमिमे सोमाः सुता
अभिषुताः तस्माद्युवां प्रयोभिः अन्नैः रस्मभ्यं दातव्यैः सह उपागतं अस्मत्समीपं प्रत्यागच्छतं ॥ हि यस्मादिंदवः सोमाः वां युवामुशंति कामयं
ते तस्मादागमनमुचितं ॥ इंद्रवायू शब्दस्य षाष्ठिकमामंत्रिताद्युदात्तत्वं ॥ प्रीणयंति भोक्तॄनिति प्रयांस्यन्नानि प्रीञ् धातोरसुन् भावितण्यर्थः
दसुन्प्रत्यये सति नित्स्वरः ॥ गमिधातोर्लोण्मध्यमपुरुषद्विवचने बहुलं छंदसीति शपो लुकि सत्यनुदात्तोपदेशेत्यादिना मकारलोपः ॥ ततो ग १८
तमिति भवति ॥ उंदी क्लेदने इति धातोरुंदेरिच्चादेरिति उप्रत्यय आद्यक्षरस्येकारादेशः ॥ तत इंदुशब्दस्य नित्स्वरः ॥ सोमरसस्य द्रवत्वात् क्लेदनं
संभवति ॥ युष्मच्छब्दस्य वामित्येतस्यानुदात्तं सर्वमपादादावित्यनुदात्तः ॥ उशंतीत्यस्य निपातैर्यद्यदिहंतेति सूत्रेण प्रतिषिद्धे सति प्रत्ययस्वरः ॥ हि

शब्दस्य निपातस्वरः ॥ द्वितीयामृचमाह ॥ ॥ वायविंद्रश्च चेतथः सुतानां वाजिनीवसू ॥ तावा यातमुप द्रवत् ॥ अत्र चकारेणान्यः समुच्चीय 37/1924
ते ॥ संनिहितत्वाद्वायुरेव ॥ हे वायो त्वं इंद्रश्च युवामुभौ सुतानामभिषुतान् सोमान् चेतथो जानीथः ॥ यद्वा अभिषुतानां सोमानां विशेषमित्य
ध्याहारः ॥ कीदृशौ युवां ॥ वाजिनीवसू ॥ वाजिनीशब्दोयं उषसो नामसु पठितः ॥ तथाप्यत्रासंभवान्न गृह्यते ॥ वाजोन्नं तद्यस्यां हविः
संततावस्ति सा वाजिनी तस्यां वसतः इति वाजिनीवसू ॥ आमंत्रितत्वादनुदात्तः ॥ तौ तथाविधौ युवां द्रवत् क्षिप्रमुपसमीपे आयातमागच्छ
तं ॥ षड्विंशतिसंख्याकेषु क्षिप्रनामसु निक्षिप्रं मक्षु द्रवदिति पठितं तत्र पित्स्वरः ॥ इति प्रथमस्य प्रथमे तृतीयो वर्गः ॥ ऐंद्रवायवेत्ते
तृतीयामृचमाह ॥ ॥ वायविंद्रश्च सुन्वत आयातमुप निष्कृतं ॥ मक्ष्वित्था धिया नरा ॥ हे वायो त्वमिंद्रश्च सुन्वतः सोमाभिषवं कुर्वतो यज
मानस्य निष्कृतं संस्कृतं सोमं उपायातमागच्छतं ॥ नरा हे नरौ पुरुषौ पुरुषेण सामर्थ्येनोपेतौ युवयोरागतयोश्च सतोर्धिया अमुनाक
र्मणा मक्षु त्वरया संस्कारः संपद्यत ॥ इत्था सत्यं वायो इत्यस्यामंत्रितस्य षाष्ठिकमाद्युदात्तत्वं ॥ इंद्रशब्दो ऋज्रेंद्रेत्यादिना रन्प्रत्ययांतत्वा दे
निपातितो ञ्नित्यादिर्नित्यमित्याद्युदात्तः ॥ चशब्दश्चादयोनुदात्ता इत्यनुदात्तः सुन्वत इत्यत्र शतुरनुमो नद्यजादी इति विभक्तिरुदात्तत्वं ॥ नि
ष्कृतमित्यस्य स्थान इति यास्कः ॥ कृतशब्द आह्निककर्मणि वर्तते ॥ संस्कृतं भरत इत्यर्थः ॥ कुगतिप्रादय इति समासे अव्ययपूर्वपदप्र
कृतिस्वरत्वप्राप्तौ थाथघञ्क्ताजबित्रकाणामित्यंतोदात्तः गतिरनंतर इति ॥ तुनिसद्युदात्तत्वं न भवति ॥ तत्रधिकर्मणि विहितं ॥ निष्करोतीति नि
ष्कृदिति क्विबंतस्य स्थाने तु गतिकारकोपपदात्कृदिति कृत्कार उदात्तः स्यात् ॥ धीरिति अप इत्यादिषु षड्विंशतौ कर्मसु पठितः ॥ धिया सा वेका
च स्तुतीत्यादिरिति विभक्तिरुदात्ता ॥ नरा सुपां सुलुगित्यादिना संबोधनद्विवचनस्य डादेशः ॥ पदात्परत्वादामंत्रितस्येत्याष्टमिको नि
घातः ॥ मित्रं हुव इति मैत्रावरुणस्तृचो गवामयने आरंभणीये चतुर्विंशेहनि प्रातःसवने मैत्रावरुणस्य स्तोत्रियः ॥ तत्रैवाभिप्लव
षडहेपि विनियुक्तः ॥ तथा चाश्वलायनेन चतुर्विंशे होता जनिष्टेत्यादिखंडे मित्रं वयं हवामहे मित्रं हुवे पूतदक्षमित्यादि सूत्रितं ॥ तथा
ह्यभिप्लवपृष्ठ्याह्नानीति खंडे परिशिष्टानावापानुध्यत्या मित्रं वयं हवामहे मित्रं हुवे पूतदक्षमिति च ॥ तस्य मैत्रावरुणतृचस्य प्रथमा
मृचमाह ॥ ॥ मित्रं हुवे पूतदक्षं वरुणं च रिशादसं ॥ धियं घृताचीं साधंता ॥ अहमस्मिन् कर्मणि हविःप्रदानाय पूतदक्षं पवित्रब
लं मित्रं हुवे तथा रिशादसं रिशा हिंसकानां मदसमत्तारं वरुणं च हुवे ॥ आह्वयामि ॥ कीदृशौ मित्रावरुणौ घृतमुदकमंचति ॥ भू
मिं प्रापयति ॥ या धीर्वर्षणकर्म तां घृताचीं धियं साधंता साधयंतौ कुर्वंतौ मित्रशब्दः पुंल्लिंगः प्रातिपदिकस्वरेणांतोदात्तः ॥ ह्वेञ् इति ह्व
यतेर्बहुलं छंदसीति शपो लुकि सति संप्रसारणमित्यनुवृत्तौ बहुलं छंदसीति संप्रसारणे उवङादेशः तिङ्ङतिङ इति निघातः ॥ पू
तशब्दः प्रत्ययस्वरेणांतोदात्तः ॥ बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ वरुणशब्दः कॄवॄदारिभ्य उनन् इति उनन्प्रत्ययांतो नित्वादाद्युदात्तः
रिशांति हिंसंतीति रिशाः शत्रवः इगुपधज्ञाप्रीकिरः क इति कः प्रत्ययस्वरेणोदात्तः ॥ तानततीति रिशादसः तं सर्वधातुभ्योसुन्नित्यसु
न्प्रत्ययांतत्वात्स्वरेणोत्तरपदमाद्युदात्तं ॥ कृदुत्तरपदप्रकृतिस्वरेण स एवावशिष्यते शेषनिघाते सति एकादेश उदात्तेनोदात्त इति सवर्णदी
र्घोप्युदात्त एव ॥ धीरिति अप इत्यादिषु षड्विंशतौ कर्मनामसु पठितः प्रातिपदिकस्वरेणांतोदात्तः ॥ घृतमंचतीति घृताची ऋत्विग

दृढ्गित्यादिना कृनिअनिटि तामितिनकारलोपः अंचनेश्चोपसंख्यानमितिङीप् अच इत्याकारलोपे चावितिङीपंतं पूतशब्देनपविष समानिसं
भाष्य० प्र० तस्यैत्यायुदात्तं बाधित्वा घृताची नां चेत्यंतोदात्तः समासस्य त्वंतोदात्तत्वाप वादकं तत्पुरुषेतुल्यार्थेतिपूर्वपदप्रकृतिस्वरं बाधित्वा गतिकारकोपपदा
१९ त्कृत्उत्तरपदप्रकृतिस्वरेणांतोदात्तस्य धात्वाकारस्य लोपे सति अनुदात्तस्य च यत्रोदात्तलोप इति ङीप उदात्तत्वे प्राप्ते चावितिपूर्वपदांतोदात्तत्वं साध
नासाधसाधसंसिध्यादिष्विषु आदृतर्भावितण्यर्थात्सुदः शब्दाद्यच्छुम बाधित्वान्यत्य यचनङ्ग अद्‌युपवेशत्वाद्‌युपरिङप्रत्ययस्य लसार्वधातु
कानुदात्तत्वं द्वितीयादिवचनस्य शपश्चादनुदात्तौसप्तितविधानुदात्ते धातोरिति धातुस्वरएव शिष्यते कृपांसकुत्वगित्यादिना विभक्तेराकारा
देशः ॥ ॥द्वितीयामृचमाह ॥ ऋतेन मित्रावरुणावृतावृधावृतस्पृशा ॥ क्रतुं बृहंतमाशाथे ॥ हेमित्रावरुणौ युवां क्रतुं प्रवर्तमानमिमं सोमयागं आ
शाथे आनशाथे व्याप्नवंतौ केननिमित्तेन अवश्यंभावितया सत्येन फलेनास्मभ्यं फलंदातुमित्यर्थः कीदृशौ युवां ऋतावृधौ ऋतमित्युदकनाम स
त्यंवायज्ञंवेतियास्कः उदकादीनामस्य तमस्य वर्धयितारौ अतएव ऋतस्पृशा उदकादीनस्पृशंतौ कीदृशं क्रतुं बृहंतं अंगरूपैः प्रौढिमिमि
तं ऋतशब्दोघृतादित्वादंतोदात्तः मित्रावरुणाविति मित्रश्च वरुणश्चेति मित्रावरुणौ देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः ऋतस्यवर्ध
यितारावित्यर्थेन भावितण्यर्थाद्वृधेः क्विप् नहिवृतीत्यादिना पूर्वपदस्य दीर्घः ऋतस्पृशा सुपांसुलुगितिआदेशः मित्रावरुणावित्याम ,
मंत्रितत्रयस्य स्वस्वपूर्वपदात्परत्वादामंत्रितस्यचेत्याष्टमिकोनिघातः ननु ऋतेनेत्येतस्य तृतीयाद्युदात्तस्य सामंत्रिते परांगवत्स्वर इति परांगवद्भावेनामंत्रि
तत्वेनाऽपाद्यादिकत्वेन पदात्परत्वेन चाष्टमिकनिघाताभावादामंत्रितस्य चेत्याद्युदात्तत्वेन भवितव्यमिति चेत् न परांगवद्भावस्य सुबामंत्रिताश्चेतनपद
विधित्वात्समर्थः पदविधिरिति नियमात् इह च ऋतेन मित्रावरुणावित्यनयोराशाथ इत्यास्यातेनैवान्वयेन परस्परमसामर्थ्यात् यत्र पुनः पर
स्परान्वयेन सामर्थ्यं तत्र परांगवद्भावात्पदादित्वं यज्ञादेशात्त्वं भवत्येव यथा मरुतां पितस्तदहं गृणामीति मरुतामिति षष्ठ्यंतेन
पृश्निचेत्यपयसोमरुतां जातामितिदामरुतांपितरित्यत्र सामर्थ्यात्परांगवद्भावादेवाद्युदात्तो जातः प्रकृते ऋतेन
त्यस्यासामर्थ्यादिवचनपरांगवद्भाव इति ऋतावृधा इत्यत्र द्वितीयामंत्रितस्य निघातेकर्तव्ये आमंत्रितं पूर्वमविद्यमानवदितिप्रथमामंत्रितेना
विद्यमानवद्भवितव्यमिति चेत् भवतु अत एव तस्याव्यवधायकत्वादृतेनेति प्रथमपदात्परत्वेन द्वितीयामंत्रितं हनिष्यते यथा इमं मे गंगे
इत्यादौ गंगे शब्दस्याविद्यमानवद्भावे पितस्याव्यवधायकत्वादेव मे इत्येतद्वेत्य परमुपपत्स्यमुनेशब्दस्यनिघातः किंच प्रकृते मित्रावरुणावि
त्यामंत्रितं समान्यवचनं तस्याविशेषणात् यादिशेषवचनमृतावृधेति अतो नामंत्रितेसामानाधिकरणे सामान्यवचनमिति पूर्वस्याविद्यमान
वद्भावप्रतिषेधादपि निरंतरायाद्वितीयस्य निघातः नन्वेवमप्यपादादित्वमनुक्तेः ऋतावृधेत्यस्य द्वितीयपादादित्वान्न भवितव्यं निघातेन
अतएव हीमं मे गंगे इत्यत्र शुतुद्रिपदस्य पदात्परस्यामंत्रितस्यापिपादादित्वादेवानिघाताद्युदात्तत्वं जातं तद्वदत्रापि भवितव्यं वक्तव्यो
चाविनो यदृति उच्यते मित्रावरुणपदस्य सुबामंत्रित इति परांगवद्भावेन परानुप्रवेशादेव ऋतावृधेत्यस्य न पादादित्वं शुतुद्रिपदमपितद्व 30
वमेव पूर्वस्यसरस्वतिपदस्य परांगवद्भावेन न पादादित्वमिति निहन्येतेति चेत् न परांगवद्भावस्यापवादत्वं तमामंत्रितं चाश्रित्य प्रवृत्तः पदविधिः अं
तस्तयोः सत्येव परस्परान्वये परांगवद्भावेन भवितव्यं समर्थः पदविधिरिति नियमात् शुतुद्रिसरस्वतिपदयोश्च न परस्परेणान्वयः

किंतु सचंतेत्यनेनेत्यसामर्थ्यान्न परांगवद्भावः प्रकृते तु मित्रावरुणावृतावृधाविति द्वयोरपि सामानाधिकरण्येन परस्परान्वयादस्ति सामर्थ्यं 39 / 1924
मिति भवितव्यं परांगवद्भावेन यथा मरुतांपितरित्यत्रेति विशेषः नन्वत एव तर्हि मित्रावरुणपदस्य परांगवद्भावेन पादादित्वादपादादावितिपर्यु
दासादामंत्रितनिघातो न स्यादिति चेन्न पूर्वं सुबंतं परं चामंत्रितमाश्रित्य स्वरः प्रवर्तते तत्र सुबामंत्रित इति परांगवद्भावः भवतीत्येवं
विधेऋतावृधपदनिघात इति न च पूर्वस्य परांगवद्भावेनापादादित्वान्न प्रवर्तते मित्रावरुणपदनिघातस्तु पूर्वमेव पदमुपजीवति न परसा
मंत्रितमिति न परांगवद्भावः ननु परांगवद्भाववन्निघातोऽपि पदविधिरिति ऋतेनेत्यनेनासामर्थ्यान्नतः पदात्परस्य मित्रावरुणपदस्य न स्यादिति
चेत् न समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति निघाते पदविधावपि समानवाक्यत्वमेव पर्याप्तं न परांगवद्भाववत्परस्परान्वयोपी
त्यलं क्रतुं कृञः क्रतुः प्रत्ययस्वरेणाद्युदात्तः आशाथे आनशाथे छंदसि लुङ्लङ्लिट इति वर्तमाने लिट् नुडभावश्छांदसः ॥ ॥तृती
यामृचमाह ॥ कवी नो मित्रावरुणा तुविजाता उरुक्षया ॥ दक्षं दधाते अपसं ॥ मित्रावरुणौ नोऽस्माकं दक्षं बलं अपसं कर्म च दधाते
पोषयतः कीदृशौ कवी मेधाविनौ तुविजातौ बहूनामुपकारकतया समुत्पन्नौ उरुक्षया बहुनिवासौ विप्रो धीर इत्यादिषु चतुर्विंशतिसं
ख्याकेषु मेधाविनामसु कविर्मनीषीति पठितं उरु तुवीत्येतौ शब्दौ द्वादशसु बहुनामसु पठितौ ओजः पाज इत्यादिषु अष्टाविंशतिसंख्याकेषु
बलनामसु दक्षो वीतिपठितं अथ सशब्दः षड्विंशतिसंख्याकेषु कर्मनामसु पठितः मित्रावरुणा मित्रशब्दः प्रातिपदिकस्वरेणांतोदात्तः वरुणश
ब्दो नित्स्वरेणाद्युदात्तः देवताद्वंद्वे चेत्युभावप्याद्युदात्तौ भवतः तुविजातौ बहूनामुपकारकतया तत्संबंधित्वेन जाताविति षष्ठीसमासे समासांतोदात्तत्वं
चतुर्थीसमासे हि केचिति पूर्वपदप्रकृतिस्वरः स्यात् उरूणां बहूनां क्षयौ उरुक्षयौ क्षि निवासगत्योरिति धातोः क्षियत्यस्मिन्निति क्षयः इत्यधिकर
णे एरजित्यच्प्रत्ययांतस्याच्च इत्यंतोदात्तत्वे प्राप्ते क्षयो निवास इत्याद्युदात्तत्वं विहितं समासे तु समासस्येत्यंतोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृति
स्वरेण प्राप्तमुत्तरपदाद्युदात्तत्वं यद्यपि याथादिस्वरेणांतोदात्तत्वं न बाध्यते तथापि परादिश्छंदसि बहुलमिति उत्तरपदाद्युदात्तत्वं द्रष्टव्यं दक्षो
दक्षतेरुत्साहकर्मणः पचाद्यच्त्वाद्युदात्तः अप्यते फलमनेनेत्यपः कर्म आपः कर्माख्यायां ह्रस्वो नुट् चेत्यसुनंतस्यापस इत्याद्युदात्तो नि
त्वाद्युदात्तः स्यादप्से पेऽशब्दस्यात्र व्यत्ययेन प्रत्ययाद्युदात्तत्वं ॥ ॥इति प्रथमस्य प्रथमे चतुर्थो वर्गः ॥ ॥आश्विनेनिद्वादशर्चं तृतीयं
सूक्तं तत्र आश्विनस्तचः प्रातरनुवाकस्य आश्विने क्रतौ विनियुक्तः तथा च सूत्रितं अथाश्विन एयोदुषाः प्रातर्युजेतिच तस्रोऽश्विना यज्वरी
रिष इति ॥ ॥तत्र प्रथमामृचमाह ॥ अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती ॥ पुरुभुजा चनस्यतं ॥ हे अश्विनौ युवामिषो हविर्लक्षणान्यन्ना
नि चनस्यतं इच्छतं भुंजाथामित्यर्थः यद्यपि चन इत्ययं शब्दो अन्नवाचीत थापि इष इत्यनेन सह नास्ति पुनरुक्तिदोषः इच्छामुपलक्षयितुं प्रयुक्तत्वा
त् वक्तव्यमुवाच स मूल्कापांकपतीत्यादीय यथापुनरुक्त्यभाव स्तद्वत् कीदृशीरिषः यज्वरीः यागनिष्पादिकाः कीदृशावश्विनौ द्रवत्पा
णी द्रवणं विहरणाय द्रवंतौ धावंतौ पाणी ययोस्तावुपेतौ शुभस्पती शोभनस्य कर्मणः पालकौ पुरुभुजा विस्तीर्णभुजौ बहुभोजिनौ वा अ
श्विना मंत्रितत्वेन षाष्ठिकमाद्युदात्तत्वं यज्वरीः यागकरणानामासिञ्चिनत्ती तिबत्त्वया पारकर्तृत्वविवक्षयायजते ङ्वनिप् प्रत्ययः
वनोरचेति ङीप् तत्संनियोगेन रेफादेशः प्रत्ययद्वयस्यानुदात्तौ सप्तिताविति अनुदात्तत्वात् धातुस्वर एव शिष्यते इषः इषेक्विमाने नुदात्तत्वा

भा० प्र०

२०

प्रातिपदिकस्वर एव शिष्यते॥ द्रवंतौ धावंतौ पाणी ययोस्तयोः संबोधनं द्रवत्पाणी इति॥ तस्यामंत्रिताद्युदात्तत्वेन पुनराष्टमिकोनिघातः॥ अपादादा
विति प्रतिषेधात्॥ शुभस्पती इति पूर्वपदस्य षष्ठ्यामंत्रितइतिपरांगवद्भावेन मित्रावरुणावृतावृधा इतिवत्पादादित्वमिति चेत्॥ न। तत्र सामानाधिकरण्येन प
रस्परान्वयात्॥ इह तु नियोद्रवत्पाणी इत्यनयोः सरस्वतिकृतुद्विपदपदसामर्थ्येन प्रयुक्तत्वात्॥ शुभ इति शुभ शुंभ दीप्तावित्यस्य संपदादित्वाद्भावे
क्विबंतस्य षष्ठ्येकवचनं। षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं तस्य पती इत्यामंत्रिते परतः परांगवद्भावादामंत्रिताद्युदात्तत्वं॥ न पुनराष्टमिकोनिघा
तः॥ तस्मिन्कर्तव्ये द्रवत्पाणी इति पूर्वस्यामंत्रितस्यामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवद्भावेन पादादित्वादपादादाविति प्रतिषेधात्॥ ननु मित्रावरुणा
वृतावृधाद्इतिवन्नामंत्रिते समानाधिकरण इत्यविद्यमानवद्भावप्रतिषेधेन भवितव्यमिति चेत्॥ न। मित्रावरुणापदवत्सामान्यवचनमिति युक्तस्यावि
द्यमानत्वप्रतिषेधः॥ द्रवत्पाणी परं तु न तथेति विषमस्यात्पुरुदंससौ तीर्णौ भुजौ यथोक्तौ॥ आमंत्रिताद्युदात्तत्वं॥ कृपांसकृगिति दादेशः॥ पुरुभुजा इ
ति वा चनस्यत मित्यत्र चायते रश्रेह्रस्वश्चेति चाप्रत्ययानिथामनयोः इत्यस्यासन्प्रत्यये आकारस्य ह्रस्वे चानुकृतेनु गागमे चलोपो व्योर्वलीति यकारलो
पे च न सन्नाश्चे नामसकृपठितः तदात्मन इच्छतीति क्यप आत्मनः क्यच॥ सनाद्यंता इति धातुत्वात्तौणमध्यमद्विवचनं थस्य चः प्रत्ययस्वरेणोदात्तत्वं॥ इणा
एकादेशेकृते एकादेशउदात्तेनोदात्त इत्युदात्तत्वं पर्यायत्वात्तस्य सार्वधातुकमनुदात्तत्वे स्वरितत्वं न चति इति इति घोनित्यः॥ पूर्वस्यामंत्रितस्याविद्य
मानवद्भावेन पदादपरत्वाद्पादादिता द्युतद्रग्रात्सिः॥ ॥द्वितीयामृचमाह॥ अश्विना पुरुदंससा नरा शवीरया धिया॥ धिष्ण्या वनतं गिरः॥ अश्विना
हे अश्विनौ युवां गिरो अस्मदीयास्तुतिर्धिया द्रयुक्तया बुध्या वनतं संभजतं स्वीकुरुतं कीदृशावश्विनौ पुरुदंससा बहुकर्माणौ॥ पद्रिदशेति संख्याके
षु कर्मनामसु दंस इति पठितं॥ नरा नेतारौ धिष्ण्या धाष्ट्र्ययुक्तौ बुद्धिमंतौ वा॥ कीदृश्या धिया शवीरया गतियुक्तया अप्रतिहतप्रसरयेत्यर्थः॥
अश्विनेत्यामंत्रितत्वात्तु स्वस्य पाष्ठिकमामंत्रिताद्युदात्तत्वं पादादित्वान्नाष्टमिकोनिघातः॥ पुरुदंससेत्यादि पादादित्वेपि आमंत्रितं पूर्वमवि
द्यमानवदिति पूर्वस्याविद्यमानत्वात्ननामंत्रिते समानाधिकरणे इति पूर्वस्य सामान्यवचनत्वेनास्य च विशेषवचनत्वेन नाविद्यमानवत्त्वमिति चेत्॥
न। अश्विशब्दवत्पुरुदंससा शब्दस्याप्यश्विनोरेव रूढ्या प्रयुज्यमानतया सामान्यशब्दत्वात्॥ सामान्यवचनेनाविद्यमानविदितकर्थासरस्या
विशेषवचनत्वावगमात्॥ उभयोः सामान्यवचनत्वे पर्यायत्वेनयोन रक्यात्सहाप्रयोग इति चेत्॥ न। गुणविशेषसंकीर्तनवत्प्रसिद्धानेकनामवि
शेषसंबंधसंकीर्तनस्यापि स्तुत्युपयोगेन सप्रयोजनत्वात्॥ प्रयोजनं पुनर्वचनस्येव पुनरुक्तत्वात्॥ अश्विपुरुदंसः शब्दयोरेकार्थवृत्तित्वेप
पर्यायित्वादेव प्रवृत्तिनिमित्तभेदाभावेनासामानाधिकरण्यादपि नाविद्यमानवत्प्रतिषेधः॥ भिन्नप्रवृत्तिनिमित्तानामेव शब्दानामेकस्मिन्नर्थे वृत्तिः सामा
नाधिकरण्यं अश्विशब्दस्याश्विसंबंधो निमित्तं पुरुदंसः शब्दस्य तु बहुकर्मसंबंध इति प्रवृत्तिनिमित्तभेद इति चेत्॥ न। तद्धि व्युत्पत्तिमात्रनिमि
त्तं न प्रवृत्तिनिमित्तं॥ व्युत्पत्तिनिमित्तभेदमात्रेणापि सामानाधिकरण्याभिधाने रक्षमहीरहशब्दयोरपि तथात्वप्रसंगः॥ अत एव हीरो रत्नं हिरि
सरत्वात्प्रियेप्वथमिमा स्त्रिविश्रुतेत्यानि ते अश्वेनामानीत्यत्र सहस्त्वतमीप्रयोसोपयोगिते नेडादिशब्दानामेतानि ते अन्येनामानीति वचनेन प
र्यायाणामप्यनेकविशेषनामसंबंधनिबंधनत्वत्यर्थत्वेनैव सहप्रयोगस्तत्सूप्योगेनैव व्युत्पत्तिनिमित्तिभेदविवक्षायामपि पर्यायत्वेनासा
मानाधिकरण्यादेवनामंत्रित इति निषेधाभावादामंत्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानवत्वात्सर्वपादादित्वमाद्युदात्तत्वं॥ तद्वत्पुरु २०

41
1924

तेषां ष्टृधृषृ स्वदि परिशोटिभ्य ईरनित्यनुवृत्तौ बहुलवचनात्स्यस्वापीत्यनेन ष्ठ्वकगतावितिधातोरिरन्प्रत्यये रूते सतिनित्वाच्छवीरयानाद्युदात्तः आ पुरा
नः धियेत्यत्र साचेकाच इति विभक्तिरुदात्ता॥ वनतमित्यत्रायः पिता लोण्मध्यमद्विवचनस्य तस् सार्वधातुकत्वाच्च वनषण संभक्ताविति धातुदात्तत्व
मेव शिष्यते॥ न वर्तिइति इतिनिघातः॥ पूर्वामंत्रितस्याविद्यमानत्वेन पादादित्वात् गिरः सपोनुदात्तत्वेन प्रातिपदिकस्वरः शिष्यते॥ ॥तृती
यामृचमाह॥ ॥दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः॥ आ यातं रुद्रवर्तनी॥ अत्राश्विनेत्यनुवर्तते॥ हे अश्विनौ आयातमस्मिन्कर्मण्यागच्छ
तं॥ किमर्थमिति तदुच्यते॥ सुताः युष्मदर्थं सोमाः अभिषुताः तान्स्वीकर्तुमिति शेषः॥ कीदृशावश्विनौ॥ दस्रा शत्रूणामुपक्षयितारौ यद्वा दस्र
वैद्यत्वेन रोगाणामुपक्षयितारौ॥ अश्विनौ वै देवानां भिषजावितिश्रुतेः॥ नासत्या असत्यं अनृतभाषणं तद्रहितौ॥ अत्र यास्कः॥ सत्यावे
व नासत्यावित्यौर्णवाभः सत्यस्य प्रणेतारावित्याग्रायण इति॥ रुद्रवर्तनी रुद्रशब्दस्य रोदनं प्रवृत्तिनिमित्तं॥ यद्रोदीत्तद्रुद्रस्य रुद्रत्वमिति तैत्तिरीयाः
तद्यद्रोदयंति॥ तस्माद्रुद्रा इति वाजसनेयिनः॥ रुद्राणां शत्रुरोदनकारिणां शूरभटानां वर्तनिः मार्गो धाटीरूपो ययोस्तौ रुद्रवर्तनी॥ यथा शू
रधाटीमुखेन शत्रून्रोदयंति॥ तद्वदेतावित्यर्थः॥ युवाकव इत्यभिषुतसोमानां विशेषणं॥ वसतीवरीभिरेकधनाभिश्चाद्भिर्मिश्रिता
इत्यर्थः॥ वृक्तानि मूले वर्तितानि बर्हींष्यास्तरणरूपाणि येषां सोमानां ते वृक्तबर्हिषः॥ यद्वा भरता इत्यादिषु स्वधर्लिङ्गमसवृक्तबर्हिष
इति॥ तदानीं तृतीयार्थे प्रथमर्त्विग्भिरभिषुता इत्यन्वयः॥ दस्रा आमंत्रितस्येत्याद्युदात्तः॥ युवाकवः॥ युमिश्रणे॥ युवंति मिश्री भवंति॥
वसतीवरीप्रभृतिभिः॥ श्रयणद्रव्यैरिति युवाकवः॥ कृविकृपादिभ्यो वाणितस्यापि यौते र्बहुलग्रहणात्काकुप्रत्ययः॥ तस्य कित्वेन गुणाभावाद्
वङादेशः॥ प्रत्ययस्वरेण आकार उदात्तः॥ न विद्यते असत्यमनयोरिति नासत्यौ॥ नभ्राण्नपान्नवेदानासत्येत्यादिना प्रकृतिभावान्नञो
लोपाभावः॥ पादादित्वेन निघाताभावादामंत्रितास्य स्वात्तत्वं॥ वृक्तबर्हिषः॥ वृजी वर्जने॥ वर्जितं बर्हिरास्तीर्णं॥ येषां सोमानां ते वृक्तबर्हि
षः॥ पूर्वपदप्रकृतिस्वरेण तु प्रत्ययस्वर एव शिष्यते॥ आ इत्यत्र उपसर्गाश्चाभिवर्जमित्युदात्तः॥ रुद्रवर्तनी॥ आमंत्रितस्य चेत्यामंत्रितनिघातः॥
॥ एवं द्वितीयप्रथमामृचमाह॥ ॥इंद्रा याहि चित्रभानो सुता इमे त्वायवः॥ अण्वीभिस्तना पूतासः॥ चित्रभानो चित्रदीप्ते हे इंद्र अस्मिन्कर्म
ण्यायाहि आगच्छ॥ सुता अभिषुता इमे सोमाः॥ त्वायवः त्वां कामयमाना वर्तंते॥ अण्वीभिः अग्रुव इत्यादिषु द्वाविंशतिसंख्याकेष्वंगुलि
नामसु अण्व्य इति पठितं॥ अंगुलीनामंगुलिभिः॥ सुता इत्यन्वयः॥ किंच एते सोमाः तना नित्यं पूतासः पूताः शुद्धाः दशापवित्रेण शोधितत्वात्
॥ इंद्रशब्दं यास्को बहुधा निर्वक्ति॥ इंद्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयतीति वेरां धारयतीति वेंदवे द्रवत इति वेंदौ रमत इति वें
धे भूतानीति वा तद्यदेनं प्राणैः समैंधंस्तदिंद्रस्येंद्रत्वमिति विज्ञायत इदंकरणादित्याग्रायण इदं दर्शनादित्यौपमन्यवः इंदतेर्वैश्वर्य
कर्मण इंच्छत्रूणां दारयिता वा द्रावयिता वादरयिता च यज्वनामिति॥ अस्यायमर्थः॥ दृविदारणे डुधाञ्पोषणार्थः॥ इरा मन्नं तन्निष्करणं
स्विन भूमिं विदारयतीतींद्रः॥ पूर्वोक्तपोषणमुखेन रां धारयतीति विना इराहित्येन स्थापयतीतींद्रः॥ इंदुः शब्दे सोमो बल्ली रसः तदर्थं या
गभूमो द्रवति धावतीतींद्रः॥ इंद्रौ सोमे रमते क्रीडतीतींद्रः॥ ञिइंधी दीप्ताविति धातुः॥ भूतानि प्राणिदेहान् इंधे जीवचेतन्य

भा० प्र०

२१ रूपेणांतः प्रविश्य दर्शयतीतींद्रः॥ एतदेवाभिप्रेत्य वाजसनेयिन आमनंति॥ इंधो ह वै नामैष योयं दक्षिणेक्षन्पुरुषः॥ तं वा एतमिंधं संतमिंद्र इत्याचक्ष
ते॥ परोक्षेण परोक्षप्रिया इव हि देवाः॥ प्रत्यक्षद्विष इति॥ तद्धदित्यादिकं ब्राह्मणांतरवाक्यं तत्रेंद्रशब्दस्य निर्वचनमुच्यत इति शेषः॥ यद्वा स्मात्कारणादेनं
परमात्मरूपमिंद्रं देवं प्राणैर्वाक्चक्षुरादींद्रियैः प्राणापानादिवायुभिश्च सहितं समैंधन् उपासकाः ध्यानेन सम्यक्प्रकाशितवंतः तस्मात्कारणादिंद्र
नाम संपन्नं॥ अस्मिन्पक्षे इंधी दीप्यत इति कर्मणि व्युत्पत्तिः॥ आग्रयणनामको मुनिरिदंकरणादिंद्र इति निर्वचनं मन्यते॥ इंद्रो हि परमात्मरू
पेण इदं जगत्करोति॥ औपमन्यवनामको मुनिरिदंदर्शनादिंद्र इति निर्वचनमाह॥ इदमित्यापरोक्ष्यमुच्यते॥ विवेकेन हि परमात्मानमापरोक्ष्येण
पश्यति॥ एतदेवाभिप्रेत्यारण्यकांडे समाम्नायते॥ स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिती३ तस्मादिदंद्रो नामेदंद्रो ह वै नाम तमिदंद्रं सं
तमिंद्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इति॥ इदि परमैश्वर्ये इति धातुः स्वमायया जगद्रूपतां परमैश्वर्यं तद्योगादिंद्रः अनेनाभि
प्रायेणाम्नायते इंद्रो मायाभिः पुरुरूप ईयत इति [?] शब्दस्येश्वरवाचकस्याकारलोपे सति नकारांतमिति पदं भवति द्रु भय इति धातुः स च परमेश्व
रः शत्रूणां दारयिता भीषयिता वेतींद्रः॥ द्रु गताविति धातुः॥ शत्रूणां द्रावयिता पलायनं प्रापयितेतींद्रः॥ यज्वनां यागानुष्ठायिनामादरयिता भयस्य
परिहर्ता॥ एवमेतानि निर्वचनानि द्रष्टव्यानि॥ इंद्रेत्यत्रामंत्रितायुदात्तत्वं॥ आ इत्यत्र निपातत्वेनाद्युदात्तत्वं चित्रभानो पदात्परत्वादामंत्रितनि
घातः॥ यामि छंदसीत्यर्थे युष्मच्छब्दात्कप् आत्मनः क्यच् प्रत्ययो नरपदस्योश्चेति॥ मपर्यंतस्य त्वादेशः॥ स्याच्छंदसीति कन्नं ताङ् प्रत्ययः॥ लृतय
व इति प्राप्ते युष्मदस्मदोरनादेश इत्यविभक्तावपि हलादौ व्यत्ययेनात्वं॥ उकारः प्रत्ययस्वरेणोदात्तः॥ अनुशब्दः सोषिमत्याच्च कृत्स्योगात
प्रकृते अंगुर्ल्हा पुवर्तते॥ वोतो गुणवचनादिति ङीषि प्राप्ते व्यत्ययेन ङीन्॥ नित्वादाद्युदात्तः॥ तना इत्ययं निपातो नित्यमित्यर्थे निपातत्वादाद्युदात्तः॥
पूतासः॥ आज्जसेरसुगित्यसुक्॥ ॥ द्वितीयामृचमाह॥ इंद्रायाहि धियेषितो विप्रजूतः सुतावतः॥ उप ब्रह्माणि वाघतः॥ हे इंद्र त्वमायाहि अ
स्मिन्कर्मण्यागच्छ॥ किमर्थं वाघतः ऋत्विजो ब्रह्माणि वेदरूपाणि स्तोत्राण्युपैतुं॥ कीदृशस्त्वं धिया अस्मदीयया प्रज्ञया इषितः प्राप्तः॥ अस्मद्भक्
त्या प्रेरित इत्यर्थः॥ विप्रजूतः यथा यजमानभक्त्या प्रेरितस्तथा तैरपि विप्रैर्मेधाविभिर्ऋत्विग्भिः प्रेरितः कीदृशस्य वाघतः सुतावतः अभिषु
तसोमयुक्तस्य॥ केत इत्यादिषु चतुर्दशसु प्रज्ञानामसु धीरिति पठितं॥ चतुर्विंशति संख्याकेषु मेधाविनामसु विप्रो धीर इति पठितं॥ भरता इत्या
दिषु षट्स्वृत्विङ्नामसु वाघत इति पठितं॥ इषित इत्यत्र [?] निष्ठायामिडागमः॥ आगमा अनुदात्ता इतीटो नुदात्तत्वात्॥ कृत्स्वरः शिष्यते॥
विप्रजूतः इव पवीन्नतं तु संतान इति धातोः॥ क्तेब्राह्मणाविप्रेत्यादिना रन्प्रत्ययांतो विप्रशब्दो निपातितः॥ निपातनादुपधाया इति अभ्यासस्य नत्वेति
कानत्रादेशः॥ तुजादीनां दीर्घोभ्यासस्य॥ तृतीयामृचमाह॥ ॥ इंद्रायाहि तूतुजान उप ब्रह्माणि हरिवः॥ सुते दधिष्व नश्चनः॥ हरिशब्दः इंद्रसंबं
धिनोरश्वयोर्नामधेयं॥ हरी इंद्रस्य रोहितोग्नेरिति तदीयाश्वनामत्वेन पठितत्वात्॥ हे हरिवः॥ अश्वयुक्त इंद्र त्वं ब्रह्माण्युपैतुमायाहि॥ कीदृशस्त्वं
तूतुजानः त्वरमाणः आगत्य चास्मिन्सुते सोमाभिषवयुक्ते कर्मणि नोस्मदीयं चनोन्नं हविर्लक्षणं दधिष्व धारय॥ स्वीकुर्वित्यर्थः॥ तूतुजानः २१
तर्किंदिलिहः कान्कानोलघूपधगुणाभावश्च॥ नितादाद्युदात्तः॥ वेत्तेः आसः॥ हरि इति सौत्रो धातुर्गत्यर्थः॥ श्रुकः किति॥ तीटप्रतिषेधः॥ तृतीयाक
र्मणीति पूर्वपदप्रकृतिस्वरत्वं॥ सुतावतः छांदसो दीर्घत्वं॥ मतुपोनुदात्तत्वात्॥ कप्रत्ययस्वर एव शिष्यते॥ ब्रह्माणि॥ नविषयस्यानिसंतस्येत्या

द्युदात्तः॥ वाघत शब्दः ऋत्विङ्नामसु पठितः प्रातिपदिकस्वरः दीर्घत्वं॥ अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ हरिवदित्यत्र हरयोस्य संतीति मतुप
छंदसीर इति मकारस्य वत्वं॥ संबुद्धौ उगिदचामिति नुम् संयोगांतलोपो नकारस्य मतुवसो रः संबुद्धौ छंदसीति रत्वं॥ आष्टमिको निघातः॥ ब्र 43
ह्माणीत्यस्य हरिव इत्यनेनासामर्थ्यात्समर्थः पदविधिरिति नियमात्सुबामंत्रिते परांगवद्भावाभावेनामंत्रितनिघाताभावादाद्युदात्तत्वे सत्यु 1924
पेत्यकारस्य संनरः॥ दधिष्वेत्यत्र दधातेर्लोटि थास्थासः से सवाभ्यां वामौ पित्येकारस्य वादेशः॥ छंदस्युभयथेति सार्वधातुकार्धधातुक
संज्ञयोः सत्योः सार्वधातुकत्वेन श्लाविष्टस्य श्लौ च द्विर्भावः॥ आर्धधातुकत्वेन इडागमश्च आतो लोप इटि चेत्याकारलोपः चनः चायतेर्नेहस्वश्चे
त्यसुनंतः॥ चकारान्नुडागमे यलोपः॥ ॥ इति प्रथमस्य प्रथमे पंचमो वर्गः॥ ॥ वैश्वदेवमृचं प्रथमामृचमाह॥ ओमासश्चर्षणीधृतो वि
श्वेदेवास आगत॥ दाश्वांसो दाशुषः सुतं॥ ७॥ हे विश्वेदेवासः एतन्नामकाः देवविशेषाः दाशुषो हविर्दत्तवतो यजमानस्य सुतमभिषुतं सोमं
प्रति आगत आगच्छत॥ ते च देवा ओमासो रक्षकाः चर्षणीधृतो मनुष्याणां धारकाः दाश्वांसः फलस्य दातारः मनुष्या इत्यादिषु पंचविंश
तिसंख्याकेषु मनुष्यनामसु चर्षणीशब्दः पठितः॥ अश्विनावित्यादिषु एकत्रिंशत्संख्याकेषु देवविशेषनामसु विश्वेदेवाः साध्या इति पठितं॥
एतामृचं यास्क एवं व्याख्यातवान् अवितारो वावनीया वा मनुष्यधृतः सर्वे च देवा इहागच्छत दत्तवंतो दत्तवतः सुतमिति तदेतदेकमेव वैश्वदे
वं गायत्रं तृचं दशतयीषु विद्यते यत्तु किंचिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिंगमिति शाकपूणिरिति॥ अत्र विश्वशब्दः सर्वश
ब्दपर्याय इति यास्कस्य मतं॥ देवविशेषस्यैवासाधारणं लिंगमिति शाकपूणेर्मतं॥ अवंतीत्योमासो देवाः मंनित्यनुवृत्तौ॥ अविसिविसिशुषिभ्यः
किदिति मन् प्रत्ययः॥ ज्वरत्वरश्रिव्यविमवामुपधायाश्चेत्यूठ् मनः किन्वेपि बाहुलकात्गुणः॥ आज्जसेरसुगित्यसुगागमः॥ आमंत्रिताद्युदा
त्तत्वं॥ चर्षणयो मनुष्याः तान् वृष्टिदानादिना धारयंतीति चर्षणीधृतो देवाः पूर्वस्यामंत्रितस्य सामान्यवचनस्य विभाषितं विशेषवचने य
द्बहुवचनमित्यविद्यमानवत्त्वप्रतिषेधात्पादादित्वेन निघाताभावः॥ नन्वत एवाविद्यमानवत्त्वात्सुबामंत्रित इति परांगवत्त्वेनैकपदीभावात् पदा
त्परत्वेन कथं निघात इति चेत्॥ न वा तत्करणं स्वाश्रयमपि यथा स्यादिति वचनात् [?] निघातस्याप्युपपत्तेः ऐकपद्येप्याद्युदात्त
त्वेनुदात्तं पदमेकवर्जमिति सकृदेव निघातो भविष्यति॥ इत्थमेव तर्हि [?] अत्रापि परांगवत्त्वेनैकपद्यादुत्तरस्य शेष
निघातप्रसंग इति चेत्॥ न॥ तत्र परांगवद्भावस्य परेणामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवद्भावेन बाधितत्वात्॥ इह पुनर्विभाषितं विशे
षवचने बहुवचनमित्यविद्यमानवत्त्वस्य निषेधात्॥ पूर्वस्याप्यामंत्रितस्याविद्यमानवत्त्वात्परांगवत्त्वं स्वीकृतमिति वैषम्यं॥ विश्वे पादादि
त्वादाद्युदात्तः॥ गणदेवतावचनश्चायं विश्वशब्देन सर्वशब्दपर्याय इति विशेष्यपरतया सामान्यवचनत्वादोमास इत्यनेन सामानाधिकर
ण्यं॥ विश्वे पादादित्वात् सामानाधिकरण्ये हि पूर्वस्य पादस्य परांगवद्भावे सति [?] आमंत्रिताद्युदात्तता न स्यात् विश्वे
इत्यस्य विशेषणं देवास इति॥ दीव्यंतीति देवाः॥ प्रकाशवंतः॥ नन्ववयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति रूढ्या एव विश्वदेवशब्दस्य योग
स्थाने यौगिकः यौगिकत्वे सत्यवयवार्थानुसंधानव्यवधानेन प्रतिपत्तिर्विलंबिता स्यात्॥ समुदायप्रसिद्धौ तु न विलंब इति चेत्॥ न॥ समुदायप्रसि
द्धौ हि देवशब्दस्य सामान्यपरतयाविशेषवचनत्वाभावाद्विभाषितं विशेषवचने बहुवचनमित्यनेनानिषिद्धत्वाद्विश्वे इत्यस्याविद्यमानवत्त्वे

भा॰ प्र॰ नरूभस्यतीति पदद्वयेऽह्वासइत्यस्याख्यातउदात्तत्वं स्यात्॥ स्वरानुसारेण च रूढित्वात्तेनापि देवत्वा इत्यस्य योगः स्वीकार्ये युक्तः॥ आगत आगच्छत बहुलं छं
२२ दसीति शपो लुकि मन्ति अनुदात्तोपदेशेत्यादिना मकारलोपः॥ आङः पदात्परत्वेन निघातः॥ दाश्वांसः दाश्वान्साह्वानित्यस्य क्वसौ दाश्वान्साह्वान्मीढ्वां
श्चेति निपातनात्कादिनियमप्राप्त इडागमो द्विर्वचनं च न भवति॥ प्रत्ययस्वरेण क्वसोरुदात्तत्वं दाशुष इत्यत्र वसोः संप्रसारणमिति संप्रसारणं
संप्रसारणाच्चेति पूर्वरूपत्वं। आदेशप्रत्यययोरिति षत्वं॥ ॥द्वितीयामृचमाह॥ विश्वे देवासो अप्तुरः सुतमा गंत तूर्णयः॥ उस्राइव स्वसराणि॥७॥
विश्वे देवासः एतन्नामका गणरूपा देवविशेषाः सुतं सोमम् आगंत आगच्छंत आगच्छंतु॥ कीदृशाः अप्तुरः तत्तत्काले वृष्टिप्रदा इत्यर्थः॥ तूर्णयः त्वरायु
क्ताः यजमानमनुग्रहीतुमालस्यरहिता इत्यर्थः॥ विश्वेषां देवानां सोमं प्रत्यागमने उस्रा इत्यादिदृष्टांतः॥ उस्राः सूर्यरश्मयः स्वसराण्यहानि प्रत्यालस्य
रहिता यथा समागच्छंति तद्वत्॥ खेदय इत्यादिषु पंचदशसु रश्मिनामसु उस्राः वसव इति पठितं॥ वस्तोरित्यादिषु द्वादशस्वहर्नामसु स्वसराणि
घ्रंसः घर्म इति पठितं॥ तच्च पदं यास्केन व्याख्यातं॥ स्वसराण्यहानि भवंति स्वयं सारीण्यपि वा स्वरादित्यो भवति स एनानि सारयति॥ उस्रा इव स्व
सराणीत्यपि निगमो भवतीति॥ देवासः पचाद्यच्॥ तन्निलादित्वादाद्युदात्तः॥ अप्तुरः तुर त्वरणे॥ क्विप्करणी तु तुरतिस्त्वरयंतीत्यर्थं क्विप् गतिकारकोपपदा
त्कृदुत्तरपदप्रकृतिस्वरत्वं॥ आ गंत आगच्छंतेत्यर्थे व्यत्ययेन मध्यमपुरुषबहुवचनं। बहुलं छंदसीति शपो लुक्॥ तस्य तप्तनप्तनथनाश्चेति
तबादेशो अपिद्वितिप्रतिषेधाद् ङित्त्वाद्नुनासिकलोपाभावः॥ तिङ्ङतिङः इति निघातः॥ ञित्वरा संभ्रमे इति धातोः त्वरंत इति तूर्णयः निरित्यनुव
र्तौ वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् इति नित्॥ नित्वादाद्युदात्तः॥ उस्रा इवेत्यत्र इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च॥ नित्यस
मासे पूर्वपदप्रकृतिस्वरत्वं। नित्यं सरस्वतीति सरः सर्वः पचाद्यच्॥ स्वः सरो येषां तानि स्वसराणि अहानि। बहुव्रीहौ प्रकृत्या पूर्वपदमिति स
दाद्य आद्युदात्तः॥ ॥तृतीयामृचमाह॥ विश्वे देवासो अस्रिध एहिमायासो अद्रुहः॥ मेधं जुषंत वह्नयः॥ विश्वे देवास एतन्नामका देवविशे
षाः मेधं हविर्यज्ञसंबंधि जुषंत सेवंतां॥ कीदृशाः अस्रिधः क्षयरहिताः शोषरहिता वा। एहिमायासः सर्वतो व्याप्तप्रज्ञाः। यद्वा सोर्वकि
मग्निमप्रकृतिप्रविष्टमेहिमायासीमिति यद्वचनं तेनानुकरणहेतुको यं विश्वेषां देवानां व्यपदेश एहिमायास इति। अद्रुहो द्रोहरहिताः॥ वह्नयो वो
ढारः॥ धनानां प्रापयितारः॥ स्रिध क्षयार्थस्य शोषणार्थस्य वा संपदादिभ्यो भावे क्विप्॥ नञो बहुव्रीहिः। पूर्वपदप्रकृतिस्वरं बाधित्वा नञ्सुभ्यामि
त्युत्तरपदांतोदात्तत्वं॥ एहिमायासः ई ह चेष्टायां॥ आ समंतादीहते इत्याहिः संनिति सर्वधातुसाधारण इन्प्रत्ययो नित्वादाद्युदात्तः॥ एहिर्माया
प्रज्ञा येषामिति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ अथवा आङुदात्तो उतस्येरॄहिति कोणमध्यमैकवचनस्यातिङ्ङतिङः इति निघाते एकादे
शउदात्तेनोदात्त इत्येकार उदात्तः॥ एहि इत्येतस्य एयुक्तं मायासीरित्यत्र मायेत्यस्य रइयं ए घातेन एहिमायासः पूर्वपदप्रकृतिस्वरः॥ अद्रुहः द्रुह जि
घांसायां। संपदादित्वाद्भावे क्विप्॥ बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। मेधं मेधः संगमे च॥ मेध्यते देवैः संगम्यत इति मेधं हविः कर्म
णि घञ् ञित्वादाद्युदात्तः॥ जुषंत सेवंतामित्यर्थे छंदसि लुङ्लङ्लिटः इति धातुसंबंधे लङ्॥ यत उत्तररूपा विश्वे देवा अतो जुषंतेति दृश्यते धात्वर्थे संबं २२
धात बहुलं छंदस्य माङ्योगे पीत्याडागमाभावः॥ निरित्यनुवृत्तौ वहि श्रुत्यादिना विहितस्य निप्रत्ययस्य नित्वादाद्युदात्तत्वं॥ सारस्वतेन तृचेन प्र
थमासान्वारंभणीयेष्टौ सरस्वत्याः पुरोनुवाक्या॥ तथा दर्शपूर्णमासावारप्स्यमान इत्यस्मिन् खंडे पावका नः सरस्वती पावीरवी कन्या चित्रायु

रिति सूत्रितं॥ ॥तामेतामृचमाह॥ पावका नः सरस्वती वाजेभिर्वाजिनीवती॥ यज्ञं वष्टु धियावसुः॥ ॥सरस्वती देवी वाजेभिः हविर्लक्षणैरन्नैर्नि
मित्तभूतैः यद्वा यजमानेभ्यो दातव्यैरन्नैर्निमित्तभूतैर्नोऽस्मदीयं यज्ञं वष्टु कामयतां कामयित्वा च निर्वहत्वित्यर्थः॥ तथा चारण्यकांडेऽयं च
व्याख्यातं॥ यज्ञं वष्टु वितिय दाह यज्ञं वहत्विति एव तदाहेति॥ कीदृशी सरस्वती पावका शोधयित्री वाजिनीवती अन्नवत्क्रियावती धियावसुः कर्म
प्राप्यधननिमित्तभूता॥ वाग्देवतापरत्वाच्चायमर्थः धननिमित्तत्वमारण्यकांडेऽपि व्याख्यातं॥ यज्ञं वष्टु धियावसुरिति। स्येनः सोम इत्यादिषु पं 45
चविंशतिसंख्याकेषु देवताविशेषवाचिषु पदेषु सरमा सरस्वतीति पठितं॥ एतामृचं यास्क एवं व्याचष्टे॥ पावका नः सरस्वत्यन्नैरन्नवती यज्ञं वष्टु 1924
धियावसुः कर्मवसुरिति। पवनं पावः शुद्धिः पावकायतीति पावको वेके गै रै शब्दे आतोऽनुपसर्गे कः कृदुत्तरपदप्रकृतिस्वरत्वेनांतोदात्तत्वं॥ य
द्वा पुनातीत्यर्थे ण्वुलि प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप इतीत्वस्याभावो तोदात्तत्वं॥ न छांदसं द्रष्टव्यं। सरः सर्तेरसुनं नित्वादाद्युदा
त्तः॥ मतुप्ङीपोः पित्वादनुदात्तत्वं॥ वाजेभिः वाजशब्दो घञंतः पाद्यादित्वादाद्युदात्तः स सुप्त्वकृतलादाकृतिगणः॥ वाजोऽन्नमस्त्विति वाजिन्यः क्रियाः अ
तइनिठनाविति इनिप्रत्ययः। ताः क्रियाः यस्याः संति सा सरस्वती वाजिनीवती॥ छंदसीर इति मतुपो वत्वं॥ मतुप्ङीपोः पित्वेनानुदात्तत्वादिनेः प्र
त्ययाद्युदात्तत्वमेव शिष्यते॥ यज्ञं यजयाचेत्यादिना नङ्प्रत्ययस्वरेणांतोदात्तः॥ वष्टु वश कांतौ॥ कांतिरभिलाषः अदिप्रभृतिभ्यः शप इति श
पो लुक् तिङ्ङतिङ इति निघातः॥ धिया कर्मणा वसु यस्याः सकाशाद्भवति सा धियावसुः॥ सावेकाच इति विभक्तिरुदात्ता बहुव्रीहौ प्रकृत्या पूर्वपदमिति विभक्तिस्वर एव
शिष्यते। छांदसत्वात् तृतीयाया अलुक्॥ ॥द्वितीयामृचमाह॥ ॥चोदयित्री सूनृतानां चेतंती सुमतीनां॥ यज्ञं दधे सरस्वती॥ या सरस्वतीयं
मिमं यज्ञं दधे धारितवती॥ कीदृशी सूनृतानां प्रियाणां सत्यवाक्यानां चोदयित्री प्रेरयित्री सुमतीनां शोभनबुद्धियुक्तानामनुष्ठातॄणां चेतंती
तदीयमनुष्ठेयं ज्ञापयंती॥ चोदयित्री चुद प्रेरणे ण्यंतात्तृच्॥ चित्वादंतोदात्तः॥ ऋन्नेभ्यो ङीबिति ङीप्॥ तस्योदात्तयणो हल्पूर्वादिति स्व
दात्तत्वं॥ सूनृतानां॥ ऊनकपरिहाण इत्यतः क्विप् चेति क्विपि। ऊनरामूनयत्यप्रियमिति सूनृ उतिप्रियमुच्यते। तच्च तदृतं सत्यं चेति सू
नृतं॥ परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं॥ चेतंती चिती संज्ञाने अत्र शपो ङीपश्च पित्वादनुदात्तत्वं॥ शतुश्चोपदेशात्लसार्व
धातुकस्वरेणानुदात्तत्वं। धात्वंतस्वर एव शिष्यते॥ सुमतीनां शब्दस्य मतुपि ह्रस्वनुड्भ्यां मतुबित्यन्यतरस्यामिति विभक्तेरुदात्तत्वं॥ ॥तृतीयामृ
चमाह॥ ॥महो अर्णः सरस्वती प्र चेतयति केतुना॥ धियो विश्वा वि राजति॥ ॥द्विविधा सरस्वती विग्रहवद्देवता नदीरूपा च॥ तत्र पूर्वा
भ्यामृग्भ्यां विग्रहवती प्रतिपादिता॥ अनया तु नदीरूपा प्रतिपाद्यते॥ तादृशी सरस्वती केतुना कर्मणा प्रवाहरूपेण महो अर्णः प्र
भूतमुदकं प्रचेतयति प्रकर्षेण ज्ञापयति॥ किं च स्वकीयेन देवतारूपेण विश्वा धियः सर्वाण्यनुष्ठातृप्रज्ञानानि विराजति विशेषेण
दीपयति॥ अनुष्ठानविषया बुद्धीः सर्वा दीपयतीत्यर्थः॥ सरस्वत्या द्विरूपत्वं यास्को दर्शयति॥ तत्र सरस्वतीत्येतस्य नदीवद्देवता
वच्च निगमा भवंतीति॥ एकशततसंख्याकेषूदकनामसु अर्णः क्षोदः इति पठितं॥ एतामृचं यास्को व्याचष्टे॥ महदर्णः सरस्वती प्रचेत
यति प्रज्ञापयति केतुना कर्मणा प्रज्ञया वेमानि च सर्वाणि प्रज्ञानान्यभिविराजतीति॥ महो अर्णः महदिति तकारांतस्य व्यत्ययेन स
कारः॥ तस्य रत्वोत्वगुणाः प्रातिपदिकस्वरेणांतोदात्तः॥ एङः पदांतादतीति पूर्वरूपे प्राप्ते प्रकृत्यांतः पादमव्यपर इति प्रकृतिभावः॥ अ

भा॰ प्र॰ तीत्यर्थः॥ उरुकेतुरुरुचेत्यः सुन प्रत्ययोनुगागमश्च केतुनाप्रातिपदिकस्वरेणांतोदात्तः॥ विश्वाविश्वशब्दः क्वन्प्रत्ययांत आद्युदात्तः॥ ॥ इतिप्रथम
स्यप्रथमेपचावर्गः॥ ॥ प्रथममंडले द्वितीयानुवाके चत्वारिसूक्तानितत्र सुरूपेत्यादिकं दशर्चं प्रथमंसूक्तं॥ सुरूपकृत्नुं दशेत्यनुक्रांतत्वात्
२३ पूर्ववत् मधुच्छंदसोगायत्रस्य चानुवृत्तेः तान्येव ऋषिच्छंदांसि इंद्रः एवातिचतुर्थ्यामिति लिंगदर्शनादिंद्रो देवता अभिप्लवषडहे ब्राह्मणाच्छं
सिनः प्रातः सवने स्तोमवृद्धावावापार्थानि सुरूपकृत्नुमूतय इत्यादीनि षड् सूक्तानि सूत्रितं च॥ अभिप्लवस्याहनीतिखंडे ब्राह्मणाच्छं
सिनः सुरूपकृत्नुमूतय इतिषट् सूक्तानीति आग्नावैष्णवानिषट्सूक्तानिमहाव्रतेनिष्केवल्ये ओमिस्मिन्सर्वात्रीतौ ब्राह्मणानि॥ उक्तंचशौनके
न॥ सुरूपकृत्नुमूतय इतित्रीण्येंद्रसानसि रयिमितिसूक्ते इति॥ चतुर्विंशे ऽहनि माध्यंदिने सवने ब्राह्मणाच्छंसिनः सुरूपकृत्नुमूतय इति
वैकल्पिकस्तोत्रियस्तृचः होत्रकाणामितिखंडे मदेमदे हि नो ददिः सुरूपकृत्नुमूतय इतिसूत्रितत्वात्॥ अग्निष्टोमे वैश्वदेवशस्त्रे सुरूप
कृत्नुमूतय इति धाय्या॥ सुरूपकृत्नुमूतये तक्षन्रथमितिसूत्रितत्वात्॥ तामेतां सूक्तगतां प्रथमामृचमाह॥ ॥सुरूपकृत्नुमूतये सुदु
घामिवगोदुहे॥ जुहूमसि द्यविद्यवि॥ ॥सुरूपकृत्नुं शोभनरूपोपेतस्य कर्मणः कर्तारमिंद्रं ऊतये अस्मद्रक्षार्थं द्यविद्यवि प्रतिदिनं जुहूम
सि आह्वयामः॥ आह्वाने दृष्टांतः॥ गोदुहे गोधुगर्थं सुदुघामिव सुष्ठु दोग्ध्रीं गामिव॥ यथा लोके गोर्दोग्धा तदर्थं तस्याभिमुख्येन दोग्ध्रीं
गां आह्वयति॥ तद्वत्॥ वस्तोरित्यादिषु द्वादशस्वहर्नामसु द्यवि द्यवीति पठितं॥ सुरूपकृत्नुं॥ करोतीति कृत्नुः॥ कृहनिभ्यां क्नुः॥ कित्वाद्गु
णाभावः॥ तकारोपजननं छांदसः समासांतोदात्तः॥ ऊतये अवतेर्धातोरुदात्त इत्यनुवृत्तौ ऊतियूतिजूतिसातिहेतिकीर्तयश्चेति क्तिन्नुदात्तो
निपातितः॥ सुदुघ इति सुदुघां॥ दुहः कप् घश्चेति कप्प्रत्ययो हकारस्य च घकारः॥ कित्वाद्गुणाभावः॥ कपः पित्वादनुदात्तत्वे धातुस्वर
ण उकार उदात्तः॥ सुशब्देन गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एवस्वरः॥ इवेन विभक्त्यलोपः॥ पूर्वपदप्रकृतिस्वरत्वं॥ जुहूमसि॥ ह्व
यतेर्लट्॥ उत्तमपुरुषबहुवचने बहुलंछंदसीति शपः श्लुः अभ्यस्तस्य चेत्यभ्यकारणस्य ह्वयतेः प्रागेव द्विर्वचनात्संप्रसारणं॥ संप्रसारणाच्च
परपूर्वत्वं॥ हल इतिदीर्घः॥ ततः श्लाविति द्विर्वचनं॥ अभ्यासस्य ह्रस्वः॥ श्चुत्वजस्त्वे इदंतोमसीति मसइगागमः॥ प्रत्ययस्वरेण मकारस्य उदात्तत्वं
॥ द्यविद्यविशब्दः प्रातिपदिकस्वरेणांतोदात्तः॥ नित्यवीप्सयोरिति द्विर्भावः॥ तस्य परमाम्रेडितं अनुदात्तं चेति परस्यानुदात्तत्वं॥ ॥
द्वितीयामृचमाह॥ ॥उप नः सवना गहि सोमस्य सोमपाः पिब॥ गोदा इद्रेवतो मदः॥ हे सोमपाः सोमस्य पातरिंद्र सोमं पातुं नोस्मदीयानि
सवनानि त्रीणि सवनानि प्रत्युपसमीप आगहि॥ आगच्छ आगत्य च सोमस्य सोमं पिब रेवतो धनवतस्तव मदो हर्षो गोदा इद्गो
प्रद एव खलु तेसत्यं स्मात्भिर्गावोलभ्यंत इत्यर्थः॥ उपनिपातत्वादाद्युदात्तः॥ सवना॥ सूयते सोम एष्विति अधिकरणे ल्युट्॥ सवनानि
सुपोडादेशः॥ शिलोपश्च॥ लितीति प्रत्ययात्पूर्वस्याकारस्योदात्तत्वं॥ गहि॥ गमेर्लोट्॥ तस्य सेर्हिः॥ बहुलं छंदसीति शपो लुक्॥ हेर्ङित्वाद
नुदात्तोपदेशेत्यादिना मकारलोपः॥ अतो हेरिति आभाच्छास्त्रीये लुकि कर्तव्ये असिद्धवदत्राभादित्या भाच्छास्त्रीयो मकारलोपोसिद्धवद्भव
ति॥ सोमपाः आमंत्रितस्य चेति निघातः॥ तस्याविद्यमानवत्त्वेपि पूर्वापेक्षया तिङ्ङतिङ इति निघातस्य निघातः॥ न च पूर्वस्यापि परांग २३
वद्भावेनाविद्यमानवत्त्वं असामर्थ्येन तदभावात्॥ गोदा॥ ददातीति गोदाः॥ क्विबेति क्विपं परमपि सर्वासांविधिरूपं बाधित्वा प्रातिपदिकविधिना

दातोमनिन्क्वनिप्वनिपश्चेति विच्॥ विड्वनोरनुनासिकस्यादित्यादिना धातोराकारस्य इत्वं स्यात्॥ रेवान रयिर्धनमस्यास्तीति मतुप्॥ ह्रस्वनुड्भ्यां मतुबिति मतुबुदा
त्तः॥ रंरसीर इतिवत्त्वं॥ रयेर्मतौ बहुलं छंदसीति संप्रसारणं परपूर्वत्वे गुणश्च मदः॥ मदेनुपसर्गे इत्यप्॥ पित्वादनुदात्तः॥ ॥तृतीयामृचमाह॥ अथाते
अंतमानां विद्याम सुमतीनां॥ मानो अतिख्य आगहि॥ ॥अथ सोमपानानंतरं हे इंद्र ते तव अंतमानां अंतिकतमानां मध्ये आर्थक्षिप्य ध्याहारः॥ अतिशये 47/1924
न समीपवर्तिनां सुमतीनां शोभनमतियुक्तानां पुरुषाणां मध्ये स्थित्वा विद्याम वयं त्वां जानीम॥ यद्वा सुमतीनां शोभनबुद्धीनां कर्मानुष्ठानविषया
णां मध्ये आर्थमित्यध्याहारः॥ बुधित्वा भायतां स्मरेमेत्यर्थः॥ त्वमपि नोतिमाख्यः अस्माननतिक्रम्यान्येषां तत्त्वरूपं माप्रकथय किं त्वा गहि अस्मानेवा
गच्छ अथेति निपात आद्युदात्तः॥ निपातस्य चेति दीर्घत्वं॥ अंतमानां अतिशयेनांतिका इत्यातिशायनेतमप्॥ तमेतादेश्चेति तादिलोपः॥ अंतोस्या
स्तीत्यंतिकः समीपः अत इनिठनाविति ठन् नित्वादाद्युदात्तः॥ दूरोत्कर्षस्याद्यवसानं नाति सामीप्योत्कर्षस्या॥ पुनर्योपिस्य समीपः स एव तस्यांत
यं तत्वात् समीपमंतिकमुच्यते॥ विद्याम वेत्तेर्लिङि यासुट्परस्मैपदेषूदात्तो ङिच्चेति यासुडुदात्तः॥ पादादित्वात्तिङ्ङतिङ इति न निघातः॥ सुमतीनां म
तिशब्दात्क्तिन्नंतपि मंत्रे वृषेषपचमनविदभूवीरा उदात्त इति इकार उदात्तः॥ शोभना मतिर्येषां ते सुमतयः इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरापवादेन न
सुभ्यामिति उत्तरपदांतोदात्तः॥ शोभना मतयः सुमतयः इति कर्मधारयेप्यव्ययपूर्वपदप्रकृतिस्वरापवादः कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तत्वे अंतोम
तुपि ह्रस्वादंतोदात्तान्नाम्नोनामन्यतरस्यामित्युदात्तत्वं॥ ख्यः ख्या प्रकथने इत्यस्य लुङि सिप्यस्यतिवक्तिख्यातिभ्योङिति च्लेर
ङादेशः॥ आतोलोप इटि चेत्याकारलोपः॥ इतश्चेतीकारलोपोरुत्वविसर्गौ॥ न माङ्योग इत्यडभावः॥ गहि गमेर्बहुलं छंदसीति शपो लुकि हेर्ङित्वा
दनुदात्तोपदेशेति मकारलोपस्यासिद्धवदत्राभादित्यसिद्धत्वादतो हेरिति लुगनभवति॥ ॥चतुर्थीमृचमाह॥ परेहि विग्रमस्तृतमिंद्रं पृच्छा विपश्चि
तं॥ यस्ते सखिभ्य आवरं॥ ॥अश्वयज्ञमानं प्रति होता ब्रूते हे यजमान त्वं इंद्रं परेहि इंद्रस्य समीपे गच्छ गत्वा च विपश्चितं मेधाविनं होतारं मा पृच्छ
असौ होता सम्यक्स्तुतवान्नवेत्येवं प्रश्नं कुरु॥ य इंद्रस्ते तव यजमानस्य सखिभ्यो ऋत्विग्भ्यो वरं श्रेष्ठं धनं पुत्रादिकमास समंतात्प्रयच्छतीति शे
षः॥ तादृशमिंद्रमिति पूर्वत्रान्वयः॥ पुनरपि कीदृशं विग्रं मेधाविनं अस्तृतं अहिंसितं॥ विप्र इत्यादिषु चतुर्विंशतिसंख्याकेषु मेधाविनामसु वि
ग्रविपश्चिच्छब्दौ पठितौ॥ विग्रं॥ यास्कादित्वादाद्युदात्तः॥ अस्तृतं अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ इंद्रशब्दो ऋज्रेंद्राग्रेत्यादिना रन्निलांतो आद्युदात्तः॥
सखिभ्यः समाने ख्यश्चोदात्त इति समाने उपपदे ख्यातेरिण् डिदित्यनुवृत्तेः तस्य डित्वाट्टिलोपश्च॥ तत्संनियोगेन यलोपः॥ उपपदस्योदात्तत्वं
॥ समानस्य छंदस्यमूर्धप्रभृत्युदर्केष्विति सभावः॥ अतः सखिशब्द आद्युदात्तः॥ आ यच्छतीति वरः॥ ग्रहवृदृनिश्चिगमश्चेत्यप्॥ तस्य पित्वा
द्धातुस्वर एव॥ ॥पंचमीमृचमाह॥ उत ब्रुवंतु नो निदो निरन्यतश्चिदारत॥ दधाना इंद्र इद्दुवः॥ ॥नोस्माकं संबंधिनः ऋत्विज इति शेषः॥
ते ब्रुवंतु इंद्रं स्तुवंतु॥ उत अपि च निदः निंदितारः पुरुषाः निरारत इतोदेशान्निर्गच्छंत॥ अन्यतश्चित्॥ अन्यस्मादपि देशान्निर्गच्छंत॥ कीदृ
शा ऋत्विजः इंद्रे दुवः परिचर्यां दधानाः कुर्वाणाः॥ इंद्र एव धारणे सर्वदा परिचर्यां कुर्वत एव तिष्ठंत्वित्यर्थः॥ निंदतीति निदः॥ णिदि कुत्सायां
क्विपि नुमभावश्छांदसः॥ सुपोनुदात्तत्वाद्धातुस्वरः॥ आमंत्रितत्वेपि वाक्यांतरत्वेन स्ववाक्यगतपदात्परत्वाभावान्न निघातः॥ इत्याद्युदात्तत्व
मेव॥ अन्यतः लितीति प्रत्ययात्पूर्वस्योदात्तत्वं॥ चिदित्यपि शब्दार्थो तेन नकेवलमितः इतोनिर्गत्यान्यतोपि निर्गच्छंतेति गम्यते॥ सए

भा० प्र०

२९

पधात्वर्थयोः संबंध आरन्नेतिलुङ्‌ह्योत्यतोसहि धातुसंबंधाधिकारो विधीयते॥ आरान आर्तेः छंदसि लुङ्‌लङ्‌लिट इति लोडर्थे लुङ्‌ मध्यमबहु
वचनस्य तादेशः। सर्तिशास्त्यर्तिभ्यश्चेति च्लेरङादेशः। ऋदृशोङि गुण इति गुणः आडागमः। इधानः ञ्गाने चश्चित्वात्प्राप्तमंतोदात्तं बाधि
त्वा परत्वादभ्यस्तानामादिरित्याद्युदात्तत्वं॥ दुवः नद्विषयस्यानिसंतस्येत्याद्युदात्तः॥ ॥इति प्रथमस्य प्रथमे सप्तमो वर्गः॥ ॥सुरूप
तिसूक्ते षष्ठीमृचमाह॥ ॥उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः॥ स्यामेदिंद्रस्य शर्मणि॥ हे दस्म शत्रूणामुपक्षपयितरिंद्र त्वदनुग्रहा
त् अरिः शत्रवोपि नो अस्मान्‌ सुभगान्‌ शोभनधनोपेतान्‌ वोचेयुः। उच्यासुः॥ कृष्टयो मनुष्याः अस्मिन्मित्रभूता वदंतीति किमु
वक्तव्यमिति शेषः॥ ततो धनसंपन्ना वयमिंद्रस्य शर्मणि इंद्रप्रसादलब्धे सुखे स्याम॥ भगो मेघः। मघमित्यादिषु अष्टाविंशतिसंख्याकेषु
धननामसु रयिः क्षत्रं भग इति पठितं॥ मनुष्या इत्यादिषु पंचविंशतिसंख्याकेषु मनुष्यनामसु कृष्टय इति पठितं॥ उत एवमादीनां
मत इत्यंतोदात्तः सुभगान्‌ भगशब्दस्य कृत्वादिषु पाठात्‌ तत्र सुभ्यामित्युत्तरपदांतोदात्तत्वं बाधित्वा कृत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं॥
संहितायां दीर्घादटि समानपाद इति नकारस्य रुत्वं॥ भो भगो इति यत्वं लोपः शाकल्यस्येति यलोपः तस्यासिद्धत्वान्न पुनः संधिकार्यं आतोटि
नित्यमित्याकारस्य सानुनासिकता॥ अरिः वचनव्यत्ययः। अच इरिति इप्रत्ययांतः प्रत्ययस्वरेणांतोदात्तः॥ वोचेयुः। उच्यासुः वच परिभाषण इ
त्यस्माद्धातोर्लिङि यासुट्सादेशो लिङ्याशिष्यङिति अङ्‌ प्रत्यये वच उमित्युमागमः॥ गुणः किदाशिषीति यासुटः छंदस्युभयथेति लिङादेशस्य सार्व
धातुकत्वाल्लिङः सलोपोनंत्यस्येति सकारलोपः। अतो येयः आद्गुणः अतो इदुपदेशाल्लसार्वधातुकस्वरेणातिङ्नानुदात्तत्वं॥ अङ्प्रत्ययस्वर
एव शिष्यते॥ तेन सह इकारस्य गुण एकादेश उदात्तेनोदात्त इत्युदात्तत्वं दस्म आमंत्रितनिघातः॥ कृष्टयः क्तिच्क्तौ च संज्ञायामिति क्तिच म
नुष्यनामत्वात्‌ चित इत्यंतोदात्तः॥ स्याम। अस भुवि श्नसोरल्लोपः यासुट उदात्तत्वं इंद्रस्य आमंत्रितं॥ पादादित्वान्न निघातः। शर्मणि। शॄ हिंसायां
। हिनस्ति दुःखमिति शर्म॥ अन्येभ्योपि दृश्यंत इति मनिन्‌॥ नेड्वशि कृतीतीट्प्रतिषेधः। नित्त्वादाद्युदात्तत्वं॥ ॥सप्तमीमृचमाह॥ एमाशु
माशवे भर यज्ञश्रियं नृमादनं॥ पतयन्मंदयत्सखं॥ ॥ईमिति निपात इदमर्थे वर्तते॥ हे यजमाना आशवे व्याप्तसोमयागव्याप्ताय इंद्राय
ईमाभर॥ इमं सोममाहर॥ कीदृशं सोमं आशुं॥ सवनत्रयव्यापिनं॥ यज्ञश्रियं। यज्ञस्य संपद्रूपं। नृमादनं नृणां मत्तिं यजमानानां हर्षहेतुम्॥
पतयत्‌ पतत्‌ यंतं कर्माणि प्राप्नुवंतं॥ मंदयत्सखं॥ य इंद्रो मंदयति यजमानान्‌ हर्षयति तस्मिन्निंद्रे सखिभूतोयं सोमः तस्य तृप्तिहेतुत्वात्‌ तृप्तिहे
तुत्वाद्वा। आशुं कृवापाजिमिस्वदिसाध्यशूभ्य उणिति उण्‌॥ प्रत्ययस्वरः॥ आशवे पूर्ववत्‌। यज्ञश्रियं समासस्येत्यंतोदात्तः। माद्यंते अनेनेति
मादनः करणाधिकरणयोश्चेति ल्युट्‌॥ तस्य लित्वात्‌ पूर्व आकार उदात्तः॥ गतिकारकोपपदात्कृदिति स एव शिष्यते पतयत्‌॥ पतेरदंतस्य चौ
रादिकाणिच्‌॥ अतो लोपः। तस्य स्थानिवत्वादुपधावृद्ध्यभावः॥ लटः शत्रादेशः। तस्य छंदस्युभयथेत्यार्धधातुकत्वेन णेरभावाददुपदे
शादिति निघाताभावेन प्रत्ययाद्युदात्तत्वमेव भवति॥ आर्धधातुकत्वेपि सर्वे विधयः छंदसि विकल्प्यंत इति णेरनिटीति णिलोपाभावः॥ सु
पां सुलुगित्यमो लुक्‌। न लुमतेति प्रत्ययलक्षणनिषेधादुगिदचामिति न नुम्‌॥ एवं मंदयत्‌ शब्दोंतोदात्तः॥ मदयतींद्रं सखा सप्तमीति योगविभा २९
गात्समासः॥ तुल्यरूपे तुल्यार्थेति सप्तमी। पूर्वपदप्रकृतिस्वरत्वं॥ ॥अष्टमीमृचमाह॥ ॥अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः॥ प्रा
वो वाजेषु वाजिनं॥ हे शतक्रतो बहुकर्मयुक्तेंद्र त्वमस्य सोमस्य संबंधिनमंशं पीत्वा वृत्राणां वृत्रनामकासुरप्रमुखानां शत्रूणां घनोऽभवः॥

हंताभूः ततो वाजेषु संग्रामेषु वाजिनं संग्रामवंतं त्वं भक्तं प्रावः प्रकर्षेण रक्षितवानसि। अस्येति इदम्शब्देन प्रयोगसमये पुरोदेशस्थः सोमो निर्दिश्यते॥ न
तु पूर्वप्रकृतः सोमः परामृश्यते॥ अतो अन्वादेशत्वाभावे इदमोन्वादेशेशनुदात्तस्तृतीयादावित्यशादेशः। अतो न सर्वानुदात्तत्वं किंतु त्यदाद्यत्वे हलि लो
पे अकारः प्रातिपदिकस्वरेणांतोदात्त इति। अत्यंतोदात्तादित्यनुवृत्ता ऊडिदंपदाद्यप्पुम्रैद्युभ्य इति विभक्तिरुदात्ता प्राप्ता पिबतेः क्त्वाप्रत्यये घु
मास्थादिना ईत्वं॥ प्रत्ययस्वरेणांतोदात्तः॥ असामर्थ्यान्न परामंत्रितांगवद्भावः॥ घनः मूर्तौ घन इति हंतेर्धातोः काठिन्ये अप्प्रत्ययः॥ तदस्यास्ती
त्यर्श आदित्वादच्‌ ततश्चित्वादंतोदात्तः॥ वाजेषु वृषादित्वादाद्युदात्तः॥ वाजिन इति प्रत्ययस्वरः॥ ॥नवमीमृचमाह॥ ॥तं त्वा वाजेषु वाजिनं वाजयामः श
तक्रतो॥ धनानामिंद्र सातये॥ हे शतक्रतो बहुकर्मयुक्त यद्वा बहुप्रज्ञानयुक्तेंद्र धनानां सातये संभजनार्थं वाजेषु युद्धेषु वाजिनं बलवंतं त्वा पूर्वमंत्रो
क्तगुणयुक्तं त्वां वाजयामः॥ अन्नवंतं कुर्मः॥ रण इत्यादिषु षट्चत्वारिंशत्संग्रामनामसु पौंस्ये महाधने वाजे अज्म इति पठितं॥ अष्टाविंशतिसंख्या
केषु अन्ननामसु अंधः वाजः वाज इति पठितं॥ उरु तुविरित्यादिषु द्वादशसु बहुनामसु शतं सहस्रमिति पठितं॥ अपः अप्र इत्यादिषु षड्विंशतिसंख्याकेषु क
र्मनामसु शची क्रतुरिति पठितं॥ केतुः केत इत्यादिषु एकादशसु प्रज्ञानामसु क्रतुः असुरिति पठितं॥ त्वा अनुदात्तं सर्वमित्यनुवृत्तौ त्वामौ द्वितीयाया इति
त्वादेशः॥ वाजेषु वाज व्रज गतौ। वाजयति गमयति शूरान्‌ रणनिर्वाहमनेनेति वाजो बलमन्नं वा। ण्यंतात्करणे घञ्‌॥ तत्र ञित्स्वरस्यापवादेन कर्षात्वत इत्यं
तोदात्तत्वे प्राप्ते तस्याप्यपवादत्वेन वृषादीनां चेत्याद्युदात्तः॥ वाजयामः। वाजोस्यास्तीति वाजवान्‌ तं कुर्म इत्यर्थे तत्करोति तदाचष्ट इति णिच्‌। इष्ठव
णौ प्रातिपदिकस्येति तस्मिन्परत इष्ठवद्भावाद्विन्मतोर्लुगिति मतुपो लुक्‌॥ टेरित्यकारलोपः॥ णिचश्चित्वादंतोदात्तत्वं॥ लसार्वधातुकस्वरेणाख्या
तस्याप्यनुदात्तत्वं॥ पादादित्वान्निङ्‌ तिङ इति न निघातः॥ धनानां नविषयस्यानिसंतस्येत्याद्युदात्तः॥ सातये उदात्त इत्यनुवृत्तौ ऊतियूतिजूति
सातिहेतिकीर्तयश्चेति क्तिन्नुदात्तः॥ ॥दशमीमृचमाह॥ यो रायो३वनिर्महान्त्सुपारः सुन्वतः सखा॥ तस्मा इंद्राय गायत॥ य इंद्रो रायो धनस्य
वनिः रक्षकः स्वामी वा॥ तस्मा इंद्राय गायत॥ हे ऋत्विजस्तत्स्तुत्यर्थं स्तुतिं कुरुत॥ कीदृश इंद्रः। महान्‌ गुणैरधिकः॥ सुपारः सुष्ठु कर्मणः पूरयिता।
सुन्वतो यजमानस्य सखा सखिवत्प्रियः॥ रायः ऊडिदंपदाद्यप्पुम्रैद्युभ्य इति। विभक्तेरुदात्तत्वं॥ अवनिः। अव रक्षणगतिप्रीतितृप्त्यवगमप्रवे
शश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिंगनहिंसादानभागवृद्धिषु च॥ इत्यस्मादर्तिसृभृधृधृक्षिम्यश्यविभ्योनिरित्यनिः प्रत्ययः। प्रत्ययाद्यु
दात्तत्वं॥ सुपारः पॄ पालनपूरणयोरित्यस्माण्णिजंतात्कर्तरि अनुवृत्तौ पचाद्यच्‌॥ चित इत्यंतोदात्तः॥ सुन्वतः शतुरनुमो नद्यजादी इति विभक्तिरुदात्ता
। सखा समाने ख्यश्चोदात्त इति इण्प्रत्ययांतस्तत्संनियोगेन यलोपः॥ सखाशब्दस्य चोदात्तः॥ डित्वाट्टिलोपः॥ तस्मै अद्रिरित्यनुवृत्तौ स्त्यादियजितनि
भ्यो डिदिति तनोतेरदि प्रत्ययः। डित्वाट्टिलोपे प्रत्ययस्वरेण तदृशब्द उदात्तः त्यदाद्यत्वं॥ एकादेश उदात्तेनोदात्तः॥ सावेकाचस्तृतीयादिर्विभक्तिरि
ति विभक्तेरुदात्तत्वप्राप्तौ प्रथमैकवचने अवर्णांतत्वान्न गोश्वन्साववर्णेति निषेधः॥ इंद्राय इंद्रशब्दो रन्प्रत्ययांतो निपातितः॥ नित्वादुदा
त्तः॥ कर्मणा यमभिप्रैति स संप्रदानमित्यत्र क्रियाग्रहणं कर्तव्यमिति वचनाद्गानक्रियया प्राप्यत्वात्संप्रदानत्वेन चतुर्थी॥ ॥इति प्रथमस्य
प्रथमे अष्टमो वर्गः॥ ॥आ त्वेति दशर्चं सप्तमं सूक्तं॥ सुरूपकृत्नुं दशेत्यनुवृत्तावातु युंजंतीत्येतदनुक्रांतत्वात्‌॥ ऋषिछंदोदेवतादिनियो
गाः पूर्ववत्‌॥ विशेषविनियोगस्तु अतिरात्रे तृतीयपर्याये मैत्रावरुणशस्त्रे स्तोत्रियोयं तृचः। अतिरात्रे पर्यायाणामिति खंडे आत्वेता

49/1924

भा॰प्र॰ निर्धारितत्वात्कृतत्वात्॥ ॥तत्र प्रथमामृचमाह॥ आ त्वेता नि षीदतेंद्रमभि प्र गायत॥ सखायः स्तोमवाहसः॥ ॥तु शब्दः क्षिप्रार्थो निपातः॥ द्रा
२५. भ्यामाङ्भ्यामन्वेतुमित शब्दो भ्यसनीयः॥ हे सखायः ऋत्विजः तु क्षिप्रमस्मिन्कर्मण्यागच्छत॥ आ इत्यर्थोऽभ्यासः। आगत्य च निषीदत उप
विशत॥ उपविश्य चेंद्रमभि प्रगायत सर्वतः प्रकर्षेण स्तुत॥ कीदृशाः सखायः स्तोमवाहसः॥ त्रिवृत्पंचदशैकविंशादिस्तोमानस्मिन्क
र्मणि वहंति प्रापयंति॥ आ तु। आ निपातत्वादाद्युदात्तः॥ अत तु इण गतौ। ध्वावोतत्तिङः इति संहितायां दीर्घत्वं॥ निनिपातत्वादाद्युदात्तः सी
दत॥ पाघ्राध्मेत्यादिना सदेः सीदादेशः। सदिरप्रतेरिति संहितायां षत्वं॥ अभि॥ उपसर्गाश्चाभिवर्जमिति वचनात्त्वात्रातिपदिकांतोदात्तत्वं।
स्तोमवाहसः॥ आर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिणीभ्यो मन्निति स्तौतेर्मन्प्रत्ययांतः स्तोमशब्दो नित्वादाद्युदात्तः॥ स्तोमं वहंतीति
स्तोमवाहसः॥ वहिहाधाञ्भ्यश्छंदसीत्यसुन्प्रत्ययः॥ तत्र णिदित्यनुवृत्तेरत उपधाया इत्युपधाया वृद्धिः॥ कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते ग
तिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यौणादिकस्यासमास आद्युदात्तः॥ ॥द्वितीयामृचमाह॥ ॥पुरूतमं पुरूणामीशानं वार्याणां॥ इं
द्रं सोमे सचा सुते॥ ॥हे सखाय अभि प्रगायतेति पदद्वयमत्राप्यनुवर्तते॥ हे सखाय ऋत्विजः सचा युयं सर्वे संहत्य सचा परस्परसमवाये
न सुते अभिषुते सोमे प्रवृत्ते सति इंद्रमभिप्रगायत॥ कीदृशमिंद्रं॥ पुरूतमं॥ पुरून्बहून्शत्रून्तमयति ग्लापयतीति पुरूतमः। पुरूणां ब
हूनां वार्याणां वरणीयानां धनानां ईशानं स्वामिनं पुरूतमं तमु ग्लान इति धातोरंतर्भावितण्यर्थात्पचाद्यच्चिचित्वादंतोदात्ते पि कृदुत्तरपद
प्रकृतिस्वरं बाधित्वा परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं॥ पुरूणां॥ पृ पालनपूरणयोरित्यस्मात्पुरित्यरत्नोपृभिदिव्यधि
गृधिधृषिभ्यश्चेति कुप्रत्ययः कित्वाद्गुणनिषेधे उदोष्ठ्यपूर्वस्येत्युकारः। उरण्रपर इत्यरपरत्वे प्रत्ययस्वरेणांतोदात्तः। पुरुशब्दः॥ अतो मतुपि ह्रस्वा
दंतोदात्तात्पुरूतुड्भ्यामिदायरस्य नामो नामन्यतरस्यामित्यंतोदात्तत्वं॥ ईशानं ईश ऐश्वर्य इति धातोरनुदात्तेत्वात्परस्येशानश्चालसार्वधा
तुकानुदात्तत्वं॥ वार्याणां॥ वृञ संभक्ताविति स्मादृहलोर्ण्यदित्यत्र वृञिधोहिंदित्रः एव ग्रहणं न वृङः तित्स्वरितमिति प्रत्ययस्वरितं बाधित्वा ई
डवंदवृशंसदुहां ण्यत इति ण्यदंतस्याद्युदात्तत्वं॥ यतोनावइत्यत्र तु ण्यतो ग्रहणं न भवति॥ तस्य द्व्यनुबंधकत्वात्॥ एकानुबंधकग्रहणे
न द्व्यनुबंधकस्येति नियमात्॥ सचा॥ षच समवाये धात्वादेः षः सः॥ संपादित्वाद्भावे क्विबिति क्विप्॥ तृतीयैकवचनं॥ धातुस्वरेणाद्युदात्तः स
र्वविधयश्छंदसि विकल्प्यंत इति न्यायेन सावेकाच इति सूत्रेण प्रवर्तते॥ सचेत्यस्य निपातत्वपक्षेप्याद्युदात्तत्वं॥ ॥तृतीयामृचमा
ह॥ ॥स घा नो योग आ भुवत्स राये स पुरंध्यां॥ गमद्वाजेभिरा स नः॥ घशब्दोऽवधारणार्थो निपातः सर्वैरत्र शब्दैः संबध्यते॥ स घ एवेंद्रः
पूर्वोक्तगुणविशिष्टो नोऽस्माकं योगे पूर्वमप्राप्तस्य पुरुषार्थस्य संबंधे आ भुवत् आभवतु॥ पुरुषार्थं साधयत्वित्यर्थः॥ स एव राये धना
र्थं आ भुवत्॥ आ भवतु॥ स एव पुरंध्यां योषित्वा भुवत्॥ यद्वा बहुविधायां बुद्धावा भुवत्॥ पुरंधिर्बहुधीरिति यास्कः॥ स एव वाजेभिर्द्दिवैर
न्नैः सह नोऽस्मानागमदागच्छतु॥ घ चादयोऽनुदात्ता इत्यनुदात्तत्वं संहितायां ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणामिति दीर्घः योगे घञ्जि २५
त्वादाद्युदात्तत्वं॥ भुवत्॥ भवतेर्लङि लेट् परतो लिङ्थ्याशिष्यङित्यङ् प्रत्ययः तस्य ङित्त्वेन गुणाभावादुवङादेशः॥ कि द्वार्धा पीति या
सङ्भवति॥ अनित्यमागमशासनमिति वचनात्॥ तिङ्तिङ इति निघातः॥ उदिदंपदाद्यप्पुम्रैद्युभ्य इति राय इत्यस्य विभक्तेरुदात्तत्वं॥

पुरंध्यां। पुरंधिः पुरंधीः पृषोदरादित्वादुकारस्यन्तमिति वचनात्॥ तिङ्तिङ इति निघातः॥ अमादेशः इकारस्य ह्रस्वश्च॥ आद्युदात्तप्रकरणे दिवोदा
सादीनां छंदस्युपसंख्यानमित्याद्युदात्तत्वं॥ अथवा पुरं नारीरं धीयतेऽस्यामिति कर्मण्यधिकरणे चेति किप्रत्ययः॥ अदुकृ शांद्रसः॥ निम्नियस्या
निसंतस्येति पुरंशब्द आद्युदात्तः॥ दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं॥ गमत् गमेर्लेङ् उक्तिप॥ इतश्च लोपः परस्मैपदेष्विति कारलोपः॥ ब 51/1924
हुलं छंदसीति शपो लुक्॥ लेटोऽडाटाविति अडागमः॥ आगमा अनुदात्ता इति तस्यानुदात्तत्वे धातुस्वर एवशिष्यते॥ वाजेभिः इपादित्वादाद्युदात्तः॥ ॥
चतुर्थीमृचमाह॥ ॥यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः॥ तस्मा इंद्राय गायत॥ समत्सु युद्धेषु यस्य संस्थे युक्तौ हरी इंद्रस्याश्वौ शत्रवो न वृण्वते॥ न
संभजंते॥ रथमश्वौ च दृष्ट्वा पलायंत इत्यर्थः। तस्मा इंद्राय तत्संतोषार्थं हे ऋत्विजो गायत॥ स्तुतिं कुरुत। रण इत्यादिषु षट्चत्वारिंशत्सु संग्रामना
मसु समत्सु समरण इति पठितं॥ संस्थे सम्यक् तिष्ठंत्यस्मिन्निति संस्थारथः आतश्चोपसर्ग इति कप्रत्ययः॥ कृदुत्तरपदप्रकृतिस्वरत्वं॥ वृण्वते॥ प्रत्ययस्व
रेणाकार उदात्तः॥ सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः॥ तिङ्तिङ इति निघातो न भवति॥ यद्वृत्तान्नित्यमिति प्रतिषेधात्संचमीनिर्देशे
व्यवव्यवहितेपि कार्यमिष्यते॥ हरतेरश्वामिति हरी अश्वौ। इन्नित्यनुवृत्तौ। हृपिषिरुहियुत्तिविदिछिदिकीर्तिभ्यश्चेतीन्प्रत्ययः॥ नित्वादाद्यु
दात्तत्वं॥ शत्रवः शातिः सौत्रो धातुर्हिंसार्थः। रुशातिभ्यां क्रुन्॥ नित्वादाद्युदात्तत्वं॥ तस्मै सावेकाच इति विभक्तेरुदात्तस्य न गोश्वन्साववर्णेति प्र
तिषेधात्प्रातिपदिकस्वर एव॥ ॥पंचमीमृचमाह॥ ॥सुतपाव्ने सुता इमे शुचयो यंति वीतये॥ सोमासो दध्याशिरः॥ इमे सोमासः अस्मिन्कर्म
णि संपादिताः सोमाः। सुतपाव्ने अभिषुतसोमस्य पानकर्त्रे यस्मै इंद्राय तदर्थं॥ तस्य पातुं वीतये भक्षणार्थं यंति तमेव प्राप्नुवंति॥ कीदृशाः सोमाः सुताः अ
भिषुताः॥ शुचयः दशापवित्रेण शोधितत्वाच्छुद्धाः॥ दध्याशिरः अवनीयमाने दधि आशीर्दीपघातकं येषां सोमानां दध्याशिरः॥ सुतपाव्ने सुतं पिबतीति सु ...
तपा आतो मनिन्क्वनिब्वनिपश्च इति वनिप्॥ पितादनुदात्तस्वर एव शिष्यते॥ समासे द्वितीयापूर्वपदप्रकृतिस्वरं बाधित्वा कृदुत्तरपदप्रकृतिस्वरत्वं॥ शुचयः शुचिर् पूतीभावे इन्नित्यनुवृत्तौ इगुपधात् यः॥५च
किदितीनः कित्वाद्गुणाभावः नित्वादाद्युदात्तत्वं॥ वीतये वी गतिप्रजनकांत्यसनखादनेष्वित्यस्मान्मंत्रे वृषेषपचमनविदभूवीरा उदात्त इति क्ति
न्नुदात्तः॥ सोमासः षुञ् अभिषवे अर्तिस्तुसुहुसृधृक्षीत्यादिना मन्॥ नित्वादाद्युदात्तः॥ आज्जसेरसुगित्यसुगागमः॥ दध्याशिरः। दधाति पुष्णाती
ति दधि डुधाञ् धारणपोषणयोः॥ आदृगमहनजनः किकिनौ लिट् चेति किन् लिड्वद्भावाद्द्विर्भावः॥ कित्वादाकारलोपः। नित्वादाद्युदात्तत्वं श्रुतिंसायां॥
श्रयणाविहिनस्ति सोमे श्रवनीयमानं सत् सोमस्य स्वाभाविकं रसं कृतीयपलप्रपुक्तं नीरसं दोषं वेत्याशीः॥ क्विपि कृते रद्धा तोरिति शिंपरत्वे च दध्येवआ
शीर्येषां सोमानां ते दध्याशिरः॥ बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥इति प्रथमस्य प्रथमे नवमो वर्गः॥ ॥आ त्वेतिसृक्ते षष्ठीमृचमाह॥ त्वं सुत
स्य पीतये सद्यो वृद्धो अजायथाः॥ इंद्र ज्यैष्ठ्याय सुक्रतो॥ सुक्रतो शोभनकर्मन् शोभनप्रज्ञा वा। हे इंद्र त्वं सुतस्याभिषुतस्य सोमस्य पीतये पाना
र्थं ज्यैष्ठ्याय देवेषु श्रेष्ठत्वार्थं च सद्यस्तस्मिन्नेव क्षणे वृद्धो अजायथाः॥ अभिवृद्धोत्साहेन युक्तोऽभूः पीतये पापाने इत्यस्मात् स्थागापाप
चो भाव इति क्तिन् स्थामास्येत्यादिना ईत्वं॥ तस्य नित्त्वेपि व्यत्ययेन प्रत्ययो दात्तत्वं॥ उत्तरसूत्रगतमुदात्तपदमत्रापि वा योजनीयं॥ सद्यः सद्यः
परुपरारीति सूत्रेण समाने हनीत्यर्थे समानस्य सभावो द्यश्च प्रत्ययो निपात्यते॥ प्रत्ययस्वरेणोदात्तः वृद्धः वृधु वृद्धौ उदितो वेति क्त्वा प्रत्यये
इडविकल्पितत्वाद्यस्य विभाषेति निषेधान्मिट्प्रतिषेधः। प्रत्ययः स्वरेणोदात्तः॥ ज्येष्ठाय ज्येष्ठस्य भावो ज्यैष्ठ्यं गुणवचनब्राह्मणादिभ्यः

भा॰ प्र॰
२६

कर्मणि चेति ष्यञ् नित्वादाद्युदात्तः॥ ॥सप्तमीमृचमाह॥ आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः॥ शं ते सन्तु प्रचेतसे॥ ॥हे इन्द्र त्वां सोमासः सो
मा आविशन्तु। आभिमुख्येन प्रविशन्तु॥ कीदृशाः सोमाः आशवः सवनत्रये प्रकृतित्वेन व्याप्तिमन्तः॥ कीदृशेन्द्र गिर्वणः गीर्भिः स्तुतिभिः
संभजनीय देवविशेष गिर्वणो देवो भवति गीर्भिरेनं वनयन्तीति यास्कः तथाविध हे इन्द्र ते तव प्रचेतसे प्रकृष्टज्ञानाय सन्तोषकरस्वरूपाः सोमाः शं सन्तु
गिर्वणः गृणन्तीति गिरः। स्तुतयः। गृ शब्दे क्विप् ऋत इद्धातोरितीत्वं रपरत्वं च॥ गीर्भिर्वन्यते संभज्यते इति गिर्वणः वन षण संभक्तौ। संभक्तिः से
वा। सर्वधातुभ्योऽसुन्नित्यसुन्प्रत्ययः॥ प्रचेतसे बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥अष्टमीमृचमाह॥ ॥त्वां स्तोमा अवीवृधन्त्वामुक्था श
तक्रतो। त्वां वर्धन्तु नो गिरः॥ हे शतक्रतो बहुकर्मन् बहुप्रज्ञ वेन्द्र त्वां स्तोमाः सामगानां स्तोत्राणि अवीवृधन् वर्धितवन्ति॥ यथा बहृचानामुक्
थाः शस्त्राणि त्वामवीवृधन् यस्मात्पूर्वमेवमासीत् तस्मादिदानीमपि नोऽस्माकं गिरः स्तुतयस्त्वां वर्धन्तु वर्धयन्तु अतिशयं कुर्वन्तु॥ स्तोमा मनो नि
त्वादाद्युदात्तः॥ अवीवृधन् वृधु वृद्धौ ण्यन्तात् लुङि चङि रूपं उपधाया ऋकारस्य ऋकारविधानादिन्तं रं गोपि गुणो बाध्यते द्विर्भावहः
लादिशेष सन्वद्भावे दीर्घत्वादाडागमः॥ उक्थं उक्थानि पातृतुदिवचिरिचिसिचिभ्यः स्थगिति वचेः थक्प्रत्ययः। तस्य कित्वात्संप्रसारणं। सेश्छं
दसि बहुलमिति सिल्लोपः॥ न लोपश्च प्रत्ययस्वरेणान्तोदात्तः॥ असामर्थ्यादामन्त्रितपरस्यापि न पराङ्गवद्भाव इति नानुदात्तत्वं॥ वर्धन्तु अन्तर्भावि
तण्यर्थात् वृधेर्व्यत्ययेन परस्मैपदं॥ ॥नवमीमृचमाह॥ ॥अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणं॥ यस्मिन्विश्वानि पौंस्या॥ इन्द्रः इ
मं वाजं सोमरूपमन्नं सनेत् संभजतां। कीदृश इन्द्रः। अक्षितोतिः आहिंसितरक्षणः कदाचिदपि रक्षां न विमुञ्चतीत्यर्थः॥ कीदृशं वाजं सहस्रिणं प्र
शस्तो वरतिषु वर्तमानत्वेन सहस्रसंख्यायुक्तं॥ यस्मिन् वाजे विश्वानि सर्वाणि पौंस्या पौंस्यानि पुंस्त्वानि बलानि वर्तन्ते॥ तादृशं वाजमिति पूर्वत्रा
न्वयः। अक्षितोतिः। ननु क्षय इत्ययं धातुरकर्मकः॥ तस्य चकर्माभावादधिकरणे भावे कर्तरि वा क्तप्रत्ययेन भवितव्यं तद्दिह यदि कर्तर्यधि
करणे वा स्यात्॥ तदा तयोरर्थयोर्न्यूनप्रत्ययस्याविधानात् क्षियः इत्यनुवृत्तौ निष्ठायामण्यदर्थे इति दीर्घेण भवितव्यं॥ तथा च क्षियो दीर्घादि
ति निष्ठानत्वे अक्षीणोति स्यात्॥ न त्वक्षितोति। अथ नपुंसके भावे क्त इति भावपरः॥ क्षितशब्दो गृह्यते॥ तदास्ये तेण्यदर्थत्वेनाण्यदर्थे इति
निषेधाद्दीर्घत्वयोरभावात् क्षितमिति सिध्यति॥ तदानुनञ्तत्पुरुषः प्रकृते नान्वेतीति न विद्यते क्षितमत्रेति बहुव्रीहिणैव भवितव्यं॥ तथा च
नञ्सुभ्यामिति उत्तरपदान्तोदात्तत्वं स्यात्॥ पुनरूतिशब्देन बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव स्वरः स्थितो दित्यभिमतमाद्युदात्तत्वं न सिध्ये
त् यदि। सत्यं। अत एवात्र क्षिधातुरन्तर्भावितण्यर्थो गृह्यते तेन सकर्मकत्वात्कर्मण्येवात्र निष्ठा ततश्चाण्यदर्थे इति निषेधाद्दीर्घो न त्वानत्वं च
न भविष्यति तथा च नञ्तत्पुरुषेण क्षिता अक्षिता अक्षयितेत्यर्थः॥ तत्र चाव्ययपूर्वपदप्रकृतिस्वरत्वेन नञ उदात्तत्वं पुनरूतिपदेन बहुव्रीहौ स
एव स्वरः स्थास्यतीति न कोपि दोषः॥ क्षिणोति रिक्तिशिदाम्नात्रा द्वाहिंसायां इति क्षिणोतेर्हिंसार्थस्य वा कर्मणि निष्ठा॥ तथा चाहिंसितोतिरित्यर्थे उक्तक्रमे
ण स्वरः सिध्यतीति न दोषः॥ सनेत्। वन षण संभक्तौ भौवादिकः॥ वाजं रपादित्वादाद्युदात्तः॥ इन्द्रः रतोनित्वादाद्युदात्तः॥ सहस्रिणं। सहस्रः २६
त स्यास्ति। अत इनिठनौ॥ प्रत्ययः। विश्वानि। विशेः क्वनि नित्वादाद्युदात्तः॥ पुंसः कर्माणि पौंस्यानि ब्राह्मणादेराकृतिगणत्वाद्गुणवचनब्राह्मणा
दिभ्यः कर्मणि चेति ष्यञ् नित्वादाद्युदात्तः। प्रथमा बहुवचनस्य शेश्छन्दसि बहुलमित्यादिना शेः॥ ननु स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादित्यनेन धान्या

नां भवने क्षेत्रे खञित्येतस्मिन्नर्थे तेषां पत्यार्थे पुनः स्नञो विधानात् यथा पुंसोपत्यं पौंस्नः पुंस आगतः पौंस्नः इत्यादि तद्वत् पुंसो भावः कर्म वेत्यस्मि
न्नप्यर्थे स्नञ् बाधित्वा पौंस्नानीत्येव भवितव्यं॥ कथमुच्यते पौंस्यानीति। उच्यते॥ आ च त्वादिति सूत्रे त्वादित्यवधिनिर्देशाद्ब्राह्मणस्त्व इत्येतस्मिन्नर्थे तेऽरम
नित्वादिभिः प्रत्ययैः सह त्वतलोः समावेशः एवं तत्रैव चशब्दाद्ब्रह्मनञ्स्नञोरपि ष्यञादिभिः समावेश एव न बाध्यबाधकभावः॥ ॥दशमीमृच
माह॥ मानो मर्ता अभि द्रुहन्तनूनामिन्द्र गिर्वणः॥ ईशानो यवया वधं॥ ॥हे गिर्वण इन्द्र मर्ता विरोधिनो मनुष्या नोऽस्मदीयानां तनूनां शरी
राणामभिद्रुहन्। अभितो द्रोहं मा कुर्युः। ईशानः समर्थस्त्वं वधं वैरिभिः संपाद्यमानं यवय अस्मत्तः पृथक् कुरु। मनुष्या इत्यादिषु पञ्चविंशति
संख्याकेषु मनुष्यनामसु मर्ता व्राता इति पठितं॥ मर्ताः असिहसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्निति तन्॥ नित्वादाद्युदात्तः॥ अभिद्रु
हन्। द्रुहन्। द्रुह जिघांसायां लिङर्थे लेडिति प्रार्थनायां लेट्॥ तस्याडागमः। इतश्च लोपः परस्मैपदेष्विति इकारलोपः। श्नपो लुक्॥
सार्वधातुकमपिदिति ङित्त्वात् लघूपधगुणाभावः तनूनां। असामर्थ्यान्न पराङ्गवद्भावः। इन्द्र गिर्वणः गतं। ईशानः धातोरनुदात्तत्वाच्छपो लुकि
लसार्वधातुकत्वादनुदात्तत्वे धातुस्वर एव शिष्यते॥ यवय। यौतेर्णिचि संज्ञापूर्वको विधिरनित्य इति वृद्धिर्न क्रियते॥ अथवा यौतीति यवः। पचा
द्यच्। यवं करोतीत्यर्थे तत्करोति तदाचष्ट इति णिच्॥ इष्ठवद्भावादिति टिलोपः। तस्य स्थानिवद्भावात् वृद्ध्यभावः। वधं। हनश्च वध इति भावे अप्
तत्संनियोगशिष्टः वधादेशः स्थानिवद्भावेन संनियोगेनान्तोदात्तो वधादेशः। उदात्तनिवृत्तिस्वरेणाप उदात्तत्वम्॥ ॥इति प्रथमस्य प्रथमे दशमो वर्गः
॥ ॥सुरूपकृत्नुमित्यादिषु षट्सूक्तेषु तृतीयस्य युञ्जन्तीति सूक्तस्य मन्त्रसंख्या ऋषिच्छन्दोदेवता विनियोगश्चेत्येते पूर्ववदवगन्तव्याः॥ दशर्चे तस्मिन्
सूक्तेऽन्यास्तिस्रोऽतिमाचेत्येष्वाश्च तस्य ऐन्द्र्यः आदहेत्येतां चतुर्थीमारभ्य षड्ऋचो मारुत्यः॥ तासु मध्ये वीळु चिदारुजत्नुभिरित्येते द्वे ऋचौ मारुत्यौ सत्या
वेन्द्रावपि भवतः। तदेतत्सर्वमनुक्रमणिकायामुक्तं॥ सुरूपकृत्नुं द्वे आद्यन्तयोः युञ्जन्त्या दशेत्येताः षण्मारुत्यो वीळु चिदित्यैन्द्र्यौ चेति॥ एत
स्मिन् सूक्ते युञ्जन्तीत्येषा तृचस्तृतीये रात्रिपर्याये ब्राह्मणाच्छंसिनोऽनुरूपः॥ तथा चातिरात्रे पर्यायाणामिति खण्डे योगे योगे तवस्तरं युञ्जन्ति ब्रध्न
मरुषमिति सूत्रितं॥ ॥तत्र प्रथमामृचमाह॥ ॥युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः॥ रोचन्ते रोचना दिवि॥ ॥इन्द्रो हि परमैश्वर्ययुक्तः पर
मैश्वर्यं चाग्निवाय्वादित्यनक्षत्ररूपेणावस्थानादुपपद्यते॥ ब्रध्नमादित्यरूपेणावस्थितं॥ अरुषं हिंसकरहिताग्निरूपेणावस्थितं॥ चरन्तं वा
युरूपेणावस्थितं चरन्तं वायुरूपेण सर्वतः प्रसरन्तमिमिन्द्रं परितस्थुषः परितो वस्थिताः लोकत्रयवर्तिनः प्राणिनो युञ्जन्ति स्वकीये कर्मणि देवता
त्वेन संबंधं कुर्वते॥ तस्यैवेन्द्रस्य मूर्तिविशेषभूता रोचना नक्षत्राणि दिवि द्युलोके रोचन्ते प्रकाशन्ते॥ अस्य मन्त्रस्योक्तार्थपरत्वं ब्राह्मणान्तरेण
ख्यातं। युञ्जन्ति ब्रध्नमित्याह। असौ वा आदित्यो ब्रध्नः। आदित्यमेवास्मै युनक्ति। अरुषमित्याह। अग्निर्वा अरुषः। अग्निमेवास्मै युनक्ति। चर
न्तमित्याह। वायुर्वै चरन्। वायुमेवास्मै युनक्ति। परितस्थुष इत्याह। इमे वै लोकाः परितस्थुषः। इमानेवास्मै लोकान् युनक्ति। रोचन्ते रोचना दिवीत्याह।
नक्षत्राणि वै रोचना दिवि। नक्षत्राण्येवास्मै रोचयन्तीति॥ पञ्चविंशतिसंख्याकेषु महन्नामसु महत् ब्रध्न इति पठितं॥ आदित्यस्यापि महत्त्वादेव
ब्रध्नत्वं॥ युञ्जन्ति। अन्तः प्रत्ययस्वरेणाद्युदात्तत्वं। ब्रध्नं प्रातिपदिकान्तोदात्तः॥ अरुषं। उपरुषरिषहिंसार्थाः॥ रोषन्तीति रुषः॥ हिंसकाः। इगुप
धज्ञाप्रीकिरः कः प्रत्ययस्वरेणान्तोदात्तः। न सन्ति रुषा यस्यासावरुषः॥ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं। अभिपूर्वत्रतिपूर्वरूपेकादेश उदात्ते

53
1924

नोदात्त इत्युदात्तत्वं ॥ चरंतं । शपः पित्वादनुदात्तत्वं शतुश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते ॥ तस्थुषः । तिष्ठतेर्लिटः क्वसुरादेशः ॥ वस्वे
भा॰ प्र॰ काजाद्घसामितीटमंतरंगमपि बाधित्वा संप्रसारणाश्रयं च बली यदुनिना सिपरतो भत्वाद्वसोः संप्रसारणं परपूर्वत्वं ॥ आदेशप्रत्यययोरिति
षत्वं । वसो प्रत्ययस्वरेण उदात्तत्वं ॥ रोचंते । तिङ्ङल सार्वधातुकानुदात्तत्वं । शपः पित्वादनुदात्तत्वं धातुस्वरः । रोचना अनुदात्तेतश्च हलादे
२७ रितियुच् ॥ युवोरनाकावित्यनादेशः । चित इत्यंतोदात्तत्वं । दिवि । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं ॥ ॥ द्वितीयामृचमाह ॥ ॥ युंजंत्यस्य
काम्या हरी विपक्षसा रथे ॥ शोणा धृष्णू नृवाहसा ॥ अस्य अधादिरूपप्रतिपाद्यस्यादित्यादिमूर्तिभिरवस्थितस्येंद्रस्य रथे हरी ए
तन्नामानौ द्वौ सारथयो युंजंति । इंद्रसंबंधिनोः अश्वयोर्हरिनामत्वं ॥ हरी इंद्रस्य । रोहितोग्नेरिति पठितत्वात् ॥ कीदृशौ हरी ॥ काम्या काम
यितव्यौ । विपक्षसा विविधे पक्षसी रथस्य पार्श्वौ ययोरश्वयोस्तौ विपक्षसौ रथस्य द्वयोः पार्श्वयोर्योजितावित्यर्थः । शोणा रक्तवर्णौ ।
धृष्णू प्रगल्भौ नृवाहसा नृणां पुरुषाणामिंद्रतत्सारथिप्रमुखानां वोढारौ । अस्य च इमित्यन्तस्य परामर्शादिदमोन्वादेशेशनुदात्त इत्यती
यादादेशः ॥ त्रितावत्सर्वादेशोनुदात्तः ॥ विभक्तिरनुदात्ते वेति सर्वानुदात्तत्वं ॥ काम्या । कमु कांतौ कर्मणि ङुः ॥ कामयतेरचो यत् ॥ तित्स्वरिताप
वादत्वेन यतोनाव इत्याद्युदात्तत्वं । सुपां सुलुगिति द्विवचनस्य डादेशः ॥ हरतो रथमिति हरी ॥ हृपिषीत्यादिना इन् ॥ नित्वादाद्युदात्तः ॥ विप
क्षसा पचिविचिभ्यां सुड्चेति । पचेरसुन् सुडागमः ॥ विभक्ते पक्षसी पार्श्वौ ययोस्तौ । विशब्दो निपातत्वादुदात्तः ॥ पूर्वपदप्रकृतिस्वर एव शि
ष्यते ॥ द्विवचनस्य डादेशः ॥ रथे रमंतेस्मिन्निति रथः । रमु क्रीडायां हनिकुषिनीरमिकाशिभ्यः क्थन्निति क्थन् । नित्वादनुदात्तोपदेशेत्यादिना मकारलो
पः ॥ निःस्वरेणाद्युदात्तः ॥ शोणा शोण वर्णगत्योः गमनकरणत्वात् करणे घञ् ञित्वादाद्युदात्तः सुपां सुलुगिति डादेशः ॥ धृष्णू ञिधृषा प्राग
ल्भ्ये त्रसिगृधिधृषिक्षिपेः क्नुः ॥ कित्वाद्गुणाभावः । प्रत्ययस्वरः ॥ नृवाहसा । नॄन्वहंतीति वहेर्वहिहाधाञ्भ्यश्छंदसीत्यसुन् णिदित्यनुवृत्ते
र्वृद्धिः ॥ नित्वादाद्युदात्तः ॥ कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते ॥ ॥ तृतीयामृचमाह ॥ ॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ॥ समुष
द्भिरजायथाः ॥ हे मर्या मनुष्या इदमाश्चर्यं पश्यतेत्यध्याहारः ॥ किमाश्चर्यमिति तदुच्यते । आदित्यरूपोयमिंद्रः उषद्भिर्दाहकैः रश्मिभिः प्रति
दिनमुषः काले संभूयाजायथाः उदपद्यत ॥ अथवा सूर्यस्यैवात्मनो मर्येरमणमुपचर्यं व्यत्ययेन बहुवचनं कृत्वा संबोधनं क्रियते । हे मर्य
प्रतिदिनं त्वमजायथा इति योज्यं ॥ किं कुर्वन् अकेतवे रात्रौ निद्राभिभूतत्वेन प्रज्ञानरहिताय प्राणिने केतुं कृण्वन् प्रातः प्रज्ञानं कुर्वन् ॥ अपेश
से रात्रावंधकारावृतत्वेनानभिव्यक्तत्वाद्रूपरहिताय पदार्थाय प्रातरंधकारनिवारणेन पेशो रूपमभिव्यक्तमानं कुर्वन् ॥ पेश इति रूपनाम
पिंशतेरिति यास्कः । अकेतवे पेशस इति चतुर्थ्यौ षष्ठ्यर्थे द्रष्टव्ये । केतुं प्रातिपदिकस्वरः । कृण्वन् कृवि हिंसाकरणयोश्च ॥ लटः शत्रादेशः ।
इदितो नुम्धातोरिति नुमागमः । कर्तरि शपि प्राप्ते धिन्विकृण्व्योरच्चेति ॥ उप्रत्ययः ॥ तत्संनियोगेन च वकारस्य चाकारः ॥ अतो लोप इत्यकारलो
पः ॥ तस्य स्थानिवद्भावात् पूर्वस्य लघूपधगुणो न भवति ॥ अकारस्य प्रत्ययस्वरेणोदात्तत्वं ॥ अकेतवे । बहुव्रीहौ । नञ्सुभ्यामित्युत्तरपदांतो
दात्तत्वं ॥ पेशः । नब्विषयस्यानिसंतस्येत्याद्युदात्तः ॥ मर्याः । छंदसि निष्टर्क्येत्यादौ ध्रियतेर्निपातः ॥ आमंत्रितनिघातः ॥ असामर्थ्यात्पूर्वस्य २७
न पराङ्गवद्भावः ॥ अपेशसे । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥ संनिपातश्चाद्युदात्तः ॥ उषद्भिः उष प्लुष दाहे लटः रश्मिभिः ॥ लटः शत्रा
देशः । शपि प्राप्ते व्यत्ययेन शः सार्वधातुकमपिदिति तस्य ङित्वात् लघूपधगुणो न भवति । शतुः प्रत्ययस्वरेणोदात्तत्वं । उपरिष्टात्तुरद

पदेशाल्लसार्वधातुकमित्युदात्तत्वं ॥ एकादेश उदात्तेनोदात्तः ॥ अजायथाः ॥ अजायतेत्यर्थे पुरुषव्यत्ययेन निघातः ॥ ॥ चतुर्थीमृचमाह ॥ आद
ह स्वधामनु पुनर्गर्भत्वमेरिरे ॥ दधाना नाम यज्ञियं ॥ अत्राग्निविशेषविनियोगः ॥ चतुर्विंशेहनि प्रातःसवने ब्राह्मणाच्छंसिशस्त्रे आदह
स्वधामन्विति द्वैकर्चो इंद्रेण सं हि दृक्षसे इत्येका अर्धर्चश्च षड्ढ स्तोत्रियसंज्ञकः । तथा च सूत्रितं । चतुर्विंशे होता जनिष्टेति खंडे ॥ इंद्रेण सं हि दृक्षस
आदह स्वधामन्विलेकाइचेति ॥ यद्यप्येतदैंद्रं सूक्तं ॥ तथाप्यादहेत्यादिषु तृचेषु मरुतो वर्ण्यंते ॥ प्रायेणेंद्रे मरुत इत्यनुक्रमणिकायामुक्तत्वात् ॥
आदित्यानंतर्यार्थे निपातः ॥ अह इत्यवधारणार्थः ॥ आ दहदर्पतोरनंतरमेव स्वधामनु नः परं जनिष्यमाणमन्नमुदकं वानुलक्ष्य मरुतो देवा
गर्भत्वमेरिरे ॥ मेघमध्ये जलस्य गर्भाकारं प्रेरितवंतः ॥ जलस्य वर्तारं पर्जन्यं प्रेरितवंतः प्रतिसंवत्सरमेवं कुर्वतीति द्रष्टव्यं तु पुनः शब्दः प्रयुक्तः ॥
कीदृशा मरुतः ॥ यज्ञियं यज्ञार्हं नाम दधानाः धारयंतः ॥ सप्तसु गणेषु मरुतामीदृक्च अन्यादृक्चेत्यादीनि यज्ञयोग्यानि नामान्याम्नातानि ॥ अं
ध इत्यादिषु षड्विंशति संख्याकेषु अन्ननामसु रसः स्वधेति पठितं ॥ अर्ण इत्यादिषु एकशतसंख्याकेषु उदकनामसु तेजः स्वधा अक्षरमिति पठितं ॥
आत् अह निपातावाद्युदात्तौ ॥ स्वधां स्वं लोकं दधाति पुष्णातीति स्वधा ॥ आतोनुपसर्गे कः ॥ कृदुत्तरपदप्रकृतिस्वरत्वं ॥ अनु पुनः शब्दौ निपातावाद्यु
दात्तौ ॥ गर्भस्य भावो गर्भत्वं प्रत्ययस्वरः ॥ एरिरे अंतर्भावितण्यर्थादीर गतावित्यस्मादनुदात्तेतः ॥ परस्य लिटो झस्य इरेच् चित्वादंतोदात्तः ॥ सहसु
पेत्यत्र सुपेति योगविभागात् सह इति सुप्सुपेति समासे समासस्येत्यंतोदात्तत्वं ॥ इत्यादेश्च गुरुमतोनृच्छ इति आम् न भवति । मंत्रत्वात् । अहशब्द
योगान्निघाताभावः ॥ तुपश्य पश्यताहैः पूजायामिति निषेधात् । दधानाः श्लानच् श्लित्वादंतोदात्तत्वे प्राप्ते अभ्यस्तानामादिरित्याद्युदा
त्तत्वं ॥ यज्ञमर्हतीति यज्ञियं ॥ यज्ञर्त्विग्भ्यां घखञाविति घप्रत्ययः ॥ आयनेयीनीयियः फढखछघां प्रत्ययादीनामिति इयादेशः ॥ प्रत्ययस्वरेण
इकार उदात्तः ॥ ॥ पंचमीमृचमाह ॥ ॥ वीळु चिदारुजत्नुभिर्गुहा चिदिंद्र वह्निभिः ॥ अविंद उस्रिया अनु ॥ अत्र किंचिदुपाख्यानं पणिभि
र्देवलोकाद्गावो पहृता अंधकारे प्रक्षिप्ताः ॥ ताश्चेंद्रो मरुद्भिः सहाजयदिति । एतच्चानुक्रमणिकायां सूत्रितं ॥ पणिभिरसुरैर्निगूढा गा अन्वेष्टुं
सरमां देवशुनीमिंद्रेण प्रहितामसुरभिः पणयो मित्रीयंतः प्रोचुरिति । मंत्रांतरे च दृष्टांतं तत्र सूचितं ॥ निरधा आपः पणिने व गाव इति तद्
तदुपाख्यानमभिप्रेत्योच्यते ॥ हे इंद्र वीळु चित् दृढमपि दुर्गमस्थानं आरुजत्नुभिर्भंजद्भिः वह्निभिर्वोढृभिः स्थैर्येनेतुं समर्थैर्मरुद्भिः सहित
स्त्वं गुहाचित् ॥ गुहायामपि स्थापिता उस्रिया गाः अन्वविंदः अन्विष्य लब्धवानसि ॥ ओजः पाजः इत्यादिषु अष्टाविंशति संख्याकेषु बलनामसु
दृक्षः वीळु च्यौत्नमिति पठितं ॥ नव संख्याकेषु गोनामसु उस्रिया उस्रा उस्रिया इति पठितं ॥ वीळु प्रातिपदिकस्वरः ॥ चित् निपातादिरनुदात्तः ॥ आर
जत्नुभिः रुजो भंगे इत्यौणादिकः क्नुच् प्रत्ययः ॥ कित्वाद्गुणाभावः ॥ चित्वादंतोदात्तत्वं ॥ समासे कृदुत्तरपदप्रकृतिस्वरत्वं ॥ गुहा । सप्तम्या डादेशः । यामा
दीनां चेत्याद्युदात्तः ॥ वह्निभिः वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् इति वहेर्निप्रत्ययः ॥ नित्वादाद्युदात्तः ॥ अविंदः शे मुचादीनामिति नुमागमः ॥ लुङ्
लङ्लृङ्क्ष्वडुदात्तः ॥ वसंतीत्युस्रियाः वसेः कर्तरि रक् प्रत्ययः ॥ तत्र भावश्छंदसि बहुलं कादृहतीयः ॥ उ ऊं हि ॥ यत्न पदार्थविशेषः सुस्थं प्र
त्ययस्तः प्रत्ययश्च तद्धितत्वादि ॥ इकारः प्रत्ययस्वरेणोदात्तः ॥ ॥ इति प्रथमस्य प्रथमे एकादशो वर्गः ॥ युंजंतीति सूक्ते षष्ठीमृचमाह ॥ ॥
देवयंतो यथा मतिमच्छा विदद्वसुं गिरः ॥ महामनूषत श्रुतं ॥ देवयंतः मरुतस्तं कामयमानाः गिरः स्तोतारः ऋत्विजः महा प्रौढं मरुद्गण

55/1924

मघ्रप्रानुमनूपवलस्कृत वंतः॥ कीदृशं मरुद्गणं विदद्वसुं वेदस्य धनस्य महिम प्रख्यापकैः वसुभिर्धनैर्युक्तं श्रुतं विख्यातं॥ मरुद्गणस्य दृष्टांतः। यथा मति
आश्व॰ १॰ मंतारमिंद्रं यथा स्तुवंति तद्वदित्यर्थः। देवयंतः देवानात्मन इच्छंतः सुप आत्मनः क्यच्॥ क्यचि चेतीत्वं॥ अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घत्वं न
भवति। न छंदस्य पुत्रस्येत्यनेन क्यचि परत आत्ममीत्वं दीर्घत्वं वा तस्य सर्वस्य प्रतिषेधात्॥ यद्यपीत्वमेव प्रकृतं तथापि स्वविहितस्यापि दीर्घत्वस्य
२८ सप्रतिषेध इति विज्ञायते। अश्वायंत इत्यादावश्वाघस्यात्वविधानादिति स्कंदः॥ क्यजंताच्छतृप्रत्ययः क्यचश्चित्त्वाच्चित इत्यंतोदात्तत्वं। शपः
पित्वेन अनुदात्तत्वे सार्वधातुकस्वरेणानुदात्तत्वे एकादेश उदात्तेनोदात्त इत्येकादेशः यथा॥ मकारवकारेन याति॥ क्विप्रतिप्रत्ययात्पूर्वमुदात्तत्वं॥ मतिम्
त्रेश्येषपन्चमनेत्यादिनाक्तिन्नुदात्तः मतिशब्दोत्र ज्ञानपरोप्युपचारात् ज्ञातरीद्रे वर्तते॥ अथवा पदांतरविशेष्यानुपादानादिंद्रस्यैवैषा संज्ञा न
तःश्चक्तिचक्रोच संज्ञायामिति मन्यतेः कर्तरि क्तिन्। तस्याप्रत्ययेनानुदात्तत्वादिष्टप्रतिषेधः॥ चितादंतोदात्तत्वं॥ अच्छ अभ्याप्तुं गत्यर्थयोगादच्छ
गत्यर्थवदेषुचेति गतिसंज्ञायां सत्यां निपातसंज्ञाया अपि समावेशान्निपाता आद्युदात्ता इत्याद्युदात्तत्वं॥ विदद्वसुं विदद्ज्ञानं इत्यस्मादंतर्भावितण्य
र्थाच्छतृप्रत्ययविदंतोदात्ततया यवत्तयाज्ञापयति। वसूनि धनानि यं स विदद्वसुः। विदेः शतुर्वसुरिति अदिप्रभृतिभ्यः शपः लुकि प्रत्ययस्व
रेणांतोदात्तत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेवावशिष्यते॥ गृणंति स्तुवंतीति गिरः गृणातेः क्विपि कृत इत्त्वादीर्घत्वं॥ धातुस्वरेणोदात्त
त्वं॥ महांमहांतं नवकारतकारयोर्लोपश्छांदसः॥ प्रातिपदिकस्वरेणोदात्तत्वं॥ अनूषत णु स्तुतौ व्यत्ययेनात्मनेपदं॥ लुङि च्लेः सिजादेशः॥
सिचि कुटादित्वेन ङित्त्वाद्गुणाभावः॥ श्रुतं प्रत्ययस्वरः॥ ॥सप्तमीमृचमाह॥ इंद्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा॥ मंदू समानवर्चसा॥
॥ ॥हे मरुद्गण त्वं इंद्रेण संजग्मानः संगच्छमानः संदृक्षसे हि समक् दृश्यथाः खलु अवश्यम स्माभिर्दृश्यस्व इत्यर्थः॥ कीदृशेनेंद्रेण अबिभ्यु
षा भीतिरहितेन कीदृशेनेंद्रेण मरुद्गणेन च मंदू नित्यप्रमुदितौ॥ समानवर्चसा। तुल्यदीप्ती॥ पुरा कदाचिद्वृत्रवधदशायां इंद्रस्य सखायः सर्वदे
वाः वृत्रस्य श्वासेनापसारिताः तदानीमिंद्रस्य रक्षसंबंधिसकलसेनाज्ञयार्थं मरुद्भिः संगमोभूत्। सोयमर्थो वृत्रस्य त्वा श्वसथादिति मंत्रे संगृही
तः॥ इंद्रो वै वृत्रं हनिष्यन्निति ब्राह्मणे प्रपंचितश्च। इंद्रशब्दः परमैश्वर्यवंतं मरुद्गणं वाभिधत्ते॥ तदानीमिंद्रस्य संबोधनं॥ बहिरेवाध्याहर्त
व्यं। तथा चेयमृग्यास्केन व्याख्याता॥ इंद्रेण सं हि दृश्यसे संगच्छमानो बिभ्युषा गणेन मंदू मदिष्णू युवां स्थोपि वा मंदुना तेनेति स्यात्समानवर्चसे
त्येतेन व्याख्यातमिति॥ संदृक्षसे संपश्यथाः॥ दृशेश्छांदसत्वं स्यमित्यात्मनेपदं। दृशोर्लिङर्थे लेडिति प्रार्थनायां लेट्। थासः से लेटोडाटाविति
डागमः॥ सिब्बहुलं लेटीति सिप्। संज्ञापूर्वको विधिरनित्य इति गुणाभावः॥ व्रश्चादिना षत्वं॥ षढोः कः सीति कत्वं। आदेशप्रत्यययोरिति सिपः ष
त्वं। बहुलग्रहणात् सिपः परः साप्यपि भवति। सिपा व्यवधानाद्याश्चादेशो न भवति। शपः पित्वादनुदात्तत्वं। इतरस्य लसार्वधातुकानामनुदा
त्तत्वं। धातुस्वर एव शिष्यते। हिशब्दयोगात्तिङ् इति निघातो न भवति॥ हि चेति प्रतिषेधात्॥ संजग्मानः गमेः संपूर्वाल्लिटः कानच्लिदिति
ट इति वर्तमाने लिट्। समो गम्यृच्छीत्यात्मनेपदविधानाल्लिटः कानजादेशः द्विर्भावो हलादिःशेषोभ्यासस्य चुत्वं। गमहनेत्युपधालोपः २८
कानचश्चित्वादंतोदात्तत्वं॥ गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं॥ अबिभ्युषा। ञिभी भये॥ पूर्ववल्लिटः क्वसुः ॥ लकारत्वेपि परस्मैपदमिति पर
स्मैपदं। क्वसुश्चेति लिटः क्वसुरादेशः तस्य कित्त्वाद्गुणाभावः द्विर्भावः अभ्यासस्य ह्रस्वश्च कादिनियमात्प्राप्तस्य इडागमस्य वस्वेकाजाद्घसामिति नियमा

निवर्तते॥ नञ्समासे तृतीयैकवचने भसंज्ञायां वसोः संप्रसारणमिति वकारस्य उकारः संप्रसारणाच्चेति पूर्वरूपत्वं। शासिवसिघसीनां चेति ष
त्वं॥ इयङ्हादेशं बाधित्वा एरनेकाच इति यणादेशः॥ अव्ययपूर्वपदप्रकृतिस्वरत्वं। पूर्वेण सहसंहितायामोकारस्य एङः पदांतादतीति पर 57
पूर्वरूपत्वे प्राप्ते प्रकृत्यांतःपादमव्यपरे इति प्रकृतिभावः॥ मंदू। मदि स्तुतिमोदमदस्वप्नकांतिगतिषु। इदितो नुम्धातोरिति नुमागमः 1924
कुरिन्युनुरभ्योस्वरुंकुपीसुधीलोलंगुलिंग्लिस्योवापिभवति कर्नि दिग्णमूर्ले हिंगुरिति। बाहुलकात्तराद्यपि कुरुत्यन्यं। प्रत्ययस्वरेणांतोदा
त्तः॥ द्विवचनमौ। प्रथमयोः पूर्वसवर्णः तृतीयैकवचने चेति स्वपांसुलुगिति आदिना पूर्वसवर्णदीर्घत्वं॥ समानवर्चसा समानं वर्चो य
योरिति वा॥ यस्येति च बहुव्रीहिः॥ द्विवचने सुपां सुलुगित्यादिना आकारादेशः॥ समानपदस्य प्रातिपदिकांतोदात्तत्वं। बहुव्रीहौ पूर्व
पदप्रकृतिस्वरेण तदेवावशिष्यते॥ ॥अष्टमीमृचमाह॥ ॥अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति॥ गणैरिंद्रस्य काम्यैः॥
॥ ॥मखः प्रवर्तमानोयं यज्ञः अनवद्यैर्दोषरहितैरभिद्युभिर्द्युलोकमभिगतैः काम्यैः फलप्रदत्वेन कामयितव्यैर्गणैः मरुत्समू
हैः सहलमिंद्रस्यैवं सहस्वत् बलोपेतं यथा भवति तथार्चति पूजयति। अयं यज्ञो मरुत इंद्रं चातिशयेन प्रीणयतीत्यर्थः॥ यज्ञइ
त्यादिषु पंचदशसु यज्ञनामसु मख इति पठितं॥ चतुश्चत्वारिंशत्स्वर्चतिकर्मसु अर्चति गायतीति पठितं॥ नावद्यते अ
वद्यं यथा अनवद्याः नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥ अभिगता द्यौर्यैस्ते अभिद्यवः तैः अभिद्युशब्दः प्रातिपदिकस्वरेणां
तोदात्तः॥ बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण स एवावशिष्यते॥ मखः प्रातिपदिकस्वरः॥ सहोबलमस्मिन्वर्तत इति सहस्व
त्॥ तसौ मत्वर्थ इति भसंज्ञया पदसंज्ञाया बाधितत्वात्सकारस्य रुत्वाभावः॥ मादुपधायाश्च मतोर्वोयवादिभ्य इति मतुपो मस्य
वत्वं॥ सहः शब्दो नविषयस्यानिसंतस्येत्याद्युदात्तः। मतुपः पित्वात्स एवावशिष्यते॥ काम्यैः कमेर्णिङ्। अत उपधाया इति वृद्धिः जनीजॄ
ष्क्नसुरंजोमंताश्चेत्यमंतत्वेन प्राप्तस्य मित्वस्य नकम्यमिचमामिति प्रतिषेधात् मितां ह्रस्व इत्युपधाह्रस्वत्वं न भवति। ण्यंतादचोय
दिति यः। तित्स्वरितमिति प्राप्ते यतोनाव इत्याद्युदात्तत्वं॥ ॥नवमीमृचमाह॥ अतः परिज्मन्ना गहि दिवो वा रोचनादधि॥ समस्मिन्नृंजते गिरः॥
॥ ॥हे परिज्मन् परितो व्यापिन् मरुद्गण अतोस्मात् मरुद्गणस्थानादंतरिक्षादागहि॥ अस्मिन्कर्मण्यागच्छ। दिवो वा द्युलोकाद्वा समागच्छ॥
रोचनाद्धि दीप्यमानादादित्यमंडलाद्वा समागच्छ॥ अस्मदीयकर्मकाले यत्र यत्र तिष्ठसि ततः सर्वस्मादागच्छेत्यर्थः॥ किमर्थमागमनमिति
दुच्यते। अस्मिन्कर्मणि वर्तमानऋत्विक् गिरः स्तुतीः समृंजते सम्यक्प्रसाधयंति ऋंजतिः प्रसाधनकर्मेति यास्कः॥ एतास्तुतीः श्रोतुमाग
च्छेत्यर्थः॥ यद्यप्यत्र मंत्रस्य प्रयुज्यमानत्वादृंजति धातोरुत्तमपुरुषेण भवितव्यं॥ तथापि परोक्षकृतत्वेन निर्देशात्प्रथमपुरुषप्र
योगः॥ परोक्षकृतलक्षणं च यास्क आह॥ तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्च तत्र परोक्षकृताः सर्वाभिर्नामविभ
क्तिभिर्युज्यंते प्रथमपुरुषैश्चाख्यातस्येति॥ अतः पंचम्यास्तसिल्॥ एतदोश् इति एतदोश् इति एतदस्सर्वादेशः लितीति प्रत्ययात्पूर्वस्योदात्तत्वं॥ परिज्म
न् अज गतिक्षेपणयोः अन्येभ्योपि दृश्यंत इति मनिन् अकारलोपश्छांदसः॥ आमंत्रितनिघातः॥ गहि। गमेर्बहुलं छंदसीति शपो लुक्॥ ह
र्ङित्त्वादनुदात्तोपदेशेत्यादिना मलोपः॥ अतो हेरिति हेर्लोपो न भवति। तस्मिन्कर्तव्ये असिद्धवदत्राभादिति मलोपस्यासिद्धत्वेन अ

भाष्य॰प्र॰ नकारांतत्वान्नदिवः। उडिदमित्यादिनाविभक्तेरुदात्तत्वं॥ वाच्चादयोनुदात्ताउच्चदात्तः॥ रोचनात्॥ रचदीप्तौ अनुदात्तेतश्च हलादेरिति युच्। युचोरना
कावित्यनादेशः। चित्स्वरेणांतोदात्तः। देधि। अधिपरी अनर्थकाविति कर्मप्रवचनीयत्वेन सत्तिनिपातसंज्ञायाः समावेशान्निपातत्वात् आद्युदात्तः॥ अभि
२९ न्यपि अभिरभागे इत्यादिष्वेवाभ्यादेशादिमेऽभ्यादेशोनुदात्तत्वं। अंजते। कर्मप्रवचनीयत्वे। समित्युपसर्गयोगात्तिङ्निघाताभावः। अनुदात्तः। क्रियावाचकत्वा
देशः। विभक्तिरनुदात्तौ सुप्पिताविति अनुदात्तेति सर्वानुदात्तत्वं॥ अंजते। समित्युपसर्गयोगात्प्रसाधनेवर्तते॥ निघातः। गिरः। प्रातिपदिकस्व
रः॥ ॥ दशमीमृचमाह॥ ॥ इतोवासातिमीमहे दिवोवापार्थिवादधि॥ इंद्रं महोवारजसः॥ ॥ इंद्रं देवं प्रतिसाति धनदानं अधीमहे आधिक्येन या
चामहे॥ कस्मात्प्रकादितिचेदुच्यते। इतोस्मादृश्यमानात्पार्थिवात्पृथिवीलोकाद्वा दिवोवाद्युलोकाद्वा महोमहतः रजसोंतरिक्षलोकाद्वा स्यादीक्षं
नकादंतरिक्षलोकाद्वाभयमिंद्रायतः कुतश्चिदानीयास्मभ्यं धनं प्रयच्छतित्यर्थः। समुद्रसभयाचाकर्मसीमहे याचामीतिपठितं॥ इतः इमशब्दा
त्संपन्याल्लसिल॥ इदमइश्॥ ततः॥ नित्वात्सर्वादेशः। अत्रउडिदमित्यस्यावकाशः। आभ्यामेभिः लितीत्यस्यावकाशः। पचनं पाचकः इभाव
पिनित्वे। तत्रपरत्वाद्विप्रतिषेधे परंकार्यमितिलितीति इकारस्योदात्तत्वं॥ पश्चात्तसेः प्राग्दिशोविभक्तिरितिविभक्तिसंज्ञकत्वादुडिदमित्यादि
नाअसर्वनामस्थाने विभक्तेरुच्यमानमुदात्तत्वंभवति। सकृद्गतौविप्रतिषेधे यद्बाधितं तद्बाधितमेवेत्युडिदमित्यस्य पुनरप्रवृत्तिरेवेतिचेत्॥
न। तस्यानुरोधेन पुनःप्रसंगविज्ञानं चास्मीकारात्॥ नत्वेवं। यततस्तत इत्यादावपि परेणालित्स्वरेण बाधितमपिसावेकाचइतितसिल उदा
त्तत्वं स्यादितिचेत्। न। यतप्तस्याः साचवर्णात्तत्वेन गोश्वंसावर्णेतिनिषेधात् नचपुनः प्रसंगविज्ञानं चास्य नतसार्वत्रिकं रुश्चानुरोधेन कु
चिदेवतदाश्रयणादितिसातिषत्पदाने धात्वादेः षः सः। भावेक्तिन्॥ ऊतियूतिजूतिसातिहेतिकीर्तयश्चेति किकारस्याल्लं। तिनुत्रतथासिसुसरकसेषुचेति
निषेधादिड्भवति। तित्स्वरे प्राप्ते॥ उदात्तइत्यनुवृत्तौ ऊतियूतिजूतिसातिहेतिकीर्तयश्चेतिनिपातनादंतोदात्तत्वं॥ ईमहे। ईङ्गतौ श्यनो
पिबहुलंछंदसीतिलुक्॥ अस्यधातोर्ङित्वात्तस्यानुदात्तेन्ङिदुपदेशादितिलसार्वधातुकस्यानुदात्तत्वे धातुस्वरएवशिष्यते॥ नचतिङति
ङइतिनिघातः। वायोगेप्रथमेतिनिषेधादुत्तरवाक्ययोरपिदिवाद्याद्योगाद्यन्यथावाक्यपरिपूर्तेस्तिङ्विभक्तेरवश्यमध्याहारा
त्तदपेक्षयैवाप्रथमानिङ्विभक्तिरिति। दिवः। ऊडिदमित्यादिनाविभक्तेरुदात्तत्वं। पार्थिवात्। प्रथप्रख्याने प्रथतइति पृथिवी प्रथेः षिवन्सं
प्रसारणंचेतिषिवन्प्रत्ययः। षिद्गौरादिभ्यश्चेति ङीष्॥ प्रत्ययस्वरेणाद्युदात्तः॥ ङीषोपिनिघातेनानुदात्तादिः पृथिवी॥ पृथिव्याविकार
इत्यर्थेओरञित्यनुवृत्तावनुदात्तादेश्चेत्यञ्। यस्येतिचेतीकारलोपः। तद्धितेष्वचामादेरित्यादिवृद्धिः रपरत्वं॥ ञ्नित्यादिर्नित्यमित्याद्युदा
त्तः। अधिनिपातत्वादाद्युदात्तः। ईईरन्प्रत्ययोतआद्युदात्तः। महः। महतइत्यस्यअकारतकारयोर्लोपश्छांदसः। सावेकाचइतिविभक्तेरुदा
त्तत्वं। रजसः। नब्विषयस्यानिसंतस्येत्याद्युदात्तत्वं॥ ॥ इतिप्रथमस्यप्रथमेद्वादशोवर्गः॥ ॥ इंद्रमित्यादिकंदशर्चंसप्तमंसूक्तंमधुच्छंदसआर्षंगायत्र
मित्यादिषुचतुर्थं॥ ऋषिछंदोदेवताविनियोगाश्चपूर्ववत्॥ विशेषविनियोगस्तूच्यते॥ महाव्रतेनिष्केवल्यशस्त्र इंद्रमिद्गाथिन इति सूक्तं॥ २९
तथाच पंचमारण्यकेसूत्रितं॥ त्रिरोगायत्रमिंद्रमिद्गाथिन इति। तथाचतुर्विंशे हनि ब्राह्मणाच्छंसिनः शस्त्रे इंद्रमिद्गाथिन इति पंचदृचो
त्रियरूचः॥ चतुर्विंशाहेनातानि पंचपंचकेभ्यायाहि सुषुमाहि त इंद्रमिद्गाथिनोबृहदितिसूत्रितत्वात्॥ अतिरात्रे प्रथमेपर्याये ब्राह्मणाच्छं

सिनः शस्त्रमेतत्सूक्तं अनुरूपत्वेन सूत्रितं च॥ इंद्राय मद्वने सुतमिंद्रमिद्गाथिनोबृहदिति॥ ॥ तत्र प्रथमामृचमाह॥ इंद्रमिद्गाथिनोबृहदिंद्रमर्केभि
रर्किणः॥ इंद्रं वाणीरनूषत॥ ॥ गाथिनः गीयमानसामयुक्ता उद्गातारः इंद्रमित् इंद्रमेवबृहत्॥ त्वामिद्धि हवामहे इत्यस्यामृच्युत्पन्ने
न बृहन्नामकेन साम्ना अनूषत स्तुतवंतः। अर्किणः अर्चनहेतुमंत्रोपेता होतारः अर्केभिः ऋग्रूपैर्मंत्रैरिंद्रमेवानूषत स्तुतवंतः। तथाऽध्व
र्यवस्तेवाणीर्वाणीभिर्यजूरूपाभिरिंद्रमनूषत॥ अर्कशब्दस्य मंत्रपरत्वं यास्केनोक्तं। अर्को मंत्रो भवति यदेनेनार्चंतीति। श्लोकइत्यादिषु सप्तपं
चाशत्संख्याकेषु वाङ्नामसु वाणी वाणीति पठितं॥ गाथिनः। कुषिकुषिगार्तिभ्यः थनितिगायतेः थन्प्रत्ययः। नित्वादाद्युदात्तः गाथाएषांसंतीति
गाथिनः। व्रीह्यादिभ्यश्चेतीनिप्रत्ययस्वरेण इकार उदात्तः। सचसतिशिष्टः। बृहत्॥ बृहता। तृतीयैकवचनस्य सुपां सुलुगिति लुक्॥ एषबृहन्
हन्त गच्छन्वदत्त्वेतोदात्तोनिपातितः। अर्केभिः अर्चपूजायां अर्चंति एभिरित्यर्का मंत्राः। पुंसिसंज्ञायां घप्रायेणेति घः। चजोः कुघिण्यतोरि
तिकुत्वं प्रत्ययस्वरेणांतोदात्तः। बहुलंछंदसीति भिस ऐसादेशोन भवसति॥ अर्का ऋक्साधनभूता मंत्राः एषांसंतीत्यर्किणः। वाणीः वाणी
नां चेत्याद्युदात्तः। दीर्घाज्जसिचेति पूर्वसवर्णदीर्घनिषेधस्य वाछंदसीति विकल्पितत्वाद्दीर्घत्वं। तृतीयार्थे प्रथमा। अनूषत णुस्तुतौ णोन
इतिनत्वं॥ लुङि व्यत्ययेनात्मनेपदं। झस्य अदादेशः। सिचइडभावः। उकारस्यदीर्घत्वं चछांदसं धातोः कुटादित्वात्सिचोङित्वेन गुणाभावः॥
॥ ॥ द्वितीयामृचमाह॥ इंद्र इद्धर्योः सचा संमिश्ल आवचोयुजा॥ इंद्रोवज्री हिरण्ययः॥ इंद्र इत् इंद्रएव हर्योः हरिनामकयोरश्वयोः सचा सह
युगपत् आसंमिश्लः सर्वतः सम्यग्मिश्रयिता। कीदृशयोर्हर्योः वचोयुजा इंद्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिक्षितयोरित्यर्थः। अ
थमिंद्रो वज्री वज्रयुक्तः हिरण्ययः हिरण्मयः सर्वाभरणभूषितइत्यर्थः। हर्योः हरतइति हरी इन्नित्यादाद्युदात्तः। सचासहेत्युक्तं। मिश्रणं
मिश्रः मिश्रयतेर्घञ्। सम्यङ्मिश्रोयस्यासौ संमिश्रः लत्वं छांदसं सम्यङ्मिश्रयितेत्यर्थः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वचसा युज्येते इ
ति वचोयुजौ तयोः षष्ठीद्विवचनस्य सुपां सुलुगित्याकारादेशः युजशब्दो धातुस्वरेणांतोदात्तः। कृदुत्तरपदप्रकृतिस्वरेणस एवशिष्यते।
वज्रीवज्रमस्यास्तीति। अतइनिठनाविति प्रत्ययस्वरः। हिरण्ययः ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिछंदसीति हिरण्मयशब्दे मकारलोपो निपा
त्यते॥ अकारः प्रत्ययस्वरेणोदात्तः पूर्वेणानुदात्तेन सहैकादेशउदात्तेनोदात्तः॥ ॥ तृतीयामृचमाह॥ इंद्रो दीर्घाय चक्षस आसूर्यं रोहय
द्दिवि॥ विगोभिरद्रिमैरयत्॥ ॥ अयमिंद्रो दीर्घाय प्रौदाय निरंतराय चक्षसे दर्शनाय दिवि द्युलोके सूर्यमारोहयत् पुरावृत्रासुरेणावृत्तंग
तिप्रदापातितं तमः तं निवारणेन प्राणिनां दृष्टिसिद्ध्यर्थं आदित्यं द्युलोके स्थापितवानित्यर्थः॥ सच सूर्यो गोभिः स्वकीयरश्मिभिरद्रिप
र्वतप्रमुखं सर्वं जगत् व्यैरयत् विशेषेण दर्शनार्थं प्रेरितवान्। प्रकाशितवानित्यर्थः। अथवा इंद्र एव गोभिर्जलैर्निर्मितं मूर्तेरद्रिं मेघं व्यै
रयत् विशेषेण प्रेरितवान् पंचदशसंख्याकेषु रश्मिनामसु खेदयः किरणागावइतिपठितं। त्रिंशत्संख्याकेषु मेघनामसु अद्रिः ग्रावेति
पठितं। दीर्घाय प्रातिपदिकस्वरेणांतोदात्तः॥ चक्षसे चक्षेः सर्वधातुभ्योऽसुन्नित्यसुन् बहुलग्रहणात्ख्याञादेशाभावः नित्वादाद्युदा
त्तः॥ सूर्यं। सृगतौ प्रेरणे वा राजसूयसूर्येत्यादिनाक्यप्प्रत्ययः। रुडागमश्चनिपात्यते॥ क्यपः
पित्त्वाद्गुणाभावः। पित्त्वादनुदात्तत्वं। धातुस्वर एवशिष्यते॥ रोहयत् रुहेर्ण्यंताल्लुङि बहुलंछंदस्यमाङ्योगेपीत्यडभावो निघातश्च। 159/1924

भाष्य॰ अ॰ शिचिद्दिवमित्यादिनाविभक्तेरुदात्तत्वं॥ अद्रिं। आदृणात्यत्र शर्भिभ्यः क्विनिति क्विन्प्रत्ययः॥ अदंति पशवस्तृणादिकमत्रेत्यद्रिः। नित्वादाद्युदात्तत्वं। एर
यतः। उरगतो। व्यत्ययेन्द्रुः निघातः॥ ॥चतुर्थीमृचमाह॥ ॥इंद्रवाजेषुनोवसहस्रप्रधनेषुच॥ उग्रउग्राभिरूतिभिः॥ हे इंद्र उग्रः उद्गूर्णबलस्त्वं। अनुभिरप्रध्ष्य
३० त्वं। उग्राभिरप्रधृष्याभिरूतिभिरस्मद्विषरक्षाभिर्वाजेषुयुद्धेषु नोस्मानवरक्ष॥ तथासहस्रप्रधनेषुचसहस्रसंख्याकगजाश्वादिलाभयुक्तेषु
महायुद्धेष्वपिरक्ष॥ वाजेषुप्रधाद्दीनांचेत्याद्युदात्तत्वं॥ नसः सकारस्यरत्वोत्वगुणेषुप्रकृत्यांतः पादमितिप्रकृतिभावोनभवति॥ अव्यपरइति
निषेधात्। अव। अवरक्षणेतितिङ्ङतिङ इतिनिघातनिषेधः प्राप्तः। तथापिवाजेष्वित्यत्रचकारस्यलुप्तत्वाच्चादिलोपेविभाषेतिनिषेधस्यवि
कल्पितत्वादत्रनिघातः प्रवर्तते। सहस्रशब्दः कृद्दमादीनांचेतिमध्योदात्तः। सहस्रप्रधनेषुवाजेषुबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वं। उग्रः उग्रस।
मवायेचस्यगः॥ अस्त्वंद्रतिरनव्यत्ययेनअंतोदात्तः॥ उतिभिः ऊतिपूतीत्यादिनाक्तिन्नुदात्तः॥ ॥पंचमीमृचमाह॥ ॥इंद्रंवयंमहाधनइंद्रमर्भेहवा
महे॥ युजंवृत्रेषुवज्रिणं॥ ॥वयमनुष्ठातारः महाधनेप्रभूतधननिमित्तमिंद्रंहवामहे॥ आह्वयामः। अर्भेअर्भकेस्वल्पेपिधननिमित्तभूते
सतिइंद्रंहवामहे॥ कीदृशमिंद्रं। युजंसहकारिणंसमाहितंवाद्वेनयुज्यतेयुध्यनलाभविरोधिषुप्राप्तेषुतन्निवारणायवज्रिणंवज्रोपेतं॥ महाध
नशब्दोयद्यपिसंग्रामरूपवितः। तथापिमहाधनमत्रसंग्रामइतिबहुव्रीहित्वसत्वंतोदात्तत्वासिद्धेनांत्रतद्गृहीतं। महाधनेमहत्वेतद्धनंचेतिस
मासस्वंतोदात्तः। अर्भे अर्तिगृभ्यांभत्। नित्वादाद्युदात्तः। हवामहे। ह्वेञस्पर्धायांशब्देच॥ यित्वात्कर्त्रभिप्राये आत्मनेपदं॥ लटः स्थानमाहिङ्
इतआत्मनेपदानामितिटेरेत्वंकृतंरेप्रपद्धः संप्रसारणमित्यनुवृत्तौ। बहुलंछंदसीतिसंप्रसारणंवकारस्यउकारः॥ परपूर्वत्वंगुणावादेशौ।
अतोदीर्घोयञीतिदीर्घत्वं। तिङ्ङतिङ इतिनिघातः॥ युजं। युजसमाधावित्यस्यक्विप॥ युजेरसमासइतिनुमनभवति। साहियुजेरितिनिर्देशा
दिकाररहितस्यनभवतिअनित्यमागमशासनंइतिवा॥ युजियोगेइत्यस्यापिनुमनभवति॥ वृत्रेषु। वृतुवर्तने प्रतिकूलतयावर्ततइति॥
वृत्राणिशत्रुकुलानि॥ स्फायितंचीत्यादिनारक्प्रत्ययः॥ कित्वाद्गुणाभावः प्रत्ययस्वरःवज्रिणं। अतइनिठनावितीनिः। प्रत्ययस्वरः॥ ॥
इतिप्रथमस्यप्रथमेत्रयोदशोवर्गः॥ ॥इंद्रमिद्गाथिनमितितृचस्यपष्ठीमृचमाह॥ ॥सनोवृषन्नमुंचरुंसत्रादावन्नपावृधि॥ अस्मभ्यम
प्रतिष्कुतः॥ हेसत्रादावन् अस्मदभीष्टानांसर्वेषांफलानांसहप्रदातः। अतोभ्यादित्वाद्युत्पत्त्यर्थेहेवृषन् वृष्टिप्रदेंद्रनोस्मदर्थंअमुंदृश्य
मानंचरुंमेघमपावृधिउद्घाटय॥ तथैवास्मभ्यमस्मदर्थंअप्रतिष्कुतः प्रतिशब्दरहितः। यद्यदस्माभिर्याच्यतेतत्रसर्वत्रनेतिप्रतिशब्दंनो
च्चारयतिअतोस्मद्विषयेकदाचिदप्यप्रतिस्खलितः एतदेवाभिप्रेत्ययास्कआह॥ अप्रतिष्कुतोप्रतिष्कृतोप्रतिस्खलितोवेति। वृषन्आमं
त्रितनिघातः। अमुं प्रातिपदिकस्वरेणांतोदात्तः। चरुं चरतीतिचरुः भृमृशीङ्चरित्सरितनिधनिमिमस्जिभ्यउरितिउप्रत्ययः॥ प्रत्य
यस्वरेणांतोदात्तः॥ सत्रादावन्सत्राशब्दः सहार्थेअभिमतफलजातंसकलंसहददातीतिसत्रादावा। आतोमनिन्क्वनिब्वनिपश्चेति
वनिप्॥ आमंत्रितस्यचेत्याद्युदात्तत्वं। पादादित्वान्ननिघातः॥ अप। निपातस्यचेतिदीर्घः। निपातआद्युदात्तः॥ वृधि। वृञ्वरणे। लो ३०
टःसिप्। तस्यसेर्ह्यपिच्चेतिहिः। स्वादिभ्यःश्नुः। तस्यबहुलंछंदसीतिलुक्॥ श्रुशृणुपॄकृवृभ्यश्छंदसि इतिहेर्धिरादेशः। तस्यङि
त्वात्सार्वधातुकगुणाभावः। निघातः॥ अस्मभ्यं। अस्मच्छब्दात्भ्यसोभ्यमित्यभ्यमादेशः। शेषेलोपः। बहुवचनेमपर्यस्येत्यत्वंनभ

वति। अंगवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येत्यत्वं॥ प्रातिपदिकस्वरेणास्मेत्यकारउदात्तः। भ्यसोभ्यमितिभ्यमादेशपक्षेशेषेलोपइतिमप
र्यंतलोपस्यास्मच्छब्दस्यलोपः॥ तदाउदात्तनिवृत्तिस्वरेणअभ्यमआदेशोरकारस्योदात्तत्वं॥ अप्रतिष्कुतः केनचित्प्रतिशब्दितः कुङ्शब्द
इतिनिष्ठायां कर्मणिक्तप्रत्ययः। प्रतेः प्राक्प्रयोगः। कारस्करादेशः कृतिगणत्वात्सुडागमः। सपाप्यइदुदुपधस्य (?) अप्रतिगणत्वात्षत्वं॥ नञसमासेअ
व्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥सप्तमीमृचमाह॥ ॥तुंजेतुंजेयउत्तरेस्तोमाइंद्रस्यवज्रिणः॥ नविंधेअस्यसुष्टुतिं॥ ॥तुंजेतुंजेतस्मिंस्त
स्मिन्फलप्रदातरिदेवांतरेयेस्तोमाः स्तोत्रविशेषाः उत्तरेउत्कृष्टाःसंतितेःस्तोमैः सर्वैरपिवज्रिणोवज्रयुक्तस्यास्येंद्रस्यसुष्टुतिंयोग्यांशो
भनस्तुतिंनविंधेनविंदामि॥ इंद्रस्यात्यंतगुणबाहुल्येनदेवांतरेषूत्तमतेनप्रसिद्धान्यपिस्तोत्राणिनपर्याप्तानीत्यर्थः॥ एतामृचंयास्
कएवंव्याचष्टे। तुंजः तुंजतेर्दानकर्मणः। दानेदानेयउत्तरेस्तोमाइंद्रस्यवज्रिणोनास्यतैर्विंदामिसमाप्तिंस्तुतेरिति॥ तुंजेतुंजेतुंजतिर्दा
नकर्मेत्युक्तं। ततः कर्तरिपचाद्यच्॥ चितइत्यंतोदात्तत्वं॥ नित्यवीप्सयोरितिद्विर्भावः। तस्यपरमाम्रेडितमितिद्वितीयस्याम्रेडितसंज्ञा
अनुदात्तंचेत्यनुदात्तत्वं॥ दातरिदातरीत्यर्थः॥ निरुक्तेतुदानेदानइत्यर्थतोव्याख्यातं। उत्तरेउत्पूर्वात्तरतेर्णोः भावेऽदोरप्। उत्कृष्ट
उत्कृष्टवचनः उत्कृष्टस्तरोयस्येतिबहुव्रीहिः। उद्ध्योनिपाताआद्युदात्तादृद्युदात्तः॥ बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वं॥ स्तोमाः अर्तिस्तु
सुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्योमन्नित्यादिनास्तोमशब्दोमन्नंतोनित्वादाद्युदात्तः॥ विंधे विदॢलाभे॥ लटः स्थानेस्वरितेत्वादात्मनेपदं॥ उत्तमैकवचनमिट्। तुदादिभ्यःशः॥
शेमुचादीनामितिनुम्॥ दकारस्यव्यत्ययेनधकारः॥ अस्यप्रकृतस्येंद्रस्यपरामर्शाद्धन्वादेशेउदात्तोअन्वादेशोनुदात्तः
। सुष्टुतिं सुष्टुतिं प्रकृतौ॥ धात्वादेः षः सइतिषत्वं॥ स्त्रियांक्तिन्निभावेक्तिन्॥ सुदात्तेनोपसर्गेणप्रादिसमासः। उपसर्गात्सुनोतीत्यादिनाष
त्वं। अत्राव्ययपूर्वपदप्रकृतिस्वरत्वेनसोः प्राप्तमुदात्तत्वं आश्रित्यागतिकारकोपपदात्कृदुत्तरपदप्रकृतिस्वरेणधातोरुदात्तत्वे प्राप्तेतदपवा
दत्वेनतादौचनितिकृत्यतावितिअनंतरस्यगतिसंज्ञकस्यसोरेवोदात्तत्वेनभवितव्यं॥ ननुमन्त्विनव्याख्यानग्रंथनाममन्त्रस्थानयास्काद्भिक्षीत
तिन्नित्यादौरुलावुक्तं॥ तथैवतंनघटइतिलक्ष्यते॥ तत्रहिकारकादृत्तश्रुसयोरेवाशीर्ष्यतः कारकादित्यनुवृत्तेः पाणिनिकृतिरित्यादौचेनम
नक्तिन्नित्यादिसन्नमित्युक्तं॥ कारकादित्येवप्रकृतिः प्रहृतिरितिचप्रत्युदाहृतंस्यादेतत॥ स्तुवतेअनयेतिस्तुतिरितिक्तिनाकरणभूतास्तुतिरभिधीयते॥
सुशब्देनचकरणमेवविशिष्यते॥ नधात्वर्थः॥ तथाचसुष्टुतिरित्यत्रसुशब्दः कारकपरएवभविष्यति। प्रकृतिप्रहृतिरित्यादौतुप्रशब्दोधात्वर्थे॥ विशे
षणमेवतितत्प्रत्युदाहरणमुपपन्नमिति॥ नएवंसतिसुशब्दस्यक्रियायोगाभावात्। उपसर्गाः क्रियायोगइत्युक्ताउपसर्गसंज्ञानस्यात्॥ तथा
चउपसर्गात्सुनोतीत्यादिनाषत्वंनस्यात॥ ननुक्तिनाकरणमभिधीयते॥ क्रियासाधनंचकरणं॥ तथाचकरणविशेषणस्यापिसुशब्दस्यक
रणांतर्गतक्रियायोगादुपसर्गत्वंभविष्यतीतिनतथासतियत्क्रियायुक्ताःतंप्रत्युपसर्गसंज्ञकाइतिकरोत्यर्थमेवप्रतिसारुपसर्गता॥ ननुस्तु
धात्वर्थंप्रतीत्यस्यषत्वंनस्यादेव॥ ननुस्तुधात्वर्थद्वारेणकरणस्यसुशब्दोविशेषणंभविष्यति॥ याद्दिशोभवनात्करणमपिशोभ
नमेवेति॥ एवंचस्तुधात्वर्थसंबंधात्प्रत्युपसर्गत्वेनषत्वमपिभविष्यति। तद्वारेणकरणविशेषणत्वात्कारकवचनोपिसुशब्दोभविष्यतीति

61
1924

भा॰ प्र॰
३१

इत्यविरोधेनैवमनर्ति । नादिमूलस्य सकृपुतिशब्दो विषयो भविष्यति ॥ प्रकृतिप्रहृतिरित्यत्र भावेक्तिन्प्रत्ययोदाहृतेति ॥ ननत्र प्रशब्दस्य करणपरत्वं करणेपिधा
त्वर्थमात्रविशेषणतेव विवक्षितानन तद्वारा प्रत्ययार्थविशेषणतापतितत्प्रत्युदाहरणतेषपानिरिति ॥ सकृपुतिरित्यत्र पुनः क्तिनाभिधेयं करणपर्यंतं स
शब्दस्य व्यापार इत्युदाहरणतेव ॥ नप्रत्युदाहरणतेति ॥ न ॥ किमत्र सशब्दः श्रुत्यैव प्रकृतिप्रत्ययार्थोभयविशेषणपरः । इनश्रुत्यैकविशिनष्टि भपरंअ
र्थादिति ॥ यद्याप्युभयपरत्वं तदापि किं योगपद्येन उत क्रमेणेति आद्ये प्रतिविशेष्यं विशेषणपदावृत्तिप्रसंगः । द्वितीये विरम्य व्यापारापातः ॥ नचश
ब्दबुद्धिकर्मणां विरम्य व्यापारः । कथंचित्तत्र इहापवा अनोनथ्यो भयपरत्वं ॥ अथैकत्र श्रुत्यातात्पर्यं अपरत्र तु अर्थादिति ॥ तत्र धात्वर्थसंबंधस्या
र्थिकत्वे पत्यासिद्धिः प्रत्ययार्थसंबंधस्यार्थिकत्वमनर्ति नित्यादिस्वरासिद्धिः ॥ आर्थिकेनापि कारकसंबंधेनोदाहरणत्वाभिधाने प्रकृतिः प्रहृतिरित्या
दिप्रत्युदाहरणं न स्यात् ॥ श्रुत्या धात्वर्थमात्रसंबंधस्यापि प्रशब्दस्यार्थात् करणसंबंधः केन वारयितुं शक्यत इत्येषा दिक् ॥ अत इह प्रत्ययार्थमात्रसंबं
धपरत्वांगीकारेण स्वरः सिध्यतु ॥ प्रत्वं तु छांदसमस्तु ॥ शोभनास्तुतिर्यस्यामितिवहुव्रीहिर्वा भवतु ॥ एवं चनत्रं सकृध्यामित्यं तोदात्तं भविष्यति ॥ अथ
वा सकृपुस्तुवंतीति सकृपुतय इति करणभूताऋचः ॥ स्तुतिशब्देनाच्यंते ॥ क्तिन्नेोच संज्ञायामिति क्तिन् ॥ प्रत्यये सति चित्वादंतोदात्तता भविष्यति ॥ नच
करणीभूतानामृचां कर्तृप्रत्ययेनोक्तिर्वा कथमभिधानमिति वाच्यं ॥ कृत्स्नानिपन्वंतीतिवत्तासामपि स्वव्यापारप्राधान्यविवक्षया करणलोपप
त्तेरिति ॥ ॥ अष्टमीमृचमाह ॥ ॥ वृषायूथेव वंसगः कृष्टीरियर्त्योजसा ॥ ईशानो अप्रतिष्कुतः ॥ वृषा कामानां वर्षितेंद्रः ओजसा स्वकीयबलेे
नानुग्रहीतुं कृष्टीर्मानुष्यानियर्ति प्राप्नोति कीदृश इंद्रः ॥ ईशानः समर्थः । अप्रतिष्कुतः प्रतिशब्दरहितः । याच्यमानेन परिहरतीत्यर्थः ॥ इंद्रस्य दृष्टांतः ॥
वंसं गोवननीयगतिर्वृषभो यूथेव गोयूथानि यथा प्राप्नोति तद्वत् ॥ वृषकनिन्युवृषितक्षिधन्विराजि घृप्रतिदिवि इति वर्षतेः कनिन्प्रत्ययः । कित्वा
द्गुणाभावः । नित्वादाद्युदात्तः । यू मिश्रणामिश्रणयोः । तिथपृष्ठगूथयूथप्रोथाः इति थक्प्रत्ययांतो निपातितः ॥ नि
पातनाद्दीर्घत्वं ॥ प्रत्ययस्वरेण अकार उदात्तः ॥ शेश्छंदसि बहुलमिति लुक् ॥ इयेन विभक्तिलोपः पूर्वपदप्रकृतिस्वरत्वं च ॥ कर्त्तव्यमिति समासोपि स एवस्व
रः । वंसगः पृषोदरादित्वादभिमतरूपस्वरसिद्धिः । कृष्टीरिति कृष विलेखने क्तिच्क्तौ च संज्ञायामिति क्तिच् ॥ चित्वादंतोदात्तः ॥ इयर्तिः ऋ गतौ तिप् शपः श्लुः ॥
श्लौ इति द्विर्भावः ॥ अभ्यासस्य उरदत्वं हलादिःशेषः ॥ अर्तिपिपर्त्योश्चेति सकारस्य इकारः ॥ अभ्यासस्यासवर्णे इतीयङादेशः ॥ अंगस्य गुणो
रपरत्वं ॥ ओजसा उब्जेर्बले बलोपश्चेत्यसुन् ॥ तत्संनियोगेन बकारलोपः ॥ लघूपधगुणः ॥ नित्वादाद्युदात्तः ॥ ईशानः ईश ऐश्वर्ये लटः शानच् अदिप्र
भृतिभ्यः शप इति शपो लुक् ॥ चित इत्यंतोदात्तत्वं बाधित्वा अनुदात्तत्वात् सार्वधातुकानुदात्तत्वेन धातुस्वर एव शिष्यते ॥ अप्रतिष्कुतः अप्रतिशब्दि
तः । कुशब्दे कर्मणि क्तः पारस्करादित्वात्सुडागमः । सुषामादित्वात्षत्वं ॥ नञ्समासः ॥ अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ ॥ नवमीमृचमाह ॥ ॥
य एकश्चर्षणीनां वसूनामिरज्यति ॥ इंद्रः पंचक्षितीनां ॥ ॥ य इंद्रः स्वयमेक एव चर्षणीनां मनुष्याणामिरज्यति ईष्टे तथा वसूनां धनानामिरज्यति ॥ ३१
स इंद्रः पंच निषादपंचमानां क्षितीनां निवासार्हाणां वर्णानां अनुग्रहीतेति शेषः ॥ एकः इण् गतौ इण्भीकापदशल्यतिमर्चिभ्यः कन्निति कन् ॥
बाहुलकात्तकलोपाभावः । नित्वादाद्युदात्तत्वं ॥ चर्षणीनां प्रातिपदिकस्वरेणांतोदात्तः ॥ अंतोदात्तादित्यनुवृत्तौ ॥ नामन्यतरस्यामिति विभक्तेरुदा
त्तत्वं मध्वसूनां ॥ निरित्यनुवृत्तौ शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबंधिमनिभ्यश्चेति उप्रत्ययः ॥ नित्वादाद्युदात्तः ॥ इरज्यति ॥ कंड्वादिषु इरज ईर्ष्यायां ॥

अत्रैश्वर्यार्थः ॥ कंड्वादिभ्यो यक् ॥ प्रत्ययस्वरेणोदात्तः ॥ पंच ॥ पचि व्यक्तीकरणे ॥ पचेश्च कनिन् ॥ नित्वादाद्युदात्तः ॥ क्षितीनां प्रातिपदिकस्वरेण अंतोदा
त्तः ॥ नामन्यतरस्यामिति विभक्तेरुदात्तत्वं ॥ आश्विनं शंसिष्यन्निंद्रं वो विश्वतस्परीति जुहुयात् ॥ संस्थिते वा वश्विनायस्तत्वत इति खंडे वर्णमहाअसीति
द्वाभ्यामिंद्रं वो विश्वतस्परीति सूत्रितं ॥ चतुर्विंशेहनि प्रातःसवने ब्राह्मणाच्छंसिन इंद्रं वो विश्वतस्परीत्यारंभणीया ॥ चतुर्विंश इत्युक्तपक्रमस्य कुजुनी
तीनो वरुण इंद्रं वो विश्वतस्परीति सूत्रितं ॥ ॥ एतामेतां दशमीमृचमाह ॥ ॥ इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः ॥ अस्माकमस्तु केवलः ॥ हे ऋ
त्विग्यजमानाः विश्वतः सर्वेभ्यो जनेभ्यः परि उपरि वर्तमानमिंद्रं वो युष्मदर्थं हवामहे आह्वयामः ॥ अतः स इंद्रोऽस्माकं केवलोऽसाधारणोस्तु ॥ इतरे
भ्योप्यधिकमनुग्रहमस्मासु करोतीत्यर्थः ॥ इंद्र ऋज्रेन्द्राग्र इति रन्प्रत्ययांतो निपातनादाद्युदात्तः ॥ वः अनुदात्तं सर्वमपादादावित्यनुवृत्तौ बहुवचनस्य वस्नसाविति वस् ॥ वि
श्वतः लित्यतीति प्रत्ययात्पूर्वमुदात्तं ॥ परि निपातत्वादाद्युदात्तः संहितायां पंचम्याः परावध्यर्थ इति विसर्जनीयस्य सत्वं ॥ हवामहे ह्वेञः स्पर्धायां शपि
बहुलं छंदसीति संप्रसारणे परपूर्वत्वे गुणावादेशौ ॥ जनेभ्यः जन्यंत इति जनाः ॥ जनयतेः कर्मणि घञ् ॥ जनिवध्योश्चेत्युपधाया वृद्ध्यभावः ॥
ञित्वादाद्युदात्तत्वं ॥ अस्माकं अस्मच्छब्दो अंतोदात्तः शेषे लोपः इत्यंतलोपपक्षे साम आकमित्याकारे एकादेशे उदात्तः ॥ टिलोपपक्षे उदात्तनिवृ
त्तिस्वरेण आकार उदात्तः ॥ केवलः वृषादेराकृतिगणत्वादाद्युदात्तः ॥ ॥ इति प्रथमस्य प्रथमे चतुर्दशो वर्गः ॥ ॥ इति ऋक्संहिताभाष्ये
प्रथममंडले द्वितीयोनुवाकः ॥ ॥ तृतीयेनुवाके चत्वारि सूक्तानि तत्र । एंद्र सानसिमित्यादिकं प्रथमं दशर्चं सूक्तं ॥ सुरूपकृत्नुमित्यादिषु पदसु
पंचमं ॥ ऋष्यादयस्तु पूर्ववत् ॥ विनियोगस्तु महाव्रते निष्केवल्ये औष्णिहतृचाशीतावेंद्र सानसिं रयिमित्यादिके द्वे सूक्ते पंचमा
रण्यके औष्णिहमितरत् चाशीतिरिति खंडे शौनकेन सूत्रितं ॥ सुरूपकृत्नुमूतय इति त्रीण्येंद्र सानसिं रयिमिति द्वे इति ॥ अतिरात्रे प्रथम
पर्याये ब्राह्मणाच्छंसिन एंद्र सानसिमिति सूक्तं सूत्रितं च ॥ इंद्रमिद्गाथिनो बृहत् एंद्र सानसिमिति दशर्चा याग इंद्रस्याग्निः सान्नाय्यस्यानुवा
क्याः एंद्र सानसिमिति उक्तो देवता इत्यस्मिन् खंडे एंद्र सानसिं प्रससाहिषे पुरुहूत शत्रूनिति सूत्रितं । तस्मिन् सूक्ते तामेतां प्रथमामृचमाह ॥ ॥
एंद्र सानसिं रयिं सजित्वानं सदासहं ॥ वर्षिष्ठमूतये भर ॥ ॥ हे इंद्र ऊतये अस्मद्रक्षार्थं रयिं धनमा भर आहर ॥ कीदृशं रयिं ॥ सानसिं संभ
जनीयं ॥ सजित्वानं समानशत्रुजयशीलं ॥ धनेन हि शूरान् भृत्यान् संपाद्य शत्रवो जीयंते ॥ सदासहं सर्वदा शत्रूणामभिभवहेतुं ॥ वर्षि
ष्ठमतिशयेन वृद्धं प्रभूतमित्यर्थः ॥ सानसिं वन षण संभक्तौ वित्येस्मादसिप्रत्ययोऽधिरं तोदात्तत्वं च ॥ सानसीवर्णसी इत्यादिना नि
पात्यते ॥ रयिं प्रातिपदिकस्वरेणांतोदात्तत्वं ॥ सजित्वानं ॥ समाना नरीन जेतुं शीलमस्य अन्येभ्योपि दृश्यत इति क्वनिप् ॥ उपपदस
मासः ॥ समानस्य छंदस्यमूर्धप्रभृत्युदर्केष्विति समानस्य सभावः ॥ कृदुत्तरपदप्रकृतिस्वरेण धातुस्वर एवाशिष्यते ॥ वृद्ध श
ब्दादतिशायने तमबिष्ठनाविति इष्ठन् ॥ प्रियस्थिरेत्यादिना वृद्धशब्दस्य वर्षादेशः ॥ इष्ठनो नित्वादाद्युदात्तत्वं ॥ ऊतये ऊतियूति इत्य
नुवृत्तौ ऊतियूतिजूतिसातीत्यादिना क्तिन् उदात्तो निपातितः ॥ भर हृग्रहोर्भश्छंदसीति । हकारस्य भकारः ॥ सेप्राग्धर्मोरिति धातो
रिति धातोः प्राक्प्रयोक्तव्यस्याङो व्यवहितात्श्चेति व्यवहितप्रयोगः ॥ ॥ द्वितीयामृचमाह ॥ ॥ नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै ॥
त्वोतासो न्यर्वता ॥ येन धनेन संपादितानां भृत्यानां निमुष्टिहत्यया नितरां मुष्टिप्रहारेण वृत्रान् शत्रून् निरुणधामहै निरस्थानं करवाम ॥ तादृशं

63
1924

भा॰ प्र॰ ३२

धनमाहरत्पर्थः॥ त्वोतासः॥ त्वया रक्षिता वयं। अर्वता अस्मदीयेनाश्वेन निरुणधामहा इत्यनुषंगः पदातिभिः सेना वा शत्रून् निवारयामेत्यर्थः॥
मुष्टिहत्यया हननं चेति सद्धनं उपपदे क्यप्॥ नन्त्रेति योगेन नकारस्य णकारः कृदुत्तरपदप्रकृतिस्वरं प्राप्ते परादिः छंदसि बहुलमिति बहुलग्रह
णं न किंचिदादीनां छंदस्यंतोदात्तत्वाभिधानार्थं तेनांतोदात्तत्वं। नि आख्यातसंबंधस्यापि नि रूपसर्गस्य व्यवहिताश्चेति व्यवहितप्रयोगः। रुधावृत्थे पंदमि
बहुलमिति श्नोर्लोपः॥ नलोपः॥ रुणधामहे आडुत्तमस्य पिच्चेति पित्वात्तश्नसोरल्लोप इत्याकारलोपो न भवति। पित्वादेव चाख्यातस्यानुदात्तत्वे वि
करणस्वर एव उदात्तत्वं शिष्यते। ननु तिङ् इतिङ इति निघातेन भवितव्यं। न इअत्र तिङ्भिन्नौ निविडयामुख्या निरुणधामहा इत्यत्र मुख्या
श्रुतेव अवर्तत निरुणधामहा इत्यत्रानुषक्ता द्वितीया॥ तयोः समुच्चयार्थः चकारो लुप्यते॥ चादिलोपे विभाषेति प्रथमस्य तिङ्विभक्तिर्न नि
हन्यते॥ यथा व्रीहिभिर्यजति नान्यस्मै ददातीत्यत्र हि समुच्चयार्थस्य चशब्दस्य लोपात् प्रतीतिः प्रथमा तिङ्विभक्तिर्न निहन्यते॥ ददातीति
द्वितीया तु निहन्यत एव। ननु तत्र द्वे तिङ्विभक्ती श्रूयेते॥ इह पुनरेकैव श्रुता॥ सैवोत्तरत्रानुषज्यते॥ नान्यत्र श्रूयत इति द्वितीयाभावात् कथमिपं
प्रथमा न॥ अनुषंगलब्धद्वितीयापेक्षमपि प्राथम्यमुपजीव्य निघातनिषेधदर्शनात् तुल्यांशमधिश्रयत्या तत्वप्रोक्षणीश्चासादयत्या तत्संवेत्य
न्यस्याधिश्रयत्यासादयतीत्याख्यातयोः प्रथमवाक्यद्वयश्रवणे उत्तरवाक्यद्वयेनुषंगमपेक्ष्यैव प्राथम्यस्वीकारेण चवायोगे प्रथमेति निघात
निषेधो दृष्ट इति॥ त्वया ऊता रक्षितास्त्वोतासः। प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः। दकारलोपः छांदसः॥ अवतेर्निष्ठायां मिड्भाव
श्च॥ ज्वरत्वरस्रिव्यविमवामुपधायाश्चेत्यूठ्॥ एत्येधत्यूठ्स्विति वृद्ध्यभावश्छांदसः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरेण आकार उदात्तः॥
एकादेश उदात्तेनोदात्त इत्युदात्तः। अर्वता। अर्वति गच्छतीत्यर्वा॥ अर्वं गतौ अन्येभ्योपि दृश्यन्त इति वनिप्प्रत्ययः॥ नञ्युञि ऊतीनां प्रतिषेधः॥
लोपो व्योर्वलीति वकारलोपः॥ अर्वणः त्रसावनञ इति तृकारः॥ वनिपः पित्वाद्धातुस्वर एव॥ ॥तृतीयामृचमाह॥ ॥इंद्र त्वोतास आ वयं वज्रं घना
ददीमहि॥ जयेम सं युधि स्पृधः॥ ॥हे इंद्र त्वोतासस्त्वया पालिता वयं घना घनं शत्रुप्रहरणासमर्थं दृढं वज्रमायुधमाददीमहि स्वीकुर्मः॥ तेन
च वज्रेण युधि युद्धे स्पृधः स्पर्धमानान् शत्रून् संजयेम सम्यक् जयेम॥ त्वोतासः इत्युक्तं॥ वज्रं व्रज गतौ ऋज्रेंद्राग्रवज्र इत्यादिना रन्प्रत्ययांतो निपातः॥
घना घनं काठिन्यं तदस्यास्तीति अर्शआदिभ्योच्॥ चित्वादंतोदात्तः॥ सुपां सुलुगिति डादेशः॥ ददीमहि दाञ् दाने प्रार्थनायां लिङ्। क्रियाफल
स्य कर्तृगामित्वात् स्वरितञितः इत्यात्मनेपदं उत्तमपुरुषबहुवचनं ददीमहि॥ जुहोत्यादिभ्यः श्लुः॥ श्लाविति द्विर्भावः॥ लिङः सलोपोऽनंत्यस्येति
सलोपः श्नाभ्यस्तयोरात इत्याकारलोपः॥ जयेम जि जये शप् पित्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरात् धातुस्वर एव शिष्यते॥ छंदसि प
रेपीति समः परः प्रयोगः॥ युधि। युध संप्रहारे। संपदादित्वाद्भावे क्विप्॥ सावेकाच इति विभक्तेरुदात्तत्वं॥ स्पृधः इति स्पृधः॥ स्पर्ध संघर्षे क्वि
प् चेति क्विप्॥ बहुलं छंदसीति रेफस्य संप्रसारणमृकारः॥ अकारलोपश्च॥ ॥चतुर्थीमृचमाह॥ ॥वयं शूरेभिरस्तृभिरिंद्र त्वया युजा वयं
॥सासह्याम पृतन्यतः॥ वयं कर्मानुष्ठातारः शूरेभिः शौर्ययुक्तैः अस्तृभिरायुधानां प्रक्षेप्तृभिर्भटैः संयुक्त्या महीति शेषः॥ हे इंद्र त्वया युजा भ ३२
वसहितास्त्वया युक्ताः सहायभूतेन त्वया पृतन्यतः सेनामिच्छतः शत्रून् सासह्याम॥ अतिशयेनाभिभवेम॥ शूरेभिः॥ शू गतौ॥ केनित्यनुरतौ
शुषिचिभ्यामीमांदीर्घश्चेति क्रन्॥ क्रित्वाद्गुणाभावः॥ नित्वादाद्युदात्तत्वं॥ बहुलं छंदसीति ऐसोपि कृताकृते बहुवचने झल्येदिति एत्वं॥ सहयोगेन

तीया च अहं युयमित्यस्मत्सरसमभिव्याहाराच्च वयं संयुज्येमहीति गम्यं विनापि सह शब्देन वृद्धो यूनेति निपातनादिति सूक्तं॥ अस्तृभिः अस्यास्त्रप्रक्षेपण
शीलैः॥ तद्धर्मभिस्तत्साधुकारिभिर्वा असु क्षेपणे तृन्निति ताच्छील्यादिषु तृन्॥ नित्वादाद्युदात्तः॥ रधादिभ्यश्चेति विकल्पविधानादपेक्षे इडभावः॥
वसूतृच्। रधादावभावात्। तृन्तृचौ शंसि क्षदादिभ्य इत्यनेन अनिड् तृन्॥ त्वया युष्मभ्यांमदिकृत्वा दुणाभावः॥ युष्मदः प्रत्ययस्वरेण
अकार उदात्तः॥ तृतीयैकवचनं टा। त्वमावेकवचन इति मपर्यंतस्य त्वादेशः॥ अतो गुण इति पररूपत्वं॥ एकादेश उदात्तेनोदात्त इत्युदात्तः॥ युजा युज
युजिर् योगे। ऋत्विग्दधृगित्यादिना क्विन्॥ सावेकाच इति विभक्तेरुदात्तत्वं॥ सासह्याम। भृशं पुनः पुनः सहेमहि। षह मर्षणे धात्वादेः षः सः॥ धातोरेकाचो हलादेः
क्रियासमभिहारे यङ्। यङोऽचि चेति लुक्। सन्यङोरिति द्विर्भावः॥ हलादिः शेषः दीर्घोऽकित इति दीर्घः॥ प्रार्थनायां लिङ्॥ चर्करीतं परस्मैपदम इ
ति वचनाद् इष्यमिति परस्मैपदोत्तमपुरुषबहुवचनं मस्॥ कर्तरि शप्। अदादित्वाल्लुक्॥ नित्यं ङित इत्यंतस्य सकारलोपः। यासुट् लिङः सलोपोऽनं
त्यस्येति सकारलोपः॥ सति शिष्टत्वाद्यासुट उदात्तत्वं शिष्यते। पादादित्वान्न निघातः॥ पृतन्यतः। पृतनां परेषामात्मन इच्छतः सुप आत्मनः
क्यच् इति क्यच्। सनाद्यंता धातव इति धातुसंज्ञायां सुपो धातुप्रातिपदिकयोरिति सुपो लुक्॥ कव्यध्वरपृतनस्यर्चि लोपः इ
त्याकारलोपः। पृतन्यतेः धातुश्चितादन्तोदात्तः॥ उपरि लटः शत्रादेशः॥ कर्तरि शप्॥ पित्वादनुदात्तत्वं॥ शतुश्च लसार्वधातुकस्वरेण उदात्तेन
सहैकादेश उदात्तेनोदात्त इति। पृतन्यच्छब्दोंतोदात्तः॥ शसः सुप्त्वस्वरेणानुदात्तस्यांतोदात्तादित्यनुवृत्तौ॥ शतुरनुमो नद्यजादी उदात्तत्वं॥
॥ ॥पंचमीमृचमाह॥ महाँ इंद्रः परश्च नु महित्वमस्तु वज्रिणे॥ द्यौर्न प्रथिना शवः॥ ॥अयमिंद्रो महान् गुरीरेण प्रौढः परश्च गुणैरुत्कृ
ष्टोपि नु किंच वज्रिणे वज्रयुक्तायेंद्राय महित्वं॥ पूर्वोक्तं द्विविधमाधिक्यं सर्वदास्तु॥ स्वभावसिद्धस्यापि भक्त्या प्रार्थनमेतत्॥ किंच द्यौ
र्न द्युलोक इव शवो बलमिंद्रस्य सेनारूपं प्रथिना प्रथिम्ना पृथुत्वेन संयुज्यतामिति शेषः॥ यथा द्युलोकः प्रभूतः एवमस्य सेना प्रभूता
नु शब्दोयं यद्यपि क्षिप्रनामसु नु मक्षु इति पठितः॥ तथाप्यत्र तस्यान्वयाभावान्निपातत्वेनानेकार्थत्वसंभवाच्च॥ समुच्चयार्थो निपातः॥
न शब्दो लोके प्रतिषेधार्थ एव। उपमानार्थश्चेति द्विविधः। येन पदेनान्वीयते तस्मात् पूर्वं प्रयुज्यमानः प्रतिषेधार्थः। उपरिष्टात् प्रयुज्यमान
उपमानार्थः॥ तथा च यास्क उदाहरति। इंद्रं यमन्वध्यायं नेंद्रं देवममंसतेति प्रतिषेधार्थीयः पुरस्तादुपाचारस्तस्य यस्य प्रतिषेधति दुर्मदा
सो न सुरायामित्युपमार्थीयः उपरिष्टादुपाचारस्तस्य येनोपमिमीत इति॥ अत्रोपमेयवाचिनो द्युशब्दस्योपरि प्रयुक्तत्वादुपमानार्थः स्वीकृतः॥
अष्टावर्थे प्रातिसंख्येषु लक्षणास्योत्तः पादः शवः इति पठितं॥ महानिति नकारस्य संहितायां दीर्घादटि समानपाद इति रुत्वं॥ आतोटि नित्यमि
ति पूर्वस्याकारस्यानुनासिकः। भोभगोअघोअपूर्वस्य योऽशि इति यकारः। तस्य लोपः। तस्यासिद्धत्वात् स्वरसंधिर्न भवति॥ महेरिनण्
दिकु इन् महद्भ्यां वोमहित्वं॥ त्वं इति प्रत्ययस्वरेणोदात्तः॥ स एव शिष्यते॥ वज्रिणे इकारः प्रत्ययस्वरेणोदात्तः॥ द्यौः द्योशब्दः प्रातिपदिकस्व
रेणांतोदात्तः॥ गोतो णिदिति विभक्तेर्णित्वाद्वृद्धिरुत्तरस्य स्यादुदात्तत्वे भवति॥ प्रथिना। प्रथिम्नः पृथ्वादिभ्य इमनिज्वेति
इमनिच्॥ र ऋतो हलादेर्लघोरिति ऋकारस्य रभावः॥ तुरिष्ठेमेयःस्विति अनुवृत्तौ टेरिति टिलोपः॥ प्रथिमन् शब्दश्चित्वादंतोदात्तः॥
तृतीयैकवचने भत्वादल्लोपोन इत्यकारलोपः छांदसो मकारलोपः अनुदात्तस्य च यत्रोदात्तलोप इति विभक्तेरुदात्तत्वं॥ शवः न विषयस्या

65/1924

निसंततस्येत्याद्युदात्तत्वं ॥ ॥ इति प्रथमस्य प्रथमे पंचदशो वर्गः ॥ ॥ एंद्र सानसिमिति सूक्ते षष्ठीमृचमाह ॥ ॥ समोहे वा य आशत नरस्तोकस्य सनितौ
॥ विप्रासो वा धियायवः ॥ ये नरः पुरुषाः समोहे संग्रामे तोकस्यापत्यस्य सनितौ लाभे वा आशत व्याप्नुवंत ॥ इंद्रं स्तुवंतीत्यर्थः ॥ वा अथवा
विप्रासो मेधाविनः धियायवः प्रज्ञाकामाः संतः ॥ आशततं सर्वं लभंत इत्यध्याहारः ॥ रण इत्यादिषु षट्चत्वारिंशत्संग्रामनामसु समोह समिथ इ
ति पठितं ॥ पंचदशस्वपत्यनामसु तुक् तोकमिति पठितं ॥ समोहे प्रातिपदिकांतोदात्तत्वं ॥ वा चादयोनुदात्ता इत्यनुदात्तः ॥ आशत अश्नोतेर्लुङि
छांदसश्च्लेर्लोपः ॥ आडागम उदात्तः सतिशिष्टत्वेन स एव शिष्यते ॥ नरः प्रातिपदिकस्वरः ॥ सनितौ स्त्रियां क्तिन् ॥ तितुत्रेष्वग्रहादीनामिति वच
नादिग्रहणीयत्वं निर्तितिरिति इडागमः ॥ विप्रासः ऋज्रेंद्रेत्यादिना विप्रशब्दो रन्प्रत्ययांतो निपातितः ॥ धियायवः ॥ धियं धारणेनं धीयते अ
वं बुध्यते श्रुतमर्थं ज्ञातमनयेति धीः धियमात्मन इच्छंतीति क्यच् ॥ क्याच्छंदसीत्युप्रत्ययः ॥ अतो लोपः ॥ प्रत्ययस्वरेणोदात्तः ॥ ॥ स सप्तमीमृ
चमाह ॥ ॥ यः कुक्षिः सोमपातमः समुद्र इव पिन्वते ॥ उर्वीरापो न काकुदः ॥ यः कुक्षिरस्येंद्रस्योदरप्रदेशः सोमपातमः अतिशयेन सोमस्य पा
ता ॥ स कुक्षिः समुद्र इव पिन्वते ॥ वर्धते ॥ सेचनार्थो धातुरौचित्येन वृद्धिं लक्षयति ॥ काकुदो मुखसंबंधिन्य उर्वीर्बह्व्यः आपो न ॥ जलानीव जि
ह्वासंबंधमास्योदकं यथा कदाचिदपि न शुष्यति तथेंद्रस्य कुक्षिः सोमपूरितो न शुष्यतीत्यर्थः ॥ यद्यपि काकुदइत्यादिषु सप्तपंचाशत्सु वाङ्ना
मसु काकुदिति पठितं ॥ तथाप्युदकसंबंधसिद्ध्यर्थमत्र काकुदशब्देन मुखमुपलक्ष्यते ॥ संबंधिवाचिनस्तद्धितस्य छांदसो लोपो द्रष्टव्यः ॥
सोमपातमः ॥ सोमं पिबतीति सोमपाः आकारो धातुस्वरेणोदात्तः ॥ कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते ॥ तमपः पित्वादनुदात्तत्वं ॥ समुद्र
शब्दः प्रातिपदिकांतोदात्तः ॥ इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति ॥ पिन्वते पिवि सेचने ॥ इदितो नुम् धातोरिति नुमागमः ॥ शा
पः पित्वेनानुदात्तत्वं ॥ तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते ॥ उर्वीः उरुशब्दोंतोदात्तः ॥ वोतो गुणवचनादिति ङीष् ॥ यणादेशः ॥
उदात्तयणो हल्पूर्वादिति ङीकार उदात्तः ॥ सतः सा सह एकादेश उदात्तेनोदात्त इत्येकादेश उदात्तः ॥ आपः प्रातिपदिकस्वरः ॥ काकुदः प्रातिपदिकस्वरे
णांतोदात्तः ॥ अभिप्लवषडहगतेषु पृष्ठ्ये तृतीयसवने ब्राह्मणाच्छंसिन एवा ह्यस्य सूनृतेत्यनुरूपस्तृचः ॥ एतत्सूत्रं वर्णितं इति खंडे अथ ब्रा
ह्मणाच्छंसिन इत्युक्त्वा कस्य एवा ह्यसि वीरयुरेवा ह्यस्य सूनृतेति सूत्रितं ॥ ॥ तस्मिन्स्तृचे प्रथमा सूक्तेऽष्टमीमृचमाह ॥ ॥ एवा ह्यस्य सूनृता
विरप्शी गोमती मही ॥ पक्वा शाखा न दाशुषे ॥ अस्येंद्रस्य सूनृता प्रियसत्यरूपा वाक् दाशुषे हविर्दत्तवते यजमानाय तदर्थं एवा हि एवं
खलु ॥ अनंतरप्रवक्ष्यमाणगुणोपेता भवतीत्यर्थः ॥ कीदृशी विरप्शी विविधरपणोपेता वाक्ययुक्ता बहुविधोपचारवादिनीत्यर्थः ॥ गोम
ती बह्वीभिर्गोभिरुपेता गोप्रदेत्यर्थः ॥ अत एव मही महती पूज्या ॥ यथोक्तवाचो दृष्टांतः पक्वा शाखा न यथा बहुभिः पक्वैः फलैरुपेता पन
सरक्षादिशाखा प्रीतिहेतुस्तद्वत् ॥ यद्यपि महन्नामसु भ्राधन्वीरपुरुणीति पठितं ॥ यथाप्यत्र महीत्यनेन पुनरुक्तिप्रसंगाद्बहुवाचो मही
ता ॥ एवा एवमादीनामंत उदात्त ॥ संहितायां निपातस्येति दीर्घः ॥ हि निपात आद्युदात्तः ॥ अस्य प्रकृतस्येंद्रस्य परामर्शादिदमोन्वादेश
इत्यादिना अशादेशोनुदात्त इति सर्वानुदात्तः ॥ सूनृत परिहाणे ॥ सूनृतं प्रियमिति सूनृता वाचा सा सत्या चेति सा ऋता प्रिय सत्य ३३
वाक् ॥ परादिश्छंदसि बहुलमिति ककार उदात्तः ॥ विरप्शी विचित्रं रपणं विरपः रप लप व्यक्तायां वाचि संपदादित्वाद्भावे क्विप् ॥ तदेषामस्ती

ति विरप्शानि वाक्यानि तानि यस्यां वाचि संति सा वाक् विरप्शिनी अत इनिठनाविति इनिः ॥ यस्येति च लोपः ॥ कृदिकारादक्तिन इति ङीप् ॥ इकारः प्रत्य
यस्वरेणोदात्तः ॥ नकारलोपश्छांदसः ॥ सवर्णदीर्घे एकादेश उदात्तेनोदात्त इत्येकादेश उदात्तः ॥ गावः अस्याः संतीति गोमती ॥ मतुपङीपोः पित्वादनुदात्तत्वे
प्रातिपदिकस्वर एव शिष्यते ॥ मही महती उगितश्चेति ङीप् ॥ तस्य पित्वादनुदात्तत्वे प्राप्ते शतुरनुमो नद्यजादी इत्यत्र बृहन्महतोरुपसंख्यानमित्युदा
त्तत्वं ॥ अत्र छांदसो लोपश्छांदसः ॥ पक्वा डुपचष् पाके निष्ठायां क्तप्रत्ययः ॥ पचो वः इति वत्वं ॥ चोः कुरिति कुत्वं ॥ प्रत्ययस्वरेणांतोदात्तः ॥ टापा सवर्ण
दीर्घे एकादेश उदात्तेनोदात्त इत्येकादेश उदात्तः ॥ शाखा शाखृ व्याप्तौ पचाद्यच् ॥ चितांतोदात्ते प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तः ॥
दाशुषे दाशृ दाने ॥ दाश्वान्साह्वान्मीढ्वांश्चेति निपातनात् क्वसौ द्विर्भावाद्विर्वचनं ॥ भावश्च चतुर्थ्येकवचने यचि भमिति
भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं वकारस्य उकारः ॥ परपूर्वत्वं शासिवसिघसीनां चेति षत्वं ॥ प्रत्ययस्वरेणोकार उदात्तः ॥
॥ ॥ नवमीमृचमाह ॥ एवा हि ते विभूतय ऊतय इंद्र मावते ॥ सद्यश्चित्संति दाशुषे ॥ हे इंद्र ते तव विभूतयः ऐश्वर्यविशेषाः एवा
हि एवंविधाः खलु किंविधा इति ॥ तदुच्यते ॥ मावते मत्सदृशाय दाशुषे हविर्दत्तवते यजमानाय ऊतयः रक्षाकारिण्यः सद्यश्चि
त् ॥ यदा कर्मानुष्ठितं तदैव भवंति ॥ मावते मत्सदृशाय वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमित्यस्मच्छब्दाद्वतुप्
मपर्यंतस्य प्रत्ययोत्तरपदयोश्चेति मादेशः ॥ अकारेण सह अतो गुण इति पररूपत्वं दृग्दृशवतुष्विति अनुवृत्तावा सर्वनाम्न इति द
कारस्याकारः ॥ सवर्णदीर्घत्वं ॥ वतुपः पित्वात्प्रातिपदिकस्वर एव शिष्यते ॥ सद्यः समानेऽहनीत्यर्थे सद्यः परुत्परार्यैषमः इत्यादि
ना निपातितं प्रत्ययस्वरेणांतोदात्तं चित ॥ चादयोनुदात्ता इत्यनुदात्तः ॥ संति अस भुवि ॥ लटः झः झोंतः ॥ अदिप्रभृतिभ्यः शप
इति शपो लुक् ॥ तिङ् प्रत्ययाद्युदात्तत्वं ॥ प्रत्ययलोपे प्रत्ययलक्षणमिति शब्दकारमाश्रित्य लसार्वधातुकानुदात्तत्वं न भवति ॥ वर्णा
श्रयविधौ प्रत्ययलक्षणं नास्तीति निषेधात् ॥ दाशुषे गतमन्यत्र गतं ॥ ॥ दशमीमृचमाह ॥ ॥ एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या ॥
इंद्राय सोमपीतये ॥ अस्येंद्रस्य स्तोमः सामसाध्यं स्तोत्रं उक्थं च ऋक्साध्यं शस्त्रमपि एवा हि एते उभे एवंविधे खलु किंविधे इति तदुच्य
ते ॥ काम्या कामयितव्ये ॥ शंस्या ऋत्विग्भिः शंसनीये ॥ किमर्थं शंसनमिति तदुच्यते ॥ इंद्राय सोमपीतये इंद्रस्य सोमपानार्थं ॥ एवा
ह्यस्येत्यनुवृत्तमंत्रे गतं ॥ काम्या कमेर्णिङ् तादर्थ्ये यत् ॥ णेरनिटीति णिलोपः ॥ तित्स्वरितमिति स्वरिते प्राप्ते यतोनाव इत्याद्युदात्त
त्वं ॥ सुपो डादेशः ॥ स्तोमः अर्तिस्तुसु इत्यादिना मन्प्रत्ययः ॥ उक्थं वच परिभाषणे ॥ पातृतुदिवचिरिचिसिचिभ्यस्थगिति थक् ॥ कि
त्वात्संप्रसारणं ॥ परपूर्वत्वं गुणाभावः ॥ शंस्या शंसु स्तुतौ ण्यंताद्धलो यत् ॥ यतोनाव इत्याद्युदात्तत्वं ॥ सुपो डादेशः ॥ सोमस्य पीतिः
सोमपीतिः कृदुत्तरपदप्रकृतिस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वं ॥ अथवा सोमस्य पीतिर्यस्येंद्रस्य स सोमपीतिरिंद्रः ॥ बहुव्रीहौ प्रकृत्या पू
र्वपदमिति पूर्वपदप्रकृतिस्वरत्वं ॥ ॥ इति प्रथमस्य प्रथमे षोडशो वर्गः ॥ इंद्रेहीत्यादिकं दशर्चं सूक्तं सरूपकृत्नुमित्यादिषु पूर्ववत् ॥ ऋष्या
द्यस्तस्य पूर्ववत् ॥ विशेषस्तु अतिरात्रे द्वितीये पर्याये अच्छावाकशस्त्रे इंद्रेहीत्यनुरूपस्तृचः ॥ आ सिरावे पर्यायाणामिति खंडे इंद्र
वसो सुतमंध इंद्रेहि मत्स्यंधस इति सूत्रितं ॥ ॥ तस्मिन्स्तृचे प्रथमामृचमाह ॥ ॥ इंद्रेहि मत्स्यंधसो विश्वेभिः सोमपर्वभिः ॥ ॥

67
1924

मद्दाभिष्टिरोजसा॥ हे इंद्र एहि अस्मिन्कर्मणि आगच्छ आगत्य च विश्वेभिः सर्वैः सोमपर्वभिः। सोमरसरूपैः अंधसः अंधोभिरन्नैः मत्सि
भा० प्र० ये मो हृष्टो भव॥ ततऊर्ध्वं ओजसा बलेन महान् भूत्वा अभिष्टिभिः शत्रूणामभिभविता भव तिङो पः। अस्मानिषड्जातिसंख्यावेष्टुं दकनामसु ओजः
३४ पाज इति पठितं॥ आ इहि आङुणः इंद्र एहि एङः योः स्थाने लभते सोवन्यतस्य पदद्वयमिति। आङ्माङोरेकादेशस्यादुत्य पदेशादो माङि
श्चेति पररूपं॥ मत्सि मादयमदी हर्षग्लपनयोः लोटः सिप् सर्वो विधयः छंदसि विकल्प्यंत इति सेर्हिरादेशो न भवति॥ दिवादिभ्यः श्यन्निति श्यनः
बहुलं छंदसीति श्यनो लुक्। न लुमता तस्मिन्निति प्रत्ययलक्षणप्रतिषेधात्॥ उपधा मदोमांदीर्घः श्यनीत्युपधादीर्घो न भवति॥ सिपः पित्वादनुदात्तत्वे धातुस्व
र एव अंधसः अदेर्नुम् धश्चेत्यसुन्प्रत्ययेन तृतीयाबहुवचनं कर्तव्यं। नित्त्वादाद्युदात्तः। विश्वेभिः अशिप्रुषिलटि इति क्वन् नित्त्वादाद्युदात्तत्वं॥ ए
मादेशो बहुलं छंदसीति न भवति। सोमपर्वभिः कृतात्मपसोमं पृणंति पूरयंतीति सोमपर्वाणः सोमरसाः पृ पालनपूरणयोः अन्येभ्योपि दृश्य
ते इति वनिप् गुणो रपरत्वं॥ वनिपः नित्त्वात् धातुस्वर एव। उपपदसमासे कृदुत्तरपदप्रकृतिस्वरेण पुनः स एव भवति॥ अभिष्टिरभिगंता इषगतौ
अभेरपेत्यादिना क्तिन्नुदात्तः स हि भावपरोपि भवितारं लक्षयति। कित्वाल्लघूपधगुणाभावः। तितुत्रतथसिसुसरकसेषु चेतीडागमो न भवति॥ अभि
शब्दस्य इकारे एमंतादिषु पररूपं वक्तव्यमिति पररूपत्वं॥ प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं॥ ओजसा उब्जेर्बले बलोपश्चेत्यसुन् नित्त्वादा
द्युदात्तः॥ ॥द्वितीयामृचमाह॥ एमेनं सृजता सुते मंदिमिंद्राय मंदिने। चक्रिं विश्वानि चक्रये॥ ॥ईमित्यनर्थकः। पादपूरणाय प्रयुक्तः हे अध्व
र्यवः। सुते अभिषुते चमसस्थे सोमे एनं सोममिंद्राय इंद्रार्थं आसृजत पुनरभ्युन्नयत एकामंथि चमसगणे पुनरभ्युन्नयनमाम्नातं। होतृ
काणां चमसाध्वर्यवः सकृत्सकृद्भुत्वा भक्षस्याभ्युन्नीयोपावर्तध्वमिति॥ कीदृशायेंद्राय मंदिमदं दातुं हर्षयितुं चक्रिं साधुकरणशीलं कीदृशायेंद्राय मं
दिने हर्षयुक्ताय विश्वानि सर्वाणि कर्माणि चक्रये कृतवते। सर्वकर्मनिःपादनशीलायेत्यर्थः॥ ईमित्यस्य पादपूरणार्थत्वं यास्क आह॥ अथ ये
प्रवृत्तेर्थेमिताक्षरेषु ग्रंथेषु वाक्यपूरणा आगच्छंति पदपूरणार्था मिताक्षरेष्वनर्थकाः कमीमिद्विति। अस्यायमर्थः। अन्यैरेव पदैर्वि
वक्षितेर्थे समाप्ते सति ये शब्दाः ईमित्यादयः प्रयुक्तास्ते शब्दा अमिताक्षरेषु छंदोराहित्येन परिमिताक्षररहितेषु ब्राह्मणादिवाक्येषु वाक्य
पूरणार्था द्रष्टव्याः॥ मिताक्षरेषु छंदोयुक्तेषु ग्रंथेषु पादपूरणार्थाः। ते च कमीमित्यादय इति। ईमित्यस्य ब्राह्मस्यानर्थक्यायैतामृचमु
दाजहार॥ एमेनं सृजता सुते आसृजत तेनं सुत इति॥ एनं इदमो द्वितीयायां द्वितीयाटौस्स्वेन इति एनादेशोनुदात्त इत्यनुवृत्तेः सर्वानुदात्तः॥
सृजत संहितायामन्येषामपि दृश्यत इति दीर्घः॥ मंदिं मदि मोदहेतुं मदिस्तुतिमोदमदस्वप्नकांतिगतिषु। इदितो नुम् धातोरिति नुम् मं
दमानं प्रयुक्त इत्यर्थे हेतुमति चेति णिच्॥ ण्यंतस्य मंद्रेस्ततोऽच इ इति इकारप्रत्ययः णेरनिटीति णिलोपः॥ प्रत्ययस्वरेणांतोदात्तत्वं॥ मंदि
ने मंदेः पूर्ववत्॥ न तु र्थ्येकवचने अनपुंसकस्यापि स्यात्ययेन नुमागमः॥ चक्रिं डुकृञ् करणे॥ आदृगमहनजनः किकिनौ लिट् चेति तच्छील
त इर्मत्तत्साधुकारिषु कर्तृषु किन्प्रत्ययः। तस्य कित्वात् गुणाभावः। यणादेशः। लिटि द्विर्वचनं॥ द्विर्वचनेचीति यणादेशस्य स्थानिवद्भा
वात् कृशब्दो द्विरुच्यते॥ अभ्यासस्य परत्वश्चुत्वहलादिःशेषाः। कित्वान्नित्त्वादाद्युदात्तः॥ विश्वानि विशेः क्वन् नित्त्वादाद्युदात्तः॥ अस्य ३४
च चक्रय इति कृ इत्येतस्मात्कर्मणि चाक्रिवत् कर्मणः कृ तीति षष्ठी न भवति। किं किकिनौ लिट् इति किकिनौ लिड्वद्भावेन न लोकाव्ययनिष्ठाखलर्थतृना

मिति निषेधात्॥ ॥तृतीयामृचमाह॥ मत्स्वा सुशिप्र मंदिभिः स्तोमेभिर्विश्वचर्षणे। सचैषु सवनेष्वा॥ हे सुशिप्र हे शोभनहनो शोभननासिक वा शि 69/1924
प्रे हनू नासिके वेति यास्केनोक्तत्वात्। तादृश हे इंद्र मंदिभिः हर्षहेतुभिः स्तोमेभिः स्तोत्रैः मत्स्व हृष्टो भव। हे विश्वचर्षणे सर्वमनुष्ययुक्त सर्वैर्यज्ञमा
नैः पूज्येत्यर्थः। तादृशं इंद्र त्वं एषु यागगतेषु त्रिषु सवनेषु सचा देवैरन्यैः सह आगच्छेति शेषः। मदि स्तुतौ अस्य लोडि अनित्यमागमशासनमिति
कृत्वा इदितो नुम् धातोरिति नुम् न भवति। अनुदात्तेत्त्वात् अस्यानुदात्तेन ङित् इदुपदेशादिति लसार्वधातुकानुदात्तत्वं॥ धातुस्वर एव। संहितायां द्व
यचोतस्तिङ इति दीर्घत्वं॥ सुशिप्र त्यामंत्रितनिघातः॥ मंदिभिः गतमंत्रे व्याख्यातं। स्तोमेभिः मन्प्रत्ययस्य नित्वादाद्युदात्तत्वं॥ बहुलं छंदसीति भि
स ऐसादेशो न भवति। विश्वचर्षणे निघातः। सच अउत्कं। एषु इदमित्यादिना विभक्तेरुदात्तत्वं॥ ॥चतुर्थीमृचमाह॥ असृग्रमिंद्र ते गिरः प्रति
त्वामुदहासत॥ अजोषा वृषभं पतिं॥ हे इंद्र गिरः त्वदीयाः स्तुतीरसृग्रं सृष्टवानस्मि ताश्च गिरः स्वर्गवस्थितं प्रत्वां ति उदहासत उद्गत्य प्राप्नुवन्
तादृशीर्गिरस्त्वं अजोषाः सेवितवानसि कीदृशं त्वां वृषभं। कामानां वर्षितारं पतिं सोमस्य पातारं यजमानानां पालयितारं वा पाता वा पालयि
तावेति यास्केनोक्तत्वात्॥ असृग्रं असृज्रं सृज विसर्गे लङि मिप् तुदादिभ्यः शः बहुलं छंदसीति अत्र विकरणस्य रुडागम जकारस्य गकारः॥
लुङ् लङ् लृङ्क्ष्वडुदात्त इत्यडागम उदात्तः स तिङिश्च तास्मिन्विशिष्यते॥ गिरः प्रातिपदिकस्वरः। उदहासत ओहाङ् गतौ लुङ् ङस्य आदि
ड्यः। लुङः स्थिति अडागमः निघातश्च॥ अजोषाः जुषी प्रीतिसेवनयोः लङ् ऌल्यस्य तुदादिभ्यः शः। तस्य छंदस्युभयथेति आर्धधातुकत्वेन
ङित्वाभावात् लघूपधगुणः थास्सकारलोपश्छांदसः सवर्णदीर्घः अडागमः स तिङि अस्य उदात्तः शिष्यते। वृषभं वृषु वृषु सेचने॥
अभकिल्वनुवृत्तौ ऋषिवृषिभ्यां कित् इत्यभच् प्रत्ययः। कित्वाद्गुणाभावः। चित्वादंतोदात्तः॥ पतिं पा रक्षणे पातेर्डतिः डित्वाट्टिलोपः प्रत्य
याद्युदात्तत्वं॥ ॥पंचमीमृचमाह॥ सं चोदय चित्रमर्वाग्राध इंद्र वरेण्यं॥ असदित्ते विभु प्रभु॥ हे इंद्र वरेण्यं श्रेष्ठं राधो धनं चित्रं मणिमु
क्तादिरूपेण बहुविधं अर्वाक् अस्मदभिमुखं यथा भवति तथा सं चोदय। सम्यक्प्रेरय भोगाय यावत्सर्वमपि तावद्विभु प्रभु चेत्युच्यते॥ ततोप्य
धिकं प्रभुशब्देनात इदं धनं ते तवैव असदित् अस्त्येव तस्मादस्मभ्यं प्रयच्छेत्यर्थः॥ मघमित्यादिष्वष्टाविंशतिधननामसु राधो इति पठि
तं॥ चोदय चुद प्रेरणे ण्यंतात् लोट् तिङ्ङतिङः इति निघातः। राधः राध संसिद्धौ अनेन राध्यते धनं सर्वधातुभ्योसुन् नित्वादाद्युदात्तः॥ वरेण्यं वृञ एण्यः
इत्याद्युदात्तः। असत् अस भुवि लेटि तिप इतश्च लोपः इतीकारलोपः लेटोडाटावित्यडागमः। अदिप्रभृतिभ्यः शप इति शपो लुक्।
आगमा अनुदात्ता इति अटो नुदात्तत्वात् धातुस्वर एव विभु विभवतीति विभु। भुव इत्यनुवृत्तौ विप्रसंभ्यो ड्वसंज्ञायामिति डुप्रत्ययः डित्वाट्टिलो
पः॥ प्रत्ययस्वरेणांतोदात्तः॥ कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते॥ एवं प्रभु॥ ॥ इति प्रथमस्य प्रथमे सप्तदशो वर्गः॥ ॥इंद्रेहीति सू
क्ते षष्ठीमृचमाह॥ अस्मान्त्सु तत्र चोदयेंद्र राये रभस्वतः॥ तुविद्युम्न यशस्वतः॥ हे तुविद्युम्न प्रभूतधन इंद्र राये धनसिद्ध्यर्थं अस्मान
नुष्ठाने तु तत्र कर्मणि सु चोदय सुष्ठु प्रेरय कीदृशान् अस्मान् रभस्वतः उद्योगवतः यशस्वतः कीर्तिमतः॥ तत्र तच्छब्दात्सप्तम्यास्त्रलिति
प्रत्ययस्य स्वरितत्वं॥ इंद्र आमंत्रितस्य पादादित्वान्न निघातः॥ राये इदमित्यादिना विभक्तेरुदात्तत्वं। रभस्वतः रभ राभस्ये रा
भस्य कार्ये पराक्रमः सर्वधातुभ्योसुन् नित्वादाद्युदात्तः मतुपः पित्वादनुदात्तत्वं॥ स्वादिष्व सर्वनामस्थान इति न पदत्वं॥ त्वसो मत्वर्थ इति

इति भसंज्ञायां बाधितत्वात् आङ्कुद्रादेकासंज्ञेति नियमात्। तुविद्युम्नं धनं यस्य पार्थिवमामंत्रिताद्युदात्तत्वं। यज्ञास्वतः यशो स्यात्लोतिम
तुप् अस्मायामेधास्रजोविनिरिति विनिनात बाध्यते मतुपः सर्वत्र समुच्चयात् यज्ञा सज्ञाद्धोनच्छित्वस्य यांनि संतस्येत्या द्युदात्तः मतुपः पित्वात्स
एव शिष्यते॥ ॥ सप्तमीमृचमाह॥ संगोमदिंद्रवाजवदस्मे पृथुश्रवो बृहत्॥ विश्वायुर्धेह्यक्षितं॥ हे इंद्र श्रवो धनं अस्मे संधेहि अस्मभ्यं सम्यक्
प्रयच्छ कीदृशं श्रवः गोमत् बह्वीभिर्गोभिरुपेतं वाजवत् प्रभूतेनान्नेनोपेतं पृथु परिमाणेनाधिकं बृहत् गुणैरधिकं विश्वायुः कृत्स्नायुष्यका
रणं अक्षितं विनाशरहितं गोमत् वाजवत् उभयत्र मतुपोनुदात्तत्वात् प्रातिपदिकस्वर एव। वाजशब्दो घृतादित्वादंतोदात्तः॥ अस्मे अस्मच्छब्दाच्चतुर्थीब
हुवचनस्य सुपां सुलुगित्यादिना शे आदेशः शित्वात्सर्वादेशः प्रातिपदिकस्य चांतोदात्तत्वं॥ शे लोपः टिलोप इति पक्षे उदात्तनिवृत्तिस्वरेण
विभक्तेः उदात्तत्वं॥ अंत्यलोपपक्षे अतोगुण इति पररूपे एकादेश उदात्तेनोदात्त इति उदात्तत्वं॥ पृथु प्रथ प्रख्याने प्रथिम्रदिभ्रस्जां संप्रसा
रणं सलोपश्चेति कुप्रत्ययः रेफस्य संप्रसारणमृकारः। परपूर्वत्वं कितः न लघूपधगुणः॥ श्रूयत इति श्रवो धनं असुन्प्रत्ययः॥ नित्वादाद्यु
दात्तः॥ बृहत्प्रातिपदिकस्वरः॥ विश्वायुः॥ विश्वमायुर्यस्मिन् धने विश्वशब्दः क्वन्प्रत्ययांतः॥ तस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते परादिश्छंद
सि बहुलमिति पूर्वपदांतोदात्तत्वं। एकादेश उदात्तेनोदात्त इत्युदात्तः। अक्षितं क्षि क्षये इत्यस्मादंतर्णीतण्यर्थात्कर्मणि निष्ठायां ते ण्यदर्थे वा निष्ठा
यामण्यदर्थ इति न दीर्घत्वं। अत एव क्षियो दीर्घादिति निष्ठानत्वं॥ नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥अष्टमीमृचमाह॥ अस्मे ध
हि श्रवो बृहद्द्युम्नं सहस्रसातमं॥ इंद्र ता रथिनीरिषः॥ हे इंद्र बृहत् श्रवः महत्कीर्तिं अस्मे धेहि अस्मभ्यं प्रयच्छ॥ तथा सहस्रसातमं॥ अतिश
येन सहस्रसंख्याकानोपेतं कर्म धनं अस्मे धेहि। तथा ताः व्रीहियवादिरूपेण प्रसिद्धाः रथिनीर्बहुरथोपेताः इषोन्नान्यस्मे धेहि। अस्मेस
पां सुलुगित्यादिना शे आदेशः॥ धेहि ध्वसोरेध्याव भ्यासलोपश्चेत्येत्वाभ्यासलोपौ श्रय इति श्रवः असुनो नित्वादाद्युदात्तत्वं॥ सहस्रंसन्
ते ददातीति सहस्रसाः षणु दाने॥ जनसनखनक्रमगमो विट्॥ विडुनोरनुनासिकस्यादित्याकारादेशः धातुस्वरेणांतोदात्तः॥ पुनः कृदुत्तरपदप्र
कृतिस्वरेण स एव शिष्यते॥ रथा आसां संतीति रथिन्य इनिप्रत्ययस्याद्युदात्तत्वं॥ ऋन्नेभ्यो ङीप् स च पित्वादनुदात्तः॥ इषः यौगिकत्वे धातु
स्वरः रूढत्वे प्रातिपदिकस्वरः॥ ॥नवमीमृचमाह॥ वसोरिंद्रं वसुपतिं गीर्भिर्गृणंत ऋग्मियं॥ होम गंतारमूतये॥ वसोर्वसुनोस्मदीयस्य
धनस्य रक्षार्थं इंद्रं होम॥ वयमाह्वयामः किं कुर्वंतः गीर्भिः स्तुतिर्गृणंतः स्तुवंतः कीदृशमिंद्रं वसुपतिं धनपालकं ऋग्मियं ऋचां मातरं
गंतारं यागदेशे गमनशीलं॥ वसोः वस निवासे भृमृशीङित्यादिना उप्रत्ययः निदित्यनुवृत्तेर्निदाद्युदात्तः॥ वसुपतिसमासांतोदात्तत्वे प्रा
प्ते पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरत्वं॥ गीर्भिः सावेकाच इति विभक्तेरुदात्तत्वं॥ गृणंतः गॄ शब्दे क्र्यादिभ्यः श्ना सार्वधा
तुकमपिदिति ङित्वात्॥ श्नाभ्यस्तयोरात इत्याकारलोपः शतुरकारस्य प्रत्ययस्वरेणोदात्तत्वं॥ ऋग्मियं ऋचो मिमीत इति ऋग्मीः तं ऋग्मि
यं। माङ् माने अस्माच्च क्विप् चेति क्विप्॥ घुमास्थेत्यादिना ईत्वं। चकारस्य चोः कुः झलां जशोंत इति जश्त्वं गकारः द्वितीयैकवचने अचि श्नुधातुभ्रुवा
दिना इयङादेशः। एरनेकाच इति यणादेशः सर्वे विधयश्छंदसि विकल्प्यंत इति न भवति॥ कृदुत्तरपदप्रकृतिस्वरेण इकार उदात्तः॥ होम आ ३५.
ह्वयामः। ह्वेञ् स्पर्धायां शब्दे च। लङुत्तमस्य अस्मदो बहुत्वपि व्यत्ययेनामिप उकारस्य व्यत्ययेनाकारः। शपो बहुलं छंदसीति लुक्॥ बहुलं छंद
सीति हः संप्रसारणं परपूर्वत्वं गुणः धातोरित्योकार उदात्तः॥ मिपः पित्स्वरेणानुदात्तत्वं गंतारं गम्लृ सृप्लृ गतौ। ताच्छील्ये तृन् नित्वादा

द्युदात्तः॥ ऊतये ऊतियूतीत्यादिनाक्तिन्नुदात्तो निपातितः॥ ॥दशमीमृचमाह॥ सुतेसुते न्योकसे बृहद्बृहत एदरिः॥ इंद्राय शूषमर्चति॥ आकार उच्च
श्वयादपूरणः॥ यद्वा व्याप्तिवचन आकारः आ इत्यर्थे भिव्याप्तावित्यभिधानात्। इच्छब्देपि अवधारणार्थः॥ इयर्ति गच्छत्यनुष्ठेयं कर्म प्राप्नोतीत्य
रिर्यजमानः एदरिः सर्वोपि यजमानः इंद्राय सुतेसुते इंद्रार्थमभिषुते तत्सोमे शूषं बलं अर्चति स्तौति॥ इंद्रस्य पराक्रमं प्रशंसतीत्यर्थः॥ कीदृशं
शूषं बृहद्योदं कीदृशायेंद्राय न्योकसे नियतस्थानाय बृहते प्रौढाय सुते सुते षुञ् अभिषवे क्तप्रत्ययः। प्रत्ययस्वरेणोदात्तः॥ नित्यवीप्सयोरि
ति॥ वीप्सायां द्विर्भावः। तस्य परमाम्रेडितमिति द्वितीयस्याम्रेडितत्वेनानुदात्तं चेत्यनुदात्तत्वं न्योकसे नियतमोको यस्य तस्मै निशब्दो निपाता
आद्युदात्ता उक्तत्वात्। तस्य यणादेशे उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येत्योकारः स्वरितः बृहते बृहन्महतोरुपसंख्यानमिति अजादिवि
भक्तेरुदात्तत्वं अरिः ऋ गतौ। अच इरितीकारः प्रत्ययः गुणो रपरत्वं प्रत्ययस्वरेण॥ इकार उदात्तः॥ इंद्राय ऋज्रेंद्रेत्यादिना रन्प्रत्यये इकार उ
दात्तः शूषं प्रातिपदिकस्वरः अपरिगणितसंख्याकं पुबलनामसु शूषं सहयद इति पठितं अर्चति निघातस्वरः॥ ॥इति प्रथमस्य प्रथ
मे अष्टादशो वर्गः॥ ॥गायंतीति दशर्चं सूक्तं मंत्रसंख्या द्वितीयपक्षे वमनुक्रम्यते गायंति द्वादशानुष्टुभं त्विति। तु हि ह वा इत्यादि परिभा
षायां तुशब्दस्य सूक्तद्वयपरिभाषितत्वात्॥ तस्य सूक्तस्य वक्ष्यमाणस्य चानुष्टुभत्वं द्रष्टव्यं ऋषिदेवते पूर्ववत्॥ अभिप्लव षडहस्यो
केषु तृतीयसवने अच्छावाकस्य गायंतीति स्तोत्रियस्तृचः। एषु षुवितिखंडे गायंति त्वा गायत्रिण आ त्वा गिरो रथीरिवेति सूत्रितं॥
॥ ॥तत्र प्रथमामृचमाह॥ गायंति त्वा गायत्रिणोर्चंत्यर्कमर्किणः॥ ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे॥ ॥हे श
तक्रतो बहुकर्मन् बहुप्रज्ञ वा इंद्र त्वां गायत्रिणः उद्गातारो गायंति स्तुवंति॥ अर्किणो अर्चनहेतुमंत्रयुक्ता होतारः अर्कमर्चनीयमिंद्रम
र्चंति। शस्त्रगतैर्मंत्रैः प्रशंसंति। ब्रह्माणो ब्रह्मप्रभृतय इतरे ब्राह्मणास्त्वामुद्येमिरे॥ उन्नतिं प्रापयंति। तत्र दृष्टांतः॥ वंशमि
व। यथा वंशाग्रे नृत्यंतः शिल्पिनः प्रौढं वंशमुन्नतं कुर्वंति॥ यथा वा सन्मार्गवर्तिनः स्वकीयकुलमुन्नतं कुर्वंति॥ तद्वत्। एतामृचं
यास्क एवं व्याचष्टे गायंति त्वा गायत्रिणः प्रार्चंति ते अर्कमर्किणो ब्राह्मणास्त्वा शतक्रत उद्येमिरे वंशमिव वंशो वनशयो भवति वननां
च्छ्रूयत इति वा॥ अर्कशब्दं च बहुधा व्याचष्टे॥ अर्को देवो भवति यदेनमर्चंत्यर्को मंत्रो भवति यदनेनार्चंत्यर्कमन्नं भवत्यर्चति भू
तान्यर्को वृक्षो भवति संवृतः कटुकिम्नेति॥ गायंति गै शब्दे शप्तिपौ पित्वादनुदात्तौ॥ धातुरुदात्तः॥ गायत्रिणः गायत्रं साम येषामुद्गातॄणा
मस्तीति। अत इनिठनौ॥ प्रत्ययस्वरेण इकार उदात्तः॥ अर्चंति। अर्च पूजायां भौवादिकः शप्तिपावनुदात्तौ॥ धातुस्वर एव पादादि
त्वान्नापि निघातः॥ अर्कं। अर्च्यतेभिरित्यर्का मंत्राः॥ तैरर्चनीयत्वात् तदात्मक इंद्रोपि लक्षणया अर्कः पुंसि संज्ञायां घः प्रायेणेति
करणे घः चजोः कु घिण्यतोरिति चकारस्य कुत्वं ककारः प्रत्ययस्वरेणांतोदात्तः। अर्का मंत्रा एषां संतीत्यर्किणो होतारः एकाक्षरात्कृतो
जाते सप्तम्यां च न तौ स्मृताविति कृदंतादिनिरनोय यद्यपि प्रतिषिद्धो तथाप्यत्र व्यत्ययादिनिः प्रत्ययस्वरेण इकार उदात्तः॥ ब्रह्माणः
प्रातिपदिकस्वरेणांतोदात्तः। शतक्रतो निघातः संहितायाम् अवादेशलोपः शाकल्यस्येति वकारलोपः। वंशशब्दः प्रातिपदिकस्व
रेणांतोदात्तः। इवेन समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति स एव शिष्यते॥ येमिरे। यम उपरमे लिट् तिङ्ङतिङ इति निघातः॥

71/1924

भाष्य०प्र० ॥ ॥द्वितीयामृचमाह॥ यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वं॥ तदिंद्रो अर्थं चेतति यूथेन वृष्णिरेजति॥ ॥यद्यदा सानोः सानुमारुहत॥यज

मानः सोमवल्लीसमिदाद्याहरणाय एकस्मात्पर्वतभागादपरं पर्वतमारूढवान्। तथा भूरि प्रभूतं कर्तव्यं कर्म सोमयागरूपं अस्पष्टवान्

३६ ।उपक्रांतवानित्यर्थः॥तत्तदानीमिंद्रः अर्थं यजमानस्य प्रयोजनं चेतति जानाति। ज्ञात्वा च रश्मिः कामानां वर्षितासन् यूथेन मरुद्गणे

न सह एजति कंपते स्वस्थानात् ॥यजमानभूमिमागंतुमुद्युक्तो भवतीत्यर्थः॥ सानोः षणदाने सनोतिर्ददातिर्निवसतामवकाशमिति सानुः। दृसति

जनि चरि चटिभ्यो ञुण॥णित्वादुपधाया वृद्धिः। ञित्वाच्चाद्युदात्तत्वं॥अरुहत्॥ रुहेर्लुङि तिप्यपि संज्ञापूर्वको विधिरनित्य इति लघूप

धगुणो न भवति॥लुङ् लङ् लृङ्क्ष्वडुदात्तः॥ सति शिष्टत्वात् स एव शिष्यते। निपातैर्यद्यदिहंतेति निषेधान्निघातो न भवति। भूरि॥

अदिशदिभूशुभिभ्यः क्रिन्॥कित्वाद्गुणाभावः॥ नित्त्वादाद्युदात्तः॥ स्पश बाधनस्पर्शनयोः स्वरितेत्त्वादात्मनेपदं॥ लङः पुरु

प्रथमपुरुषैकवचनं तु बहुलं छंदसीति शपो लुक्॥ ग्रथ्याद्विष्वस्पष्टे॥ लुङ् लङ् लृङ्क्ष्वडुदात्तः उत्पन्नागम उदात्तः। स एव शिष्यते॥ अ

नुषंगणाय छंद योगान्निघाताभावः कर्त्वं॥ उरमकरणे॥ अन्येभ्योपि दृश्यत इति त्विन्॥ गुणो रपरत्वं चिवः सर्वापहारी लोपः क

गोभावः॥ कर्त्वं॥ अर्थं अर्ते रुषिकुषिगार्तिभ्यः थन्। नित्त्वादाद्युदात्तः॥ यूथं न तिथपृष्ठगूथयूथप्रोथाः इति थक्प्रत्ययांता निपातिताः।

वृष्णिः निरित्यनुवृत्तौ सृवृषिभ्यां कित् इति निप्रत्ययांतः॥ कित्त्वाद्गुणाभावः॥ प्रत्ययस्वरेणांतोदात्तः॥ एजृ तिप एजृ कंपने तिङ्ङतिङ इति

निघातः॥ ॥तृतीयामृचमाह॥युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा॥अथा न इंद्र सोमपा गिरामुपश्रुतिं चर॥ ॥हे सोमपाः सो

मपान इंद्र हरी त्वदीयावश्वौ युक्ष्वा हि सर्वथा संयोजय॥ अथानंतरं नोस्मदीयानां गिरां स्तुतीनामुपश्रुतिं समीपे श्रवणमुद्दिश्य चर

तत्प्रदेशमागच्छ। कीदृशौ हरी केशिना केशवंतौ धनदेशोलंबमानकेशयुक्तौ वृषणा सेचनसमर्थौ युवानौ। कक्ष्यप्रा। अश्वस्योदरबंधनरज्जुः कक्ष्या तस्याः पू

रकौ पुष्टांगावित्यर्थः। युक्ष्व मोलोपः छांदसः सति शिष्टत्वेन प्रत्ययस्वरः शिष्यते॥ द्व्यचोतस्तिङ इति संहितायां दीर्घत्वं केशिना प्रशस्ताः केशा

अनयोः संतीति मत्वर्थीय इनिः प्रत्ययस्वरः सुपां सुलुगित्यादिना द्विवचनस्याकारादेशः॥ वृषणा एषु पुष्पयु सेचने। कनिन्युवृषितक्षिराजिधन्वि

द्युप्रतिदिव इति कनिन्। ञित्यादिर्नित्यमित्याद्युदात्तः॥ वा षपूर्वस्य निगमे इति उपधायाः पक्षे दीर्घाभावः पूर्ववदीकारः॥ कक्ष्यप्रा॥ कक्ष्या भवं कक्ष्यं

सत्रं तत्पातः पूरयतः पुष्टत्वादिति कक्ष्यप्रा प्रा पूरणे॥ आतो नुपसर्गे क इति कप्रत्ययः॥ कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तत्वं। आकारः पूर्ववत्। अ

थ निपातस्येति संहितायां दीर्घः नः अनुदात्तं सर्वमपादादावित्यनुवृत्तौ बहुवचनस्य वस्नसाविति नसादेशोनुदात्तः॥ इंद्र सोमपा इत्युभयो आमंत्रि

तस्य चेति सर्वानुदात्तौ। गिरां सावेकाचस्तृतीयादिर्विभक्तिरुदात्ता॥ उपश्रुतिं निपातनाद्युदात्तः॥ अतिग्रहेन ग्राहिसमासे कृदुत्तरपदप्रकृति

स्वरेण प्राप्ते तादौ च निति कृत्यतौ इति तुशब्देन तादिपरत्वात् गतेः प्रकृतिस्वरः॥ चर निघातः॥ विनियोगस्तु यत्रश्रौतो न स विज्ञेयः स्मार्तस्तत्र

विज्ञानीयाद्विधा नारि समृतः॥ एहि स्तोमानित्यभिषाप्त्र विनियोगाकारणविनियुक्ता साधारणविनियोगस्तत्र सर्वतादास्य सर्वत्रानुसंधेयः॥ ३६

॥ ॥तामेतां सकृत्तां चतुर्थीमृचमाह॥ एहि स्तोमां अभिस्वराभिगृणीह्यारुव॥ब्रह्म च नो वसो सचेंद्र यज्ञं च वर्धय॥ हे वसो निवासकारण

इंद्र एहि अस्मिन् कर्मण्यागच्छ॥ आगत्य च स्तोमान् उद्गात्रा प्रयुक्तानि स्तोत्राणि अभिस्वर अभिलक्ष्य प्रशंसा रूप शब्दं कुरु तथा ध्वर्यव मभि

स्वर गृणीहि शस्त्रं कुरु॥ तथा होत्र प्रयुक्तानि शस्त्राणि अभिरुव शब्दं कुरु परितोषेण सर्वान्वितः प्रशंसेत्यर्थः। तत ऊर्ध्वं नोस्माकं ब्रह्म च अन्नं च यज्ञं च अनुष्ठी

यमानं कर्म च सचा सह वर्धय सांगत्य संपादनेन यज्ञं वर्धयित्वा तत्फलमन्नं च प्ररूढं कुरु॥ अंध इत्यादिषु षट्विंशत्यन्ननामसु ब्रह्म चर्यं इति पठितं।

इहि इण गतौ। सेर्ह्यपिच्च इति पित्वाद्गुणाभावः निघातः॥ आङा सह गुण एकादेश उदात्तेनोदात्त इत्युदात्तः। स्तोमान् अर्तिस्तुसु इत्यादिना मन्

नित्त्वादाद्युदात्तः॥ उत्तरपदेन संहितायां नकारस्य दीर्घादटि समानपाद इति रुत्वं॥ आतोटि नित्यमित्याकारस्यानुनासिकः। भोभगो अघो अपू

र्वस्य योशि इति यत्वं॥ तस्य लोपः शाकल्यस्येति लोपः। तस्यासिद्धत्वात् स्वरसंधिर्न भवति। अभि एव मादीनामंत इत्यंतोदात्तः स्वर। स्वृ शब्दो

पतापयोः निघातः॥ अभि गतं गृणीहि॥ गृ शब्दे सेर्ह्यपिच्च इति हिः क्र्यादिभ्यः श्ना ई हल्यघोरितीत्वं। प्वादीनां ह्रस्व इति ऋकारस्य ऋकारः॥

ऋवर्णाच्चेति वक्तव्यमिति णत्वं। तिङ्ङतिङ इति निघातः॥ रुवर उ शब्दे सेर्ह्यपिच्च॥ अपित्त्वात्स्य येनवा॥ तस्य ङित्त्वेन गुणाभावादुवङादेशः॥

अतो हेरिति लुक्। तिङ्ङतिङ इति निघातः ब्रह्मन् वृहि वृद्धौ। मनिन्नित्यनुवृत्तौ। वृंहेर्नलोपश्चेति मनिन्। तत्संनियोगेन नलोपः अमाग

श्च। मिदचोंत्यात्पर इति ऋकारात्परः। यणादेशः। मनिनो नित्त्वादाद्युदात्तत्वं। वसो आमंत्रितनिघातः। यज्ञ यज्ञ याचेत्यादिना नङ्प्रत्ययस्वरः॥ व

र्धय निघातः। अत्र च कारद्वयश्रवणादियमेव तिङ्विभक्तिः पूर्ववाक्येष्वनुषज्यते। अतो अनुषक्तेन मध्यमानत्येत्यनाश्च नायाश्च वायोर्ग

प्रथमेति निघातनिमेधोन भवति। अभिप्लवषडहगतो वत्थेषु अच्छावाकस्य तृतीयसवने उक्थमिंद्राय शंस्यमित्यनुरूपस्तृचः॥ एवं सूचितं खंडे इंद्र

विश्वा अवीवृधन्नुक्थमिंद्राय शंस्यमिति सूत्रितं॥ ॥तस्मिंस्तृचे प्रथमां सूक्ते पंचमीमृचमाह॥ ॥उक्थमिंद्राय शंस्यं वर्धनं पुरुनिःषिधे॥

शक्रो यथा सुतेषु णो रारणत्सख्येषु च॥ इंद्राय इंद्रार्थं वर्धनं वृद्धिसाधनमुक्थं शस्त्रं शंस्यमस्माभिः शंसनीयं। कीदृशायेंद्राय। पुरुनिःषिधे

बहूनां शत्रूणां निषेधकारिणे शक्रः शक्तः इंद्रो नोस्मदीयेषु सुतेषु पुत्रेषु सख्येषु च सखित्वेषु पिय्यथा येन प्रकारेण रारणत् अतिशयेन

शब्दं कुर्यात्॥ यथा शंस्यमिति पूर्वेणान्वयः॥ अस्मदीयेन शस्त्रेण परितुष्ट इंद्रोस्माकं पुत्रान्सखींश्च स्यान्निंचन्न हु आ प्रशंसेदित्यर्थः॥ उक्थं।

वचस्थक्प्रत्ययः॥ प्रत्ययस्वरः॥ शंस्यं शंसु स्तुतौ। ण्यंतात्तद्यत। णेरनिटीति णिलोपः। तित्स्वरितं प्राप्ते यतोनाव इत्याद्युदात्तत्वं। वर्धनं

करणाधिकरणयोश्चेति करणे ल्युट्॥ लितीति प्रत्ययात् पूर्वस्योदात्तत्वं। पुरुनिःषिधे। बहूनां शत्रूणां निषेधकाय षिधु गत्यां॥ धात्वादेः षः सः

अत्र निरित्युपसर्गस्य निश्चान्दस मानार्थस्य प्राक्प्रयोगः॥ क्विप् चेति क्विप्। सर्वापहारी सः सकारेण लोपः॥ कुगतिप्रादय इति समासः। नीदुणा

व्यव धानं छांदसत्वात् नादृत्य उपसर्गात्सुनोतीत्यादिना धातुसकारस्य षत्वं। निसः सकारस्य रुत्वेनातुरिति रुत्वं॥ पुरु शब्देन कर्मणि षष्ठ्यंतेन स

मासः षिधो धातुस्वरेणोदात्तत्वं। निःषिध इति प्राप्ते समासे कृदुत्तरपदप्रकृतिस्वरत्वं। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् पुनः कारकस

मासे पि स एव स्वरः॥ शक्रोतीति शक्रः। स्फायितंचिवंचिशकिक्षिपीत्यादिना रक्। प्रत्ययस्वरः॥ यथा प्रकारवचने थाल् लित्स्वरेण प्रत्ययात् पूर्वो काराः

नुदात्तः॥ सुतेषु सुतः प्रत्ययस्वरेणोदात्तः॥ नः नसोन कारस्य नश्च धातुस्थोरुषुभ्य इति संहितायां णत्वं। रारणत्। रणि शब्दार्थः धातोर्यङ्लुगंत

तियङ् यक्ष्याचि चेति लुक्। प्रत्ययलक्षणेन न द्विर्भावो हलादिः शेषः। दीर्घोकित इति दीर्घः। प्रत्ययलक्षणेन सनाद्यंता धातव इति धातुसंज्ञायां

लिङर्थे लेट् इति हेतुमद्भावलक्षणे लिङ्थे लेट्। अत्र हीदं कर्तृकरणे न मुक्थसंसनस्य कर्तव्यत्वे हेतुः॥ लेटस्तिप्। इतश्च लोपः परस्मैप

73
1924

भाष्य०प्र० ३७ इंधिनीकारलोपः॥ केदेराग्रादावित्यग्रागमः॥ कर्तरिश्नप्। तस्य चकारी तं परस्मैपदमग्रादिवञ्चश्वस्यमित्यादादिवहुवादिप्रभृतिभ्यः ग्रापद्गुतिग्रागमोऽनुव
हुलंछंदसीतिनिषिध्यते॥ श्नापोनुदात्तत्वात्तातोरंतोदात्त एव शिष्यते। ग्रापोलसार्वधातुकस्यव्यवधानात्तत्र परतोविधीयमानमभ्यस्तानामादिरित्या
द्युदात्तत्वं न भवति। न च तिङ् तिङः इति निघातः॥ अत्र यच्छब्दयोगेन यावत्यथा भ्यामिति निषेधात्तच्छब्दयोगप्रथमेति वा तत्र निघातो न भविष्य
ति। अत्र ह्यनंतरवाक्ये सख्ये पुरुषेतिवाद्युक्तः विभक्त्यपेक्षये यं प्रथमातिङ्विभक्तिः॥ सख्येषु सख्युः कर्माणि सख्यानि तेषु। कर्मणि चेत्यनुवृत्तौ
सख्युर्य इति सखिशब्दाद्यप्रत्ययः। तत्र भसंज्ञायां यस्येति चेतीकारलोपः। प्रत्ययस्वरः॥ ॥ षष्ठीमृचमाह॥ ॥ तमित्सखित्वर्ईमहे तं राये तं सुवी
र्ये॥ स शक्र उत नः शकदिंद्रो वसु दयमानः॥ सखित्वे निमित्तभूते सति तमित् तमेवेंद्रमीमहे प्रार्थयामहे। तथा राये धनार्थं तमीमहे। तथा सुवीर्ये शो
भनसामर्थ्यनिमित्तं तमीमहे॥ इत्र आपि च शक्रः शक्तिमान्॥ स इंद्रो नोऽस्मभ्यं वसु धनं दयमानः प्रयच्छन् शकत्॥ अस्मदीयरक्षणे शक्तो भवतु॥
सप्तदश्यां वा कर्मसु ईमहे याचामीति पठितं। तदनुसारेणेंद्रं याचामहे इति व्याख्येयं॥ सख्युर्भावः सखित्वं। तस्य भावस्त्वतलाविति त्वः। प्रत्ययस्वरेणो
दात्तः। ईमहे। ईङ् गतौ। ङित्वादात्मनेपदं। दिवादिभ्यः श्यन्। बहुलं छंदसीति श्यनो लुक्। तिङ् तिङ इति निघातः। राये इति रैशब्दाद्विभक्तेरुदात्तत्वं। सु
वीर्ये शोभनं वीर्यं यस्यासौ सुवीर्यः। भवितव्यमित्यादिना नैतेन भावो लक्ष्यते॥ सुवीर्यमित्यर्थः॥ बहुव्रीहौ वीर्यमित्यनुवृत्तौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं।
शक्नोतीति शक्रः। स्फायितंचिवंचिशकिक्षिपिक्षुदिसृपितृपिदृपीत्यादिना रक्। प्रत्ययस्वरः। शकत्। शक्लृ शक्तौ धातुसंबंधाधिकारे छंदसि लुङ्लङ्लिट इति लु
ङ्। यत्तः शक्नोति अतः स्तुमो महे इति धातुसंबंधः। लुङ् च्लिपुषादिद्युताद्य्लृदितः परस्मैपदेष्विति च्लेरङादेशः॥ बहुलं छंदस्यमाङ्योगेऽपीत्यडागमाभावः॥
तिङ् तिङ इति निघातः। वसानिदित्यनुवृत्तौ वसेरुन्प्रत्ययः। नित्वादाद्युदात्तत्वं॥ दयमानः। दय दानगतिरक्षणहिंसादानेषु अनुदात्तेत्वादा
त्मनेपदं। लटः शानजादेशः। शपः पित्वादनुदात्तत्वं। शानचश्चित्त्वाद्युदात्तत्वं बाधित्वा अदुपदेशाल्लसार्वधातुकमनुदात्तमिति परत्वात्सार्वधातुक
त्वादनुदात्तत्वं॥ धातुस्वर एव शिष्यते॥ ॥ इति प्रथमस्य प्रथमे एकोनत्रिंशो वर्गः॥ ॥ सप्तमीमृचमाह॥ सुविवृतं सुनिरज
मिंद्र त्वादातमिद्यशः॥ गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः॥ हे इंद्र यशोऽन्नं कर्मफलभूतं सुविवृतं सुष्ठु सर्वत्र प्रसृतं सुनिरजं सुखेन नि
र्गंतुं प्राप्तुं शक्यं त्वादातमित्त्वया शोधितमेव संपन्नमिति शेषः॥ इतः परं क्षीरादिरसलाभार्थं गवां व्रजं तन्निवासस्थानं अपवृधि अपवृत्तमुद्घा
टितद्वारं कुरु॥ हे अद्रिवः पर्वतोपलक्षितवज्रयुक्तेंद्र राधो धनं कृणुष्व संपादय॥ सुविवृतं। वृञ् वरणे। कर्मणि क्तः। प्रत्ययस्वरः। विशब्देन प्रा
दिसमासः॥ विवृतशब्दस्य पुनः सुशब्देन प्रादिसमासः। विवृतमित्यत्र कृदुत्तरपदप्रकृतिस्वरं बाधित्वा कर्मवाचिनि क्तांते परतो गतिरनंत
र इति पूर्वपदप्रकृतिस्वरे प्राप्ते॥ परादिश्छंदसि बहुलमिति वृकार उदात्तः पुनः समासे कृदुत्तरप्रकृतिस्वरेण स एव वृकार उदात्तः॥ ननु सुवृतमि
त्येव कृदंतं। ननु विवृतमिति। प्रत्ययग्रहणे यस्मात्स विहितः तदादेस्तदंतस्य ग्रहणमिति वचनात्तत्र विवृतमित्यत्र समासे वृतमित्येतावन्मा
त्रेणोत्तरपदं। किंतु विवृतमिति। तत्कथं कृदुत्तरपदप्रकृतिस्वरत्वमिति चेत॥ उच्यते। प्रत्ययग्रहणपरिभाषापवादेन गतिकारकोपपदात्कृद्ग्रहणे गतिकार ३७
कपूर्वस्यापि ग्रहणमित्यनेन विवृतमित्यस्यापि कृदंतत्वव्यपदेशोपपत्तेः॥ ननु विवृतमित्यस्य यथा कृदंतव्यपदेशः एवं क्तांतव्यपदेशोऽप्य
स्ति तयैव परिभाषया। तथा च कर्मणि क्तांते परे परतो गतिरनंतर इति सुशब्दस्य प्रकृतिस्वरः प्राप्नोति। न चात्रापि परादिश्छंदसि ब

हुलमित्येवं नाविस्तारः तथाहि सति सुविवृतमित्यत्र विवृतमित्येवोत्तरपदमिति तदादिरिकार एवोदात्तः स्यात् विवृतमिति समासे यद्यपि इकारः
परादिर्भवति तथापि सुविवृतमिति समासस्य सति शिष्टत्वेन बलीयस्त्वात्तत्र तु एवोत्तरपदादेरिकारस्योदात्तस्वरेण भवितव्यमिति उच्यते। ग 75/1924
तिरनंतर इत्यत्र क्तानुवृत्तेः क्तग्रहणे कृद्ग्रहणपरिभाषा नाश्रीयते॥ तदाश्रयणे व्यवहितगतावपि प्रकृतिस्वरे सत्यनंतरग्रहणमनर्थकं स्या
त्॥ अनेनैव चाभिप्रायेणानंतरग्रहणस्य प्रयोजनमभ्युद्धृतमित्यत्र व्यवहितस्याभिशब्दस्य मा भूदिति प्रत्युदाहृतं॥ तस्मात्सुविवृतमिति
वृकार एवोदात्त इति स्थितं। सुनिरजं। अनायासेन निरवशेषं प्राप्यं॥ अज गतिक्षेपणयोः। सुनिसोरुपसर्गयोः प्राक्प्रयोगः। ईषद्दुःसु
षु कृच्छ्राकृच्छ्रार्थेषु खल्॥ न चात्र सुशब्दस्य निसा व्यवधानं शंकनीयं। सुशब्दस्य कृत्पदमात्रं खलो निमित्तं नानंतर्यं अत एव सुपरिहरं दुः
परिहरमित्यादयः प्रयोगा इति। पूर्ववद्गतिसमासे लितिप्रत्ययात्पूर्वमुदात्तमिति धात्वकार उदात्तः निसा समासे कृदुत्तरपदप्रकृतिस्वरेण
स एव शिष्यते। पुनः सुशब्देन समासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते॥
त्वादातं। त्वया शोधनेन विशोधितं। दैप् शोधने॥ आदेच उपदेशेऽशितीत्यात्वं। सत्यपि हि पकारेनानुबंधकृतमनेजंतत्वमित्येजंतत्वाद्यं॥
निष्ठेति कर्मणि क्तः॥ दाधाघ्वदाविति त्वत्रादाप्विति प्रतिषेधेन घुसंज्ञाया अभावाद् दो दद्घोरिति दद्भावो न भवति॥ ननु दाप्लवन इति प्रति
पदोक्तस्यैव दापस्तत्राप्रतिनिषेधः॥ न पुनर्लाक्षणिकस्य दैपः॥ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्येति
नियमाच्चेत्॥ न। गामादाग्रहणेष्वविशेष इति प्रसवात्। युष्मच्छब्दात् तृतीयैकवचनस्य सुपां सुलुगिति डादेशः। त्वमावेकवचने इति
मपर्यंतस्य त्वादेशः॥ अतो गुण इति पररूपत्वं भसंज्ञायां टेरित्य दशब्दस्य लोपे उदात्तनिवृत्तिस्वरेण अकार उदात्तः॥ कर्तृकरणे कृता
बहुलमिति तृतीयायाः समासः। तत्पुरुषे कृति बहुलमिति तृतीयाया अप्यलुक्॥ कृदुत्तरपदप्रकृतिस्वरे प्राप्ते तृतीया कर्मणीति पूर्वपदप्र
कृतिस्वरत्वं॥ यशः॥ अश्नोतेराशुकर्मणि॥ अशेर्युडित्यसुन्। तत्संनियोगेन धातोर्युडागमः॥ नित्वादाद्युदात्तत्वं। गवां प्रातिपदिकस्वरेः। सांव
काच इति विभक्तेरुदात्तत्वं प्राप्तं न गोश्वन्साववर्णेति निषिध्यते॥ वृधि। वृञ् वरणे श्रुशृणुपॄकृवृभ्यः छंदसीति हेर्धिरादेशः॥ बहुलं
छंदसीति शपो लुक्। निघातः॥ कृणुष्व। कृवि हिंसाकरणयोश्च इति नुम्। स्वरितेत्त्वेनात्मनेपदं॥ लोटस्थासः। थासस्से। सवाभ्यां वा
मौ। कर्तरि शप्। धिन्विकृण्व्योरच्चेति उप्रत्ययः। तत्संनियोगेन वकारस्य चाकारः॥ तस्य अतो लोपः। अचः परस्मिन्पूर्वविधाविति
स्थानिवद्भावात् लघूपधगुणो न भवति। अत्र सति शिष्टस्वबलीयस्त्वमन्यत्र विकरणेभ्य इति सति शिष्टमपि विकरण
स्वरं बाधित्वा तिङ् एव प्रत्ययाद्युदात्तत्वं॥ राधः॥ असुन्प्रत्ययांतो नित्वादाद्युदात्तः॥ आद्रिर्वज्रं तदस्यास्तीति मतुप्। छंदसीर इति वत्वं॥
संबुद्धौ उगिदचामिति नुम्। हल्ङ्याब्भ्य इति संयोगांतलोपौ॥ मतुवसो रु संबुद्धौ छंदसि इति रुत्वं। विसर्जनीयः॥ आमंत्रितस्य च निघा
तः॥ ॥ अष्टमीमृचमाह॥ नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः॥ जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि॥ ॥ हे इंद्र ऋ
घायमाणं शत्रुवधं कुर्वाणं त्वां रोदसी उभे द्यावापृथिव्यावपि त्वदीयं महिमानं नहि इन्वतः व्याप्तुं न समर्थे इत्यर्थः। तादृशस्त्वं स्वर्वतीः
स्वर्लोकयुक्ता अपः वृष्टिरूपाः जेषः जय प्रेरयेत्यर्थः॥ अपां स्वर्गसंबंधश्चान्यत्राम्नायते दिवः वृष्टिं च्यावयतीति श्रुतं। किंच राष्ट्रप्रदाना

दंतसंपतं दृध्वं अस्मभ्यं क्षीरादिरसप्रदा गाः संधूनुहि स्ववृत्रे स्यन जोहिरण्येन सह हस्तक पशुर्येति समासः समासस्वादंतोदात्तत्वं। त्वा। अनुदात्तं सर्व
भाष्य०१० मित्यनुवृत्तौ त्वामौ द्वितीयाया इति त्वादेशः। गोदसीर दरसमत्व विलाद्या घुदात्तः उगितश्चेति ङीप् उभ प्रातिपदिकस्वरेणांतोदात्तः। आयासं हेका
३८ देशउदात्तः। स पायमाणं वृन हंतीतिक्रुधा अन्येभ्योपि दृश्यंत इति विच् दूनिग्रहणस्य विध्यंतरोपसंग्रहार्थत्वान्नकारलोपाहकारस्य च घका
रः अनघाकृधा भवंतीत्यभूत तद्रुले लोहितादिडाज्भ्यः क्यषिति क्यष्प्रत्ययो भवति। स चाकृतिगणः। लोपश्च हल इत्यनुवृत्तेर्नकारलोप
श्च वा क्यष इत्यात्मनेपदं। लट् शपश्च अपो अदुपदेशात्सार्वधातुकानुदात्तत्वं॥ अपः पित्वादनुदात्तत्वं। क्यषः प्रत्ययस्वरः॥
एकादेशस्योदात्तत्वं। इत्वतः इति ण्यामो इदितो नुम्धातोरिति नुम। अपः पित्वादनुदात्तत्वं। लडादेशस्य ततश्च लसार्वधातुकस्वरेण धातुस्वर
एव शिष्यते। हिचेति निघाति तिङ्ङतिङ इति निघातो न भवति। अपः नः प्रार्थनायां लिङर्थे लेट् तस्य मध्यमपुरुषैकवचनं सिप् इतश्च लोपः
परस्मैपदेष्विति इकारलोपः। कृतेच्छिड्यपि प्राप्ते तदपवादः सिब्बहुलं लेटीति सिप् अडागमस्यानुदात्तत्वाद्धातुस्वर एव शिष्यते। स्तरासामस्तीः
तिस्वर्वत्यः न्यङ्स्वरौ स्वरितावितिस्वरत्राब्दः स्वरितः मतुप्‌छी पापित्वादनुदात्तौ संहितायां स्वरितात्संहितायामनुदात्तानामित्येकश्रुतिः स्वरि
त एव शिष्यते। अपः उदिदमित्यादिना विभक्तेरुदात्तत्वं। धूनुहि धूञ् कंपने। स्वादिभ्यः श्नुः। उतश्च प्रत्ययादसंयोगपूर्वादिति
प्राप्तस्य लुकः छांदसत्वादभावः। अभिवृषभकहस्त्योश्चध्येपु तृतीयसवने घावाकस्य याइस्तोत्रियानुरूपयुगले पुष्टी ता यस्मिन्युगले आश्रुत्कर्ण
तिस्त्रोनुरूपः एषधिति खंडे श्रुधीहवंतिरश्च्या आश्रुत्कर्ण श्रुधी हवमिति सूत्रितं। तस्मिंस्त्रचे प्रथमां सृकेन वमीमत्वाह॥ ॥आश्रुत्कर्ण
श्रुधी हवं नू चिद्दधिष्व मे गिरः॥ इंद्र स्तोममिमं मम कृष्वा युजश्चिदंतरं॥ ॥हे आश्रुत्कर्ण सर्वतः श्रोतारौ कर्णौ यस्य तादृग हे इंद्र हवमस्मदीयमा
ह्वानं नु क्षिप्रं श्रुधि श्रृणु॥ मेमम होतुर्गिरः स्तुतीः चिदधिष्व चित्ते धारय यद्वा च॥ ममम मदीयमिमं स्तोत्रं कृष्वा कुरु सम् युजश्चित्सखिवत्स्वकीय
मस्मकमपि अंतरं कृष्व आसन्नं कुरु॥ यथा तस्य वचनं प्रियं मन्यसे तद्वदस्मदीयस्तुतिष्वपि प्रीतिं कुर्वित्यर्थः॥ आश्रुत्कर्ण। आसमंतात् श्रृणुत इत्या
श्रुतौ क्विप। ह्रस्वस्य पिति कृति तुक्। तादृशौ कर्णौ यस्य। आमंत्रितस्यत्वात् घ्रुदात्तत्वं॥ श्रुधि श्रुश्रवणे। लोटो हि श्रुवः श्र्वचेति विहितस्यापि बहुलं छंदसी
ति लुक्। तत्संनियोगशिष्टत्वाच्छ्नुभावोपि निवर्तते। श्रुश्रृणुपृकृभ्यः छंदसीति हेर्धिरादेशः। सतिशिष्टत्वात् प्रत्ययस्वरः। आमंत्रितं पूर्वमविद्य
मानवदित्यविद्यमानवत्त्वेन पदात्परत्वात् तिङ्ङतिङ इति निघातो न भवति॥ संहितायामन्येषामपि दृश्यत इति दीर्घः॥ हवं। हे स्पर्धायां शब्दे च।
बहुलं छंदसीत्यसंनिमित्तिके संप्रसारणे रूपे पश्चादुकारांतत्वेन ऋदोरबित्यप्प्रत्ययः। अपः पित्वाद्धातुस्वरः॥ नु। संहितायां ऋचि तुनुघमक्षुतङ्कुत्रो
रुष्याणामिति दीर्घः। चित। चादिरनुदात्तः। दधिष्व। दधातेर्लोट्। थासः सेसवाभ्यां वामो अपः श्लुः। अभ्यासस्य ह्रस्वत्वं छंदस्युभयथेत्यार्धधातुक
त्वात्पिर्वा कारादिडागमः। निघातः। मे मम। तवममौ ङसीति मेनेन मपर्यंतस्य ममादेशः। प्रातिपदिकस्वरेणांतोदात्तत्वे प्राप्ते युष्मदस्मदोर्ङसीत्या
द्युदात्तत्वं॥ कृष्व। डुकृञ् करणे। लोट् थासस्से। सवाभ्यां वामौ। अपो बहुलं छंदसीति लुक् सतिशिष्टत्वात् प्रत्ययस्वरः॥ पादादित्वान्न निघातः ३८
युजः। सावेकाच इति विभक्तेरुदात्तत्वं। अंतरं स्वादित्वात्द्युदात्तः॥ ॥दशमीमृचमाह॥ विद्मा हि त्वा वृषंतमं वाजेषु हवनश्रुतं॥ वृषंतम
स्य हूमहे ऊतिं सहस्रसातमां॥ ॥हे इंद्र त्वा विद्म जानीमः। कीदृशं त्वां वृषंतमं कामानामतिशयेन वर्षितारं। वाजेषु संग्रामेषु हवनश्रुतं॥

अस्मदीयस्याह्वानस्य श्रोतारं। वृषंतमस्य अतिशयेन कामादीनां वर्षितुस्तव ऊतिं रक्षामस्मद्विषयामुद्दिश्य हूमहे त्वामाह्वयामः। कीदृशीमूतिं। सहस्र
सातमां अतिशयेन धनसहस्राणां दात्रीं॥ विद्म विदोलटो वेति मसो मादेशः। प्रत्ययस्वरेणांतोदात्तः। द्व्यचोतस्तिङ इति संहितायां दीर्घः। वृषंत
मं। वृषु सेचने। कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः इति कनिन्। नित्वादाद्युदात्तः। तमपः पित्वात्स एव शिष्यते॥ अयस्मयादी 77
नि छंदसीति भत्वेन पदत्वाभावान्नलोपाभावः। वाजेषु। वाजशब्दो वृषादित्वादाद्युदात्तः। हवनश्रुतं। ल्युट् इत्यनुवृत्तौ बहुलं छंदसीति ल्युटि सं
प्रसारणं हवनं। श्रृणोतीति क्विप्तुगागमः। वृषंतस्य। हूमहे। बहुलं छंदसीति संप्रसारणं। शप इत्यनुवृत्तौ बहुलं छंदसीति लुक्। ऊतिं। ऊति यू 1924
तीत्यादिना तोदात्तो निपातितः। सहस्रं सनोतीति सहस्रसाः। षणु दाने। जनसनखनक्रमगमो विट्। विड्वनोरनुनासिकस्यादित्याकारादेशः। कृ
दुत्तरपदप्रकृतिस्वरत्वं। तमपः पित्वात्तदेव शिष्यते॥ ॥एकादशीमृचमाह॥ ॥आ तू न इंद्र कौशिक मंदसानः सुतं पिब॥ नव्यमायुः प्रसू
तिर कृधी सहस्रसामृषिं॥ ॥हे इंद्र क्षिप्रं नोस्मान् प्रत्यागच्छेति शेषः। हे कौशिक। कुशिकस्य पुत्रेंद्र मंदसानः हृष्टो भूत्वा सुतमभिषुतं सोमं
पिब। यद्यपि विश्वामित्रः कुशिकस्य पुत्रः तथापि तद्रूपेणेंद्रस्यैवोत्पन्नत्वात् कुशिकपुत्रत्वमविरुद्धं॥ अयमर्थोनुक्रमणिकायामुक्तः॥ कुशि
कस्त्वैषीरथिरिंद्रतुल्यं पुत्रमिच्छन् ब्रह्मचर्यं चचार तस्येंद्र एव गाथी पुत्रो जज्ञ इति। हे इंद्र नव्यं सर्वैर्देवैः स्तुत्यं कर्मानुष्ठानपरं। आयुर्जीवि
तं प्रसूतिर प्रकर्षेण सु सुष्ठु वर्धय। ततो मां सहस्रसंख्याकलाभोपेतं। ऋषिं अतींद्रियद्रष्टारं कृधि कुरु। तु संहितायां ऋचि तुनुघमक्षुतङ्कुत्रो
रुष्याणामिति दीर्घः। नः संहितायां उदात्तानुदात्तस्य स्वरितः। इंद्र। आमंत्रितत्वेन निघातः। कौशिक। निघातः। मंदसानः। हृष्यन्। मदिस्तुतिमो
दमदस्वप्नकांतिगतिषु। असानजित्यनुवृत्तौ ऋंजिवृधिमंदिसहिभ्यः कित् इति असानच् प्रत्ययः। चित्वादंतोदात्तः। सुतं प्रत्ययस्वरः। नव्यं णुस्तु
तौ॥ अचो यत् गुणः। वांतो यि प्रत्यये इत्यवादेशः। यतोनाव इत्याद्युदात्तत्वं। आयुः इण् सिनिदित्यनुवृत्तौ एतेर्णिच्चेत्यसि प्रत्ययः। णित्वाद्वृद्ध्या
यादेशौ। नित्वादाद्युदात्तत्वं। सु। निपातस्य चेति संहितायां दीर्घत्वं। तिर तरतेर्व्यत्ययेन शः। ऋत इद्धातोरिति इत्वं। अतो हेरिति हेर्लुक्। कृधि। कृ
ञ् करणे बहुलं छंदसीति शपो लुक्। श्रुश्रृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः। सहस्रसां। ऋषिं। ऋषी गतौ इगुपधात्किदित्यनुवृत्तौ इगुपधात्कित्। कित्वा
द्गुणाभावः। नित्वादाद्युदात्तत्वं। प्रवर्ग्ये परि त्वेत्यभिष्टुयात्॥ स्तुत्वोदकमिति खंडे परि त्वा गिर्वणो गिरो धिङ्क्ष्योरद्धा उकथ्यं वच इति सूत्रितं।
तथा हविर्धानोप्रवर्तमाने सेयं परिधानीया। हविर्धाने प्रवर्तयंतीति खंडे परि त्वा गिर्वण इति परिदध्यादिति सूत्रितं। तथा ब्राह्मणं च। परि
त्वा गिर्वणो गिर इत्युक्तमया परिदध्यादिति। ॥द्वादशीमृचमाह॥ ॥परि त्वा गिर्वणो गिर इमा भवंतु विश्वतः॥ वृद्धायुमनु वृद्धयो जुष्टा भवं
तु जुष्टयः॥ ॥हे गिर्वणः अस्मदीयस्तुतिभागिंद्र विश्वतः सर्वेषु कर्मसु प्रयुज्यमाना इमा गिरोस्मदीयस्तुतयस्त्वां परिभवंतु सर्वतः
प्राप्नुवंतु कीदृश्यो गिरः। वृद्धायुमनु। प्रवृद्धेनायुष्येणोपेतं त्वामनुसृत्य वृद्धयो वर्धमानाः। किं चैता गिरः जुष्टास्त्वया सेविताः सत्यो जुष्टयो
स्मासु प्रीतिहितवो भवंतु॥ गिर्वणः गीर्भिर्वन्यत इति गिर्वणः वन षण संभक्तौ। सर्वधातुभ्योसुन्। उपधाया दीर्घाभावश्छांदसः। आमंत्रि
तनिघातः। विश्वतः। लित्वाति प्रत्ययात्पूर्वस्योदात्तत्वं। वृद्धायुं। वृधु वृद्धौ। प्रत्ययः। उदितो वेति इट्। क्तप्रत्यये विकल्पितत्वाद्घस्य विभाषेति
निष्ठायामिडभावः। प्रत्ययस्वरः। इण् गतौ। छंदसीति णः इति उण्। णित्वाद्वृद्धिः। आयादेशः। वृद्धमायुर्यस्य बहुव्रीहौ पूर्वपदप्रकृतिस्

भाष्य॰प्र॰ रत्वं। इदुयः। इधेः कित्त्वादिति तुक्। तथासि घुसरकसे पुत्रेति। इडभावः। नित्वादाद्युदात्तत्वं। तुरणः शीघ्रादितो निघायामिति इडभावः। तुरापितर इत्यनुवर्तमाने निर्मंत्र इत्याद्युदात्तत्वं। तुरयः। तुरी प्रीती सेवनयोः। क्विन्। तितुत्रेति इडभावः। नित्वादाद्युदात्तः॥ इति प्रथमस्य प्रथमे दशमो वर्गः॥ ॥ इंद्रं विश्वा इत्यष्टर्चं

३९ सूक्तं स्य मधुच्छंदसः पुत्रो जेता नाम क ऋषिः। तथा चानुक्रांतं इंद्रं मष्टौ जेता माधुच्छंदस इति। छंदस्त्वानुष्टुभमिति पूर्वत्रोक्तं। इंद्रो देवता नुवर्तते विनियोगस्तु महाव्रते निष्केवल्ये कृत्स्नसूक्तं शंसनीयं। कुरु इति खंडे एकेन सूत्रितं। इंद्रं विश्वा अवीवृधन्नित्यानुष्टुभं तस्य प्रथमायाः पूर्वमर्धर्चं व्रात्स्यो तरेणार्धर्चेनो तरस्याः पूर्वमर्धर्चं व्यतिषजति पादैः पादाननुष्टुप्कारं प्रागुत्तमाया इति ब्राह्मणं च प्रथमारण्यके पठ्यते। प्र वो महइतिखंडे इंद्रं विश्वा अवीवृधन्निति परानुष्टुभं गा इति। तथा षष्ठस्य पंचमे हन्यनिष्केवल्ये शस्त्रे इंद्रं विश्वा अवीवृधन्नित्यनुरूपस्तृचः। स्तोमेव धर्मान इति खंडे सूत्रितं॥ उपनोहरिभिः सुतमिंद्रं विश्वा अवीवृधन्निति॥ ॥अस्मिन्सूक्ते प्रथमामृचमाह॥ इंद्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः॥ रथीतमं रथीनां वाजानां सत्पतिं पतिं॥ ॥विश्वाः सर्वाः गिरोऽस्मदीयाः स्तुतयः इंद्रमवीवृधन् वर्धितवंत्यः कीदृशमिंद्रं समुद्रव्यचसं समुद्रवद्व्याप्तवंतं रथीनां रथयुक्तानां योद्धॄणां मध्ये रथीतमं अतिशयेन रथयुक्तं। वाजानामन्नानां पतिं स्वामिनं सत्पतिं सतां सन्मार्गवर्तिनां पालकं विश्वाः विशेः क्वन्नित्यस्वरः। अवीवृधन् वृधेर्णिचि चङि ऊर्दित्यनुवर्तमाने नित्यं छंदसीति कृकारस्य ऋकारविधानात् लघूपधगुणाभावः। निघातस्वरः। समुद्रव्यचसं व्यचेरसुन् गाङ्कुटादिभ्योऽञ्णिन्ङिदिति प्राप्तस्य ङित्त्वस्य व्यचेः कुटादित्वमनसीति निषेधो ग्रहिज्यावयिव्यधीत्यादिना ङितिविधीयमानं संप्रसारणं न भवति समुद्रव्यचाइव व्यचो यस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ रथीतमं रथीनां रथशब्दादुत्पन्नस्येन ई छांदसं दीर्घत्वं प्रत्ययस्वरेणोदात्तत्वं च॥ वाजानां घञाद्युदात्तत्वं सत्पतिं पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं॥ ॥द्वितीयामृचमाह॥ ॥सख्ये त इंद्र वाजिनो मा भेम शवसस्पते॥ त्वामभि प्रणोनुमो जेतारमपराजितं॥ हे शवसस्पते बलस्य पालक इंद्र ते तव सख्ये अनुग्रहप्रयुक्ते सखित्वे वर्तमाना वयं वाजिनोन्नवंतो भूत्वा मा भेम शत्रुभ्यो भीतिं प्राप्ताः मा भूम अतस्त्वामभयहेतुं अभि प्रणोनुमः सर्वतः प्रकर्षेण स्तुमः कीदृशं जेतारं युद्धे युज्जयशीलं। अपराजितं क्वापि पराजयरहितं। सख्ये सख्युः कर्म सख्यं सख्युर्यः प्रत्ययस्वरः॥ वाजिनः वाजो न्नमेषामस्तीति वाजिनः प्रत्ययस्वरः भेम ञिभी भये लुङ् लमबहुवचनं मसनित्यं ङित इति सलोपः बहुलं छंदसीति च्लेर्लुक्॥ छंदस्युभयथेति तिङ आर्धधातुकत्वेन ङित्त्वाभावाद्गुणः। न माङ्योग इत्यडागमप्रतिषेधः। शवसः षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेष्विति विसर्जनीयस्य संहितायां सत्वं सस आमंत्रितपरांगवद्भावेन पदद्वयनिघातः। नोनुमः णु स्तुतौ णोनूयते इति न तं यङो लुक्प्रत्ययलक्षणेन सन्यङोरिति द्विर्भावः गुणोयङ्लुकोरित्यभ्यासस्य गुणः प्रत्ययलक्षणेन धातुसंज्ञायां लोटो मस अदादिवद्भावाच्छपो लुक् उपसर्गादसमासेपि णोपदेशस्येति संहितायां णत्वं। जेतारं जेतृशब्दस्ताच्छील्यादिषु तृन् अनित्यादिर्नित्यमित्याद्युदात्तत्वं॥ अपराजितं अव्ययपूर्वपदप्रकृतिस्वरत्वेन नञ उदात्तत्वं॥ ॥तृतीयामृचमाह॥ ॥ पूर्वीरिंद्रस्य रातयो न वि दस्यंत्यूतयः॥ यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघं॥ इंद्रस्य संबंधिन्यो रातयो धनदानानि पूर्वीरनादिकालसिद्धाः प्रभूता वा अस्येंद्रस्य सर्वदा यष्टृभ्यो धनदानमेव स्वभाव इत्यर्थः। एवं सति इदानींतनो पि यजमानः स्तोतृभ्यः ऋत्विग्भ्यो गोमतो गोसहितस्य वाजस्यान्नस्य पर्याप्तं मघं धनं यदि मंहते दक्षिणारूपेण ददाति तदानीं ऊतयो वह धनदानपूर्विका णी इंद्रस्यासं ३९

रक्षणानि न निदस्यंति। विक्षेपेण नोपक्षीयंते॥ मघं रेक्णइत्यादिषु षाविंशतिसंख्याकेषु धननामसु मघशब्दः पठितः॥ दातिदासतीत्यादिषु दशसु दानकर्मसु मंहत इति पठितं। पूर्वीः पुरुशब्दस्य वोतो गुणवचनादिति ङीष्। आघस्योकारस्य दीर्घश्छांदसः जसि दीर्घाज्जसि चेति निषेधं बाधित्वा वा छंदसीति पूर्वसवर्णदीर्घत्वं। ङीषः प्रत्ययस्वरेणोदात्तत्वं। रातयः मंत्रे वृषेषपचमनविदभूवीरा उदात्त इति क्तिन उदात्तत्वं। दस्यंति दसु उपक्षये दिवादिभ्यः श्यन्। निघातः। ऊतयः ऊतियूतीत्यादिना क्तिनुदात्तः। यदि निपातत्वादाद्युदात्तः। संहितायां निपातस्य चेति दीर्घत्वं। स्तोतृभ्यः ष्टुञ् स्तुतौ। धात्वादेः षः सः तृच् श्चित्वादंतोदात्तत्वं। मंहते। शपः पित्वादनुदात्तत्वं॥ तिङश्च लसार्वधातुकस्वरेण तिङ इति निघातो न भवति। निपातैर्यद्यदिहंतेति निषेधात्॥ अभिपूर्वं पचकस्याऽस्य षुतृतीयसवने च्छावाकस्य पुरां भिंदुर्युवा कविरिति स्तोत्रियस्तृचः। तथा च सूत्रितं। एकाषित्कपचस्य पुरां भिंदुर्युवा कविरपाद्वसिराधस इति तस्मिंस्तृचे प्रथमां सूक्तेचतुर्थीमृचमाह॥ ॥पुरां भिंदुर्युवा कविरमितौजा अजायत॥ इंद्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः॥ ॥अयमिंद्र उच्यमानगुणयुक्तो जायत संपन्नः कीदृक्गुणक इति तदुच्यते। पुरामसुरपुराणां भिंदुर्भेत्ता युवा कदाचिदपि वलीपलितादिवार्धकरहितः। कविर्मेधावी। अमितौजाः प्रभूतबलः विश्वस्य कर्मणः कृत्स्नस्य ज्योतिष्टोमादेर्धर्ता पोषकः वज्री यजमानरक्षणार्थं सर्वदा वज्रयुक्तः। पुरुष्टुतः बहुविधैस्तत्कर्मणि स्तुतः भिंदुः भिदिर् विदारणे कुरित्यनुवृत्तौ॥ मृभिदिव्यधिगृधिधृषिहृषिभ्य इति कुप्रत्ययः। तस्य छंदस्युभयथेति सार्वधातुकसंज्ञायां रुधादिभ्यः श्नम् मित्वादंत्यादचः परो भवति श्नसोरल्लोपः॥ अनुस्वारस्य परसवर्णो अचः परस्मिन्पूर्वविधौ स्थानिवद्भावस्य न पदांतेत्यादिना निषेधः। युवा युमिश्रणामिश्रणयोः कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन् नित्वादाद्युदात्तः। कविः कुङ् शब्दे अच इति इः इति इ प्रत्ययस्वरः अमितौजाः अमितशब्दस्याव्ययपूर्वपदप्रकृतिस्वरत्वं॥ बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेवावशिष्यते। विश्वस्य अशूप्रुषिलटीत्यादिना क्वन्। नित्वादाद्युदात्तः। कर्मणः। अन्येभ्योपि दृश्यत इति मनिन्। नित्स्वरः। धर्ता। तृचः चित्वादंतोदात्तः। वज्री। मत्वर्थीय इनिः प्रत्ययस्वरः। पुरुष्टुतः स्तुतस्तोमयोश्छंदसीति षत्वं बहुप्रदेशे पुरुस्तुतः। थाथघञ्क्ताजबित्रकाणामिति अंतोदात्तत्वं। तृतीया समासे हि थाथादिस्वरापवादः तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः स्यात्॥ ॥पंचमीमृचमाह॥ ॥त्वं वलस्य गोमतोऽपावरद्रिवो बिलं॥ त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः॥ बलनामकः कश्चिदसुरो देवसंबंधिनीर्गा अपहृत्य कस्मिंश्चिद्बिले गोपितवान् तदानीमिंद्रस्तद्बिलं स्वसैन्येन समावृत्य तस्माद्बिलाद्गा निःसारयामास॥ तदिदमुपाख्यानं इंद्रो बलस्य बिलमपोर्णोदित्यादिब्राह्मणेषु मंत्रांतरेषु च प्रसिद्धं तदेतदत्र हृदि निधायायं मंत्रः प्रवर्तते॥ हे अद्रिवः वज्रयुक्तेंद्र त्वं गोमतो बलस्य गोभिर्युक्तस्य बलनामकस्यासुरस्य संबंधि बिलं अपावः स्वसैन्यमुखेपावृतवान् सि तदानीं तुज्यमानासो बलेन हिंस्यमाना देवाः अबिभ्युषः तदीयरक्षया बलाद्भीताः संतः त्वामाविषुः प्राप्तवंतः। अथ निपातत्वादाद्युदात्तः। अवः वृञ् वरणे। लङ् तिप् इतश्च लोपः। स्वादिभ्यः श्नुः। तस्य बहुलं छंदसीति लुक् गुणः रपरत्वं हल्ङ्यादिलोपः। विसर्जनीयः। अडागमः। अद्रिवः। अद्रिरस्यास्तीति मतुप् छंदसीर इति वत्वं संबोधने उगिदचामिति नुम्। हल्ङ्यादिसंयोगांतलोपौ। मतुवसो रु संबुद्धौ छंदसीति रुत्वं। बिलं नाबिपर्यस्या

79
1924

आ॰ पृ॰ ४०

निसंतस्येत्याद्युदात्तत्वं। अबिभ्युषः। ञिभी भये। लिटः क्वसुः। द्विर्भावः। अभ्यासस्य ह्रस्वत्वं। तस्येकस्थेतिलिटः कसकारादेशः। क्रादिनियमात् प्राप्तइडुवस्वेकाजाद्घसामितिनियमान्निवर्तते। वसोः संप्रसारणं परपूर्वत्वं। उवसिवत्ति यणां चेति पत्वं। अविभ्युषः अविभ्युषित्यादिना प्राप्तमियङादेशं बाधित्वा एरनेकाच इति यणादेशः। नञ्समासः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। तुग्र्यमानासः। तुजिर्हिंसार्थात्परस्य कर्मणि लटः शानच्। सार्वधातुकं यगिति यक्। तस्मादुपदेशादनुदात्तस्य लसार्वधातुकस्यानुदात्तत्वं। यकारएव प्रत्ययस्वरः शिष्यते। आविदुः। अवरक्षणादिषु अस्मादुणादिकस्तुंगिन्तःसस्य सितच्च्योविदिभ्यश्चेति तुसच्चि इडागमः। आउत्तादीनामित्युडागमः। आद्योऽप्रत्ययस्योरितिषत्वं॥ ॥षष्ठीमृचमाह॥ ॥तवाहं शूर रातिभिः प्रत्यायं सिंधुमावदन्। उपातिष्ठंत गिर्वणो विदुष्टे तस्य कारवः॥ हे शूर संग्रामे शौर्ययुक्तेंद्र तव रातिभिः त्वदीयैर्धनदानैर्निमित्तभूतैः अहं होताप्रत्यायं त्वां पुनरागतोस्मि पुरा बहुपुकर्म कृत्वा धनस्य लब्धत्वादस्मिन् कर्मणि प्रत्यागमनमित्युच्यते। किं कुर्वन्। सिंधुं स्यंदमानं सोममावदन्। सर्वेभ्यः कथयन्। अस्मिन्। सोमयागे त्वदीयधनदानकीर्तिं प्रकटयन्नित्यर्थः। हे गिर्वणः गीर्भिर्वननीयेंद्र कारवः कर्तारः कर्तव्यस्य यज्ञमानादयुपातिष्ठंत पुरस्थनलाभार्थं त्वामुपस्थितवंतः। उपस्थाय च तस्य तादृशस्योदार्योपेतस्य तेतव धनदानं विदुर्जानंति गिर्वणः संज्ञायां स्यात्। छंदसि भूते। गिर्वणादेवो भवति गीर्भिरेनं वनयंतीति। रेभोजरितेत्यादिषु त्रयोदशसु स्तोतृनामसु कारुशब्दः पठितः। तवयुष्मदस्मदोर्ङसीत्या द्युदात्तत्वं। रातिभिः। मंत्रे वृषेत्यादिनाक्तिन्नुदात्तः। आयं इणो लङ् इत्तस्थमिपामित्यामादेशः। अदिप्रभृतिभ्यः शप इति शपो लुक्। अडागमः। वृध्या यादेशौ तिङ्ङतिङ इति निघातः। सिंधुं। स्यंदेः प्रस्रवणे निदित्यनुवृत्तौ। स्यंदेः संप्रसारणं धश्चेति उ प्रत्ययो धकारश्चांतादेशः। नित्वादाद्युदात्तः। आवदन्। वदव्यक्तायां वाचि लटः शतृ। शपः पित्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वर एव शिष्यते। आङा सह कुगतिप्रादय इति समासः। कृदुत्तरपदप्रकृतिस्वरत्वं। अतिष्ठंत। उपान्मंत्रकरण इत्यात्मनेपदं। गिर्वणः। वनषण संभक्तौ। असुन्। आमंत्रितस्य चेति निघातः। विदुः। विद ज्ञाने लट्। अदिप्रभृतिभ्यः शप इति शपो लुक्। विदो लटो वेति झेर्जुस्। पादादित्वान्न निघातः। संहितायां युष्मत्तत्ततक्षुःष्वंतः पादमिति षत्वं। युष्मत्तत्ततक्षुःष्वंतः पादं इति षत्वं॥ छंदसि पिकलस्य नकारस्य घृत्वं। तस्य सावेकाच इति विभक्तेरुदात्तत्वं प्राप्तं न गोश्वन्साववर्णेति निषिध्यते॥ कारवः। कृवापाजीत्यादिना उण्प्रत्ययस्वरः॥ सप्तमीमृचमाह॥ ॥मायाभिरिंद्र मायिनं त्वं शुष्णमवातिरः। विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर॥ ॥हे इंद्र त्वं मायिनं नानाविधकपटोपेतं शुष्णं भूतानां शोषणहेतुमेतन्नामकमसुरं मायाभिः तत्प्रतिकूलैः कपटविशेषैः। तद्वानद्वधोपायगोचरप्रज्ञाभिः अवातिरः हिंसितवानसि। एतच्च यास्केनोक्तं। इंद्रः शुष्णं जघानेति। शुष्णं पिप्रुमित्यादिमंत्रेषु चायमर्थो विस्पष्टः। मेधिराः मेधावंतोनुष्ठातारः तस्य तादृशस्य ते तव महिमानं विदुर्जानंति। तेषां जानतामनुष्ठातॄणां श्रवांस्यन्नानि। उत्तिरवर्धय। केतुः केनरित्यादिषु कादशस्य प्रज्ञानामसु मायावयुनमिति पठितं। श्रवः शब्दं यास्को निर्वक्ति॥ श्रवउत्तमनं नाम श्रूयत इति सतउतिमायाभिः। माङ्माने। माङ्मायास सिसृभ्यो यत्ययप्रत्ययस्वरः। मायिनं। माया अस्यास्तीति मायी व्रीह्यादिभ्यश्चेति इनि प्रत्ययः प्रत्ययः स्वरः। शुष्णं। शुष शोषणे। अस्मादंतर्भावितण्यर्थान्निदित्यनुवृत्तौ तृषिशुषिरसिभ्यः कित्ति न प्रत्ययः। नित्वादाद्युदात्तः। अतिरः। तरतेर्लङि व्यत्ययेन शः। तस्य ङित्वेन गुणाभावात्। ऋतइद्धातोरिति इत्वं रपरत्वं। विदुष्टे तस्य गतमंत्रे गतं। मेधिराः। मेधृ मेधाहिंसनयोः। औणादिक इरन्। नित्वादाद्युदात्तः। श्रवांसि। नविषयस्यादाद्युदात्तः॥ ॥अष्टमीमृचमाह॥ ॥इंद्रमीशानमोजसाभि स्तोमा अनूषत। सहस्रं यस्य रातय उत वा संति भूयसीः॥ स्तोमाः स्तोतारः ऋत्विजः ओजसा बलेन ईशानं जगतो नियामकमिंद्रं अभ्यनूषत सर्वतः स्तुतवंतः। यस्येंद्रस्य रातयो धनदानानि सहस्रसंख्योपेतानि संति। उत वा। अथवा भूयसीः सहस्रसंख्याया अप्यधिकाः संति तमिंद्रमिति पूर्वत्रान्वयः। इंद्रं ऋज्रेंद्रेत्यादिनारन्। नित्वादाद्युदात्तः। ईशानं। लटः शानच्। आदिप्रभृतिभ्यः शप इति शपो लुक्। धातोरनुदात्तेत्वात्। तास्यनुदात्तेत्यादीना शानचोनुदात्तत्वं॥ ओजसा। नब्विषयत्वादाद्युदात्तः। स्तोमाः। आर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्निति मन्प्रत्ययः नित्वादाद्युदात्तः। अनूषत। णु स्तुतौ। णो नः। लङ्। व्यत्ययेन झस्य अदादेशः। कुटादित्वेन सिचो ङित्वाद्गुणाभावः। इट्। ईडभावश्छांदसः। दीर्घत्वं च अडागमः। सहस्रं। कर्दमादीनां चेति द्वितीयाक्षरमुदात्तं। रातयः। मंत्रे वृषेत्यादिना क्तिन्नुदात्तः। उत। प्रातिपदिकस्वरः। वा चादिरनुदात्तः। संति। प्रत्ययाद्युदात्तत्वं तिङ्ङतिङ इति निघातो न भवति। यद्वृत्तान्नित्यमिति प्रतिषेधात्। सहित्यव हितोपि भवतीत्युक्तं। भूयसीः सहस्राद्बहुतरेण ब स्युः भूयस्यः। अत्र विभक्तिव्यत्यस्य सहस्रस्य सन्निधिबलादुपपदत्वप्रतीतेः द्विवचनविभज्योपपदे तरबीयसुनाविति बहुशब्दादीयसुन्॥ बहोर्लोपो भू च बहोरितीकारलोपः प्रकृतेर्भू आदेशश्च। ईयसुनो नित्वादाद्युदात्तः। उगितश्चेति ङीप्॥ ॥इति प्रथमस्य प्रथमे एकविंशो वर्गः॥ ॥इति ऋक्संहिताभाष्ये प्रथमे मंडले तृतीयोनुवाकः॥ ॥अग्निं दूतमित्यादिकं द्वादशर्चं प्रथमं सूक्तं तस्य चतुर्थानुवाके षड्सूक्तानि तत्र कण्वपुत्रो मेधातिथिर्ऋषिः। अपवादाभावादनुवर्तमानं प्रागधिरण्यस्तूपाद्दृक्कैः गायत्रमेव छंदः। अग्निं देवताकत्वं विस्पष्टं॥ अत एवानुक्रम्यते॥ अग्निं द्वादश मेधातिथिः काण्व आग्नेयमग्निनेति पादो द्वयग्निर्देवतो निर्मथ्य आवेहनीये चेति। विनियोगस्तु प्रातरनुवाक आग्नेये क्रतौ गायत्रे छंदस्यग्निं दूतमिति सूक्तं। अथैतस्यारम्भोनि विवासकाल इति खंडे अग्निमीळेग्निं दूतमिति सूत्रितं॥ तथा पृष्ठ्यषडहस्य द्वितीयेहनि इदमेव सूक्तमाज्यशस्त्रं। पृष्ठ्यस्याभिप्लवेनोक्ते अहनी इति खंडे सूत्रितं अग्निं दूतमिति द्वितीय इति दर्शपूर्णमासयोः सामधेनी षग्निं दूतमित्येका नमः प्रवक्त इति खंडे सूत्रितं॥ इळेन्यो नमस्यस्तिरोग्निं दूतं वृणीमह इति॥ ॥अस्मिन्सूक्ते प्रथमामृचमाह॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं॥ अस्य यज्ञस्य सुक्रतुं॥ ॥अग्नेर्दूतत्वमेतन्मंत्रव्याख्याने तैत्तिरीयब्राह्मणे समाम्नायते॥ अग्निर्देवानां दूत आसीदुशना काव्योसुराणामिति॥ तादृशं देवदूतमग्निं अस्मिन् कर्मणि वृणीमहे॥ संभजामः। कीदृशं होतारं देवानामाह्वातारं विश्ववेदसं सर्वधनोपेतं। अस्य प्रवर्तमानस्य निष्पादकत्वेन सुक्रतुं शोभनकर्माणं॥ शोभनप्रज्ञं वा॥ मघमित्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु वेदसशब्दः पठितः॥ होतारं ह्वेञ् स्पर्धायां शब्दे च॥ ताच्छील्यादिषु तृन्॥ बहुलं छंदसीति संप्रसारणे परपूर्वत्वे गुणः नित्वादाद्युदात्तः॥ विश्ववेदसं बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं अस्य ऊडिदमित्यादिना विभक्तेरुदात्तत्वं॥ सुक्रतुं क्रत्वादयश्चेत्याद्युदात्तत्वं॥ ॥द्वितीयामृचमाह॥ ॥अग्निमग्निं हवीमभिः सदा हवंत विश्पतिं। हव्यवाहं पुरुप्रियं॥ यद्यप्यग्निः स्वरूपेणैक एव तथापि प्रयोगभेदादाहवनीयादिस्थानभेदात्पावकादिविशेषणभेदाद्वा बहुविधत्वमभिप्रेत्याग्निमग्निमिति वीप्सा तं हवीमभिः आह्वानकरणैर्मंत्रैः सदा हवंत। निरंतरमनुष्ठातारः आह्वयंति॥ कीदृशं विश्पतिं। विशां प्रजानां होत्रादीनां पालकं॥ हव्यवाहं यजमानसमर्पितस्य हविषो देवान् प्रति वोढारं पुरुप्रियं बहूनां प्रीत्यास्पदं॥ अग्निमग्निं। नित्यवीप्सयोरिति वीप्सायां द्विर्भावः॥ तस्य परमाम्रेडितमिति उत्तरस्याम्रेडितसंज्ञायां अनुदात्तं चेत्यनुदात्तत्वं। हवीमभिः ह्वेञ् स्पर्धायां शब्दे च। आह्वानकरणभूतेषु स्तव्याः ४०

81
1924

भा० प्र०
४१

पारस्यातं व्यात्वर्त्वं च विवक्षया अन्येभ्योपि दृश्यंत इति कर्तरि मनिन् ॥ तस्य छांदस ईडागमः बहुलं छंदसीति धातोः संप्रसारणं परपूर्वत्वं गुणावादेशौ ॥
निलादाद्युदात्तत्वं ॥ सदा ॥ सर्वैकान्येत्यादिना सर्वशब्दाद्दाप्रत्ययः ॥ सर्वस्य सोन्यतरस्यां दीति स भावः ॥ प्रत्ययेनाद्युदात्तत्वं ॥ हवंत ॥ ह्वेञो लङि तस्यांता
देशः ॥ टेरेत्वाभावश्छांदसः ॥ अपि च बहुलं छंदसीति संप्रसारणं ॥ तिङ्ङतिङ इति निघातः ॥ विश्पतिं ॥ पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरे प्राप्ते परादि
श्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं ॥ हव्यवाहं ॥ वह प्रापणे ॥ वहश्चेति ण्विप्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वं पुरूणां प्रियं समासांतोदात्तत्वं ॥ ॥
तृतीयामृचमाह ॥ अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे ॥ असि होता न ईड्यः ॥ हे अग्ने जज्ञानः अरण्योरुत्पन्नः त्वं वृक्तबर्हिषे आस्तरणार्थं छिन्न
न बर्हिषा युक्ताय तं यजमानमनुग्रहीतुमिह कर्मणि हविर्भुजो देवाना वह ॥ नो स्मदर्थं होता देवानामाह्वाता त्वमीड्यः स्तुत्योसि ॥ देवान् ॥ नित्यं संहितायां
दीर्घादटि समानपाद इति रुत्वं ॥ आतोटि नित्यमित्यनुनासिकभावः ॥ जज्ञानः ॥ जनी प्रादुर्भावे ॥ लिटः कानच् ॥ गमहनेत्युपधालोपः ॥ द्विर्वचनेचीति तस्य
स्थानिवद्भावाद्द्विर्वचनं ॥ चित्वादंतोदात्तः ॥ वृक्तबर्हिषे ॥ ओव्रश्चू छेदने ॥ निष्ठेति क्तप्रत्ययः ॥ यस्य विभाषेतीट्प्रतिषेधः ॥ वृक्तं बर्हिर्येन तस्मा यजमानाय येन वा
कृत्विता ॥ बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥ असि ॥ अस्तेः सिप् ॥ अदिप्रभृतिभ्यः शप इति शपो लुक् ॥ तासस्त्योर्लोप इति सकारस्य लोपः ॥ पादादित्वान्न
निघातः ॥ होता ॥ ह्वयतेस्ताछील्यादिषु तृन् ॥ बहुलं छंदसीति संप्रसारणं ॥ नित्वादाद्युदात्तः ॥ ईड्यः ॥ ईड स्तुतौ ॥ ऋहलोर्ण्यत् ॥ तित्स्वरिते प्राप्ते ॥ ईडवंदवृ
शंसदुहां ण्यत इत्याद्युदात्तत्वं ॥ ॥ चतुर्थीमृचमाह ॥ ॥ ताँ उशतो वि बोधय यदग्ने यासि दूत्यं ॥ देवैरा सत्सि बर्हिषि ॥ हे अग्ने यस्मात्कारणात् दू
त्यं यासि देवानां दूतकर्म प्राप्नोषि ॥ तस्मात्कारणात् उशतो हविः कामयमानान् ॥ देवान् हविः स्वीकारार्थं विबोधय ॥ विबोध्य च बर्हिष्यास्तीर्णे कर्मणि दे
वैः तैर्देवैः सह आ सत्सि आसीद ॥ आगत्योपविश ॥ तान् ॥ दीर्घादटि समानपाद इति संहितायां रुत्वं ॥ आतोटि नित्यमनुनासिकभावः ॥ उशतः ॥ व
श कांतौ ॥ लटः शतृ ॥ अदिप्रभृतिभ्यः शप इति शपो लुक् ॥ ग्रहिज्येत्यादिना संप्रसारणं ॥ शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं ॥ यासि ॥ यद्वृत्ता
न्नित्यमिति निघातप्रतिषेधः ॥ दूतस्य भागः कर्म वा दूत्यं ॥ दूतस्य भागकर्मणी इति यत् ॥ तस्य तित्स्वरितापवादत्वेन यतोनाव इति प्राप्त आद्युदात्त
त्वं सर्वे विधयः छंदसि विकल्प्यंत इति निवर्तते ॥ अतस्तित्स्वरितमित्येव भवति ॥ शेषनिघातः ॥ सत्सि ॥ सीदसि ॥ षद्लृ विशरणगत्यवसादनेषु ॥ लटः
सिप् ॥ शपो बहुलं छंदसीति लुक् ॥ न तु मतांगस्येति प्रत्ययलक्षणप्रतिषेधात् पाघ्रेत्यादिना सीदादेशो न भवति ॥ बर्हिषि ॥ बृह वृद्धौ ॥ बृंहेर्नलो
पश्चेति इस्प्रत्ययः ॥ प्रत्ययस्वरेण इकार उदात्तः ॥ ॥ पंचमीमृचमाह ॥ घृताहवन दीदिवः प्रति ष्म रिषतो दह ॥ अग्ने त्वं रक्षस्विनः ॥ हे घृता
हवन घृतेनाहूयमान दीदिवो दीप्यमानाग्ने त्वं रक्षस्विनो रक्षोयुक्तान् रिषतो हिंसकान् शत्रून् प्रति अस्माकं प्रतिकूलान् दह ॥ सर्वथा भस्मीकुरु ॥
घृतेन आहूयते स्मिन्निति करणाधिकरणयोश्चेत्यधिकरणे ल्युट् ॥ अत्र तु होतेरविवक्षितकर्मत्वेनाकर्मकत्वात् घृतस्य करणत्वमेव न तु कर्मत्वं
॥ अतो नेयं तृतीया च होश्छंदसीति कर्मणि तृतीया ॥ किंतु कर्तृकरणयोस्तृतीयेति करणवाचिन्येव ॥ अतः कर्तृकरणे कृता बहुलमिति समासः
॥ तत्र पूर्वपदप्रकृतिस्वरापवादे कृदुत्तरपदप्रकृतिस्वरे प्राप्ते पादिकाबरुणाभ्यामेव कृते सति पश्चाद्विभक्त्युत्पत्त्यामामंत्रितस्य चेत्याद्युदात्तत्वं ॥
दीदिवः ॥ दीव्यतेर्लिटः क्वसुः ॥ तस्य वस्वेकाजाद्घसामिति नियमादिडभावः ॥ द्विर्वचनं हलादिः शेषः ॥ उच्चरवकारस्य लोपो व्योर्वलीति लोपः ॥ क्वसः ४१
कित्वाद्गुणाभावः ॥ तुजादीनां दीर्घोभ्यासस्येति दीर्घत्वमभ्यासस्य ॥ संबुद्धौ ॥ उगिदचामिति नुम् ॥ संयोगांतस्य लोप इति सकारलोपेन कारस्य म

तुवसोः संबुद्धौ छंदसीति रुत्वं विसर्गः ॥ पदात्परत्वादामंत्रितसमानाधिकरणेन निघातः ॥ ननु पूर्वामंत्रितस्याविद्यमानत्वात् पादादित्वेन न निघातोपपत्तिः ॥ ना
च नामंत्रिते समानाधिकरणे सामान्यवचनमित्यविद्यमानत्वप्रतिषेधः ॥ उभयोरप्यग्निपदविशेषणत्वेन विशेषवचनत्वात् ॥ तत एव परस्परमनन्वयेन सा
मर्थ्यान्समर्थः पदविधिरिति च नियमात्पूर्वस्य न परांगवद्भावः ॥ येनैकपदेन निघातः स्यात् ॥ तत एव शीउरं तादिते सरस्वतीत्यादौ पृथक्पृथगाद्युदात्तत्वमि 83/1924
ति उच्यते ॥ अत्र दीदिव इति नाग्निपदस्य विशेषणं किंतु घृताहवनपदस्यैव द्योतनार्थं घृताहवन इति विशेष्यत्वेन विवक्षितत्वात् ॥ विशिष्टस्य तु पश्चाद
ग्निविशेषणता ॥ तत्र दीदिवः परं प्रति घृताहवनपदस्य विशेष्यत्वादामंत्रिते समानाधिकरण इत्यविद्यमानत्वप्रतिषेधान्निघातोपपत्तिः ॥ अत एव
परस्परविशेषणविशेष्यभावेन सामर्थ्यात् सुबामंत्रिते इति परांगवद्भावे विशेषनिघातेनापि स्वरोपपत्तिरिति ॥ ईडे रंत इत्यादौ तु नैवं परस्परान्वय
इति विशेषः ॥ रिषतः ॥ रुष रिष हिंसार्था इति भौवादिकस्य लटः शत्रादेशे शपि छांदसो गुणाभावः ॥ तौदादिकस्य वा रुशरिशहिंसायामित्यस्य
छांदसं पत्वं ॥ विकरणस्य शस्य ङित्वाद्गुणाभावः ॥ रक्षस्विनः ॥ रक्षस्शब्दात् अस्मायामेधास्रजो विनिरिति मत्वर्थीयो विनिः ॥ तस्य प्रत्ययाद्युदात्तत्वं ॥ अग्निमं
थने ॥ अग्निनाग्निः समिध्यत इत्येषानुवचनीया ॥ प्रातर्वैश्वदेव्या प्रोषित इति खंडे सूत्रितं ॥ अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निनेति ॥ एषैवा
ग्निमंत इत्यस्यानुवाक्या ॥ अथाग्नेय्य इति खंडे साग्नावग्निं प्रणयन् इत्युपक्रम्य सूत्रितं ॥ यद्वावयं प्रमिनाम व्रतान्यग्निनाग्निः समिध्यत
इति ॥ ॥ तामेतां षष्ठीमृचमाह ॥ ॥ अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ॥ हव्यवाड्जुह्वास्यः ॥ ॥ अग्निराहवनीयाख्यस्तस्मि
न्प्रक्षिप्यमाणो नाग्निना निर्मथ्येन प्रणीतेन वा सह समिध्यते सम्यक् दीप्यते ॥ कीदृशोग्निः ॥ कविर्मेधावी गृहपतिर्यजमानगृहस्य पा
लकः ॥ युवा नित्यतरुणः ॥ हव्यवाट् हविषां वोढा ॥ जुह्वास्यः जुहूरूपेण मुखेन युक्तः ॥ गृहपतिः ॥ पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वर
त्वं ॥ युवा ॥ यु मिश्रणे ॥ कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः इति कनिन् ॥ नित्वादाद्युदात्तः ॥ हव्यं वहतीति हव्यवाट् ॥ वहश्चेति ण्वि
प्रत्ययः ॥ णित्वादुपधावृद्धिः ॥ गतिकारकोपपदात्कृदुत्तरपदप्रकृतिस्वरत्वं ॥ जुह्वास्यः ॥ हूयते अनयेति जुहूः ॥ हुवः श्लुवच्चेति क्विप् ॥ तत्सं
नियोगाद्दीर्घश्च श्लुवद्भावाद्द्विर्भावश्चुत्वं जश्त्वं च त्यागात् प्रातिपदिकस्वरेणांतोदात्तः ॥ जुहूरास्यं यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव शि
ष्यते ॥ शेषनिघातः ॥ यणादेश उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येत्याकारः स्वरितः ॥ ॥ इति प्रथमस्य प्रथमे द्वाविंशो वर्गः ॥ ॥
सप्तमीमृचमाह ॥ कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे ॥ देवममीवचातनं ॥ हे स्तोतः संघ अध्वरे कतौ अग्निमुप स्तुहि ॥
उपेत्य स्तुतिं कुरु ॥ कीदृशं कविं मेधाविनं सत्यधर्माणं सत्यव्रतरूपेण धर्मेण उपेतं देवं द्योतमानं अमीवचातनं अमीवानां हिंसका
नां शत्रूणां रोगाणां वा घातकं ॥ सत्यधर्माणं सत्यो धर्मो यस्येति सत्यधर्मा धर्मादनिच् केवलादित्यनिच् समासांतः ॥ अंतःपदेन तस्य समासत्वाभि
धानात् बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे शेषनिघातेनानुदात्तत्वं ॥ अमीवचातनो अमरोगइत्यस्मात् शेवायह्वजिह्वाग्रीवाप्वामीवाः इति वन्प्रत्यये
इगमश्च निपातितो नित्वादाद्युदात्तः ॥ चातनं चातेन्वेदेयाचने चेत्यस्मात् हिंसार्थात् णिजंतान्नंद्यादित्वात् ल्युः ॥ योरनादेशः ॥ णेरनिटीति णेर्लो
पः ॥ लितीति धातोरकारस्योदात्तत्वं न च स्वरे कर्तव्ये णिलोपस्य ॥ स्थानिवद्भावः ॥ न पदांतद्विर्वचनेत्यादिना प्रतिषेधात् ॥ अमीवानां चा
तन इति समासे कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते ॥ ॥ अष्टमीमृचमाह ॥ ॥ यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति ॥ तस्य स्म

भाष्य॰प्र॰
४२

प्राविताभव॥ ॥हे अग्ने देववो हविष्मान् यजमानः देवदूतं त्वां सपर्यति परिचरति। तस्य यजमानस्य प्राविता भव स्म। अवश्यं रक्षको भव॥ हूयत इति
हविः। अर्चिशुचीत्यादिना इसिः। प्रत्ययस्वरेण इकार उदात्तः॥ हविषः पतिः। नित्यं समासेनुत्तरपदस्थस्येति षत्वं पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वर
त्वं। सपरशब्दात् कंड्वादिभ्यो यगिति यक्। धातुप्रकरणात् गुणप्रतिषेधार्थो यकः कित्त्वात् सपरशब्दस्य धातुत्वात्ततो विहितस्य यकः आर्धधा
तुकत्वे सति अतो लोप इति लोपः। सनाद्यन्ता धातव इति धातुसंज्ञायां तिप् कर्तरि शप्। तस्मिन् पूर्वस्यातो गुण इति पररूपत्वं। यकः प्रत्ययस्वरेणो
दात्तत्वं। शपा सह एकादेशे स्वरितो वा उदात्ते नोदात्त इत्युदात्तत्वं। तिङ्ङतिङ इति निघातो न भवति। यद्वृत्तान्नित्यमिति प्रतिषेधात्। गार्हपत्याह
वनीययोः परस्परसंसर्गे विहितस्य हविषः पुरोनुवाक्याया अग्निं देववीतय इत्येषा॥ अथाग्नेयपुरुष्य इति खंडे सूत्रितं। यो अग्निं देववीत
ये कुवित्सु नो गविष्टय इति। तामेतां षष्ठीमृचमाह॥ ॥यो अग्निं देववीतये हविष्माँ आविवासति॥ तस्मै पावक मृळय॥ ॥
हविष्मान् हविर्युक्तो यो यजमानो देववीतये देवानां हविर्भक्षणहेतुयागार्थं अग्निमाविवासति। अग्नेः समीपे विशेषेण गत्वा परिचर्यां करो
ति। हे पावक अग्ने तस्मै मृळय। तं यजमानं सुखय। देववीतये। वी गतिप्रजननकान्त्यसनखादनेषु। अस्माद्भावार्थे क्तिन्। देवानां वीतिर्यस्मिन्
योगे स देववीतिः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। न विषयस्यानिसंतस्येति पर्युदासात् क्तिः शब्दोंतोदात्तः। मतुपः स्वर्वानुदात्तत्वं एव शिष्यते। आ
विवासति। वासतिर्गंधनयोः। अस्माद्धूतभावितण्यर्थादागमयितुमिच्छतीत्यर्थे सन्॥ आङ्पूर्वस्य परिचर्यायां पर्यवस्यतीति विवासतिशब्दः
परिचर्यार्थेनिघंटौ पठितः। द्विर्भावः। अभ्यासस्य ह्रस्वः। सन्यत इति योगविभागादित्त्वं। लित्यादिर्नित्यमित्याद्युदात्तत्वं। तिङ्ङतिङ इति नि
घातो न भवति। यद्वृत्तान्नित्यमिति प्रतिषेधात्। तिङि चोदात्तवतीत्याद्यंतो निघातः॥ सह कपेत्यत्र सहेति योगविभागात् ह्रस्वसहसमासे समासां
तोदात्तत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदांतोदात्तत्वं। तस्मै क्रियाग्रहणं कर्तव्यमिति। संप्रदाने चतुर्थी॥ पावमानीष्वग्नेः पावकस्यानुवा
क्यासनः पावक दीदिव इति पौर्णमासेनेष्टिपश्वसोमा उपदिष्टा इति खंडे सूत्रितं। सनः पावक दीदिवोग्ने पावक रोचिषेति॥ तामेतां मनुवाक्यां सप्तमीमृचमाह॥
॥स नः पावक दीदिवोग्ने देवाँ इहा वह॥ उप यज्ञं हविश्च नः॥ हे दीदिवो दीप्यमान पावक शोधकाग्ने स त्वं नोस्मदर्थं इह देवयजन
देशे देवानावह। ततो नोस्मदीयं यज्ञं यज्ञं हविश्च उप देवसमीपं प्रापयेति शेषः॥ दीदिवः दिवु क्रीडादौ छंदसि लुङ्लङ्लिटः लिट इति वर्तमाने लिट्
क्वसुः। द्विर्भावो हलादिः शेषः। तुजादीनां दीर्घोभ्यासस्येत्यभ्यासस्य दीर्घत्वं। वस्वेकाजाद्घसामिति नियमादिडभावः। उत्तरवकारस्य लोपो व्योर्व
लीति लोपः। क्वसुः कित्त्वात् गुणाभावः। संबुद्धौ उगिदचामिति नुम्। संयोगांतस्य लोप इति सकारलोपः। नकारस्य मतुवसो रु संबुद्धाविति रुत्वं विसर्गः। अग्नेया
दाद्युदात्तं निघातः। देवाँ इति देवमृद्धीर्घादटि समानपाद इति रुत्वं। आतोटि नित्यमित्याकारस्यानुनासिकः। भो भगो अघो अपूर्वस्य योशीति रोर्य
कारः। लोपः शाकल्यस्येति यकारलोपः। तस्यासिद्धत्वात् गुणो न भवति॥ इह। इदमो हः इति सप्तम्यंताद्धप्रत्ययः। इदम इश् इति इशादेशः। तस्मिन् सति ... आ
तिपदिकत्वे सुपो धातुप्रातिपदिकयोरिति सप्तम्या लुक्। तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञायां अव्ययादाप्सुप इत्युत्तरस्याः सप्त
म्या लुक्। अकारप्रत्ययस्वरेणोदात्तः॥ ॥एकादशीमृचमाह॥ स न स्तवान आ भर गायत्रेण नवीयसा॥ रयिं वीरवतीमिषं॥ हे अग्ने ४२
नवीयसा नवतरेण पूर्वैरप्यसंपादितेन गायत्रेण गायत्रीछंदस्केनानेन सूक्तेन स्तवानः स्तूयमानः स त्वं नोस्मदर्थं रयिं धनं वीरवतीं वीर

पुत्रभृत्यापत्ययुक्तां। इषमन्नं च आभर। संपादय। स्तवानः। ष्टुञ् स्तुतौ। धात्वादेः षः सः। स्वरितञितः इत्यात्मनेपदं। लटः शानच्। कर्तरि शप्। ब
हुलं छंदसीति लुगभावः। गुणावादेशौ। आने मुगिति मुगन्नभवति। अनित्यमागमशासनमित्यागमानुशासनस्यानित्यत्वात्। शपः पित्त्वादनु
दात्तत्वं। शानच्श्चित्त्वादंतोदात्तस्य अदुपदेशात् परत्वात् सार्वधातुकानुदात्तत्वं। धातुस्वर एव शिष्यते॥ भर। हृग्रहोर्भश्छंदसीति भत्वम्।
गायत्रेण। गायत्र्याः संबंधि गायत्रं तस्येदमित्यण्। प्रत्ययस्वरः। नवीयसा। नवशब्दादातिशायनिक ईयसुन्प्रत्ययः। नित्त्वादाद्युदात्तः॥ वी
रवतीं। मतुप् ङीपोः पित्त्वादनुदात्तत्वं। अकारः प्रातिपदिकस्वरेणोदात्तः॥ ॥द्वादशीमृचमाह॥ अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूति
भिः॥ इमं स्तोमं जुषस्व नः॥ हे अग्ने शुक्रेण दीप्येन वर्णेन दीप्त्या विश्वाभिः सर्वाभिः देवहूतिभिः सर्वदेवताह्वानसाधनस्तोत्रैर्युक्तस्त्वं नोस्म
दीयमिमं स्तोमं स्तोत्रविशेषं जुषस्व सेवस्व। विश्वशब्दो विशेः क्वन्नंतो नित्वादाद्युदात्तः॥ देवहूतिभिः। देवशब्दः पचाद्यजंतः चित्त्वादंतोदात्तः। दे
वानां हूतयः आह्वानान्यासु ऋक्षु तिष्ठंति देवहूतयः। हूतयः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। स्तूयते अनेनेति स्तोमः। अर्तिस्तुसुहुसृधृक्षीत्यादिना म
न्। नित्त्वादाद्युदात्तः॥ ॥इति प्रथमस्य प्रथमे चतुर्विंशो वर्गः॥ ॥सुसमिद्ध इत्यादिकं द्वादशर्चं द्वितीयं सूक्तं। तस्य काण्वो मेधातिथिर्ऋषिः। गा
यत्रं छंदः प्रत्यृचं प्रतीयमानाः सुसमिद्धतनूनपान्नराशंसादिका द्वादश देवताः। तथा चानुक्रमणिकायां सुसमिद्धो द्व्यूना इत्यनुवृत्तौ प्रातिपदिकांकृते दे
वता उदाहृताः सुसमिद्ध इति ध्माः समिद्धो अग्निस्तनूनपान्नराशंसः इळो बर्हिर्देवीर्द्वार उषासानक्ता दैव्यौ होतारौ प्रचेतसौ तिस्रो देव्यः सरस्वती
इळा भारत्यस्त्वष्टा वनस्पतिः स्वाहाकृतय इति प्रत्यृचं देवताः एतदाप्रीसूक्तमिति विनियोगः पशौ सुसमिद्धो न आ वहेति काण्वमाप्रीसूक्तं ऋक्
संप्रयाज्या इति खंडे सूत्रितं। समिध्यो अग्न इति सर्वेषां यथार्षिमिति॥ तस्मिन् सूक्ते प्रथमामृचमाह॥ ॥सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते॥
होतः पावक यक्षि च॥ ॥हे अग्ने सुसमिद्ध एतन्नामकस्त्वं नोस्मदीयाय हविष्मते यजमानाय तदनुग्रहार्थं देवानावह। हे पावक शोधक होतः
होमनिष्पादकाग्ने यक्षि च यज च। सुसमिद्धः। सम् क्रियाविशेषणत्वेन गतिसंज्ञाकत्वात् प्रादिसमासे शोभनवाची नः सुशब्दस्य तु विशेषणवि
शेष्येण बहुलमिति समिद्धपदेन कर्मधारयः समासः सुशब्दः प्रातिपदिकस्वरेणोदात्तः कर्मधारयेनिष्ठेति पूर्वपदप्रकृतिस्वरत्वं। क्रियाविशेषण
त्वे हि सुशब्दस्य गतित्वात् प्रादिसमासे गतिरनंतर इति समो यद्युदात्तत्वं। न देवरुदुत्तरपदप्रकृतिस्वरत्वे नरष्ठास्य सीति सुशब्दो नुदात्तः देवाँ अ
ग्ने पूर्ववद्रुत्वानुनासिकौ हविष्मते। हविरस्यास्तीति मतुप् तसौ मत्वर्थ इति भत्वेन पदत्वस्य बाधितत्वात्न रुत्वं। होतः पावक शब्दयोरामंत्रितयोः
पृथक् पृथग् वाक्यान्वये परस्परं सामर्थ्याभावान्न परांगवद्भावान्न तन्निर्बंधनमेकस्वर्यं न च द्वितीयस्यामंत्रितस्याष्टमिकनिघातेनैकस्वर्यं
स्वर्यं। आमंत्रितं पूर्वमविद्यमानवत्तेन परत्वरत्वाभावात् पदादिस्वात्तामधिकरण्येपि होतरित्यस्य विशेषणत्वे समानमेवाविद्यमानत्वम्॥
अत एव विद्यमानवत्त्वात् सामर्थ्येपि न परांगवद्भाव इति नैवैकस्वर्यसिद्धिः। अतो होतरिति विशेष्यं। अतः पुनातीति पावक इत्येवं यथा प्रसिद्ध
स्तीकारणविशेषणत्वात् होतरिति विशेष्यं अतः। तच्च सामान्यवचनमिति नामंत्रितसमानाधिकरण इत्यविद्यमानत्वप्रतिषेधात्। पदात्
परत्वात् पादादित्वाभावात्तथामंत्रितस्याष्टमिकनिघातेन पावरांगवद्भावे सति निघातेन वा सर्वानुदात्तत्वसिद्धिः। यक्षि। यजतेर्लोटि सिपि बहुलं छं
दसीति शपो लुक्। व्रश्चादिना षत्वं षढोः कः सीति कत्वं। सो ह्येत्यादि स्वरसंहितायां भवबतीति सिपः पित्वेनानुदात्तत्वान्धातुस्वर एव शिष्यते॥ न तु तिङ

85/1924

तिङ्ङतिङः इति निघातः॥ पूर्वस्य पावकेत्यामंत्रितस्याविद्यमानवत्त्वेन पदात्परत्वात्। अतएव तस्य व्यवधायकत्वेन होतरित्यपेक्षया निघातः स्यात् इति चेन्न यद्यपि
भा॰प्र॰ पदादपेक्षया होतरित्यस्यापि पूर्वत्वेनाविद्यमानवत्त्वात्। ननु नामंत्रिते समानाधिकरण इति तस्य निषिद्धमविद्यमानवत्त्वं। न च पावकपदस्याविद्य
४३ मानवत्त्वेन समानाधिकरणपरत्वाभावः यद्यपि पदस्य वह्निकार्यं प्रतिपादकपदं पूर्वत्वादविद्यमानवत्स्यात्। होतः पदकार्यमविद्यमानवत्प्रतिषे
धं प्रति तु परत्वाद्विद्यमानवदेवेति भवत्येव होतरित्यस्याविद्यमानवत्त्वप्रतिषेधः॥ अतस्तस्याविद्यमानत्वात्तदपेक्षया यक्षीत्यस्य निघातः प्राप्नो
त्येव सत्यं॥ अत्र यक्षीत्यस्य च्छन्दः परत्वात् आख्यातेषु चेति निघातप्रतिषेधो भविष्यतीत्यदोषः॥ ॥द्वितीयामृचमाह॥ मधुमंतं तनूनपाद्यज्ञं देवे
षु नः कवे॥ अद्या कृणुहि वीतये॥ हे कवे मेधाविन् अग्ने तनूनपादेतन्नामक त्वं अद्यास्मिन्दिने नोऽस्मदीयं मधुमंतं रसवंतं यज्ञं हविः वीतये भक्षणा
र्थं देवेषु कृणुहि कुरु प्रापयेत्यर्थः॥ मधुमंतं। फलिपाटिनमिमनिजनीनां गुक्पटिनाकिधतश्चेति मन्यतेरप्रत्ययो धकारश्चांतादेशः। निदित्यनुवृत्तेः प्र
त्ययस्य नित्त्वादाद्युदात्तो मधुशब्दः॥ तनूनपात्। आमंत्रितनिघातः॥ अद्य सद्यः परुत्परार्येत्यादिना अस्मिन्काले इत्यर्थे अद्य प्रत्ययांतो निपातितः प्रत्यय
स्वरेणांतोदात्तः॥ तद्धितश्चासर्वविभक्तिरित्यव्ययत्वात् अव्ययादाप्सुप इति लुक्॥ संहितायामन्येषामपि दृश्यत इति दीर्घत्वं॥ कृणुहि॥
कृवि हिंसाकरणयोश्च॥ इदितो नुम् धातोरिति नुम्॥ लोटः सेर्हिरादेशः॥ धिन्विकृण्व्योरच्चेति उ विकरणप्रत्ययः॥ तत्संनियोगेन वका
रस्य अकारः तस्यातो लोप इति लोपः॥ तस्य स्थानिवद्भावात् लघूपधगुणो न भवति॥ उतश्च प्रत्ययादसंयोगपूर्वादिति हेर्लुग्न भवति॥ उतश्च प्रत्ययाच्छ
न्दो वा वचनमिति वचनात् तिङ्ङतिङः इति निघातः॥ वीतये। मंत्रे वृषेषपचमनविदभूवीरा उदात्त इति क्तिन् उदात्तः॥ ॥तृतीयामृचमाह॥ नराशंसमिह
प्रियमस्मिन्यज्ञ उप ह्वये॥ मधुजिह्वं हविष्कृतं॥ इह देवयजनदेशे अस्मिन्प्रवर्तमाने यज्ञे नराशंसमेतन्नामकमग्निमुपह्वये॥ आह्वयामि कीदृशं प्रि
यं देवानां प्रीतिहेतुं मधुजिह्वं मधुरभाषिजिह्वोपेतं। माधुर्यरसास्वादकजिह्वोपेतं वा हविष्कृतं हविषो निष्पादकं। न[illegible]त॥
प्रत्ययस्य पित्त्वाद्धातुस्वर एव शिष्यते॥ शंसत्यस्मिन्निति शंसः हलश्चेत्यधिकरणे घञ्॥ नराणां शंस इति समासे कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते उभे
वनस्पत्यादिषु युगपदिति पूर्वोत्तरपदप्रकृतिस्वरे भवतः॥ अतएव वनस्पत्यादिषु पाठादन्यपदस्य दीर्घत्वं॥ इह इदमो हः इति हप्रत्ययः॥ इदम इशिति इशा
देशः प्रत्ययस्वरः॥ प्रियं प्रीणातीति प्रियः इगुपधज्ञाप्रीकिरः क इति कः॥ प्रत्ययस्वरः॥ अस्मिन् उडिदमित्यादिना विभक्तेरुदात्तत्वं॥ ह्वये निघातः॥ म
धुजिह्वस्याभावप्रातिपत्तेन बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण स एव शिष्यते॥ हविष्कृतं॥ हविः करोतीति हविःकृत् क्विपि ह्रस्वस्य तुक्॥ नित्यसमासेनु
त्तरपदस्थस्येति षत्वं॥ कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥चतुर्थीमृचमाह॥ अग्ने सुखतमे रथे देवाँ ईळित आ वह॥ असि होता मनुर्हितः॥ ॥इडा
ख्याभिधेय हे अग्ने ईळितोऽस्माभिः स्तुतः सन् सुखतमे अतिशयेन सुखहेतौ कस्मिंश्चिद्रथे देवानवस्थाप्य तान् इह कर्मभूमावावह। इडाख्याभिधेय हे अ
ग्ने त्वं मनुर्हितः इति विशेषणं मनुर्हितः॥ मनुना मंत्रेण मनुष्येण वा यजमानादिरूपेण हितो व्यवस्थापितः त्वं॥ होता देवानामाह्वाता असि सुखत
मे सुखमस्मिन्नस्तीति मतुप् तस्य गुणवचनेभ्यो मतुपो लुक् अतिशयेन सुखः सुखतमः तमपोऽनुदात्तत्वात् प्रातिपदिकस्वरः॥ रथे॥ ४३
रमु क्रीडायां॥ रमंतेऽस्मिन्निति रथः॥ हनिकुषिनीरमिकाशिभ्यः क्थन्निति क्थन् उपदेशेऽनुदात्तादिडभावः प्रतिषेधः अनुदात्तोपदेशेत्यादिना मकारलो
पः॥ नित्त्वादाद्युदात्तत्वं॥ ईळितः॥ ईड स्तुतौ निष्ठा इडागमः तस्य आगमा अनुदात्ता इत्यनुदात्तः॥ प्रत्ययस्वरः॥ देवान् दीर्घादटि नकारस्य संहितायां दीर्घा

दटि समानपादे इति रुत्वं॥ आतोटि नित्यमित्याकारस्यानुनासिकभावः भोभगो इत्यादिना रोर्यत्वं। तस्य लोपः शाकल्यस्येति लोपः॥ तस्यासिद्धत्वाद्
गुणो न भवति। आनिपातत्वादाद्युदात्तः॥ असि। अस भुवि। अदिप्रभृतिभ्यः शप इति शपो लुक्। तासस्त्योर्लोप इति सकारस्य लोपः 87
होता ताच्छील्ये तृन्। सोऽकृदुशनस्त्यादिना अनङ् ङिद्वादेशः अप्तृन्तृचेति उपधादीर्घः॥ हल्ङ्यादिलोपः नलोपः नित्त्वादाद्युदात्तः॥ मनुर्हि
तः॥ मन्यते इति मनुः॥ मन ज्ञाने॥ शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेत्युप्रत्ययः॥ तत्र निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः॥ हितः दधातेर्निष्ठे 1974
ति कर्मणि क्तः॥ दधातेर्हिरिति हिरादेशः॥ मनुना हित इति समासे तृतीयायाः सुपां सुलुगित्यादिना सुरादेशः तस्य रुत्वं लुगभावः छान्दसः तृती
या कर्मणीति पूर्वपदप्रकृतिस्वरत्वं॥ ॥पंचमीमृचमाह॥ ॥स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः॥ यत्रामृतस्य चक्षणं॥ हे मनीषिणो बुद्धि
मंतः ऋत्विजः बर्हिर्दर्भं स्तृणीत॥ वेदेः पर्याच्छादयत॥ अत्रापि बर्हिर्नामकोऽग्निः सूच्यते। कीदृशं बर्हिरास्तरणीयं॥ आनुषक् अनुक्रमेण सक्तं प
रस्परसंबद्धं॥ घृतपृष्ठं घृतपूर्णानां स्रुचां बर्हिष्यासादितत्वात् घृतं पृष्ठे उपरिभागे यस्य बर्हिषः तादृशं। यत्र यस्मिन्बर्हिषि अमृतस्यामृतस
मानस्य घृतस्य चक्षणं दर्शनं भवति॥ यद्वा मरणरहितस्य देवस्य बर्हिर्नामकस्याग्नेर्दर्शनं भवति तद्बर्हिः स्तृणीतेति पूर्वत्रान्वयः॥ स्तृणीत॥
स्तृञ् आच्छादने॥ लोटो मध्यमपुरुषस्य बहुवचनं॥ लोटो लङ्वत्। तस्थस्थमिपामित्यस्य तादेशः॥ क्र्यादिभ्यः श्ना॥ ई हल्यघोरितीत्वम्॥
ऋवर्णाच्चेति णत्वं॥ प्वादीनां ह्रस्व इति धातोर्ह्रस्वत्वं॥ सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः अतस्तिङ एव प्रत्ययस्वरे
णोदात्तत्वं॥ बर्हिः बृंहेर्नलोपश्चेति इसिन्प्रत्ययः नलोपश्च॥ प्रत्ययस्वरः॥ आसमंतादनुषज्यतीत्यानुषक्॥ षञ्ज संगे धात्वादेः षः सः क्विप् चेति क्विप्
अनिदितामिति नलोपः आङनोरुपसर्गयोः प्राक्प्रयोगः गतिसमासः उपसर्गात्सुनोतीत्यादिना षत्वं॥ घृतपृष्ठं॥ घृ क्षरणदीप्त्योः नि
ष्ठेति क्तः॥ प्रत्ययस्वरेणोदात्तः॥ घृतयुक्तं पृष्ठमस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ मनीषिणः॥ आमंत्रितनिघातः॥ अमृतस्य न विद्यते म
तं मरणमस्मिन्निति अमृतं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं बाधित्वा नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वे प्राप्ते नञो जरमरमित्रमृता इत्युत्तरप
दाद्युदात्तत्वं॥ चक्षणं॥ चक्षिङ् व्यक्तायां वाचि। वागभिव्यक्तिर्वाचो धातुरिहाभिव्यक्तिमात्रं लक्षयति ल्युट् चेति भावे ल्युट्। योरनादेशः॥ तस्या
र्धधातुकत्वाच्चक्षिङः ख्याञिति ख्याञादेशे प्राप्ते असनयोश्चेति प्रतिषेधः॥ ॥षष्ठीमृचमाह॥ वि श्रयंतामृतावृधो द्वारो देवीरसश्चतः॥
अद्या नूनं च यष्टवे॥ ॥द्वारो यज्ञस्य शालाया द्वाराणि विश्रयंतां कपाटोद्घाटनेन विवृतानि भवंतु॥ कीदृश्यः ऋतावृधः ऋतस्य यज्ञस्य वर्धयि
त्र्यः देवी द्योतमानाः॥ असश्चतः असज्यमानाः॥ उद्घाटनेन प्रवेशे पुरुषसंगरहिताः यद्वा असश्चतः प्रवेष्टृपुरुषरहिताः अन्यत्र गृहान्तसु पुरुषप्र
वेशाय द्वाराभिमानिन्य एतत्संज्ञका अग्निविशेषमूर्तयो विश्रयंतां विशेषेण सेवंतां द्वारसेवया तत्र पुरुषप्रवेशो न वा॥ किं प्रयोजनमिति तदुच्य
ते॥ अद्यास्मिन्दिने नूनमवश्यं यष्टवे यष्टुं यकाराद्वितांतरे च पीति द्रष्टव्यं॥ ऋतावृधः॥ ऋतं वर्धयंतीत्यर्थे वृधेरंतर्भावितण्यर्थात्क्विप् चेति
क्विप् उपपदसमासः॥ अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं। वृद्धिर्धातुस्वरेणोदात्तः॥ समासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते
देवी॥ वा छंदसीति पूर्वसवर्णदीर्घत्वं देवशब्दात्पचाद्यजंतात्पुंयोगादाख्यायामिति ङीष्॥ प्रत्ययस्वरेणोदात्तः॥ विभक्त्या सहैकादेश उदा
त्तेनोदात्त इत्युदात्तः॥ असश्चतः॥ षस्ज गतौ॥ नकारस्य व्यत्ययेन चकारः शत्रादेशः द्वाराभावेनाविद्यंते सश्चतो गच्छंतो येषु प्राग्द्वार

भा॰प्र॰

४४

दिषु तान् असश्चतः ॥ अद्य सद्यः परुदित्यादिना प्रत्ययांतो निपातितः ॥ तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञकत्वात् स्यादिविभक्तेर्लुक् ॥ प्रत्ययस्वरे
णांतोदात्तः ॥ संहितायामन्येषामपि दृश्यत इति दीर्घत्वं ॥ नूनं ॥ एवमादीनामंत इत्यंतोदात्तत्वं ॥ यष्टवे यजेस्तुमर्थे सेसेनित्यादिना तवेन्प्रत्ययः ॥ अश्वा
दिषत्वान्नित्वादाद्युदात्तः ॥ ॥ इति प्रथमस्य प्रथमे चतुर्विंशो वर्गः ॥ ॥ सप्तमीमृचमाह ॥ नक्तोषासा सुपेशसास्मिन्यज्ञ उप ह्वये ॥ इदं नो
बर्हिरासदे ॥ ॥ नक्तशब्द उषःशब्दश्च लोके कालविशेषवाचिनौ इह तु तत्कालाभिमानि वह्निमूर्तिद्वयं प्रत्याययेते ॥ नक्तोषासा ॥ नक्तोषोनामिके वह्निमूर्ती अस्मिन्
प्रवर्तमाने यज्ञकर्मणि उपह्वये आह्वयामि ॥ किमर्थं नोस्मदीयमिमं वेद्यमास्तीर्णं ॥ बर्हिर्दर्भं ॥ आसदे आसत्तुं प्राप्तुं ॥ कीदृश्यौ सुपेशसा शोभनरूप
युक्ते नक्तं च उषाश्च नक्तोषासा प्रथमाद्विवचनस्य सुपां सुलुगित्याकारः ॥ मलोप उपधादीर्घश्छांदसौ ॥ देवताद्वंद्वे चेति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्व
रत्वं ॥ सुपेशसा शोभनं पेशो रूपं ययोस्ते पूर्ववदाकारः ॥ पेशःशब्दो नित्वादाद्युदात्तः ॥ बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वस्यापवादत्वेन आ
द्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं ॥ अस्मिन् उडिदमित्यादिना विभक्तिरुदात्ता ॥ आसदे ॥ षद्लृ विशरणगत्यवसादनेषु ॥ धात्वादेः षः सः ॥ आङ्
पूर्वात्सदेः संपदादिभ्यो भावे क्विप् ॥ गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं ॥ ॥ अष्टमीमृचमाह ॥ ता सुजिह्वा उप ह्वये होतारा दैव्या कवी ॥ यज्ञं नो यक्ष
तामिमं ॥ तच्छब्दोत्र सर्वनामत्वात्प्रसिद्धार्थवाची ॥ ता तौ याज्ञिकानां प्रसिद्धौ द्वावग्नी उपह्वये आह्वयामि ॥ नोस्मदीयमिमं यज्ञं यक्षतां ता उभौ यजतां
नुतिष्ठतां ॥ कीदृशौ सुजिह्वौ शोभनजिह्वोपेतौ प्रियवचनौ शोभनज्वालौ चेत्यर्थः ॥ होतारौ होमनिष्पादकौ दैव्या दिव्यौ देवसंबंधिनौ ॥ अत एवमा
वग्नी दैव्यहोतृनामकौ ॥ कवी मेधाविनौ ॥ ता तौ द्वितीयाद्विवचनस्य सुपां सुलुगित्याकारः ॥ एकादेश इति उदात्तः ॥ सुजिह्वा ॥ शोभना जिह्वा ययोस्तौ नञ्सु
भ्यामित्युत्तरपदांतोदात्तत्वं ॥ पूर्ववदेकादेशस्वरः ॥ संहितायामाकारादेशः ॥ तस्य लोपः शाकल्यस्येति लोपः ॥ होतारा ॥ जुहोतेस्तृन् द्विवचने ऋतो ङिसर्वनामस्थानयोर्गुणः
अप्तृन्नित्युपधादीर्घः ॥ पूर्ववदाकारः ॥ नित्वादाद्युदात्तः ॥ दैव्या देवानामिमौ ॥ देवाद्यञञाविति यञ् ॥ अस्येति चेत्यकारलोपः ॥ ञित्यादिर्नित्यमित्याद्युदा
त्तः ॥ पूर्ववदाकारः ॥ यक्षतां ॥ यजतां लोटि व्यत्ययेन परस्मैपदं ॥ सिब्बहुलं लेटीति सिप् ॥ षढोः कः सीति कत्वं ॥ चर्त्वषत्वे पुत्वानि ॥ ॥ नवमीमृचमा
ह ॥ इळा सरस्वती मही तिस्रो देवीर्मयोभुवः ॥ बर्हिः सीदंत्वस्रिधः ॥ अत्र महीशब्दो महत्त्वगुणयुक्तां भारतीमाचष्टे ॥ अन्यत्राप्रीसूक्तेषु सर्वत्र इळा स
रस्वती भारतीत्याम्नातत्वात् ॥ इळा सरस्वती भारतीत्येतास्तिस्रो देव्योग्निमूर्तयः ॥ बर्हिः आस्तीर्णं सीदंतु ॥ प्राप्नुवंतु ॥ कीदृश्यः मयोभुवः सुख
स्य दातारः ॥ अस्रिधः शोषणक्षयेण वा रहिताः ॥ इळा ॥ ईड स्तुतौ धातोः संपदादिलक्षणः क्विप् ॥ धातुस्वरः ॥ टापं चापि हलंतानामिति वाचादिशामिति टाप् ॥
सरस्वती भसन्नंतान्नित्वादाद्युदात्तः ॥ तदस्या अस्तीति मतुप् ॥ अदुपधत्वाद्वत्वं ॥ तसौ मत्वर्थे इति भत्वेन पदत्वस्य बाधितत्वात् रुत्वाभावः ॥ उगित
श्चेति ङीप् ॥ मतुपङीपोः पित्त्वादनुदात्तत्वे मही महतीत्यत्र तकारलोपश्छांदसः ॥ यस्येति चेत्यकारलोपः ॥ उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं ॥ तिस्रः ॥ त्रि
शब्दाज्जसि त्रिचतुरोः स्त्रियां तिसृचतसृ इति तिस्रादेशः ॥ अचि र ऋत इति रेफादेशः ॥ तिसृभ्यो जस इति जस उदात्तत्वं ॥ देवीः देवानां पत्न्यो देव्यः पुंयो
गादाख्यायामिति ङीष् ॥ यस्येति चेत्यकारलोपः ॥ प्रत्ययस्वरेण ङीप उदात्तत्वं ॥ असिद्धीर्घांजसि चेति निषिद्धं दीर्घत्वं ॥ वा छंदसीति पक्षे अनुदात्ताय
ते ॥ मयोभुवः ॥ मीञ् हिंसायां मिञ्हिनस्ति दुःखमिति सुखं मयः ॥ मयो भावयंतीति मयोभुवः ॥ अंतर्भावितण्यर्थाद्भुवः क्विप् ॥ कृदुत्तरपदप्रकृति ४४
स्वरत्वं ॥ बर्हिः ॥ बृंहेर्नलोपश्चेति इसिप्रत्ययस्वरः ॥ सीदंतु ॥ षद्लृ विशरणादिषु पाघ्रेत्यादिना सीदादेशः ॥ अस्रिधः ॥ स्रिधिर्हिंसार्थः तस्य शोषणा

र्थः स्रिधा ॥ संपदादिभ्यो भावे क्विप् ॥ नञो बहुव्रीहिः पूर्वपदप्रकृतिस्वरं बाधित्वा नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥ पत्नीसंयाजेषु त्वष्टुः पुरोनुवाक्या ॥
इह त्वष्टारमग्रियमिति ॥ तां सूत्रकारः संप्रेषितं इति खंडे सूत्रितं ॥ संते पयांसि समु यंतु वाजा इह त्वष्टारमग्रियमिति ॥ तामेतां पुरोनुवाक्यां सूक्ते द
शमीमृचमाह ॥ ॥ इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये ॥ अस्माकमस्तु केवलः ॥ त्वष्टारं त्वष्टृनामकमग्निं इह कर्मण्युपह्वये ॥ कीदृशं अ 89
ग्रियं श्रेष्ठं ॥ विश्वरूपं बहुविधरूपोपेतं सोस्माकं केवलोसाधारणोस्तु ॥ इतरयजमानेभ्योप्यधिकमनुग्रहं करोत्वित्यर्थः ॥ त्वष्टारं ॥ त्वक्षू तक्षू त 1924
नूकरणे तृन् स्वरतिसूतिसूयतिधूञूदितो वेतीडभावपक्षे स्कोः संयोगाद्योरंते चेति ककारलोपः ॥ ष्टुत्वं ॥ द्वितीयैकवचने ऋतो ङिसर्वनामस्थानयोरि
ति गुणे अप्तृन्नित्यादिनोपधायाः दीर्घः ॥ तृनो नित्त्वादाद्युदात्तत्वं ॥ अग्रियं ॥ अग्रादित्यनुवृत्तौ घच्छौ चेति घप्रत्ययः ॥ आयनेयीत्यादिना घकारस्य
इयादेशः ॥ यस्येति लोपः ॥ आयन्नादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति उपदेशिवद्भावात् प्रत्ययाद्युदात्तत्वात् ॥ घः ॥ चश्रितादंतोदात्तत्वं ॥ विश्व
रूपं ॥ विश्वानि रूपाणि त्वष्टुः सन्ति ॥ त्वष्टा वै पशूनां मिथुनानां रूपकृदिति श्रुतेः ॥ विश्वशब्दस्याद्युदात्तत्वात् पूर्वपदप्रकृतिस्वरत्वे प्राप्ते बहुव्रीहौ विश्वं सं
ज्ञायामिति पूर्वपदांतोदात्तत्वं ॥ अस्माकं असक्षेपणे ॥ युष्यसिभ्यां मदिक् प्रत्ययस्वरेणांतोदात्तः ॥ षष्ठीबहुवचनमाम् ॥ अत्र परमपि योचीति यत्वं बाधि
त्वान्नित्यत्वान्निपद्विधित्वाच्च साम आकमादेशः ॥ कृते अनादेश इति निषेधेन यत्वाभावाच्छेषे लोप इति तकारलोपः ॥ अकारांतत्वेन पश्चात्यामस्या
पि सद्भावः साम इति निर्देशोस्मानित्यंतभाविनः ॥ एवमर्थं एव हि साम इति सकारनिर्देशः ॥ केवलः ॥ वृषादेराकृतिगणत्वादाद्युदात्तः ॥ ॥
एकादशीमृचमाह ॥ अव सृजा वनस्पते देव देवेभ्यो हविः ॥ प्रदातुरस्तु चेतनं ॥ हे वनस्पते एतन्नामकाग्ने देव हविर्भुग्भ्यो देवेभ्यो अस्मदीयं ह
विरवसृज ॥ समर्पयेत्यर्थः ॥ प्रदातुर्यजमानस्य चेतनं परलोकविषयं विज्ञानं त्वत्प्रसादादस्तु ॥ वनस्पते ॥ आमंत्रितनिघातः ॥ देव ॥ पादादित्वान्
निघातः ॥ षाष्ठिकमामंत्रिताद्युदात्तत्वं ॥ हविः इसुन्प्रत्ययस्वरः ॥ प्रदातुः ददातेस्तृच् चित इत्यंतोदात्तः ॥ ङसिङसोश्च ऋत उत् ॥ उदित्करं परत्वं च ॥ रात्सस्येति
सलोपः ॥ एकादेशस्वरेणोकार उदात्तः ॥ चेतनं ॥ चिती संज्ञाने करणे ल्युट् ॥ योरनादेशः ॥ लघूपधगुणः ॥ लितीति प्रत्ययात्पूर्वस्योदात्तत्वं ॥ ॥ द्वादशी
मृचमाह ॥ स्वाहा यज्ञं कृणोतनेंद्राय यज्वनो गृहे ॥ तत्र देवाँ उप ह्वये ॥ ॥ स्वाहाशब्दो हविः प्रदानवाची सन् एतन्नामकमग्निं विशेषेण लक्षयति ॥
तदग्निसंपादितं यज्ञं इंद्राय इंद्रतुष्ट्यर्थं यज्वनो यजमानस्य गृहे कृणोतन कुरुत ॥ तत्र यज्ञे देवानुपह्वये ॥ कृणोतन ॥ कृवि हिंसाकरणयोश्च ॥
इदित्वान्नुम् ॥ लोण्मध्यमबहुवचनस्य तस्य स्थाने तप्तनप्तनथनाश्चेति तनबादेशः ॥ धिन्विकृण्व्योर च इत्युप्रत्ययः ॥
तत्संनियोगेन वकारस्य च अकारः ॥ तस्यातो लोप इति लोपः ॥ तस्य अचः परस्मिन्निति स्थानिवद्भावादुकारस्य लघूपधगुणो न भवति ॥ तनपः पित्त्वेना
ङित्त्वादुकारस्य गुणः ॥ इंद्राय ॥ ऋज्रेंद्रेत्यादिना रन्निपातितः आद्युदात्तः ॥ यज्वनः ॥ यज देवपूजासंगतिकरणदानेषु ॥ सुयजोर्ङ्वनिप् ॥ भसंज्ञायाम
ल्लोपप्राप्तौ न संयोगाद्वमंतादिति निषेधः ॥ वनिपः पित्त्वेन धातुस्वर एवशिष्यते ॥ गृहे ग्रह उपादाने गेहे क इति कप्रत्ययः ॥ ग्रहिज्येत्यादिना संप्रसा
रणं परपूर्वत्वं प्रत्ययस्वरः ॥ तत्र त्रलः लितीति प्रत्ययात्पूर्वस्योदात्तत्वं ॥ देवाँ उप ॥ संहितायां दीर्घादटि समानपाद इति नकारस्य रुत्वं ॥ आतोटि नित्यमित्याका
रस्यानुनासिकादेशः ॥ भोभगो इति यत्वं ॥ तस्य लोपः शाकल्यस्येति लोपः ॥ ॥ इति प्रथमस्य प्रथमे पंचविंशो वर्गः ॥ ॥ ऐभिरग्ने इत्यादिकस्य
द्वादशर्चस्य तृतीयसूक्तस्य ऋषिच्छंदः पूर्ववत् ॥ तत्र सूक्ते विश्वेदेवताकं ॥ अत एवानुक्रम्यते ॥ ऐभिर्वैश्वदेवमिति विनियोगः ॥ व्यूढद्वादशाहस्य

प्रथमे छंदोमे तृतीयसवने वैश्वदेवशस्त्रे ऐभिरग्ने दुवो गिर इति सूक्तं तथा च सूत्रितं । अथ छंदोमाः समुद्रादूर्मिरित्येकया ऐभिरग्ने दुवो गिर इति वैश्व
देवं ॥ ॥ तत्र प्रथमामृचमाह ॥ ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये ॥ देवेभिर्याहि यक्षि च ॥ हे अग्ने एभिरस्मिन्यज्ञे तैः सं । आविते विश्वेभि
र्देवैः सर्वैर्देवैः सह सोमपीतये सोमपानोपेताय यागार्थं दुवो अस्मदीयां गिरोऽस्मदीयाः स्तुतीश्च प्रति आयाहि आगच्छ । यक्षि च आगत्य यज च ।
एभिः पूर्वनिर्दिष्टानां देवानामिदमा परामर्शादिदमोन्वादेशेऽशनुदात्तस्तृतीयादाविति अशनुदात्तः । त्रिचतुरात्सर्वादेशः । नेदमदसोरकोरिति भिस ऐसा
देशाभावः । विभक्तिरनुदात्तैव । न च उडिदमित्यादिना विभक्तेरुदात्तत्वं । तत्रान्तोदात्तादित्यधिकारात् । दुवः । नब्विषयस्यानिसंतस्येत्याद्युदात्तत्वं । वि
श्वेभिः । विश्वशब्दो विशेः क्वन्नन्तो नित्वादाद्युदात्तः । बहुलं छंदसीति भिस ऐस न भवति । बहुवचने झल्येदित्येत्वं । सोमपीतये सोमशब्दः अ
र्तिस्तुसुहुसृधृक्षित्यादिना मन्नन्तो नित्वादाद्युदात्तः । सोमस्य पीतिर्यस्मिन् यागे स सोमपीतिः तस्मै तादर्थ्ये चतुर्थी । देवेभिः बहुलं छंदसीति भिस ऐसादे
शाभावः । बहुवचने झल्येदित्येत्वं । यक्षि । यजेर्लोटि सिप् बहुलं छंदसीति शपो लुक् । व्रश्चादिना षत्वं । षढोः कः सीति कत्वं । सेर्हिरादेशः छांदस
त्वान्न भवति । सिपः पित्वेनानुदात्तत्वाद्धातुस्वर एव ॥ ॥ द्वितीयामृचमाह ॥ आ त्वा कण्वा अहूषत गृणंति विप्र ते धियः ॥ देवेभिरग्न आ गहि ॥
हे विप्र मेधाविन्नग्ने कण्वा मेधाविनः ऋत्विजः त्वा त्वां यज्ञनिष्पादकत्वात् अहूषत आह्वयंति । तथा ते धियः त्वदीयानि कर्माणि गृणंति कथयंति ॥
ततो हे अग्ने देवेभिर्देवैः सह आगहि आगच्छ । विप्र इत्यादिषु चतुर्विंशति संख्याकेषु मेधाविनामसु कण्व ऋभुरिति पठितं ॥ त्वामौ द्विती
याया इति त्वादेशः सर्वानुदात्तः । कण्वाः । कण शब्दार्थः । अशूप्रुषिलटिकणिखटि इत्यादिना क्वन् नित्वादाद्युदात्तः ॥ अहूषत ॥ ह्वेञ् स्पर्धा
यां शब्दे च । छंदसि लुङ्लङ्लिट इति वर्तमाने लुङ् । ङित्वादात्मनेपदं । आत्मनेपदेष्वनतः इत्यादादेशः । च्लेः सिच् ॥ एकाच इतीट्प्रतिषेधः । बहु
लं छंदसीति संप्रसारणं परपूर्वत्वं । हल इति दीर्घत्वं । आदेशप्रत्यययोरिति षत्वं छांदसत्वादुकारस्य न गुणः अडागमः गृणंति गॄ शब्दे ल
ट् ॥ एकाच इतीट् सिंद्योतः क्र्यादिभ्यः श्ना । प्वादीनां ह्रस्व इति धातोर्ह्रस्वत्वं श्नाभ्यस्तयोरात इत्याकारलोपः ऋवर्णाच्चेति वक्तव्यमिति
णत्वं । तिङः स्वर एव शिष्यते । विप्र आमंत्रितनिघातः अनुदात्तमित्यनुवृत्तौ तेमयावेकवचनस्येति षष्ठ्याः ते इत्यादेशः । देवेभिः छांदस ऐसभा
वः । गहि गम्ऌ गतौ । लोटः सिप् सेर्ह्यपिच्चेति कर्तरि शप् । तस्य बहुलं छंदसीति लुक् । अनुदात्तोपदेशेत्यादिना मकारलोपः तस्या
सिद्धवदत्राभादिति सिद्धत्वात् अतो हेरिति हेर्लुङ् न भवति ॥ ॥ तृतीयामृचमाह ॥ इंद्रवायू बृहस्पतिं मित्राग्निं पूषणं भगं ॥ आदित्यान्
मारुतं गणं ॥ इंद्रादिदेवान् मारुतं मरुतां वायूनां संबंधिनं गणं च हे अग्ने यक्षीति पदद्वयमनुवर्तते । इंद्रश्च वायुश्च देवता द्वंद्वे चेति प्राप्त
स्यानङोऽभयत्रवायोः प्रतिषेधो वक्तव्य इति प्रतिषेधः देवताद्वंद्वे चेति प्राप्तस्योभयपदप्रकृतिस्वरस्य नोत्तरपदेऽनुदात्तादावितिनिषेधः
समासांतोदात्तत्वमेव । बृहस्पतिं । तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च इति वक्तव्य इति तलोपः सुडागमश्च ॥ बृहच्छ
ब्दमाद्युदात्तं केचिद्वर्णयंतीति वामनः । पा रक्षणे पातीति पतिः । पातेर्डतिः प्रत्ययस्वरेणाद्युदात्तः समासे उभे वनस्पत्यादिषु युगपदि ४५
त्युभयपदप्रकृतिस्वरत्वं मित्रा । द्वितीयायाः सुपां सुलुगित्यादिना विभक्तेराजादेशः । आदित्यान् । अदितेरपत्यानि आदित्याः दित्यदि
त्यादित्यपत्युत्तरपदाण्ण्यः प्रत्ययस्वरः मारुतं मरुतां विकारः अनुदात्तादेरञ् ञित्वादनुदात्तः ॥ ॥ चतुर्थीमृचमाह ॥ प्र वो भ्रियंत इं

दवो मत्सरासो मादयिष्णवः ॥ द्रप्सा मध्वश्चमूषदः ॥ हे इंद्रादिदेवाः वो युष्मदर्थमिंदवः सोमाः प्रभ्रियंते प्रकर्षेण संपाद्यंते । कीदृशाः मत्सराः तृप्तिकराः म
त्सरः सोमो मंदतेस्तृप्तिकर्मण इति यास्कः । मादयिष्णवः हर्षहेतवः द्रप्साः बिंदुरूपाः मध्वः मधुराः चमूषदः चमूषु चमसादिपात्रेष्ववस्थिताः । प्रभ्रि
यंते व्यवहिताश्चेत्यव्यवहितप्रयोगः । भ्रियंते भृञो यकि रिङ् शयग्लिङ्क्ष्विति रिङादेशः हृञो वा हृग्रहोर्भः छंदसीति हकारस्य भकारः इंदवः उंदी
क्लेदने उंदेरिच्चादेरिति उप्रत्ययः । आदेरिकारश्च नित्वादाद्युदात्तत्वं ॥ मत्सराः मदेः सरप्रियो गे चिदित्यनुवर्तमाने कृधूमदिभ्यः
कित् इति सरप्रत्ययः तितुत्रतथसिसुसरकसेषु चेतीट्प्रतिषेधः चित्वादंतोदात्तः । मादयिष्णवः मदी हर्षग्लेपनयोः मदेर्ण्यंतात् णेश्छंदसीति इ
ष्णुच् णेरनिटीति णिलोपे प्राप्ते अयामंतात्वाय्येत्विष्णुष्विति अयादेशः चित्वादंतोदात्तः मध्वः मधुशब्दः आद्युदात्तः मधुशब्दस्यात्र येन पुं
लिंगत्वं । संज्ञापूर्वको विधिरनित्य इति जसि चेति गुणो न भवति चमूषदः चमुशब्दः चमु अदने चम्यते भक्ष्यते येषु चमसेषु ते चम्वः कृषिचमि
तनीत्यादिना उः तत्र सीदंतीति चमूषदः सत्सूद्विषेत्यादिना क्विप् सुषामादिषु च इति गणत्वात् षत्वं ॥ कृदुत्तरपदप्रकृतिस्वरत्वं ॥ ॥ पंचमीमृचमाह ॥ ॥
ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः ॥ हविष्मंतो अरंकृतः ॥ हे अग्ने त्वां ईळते ऋत्विजः स्तुवंति । कीदृशाः अवस्यवः अवनं रक्षणं तदिच्छं
तीत्यवस्यवः कण्वासो मेधाविनः वृक्तबर्हिषः आस्तरणार्थं छिन्नदर्भाः । हविष्मंतो हविर्युक्ताः अरंकृतः अलंकर्तारः । ईळते ईड स्तुतौ अनुदा
त्तेत्वादात्मनेपदं अदिप्रभृतिभ्यः शप इति शपो लुक् । झस्यादादेशः टेरेत्वं । तास्यनुदात्तेदित्यादिना लसार्वधातुकस्यानुदात्तत्वात् धातुस्वर शि
ष्यते ॥ अवस्यवः अवंतीत्यवादेशाः तानतिवर्त्यैनेछंतिक्यच आत्मनः क्यच् ॥ क्यचि चेति ईत्वं न भवति न छंदस्यपुत्रस्येति निषेधात् । धातुस्वरः शि
ष्यते । सर्वप्रातिपदिकेभ्यो लालसायां सुगसुकौ वक्तव्य इति सुक् क्याच्छंदसीति उप्रत्ययः अतो लोपः प्रत्ययस्वरेणांतोदात्तत्वं ॥ कण्वासः कण शब्दार्थः
कणंति ध्वनंति स्तोत्राणीति कण्वाः अशिप्रुषीत्यादिना क्वन् नित्वादाद्युदात्तः । आज्जसेरसुक् । वृक्तबर्हिषः वृक्तं मुक्तं बर्हिर्येषां बहुव्रीहौ पूर्वप
दप्रकृतिस्वरत्वं । हविष्मंतः हविरेषामस्तीति हविष्मंतः तसौ मत्वर्थ इति भत्वेन अपदत्वान्न रुत्वं । अरंकृतः अलंकुर्वंतीत्यरंकृतः क्विप् चेति क्विप् ह्रस्व
स्य पिति कृति तुक् । कपिलकादीनां संज्ञाछंदसोर्वा लो र इति लकारस्य रेफादेशः ॥ ॥ षष्ठीमृचमाह ॥ घृतपृष्ठा मनोयुजो ये त्वा वहंति वह्नयः ॥ आ देवान्
सोमपीतये ॥ हे अग्ने त्वा त्वां ये अश्वाः रथेन वहंति कीदृशाः घृतपृष्ठाः पुष्टांगत्वेन दीप्तपृष्ठाः मनोयुजः मनःसंकल्पमात्रेण रथे युज्यमानाः वह्नयो
वोढारः तैरश्वैः सोमपानहेतुयागार्थं देवान् आवहेति शेषः घृतपृष्ठाः घृ क्षरणदीप्त्योः घृतं दीप्तं पृष्ठं येषां ते घृतपृष्ठाः घृतशब्दः प्रत्ययस्वरेणांतोदात्तः
बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । मनसा युंजत इति मनोयुजः ऋत्विग्दधृगित्यादिना क्विन् । कृदुत्तरपदप्रकृतिस्वरत्वं । त्वामौ द्वितीयाया इत्यनुदात्तस्त्वादेशः ॥
वहंति शपतिपोरनुदात्तत्वाद्धातुस्वरः यद्वृत्तयोगान्निघाताभावः वह्नयः वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् इति निप्रत्ययः तस्य नित्वादाद्युदा
त्तत्वं । सोमपीतये उक्तं । सकारे परतो नकारस्य संहितायां नश्छव्यप्रशान् इति धुडागमः खरि चेति चर्त्वं । वयो द्वितीयाः ऋषिपोक्तरसादेरिति द्वितीयस्तकारः ॥ ॥ इति प्र
थमस्य प्रथमे षड्विंशो वर्गः ॥ ॥ सूक्ते सप्तमीमृचमाह ॥ तान्यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि ॥ मध्वः सुजिह्व पायय ॥ हे अग्ने तानिंद्रादीन्देवान्य
जत्रान् यजनीयान् ॥ ऋतावृधः सत्यस्य यज्ञस्य वा वर्धकान् पत्नीवतः पत्नीयुक्तान् कृधि कुरु । हे सुजिह्व शोभनजिह्वोपेत मध्वो मधुरस्य सोमस्य भा
गं देवान्पायय । यजत्रान् अमिनक्षियजिवधिपतिभ्योऽत्रन्निति यजेरत्रन् प्रत्ययः । ऋतावृधः वृधु वृद्धौ अंतर्भावितण्यर्थात् क्विप् । अन्येषामपि
दृश्यत इति पूर्वपदस्य दीर्घत्वं । कृदुत्तरधातुस्वरः समासे कृदुत्तरपदप्रकृतिस्वरत्वं ॥ अग्ने पादादित्वाभावादामंत्रितनिघातः । षाष्ठिकमाद्युदात्तत्वं । पत्नी

91
1924

भा॰प्र॰ यतः प्रत्ययलोपे सति संयोगान्तलोपः। ङीप ईकारस्य च नकारः॥ नाप्यांसंतीनिमतुप्। छंदसीर इति वत्वं। पतिकाचाउ इति प्रत्ययांतत्वाद् आद्युदात्तः॥ ङीप मतुपोरनुदात्तत्वा
४६ त्वात् प्रत्ययशिष्यते। ऊ ओऽ ओः क्षिपः सेर्यपि चेति हि। बहुलं छंदसीति विकारणलुक्॥ श्रुणुत ऋभिभ्यां छंदसीति हेर्धिरादेशः॥ अङितश्चेत्याभावः॥ म
ध्वद्रुतः॥ मधि ऋ आमंत्रितनिघातः॥ पायय पायय पानेऽपि वेतं प्रयुक्तं इति हेतुमति णिच् णिचश्चेति णिच्सद्भावात्। शाच्छासाह्वाव्यावेपां युगिति युक्॥ पूर्वस्यामंत्रितस्याविद्य
मानवत्त्वे अतएव वाक्यवधाय ऋ आनम ध्वइत्यपेक्ष्यतिङ्ङतिङ इति निघातः॥ ॥अष्टमीमृचमाह॥ येयजत्राय ईड्यास्ते ते पिबंतु जिह्वया॥ मधोरग्ने
वषट्कृति॥ ये देवा यजत्रा यष्टव्याः तथा ये देवा ईड्याः स्तुत्याः ते सर्वेऽपि वषट्कृति वषट्कारकाले वषट्कारयुक्ते यागे वा हे अग्ने तव दीयया जिह्वया मधो
र्मधुरस्य सोमस्य भागं पिबंतु॥ यजत्राः गतं। ईड्याः इति ऋहलोर्ण्यत्। तित्स्वरितं प्राप्ते ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वमुक्तं॥ द्वितीयस्य त उपस्तु
द्वादयास्य सर्वानुदात्तत्वं॥ मधोः उप्रत्ययस्य नित्वादाद्युदात्तत्वमुक्तं॥ अग्ने आमंत्रितनिघातः॥ वषट्कृतिकरोतेः॥ संपदादिभ्यो भावे क्विप् वषट्
त्यस्य करणं यस्मिन्यागे इति बहुव्रीहिः। वषट्शब्दस्य निपातनादाद्युदात्तत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥नवमीमृचमाह॥ ॥आकींसूर्य
स्य रोचनाद्विश्वान्देवाँ उषर्बुधः॥ विप्रो होतेह वक्षति॥ विप्रो मेधावी होता होमनिष्पादकोऽग्निः उषर्बुधः उषःकाले यागगमनाय बुध्यमानान् विश्वान्
देवान् सूर्यस्य संबंधिनो रोचनात् स्वर्गलोकादिह कर्मणि अस्मयानामानेकार्थत्वात् नितरां आकीं वक्षति आवहतु॥ आकीं निपातः आद्युदात्तः॥ सूर्यस्य
सूर्यः राजसूयसूर्येत्यादिना क्यप्प्रत्ययांतो निपातितः॥ क्यपः पित्वाद्धातुस्वरेणाद्युदात्तः॥ रोचनात्। रुच दीप्तौ अनुदात्तेतश्च हलादेरिति कर्तरि
युच् चितइत्यंतोदात्तत्वं॥ विश्वान् विशेः क्वन्। तेनित्वादाद्युदात्तः॥ उषर्बुध्यंत इत्युषर्बुधः॥ क्विप्चेति क्विप्॥ धातुस्वरेण उकार उदात्तः समासे कृदुत्तरपद
प्रकृतिस्वरत्वं विप्रः ऋज्रेन्द्रेत्यादिनारन्। नित्वादाद्युदात्तः॥ होता ह्वयते स्ताच्छील्ये तृन्। बहुलं छंदसीति संप्रसारणं॥ परपूर्वत्वं गुणः नित्वादाद्युदात्तः॥ उह
इदमो हः इति हप्रत्ययः। इदम इश् इति ईश्। विभक्तिस्वरादेशाः प्रत्ययस्वरः। वक्षति वहेः प्रार्थनायां लिङर्थे लेट् तस्य तिपः कर्तरि शप् सिब्बहुलमिति
बहुलं लेटीति सिप्। ढत्वकत्वषत्वानि तिङतिङ इति निघातः॥ ॥अग्निष्टोमे प्रउगशस्त्रस्य याज्या विश्वेभिः सोम्यं मध्विति स्तोत्रम प्रवाद्यस्य द्वितीय खंड
सूत्रितं विश्वेभिः सोम्यं मध्विति याज्येति। तामेतां याज्यां सूक्ते दशमीमृचमाह॥ ॥विश्वेभिः सोम्यं मध्वग्न इंद्रेण वायुना। पिबा मित्रस्य धामभिः॥
॥हे अग्ने त्वं विश्वेभिः सर्वैः पूषभगादिभिर्देवैरिंद्रेण वायुना मित्रस्य संबंधिभिर्धामभिस्तेजोभिर्मूर्तिविशेषैरपरैः पश्चात् सह सोम्यं सोमसंबंधि मधु म
धुरं भागं पिब विश्वेभिः बहुलं छंदसीति भिस ऐसादेशाभावः। सोम्यं सोममर्हतीति यः इत्यनुवृत्तौ मये चेति यप्रत्ययः। सोमस्य विकार इत्यर्थे यस्येति
चेति अकारलोपः प्रत्ययस्वरः। मधु फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्चेत्यादिना उप्रत्ययः नित्यत्वेन धत्वं नित्वादनुदात्तः वायुना कृवापाजिमिस्वदिसाध्यशूभ्य उण्॥ आतो युक्
चिण्कृतोरिति युक्। प्रत्ययस्वरः। पिब पा पाने लोटः सेर्हिरादेशः। पाघ्राध्मास्थेत्यादिना पिबादेशः। अतो हेरिति हेर्लुक्। पापः पित्वाद्धातुस्वरः पा
दादित्वान्न निघातः। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः धामभिः धाञ आतो मनिन्निति मनिन्। नित्स्वरः॥ ॥एकादशीमृचमाह॥ ॥
त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि॥ सेमं नो अध्वरं यज॥ हे अग्ने मनुर्हितः मानुषा होत्रादिरूपेण मनुष्येण हितः संपादितो होता होमनिष्पाद ४६
कायस्त्वं यज्ञेषु सीदसि तिष्ठसि स त्वं नोऽस्मदीयमिममध्वरं यज्ञं यज निष्पादय॥ मनुर्हितः मन्यतेरिति मनुः। निर्मनुः कृतो बहुलं मन्यतेरपि उस्॥
नित्वादाद्युदात्तः॥ हितः धाञो निष्ठायां क्तप्रत्ययः दधातेर्हिरिति हिरादेशः मनुषा हितो मनुर्हितः॥ कर्तृकरणे कृता बहुलमिति समासः कृत्
स्वरापवादेन तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं॥ सीदसि षद्लृ विशरणगत्यवसादनेषु। लट् शप्। पाघ्राध्मेत्यादिना सीदादेशः निघातः
सेममित्येषा संहितायां सोऽचि लोपे चेत्पादपूरणमिति सोर्लोपे गुणः अध्वरं। नञि ध्वरतिर्हिंसाकर्मा तदभावोऽध्वरः। नञ्सुभ्यामित्युत्तरपदांतो
दात्तत्वं। नोऽअध्वरमित्यत्र संहितायामेङः पदांतादतीति पूर्वरूपं प्राप्तं। प्रकृत्यांतः पादमव्यपर इति प्रकृतिभावान्निवर्तते॥ ॥द्वादशीमृचमा
ह॥ ॥युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः॥ ताभिर्देवाँ इहा वह॥ हे देव अग्ने रोहितः रोहिदश्वाभिधेयाः स्वकीयाः वडवाः रथे युक्ष्व योजय। हिशब्दः
पादपूरणार्थः॥ कीदृशीः अरुषीः गतिमतीः हरितः हर्तुं रथारूढान् पुरुषान्नेतुं समर्थाः ताभिर्वडवाभिरिहास्मिन्कर्मणि देवानावह॥ युक्ष्व यु
जिर् योगे लोट् स्वरितेत्वादात्मनेपदं थासः से॥ सवाभ्यां वामौ। रुधादिभ्यः श्नम् तस्य बाहुलकात् लुक्॥ कुत्व षत्वे प्रत्ययस्वरेणांतोदात्तः॥ संहिता
यां द्व्यचोऽतस्तिङ इति दीर्घः अरुषीः ऋगतौ रंजिगच्छंतीत्यरुषीः वडवाः ऋदनिभ्यामुसन् धातोर्गुणो रेफरत्वं नित्वादाद्युदात्तः॥ अरुषशब्दः तस्मा
त्स्त्रियां छांदसो ङीप्। वाछंदसि प्रथमयोः पूर्वसवर्णइति दीर्घः रथे रमेरौणादिकः थप्रत्ययः। नित्वादाद्युदात्तः हरितः हृसृरुहियुषिभ्य इतिरिति हर
तेरितिप्रत्ययः। इकारः प्रत्ययस्वरेणोदात्तः रोहितः रुहेरपि तेनैव सूत्रेण इतिः इकारः प्रत्ययस्वरेणोदात्तः ताभिः सावेकाच इति विभक्तेः प्राप्त
मुदात्तत्वं। सावर्णेतिनिषिध्यते॥ देवानित्यत्र पूर्ववद्रुत्वानुनासिकौ॥ ॥इति प्रथमस्य प्रथमे सप्तविंशो वर्गः॥ ॥इंद्र सोममित्यादिकं
स्य द्वादशर्चस्य चतुर्थसूक्तस्य ऋषिच्छंदसी पूर्ववत् यद्यप्येतत्सूक्तं ऋतुदेवताकं तथापि प्रत्यृचमिंद्रादिदेवतांतराणि मिलितानि तथा चानु
क्रम्यते इंद्र सोमं सूक्तं तत्रेंद्रमारुती॥ त्वाष्ट्री याग्नेय्यैंद्री मैत्रावरुणी चतस्रो द्राविणोदस्य आश्विन्याग्नेय्यृतुदेवताः सर्वत्रेति॥ विनियोगस्तु
स्मार्तो द्रष्टव्यः॥ ॥तस्मिन्सूक्ते प्रथमामृचमाह॥ इंद्र सोमं पिब ऋतुना त्वा विशंत्विंदवः॥ मत्सरासस्तदोकसः॥ हे इंद्र ऋतुना सह सोमं पिब इं
दवः पीयमानाः सोमाः त्वां आविशंतु॥ कीदृशाः मत्सरासः तृप्तिकराः तदोकसस्तन्निवासाः सर्वदा तदुदरस्थायिन इत्यर्थः॥ इंद्र पाष्ठिक आमंत्रि
ताद्युदात्तत्वं सोमं भर्तिस्तुस्वेति क्रुत्यादिना मन्। नित्वादाद्युदात्तः॥ पिब पिबामित्रस्येत्यत्रोक्तं। अस्या विशंत्विति उत्तरवाक्यगतत्वाख्यातार्थेन सह सामु
त्त्वयार्थश्च व्यत्ययो लुप्तः अतश्चादिलोपे विभाषेतीयं प्रथमा ति ङ्विभक्तिर्न निहन्यते विशंत्विति चलोपसाम्येति द्वितीयत्वान्निहन्यत एव॥ संहिता
यामाङुण इति प्राप्तस्य ऋत्यकइति शाकल्यस्य मते प्रकृतिभावादभावः॥ इंदवः प्रवोऽग्निं यंत इत्यत्रोक्तं। मत्सरासः तत्रैवोक्तं। आज्जसेरसुगि
त्यसुक्। तदेव ओकः स्थानं येषां ते तथोक्ताः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥द्वितीयामृचमाह॥ मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन॥
यूयं हि ष्ठा सुदानवः॥ ॥हे मरुतः ऋतुना सह पोत्रात् पोतृनामकस्यर्त्विजः पात्रात् सोमं पिबत ततोऽस्मदीयं यज्ञं पुनीतन शोधयत हे सुदानवः
शोभनदातारो मरुतः हि यस्मात् यूयं छ युष्माकं शोधयितृत्वं प्रसिद्धं॥ तस्माच्छोधयतेत्यर्थः॥ पिबतेत्यत्र तिङ अदुपदेशात् परत्वात् सार्वधा
तुकानुदात्तत्वं धातुस्वरः पूर्वामंत्रितस्याविद्यमानवत्त्वेन पदात्परत्वान्निघाताभावः पूर्ववत् प्रकृतिभावः पोत्रात्॰ पोत्रं संबंधि पात्रं पोतुः तस्येदमित्य
ण्। तद्धितेष्वचामादेरिति प्राप्ता वृद्धिः सर्वविधयश्छंदसि विकल्प्यंत इति न भवति॥ नन्वेवमृत्यस्य ऋकारस्याचो ञ्णितीति वृद्धिः प्राप्नोति। तात्रो
नाग इत्यत्र हि विप्रतिषेधे परं कार्यमिति परया आदिवृध्या अंत्योऽपधलक्षणा वृद्धिर्बाध्यत इत्युक्तं इहतु परस्याः आदिवृद्धेः छांदसत्वेन
निवृत्तत्वादंत्यवृद्धिः प्राप्नोत्येवेति। एवं तर्ह्यत्राप्यंतरंगत्वरिकारः क्रियतां तस्यतु छांदस ओकारो भविष्यति॥ पुनीतन पूञ् पवने लोट् लोटो

इ-वदितिलङ-वहुवचनं तस्य तस्थस्थमिपामिति तादेशः॥ क्र्यादिभ्यः श्ना॥ ई हल्यघोरितीकारः तपनमनु ध्वनाश्चेति तनादेशः दादीनां हस्व इति हस्वः
प्रत्यय इत्यस्यापि सार्वधातुकमपिदिति ङित्वात्स्य पूर्वयोरिकोर्गुणाभावः युयं युष्मदः परस्य जसो ङ प्रथमयो रमित्यमादेशः नविभक्तौ तु
स्मा इति मकारस्येत्संज्ञाप्रतिषेधः यूयवयौ जसीति मपर्यन्तस्य यूयादेशः शेषे लोपः॥ अत्र यूयादेशात्प्रागेव अंतरंगत्वात् प्राप्ति परित्यक्तां तोदात्तत्वं
शेषनिघातः तनो यूयादेशः स्थानेंतरतमइति इ॥ तस्य चानुदात्तः तत्र शेषलोपो पो त्यलोप इति पक्षे पूर्वसवर्णदीर्घत्वं बाधित्वा यो योमिति प्रवृत्त इ
ति प्रातिपदिकांतेन उदात्तेन सह अनुदात्तस्य स्यैकादेशात्वोरे उदात्तेनोदात्त इत्युदात्तः टिलोपपक्षे तु उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं
स्थअसभुविलडोमध्यमबहुवचनं थ अदिप्रभृतिभ्यः शप इति शपो लुक् श्नसोरल्लोप इत्यकारलोपः व्यत्ययेन षत्वं॥ हिवेतिनिपातः तिङ्ङ्
इतिनिघातो न भवति संहितायामन्येषामपि दृश्यत इति दीर्घत्वं। अत्र हे सुदानवो यूयं द्विरङ्गेति विवक्षितं सुदानवः शोभाभ्यां नुः सोः प्रा
दिसमासः आमंत्रितनिघातः॥ अत्र यूयमित्यादिश्यस्य सुदानवः स्थेति न विधीयते येन अनामंत्रितत्वान्निघातो न स्यात् किं तु सुदानव इति सि
द्धवदनूद्य तेन संबोध्यते युष्मत्सु युष्मस्वरं तां प्रसिद्धामप्रभावाति यान यूयं स्थेति युष्मच्छब्देन प्रतिनिर्दिश्य पुनीतनेति प्रार्थ्यते व
नेतेषां केतु लंहि शब्दे नोच्यते॥ ॥ तृतीयामृचमाह॥ अभियज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना। त्वं हि रत्नधा असि॥ ॥ ग्नाशब्दः स्त्री
वाची॥ तथा च यास्क आह मेनाग्ना इति स्त्रीणां मेना मानयंत्येना ग्ना गच्छंत्येना इति॥ ग्नाः अस्य संतीति ग्नावान् नेष्टः शब्दोऽत्र त्वष्टारं देवमाह कु
स्मिंश्चिदेव सत्रे नेष्टृ तेन त्वष्टृत्वात्। हे ग्नावः पत्नीयुक्त नेष्टः त्वष्टः नो स्मदीयं यज्ञमभिगृणीहि अभितो देवानां समीपे स्तुहि ऋतुना स
ह तं सोमं पिब। हि यस्मात्त्वं रत्नधा असि। रत्नानां दाता असि दाता भवसि तस्मात्सोमं पातुमर्हसीत्यर्थः॥ अभि उपसर्गाश्चाभिवर्जमिति प
र्युदासात् ईंभेरं तोदात्तत्वं। गृणीहि गृशब्दे। क्र्यादिभ्यः श्ना ई हल्यघोरितीत्वं श्ना प्रत्ययस्य ङित्वाद्गुणाभावः॥ प्वादी
नां ह्रस्व इति ह्रस्वः तिङ्ङतिङ इति निघातः॥ ग्ना अस्य संतीति मतुप् व्यत्ययेन वत्वं। संबुद्धौ मतुवसोरुरिति रुत्वं विसर्गः। पादादित्वेनामंत्रितनिघाताभावा
त्पाष्ठिकामंत्रितायुदात्तत्वं॥ ग्नावइत्यस्य विशेषणत्वाद्विशेषणवचनत्वात्चामंत्रिते समानाधिकरण इति निषेधाभावाद्विद्यमान
वत्त्वेन उदात्तस्य नेष्टुः शब्दस्य पाष्ठिकमाद्युदात्तत्वं॥ पिब ना पः पिबादेशः धातुस्वरः पूर्वयोरामंत्रितयोरविद्यमानवत्त्वेन निघाताभावः र।
त्नानि दधातीति रत्नधाः क्विप् चेति क्विप् धातुस्वरः समासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते॥ असि अस्तेः सिप् अदादित्वाद्धातुस्वरः
तिङ्ङतिङ इति निघातो न भवति हि चेति प्रतिषेधात्॥ ॥ चतुर्थीमृचमाह॥ अग्ने देवां इहा वह सादया योनिषु त्रिषु॥ परि भूष पि
ब ऋतुना॥ हे अग्ने देवान् इहास्मिन्कर्मण्यावहन् तान्योनिषु स्थानेषु त्रिषु सवनेषु सादय देवानुपवेशय॥ ततस्तान् परि भूष अलंकुरु॥
ऋतुना सह त्वं सोमं पिब॥ अग्ने देवानित्ययं पादो गतः। यानिषु यु मिश्रणे औदिरश्चेत्यादिना निप्रत्ययः नित्वादाद्युदात्तः॥ त्रिषु परिदु
बतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वं। भूष भूषअलंकारे तिङ्ङतिङ इति निघातः पिब ऋतुना गतो॥ ॥ पंचमीमृचमाह॥ ॥ ४७
ब्राह्मणादिंद्र राधसः पिबा सोममृतूँरनु॥ तवेद्धि सख्यमस्तृतं॥ ॥ हे इंद्र ब्राह्मणात् ब्राह्मणच्छंसिसंबंधात् राधसा धनभू
तात्पात्रात् सोमं पिब। किं कृत्वा ऋतून् अनु ऋतुदेवाननुसृत्य तत्र तथापि पिबेत्यर्थः॥ हि यस्मात् तव तव सख्यं अस्तृतमतृनाम

वि च्छिन्नं तस्मादृतुभिः सहपानं युक्तं॥ ब्राह्मणात् ब्रह्मन्शब्देनात्र ब्रह्मवर्गद्वितीयो ब्राह्मणाच्छंसी कथ्यते स च पुल्लिंगः शेषनिघातेनानुदात्ता
दिः तस्य संबंधी उच्चिष्टश्चमसः स च तस्यैवावयवव्यन्वियत इत्यवयवविवक्षायामनुदात्तादेरञ्॥ तेन ञित्वादाद्युदात्तश्चमस पात्र
ब्राह्मणशब्दः। राधसः सर्वधातुभ्योऽसुन्। नित्वादाद्युदात्तः। पिब पादादित्वादाद्युदात्तं तङ्चातस्तिङ इति दीर्घत्वं। ऋतूँरनित्यत्र दी
र्घादटि समानपाद इति नकारस्य रुत्वं अत्रानुनासिकः पूर्वस्य तु वेत्यकारस्यानुनासिकत्वं॥ तव युष्मदः ङसोऽशादेशो ङस्थानेव सर्वा
देशः तवममौ ङसीति तवादेशः युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं। सख्यं सख्युः कर्म सख्यं सख्युर्यः यस्येति लोपः प्रत्ययस्वरः अ
स्तृतं स्तृणोतेर्हिंसार्थस्य क्तः नञ्समासः अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥ षष्ठीमृचमाह॥ युवं दक्षं धृतव्रत मित्रावरुणदूळ
भं॥ ऋतुना यज्ञमाशाथे॥ हे धृतव्रता स्वीकृतकर्माणौ मित्रावरुणौ हे मित्रनामक वरुणनामकौ देवौ युवं युवामुभौ युवां ऋतुना सह अस्म
दीयं यज्ञमाशाथे व्याप्नुथः कीदृशं यज्ञं दक्षं प्रवृद्धं दूळभं दुर्दभं शत्रुभिर्दग्धुं विनाशयितुमशक्यमित्यर्थः युवं प्रथमाद्विवचनस्य
ङ प्रथमयोरमित्यमादेशः युवावौ द्विवचन इति मपर्यंतस्य युवादेशः शेषे लोप इति टिलोपो अंत्यलोपो वा अमिपूर्वत्वं भाषा
यामेव यालं टिलोपपक्षे उदात्तनिवृत्तिस्वरेण अमउदात्तत्वं॥ अंत्यलोपपक्षे एकादेश उदात्तः दक्षं दक्ष वृद्धौ दक्षं त्यनेनेति करणे
घञ् एवं हि पुंल्लिंगत्वानियमः अन्यस्यानियम इति नपुंसकत्वं। धृतव्रता मित्रावरुणा धृतानि व्रतानि याभ्यां तौ धृतव्रतौ मित्रश्च वर
णश्च मित्रावरुणौ उभयत्र सुपां सुलुगित्यादिना विभक्तेराकारः। मित्रशब्दस्य देवताद्वंद्वे चेत्यानङादेशः प्रथमस्यामंत्रितनिघा
तः द्वितीयस्य पादादित्वादाद्युदात्तः संहितायां छांदसं दुःखेन दभ्यत इति दुर्दभं दुर्देवपदुः सुखित्यादिना
दुरि ळप पदे दग्धं रवकृद्व्यत्ययो बहुलमिति डकारशब्द अकारादकारस्य उकारादकारस्य भकारः त्रिमीति प्रत्ययात्पूर्वमुदात्तं कृदुत्त
रपदत्वेन स एव शिष्यते आशाथे॥ अश्रु व्याप्तौ छंदसि लुङ्लङ्लिट इति वर्तमाने लिट् मध्यमद्विवचनमाथे टेरेत्वं अत आदि
रित्यभ्यासस्य दीर्घः॥ अश्नोतेश्चेति प्राप्तो नुडागम अनित्यमागमशासनं इति निवर्तते॥ ॥ इति प्रथमस्य प्रथमे अष्टाविंशो वर्गः
॥ सप्तमीमृचमाह॥ ॥ द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे॥ यज्ञेषु देवमीळते॥ अध्वरे निरोमे प्रकृतिरूपे यज्ञे पुविकृतिरूपेषु
उकथ्यादिषु च देवमग्निमीळते॥ ऋत्विजः स्तुवंतिकीदृशा ऋत्विजः द्रविणसो धनार्थिनः ग्रावहस्तासः अभिषवसाधनपाषाणधारिणः कीदृ
शं देवं द्रविणोदाः धनप्रदं यद्वा धनप्रदो ग्निः सोमं पिबत्विति शेषः तमेतं मंत्रं यास्क एवं निर्वक्ति द्रविणोदाः कस्माद्धनं द्रविणमुच्यते यदेनमभिद्र
वंति बलं वा द्रविणं यदेनेनाभिद्रवंति तस्य दाता द्रविणोदास्तस्यैषा भवति द्रविणोदा द्रविणस इत्यादिसोयं यास्कोक्तो निर्वचनप्रपंचः तस्मि
न्नेव ग्रंथे रवगंतव्यः द्रविणोदाः ध्रु दुत्थिभ्यां मानिन्ननिलादाद्युदात्तो द्रविणशब्दः। तद्ददातीति द्रविणोदाः क्विपूर्वेति क्विप॥ पूर्वपदस्य सकारोप
जनः छांदसः स्तोले॥ कृदुत्तरपदप्रकृतिस्वरत्वं देवविशेषणत्वे नैकवास्यतापक्षे द्वितीयायाः सु आदेशः अथवा द्रविणमात्मन इच्छंति
द्रविणस्यति सुप आत्मनः क्यच् सर्वप्रातिपदिकेभ्यो लालसायां सुगसुकौ वक्तव्यौ इति क्यचि परतः सुगागमः द्रविणस्यतेः संपदादित्वात् भावे
क्विप॥ अतोलोपः क्वौ लुप्तमन्स्थानिवद्भवतीति तस्य स्थानिवत्वप्रतिषेधात् यलोप एवं द्रविणस शब्दो धनेच्छावचनः द्रविणेच्छा द्रविणस्यतिपर्यंते धन

95
1924

प्रदाने नोपदेश पयतीत्यर्थे दस्कु उपपद्य च इत्यस्मादंतर्भावितण्यर्थात्क्विप्चेति क्विप्॥ एवं द्रविणोदः शब्दः सकारांतो भवति। तथा च द्रविणोदसः प्र
भा॰ प्र॰ वादा भवंतीति नैरुक्तव्यवहार उपपद्यते॥ अतो द्रविणोदस्शब्दः भिन्नवाक्यत्वेन स्वार्थं प्रथमाथ कृतावयस्तु व्यत्ययेन द्वितीयार्थो भवति द्रविण
४८ स इत्यत्रापि वाक्यभेदपक्षे द्रविणसः सोमस्येत्यर्थे सकारापत्तिः छांदसः आ पदांतत्वं तु नियमेन स्थितं। कश्चिद्विशेषणत्वेन कर्त्रात्मकत्वपक्षे तु
श्वसंतात्क्विप् अतो लोपादि पूर्ववत्। अत्र तु पक्षद्वयेऽपि चश्चित्वनीतोदात्तत्वं प्रांतस्य व्यत्ययेन घदात्तत्वं भ्राव युनाहस्तास्ये धानेयावहस्तासः आ
ज्ञसे रसकु या चथ्यो चयादित्वाद्याद्युदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अध्वरे न विद्यते ध्वरो हिंसा यस्मिन्निति नञ्सुभ्यामित्युत्तरपदां
तोदात्तत्वं कृते अनुदात्तं वाद्यात्मनेपदं॥ अद्रिप्रभृतिभ्य इति शपो लुक्॥ ॥ सप्तमी अष्टादशः॥ ॥ अष्टमीमृचमाह॥ द्रविणोदा ददातु
नो वसूनि यानि श्रृण्विरे॥ देवेषु ता वनामहे॥ द्रविणोदा देवोऽस्मभ्यं वसूनि धनानि ददातु यानि धनानि श्रृण्विरे विरूपयुक्तत्वेन श्रूयंते तानि सर्वाणि ध
नानि देवेषु निमित्तभूतेषु वनामहे संभजामः धनेन देवान्यष्टुं तानि स्वीकुर्म इत्यर्थः॥ द्रविणोदाः गतं। वसूनि शृस्वृस्निहीत्यादिना उप्रत्ययः। निद्विस्त
नुवृत्तेराद्युदात्तः। श्रृण्विरे श्रु श्रवणे छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। इरेच छंदस्युभयथेति सार्वधातुकत्वेन व्यत्ययेन श्नुः। तत्संनियोगेन
श्र भावश्च। उवङि प्राप्ते हुश्नुवोः सार्वधातुक इति यणादेशः। चित इत्यंतोदात्तत्वं॥ यद्वृत्तान्नित्यमिति निघातप्रतिषेधः। ता शेश्छंदसि बहुलमिति
शेर्लोपः। नलोपः प्रातिपदिकांतस्येति नलोपः। वनामहे वन षण संभक्तौ व्यत्ययेनात्मनेपदं॥ ॥ नवमीमृचमाह॥ द्रविणोदाः पिपीषति जु
होत प्र च तिष्ठत॥ नेष्ट्रादृतुभिरिष्यत॥ द्रविणोदाः देवः ऋतुभिः सह नेष्ट्रात् नेष्टृसंबंधिपात्रात् पिपीषति सोमं पातुमिच्छति ततो हे ऋत्विजः यूयं होम
स्थानं गच्छत॥ गत्वा च जुहोत होमं कुरुत हुत्वा प्रतिष्ठत च। होमस्थानात् स्थानांतरं प्रति प्रस्थानमपि कुरुत॥ द्रविणोदाः गतं पिपीषति पातुमि
च्छतीति सन् छांदस उकारः तिङ्ङतिङ इति निघातः॥ जुहोत लोण्मध्यमबहुवचनं तस्थस्थमिपामिति तस्य तबादेशः। तप्तनप्तनथनाश्चेति तबादेशः
तस्य पित्वाद्गुणः अभ्यस्तानामादिरित्यनुवृत्तौ अनुदात्ते च धातुस्वरेण प्राप्ते भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पितीत्याकार उ
दात्तः। तिष्ठत तिष्ठ गतिनिवृत्तौ लोण्मध्यमबहुवचनस्य थस्य लङ्वदित्वादेशः पाघ्राध्मेत्यादिना तिष्ठादेशः समवप्रविभ्यः स्थ इति आत्म
नेपदं न भवति। तत्रानुवृत्तस्य निर्दिष्टस्य इणस्याभितत्वार्थत्वात् अत्र च शब्देन व्यवधानात्। ते प्राग्धातोरिति उपसर्गत्वेन प्राक्प्रयोगे व्यस्यापि
च्छंदसि व्यवहिताश्चेति छंदसि व्यवहितप्रयोगः॥ अत्र च शब्दो जुहोतेति पूर्वेण सह समुच्चयार्थः न पुनरिष्यते च करणं तेन प्रथमता वाक्यो
ग प्रथमतिनिषेधाभावात् तिङ्ङतिङ इति निघातः। नेष्ट्रात् पोत्रात् पुनीतेन नयतेः पात्रा शब्देन यदुक्तं तदत्र द्रष्टव्यं। इष्यत इष गतौ लोण्मध्यमबहु
वचनं॥ ॥ दशमीमृचमाह॥ यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे॥ अध स्मा नो ददिर्भव॥ हे द्रविणोदो हे देव यत् यस्मात्कारणात् ऋतुभिः सह
त्वां यजामहे॥ अधेत्ययं निपातस्तच्छब्दार्थः। तस्मात्कारणात् अस्मभ्यं ददिः धनस्य दाता भव स्म अवश्यं भव॥ तुरीयं चतुर्णां पूरणं॥ चतुरः छयतौ
ता वाद्यक्षरलोपश्चेति छप्रत्ययः तस्य प्रत्ययस्वरेणोदात्तत्वात् प्राग आयनेयीनीयियः फढखछघां प्रत्ययादीनामिति ईयादेशः आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थ ४८
मिति वचनात् कृते आदेशे प्रत्ययस्वरेण ईकार उदात्तः॥ द्रविणोदः उक्तं पादादित्वादामंत्रिताद्युदात्तत्वं यजामहे अत्र उपःपित्वेनानुदात्तत्वं ल
सार्वधातुकस्वरेण धातुस्वर एव॥ पूर्वस्यामंत्रितस्याविद्यमानवत्त्वाद्यद्वृत्तयोगात् निघातः व्यवहितयोगेपि सति निषेध उक्तः॥ अथ छांदसा

धकारः स्मचादिरनुदात्तः संहितायां निपातस्य चेति दीर्घः। ददिः डुदाञ् दाने आदृगमहनजनः किकिनौ लिट्चेति किप्रत्ययः लिड्वद्भावाद्द्वि
र्वचनादि अतो लोप इति चेत्याकारलोपः प्रत्ययस्वरः॥ ॥ एकादशीमृचमाह॥ अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता॥ ऋतुना यज्ञवाह
सा॥ हे अश्विनौ मधु माधुर्योपेतं सोमं पिबतं कीदृशौ दीद्यग्नी दीप्ताग्नी आहवनीयाद्यग्नियुक्तौ शुचिव्रता शुद्धकर्माणौ ऋतुना ऋतुदेवतया
सह यज्ञवाहसा यज्ञस्य निर्वाहकौ। अश्विना संबोधनद्विवचनस्य सुपां सुलुगित्याकारः आमंत्रिताद्युदात्तः। पिबतं। शपः पित्वादनुदात्तत्वे तिङश्च
लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते॥ मधु। फलिपाटीत्यादिना उप्रत्ययः नित्वमित्यनुवृत्तेर्नित्वाद्याद्युदात्तः। दीद्यग्नी दीदि दीप्तौ अस्मा
दपि दृश्यत इति विच्। वेरपृक्तस्येति वलोपः। वलोपो वली यानीति प्रथमवकारस्य लोपः प्रथमप्रत्ययलोपे पहिवर्णाश्रयविधौ प्रत्ययलक्षण
नास्तीति निषेधाद्गुलिटीपानुपस्थान। छांदसं द्विर्वचनं तुजादित्वादभ्यासस्य दीर्घत्वं। यङ्लुगंताद्वा संज्ञापूर्वको विधिरनित्य इत्यभ्यासस्य
गुणाभावः दीदिश्चाग्निश्च यो तौ दीद्यग्नी॥ आमंत्रिताद्युदात्तत्वं॥ पादादित्वान्न निघातः। शुचिव्रता। शुचिव्रतं ययोस्तौ सुपां सुलुगित्याका
रः। दीद्यग्निशब्दस्य सामान्यवचनत्वेनामंत्रिते इत्यविद्यमानवत्त्वप्रतिषेधात् एकोऽपि निघातत्वं। पूर्वस्य परांगवद्भावाद्वा ह्वाणकस्वर्यं॥
यज्ञवाहसा। वह प्रापणे। यज्ञं वहन्तीति यज्ञवाहसौ॥ वहिहाधाञ्भ्यश्छंदसीत्यसुन्। तत्र हि गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति
वचनात् लोपपदानामपि भवतीत्युक्तं॥ णिदित्यनुवृत्तेरुपधावृद्धिः। सुपां सुलुगित्याकारः। आमंत्रितनिघातः असामर्थ्या
त्पूर्वस्य न परांगवद्भावः॥ ॥ द्वादशीमृचमाह॥ ॥ गार्हपत्येन सत्य ऋतुना यज्ञनीरसि॥ देवान्देवयते यज॥ हे सत्यफलप्रद हे देव गार्हपत्येन
गृहपतिसंबंधिना रूपेण युक्तः सन् ऋतुना ऋतुदेवेन सह यज्ञनीः यज्ञस्य निर्वाहकोऽसि तस्मात् देवविषयकामनायुक्ताय यजमानाय देवान्यज॥
गार्हपत्येन गृहपतिना संयुक्ते ञ्यः यस्येति लोपः चित्वादादिवृद्धिः अंतोदात्तत्वं च॥ गृहपतिर्मित्यर्थे पत्यंतपुरोहितादिभ्य इति यकि त्वंतोदा
त्तं स्यात्॥ सत्य। सत्ने भवः षण्यत् निचेति निघातः॥ नकिंचिदीर्घश्चेति दीर्घन लोपाभावः भवे छंदसीति यत्॥ तत्र साधुरिति वा
निघातः। यज्ञं नयतीति यज्ञनीः सत्सूद्विषेत्यादिना क्विप्। कृदुत्तरपदप्रकृतिस्वरः। देवयते। देवानात्मन इच्छतीति देवयत्। तस्मै क्यचि चेतीत्वं
न भवति। न छंदस्यपुत्रस्येति निषेधात्॥ अश्वाघस्यात्वविधानादीत्वनिषेधत्वात् सत्यपि दीर्घस्याप्येषनिषेध उक्तः। शतुरनुमो नद्यजादी
इति विभक्तेरुदात्तत्वं। अत्र क्यचश्चित्वादंतोदात्तत्वं शपः पित्वादनुदात्तत्वं शतुश्च लसार्वधातुकस्वरेण॥ उभयोः क्यचा सहैकादेशः एका
देश उदात्तेनोदात्त इत्युदात्तः। तस्मादंतोदात्तत्वात् शस्याविभक्तेः शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं॥ ॥ इति प्रथमस्य प्रथमे
ग द्वात्रिंशो वर्गः॥ ॥ आ त्वा वहंत्विति नवर्चं पंचमं सूक्तं। ऋषिछंदसी पूर्ववदनुवर्तेते। विशेषादेशाभावादिंद्रो देवता। विनियोगस्तु प्रातःसवनमै
त्रावरुणस्य अनुवीयमानमुक्तं तथा च सूत्रितं॥ आ त्वा वहंतु हरय इति तथा चद्रिदेव शेषश्च रंतीति खंडे सूत्रितं॥ उन्नीयमानेभ्योल्वाद्यात्वावहंत्विति
तथा चोद्गाने आ त्वा वहंतु हरय इति तिस्रः तथा च सूत्रितं॥ अथ षोडशीति खंडे आ त्वा वहंतु हरय इति तिस्रो गायत्र्य इति॥ तस्मिन्सूक्ते
प्रथमामृचमाह॥ ॥ आ त्वा वहंतु हरयो वृषणं सोमपीतये॥ इंद्र त्वा सूरचक्षसः॥ हे इंद्र वृषणं कामानां वर्षितारं त्वां सोमपीतये सोमपाना
र्थं हरयः स्वकीया अश्वाः आवहंतु अस्मिन्कर्मण्यानयंतु तथा सूरचक्षसः सूर्यसमानप्रकाशयुक्ताः ऋत्विजस्त्वां मंत्रैः प्रकाशयंतीति शेषः॥

97/1924

हरिवंतमिहरयः। इन सर्वधातुभ्य इतीननित्वादाद्युदात्तः॥ दर्षणं। कनिन्युवृषि तक्षीत्यादिना कनिन्। क्रित्वाल्लघूपधगुणाभावः। नाप पूर्वस्यानिगमर
तिविकल्पितमुपधादीर्घत्वं॥ सोमपीतये सोमस्य पानाय। कर्मणि षष्ठी। वक्षि इ॥ व्यक्तायां वाचि सर्वधातुभ्योऽसुन् वक्षिः। स्वाक्षिनिन भवति
अनसोः प्रतिषेधात्वकस्य इतिनिषेधात्॥ सूपूर्वणो मतुबर्थीनि सरः। मसृ धातुर्धिभ्यः कनिति कन्। क्रित्वाद्गुणाभावः। नित्वादाद्युदात्तः॥ सरव
तस्यानंत प्रकाशेन यवांबहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥द्वितीयामृचमाह॥ इमा धाना घृतस्नुवो हरी इहोप वक्षतः॥ इंद्रं सुखतमे रथे॥
हरी अश्वा इंद्र रथस्य वोढ्याव श्वावावरतथा चरकत्यनं रहयोस्थानं तिहरिभ्यांति इवतां गमयतीति च॥ एतदेवाभिप्रेत्यनिघंटुकार आह
हरी इंद्रस्येति तादृशौ हरी इमाया गार्थं विधामालारितस्येन पुरस्तिर्निधीनाः भ्रष्टयवतंडुलानुद्दिश्य सुखतमे रथे इंद्रमवस्थाप्याभिनक
र्मणि उपवक्षतः। वहि समीपे वहतां॥ कीदृशीर्धानाः घृतस्नुवः अलंकरणाय स्तरणाभिधारणेन घृतस्राविणीः धीयंत इति धानाः धापृ
वस्यत्यतिभ्यो न इति नः प्रत्ययस्वरः॥ घृतस्नुवः घृतं स्नुवंतीति घृतस्नुवः क्विपि तुगभावः छांदसः। धातुस्वरः समासे कृदुत्तरपदप्रकृतिस्वरत्वं॥
सोः संयोगपूर्वत्वेन यणभावादुवङादेशः॥ हरी इह अत्र हरण सर्वधातुभ्य इन्निति नित्वादाद्युदात्तः। प्रगृह्यत्वात्संहितायां प्रकृतिभावः॥ वक्षतः प्रार्थना
यां लिङर्थे लेट् तस्य प्रथमपुरुषद्विवचनं तस् लेटोऽडाटावित्यडागमः। सिब्बहुलं लेटीति सिप् दलस्य पत्वानि तिङ्ङतिङ इति निघातः
सुखतमे रथे॥ ॥तृतीयामृचमाह॥ इंद्रं प्रातर्हवामह इंद्रं प्रयत्यध्वरे॥ इंद्रं सोमस्य पीतये॥ ॥प्रातः कर्मारंभे प्रातःसवने इंद्रं हवामहे आह्व
यामः॥ तथैवाध्वरे सोमयागे प्रयति प्रगच्छति प्रारभ्यवर्तमाने सति माध्यंदिनसवने तस्मिन्निंद्रं हवामहे तथा यज्ञसमाप्तये संवत्सरीयसवने सो
मस्य पीतये सोमपानार्थं हवामहे॥ प्रातः स्वरादिषु तादात्तो निपातितः॥ हवामहे ह्वेञ् आह्वाने अपि परतोऽत्र संप्रसारणमित्यनुवृत्तौ बहुलं छं
दसीति संप्रसारणं परपूर्वत्वं॥ गुणावादेशौ प्रयति। इण् गतौ। लटः शतृ अदिप्रभृतिभ्यः शपः इति शपो लुक्। शतुर्ङित्वाद्गुणाभावः प्रादिस
मासः कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति वचनात् प्रत्ययग्रहण इति नियमाभावात्। शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं अ
ध्वरे उक्तं संहितायां उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति अकारस्य स्वरितत्वं॥ पीतये। पा पाने क्तिनि छांदसमंतोदात्तत्वं॥ ॥
चतुर्थीमृचमाह॥ उप नः सुतमा गहि हरिभिरिंद्र केशिभिः॥ सुते हि त्वा हवामहे॥ हे इंद्र केशिभिः केसरयुक्तैर्हरिभिरश्वैस्त्वं नोऽस्मदीयं
सुतमभिषुतं सोमं प्रति उप समीपे आगहि आगच्छ॥ सुते अभिषुते सोमे निमित्तभूते सति यस्मात्कारणात् त्वा हवामहे त्वामाह्वयामः। तस्मा
दागच्छेति पूर्वत्रान्वयः॥ गहि। गमेर्लोटि सेर्हिरपित्च इत्यनुवृत्तौ बहुलं छंदसीति शपो लुक्॥ अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः तस्यासिद्धवदत्राभादित्यसिद्धत्वादतो हेरिति हेर्लुग् न भवति॥ केशिभिः मत्वर्थी
यानि प्रत्ययस्वरः हवामहे इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं शपः पित्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण धातुस्वरेण वा
तिङ्ङतिङ इति निघातः हि चेति प्रतिषेधात्॥ ॥पंचमीमृचमाह॥ ॥सेमं नः स्तोममा गह्युपेदं सवनं सुतं॥ गौरो न तृषितः पिब॥ हे इंद्र
इसत्वं नोऽस्मदीयमिमं स्तोमं सुतं प्रति आगहि आगच्छ॥ आगमने हेतुरुच्यते उप॥ इदं यत्सत्तं समीपे सुतमभिषुतं सोमयुक्तमिदमि
दं सवनं प्रातःसवनादिरूपं कर्म वर्तते तस्माद्गौरो न गौरमृग इव तृषितः सन्निमं सोमं पिब सः इमं इत्यत्र संहितायां सोचि लोपे चेत्पा

दपूरणमिति सुलोपः॥ गहि। गतं सवनं। सु यतेऽस्मिन् इति सोम इत्यधिकरणे ल्युट्। इति इति प्रत्ययात्पूर्वस्योदात्तत्वं। सु इंद्रसेनोस्याः सवांस
लोपो भवतीति वक्तव्यमिति वचनात् द्वितीयायां अभिषुतसोमयुक्तमिदं सवनमिति कर्मण्यस्माद्द्वितीयातदा सत्त इत्याच्छादर्शं आदिरादन्च तृषा
पिपासायामिति निष्ठा कितः प्रत्ययस्वरेणाद्युदात्तः। पश्चादिड् आगमो अनुदात्त इत्यनुदात्तत्वं॥ ॥इति प्रथमस्य प्रथमे त्रिंशो वर्गः॥ ॥सप्तमी
मृचमाह॥ इमे सोमास इंदवः सुतासो अधि बर्हिषि॥ तां इंद्र सहसे पिब॥ इंदुः शब्द इंदी उंदेरिच्चादेरिति धातो रत्ययनः। इंदवः क्लेदनयुक्ता इमे दी
मव क्लिना सोमासः सत्यात्रगताः सोमाः बर्हिषि यज्ञे अधि आधिक्येन सुतासः अभिषुताः हे इंद्र सहसे बलार्थं तान् सोमान् पिब सोमासः
आज्जसेरसुगिति सोमस्य गागमः इंदवः इति सुतासः पूर्ववत्सुक् संहितायां प्रगृह्यत्वात् पादमध्यपर इति प्रकृतिभावात्पूर्वरूपत्वं न भवति। बर्हि
षि॥ बृहेर्नलोपश्चेति इ सप्रत्ययस्वरः। तां इंद्रस्य प्रद्वीघादिति समानपाद इति रुत्वं॥ यत्वयलोपौ। अनुनासिकाः। सहसे। सहमर्षणे असुन्ता
नित्वादाद्युदात्तः॥ ॥सप्तमीमृचमाह॥ अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शंतमः॥ अथा सोमं सुतं पिब॥ हे इंद्र अयमस्माभिः क्रियमाणः
स्तोमः स्तोत्रविशेषः अग्रियः अग्रादिभ्य इति वचनात्क्रिया गिति घच हितात्वेताद्यः॥ हृदिस्पृक्दार्ततीति हृदिस्पृक् आनुदेवानि नत्पुरपकृतिबहुलमित्य
नुक्॥ क्विन प्रत्ययस्य कुरिति अकारस्य कुत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं॥ शंतमः सुखकर इत्यव्ययचनो शंशब्दः तत तमप अनसुखप्रकर्षस्य गु
ण द्वारा गुणनिबद्धस्य संक्रांतत्वाद्द्रव्यप्रकर्ष इति निपेते थो। किमेत्तिङव्ययघादाम्द्रव्यप्रकर्षे इति तिङव्ययस्य स्वतः प्रकर्षाभावात्। इह गार्थं एव हि तनिष
धः अथा सोमं संहितायां निपातस्य चेति दीर्घः॥ ॥अष्टमीमृचमाह॥ विश्वमित्सवनं सुतमिंद्रो मदाय गच्छति॥ वृत्रहा सोमपीतये॥ वृत्रहा वृत्र
नुधानक इंद्रः सोमपीतये सोमपानाय मदाय सत्यानत्यहर्षाय च। विश्वमित्सर्वमपि सुतमभिषुतसोमयुक्तं सवनं प्रातःसवनादिरूपं कर्म
गच्छति विश्वं अशिप्रुषीत्यादिना क्वन्नित्वादाद्युदात्तः सवनं सुतं पूर्ववत् मदाय मदोऽनुपसर्ग इत्यप्प्रत्ययः पित्वाद्धातुस्वरः गच्छति इषुगमियमां छः
वृत्रहा वृत्रं हतवान् ब्रह्मभ्रूणवृत्रेषु क्विप्। इन् हन्पूषार्यम्णां शौ इति नियमात् दीर्घत्वं॥ सौ चेति प्रतिप्रसवादुपधादीर्घः। कृदुत्तरपदप्रकृतिस्वरत्वं॥ सोमपीतये॥
षष्ठीतत्पुरुषः बहुव्रीहौ अनिष्टे तत्पुरुषे तादौ च निति कृत्यतौ इति पूर्वपदप्रकृतिस्वरत्वं॥ ॥नवमीमृचमाह॥ सेमं नः काममा पृण गोभिरश्वैः शतक्रतो॥ स्तवाम त्वा स्वाध्यः॥ हे शतक्रतो स त्वं नोऽस्मदीयमिमं कामं काम्यमानं फलं गोभिरश्वैश्च सह आपृण सर्वतः पूरय वयमपि स्वाध्यः सुसमा
हितध्याना युक्ताः संतस्त्वां स्तवाम। सेमं संहितायां सोचि लोपे चेत्पादपूरणं इति सुलोपः॥ कामं। कमु कांतौ अकर्तरि च कारके संज्ञायामिति घञ्। प्रथमो
ञित्यादिर्नित्यमित्याद्युदात्तत्वं। पृण प्रीणने तुदादिः सेर्हिः तुदादिभ्यः शः। तस्य ङित्वाद्गुणाभावः अतो हेरिति हेर्लुक्। गोभिः सावेकाच इति प्राप्तस्य विभक्त्
युदात्तत्वं न गोश्वन्साववर्णेति प्रतिषेधः। अश्वैः अशूङ् व्याप्तौ अशिरुषिभ्यः क्वन्। स्तवाम। ष्टुञ् स्तुतौ। धात्वादेः षः सः। लोडुत्तम
इव न तस्यालोपो लडुत्तमे इति इडिति सकारस्य लोपः आडुत्तमस्य पिच्चेत्याडागमः प्रत्ययस्य पित्वादनुदात्तत्वं धातुस्वर एव स्वाध्यः
ध्यै चिंतायां स्वाङोरुपसर्गयोः प्राक्प्रयोगः अन्येभ्योऽपि दृश्यत इति क्विप्। दृशिग्रहणस्य विध्यंतरोपसंग्रहणार्थत्वात्संप्रसारणमतिपर
पूर्वत्वं हल इति दीर्घः अमिपूर्वः इति तृतीयेति यणादेशः गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरत्वं उदात्तयणो हल्पूर्वादिति जस उदात्तत्वं
न भवति तत्रास्वसर्वनामस्थानमित्यनुवृत्तेः अतउदात्तस्वरितयोर्यणःस्वरितोऽनुदात्तस्येति स्वरितत्वमेव भवति॥ ॥इति प्रथमस्य प्रथमे एकत्रिं

मोवर्णः॥७॥ इंद्रावरुणयोरित्यादिकं नवर्चं पंचमं सूक्तं॥ अत्र एवानवशब्दानुवृत्तावनुक्रम्यते॥ इंद्रावरुणयोरैंद्रावरुणं युवाकुपादनिचृत्तावितिअनु
भा॰ ४॰ देवताविस्पष्टा॥ अपि पूर्वं हि सा तु पूर्ववदनुवर्तते॥ अयं तु विशेषः॥ युवाकु हीत्यादिके द्वेऋचौ पादनिचृतौ आमकस्यसोयुकविनियोगस्तस्मातां लैंगिको
वाकश्चिदवगंतव्यः॥ ॥तस्मिन्सूक्ते प्रथमामृचमाह॥ इंद्रावरुणयोरिदं संम्राजोरव आवृणे॥ ता नो मृळात ईदृशे॥ ॥अहमनुष्ठाता संम्राजोः
५॰ सम्यग्दीप्यमानयोः पतयोः सम्यक्क्रियमाणयोर्वा इंद्रावरुणयोर्देवयोः संबंधि अवो रक्षणं आवृणे सर्वतः प्रार्थये॥ तातौ देवावीदृशे॥ ईदृशं
विधे अस्मदीयरक्षणनिमित्तभूते सति मृळातः अस्मान्सुखयतः॥ इंद्रशब्दो रन्प्रत्ययांतः वरुणशब्द उनन्प्रत्ययांतः उभौ नित्वादाद्युदात्तौ॥ स
मासे देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः॥ उभे वनस्पत्यादिषु युगपदिति अनुवर्तनात् देवताद्वंद्वे चेति युगपदुभयपदप्रकृतिस्वरत्वं॥ संम्राजोः राजदी
प्तौ॥ सत्सूद्विषेत्यादिना क्विप्॥ समो म्राजनुस्वार इत्यनुस्वारप्राप्ते मो राजि समः क्वाविति मकारादेशः॥ कृदुत्तरपदप्रकृतिस्वरत्वं॥ कर्तृकर्मणोः कृतीति
कर्तरि षष्ठी॥ अव रक्षणादिषु भावे असुन् नित्वादाद्युदात्तः॥ ता॥ सुपां सुलुगित्यादिना द्विवचनस्य डादेशः॥ टिलोपः विभक्तेरुदात्तत्वनिवृत्तिस्वरः॥ मृळातः
मृड सुखने॥ प्रार्थनायां लिङर्थे लेट्॥ इति वचनं तस्य तसत्वं लेटोडाटाविति आडागमः॥ तुदादिभ्यः शः॥ ङित्वात् लघूपधगुणाभावः॥ ईदृशे॥ त्यदादिषु दृशो
नालोचने कञ्चेति इदमुपपदे दृशेः कञ्॥ उपपदसमासे इदंकिमोरीश्की इति इदम ईशादेशः॥ शित्वात्सर्वादेशः॥ कञः ञित्वाद्गुणाभावः ञित्वाद्
नत्यादिरुदात्तत्वं उपपदसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते॥ ॥द्वितीयामृचमाह॥ गंतारा हि स्थोऽवसे हवं विप्रस्य मावतः॥
धर्तारा चर्षणीनां॥ हे इंद्रावरुणौ अवसे अवितुम् अनुग्रहीतारं रक्षितुं मावतो मद्विधस्य विप्रस्य ब्राह्मणस्य ह्वानं गंतारौ स्थः हि यस्मात्तौ
भवतः स्वलु कौ च चर्षणीनां मनुष्याणां धर्तारौ योगक्षेमसंपादनेन धारयितारौ राजानौ॥ ओस्थाने द्विवचनस्य सुपां सुलुगित्याकारः॥
आकारादेशः॥ गुणः अप्रत्ययादिना उपधादीर्घत्वं॥ नित्वादाद्युदात्तत्वं॥ स्थः॥ असभुवि॥ मध्यमपुरुषद्विवचनं थस्॥ अ
दिप्रभृतिभ्यः शप इति शपो लुक्॥ हि चेति निघातप्रतिषेधः॥ अवसे अव रक्षणे॥ असुन् नित्यसंनित्वादाद्युदात्तः॥ हवं ह्वेञ्
मीत्यनेन मिति कसंप्रसारणपरपूर्वत्वे कृदोरविति अप् गुणावादेशौ। अपः पित्वादनुदात्तत्वं॥ धातुस्वर एव॥ विप्रस्य दुवप् बीजसंताने अस्य कृत्रे
इत्यादिना रन्निपातितो नित्वादाद्युदात्तः॥ मावतः वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानं वतुप्प्रत्ययांतरपदयोः स्मादेशौ म
पर्यंतस्य मादेशः॥ आ सर्वनाम्न इति दकारस्य आकारः सवर्णदीर्घः॥ मतुपः पित्वादाद्युदात्तत्वं प्रातिपदिकांतोदात्तत्वमेव शिष्यते॥ धर्तारा॥ धृञ्
धारणे॥ ण्वुल्तृचाविति तृच्॥ एकाच उपदेश इतीट्प्रतिषेधः॥ गुणो रपरत्वं॥ अप्तृन्नित्यादिना उपधादीर्घः॥ सुपां सुलुगित्याकारः॥ चित्वादंतोदा
त्तत्वं॥ चर्षणीनां॥ कृषेरादेश्च चः इति अनिप्रत्ययः॥ तत्संनियोगेन ककारस्य चकारः॥ प्रत्ययाद्युदात्तत्वं बाधित्वा मंतोदात्तत्वं॥ अत एव नामन्यत
रस्यामिति विभक्तेरुदात्तत्वं॥ नच ह्रस्वनुड्भ्यां मतुबिति उदात्तः इतिव्याख्यातं॥ ॥तृतीयामृचमाह॥ अनुकामं
तर्पयेथामिंद्रावरुणा राय आ॥ आ वां नेदिष्ठमीमहे॥ ॥हे इंद्रावरुणौ अनुकामं अस्मदीयाभिलाषमनु रायो धनस्य प्रदानेन
आतर्पयेथां॥ सर्वतोस्मान्प्रीणयतं दायदा धनं कामयामहे दातव्यमित्यर्थः॥ तावां॥ तादृशौ युवां नेदिष्ठा अतिशये ५०
न सामीप्यं यथा भवति तथा ईमहे याचामहे॥ कालविलंबमंतरेण धनं दातव्यमित्यर्थः॥ ममदृशमयाचाकर्मसु ईमहे इति पठितं अनुका

मं कामस्य पश्चादनुकामं॥ अथवा कामे अनुकामं अनुरिह पश्चादर्थे अथवा वीप्सालक्षणे यथार्थे योग्यता॥ वीप्सापदार्थानतिवृत्तिः सादृश्यं चेति
चत्वारो यथार्था गृहीताः अव्ययं विभक्तीत्यादिना॥ अव्ययीभावसमासः अव्ययीभावश्चेत्यव्ययसंज्ञायां अव्ययादाप्सुप इति प्राप्तस्य लुकोप
वादो नाव्ययीभावादतोम्त्वपंचम्या इति विभक्तेरमादेशः समासस्येत्यंतोदात्तत्वं॥ तर्पयेथां॥ तृप प्रीणने॥ चुरादिणिच्॥ अंतोदात्तत्वं॥ आत्म 99
नेपदं॥ मध्यमद्विवचनमाथां॥ टित आत्मनेपदानां टेरेत्वं॥ आमेतः इत्यामादेशः॥ आपिसत्यतो येय इत्याकारस्य इयादेशः॥ आद्गुणो यलोपश्च॥ इंद्रावरुणा सुपां सु 1924
लुगिति द्विवचनस्य आकारः॥ आमंत्रिताद्युदात्तत्वं॥ संहितायामाकारस्य ह्रस्वत्वं॥ रायः॥ ऊडिदमित्यादिना विभक्तेरुदात्तत्वं॥ ता॥ सुपां सुलुगिति विभक्ते
राकारः॥ पदात्परत्वाभावादामित्रस्य याऽमादेशानुदात्तः॥ नेदिष्ठं अतिशयेनांतिकं॥ अतिशायने तमबिष्ठनौ अंतिकबाढयोर्नेदसाधाविति नेदादेशः॥ इ
ष्ठेति लोपः॥ इष्ठनो नित्वादाद्युदात्तत्वं॥ ईमहे ईङ् गतौ॥ ङित्वादात्मनेपदं॥ बहुलं छंदसीति शपो लुक्॥ निघातः॥ ॥चतुर्थीमृचमाह॥ युवाकु हि
शचीनां युवाकु सुमतीनां॥ भूयाम वाजदाव्नां॥ हि यस्मात्कारणात् शचीनाम् अस्मदीयकर्मणां संबंधि सोमरूपं हविर्युवाकु सतां यवैः धनात्मकै
रदकैः पयः सक्त्वादिद्रव्यांतरैश्च मिश्रितं॥ तथा सुमतीनां शोभनबुद्धियुक्तानामृत्विजां स्तोत्ररूपं वचनमपि युवाकु नानाविधैर्गुणैर्मिश्रि
तं तस्मात्कारणात् हे इंद्रावरुणौ तथाविधं हविः स्वीकुर्वतोर्युवयोः प्रसादाद्वयं वाजदाव्नां अन्नप्रदानां पुरुषाणां मध्ये मुख्या भूयाम भवेम॥
अप अग्न इत्यादिषु षड्विंशति संख्याकेषु कर्मनामसु शचीभिः शमी इति पठितं॥ युवाकु॥ यु मिश्रणे॥ कृदिकुषिभ्यां काकुरित्यत्र बाहुलकात् योतेरपि काकुः
प्रत्ययः॥ कित्त्वेन गुणाभावादुकारस्योवङादेशः॥ प्रत्ययस्वरेण मध्योदात्तत्वं॥ शचीशब्दः केषांचिन्मते शार्ङ्गरवादिङीनंतो नित्वादाद्युदात्तः॥ उभ
ये वनस्पत्यादिषु युगपदित्यत्र द्युतिकृतोक्तं॥ सुमतीनां विधा मसुमतीनामित्यत्रोक्तं॥ भूयाम॥ प्रार्थनायां लिङ् उत्तमबहुवचनेनित्यं ङित इ
ति सकारलोपः॥ यासुट् परस्मैपदेषूदात्तो ङिच्चेति यासुडागमः॥ लिङः सलोपोऽनंत्यस्येति सकारलोपः॥ बहुलं छंदसीति शपो लु
क्॥ सतिशिष्टत्वात् यासुडुदात्त एव शिष्यते॥ वाजदाव्नां वाजं ददातीति वाजदावानः॥ आतो मनिन्क्वनिब्वनिपश्चेति वनिप्॥ पित्वाद्धातुस्व
र एव शिष्यते॥ समासे कृदुत्तरपदप्रकृतिस्वरत्वेन एव शिष्यते॥ आमि अल्लोपोऽन इत्यकारलोपः॥ तस्याचः परस्मिन्निति स्थानिवद्भावाल्लो
पो व्योर्वलीति वकारलोपो न भवति॥ ॥पंचमीमृचमाह॥ इंद्रः सहस्रदाव्नां वरुणः शंस्यानां॥ क्रतुर्भवत्युक्थ्यः॥ अयमिंद्रः सहस्र
दाव्नां सहस्रसंख्याकधनप्रदानां मध्ये क्रतुः धनदानस्य कर्ता अतिप्रभूतं ददातीत्यर्थः॥ तथा वरुणः शंस्यानां स्तुत्यानां मध्ये उक्थ्यः स्तु
त्यो भवति अतिशयेन स्तुत्य इत्यर्थः॥ वरुणः उनन्प्रत्ययो नित्वादाद्युदात्तः॥ शंस्यानां॥ शंसु स्तुतौ॥ ऋहलोर्ण्यत्॥ तित्स्वरितमिति प्राप्ते
ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तः॥ क्रतुः॥ कृञः क्रतुरिति कर्तुः कृत्वा गुणाभावे यणादेशः॥ प्रत्ययस्वरेणाद्युदात्तः॥ उक्थ्यः उक्थं
शस्त्रं तेन स्तुत्यत्वेन तत्र भव उक्थ्यः भवे छंदसीति यत्॥ यस्येति लोपः॥ अत्र तित्स्वरितमित्येतद्बाधित्वा तीर्थ्यायकृत्याये इत्येतत्
प्राप्तसमाद्युदात्तत्वं सर्वे विधयश्छंदसि विकल्प्यंत इति न क्रियते न तु यस्येति लोपात्प्रागेवास्ति स्वरितत्वमस्तु।
नहि तस्य तोनावयवस्त्वेन दृष्टिः भावात्॥ अत एव स्वर्ग्यायवर्ग्याय चेत्यादौ स्वरितत्वं दृश्यते॥ नच परत्वान्नित्यत्वाच्च यस्ये
ति लोपेन प्रथमतो भाव्यमिति वाच्यम्॥ प्रकृतिप्रत्ययाश्रयाद्वृद्धिर्गाढयस्येति लोपात् प्रत्ययमात्राश्रयत्तथा अंतरंगत्वेनाति

भा॰ प्र॰ स्वरितमित्यस्य प्राबल्यात्॥ अतर्ड्स्यामित्यादिवदुपकद्द्याप्रिलक्षणएव स्वरितत्वं भविष्यतीति। किं छांदसत्वेन। यत्र हि लोपमंतरेण
५.१ न चलंतं तत्र यतोनाव इत्येतदुपपत्ति तथा चेयंयमिति लोपानिबंधन स्वप्रदेशेषु स्वरितत्वेनैव भवितव्यमिति। एवं तर्हि तीर्थ्याय
कृष्या येत्यादौ च द्राघ्रदात्तत्वं तदेव छांदसमस्तु अथ अत्र तु यणादेशं बलीय इत्यत एवेतल्लोपि स्वरितत्वं बाधित्वा लोप एव भविष्य
तीति अस्य स्यादुर्व्यायस्व उर्व्यायेत्यादौ च छांदसस्य मस्तु सर्वथैकत्र छांदसत्वं स्यादित्यनुच्यते॥ ॥५॥ इति प्रथमस्य प्रथमे द्वात्रिंशो वर्गः
॥ ॥ सूक्ते षष्ठीमृचमाह॥ तयोरिदवसा वयं सनेम नि च धीमहि॥ स्यादुत प्ररेचनं॥ तयोरित्थं पूर्वोक्तयोरिंद्रावरुणयोरेव अवसा
रक्षणेन वयमनुष्ठातारः सनेम संभजेम धनमिति शेषः। नि धीमहि च प्राप्तं धनं यावदपेक्षितं तावदुक्ता॥ ततोऽवशिष्टं धनं क
चिन्निधिरूपेण स्थापयामश्च॥ उत अपि च प्ररेचनं॥ भुक्तान्निहिताच्च प्रकर्षेणाधिकं धनं स्यात् संपद्यतां॥ अवसा अवतेरसुन् नित्वादाद्यु
दात्तः॥ वयं। यूयं हि स्थेत्यत्र यदुक्तं तदत्र द्रष्टव्यं॥ सनेम॥ अग्निषिलिङ् तस्य मस निर्त्यं ङित इति मकारलोपः किदाशिषीति यासुट् छंदः
स्युभयथेति सार्वधातुकत्वमप्यस्तीति लिङः सलोपोऽनंत्यस्येति सकारलोपः अतो येय इति इय्यादेशः लोपो व्योर्वलीति यलोपः लिङ्
याशिष्यङिति अङ् आद्गुणः पादादित्वान्न निघातः धीमहि डुधाञ् धारणपोषणयोः आशिषि लिङि महिङ्॥ तस्य छंदस्युभयथेति
सार्वधातुकार्धधातुकसंज्ञे तत्र सार्वधातुकत्वेन लिङः सलोपोऽनंत्यस्येति सकारलोपः सार्वधातुकमपिदिति ङित्वं॥ शप् बहुलं छंदसीति
लुक् श्लावित्यादेशपि अपो लुक्॥ आर्धधातुकत्वाद्द्गातोलोप इटि चेत्याकारलोपः निघातः सनेमेत्यपेक्षयाद्यत्ति नेत्यत्र स्वा योगप्रथमेति
न निषेधः स्यात् अस्तेः प्रार्थनायां लिङ् तिप् इतश्चेति इकारलोपः स्फुट्परस्मैपदेषूदात्तादिश्चेति यासुट् ङित् अदिप्रभृतिभ्यः श
प इति शपो लुक्॥ श्नसोरल्लोप इत्यकारलोपः पादादित्वान्न निघातः इतरेवमाहीनामंत उत्यंतोदात्तः प्ररेचनं॥ रिचिर् विरेचने भा
वे ल्युट् योरनादेशौ लितीति प्रत्ययात्पूर्वस्योदात्तत्वं प्रादिसमासः कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥ सप्तमीमृचमाह॥ इंद्रावरुण वाम
हं हुवे चित्राय राधसे॥ अस्मान्सु जिग्युषस्कृतं॥ इंद्रावरुणा हे इंद्रावरुणौ वां युवामुभौ अहं हुवे आह्वयामि किमर्थं चित्राय मणिमुक्तादिरूपेण वि
धाय राधसे धनाय ततः आहूतौ युवां अस्मान् नुष्ठातृन् सु जिग्युषः शत्रून् विषये सम्यग्जययुक्तान् कृतं कुरुतं॥ इंद्रावरुणा सुपां सुलुगित्यादिना संबोधन
स्य आकारः देवताद्वंद्वे चेति पूर्वपदस्यानङ् आमंत्रितान्त्युदात्तत्वं॥ सांहितायां छांदसं रूपं सं हुवे। ह्वेञ् स्पर्धायां शब्दे च लडुत्तमैकवचनं शप इत्सनुत्रो बहु
लं छंदसीति लुक् ह्वः संप्रसारणं बहुलं छंदसीति संप्रसारणं॥ परपूर्वत्वं। अचि श्नुधात्वित्यादिना उवङ्। न च ह्रश्नुवोरित्यादिना यणादेशः॥ उत्त
रेण हि प्रतिपदं स्यन त्र पुनरस्य लक्षणिकत्वात्॥ उवः प्रत्ययस्वरेणोदात्तत्वं पादादित्वान्न निघातः॥ राधसे। अस्मि सुन्नित्वादाद्युदात्तत्वं॥
अस्मान् उदात्तानिवृत्तिस्वरेण तत्वात्॥ जिग्युषः इति जेर्लिटः क्वसुः द्विर्वचनं लिटः क्वसुश्चेति क्वसुः द्विर्भावः सन्लिटोर्जेरिति कुत्वं यस्य कुत्वं क्वसुः क्रिया ११
गुणाभावः क्रादिनियमप्राप्तस्येट् एकाचो वसु सामान्यानियमेन निवृत्तिः द्वितीयाबहुवचनं शसि भसंज्ञायां वसोः संप्रसारणमिति संप्रसार
णं परपूर्वत्वं षत्वं च आचर इति णत्वं शासिवसिघसीनां चेति षत्वं प्रत्ययस्वरेण उकार उदात्तः॥ कृतं डुकृञ् करणे॥ लोण्मध्यमद्विवचनं ५.१
स्य तस् इत्यादेशः शपो बहुलं छंदसीति लुक्॥ तिङ् तिङ इति निघातः॥ ॥ अथाष्टमीमृचमाह॥ ॥ इंद्रावरुण नू नु वां सिषासंतीषु
धीष्वा॥ अस्मभ्यं शर्म यच्छतं॥ इंद्रावरुणा हे इंद्रावरुणौ धीषु अस्मदीयबुद्धिषु युवां सिषासंतीषु संभक्तुं सम्यक् सेवितुमिच्छंतीषु सत्सु

नीमा समंतादस्मभ्यं शर्म सुखं नू नु अतिशयेन क्षिप्रं यच्छतं दत्तं। षड्विंशतिसंख्याकेषु क्षिप्रनामसु नु मक्षु इति पठितं॥ तस्य द्विरभ्यासो बलादतिशयो
लभ्यते। इंद्रावरुणा उक्तं॥ नू नु ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति पूर्वस्य दीर्घत्वं॥ सिषासंतीषु। वन षण संभक्तौ। धात्वादेः षः सः इत्यादेशः सन्
द्विर्भावो हलादिः शेषः। सन्यत इतीत्वं। आदेशप्रत्यययोरिति षत्वं सनीवंतर्ध्दभ्रस्जेत्यादिना विकल्पादिडभावः जनसनखनां सञ्झलोरिति नकारस्य आकारः
उपरिलटः शतृ कर्तरि शप्। उगितश्चेति ङीप्। शप्श्यनोर्नित्यमिति नुम् ङीपः शपश्च पित्वादनुदात्तत्वे सार्वधातुकत्वेन चानुदात्तत्वं॥ सनोनित्वादाद्यु
दात्तत्वं तदेव शिष्यते॥ धीषु सावेकाच इति विभक्तेरुदात्तत्वं। अस्मभ्यं अस्मभ्यमप्रतिषुत इत्युक्तं। यच्छतं। दाण् दाने शपि पाघ्रेत्यादिना यच्छा
देशः॥ ॥ नवमीमृचमाह॥ ॥ प्र वामश्नोतु सुष्टुतिरिंद्रावरुण यां हुवे॥ यामृधाथे सधस्तुतिं॥ इंद्रावरुणा हे इंद्रावरुणौ वां युवां सुष्टुतिः शोभन
स्तुतिं प्रति हुवे युवामुभावाह्वयामि किं च सधस्तुतिं युवयोरुभयोः साहित्येन क्रियमाणा या स्तुतिस्तया युक्तां यां सुष्टुतिं प्रति लभ्य ऋधाथे युवां वर्ध
यतादृशी सुष्टुतिः शोभनस्तुतिरनुभवत्यत्र उसमस्य वामश्नोतु युवां व्याप्नोतु। अश्नोतु। अशू व्याप्तौ स्वादिभ्यः श्नुः सुष्टुतिः न
ञ्मू अस्य सुष्टुतिमित्युक्तं। इंद्रावरुणा हुवे उक्तं। अनुयद्वृत्तयोगान्न निघातः। ऋधाथे ऋधु वृद्धौ लङ् व्यत्ययेनात्मनेपदं। मध्यमद्विवचनं फ
आथे बहुलं छंदसीति लुक्॥ व्यत्ययस्वरेण आकार उदात्तः यद्वृत्तयोगान्न निघातः॥ सधस्तुतिं सधस्तुतिर्यस्यां सुष्टुतौ सा सधस्तुतिः अत्र सुष्टुति
रन्यपदार्थः स्तुतिशब्दस्य क्तिन्यन्ते अनयैव करणसाधनत्वेन कृत्यल्युटो बहुलमित्ययं कर्तरि भावसाधनतया स्तवनक्रियापरः तस्मिन् भावसाधनत्वे
न क्रियापरे अयं करणसाधनत्वात्कृपरः इति समस्यमानपदार्थान्यस्य सहशब्दस्य व्यत्ययेन धकारः सहशब्दः एवमादित्वादंतोदात्तः
बहुव्रीहित्वेन पूर्वपदप्रकृतिस्वरत्वं॥ ॥ इति प्रथमस्य प्रथमे त्रयस्त्रिंशो वर्गः॥ ॥ इति ऋक्संहिताभाष्ये प्रथममंडले चतुर्थोऽनुवाकः॥
पंचमेऽनुवाके पट् सूक्तानि तत्र सोमानमित्यादिकं नवर्चं प्रथमं सूक्तं॥ ऋषिश्छंदसि पूर्ववत् देवविशेषस्त्वेवमनुक्रम्यते सोमानमिति पंच ब्राह्म
णस्पत्यास्त्वतुर्थ्यामिंद्रश्च सोमश्च पंचम्यां दक्षिणा चान्याः सादसस्पत्यो नाराशंसी वांत्यातिसदृगताआद्याः पंचर्चो ब्रह्मणस्पतिदेवताकाः
तासां मध्ये स घा वीर इत्येतस्याश्चतुर्थ्या ऋचो ब्रह्मणस्पतिरिंद्रश्च सोमश्चेति तिस्रो देवतास्तामित्येतस्याः॥ पंचम्या दक्षिणायास्त पूर्वोक्ताः
तिस्रो देवताः षष्ठीमारभ्यातिसृणां सदसस्पतिर्देवता नराशंसमित्येतस्यां नवम्याः सदसस्पतिर्नराशंसो वा विकल्प्यते विनियोगस्तु पूर्ववत्
॥ तस्मिन्सूक्ते प्रथमामृचमाह॥ ॥ सोमानं स्वरणं कृणुहि ब्रह्मणस्पते॥ कक्षीवंतं य औशिजः॥ हे ब्रह्मणस्पते एतन्नामक देव सोमानं
अभिषवस्य कर्तारं मां अनुष्ठातारं स्वरणं देवेषु प्रकाशनवंतं कृणुहि कुरु। अत्र दृष्टांतः कक्षीवंतं एतन्नामकमृषिं इव शब्दोऽत्राध्याहर्तव्यः कक्षीवान् य
था देवेषु प्रसिद्धः। तद्वदित्यर्थः यः कक्षीवानपि औशिजः उशिजः पुत्रः तमिवेति पूर्वत्र योजना। कक्षीवतोनुष्ठातृषु मुनिषु प्रसिद्धिः। तैत्तिरीये
नाय नेवं यं परमाहारः कक्षीवांऔशिजोऽवीतहव्यः श्रायस्य त्रसदस्युः पौरुकुत्स्यः प्रजाकामा अचिन्वत तत इत्यादि ऋग्वेदेऽपि संकथनेनानुष्ठा
तृत्व प्रसिद्धिः सूच्यते अहं कक्षीवाँ ऋषिरस्मि विप्र इति। तस्माद्दृष्टान्तानुष्ठातारं प्रति दृष्टांततया युक्तं। सोऽयं मंत्रो यास्केन व्याख्यातः॥ सोमानं सोता
रं प्रकाशनवंतं कुरु ब्रह्मणस्पते कक्षीवंतमिव य औशिजः कक्षीवान् कक्ष्यावानौशिज उशिजः पुत्रः उशिग्वष्टेः कांतिकर्मणोऽपि त्वयं मनुष्य

101
1924

कक्षीवन्तमभिप्रेतस्वान्तं सोमानं सोतारं मां प्रकाशवन्तं कुरु ब्रह्मणस्पत इति अस्मिन्मंत्रे सोमानमिति पदेन ब्रह्मणइतिपदेन सन्निधानात्सर्यतेतिरी
आ॰ प्र॰ याआमनंति। सोमानं स्वरणमित्याह सोमयागार्थमेवावरुंधे कृणुहि ब्रह्मणस्पतइत्याह ब्रह्मवर्चसमेवावरुंधइति। सोमानं सखीतिवु अभि
५.२ षवे। अन्येभ्योपिदृश्यतइति मनिन् हृञ्ग्रहणस्यपि भ्योन्नरोपसंग्रहणार्थं नान्निलोपिना घृदात्तत्वं। किंतु प्रत्ययस्वरएव। उच्छादिषु सोमवत्रा
ह्रोद्वच्छः बहुलग्रहणाद्धौणादिकोवामनि ङ्श्च्यः। स्वरणं प्रख्यातं स्वृशब्दोपतापयोः कृत्यल्युटोबहुलमितिकर्मणिल्युट् लितीत्यकारउदात्तः
।कृणुहि। कृञ्हिंसाकरणयोश्च इदितोनुम्धातोरितिनुम्। कोदः। सि। धिन्विकृण्व्योरचेत्युप्रत्ययः तत्संनियोगेनवकारस्यअका
रः तस्यातोलोपइतिलोपः तस्यस्थानिवद्भावान्न पूर्वस्यलघूपधगुणः हेर्ङित्वान्न उकारस्यगुणः उतश्चप्रत्ययाच्छंदोवावचनमितिहेर्लुक्।
सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्य इतिवचनाद्धेरेवप्रत्ययस्वरेणोदात्तत्वं पादादित्वान्ननिघातः ब्रह्मणः पत्युःपतिपुत्रेत्यादिनासंहि
तायांविसर्जनीयस्यसकारः सआमंत्रितपरांगवद्भावात्षष्ठ्यामंत्रितनिघातः। कक्षीवंतं कक्ष्या स्थादरसंबंधिनीरज्जुः भवेच्छंद
सीतियत्प्रत्ययः सा अस्यास्तीत्यस्त्यर्थे आसंदीवदष्ठीवच्चक्रीवत्कक्षीवदितिक्यषीवद्रोपनामकक्षीवच्छब्दोनिपातितः छंदसीरइतिवत्वं। प्रत्
ययस्वरेणनखादिशनिपातितईकारउदात्तः मतुपःपित्वादनुदात्तो औशिजः वशकांतौ उशीत्यनुवृत्तावचः किच्चेतिइतिप्रत्ययः तस्यकित्वा
द्ग्रहिज्यादिनासंप्रसारणं परपूर्वत्वं गुणाभावः सतस्यापत्यमितिप्राग्दीव्यतोण् आदिवृद्धिः प्रत्ययस्वरेणांतोदात्तत्वं॥ ॥द्वितीयामृचमा
ह॥ ॥योरेवान्योअमीवहावसुवित्पुष्टिवर्धनः॥ सनःसिषक्तुयस्तुरः॥ योब्रह्मणस्पतिःरेवान् पशुमान् अमीवहा रोगाणां हंता वसुवित् धनलब्धा
पुष्टिवर्धनः पुष्टेर्वर्धयितायश्चतुरः त्वरोपेतः शीघ्रफलदः सब्रह्मणस्पतिर्नोस्मान् सिषक्तु सेवतां परिगृह्णातु गृह्णात्वित्यर्थः। अत्रसिषक्तुत्वर
यस्य सेवार्थतंयास्कआह। सिषक्तुसचतइति सेवमानस्येतिप्रत्याय्य कोत्ररक्षाविविध इति शेषः। रेवान् रयिरस्यास्तीतिमतुपरयेर्मतौबहुलमितिव
कारस्यसंप्रसारणं। परपूर्वत्वं छंदसीरइति वत्वं आद्गुणः ननु वत्वस्यासिद्धत्वाद्धलिगत्वाभावा प्रागेवगुणे कृते उवर्णाभावान्नवत्वं। नचांतादिवच्चे
त्यादिवद्भावेनउवर्णसंपादनं वर्णाश्रयविधौतन्निषेधात् अन्यथा षड्भिरित्यत्रसवर्णदीर्घस्यांतवद्भावेन अकारत्वादतोभिसऐसिति ऐसा
देशःस्यात् नचानिरवकाशत्वेन वत्वस्यानवकाशत्वं। अग्निवान्वेदं भंवतः उपब्रह्माणि हरिवइत्यादावकाशलाभात् सत्यं अत्रगुणप्र
वृत्तेःप्रागिकारात्परोमतुप्कदाचिदिवर्णात्परस्यमतुपः पश्चादेकारादेशेन इवर्णाभावेपिभवतिवत्वमिति छंदसीर इतिसूत्रकृतामभिवक्षितं।
अमुनैवाभिप्रायेण हरिवइत्यादिकमुदाहृत्यापि अंतरतुरताआरवान्नित्युदाहृतं। रुस्वनुज्ञामित्यत्रापि कदाचिच्च स्यात्परस्यैव आरे
वान्मतुपइत्युदात्तत्वं वक्ष्यत्यत्रारेशब्दस्याप्युपलक्षणं अतएव हरिवांउ इत्यादौ मतुपउदात्तत्वं दृष्टं अथवा रुस्वनुज्ञामित्य
त्रापिकदाचिच्चस्यात्परस्य मतुपउदात्तत्वमिति व्याख्येयं एवं च संप्रसारणपूर्वपूर्वत्वयोः कृतयोर्गुणाकृते ह्रस्वात्परोमतुबितिरेवानार ५२
वानित्यादौसर्वओदात्तत्वं सिध्यति अयमेवसूत्रकृताभिप्रायो वार्तिककृताव्याख्यातइति। अमीवहा अमरोग इत्यस्मादुन्प्रत्ययेन अ
मीवशब्दोनिपातितः तं हंतीतिबहुलं छंदसीति क्विप् कृदुत्तरपदप्रकृतिस्वरत्वं॥ वसुवित् वसुविंदतीतिवसुवित्। क्विपचेति क्विप्। उत्तरप
दप्रकृतिस्वरत्वं पुष्टिवर्धनः वर्धयतेर्नंद्यादित्वाल्ल्युः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वं। पुष्टेर्वर्धनइतिकर्मणिषष्ठ्या समासः कृदुत्तरप

दप्रकृतिस्वरत्वं। सिषक्तु। षच समवाये। लोटिबहुलंछंदसीतिशपःश्लुः श्लाविति द्विर्वे हलादिःशेषश्च बहुलंछंदसीति अभ्यासाकारस्य इकारः तुर
त्वरणे इगुपधज्ञाप्रीकिरः कः प्रत्ययस्वरः॥ ॥तृतीयामृचमाह॥ मानःशंसोअररुषोधूर्तिःप्रणङ्मर्त्यस्य॥ रक्षाणोब्रह्मणस्पते॥ अररुषोमर्त 103/1924
स्य उपद्रवं कर्तुमस्मत्समीपं प्राप्तस्य शत्रुरूपस्य मनुष्यस्य धूर्तिः हिंसकः शंसः नमस्त्वेपइत्यर्थः। तादृशोवाग्दोषोनोस्मान् माप्रणक् मासंपृण
क्तु शत्रूणां प्रयुक्तोभिशापः कदाचिदस्मान्माप्राप्नोत्वित्यर्थः। तदर्थं हे ब्रह्मणस्पते नोस्मान् रक्षपालय। मानिघातः शंसनं शंसः भावे घञ्
ञित्वादाद्युदात्तः अररुषः अंतरररित्यंतर्भावितण्यर्थात् ऋगतावित्यस्माद्रस गुणोरपरत्वं। प्रत्ययस्वरेप्राप्ते रपात्इतिदाद्युदात्तः धूर्तिः धूर्वि
हिंसार्थः क्तिन्क्तिचसंज्ञायामितिकृतिनुत्रनयसिमकसरकसेषुचेतिइट्प्रतिषेधः उपधायांश्चेत्युपधादीर्घत्वं वलिलोपंबाधितापिउविप्राप्तेराल्लो
प इति वकारलोपः। प्रणक् पृची संपर्के लङि सिप्। इतश्चेतीकारलोपः। हल्ङ्यादिलोपः। कुत्वं रुधादिभ्यःश्नम् तस्याल्लोपः बहुलमिति आडागमः
॥ । यणादेशः अकारस्य आगमानुदात्तत्वं बाधित्वा स्वरितत्वेन उदात्तत्वं। वादिलोपविभाषेति निघाताभावः मर्त्यस्य मृङ् प्राणत्यागे असिहसि मृ
ग इत्यादिना औणादिकस्तन्प्रत्ययः मर्त्येषु भव इत्यर्थे भवेछंदसीति यत् यतोनाव इत्याद्युदात्तत्वं। रक्षरक्षपालने लोटः पित्वादनुदात्तत्वं धातुस्व
रएवशिष्यते पादादित्वान्न निघातः रक्षाणः ऋचितुनुघ इति दीर्घः उपसर्गात् बहुलमिति बहुलग्रहणादनुपसर्गादपि नसोणत्वं। ब्रह्मणस्
तेपष्ठ्याःपतिपुत्रेतिसंहितायांविसर्गस्यसकारः सआमंत्रितपरांगवद्भावात्षष्ठ्यामंत्रितनिघातः॥ ॥चतुर्थीमृचमाह॥ सघावीरोनरिष्य
ति यमिंद्रोब्रह्मणस्पतिः॥ सोमोहिनोतिमर्त्यं॥ इंद्रोदेवायंयक्ष्यमाणंहिनोति प्राप्नोति वर्धयतिवा तथाब्रह्मणस्पतिर्यंवाहिनोति तथासोमोहि
नोति॥ सघसएवयजमानः वीरोवीर्ययुक्तः मनन रिष्यतिनविनश्यति। घ चादिरनुदात्तः संहितायांऋचितुनुघमक्षुतङ्कुत्रोरुष्याणामिति
दीर्घः ब्रह्मणस्पतिः उक्तं हिनोति। हिगतौ वृद्धौ च॥ स्वादिभ्यःश्नुः तिपःपित्वात्श्नुप्रत्ययःस्वरएवशिष्यते॥ ॥पंचमीमृचमाह॥ त्वंतंब्रह्म
णस्पतेसोमइंद्रश्चमर्त्यं॥ दक्षिणापात्वंहसः॥ हेब्रह्मणस्पतेत्वंतंमर्त्यं अनुष्ठातारंमनुष्यं अंहसःपापात्पाहीतिशेषः। तथासोमः पातुइंद्र
श्चपातुदक्षिणाख्यादेवताचपातु। दक्षिणा। दक्षवृद्धौ। द्रुदक्षिभ्यामिननित्वाद्यदात्तः अंहसः नविषयेत्यादिना आद्युदात्तः॥इति
प्रथमस्यप्रथमेचतुर्स्त्रिंशोवर्गः॥ ॥अनुप्रवचनीयेचसदसस्पतिमित्येषाविनियुक्ता तथाचसूत्रं मेखलामाबध्यतिरंदेप
श्यते॥ आचार्यः समन्वारब्धेनुहुयात् सदसस्पतिमद्भुतमिति॥ ॥तामेतांषष्ठीमृचमाह॥ सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं
॥सनिंमेधामयासिषं॥ ॥मेधालब्धुंसदसस्पतिंएतन्नामकंदेवंअयासिषंप्राप्तवानस्मि कीदृशं॥ अद्भुतमाश्चर्यकरं इंद्रस्यप्रियंसो
मपानेसहचारित्वात्॥ काम्यंकमनीयं सनिं धनस्यदातारं॥ सदसःषद्लृविशरणगत्यवसादनेषु सर्वधातुभ्यःअसुन् नित्त्वादाद्युदात्तः॥ पतिःपातेर्डतिः
डिलोपः प्रत्ययस्वरः॥ प्रियं। इगुपधज्ञाप्रीकिरः कः उदङःप्रत्ययस्वरः॥ काम्यं कामयतेरचोयत् णेरनिटीतिणिलोपः। यतोनावइत्या
द्युदात्तत्वं। सनिंषणुदानेधात्वादेःषःसः अचइरित्यनुवृत्तौ खनिकषिजसिवसिध्वनिस्तनिवनिसनिग्रंथिचरिभ्यश्चेतिइप्रत्ययः। प्रत्यय
स्वरः॥ अयासिषं। याप्रापणे। लुङि मिपोमादेशः यमरमनमातांसक्चेति सिगिडागमः। धातोःसगागमः निघातः॥ ॥सप्तमीमृ
चमाह॥ यस्मादृतेन सिध्यति यज्ञोविपश्चितश्चन॥ सधीनांयोगमिन्वति॥ यज्ञोयमनुष्ठातव्योविपश्चितश्चनविदुषोपियजमानस्य

भा०प्र० यस्मात्सदसस्पतिर्देवात्तेन मिषत्विर्मायं सदसस्पतिर्देवो धीनां मनोनुधानविषयाणां अस्मद्बुद्धीनामनुष्ठेयकर्मणां वा योगं संबंधं पिन्वतिस्थापयति यज्ञ
५३ मानमनुष्ठानदीयं यज्ञं निष्पादयतीत्यर्थः॥ यस्मात अन्यादीदित्यादिना जनं योगा संचमीमांपेकाचड इतिविभक्तेरुदात्तत्वं प्राप्तेन गोभंसा च वर्णोति
प्रतिषेधः लिध्वतिपिधुसंति॥ श्यनानित्वादायुदात्तत्वं॥ यद्वत्तान्नित्यमितिनिघातप्रतिषेधः॥ मीमांसावकाचड इतिविभक्तेरुदात्तत्वं॥ योगांयु
जिर्योगे॥ घञि चादा घुदात्तत्वं॥ इन्वति॥ इनिध्यामीं ज्ञायइवितानुमधातोरितिनिघातः॥ ॥अष्टमीमृचमाह॥ आदृध्नोति हविष्कृतिं प्रांचं कृणो
त्यध्वरं॥ होत्रा देवेषु गच्छति॥ आत्॥ अनंतरमेव हविष्कृतिं हविःसंपादनयुक्तं यजमानं ऋध्नोति॥ सदसस्पतिर्देवो वर्धयति हविर्दानानंतर
मेव फलं प्रयच्छतीत्यर्थः॥ तथाविधफलसिध्यर्थे अध्वरं यजमानेनानुष्ठीयमानं यज्ञं प्रांचं प्रकर्षेण गच्छंतं अविघ्नेन परिसमाप्तियुक्तं कृणोति
करोति होत्रा हूयमाना इयतानुष्ठानसती यजमानं प्रख्यापयितुं देवेषु गच्छति॥ यद्वा होत्रा अस्मदीयस्तोत्ररूपा वाक् देवान्परितोषयितुं देवे
षु गच्छति॥ श्वाकोधारत्याह्विषु समपंचासत्सवाङ्नामसु होत्रा गीरिति पठितं॥ हविष्कृतिं हविषः कृतिः संपादनं यस्य यजमानस्य सोयं हविः
कृतिः बहुव्रीहौ प्रकृत्या पूर्वपदं प्रकृतिस्वरत्वं॥ प्रांचं अनिगंतोंचतौ प्रत्यय इति गतः प्रकृतिस्वरत्वं पश्चादेकादेशस्वरः॥ अध्वरं न विद्यते ध्व
रो हिंसा यस्मिन्॥ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥ हूयते॥ अस्यामिति होत्रा हुवेत्रा हूयमाना अस्मिन्निति तिलुनि बाहुलकादुदात्त॥ ॥
नवमीमृचमाह॥ नराशंसं सुधृष्टममपश्यं सप्रथस्तमं॥ दिवो न सद्ममखसं॥ नराशंसं एतन्नामकं देवविशेषं यष्टाअवयवार्थस्तु सत्यासदस
स्पतिदेवतापरोयंशब्दः॥ व्युत्पत्तिं च यास्कोदर्शयति नराशंसो यज्ञ इति कात्थक्यो नरा अस्मिन्नासीनाः शंसत्यग्निरिति शाकपूणिर्नरैः प्रशस्यो भ
वतीति॥ अत्राग्निवत्सरसस्पतेरपि नरैः शस्यमानत्वान्नराशंसत्वं॥ एतमेवाभिप्रायं हृदि निधाय ब्राह्मणमेवमाम्नायते प्रजा वै नरो वाक्शंसं
स इति॥ अतो मनुष्यैः शस्यमानाय सदसस्पतिर्यावान्नराशंसनामकोदेवः तमपश्यं ज्ञानदृष्ट्याद्राक्षं यागं स्मिन्कीदृशं सुधृष्टमं अत्यधिकं
नधार्ष्ट्ययुक्तं सप्रथस्तमं॥ अतिशयेन प्रख्यातं सप्रमखसं॥ प्राप्ततमं तं तदृष्टांतः दिवो नद्यलोकानिव आदित्यवद्राप्तिभिरधिष्ठितालोक
विशेषा यथा तेजस्विनः तद्वदयं नराशंसः तेजस्वीत्यर्थः॥ सुधृष्टमं॥ शोभनं धृष्टमतीति सुधृष्क्विपंवीतिविषष॥ अतिशायनिकत्वमपकारस्य
तस्याभावश्छांदसः॥ हृदुत्तरपदप्रकृतिस्वरत्वेनककार उदात्तः॥ अथपश्यंपाघ्राध्मेत्यादिना पश्यादेशः॥ लुङ्लङ्लिङ्क्ष्वडुदात्त इत्यडुदात्तः तत्संपाता
दित्यानन्निघातः॥ सप्रथस्तमं प्रथप्रख्याने प्रथनं प्रथः सर्वधातुभ्यासन्निवादायुदात्तत्वं॥ सह प्रथसा वर्तत इति तेन सहेति तुल्ययोग इति बहुव्री
हौ समासः वोपसर्जनस्येति सादेशः॥ पूर्वपदप्रकृतिस्वरत्वे प्राप्तेपरादिः छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं॥ दिवः ऊडिदमित्यादिना विभक्तेरुदात्त
त्वं॥ सद्मसखसं सीदंतीति सद्म॥ यद्वा विशेषणादौ अन्येभ्योपि दृश्यत इति मनिन्नित्वादायुदात्तः सखमहीयस्येति बहुव्रीहौ हकारस्य यत्ययेन स
कारः॥ ॥इति प्रथमस्य प्रथमे पंचत्रिंशो वर्गः॥ ७॥ प्रतित्यमिति नवर्चं द्वितीयं सूक्तं कण्वस्यार्षं सप्तीपूर्ववत॥ देवतानुक्रम्यते प्रति त्यमग्निमा
रुत मिति॥ का त्रिंशो प्रतित्यमित्येषा धाय्या तथा च सूत्रितं॥ वर्षकालेपि कारीरित्यां प्रति त्यं चारुमध्वरमीळे अग्निं स्वयं सं नमोभिरिति धा
य्ये इति॥ ॥तामेतां सूक्तगतां प्रथमामृचमाह॥ प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे॥ मरुद्भिरग्न आ गहि॥ त्यच्छब्दः सर्वनामा तच्छब्दपर्यायः हे ५३
अग्ने यो यत्तः चारुं अंगवैकल्यरहितं तं तथाविधं चारुं अध्वरं प्रति लक्ष्यगोपीथाय सोमपानाय प्रहूयसे प्रकर्षेण त्वं हूयसे तस्मात्स्मिन्नध्वरे त्वं

मरुद्भिः मरुद्देवविशेषैः सह आगहि आगच्छ यस्य कयास्के न एवं व्याख्याता तं प्रति चारुमध्वरं सोमपानाय प्रहूयसे सोग्ने मरुद्भिः सहागच्छेति॥ प्रतिनि
पातआद्युदात्तः॥ त्यत्यदादीनामः प्रातिपदिकस्वरः॥ चारुं दृसनिजनिचरीत्यादिना उण्॥ अत उपधाया इति वृद्धिः ञित्वादायुदात्तः॥ गोपीथाय निशी 105
थ गोपीथावसथा॥ इतिथक्प्रत्ययांतो निपातितः प्रतिनिपातस्वरः॥ ॥द्वितीयामृचमाह॥ नहि देवो न मर्त्यो महस्तव क्रतुं परः॥ मरुद्भिरग्न
आ गहि॥ हे अग्ने महः महतस्तव संबंधिकृतुं कर्म किंचिप मनुष्यपरो न हि उत्कृष्टो देवो न भवति खलु॥ तथा मर्त्यो मनुष्योपि परो न भवति ये मनुष्या 1924
स्त्वदीयं क्रतुं मनुतिष्ठंति ये च देवास्त्वदीयक्रतावि ज्यंते तेन एवान्कृष्टा इत्यर्थः॥ मरुद्भिरित्यादि पूर्ववत्॥ नहि एवमादीनामंत इत्यंतोदात्तः देवः प
चाद्यजंतत्वात्स्वित्वा इंतोदात्तः मरः महतस्तलोपश्छांदसः बहुलमहतार पसंख्या नमिति विभक्तेरुदात्तत्वं॥ तव युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं॥
कतुं कृतः कर्तुः प्रत्ययाद्युदात्तत्वं॥ गृह्णिगभस्त्रपूर्गता॥ क्रोडः सर्वत्र बहुलं छंदसीति शपो लुक्॥ अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः
तस्यासिद्धवदत्राभादित्यसिद्धत्वादतो हेरिति लुङ् भवति निघातः॥ तृतीयामृचमाह॥ ॥ ये महो रजसो विदुर्विश्वे देवासो अद्रुहः॥ मरुद्भि
रग्न आ गहि॥ हे अग्ने ये मरुतो महो रजसो महतउदकस्य वर्षणप्रकारं विदुः तैर्मरुद्भिरित्यन्वयः कीदृशा मरुतः विश्वे सर्वे सखविभागणापे
ताः ससगणा वे पुरत इति श्रुतेः देवासो द्योतमानाः अद्रुहो द्रोहरहिताः वर्षणेन सर्वभूतोपकारित्वात्तथा चापरिदासाम्नायते उदीर
यथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषण इति॥ अन्यत्रापि मंत्रांतरस्यत्राह्मणमेवमाम्नायते मरुतां पृशतय इत्याह मर
तो वृष्ट्या ईशत इति रजः॥ अस्त्याद्यास्कन बहुधा व्याख्यातः रजोरजतेर्ज्योतीरज उच्यत उदकं रज उच्यते लोका रजांस्युच्यंते सृगहनी रज
सी उच्यते इति रजसः॥ नविषयस्यानिसंतस्येत्यायुदात्तः॥ विदुः विदज्ञाने विदोलटो वेति झेरुसदेशः प्रत्ययस्वरः॥ यद्वृत्तयोगान्निघाताभा
वः॥ विश्वे विन्ते कनं तस्य नित्वादाद्युदात्तत्वं॥ देवासः आज्जसेरसुक् देवशब्दः पचाद्यजंतः चित्वादंतोदात्तः अद्रुहः संपदादित्वात् भावे क्वि
पि बहुव्रीहौ नञ्सुभ्यामित्यंतोदात्तत्वम्॥ कर्तरि वा क्विप॥ तत्पुरुषे हि अव्ययपूर्वपदप्रकृतिस्वरत्वं स्यात्॥ नच हृदुत्तरपदप्रकृतिस्व
रत्वं यतोनञ्॥ नगतिरिति चकार इति॥ ॥चतुर्थीमृचमाह॥ य उग्रा अर्कमानृचुरनाधृष्टास ओजसा॥ मरुद्भिरग्न आ गहि॥ ये मरु
त उग्रास्तीव्राः संतः अर्कमुदकं आनृचुः आर्चितवंतः वर्षणेन संपादितवंत इत्यर्थः॥ तैर्मरुद्भिरित्यन्वयः कीदृशा मरुतः ओजसा बलेन
अनाधृष्टासः अतिरस्कृताः सर्वैर्भ्यापि प्रबला इत्यर्थः॥ अर्कशब्दस्योदकवाचित्वं वाजसनेयिन आमनंति॥ आपो वा अर्क इति तन्निर्व
चनं च तत्रैवामनंति सोर्चन्नचरत्तस्यार्चत आपोजायंतार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वमिति॥ सजगत्स्रष्टा हिरण्यगर्भ उदकं
स्रष्टुमुद्युक्तः अर्चनं संस्तुत्य संकल्प्य महिमप्रख्यापनेन स्वात्मानं पूजयन्नचरत्तथा पूजयतो हिरण्यगर्भस्य सकाशादुदकमुत्पन्नं तदानी
मर्चतो मनःकमभूदित्येवाचतेनोदकस्यार्कनामनिष्पन्नमित्यर्थः॥ आनृचुः अर्चतेरपस्पृधेथामित्यादिना निपातः प्रत्ययस्वरः
यद्वृत्तयोगान्निघातः॥ अनाधृष्टासः अव्ययपूर्वपदप्रकृतिस्वरत्वं ओजसा॥ उब्जेर्बलोपश्चेत्यसुन्नित्वादायुदात्तः॥ ॥पंचमीमृच
माह॥ ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः॥ मरुद्भिरग्न आ गहि॥ ये मरुतः शुभ्रत्वादिगुणोपेताः तैर्मरुद्भिरित्यन्वयः शुभ्राः
शोभनाः॥ ये घोरवर्पसः उग्ररूपधराः॥ सुक्षत्रासः शोभनधनोपेताः॥ रिशादसः हिंसकानां भक्षकाः मरुत्वमित्यादि वृत्राविंशति सं
ख्याकेषु धननामसु क्षत्रं भग इति पठितं॥ शुभ्राः स्फायितंचीत्यादिना शुभेर्रोणादिको रक् प्रत्ययस्वरः॥ घोरवर्पसः घोरं वर्पो रूपं येषां तु

भा० अ० १ द्वन्द्वे हि पूर्वपदप्रकृतिस्वरत्वं। मरुत्त्वासः बहुव्रीहौ नञ्सुभ्यामिति उत्तरपदान्तोदात्तत्वं। आज्जसेरसुक्। छान्दसं दीर्घत्वं तु न भवति। अत्र आद्युदात्तत्वं द्रष्टव्यं।
५४ न वालशब्दादिस्तेः इदितो नुम्धातोः। सर्वधातुभ्योऽसुन्प्रत्ययः। नित्त्वेन उत्तरपदस्याद्युदात्तत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण अन्तोदात्तत्वं
व्यते॥ ॥इति प्रथमस्य प्रथमे षट्त्रिंशो वर्गः॥ सप्तमीमृचमाह॥ ॥ य ईङ्खयन्ति पर्वतान्तिरः समुद्रमर्णवं॥ मरुद्भिरग्न आ गहि॥ ये मरु
तो नाकस्याधि दुःखरहितस्य स्वर्गस्योपरि रोचने दीप्यमाने ये देवा आसते आसीनाः भवन्ति। नाकस्य
कं सुखं तत्र न विद्यते इति नाकः। ... तत्पुरुषः।
... प्रकृतिस्वरेण प्रथमं ... बहुव्रीहौ उत्तरपदान्तोदात्तत्वं
तं अधिवालो उपर्यर्थे उपसर्गप्रतिरूपको निपातः। रोचने। रुच दीप्तौ अनुदात्तेत् हलादिरिति युच्। चितः इत्यन्तोदात्तत्वं। दिवि। ऊडिदमित्या
दिना विभक्तेरुदात्तत्वं। देवासः आज्जसेरसुक्। आसते। आस उपवेशने अनुदात्तेत्त्वादात्मनेपदं। दास्य अदादित्वात् अदिप्रभृतिभ्यः श
प इति शपो लुक्। अनुदात्तेत्त्वात् सार्वधातुकानुदात्तत्वे धातुस्वरः। यद्वृत्तयोगान्न निघातः॥ ॥अष्टमीमृचमाह॥ य ईङ्खयन्ति पर्वतान्तिरः समुद्रमर्णवं॥ म
रुद्भिरग्न आ गहि॥ ये मरुतः पर्वतान् मेघान् ईङ्खयन्ति चालयन्ति तथा अर्णवं उदकयुक्तं समुद्रं तिरस्कुर्वन्ति तिरोपः निश्चलस्य ... तरंगा उ
त्पन्ने ये चालनं तिरस्कारः तैर्मरुद्भिरित्यन्वयः। ईङ्खयन्ति ईखि गत्यर्थः ... हेतुमति च इति णिच् उदितो नुम् धातोरिति नुम्। णिजंतो
धातोः ... तिङश्च सार्वधातुकस्वरेण ... पर्वतान् पर्व पर्ववान् पूरणं। औणादिक अतनप्रत्यय
स्वरः॥ ॥नवमीमृचमाह॥ आ ये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा॥ मरुद्भिरग्न आ गहि॥ ये मरुतो रश्मिभिः सूर्यकिरणैः सह आतन्वन्ति आनु
वंति आकाशमिति शेषः। किंच ओजसा स्वकीयबलेन समुद्रं तिरस्कुर्वन्ति तैर्मरुद्भिरित्यन्वयः। तन्वन्ति तनु विस्तारे करोत्यादित्वादुः ... तनादिकृञ्भ्य उः। सतिशि
ष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति तिङः प्रत्ययस्वरेणान्तोदात्तत्वं॥ ॥दशमीमृचमाह॥ अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु॥ मरुद्भिरग्न आ ग
हि॥ हे अग्ने पूर्वपीतये पूर्वकालपानाय त्वामभिलक्ष्य सोम्यं मधु सं बंधिनं मधुरसं अभिसृजामि सर्वतः संपादयामि अतस्त्वं मरुद्भिः सह
आगच्छ। अभि एव मादीनामन्त इत्यन्तोदात्तः। त्वा मादित्वात् त्वामौ द्वितीयायाः अनुदात्तः सर्वमनुदात्तः पूर्वपीतये। पूर्वा चासौ पीतिश्च पुंवत्कर्मधारयेत्यादि
ना पुंवद्भावः। सृजामि सृज विसर्गे मिप् शः पित्वादनुदात्तत्वं। सोम्यं सोममर्हतीति यः प्रत्ययस्वरेणान्तोदात्तः। मधु फलिपाटि नमित्यादिना उप्रत्य
यः निदित्यनुवृत्तेराद्युदात्तत्वं अत्र यास्कः। अभिसृजामि त्वा पूर्वपीतये पूर्वपानाय सोम्यं मधु सोममयं सोऽग्ने मरुद्भिः सहागच्छेति।
॥ ॥७॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥ ॥७॥ इति श्रीमद्राजाधिराजपरमेश्वरवै
दिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताया प्रथमाष्टके प्रथ ५४
मोऽध्यायः॥ १॥ समाप्तः॥ ७॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥ ॥श्रीकृष्णार्पणम
स्तु॥ शुभं भवतु॥ श्रीसीतारामचन्द्रार्पणमस्तु॥ ॥श्री गजानन॥ ७ ७ ७ ७ ७ ७ ७, ७, ७, ७॥७॥ ॥ ॥

श्रीगणेशाय नमः॥ ॥श्री सरस्वत्यै नमः॥ ॥यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं॥ १॥ अथ प्रथ
माष्टके द्वितीयोऽध्याय आरभ्यते॥ तत्रायं देवाय इत्यष्टर्चं तृतीयं सूक्तं तस्य ऋषिच्छन्दसी पूर्ववत्॥ ऋतुदेवताकत्वमनुक्रम्यते अयमृभवो ऋभुम्मिति॥ 167/1924
विनियोगस्तु सूक्तस्य लैंगिकः स्मार्तो वा द्रष्टव्यः। अस्य प्रथमच्छन्दोमे वैश्वदेवशस्त्रे अयं देवाय जन्मन इत्यार्भवस्तृचः। अथ छन्दोमा इति खंडे
सूत्रितं। अभि त्वा देव सवितः प्रेतां यज्ञस्य शंभुवा यं देवाय जन्मन इति च तस्मिन्सूक्ते प्रथमामृचमाह॥ ॥अयं देवाय जन्मने स्तोमो विप्रेभिरा
सया॥ अकारि रत्नधातमः॥ ऋभवो हि मनुष्याः सन्तः तपसा देवत्वं प्राप्ताः ते चात्र सूक्ते देवाः तत्र यो आयमानवाचिना जन्मशब्देन क वचनान्तेनात्र
निर्दिश्यते। जन्मने जायमानाय देवाय ऋभुसंघायेत्यर्थः अयं स्तोमः स्तोत्रविशेषः विप्रेभिः मेधाविभिः ऋत्विग्भिः आसया आस्येन अकारि क्रिया
ते कीदृशः स्तोमः रत्नधातमः अतिशयेन रमणीयमणिमुक्तादिधनप्रदः स्तोत्रे तुष्टा ऋभवो धनं प्रयच्छन्तीत्यर्थः। आसया। आस्यशब्दात्तृ
तीयैकवचनस्य सुपां सुलुगित्यादिना याडादेशः यस्येति च इति लोपः चितः इत्यन्तोदात्तः। रत्नधातमः रत्नानि दधातीति रत्नधाः॥
कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥द्वितीयामृचमाह॥ य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी॥ शमीभिर्यज्ञमाशत॥ ये ऋभवः इन्द्राय इन्द्रप्रीत्यर्थं व
चोयुजा उच्चारणादिकं विना वाङ्मात्रेण रथे युज्यमानौ अश्वौ हरी एतन्नामकावश्वौ मनसा ततक्षुः संपादितवन्तः। ऋभवो सत्यसंकल्पत्वात्संकल्पमा
त्रेण अश्वौ संपन्नावित्यर्थः। ते ऋभवः शमीभिः चमसादिनिष्पादनरूपैः कर्मभिः यज्ञमस्मदीयमाशत व्याप्नुवन्तः। अथ अनइत्यादि
पाठे शमीति कर्मनामसु शमीति पठितं॥ वचोयुजा वचसा युज्येते इति सत्सूद्विषेत्यादिना क्विप् सुपां सुलुगित्यादिना विभक्तेराकारः कृदुत्तरपद
प्रकृतिस्वरः। ततक्षुः। तक्ष त्वक्ष तनूकरणे लिटि प्रेरसादेशः पादादित्वान्न निघातः। शमीभिः शाम्यति पापानीति शम्यः कर्माणि औणादि
क इन् कृदिकारादक्तिन इति ङीप् व्यत्ययेनाद्युदात्तः। आशत। अश् व्याप्तौ लिटि तस्य झादेशः स्वादिभ्यः श्नुः तस्य बहुलं छंदसीति लुक् अड
गमः तिङ् तिङ इति निघातः॥ ॥तृतीयामृचमाह॥ तक्षन्नासत्याभ्यां परिज्मानं सुखं रथं। तक्षन्धेनुं सबर्दुघां॥ नासत्याभ्यां अश्विदेवप्रीत्य
र्थं रथं तक्षन् ऋभवो देवाः किंचिदिदं तक्षन्। तक्षणेन संपादितवन्तः कीदृशं परिज्मानं परितो गन्तारं सुखं उपर्युपवेशने सुखकरं किंच
धेनुं कांचिद्गां तक्षन्। धातूनामनेकार्थत्वात् अत्र संपादनवाची कीदृशीं धेनुं सबर्दुघां सबरः क्षीरस्य दोग्ध्रीं तक्षन् बहुलं छंदसीत्यड
भावः। नासत्याभ्यां न विद्यते असत्यं ययोस्तौ असत्यौ न असत्यौ नभ्राण्नपादित्यादिना नलोपाभावः। परिज्मानं अजेः परिपूर्वस्य श्वन्नुक्षन्नि
त्यादिना मनप्रत्यये अकारलोप आद्युदात्तत्वं च निपातनात्। सबर्दुघां सं बः पयो दोग्धीति बहुदुघादुहः कप् अश्वेतिकृत्स्वरितत्वं
तं प्राति पदिकं क्षीरवाचीति संप्रदायविदः कपः पित्वादनुदात्तत्वं धातुस्वरेणव शिष्यते। समासे कृदुत्तरपदप्रकृतिस्वरः। द्वितीये पंचमे वैश्व
देवशस्त्रे युवाना पितरा पुनरित्यार्भवस्तृचः द्वितीयस्याग्निं वो देवमिति खंडे सूत्रितं मही द्यौः पृथिवी च नो युवाना पितरा पुनरिति त चा इति
सिद्धत्वं प्रथमा सूक्ते चतुर्थीमृचमाह॥ ॥युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः॥ ऋभवो विष्ट्यक्रत॥ ऋभव एतन्नामका देवाः पितरौ स्वकी
यौ मातापितरौ पूर्वं वृद्धौ पुनर्युवाना तरुणौ अकृत कृतवन्तः कीदृशाः सत्यमन्त्राः अवितथमन्त्रसामर्थ्योपेताः पुरश्चरणादनुष्ठानेन सि
द्धमन्त्राः ... मन्त्राः प्रयुज्यन्ते तत्र तत्फलं ... संपद्यन्ते तस्मात् जीर्णयोः पित्रोर्युवत्वं संपादयितुं समर्था इत्यर्थः। ऋजूयवः ऋजु

तामात्मन उक्तंः। छन्दरहिता इत्यर्थः। अत एवं तेषामनुष्ठितामंत्राः सिध्यंति। विश्वे। विष्लृ व्याप्तावित्युक्ताः सर्वे युक्तार्थे वर्तते। यस्यमंत्रसामर्थ्यस्या
प्रतिघातात्व्याप्तिरुच्यते। ऋभुशब्दं यास्क एवं निर्वक्ति ऋभव उरु भांतीति वर्तेन भांतीति वर्तेन भवंतीति वेति। युवाना। युवन्शब्दो यौतेः कनिन्नंतो
नित्वादाद्युदात्तत्वं। सुपांसुलुगित्यादिना विभक्तेराकारः पितरा पूर्ववदाकारः। सप्तमंत्राः बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। न नुडाद्यभावपरः कृद्युत्त
मात्मन इच्छति। क्यच। अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घः। क्याच्छंदसीति उप्रत्ययः। प्रत्ययस्वरः। विश्वाविष्ट्वा व्याप्तौ निच्कोचसंज्ञायामिति
निवृतिनुवेत्यादिना इट्प्रतिषेधः। तस्मात्‌ जस इत्यादियाजीकारणामुपसंख्यानमिति तस्य उकारादेशः। संचालोपस्येति सकारस्य भवति। ततआ
द्गुण इति गुणे कृते प्रथमयोः पूर्वसवर्ण इति पूर्वसवर्णदीर्घः। तं बाधित्वा परत्वात्‌ जसि चेति ह्रस्वस्य गुणे न भवति तस्यामिति चेत्‌। न संज्ञापूर्वकः
स्यविधेरनित्यत्वात्‌ अकृतऋतोनुट्। आत्मनेपदं तस्य अदादेशः। मंत्रे घसेत्यादिना च्लेर्लुक्। ऋषणादेशः। अडागम अनिघातः॥ पंचमीमृचमाह॥
॥ सं वो मदासो अग्मतेंद्रेण च मरुत्वता॥ आदित्येभिश्च राजभिः॥ हे ऋभवो युष्मत्संबंधिनो मदासो मदहेतवः सोमाः इंद्रेण चादित्येभिः राजि
भिश्च समगमत संगताः। ऋभूणामिंद्रादित्यैः सह सोमपानं तृतीयसवने अस्ति अत एवाह्नान्निगद आम्नायते यनेनैवं पवितः। इंद्रमादित्यवंतमृभु
वंतं विभुमंतं वाजवंतं बृहस्पतिवंतं विश्वदेव्यावंतमावह इति। इंद्रेण मरुत्वता मरुद्भिर्युक्तेन अत एव मंत्रांतरमेवमाम्नायते मरुद्भिरिंद्रसख्यं
ते अस्त्विति। आदित्यैः राजभिः राजमानैः दीप्यमानैः मदासः माद्यंति अभिरिति मदाः सोमाः मदेरनुपसर्ग इत्यप्‌ तस्य पित्वादनुदात्तत्वे धातुस्वरः
वक्ष्यते। आज्जसेरसुगिति जसो असुगागमः। अग्मत गमेः सपूर्वाल्लुङ् समो गम्यृच्छिभ्यामित्यादिना आत्मनेपदं तस्य अदादेशः। मंत्रे घसे
त्यादिना च्लेर्लुक्। गमहनेत्यादिना उपधालोपः। व्यवहिताश्चेति समोऽव्यवहितप्रयोगः। निघातः। मरुत्वता। मरुतः अस्य संतीति मरुत्वान्‌॥
तसौ मत्वर्थे इति भसंज्ञा पदसंज्ञाया बाधितत्वाज्जश्त्वाभावः। झय इति मतुपो वत्वं। आदित्येभिः। बहुलं छंदसीति भिस ऐस्भावाभावे बहु
वचने झल्येदित्येत्वं। राजभिः। राजन्‌शब्दस्य कनिन्नंतत्वेन नित्वादाद्युदात्तत्वं॥ इति प्रथमस्य द्वितीये प्रथमो वर्गः॥ ॥ षष्ठीमृच
माह॥ उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतं॥ अकर्त चतुरः पुनः॥ उत अपि च त्वष्टुः एतं नामकस्य देवस्य संबंधितक्षणव्यापारः
नवं नूतनं त्यं चमसं सोमधारणक्षमं काष्ठपात्रविशेषं निष्कृतं निःशेषेण संपादितं अकरोदिति शेषः॥ तक्षणव्यापारकुशलस्य त्वष्टुः
शिष्या ऋभवः तेन निर्मितं तमेकं चमसं पुनरपि चतुरः कर्त चतुर्धा विभक्तान्‌ चमसान्‌ कृतवंतः एकस्य चतुर्विधत्वकरणरूपोऽयमर्थो
मंत्रांतरेऽपि विस्पष्टः एकं चमसं चतुरः कृणोतनेति। नवं। णु स्तुतौ। नूयत इति नवं कर्मणि अप्प्रत्ययः। स हि घञोऽपवादत्वात्‌ घञर्थे स
र्वत्र भवति घञ्प्रत्ययश्च अकर्तरि च कारके संज्ञायामिति कर्तृव्यतिरिक्ते सर्वत्र कारके भवति। यद्यपि तत्र संज्ञायामित्युक्तं तथापि च का
रस्य संज्ञाव्यभिचारार्थत्वात्‌ संज्ञायामपि भवत्येवं संबध्यते इति संबंधः कर्मणि घञित्युक्तं। त्वष्टुः त्वक्ष तक्ष तनूकरणे आज्ञादिकस्तृन्‌ ५५
उदितत्वात्‌। पक्षे इडभावः स्कोः संयोगाद्योरंते चेति ककारलोपः निष्कृतं निःपूर्वस्य करोतेः कर्मणि क्तः प्रादिसमासे नित्यं समासे। नु
त्तरपदस्येति षत्वं। अकर्त कर्मणोः कृतीति प्राप्तायाः षष्ठ्याः न लोकाव्ययनिष्ठेति निषिद्धात्‌ तथापि कर्तुः शेषत्वेन विवक्षितत्वात्‌ कर्तृक

रणयोः कर्तरि षष्ठ्येव स्यात्‌ प्राप्तेः शेषविवक्षया षष्ठी यथा कर्मणि शेषत्वेन विवक्षिते माषाणामश्नीयादिति। गतिरनंतर इति निस उदात्तत्वं। अकर्त अप
नकृञो लुङि प्रस्य व्यत्ययेन तादेशः मंत्रे घसेत्यादिना च्लेर्लुक्‌ ह्रस्वस्य भयथेति तिङ्‌ आर्धधातुकत्वात्‌ ङित्वाभावेन गुणः। चतुरः त्रिचतुरोरिति त्वकार 109
उदात्तः पुनरुत्तरादिषाद्युदात्तः पतितः॥ तृतीयखंडे ते नो रत्नानि धत्तनेति इदं ऋचामाभर्ग्योक्ततृतीयस्याग्नमदेतिसं उसत्रि
तं। इंद्र इत्येव रातुन स्तोनो रत्नानि धत्तनेत्येकाड्यं वेतित यो राधोसि क्वसमसमीमृचमाह॥ ॥ ते नो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते॥ एक 1924
मेकं सुशस्तिभिः॥ पूर्वास्वृक्षु प्रतिपादिता ऋभवः ते यूयं सुशस्तिभिः शोभनैः स्तोत्रैः संयुक्ताः संतः अस्माकं संबंधिने सुन्वते सो
माभिषवं कुर्वते यजमानाय रत्नानि धनानि रमणीयानि सुवर्णमणिमुक्तादीनि एकमेकं क्रमेण प्रत्येकं धत्तन प्रयच्छत सुवर्णादीनां मध्ये
प्रतिद्रव्यं यावदपेक्षितं तावदिति विवक्षया एकमेकमित्युक्तं कीदृशानि रत्नानि त्रिरा। आवर्तितानि उत्तमानि मध्यमानि अधमानि
त्येवं रत्नानां त्रिरावृत्तिः किंच सप्तानि सप्तसंख्यानिष्पन्नवर्गरूपाणि कर्माणि धत्तन संपादयत कीदृशानि सप्तानि त्रिरात्रियार
माह्नानि अग्न्याधेयपुनराधेयदर्शपूर्णमासादीनां सप्तानां हविर्यज्ञानामेको वर्गः औपासनहोमो वैश्वदेव इत्यादीनां सप्तानां पाकयज्ञादीनां वर्गो द्वि
तीयः॥ अग्निष्टोमोऽत्यग्निष्टोम इत्यादीनां सप्तानां सोमसंस्थानां वर्गस्तृतीयः॥ रत्नानि रमु क्रीडायां नीदित्यनुवर्तमाने रमे स्तश्चेति न प्रत्ययः। तत्स
नियोगेन मकारस्य तकारः नित्वादाद्युदात्तः॥ धत्तन धत्त धनप्तनथनाश्चेति तशब्दस्य तनादेशः॥ सप्तानां वर्गः साप्तं सप्तनोञ्छंदसी
ति वर्गेऽञ्प्रत्ययः। नस्तद्धिते इति टिलोपः ञित्वादादिवृद्धिराद्युदात्तत्वं च। अत्र वर्गवचनेन चानेन। वर्गिणा लक्ष्यंते तेन बहुवचनं
अन्यथा ह्येक एव वर्गस्त्रिरावृत्त इत्येकवचनमेव स्यात्‌ सुन्वते शतुरनुम इति विभक्तेरुदात्तत्वं। एकमेकं नित्यवीप्सयोरिति वीप्सायां द्विर्भा
वः। एकशब्द इणः कन्प्रत्ययांतो नित्वादाद्युदात्तः। द्वितीयस्य एकशब्दस्य तस्य परमाम्रेडितं इत्याम्रेडितसंज्ञायां अनुदात्तं चेत्यनुदात्तत्वं। सुशस्ति
भिः। अस्यते अभिशस्यत इति ऋचः। शंसु स्तुतौ करणे क्तिन्‌ तस्य किलान्नलोपः शोभनाः शस्तयः इति प्रादिसमासे यद्यपि चक्ति
न्नित्वादाद्युदात्तत्वेन कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव प्राप्तं तथापि रेणमनक्तिन्व्याख्यानेत्यादिना उत्तरपदांतोदात्तत्वेन बाध्यते॥ ॥
अष्टमीमृचमाह॥ अधारयंत वह्नयोऽभजंत सुकृत्यया॥ भागं देवेषु यज्ञियं॥ वन्हयः श्रमसाहित्यसाधननिष्पादनेन यज्ञस्य वोढारः ऋभ
वः अधारयंत पूर्वं मनुष्यत्वेन मरणयोग्या अप्यमृतत्वलाभेन प्राणान्‌ धारितवंतः तथा च मंत्रांतरमाम्नायते मर्तासः संतो अमृतत्व
मानशुरिति किंचैते सुकृत्यया यज्ञसाधनद्रव्यसंपादनरूपेण शोभनव्यापारेण देवेषु मध्ये स्थितानां यज्ञियं यज्ञार्हं भागं हविर्लक्ष
णं अभजंत सेवितवंतः अयमर्थः सौधन्वना यज्ञियं भागमानशेत्यादिमंत्रांतरे विस्पष्टः॥ आ ब्राह्मणेषु ऋभवो वै देवेषु तपसा
सोमपीथमभ्यजयन्नित्यादिना घुपाख्याने विस्पष्टं। वन्हयः। निरुत्यनुवृत्तौ वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्‌ प्रत्ययः॥ अभजंत पादादित्वान्न निघा
तः सुकृत्यया विभाषा कृवृषोरिति कृञः कर्माणि क्यप्‌। शोभना कृत्या सुकृत्या भजन क्रियायाः सा सुकृत्या बहुव्रीहौ पूर्वपदप्रकृतिस्व
रं बाधित्वा नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥ ननु कृत्यशब्दस्य पित्वेनानुदात्तत्वाद्धातुस्वरेणाद्युदात्तः। ततश्चाद्युदात्तं भ
वच्छंदसीत्यनेन नाद्युदात्तत्वेन भवतितत्र्यं तेन हि पुरस्तादपवादेन परमपि नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं बाध्यत इत्युक्तं॥

एवं तर्हि कृत्वा चो नित्यं यथा भावं क्य प प्रत्यययोः कृत्याश्चः भ्यपः पित्वेपि व्यत्ययेनोदात्तत्वं प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेवशि
भा० प्र० ष्यते। भागं। कर्मत्वम् इति अंतोदात्तः यत्तिष्यं यत्तम् अर्हतीत्यर्थे यत्‌ तिंगभ्यां च रत्वतो इति घः तस्य इयादेशः प्रत्ययस्वरः॥ इति प्रथमस्य द्वि
५६ तीये द्वितीयो वर्गः॥ ॥ इहेत्यादिकं षळृचं चतुर्थं सूक्तं तस्य ऋष्यादि पूर्ववत्। देवतात्वनुक्रम्यते इह षळैंद्राग्नमिति विनियोगस्तु अग्नि
ष्टोमे अच्छावाकशस्त्रे इहेंद्राग्नी उपह्वयेति मंत्रं स्तोत्रियं शस्त्रादित्वं इहेंद्राग्नी उपह्वये वामं न मन्महे इति च तिसृचिनितात्। तथा अभिप्लवष
डहे प्रातःसवने अच्छावाकशस्त्रे स्तोत्रियानुरूपार्थं इदमेव सूक्तं। तथा च सूत्रितं। अभिप्लव षळहस्याह्नानीतिखंडे इहेंद्राग्नी इंद्राग्नी आ गतमिति त
स्रिः सूक्तं॥ प्रथमामृचमाह॥ इहेंद्राग्नी उपह्वये तयोरित्स्तोममुश्मसि॥ ता सोमं सोमपातमा॥ इहास्मिन्‌ कर्मणि इंद्राग्नी देवा उपह्वये आह्व
यामि तयोरिंद्राग्न्योरेव स्तोमं स्तोत्रमुश्मसि कामयामहे सोमपातमा अतिशयेन सोमं पातुं शीलौ तौ सोमं पिबतामिति शेषः। इंद्राग्नी इ
त्रदेवताद्वंद्वेपि पूर्वपदस्यानङ्‌ न भवति तत्र हि देवताद्वंद्वे चेत्यनुवृत्तौ पुनर्द्वंद्वग्रहणाल्लोकवेदप्रसिद्धसाहचर्याणि। नेंद्रवंद्वे उभयपदप्रकृतिस्वरत्वं
तु न भवति अग्निशब्दस्याद्युदात्तत्वाद्‌ इत्यनेन दंतरपदस्यानुदात्तत्वात्‌ इति प्रतिषेधात्‌। उश्मसि वश कांतौ लटो मस्‌ इदंतो मसिरिति इकारोपजनः अदादित्वात्‌ श
पो लुक्‌ ग्रहिज्यादिना संप्रसारणं। ता सोमपातमा उभयत्र सुपां सुलुगित्याकारः॥ ॥द्वितीयामृचमाह॥ ता यज्ञेषु प्रशंसतेंद्राग्नी
शुंभता नरः॥ ता गायत्रेषु गायत॥ हे नरो मनुष्या ऋत्विजः तौ पूर्वोक्तौ इंद्राग्नी यज्ञेष्वनुष्ठीयमानकर्मसु प्रशंसत शस्त्रैः तथा शुंभत नानाविधै र
लंकारैः शोभितौ कुरुत तथा तौ पूर्वोक्तौ इंद्राग्नी गायत्रेषु गायत्रीछंदस्केषु मंत्रेषु सामरूपेण गायत॥ ता सुपां सुलुगित्याकारः। शुंभता अस्यः
संहितायामन्येषामपि दृश्यत इति दीर्घः॥ ॥तृतीयामृचमाह॥ ता मित्रस्य प्रशस्तय इंद्राग्नी ता हवामहे॥ सोमपा सोमपीतये॥ मित्रस्य स्ने
हविषयस्य ममानुष्ठातुः प्रशस्तये तौ पूर्वोक्तौ देवौ संपद्येते तामिति शेषः॥ यद्वा मित्रस्य मम संबंधिनौ तौ इंद्राग्नी प्रशस्तये प्रशंसितुमिषा
म इति शेषः। सोमपा सोमपानशीलौ तौ पूर्वोक्तौ इंद्राग्नी सोमपीतये सोमपानार्थं हवामहे। आह्वयामः। प्रशस्तये तुमर्थे च भाववचनादिति
चतुर्थी। कृदुत्तरपदप्रकृतिस्वरत्वं बाधित्वा तादौ च निति कृत्यतौ इति गतेः प्रकृतिस्वरत्वं। सोमपीतये सोमस्य पीतिर्यस्मिन्‌ कर्मणि तस्मै बहुव्रीहौ पूर्व
पदप्रकृतिस्वरत्वं सोमस्य पीतिरिति तत्पुरुषे वा पीतिरिति दासीभारादित्वात्‌ पूर्वपदप्रकृतिस्वरत्वं॥ ॥चतुर्थीमृचमाह॥ उग्रा संता हवामह उपेदं स
वनं सुतं। इंद्राग्नी एह गच्छतां॥ सुतं अभिषवोपेतं इदमनुष्ठीयमानं प्रातःसवनादिरूपं कर्म उपसमीप्येन प्राप्नुं उग्रा संता वैरिवधादिषु क्रूरौ सं
तौ देवौ हवामहे आह्वयाम इंद्राग्नी द्वौ इह कर्मण्यागच्छतां संता अस्तेः शतरि श्नसोरल्लोपः। सवनं सुतमिति। दूयते मनः कामं मा गहीत्यत्रोक्तं
॥ ॥पंचमीमृचमाह॥ ता महांता सदस्पती इंद्राग्नी रक्ष उब्जतं॥ अप्रजाः संत्वत्रिणः॥ तौ पूर्वोक्तौ इंद्राग्नी रक्षो राक्षससजातिं उब्जतं कुटिलं कुरुतं कौर्यं
परित्याजयतामित्यर्थः। कीदृशौ महांतौ महांतौ गुणैरधिकौ सदस्पती सभापालकौ तयोः प्रसादात्‌॥ अत्रिणो भक्षका राक्षसा अप्रजा अनपत्याः संतु॥
महांता सात महतः संयोगस्येति दीर्घः। सदस्पती सदसस्पती इति समासे षष्ठ्या अलुक्‌ प्रातिपदिकसकारस्य लुग्वा भावः छांदसः। उभे वनस्पत्यादिषु यु ५६
गपदिति उभयपदप्रकृतिस्वरत्वं इंद्राग्नी आमंत्रिताद्युदात्तत्वं अप्रजाः प्रजायंत इति प्रजाः अन्येष्वपि दृश्यत इति जनेर्डप्रत्ययः न प्रजा अप्रजाः प्रजाशब्द
स्य बहुव्रीहौ नित्यमसिच्‌ प्रजामेधयोरित्यसिजादेशः स्यात्‌ अव्ययपूर्वपदप्रकृतिस्वरः। अत्रिणः अदेः तस्य अत्रा इत्यत्र सकारस्य छांदस उनुडागमः॥

चित इति कृत्वा उदात्तः॥ तस्य यणादेशः उदात्तयणो हल्पूर्वादिति इकार उदात्तः॥ ॥षष्ठीमृचमाह॥ तेन सत्येन जागृतमधि प्रचेतुने पदे॥ इंद्राग्नी शर्म यच्छतं
॥ हे इंद्राग्नी सत्येन अवश्यफलप्रदानाद्वितथेन तेनास्माभिरनुष्ठितेन कर्मणा प्रचेतुने प्रकर्षेण फलभोगज्ञापके पदे स्वर्गलोकादिस्थाने अधिजागृतं आ
धिक्येन सावधानौ भवतां ततोस्मभ्यं शर्म यच्छतं। सुखं दत्तं। गयः कृदर इत्यादिषु द्वाविंशतिसंख्याकेषु गृहनामसु शर्मेति पठितं॥ जागृ निद्रा 111
क्षये अदिप्रभृतिभ्यः शप इति शपो लुक्‌ तिङः तिङ इति निघातः। प्रचेतुने चिती संज्ञाने इत्यस्माण्णंताद्बाहुलकादौणादिक उनप्रत्ययः समासे कृदुत्तर 1924
प्रकृतिस्वरत्वं। इंद्राग्नी। इत्यत्रोक्तं आमंत्रितत्वादाद्युदात्तत्वम्‌ मंत्रविशेषः शृणाति हिनस्ति दुःखमिति शर्म। शृ हिंसायां अन्येभ्योपि दृश्यत इति मनिन्‌
यच्छतं इषुगमियमां छः इति छः॥ ॥इति प्रथमस्य द्वितीये तृतीयो वर्गः॥ ॥प्रातर्युजेत्यादिकं विंशत्यृचं पंचमं सूक्तं तस्य ऋषिच्छंदसी पूर्ववत्‌ दे
वताविशेषस्त्वनुक्रम्यते। प्रातर्युजा सैका च तस्य आश्विन्यस्तथा सावित्र आग्नेय्यो द्वे देव्यो नामेकैकेंद्राणी वरुणान्यग्नाय्यो द्यावापृथिव्यो पार्थिवी षड्वै
ष्णव्यो ताद्देवा देवी चेति सक्संख्यानुवर्तत इति अस्मिन्‌ खंडे अनिरुक्तसंख्या विंशतिरिति परिभाषितत्वात्‌ प्रातर्युजेति सूक्तसंख्या विशेषस्यानिरुक्ता सं
ख्या विंशतिसंख्या द्रष्टव्या सा च विंशतिः एकयाधिकया सह वर्तत इति सैका तत्रादौ चतसृणां ऋचामश्विदेवताकाः पंचमीमारभ्य तिसृणां तावत्सवितृदेवता
काः। नवमीद्वयोराग्नेयोभे अग्निदेवताके एकादश्याः तृचो देवसंबंधिन्याः देव्यो देवता द्वादश्या इंद्राणी वरुणान्यग्नाय्यो देवताः
त्रयोदश्याश्चतुर्दश्यो द्यावापृथिवी देवताके पंचदश्याः पार्थिवी षोडश्याद्याः षड्विष्णुदेवत्याः षोडश्या देवेभ्यो देवेभ्यो वा इति पाठः। अत्र स्तुते
नियोगो लैंगिकः प्रातरनुवाक आश्विने क्रतौ प्रातर्युजा विबोधयेति। चतस्र ऋचः। सूत्रितं च अयां न ऊषो उषाः प्रातर्युजेति च तस्र इति अभि
नवस्यहस्य प्रातर्युजेत्येका पुरोनुवाक्या द्वितीयस्य अश्वंतीति खंडे सूत्रितं। आश्विनस्य प्रातर्युजा वि बोधयेति॥ ॥तत्र प्रथमामृचमाह॥ प्रातर्युजा
वि बोधयाश्विनावेह गच्छतां॥ अस्य सोमस्य पीतये॥ रपदप्रकृतिस्वरत्वं। अस्य इदमोन्वादेश इत्यादिनाविभक्तेरुदात्तत्वं पीतये त्यमये न क्तिन उदात्त
त्वं॥ ॥द्वितीयामृचमाह॥ या सुरथा रथीतमोभा देवा दिविस्पृशा॥ अश्विना ता हवामहे॥ यौ अश्विनौ देवावुभा उभौ अश्विनौ देवौ सुरथा शो
भनरथयुक्तौ रथीतमा रथीनामतिशयेन रथिनौ। दिविस्पृशा द्युलोकनिवासिनौ ता हवामहे तादृशावश्विनावाह्वयामहे यत्त्वादिषु य
स्याप दे सुपां सुलुगिति द्विवचनस्याकारः सुरथा शोभनौ रथौ ययोः स्तौ सुरथौ समासांतोदात्तत्वाच्चपादं बहुव्रीहौ पूर्वपदप्रकृतिस्वरं बाधि
त्वा नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं प्राप्तं आद्युदात्तं द्व्यच्छंदसि इत्युत्तरपदाद्युदात्तत्वं। रथीतमा अन्येषामपि दृश्यत इति संहितायामिकार
स्य दीर्घत्वं दिविस्पृशा दिविस्पृशत इति दिविस्पृशौ क्विप्‌ च तिक्विप्‌ तत्पुरुषे कृति बहुलमिति अलुक्‌ गतिकारकोपपदात्‌ कृदिति कृदुत्तरपदप्रकृ
तिस्वरत्वं॥ ॥तृतीयामृचमाह॥ या वां कशा मधुमत्यश्विना सूनृतावती॥ तया यज्ञं मिमिक्षतं॥ अश्विना हे अश्विदेवौ वां युवयोः संबंधिनी
या कशा अश्विनाद्दिनी विद्यते तया सह आगत्य यज्ञं अस्मदीयं मिमिक्षतं सोमरसेन सेक्तुमिच्छतं॥ कशया श्वादिं ताडयित्वा सह सा समागत्य भव
द्वियज्ञं सोमरसात्तिनिष्पादयितुमुत्सुकौ भवतमित्यर्थः। कीदृशी कशा मधुमती अर्णः क्षोद इत्यादिषु एकशतसंख्याके उदकनामसु मधु पठि
तमिति पठितं॥ तस्मादुदकवती उदकं भवति अश्वस्य शीघ्रगत्याय स्वेदोदकं स्रवतितेनेयं कशाक्लिन्नेत्यर्थः। सूनृतावती प्रियसत्यवाग्रूपा तीव्र
ण कशाताडनेन योध्वनिर्निष्पद्यते ताडनवेलायां अश्वारोहेन च य आक्रोशः क्रियते तदुभयं शीघ्रगमनहेतुत्वेन यजमानस्य च प्रियं॥ यद्वाश्लोको

भा॰ अ॰
५.२

धारेत्यादिषु सप्तपंचाशद्वाङ्नामसु कशाधिषणेति पठितं। अश्विनोर्या या कशा मधुमती माधुर्योपेता पारुष्यरहिता सूनृतावती प्रियसत्योपेता कशा प्र
ज्ञानविषये इत्यर्थः। तया वाचा युवां। यज्ञं मिमिक्षतं मिमिक्षतमिति योजनीयं। कशा कश गतिशासनयोः। पचाद्यच् चित्वादन्तोदात्तः। सूनृतावती। ऊन प
रिहाणे। ऊनं न यस्य प्रियमिति सून तथाविधमृतं सत्यं यस्यां वाचि सा सूनृतावती। मन्त्रे सोमाश्वेत्यत्र पठितात् तत्वंबाधित्वा परादित्वं दासि बहुलमिति ञ
कार उदात्तः। सा यस्या अस्ति मतुप्। मन्तावतीति कशा याः संज्ञायामिति मतुपो वत्वं। मितिश्चेति मह्ः मतः सूनृतं ताच्वति
कित्वाद्गुणाभावः। व्यत्ययेन पत्वानि॥ ॥चतुर्थीमृचमाह॥ नहि वामस्ति दूरके यत्रा रथेन गच्छथः। अश्विना सोमिनो गृहं॥ अश्विना हे अश्विदेवौ यु
वां सोमिनः सोमवतो यजमानस्य गृहं प्रति रथेन गच्छथः समागच्छथः युवयोर्दूरके दूरदेशेन स्थितिं न वर्तते संनिहितस्तु यजमानो यत्र गृहे गच्छथः। तत्र गृहं
दूरे न भवति न ह्यत्र मार्गेण मन्तर्यं तावता अन्तः अस्मिन्त्वादिष्वपि विभाषेति निघाताभावः अत्र हि गृहं दूरं चनास्ति युवां च रथेन गच्छथः इति समुच्चयः।
चार्थोगम्यते च शब्देन युज्यते इति च लोपे प्रथमाति ङ् विभक्तिरस्तीति। यच्चनिपातस्य नेति संहितायां दीर्घत्वं। गच्छथः। इयं यच्चपि न प्रथमा तथापि
यत्रेति यद्वृत्तयोगान्निघाताभावः। सूदस्यादित्य इस्तिवामसे यथे यदित्यष्टाश्वहिरण्यपाणिमूतय इति च तस्मा मह्रीद्यौः पृथिवी चन इति। तत्र प्रथमां
तं पंचमीमृचमाह॥ ॥हिरण्यपाणिमूतये सवितारमुपह्वये। स चेत्ता देवता पदं॥ इति। यस्य इक्षणार्थं सवितारं देवमुपह्वये आह्वयामि॥ स च स
विता देव एतन्मंत्रप्रतिपाद्यदेवतात्वात् पदं यजमानेन प्राप्यं स्थानं चेत्ता ज्ञापयिता भवति कीदृशं सवितारं। हिरण्यपाणिं यजमानाय दातुं हस्ते सर्वथा
रिणं। यद्वा देवकर्तृके यागे सविता स्वयमृत्विग्भूत्वाग्नेस्तनना गस्थितः तदानीं तस्याध्वर्युर्ऋत्विगेव तत्संवितः तस्मै सवित्रे ब्राह्मणे प्राशित्रनामकं पुरोडा
शभागं दत्तवन्तः। तच्च प्राशित्रं हस्ते सविता गृहीत्वा सन्नतदीयपाणिं चिच्छेद। ततः प्राशित्रस्य दाताराध्वर्यवः सुवर्णमयपाणि निर्माय प्रक्षिप्तवं
तः सोयमर्थः कौषीतकिब्राह्मणे समाम्नातः। सवित्रे प्राशित्रं प्रतिजग्राह तस्य पाणी प्रचिच्छेद तस्मै हिरण्मयौ प्रतिदध्युः तस्माद्धिरण्यपाणिरिति
स्तुत इति हिरण्यशब्दः पाणिशब्देन बहुव्रीहि। हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हितरमणं भवतीति वा
हृदयरमणं भवतीति वा हर्यतेर्वा स्यात् प्रेप्साकर्मण इति तथा पाणिः पणायतेः पूजाकर्मण इति। हिरण्यशब्दो निप्रिययत्नाद्युदात्तः बहुव्रीहौ
पूर्वपदप्रकृतिस्वरः। ऊत्यै उदात्त इत्यनुवृत्तावूतियूतिजूतिसातीत्यादिना अक्तिन्नंतो निपातितः। सवितारं तृच्यश्वित्वादन्तोदात्तत्वं। चेत्ता
चीतिसंज्ञाने अस्मादंत भाविनण्यर्थाल्लाछील्ये तृन्। नित्यमागमशासनमिति उद्भावः। नित्वादाद्युदात्तः। देवता। देवात्तलिति स्वार्थे तलि
तीति प्रत्ययात्पूर्वमुदात्तत्वं। पदशब्दः पचाद्यजंतः चित इत्यंतोदात्तः॥ ॥इति प्रथमस्य द्वितीये चतुर्थो वर्गः॥ ॥स षष्ठीमृचमाह॥ अपां
नपातमवसे सवितारमुपस्तुहि॥ तस्य व्रतान्युश्मसि॥ अत्र होता सामगर्मृत्विजमन्यं वाच्यामिर्णो अतः अवसे अस्मान् रक्षितुं सवितारमुपस्तुहि
तस्य सवितुः संबंधीनि व्रतानि कर्माणि सोमयागादिरूपाणि उश्मसि कामयामहे॥ कीदृशं सवितारं अपां नपातं जलस्य न पालकं। संता ५७
पेन शोषकमित्यर्थः॥ अपां इद्धमित्यादिनाग्नेः पातिन प्रतिपाद्य इति शब्दकारः। अग्निर्हि अपां नपातिन कोपकत्वात्। तर्हि कथमपामिति पद
हीनलोकाव्ययनिघातवक्त्र्यर्थनिकर्मणि पष्ठी प्रतिपादनात्। इतिचेत्। नत्र्यं पाठो पलक्षणात्। अन्याद्रियो अपां कारणतया संबंधिनो अ
नापइतिश्रुतेः। आदित्याज्जायते वृष्टिरिति स्मृतेश्च अस्मिन्पक्षे इगिदंचामिति नुमभावोपि निपातनादेवेति मंतव्यं। पातेः क्विवंतस्य नु

त्वान्निपातनाद्रष्टव्यः। अथवा न पातयतीति न पात् पल गतौ चिति धातोर्ण्यंतात् क्विप् अन्यादिभ्योपि दृश्यते प्रापकोप्रत्ययत लोपकोऽव्ययापूर्व
पदप्रकृतिस्वरत्वं॥ अवसे तुमर्थे सेसेनित्यादिना असेन्। नित्वादाद्युदात्तः। उश्मसि वश कांतौ। अदिप्रभृतिभ्य इति शपो लुक्। इदंतो मसीति इ 113
इतिकारोपजनः॥ ॥सप्तमीमृचमाह॥ विभक्तारं हवामहे वसोश्चित्रस्य राधसः॥ सवितारं नृचक्षसं॥ वसोः निवासहेतोः चित्रस्य सकलवर्णर 1924
ञ्जनादिरूपेण नृचक्षसं मनुष्याणां प्रकाशकारिणं सवितारं हवामहे। कौषीतकिन एतस्या ऋचो व्याख्यानरूपं ब्राह्मणं सवितुर्भागं हनुत्वमेवं
समानं तियदेतद्वसोश्चित्रं राधस्तदेष सविता विभक्ताभ्यः प्रजाभ्यो विभजतीति। विभक्तारं तृच्यश्वित्वादन्तोदात्तत्वं॥ कृदुत्तरपदप्रकृतिस्व
रत्वेन तदेव शिष्यते। हवामहे। ह्वयतेर्बहुलं छन्दसीति संप्रसारणं वसोः वस निवासे। शृस्वृस्निहीत्यादिना उः नित्यनुवृत्तेर्नित्वादाद्युदात्तः।
राधसः असुन्नतान्नित्वादाद्युदात्तः। नृचक्षसं नृन् चष्टे इति नृचक्षास्तं चक्षसं चक्षेर्बहुलं शिच्चेत्यसुन् शिच्वाद्धातोर्धातुकत्वेन ख्या आदेशा
भावः कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥अष्टमीमृचमाह॥ सखाय आनिषीदत सविता स्तोम्यो नु नः॥ दाता राधांसि शुंभति॥ सखिभूता हे ऋत्विजः
आनिषीदत सर्वत्रोपविशत॥ भो अस्माकमयं सविता नु क्षिप्रं स्तोम्यः स्तुतियोग्यः॥ राधांसि धनानि दाता प्रदातुमु शुंभते॥ सख्य एव सविता शुं
भति शोभते॥ समानाः सतः ख्याति प्रकाशंत इति सखायः। ख्या प्रकथने। समाने ख्यश्चोदात्त इति णप्रत्ययः। तत्संनियोगेन डित्वं थलोपश्च
डित्वाद्धकारलोपः समानस्य छन्दसीत्यादिना समानशब्दस्य सादेशः। इण संनियोगेनोदात्तत्वं च। आमि सख्युरसंबुद्धाविति णित्वात् वृद्धि
गधादेशश्च। निषीदत सदिर प्रतेरिति षत्वं। स्तोमेषु प्रतिपाद्यत्वेन भवः स्तोमेभ्यः भवे छन्दसीति यत् यतोनाव इत्याद्युदात्तत्वं। दातात्रान
डीकः तार्च्छील्ये तृन्। नित्वादाद्युदात्तः। राधांसि गले कर्तृकर्मणोः कृतीति प्राप्तायाः षष्ठ्याः न लोकाव्ययनिष्ठेति प्रतिषेधः। शुंभति शुभ शुंभ शोभा
र्थे इत्यस्माद्व्यत्ययेन शः। तामेतां सप्तमीं नवमीमृचमाह॥ ॥अग्ने पत्नीरिहावह देवानामुशतीरुप॥ त्वष्टारं सोमपीतये॥ हे अ
ग्ने उशतीः कामयमानाः देवानां पत्नीः इंद्राण्याद्याः इह देवयजनदेशे आवह॥ तथा त्वष्टारं देवं सोमपीतये सोमपानार्थं उपसमीपे आ
वह॥ पत्नीः इत्यत्र पतिशब्द आद्युदात्तः पत्युर्नो यज्ञसंयोग इति ङीप् एतत्संनियोगेन नकारश्च ङीपः पित्वादनुदात्तत्वं। उशतीः वश कां
तौ लटः शतृ अदिप्रभृतिभ्यः शप इति शपो लुक्। ग्रहिज्यादिना संप्रसारणं उगितश्चेति ङीप् उदात्तः॥ ॥दशमीमृच
माह॥ आ ग्ना अग्न इहावसे होत्रां यविष्ठ भारतीं॥ वरूत्रीं धिषणां वह॥ हे अग्ने अवसे अस्मान् रक्षितुं ग्नाः देवपत्नीरिहावह। तथा हे
यविष्ठ युवतम अग्ने होत्रां होमनिष्पादिकाम् अग्निपत्नीं भारतीनामकस्यादित्यस्य पत्नीं वरूत्रीं वरणीयां धिषणां वाग्देवीं चावह। वाग्वै धि
षणेति। तत्र नैयक्तं॥ भरत आदित्य इति यास्केनोक्तत्वात् तस्य पत्नी भारतीत्युच्यते। गम्यंत इति ग्नाः गम्लृ गतौ ओणादिको न
प्रत्ययः। डित्वाट्टिलोपः प्रत्ययस्वरः। होत्रां हु यामाश्रुभसिभ्यस्त्रन्निति त्रन्नंतो नित्वादाद्युदात्तः॥ अतिशयेन युवा यविष्ठः। अतिशायने
तमबिष्ठनौ स्थूलदूर इत्यादिना यणादिपरस्य लोपः पूर्वस्य च गुणः। भारती ङार्ङ् रवाद्रूतस्तल्वात् अन्नंतो नित्वादाद्युदात्तः। वरूत्री
यसितरूभिर्त्यादौ य वृञ्वरणे च शब्दस्य तन्निति उक्तेन त्यार्थं इति करणस्य प्रदर्शनार्थत्वात् वरूत्रशब्दस्तनंतोपि द्रष्टव्यः। तेन नि
त्वादाद्युदात्तत्वं। धिषणा निघातेन ककारस्यानुदात्तत्वादुदात्तयणो हल्पूर्वादित्यपि नङीनुदात्तत्वं॥ ॥इति प्रथमस्य द्वितीये पंचमो वर्गः॥ ५१

भा॰ प॰ सूक्तेऽएकादशीमृचमाह॥ ॥अभिनो देवीरवसा महः शर्मणा नृपत्नीः॥ अच्छिन्नपत्राः सचंतां॥ देवीर्देव्यो देवपत्न्यः अवसा रक्षणेन महो महता शर्म
५८ णा च सुखेन च महतोस्मानभिसचतां अभिमुखेन सेवंतां। कीदृश्यो देव्यः नृपत्नीः मनुष्याणां पालयित्र्यः। अच्छिन्नपत्राः छिन्नपत्राः न हि पक्षिरूपा
णां देवपत्नीनां पक्षाः केन चच्छिद्यंते। देवीः पुंयोगादाख्यायामिति ङीष् ततः प्रत्ययस्वरेणांतोदात्तः। दीर्घाज्जसि चेति प्रतिषेधस्य वा छंदसीति पा
क्षिकस्यान्तः पूर्वसवर्णदीर्घत्वं अवसा अवरक्षणे असुन् नित्वादाद्युदात्तः। महः महत्पूजायामिति क्विप् संपासरो भवतीति तलोपश्च छान्दसः
सादेशः सावेकाचस्तृतीयादिर्विभक्तेरुदात्तत्वं। नृपत्नीः समासांतोदात्तत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं॥ अच्छिन्नपत्राः न छिन्नानि
अच्छिन्नानि। अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥द्वादशीमृचमाह॥ इहेंद्राणीमुपह्वये वरुणानीं स्वस्तये। अग्नायीं सोमपीतये॥ इहास्मिन्कर्म
णि स्वस्तये अस्माकमविनाशाय सोमपीतये सोमपानाय च इंद्रवरुणाग्नीनां पत्नीरुपह्वयामि। इंद्राणीवरुणानी। इंद्रवरुणयोरिति पुंयोगे
ङीष्प्रत्ययः। अनुगागमश्च प्रत्ययस्वरः। अग्नायी। वृषाकप्यग्निकुसितकुसीदानामुदात्त इति ङीष् तत्संनियोगेन कारस्यैकारोऽपि उदात्तः॥ सोम
पीतये असमस्तं चौकंद्वितीयेऽष्टके मंत्रश्च देवत्रा महीद्यौः पृथिवी च न इति द्यावापृथिव्या निविद्धानीयं सूक्तं द्वितीयस्याग्नेः बहुति खंडे सू
क्तं मही द्यौः पृथिवी च नो युवानापितरा पुनरिति। आग्रयणे द्यौ मही द्यौरित्येषा द्यावापृथिव्योर्वपायाः पुरोनुवाक्या। आग्रयणे द्वे च आमा
क्रेति खंडे सूत्रितं॥ ये कं च ज्मामहिनो अहिमाया मही द्यौः पृथिवी च न इति अग्निमंथनेप्येषा विनियुक्ता। प्रातर्वैश्वदेव्यामिति खंडे सूत्रितं। अभि
त्वा देव सवितर्मही द्यौः पृथिवी च न इति हविष्यासमानं सानाय्यं अनयोरावर्तनीयं इत्यनेन यत्न॥ विध्यपराध इति खंडे तथैव सूत्रितं विध्यंतमानं
मही द्यौः पृथिवी च न इति अंतःपरिधिदेशनिनयेदिति। आश्विन शस्त्रेप्येषा संक्षिप्ताश्विनायांतिखंडे सूत्रितं। मही द्यौः पृथिवी च न स्वतिद्या
वा पृथिवी विश्वशंभुवौ तेति॥ ॥तामेतां सप्तदशीमृचमाह॥ ॥मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां॥ पिपृतां नो भरीमभिः॥ मही महती
द्यौर्द्युलोकदेवता पृथिवी भूमिदेवता च नोस्मदीयमिमं यज्ञं मिमिक्षतां॥ स्वकीयसारभूतेन रसेन मिमिक्षतां सेचनमिच्छतां तथा भरीमभिः भरणैः
पोषणैः नोस्मान् पिपृतां सुखं दत्वा पूरयतां। महीम हच्छब्दादुगितश्चेति ङीप्। अततोल्लोपः छांदसः न हन्मह तोऽपसंख्यानमिति ङीप उदात्
तं। दिव ओशब्दः प्रातिपदिकस्वरेणांतोदात्तः गोतो णिदिति ततः परस्य सार्वणित्वाभावं तत्र निरशिरविठानी वृद्धि नोदात्ता पृथिवी प्रथ प्रख्याने
प्रथेः पिवन् संप्रसारणं चेति पिवन्प्रत्ययः पिद्गौरादिभ्यश्चेति ङीष्प्रत्ययः॥ मिमिक्षतां मिह सेचने सनि द्विर्भावः हलादिः शेषः वत्तर्रुत्वाणिपः तानिपि
पृतां इत्येतत् पृपालनपूरणयोः इत्यस्मात् अर्तिपिपर्त्योश्चेत्यभ्यासस्येकारः तिङ् प्रत्ययस्वरः॥ भरीमभिः डुभृञ् धारणपोषणयोः हृस
भृधृसृभ्य इमनिन् नित्वादाद्युदात्तत्वं॥ ॥चतुर्दशीमृचमाह॥ तयोरिद्घृतवत्पयो विप्रा रिहंति धीतिभिः॥ गंधर्वस्य ध्रुवे पदे॥ गंधर्वस्य ध्रुवे पदे
अंतरिक्षं। तथा च तापनीयशाखायां समाम्नायते॥ यक्षगंधर्वाप्सरोगणसेवितं। अंतरिक्षमिति तेनांतरिक्षेण पलक्षिते आकाशे वर्तमानयोस्त
योरित्यावापृथिव्योः रेवसंबंधि पयो जलं घृतवत् घृतसदृशं विप्रा मेधाविनः प्राणिनो धीतिभिः कर्मभिरिरिहंति लिहंति यद्वा घृतवत् घृतं सारं तेन
पेतं॥ रिहंति लिहेर्व्यत्ययेन रेफः॥ गंधर्वस्य ध्रुवे धारणे गाविगाधर्मात् इति निप्रत्ययः तत्संनियोगेन गोश्च स्यगमो देशः॥ स्योना पृथिवीत्येषाम ५८
हानाम्नी व्रते भूमिस्पर्शने विनियुक्ता तद्विदं ब्रह्मचारिणमिति खंडे सूत्रितं स्योना पृथिवी भवेति समाप्यते॥ स्मार्ते इमं तत्रव्रतग्रहणे चैषा कृ

कृतव्यामार्गशीर्षप्रत्यवरोहणमिति सूत्रितं। तस्मिन्नुपविश्यस्योना पृथिवी भवेति जपितेति॥ ॥तामेतां सप्तदशीमृचमाह॥ स्योना पृथिवी भवा
नृक्षरा निवेशनी॥ यच्छा नः शर्म सप्रथाः॥ हे पृथिवि स्योना तादृग्गुणयुक्ता भव॥ स्योनशब्दो विस्तीर्णवाची। तथा च वाजसनेयिब्राह्मणे स्योनशब्दोप
तं किंचिन्मंत्रमुदाहृत्य व्याख्यातं इदम् स्योनं सावित्रस्योनं स्योनमिति। विस्तीर्णा विस्तीर्णमित्येवतदाहेति। यद्वा स्योनशब्देन सुखमभिहितयास्कवाक्य 115/1924
मुदाहरिष्यते। अनृक्षराकंटकरहिता निवेशनी निवेशनभूता सप्रथा विस्तारयुक्तं शर्म शरणं नोस्मभ्यं प्रयच्छ हे पृथिवि देहि। तामेतामृचमुदाहृ
त्य यास्क एवं व्याचष्टे सुखा नः पृथिवि भवानृक्षरा निवेशनी। ऋक्षरः कंटकः ऋच्छतेर्यच्छ नः शर्म शरणं सर्वतः पृथ्वीति॥ स्योना पि इति तु संताने सिवेर्
षोर्चेति नप्रत्ययः इत्थयोऽयादेशः प्रत्ययस्वरः। स्योना पृथिवीत्यनयोर्भवेत्यार्त्यातेन चान्वयो न परस्परं अतो सामर्थ्यात् नैवपरांगवद्भावो ना
स्य नामंत्रिताद्युदात्तत्वं। अनृक्षराकंविगतोगकृत्यं तत्रिरयाक्षरः कंटकः तन्ऋषिभ्यां क्सरन् पदान्तःसोतिकर्तव्ये आदेशप्रत्यययोरिति षत्वम्॥
नत्रावहर्वेहि तस्मान्नुडचीति नुडागमः नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। निविशंत्यस्यामिति निवेशनी करणाधिकरणयोश्चेति ल्युट् टिड्ढाणञिति ङीप्
प्रत्ययावित्स्वर्त्वाद्युदात्तत्वं। यच्छ दाणु दाने। पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः इति तिङ् इति दीर्घः सप्रथः प्रथ प्रख्याने॥ असुन् प्रथसा सह वर्तते इति तेन
सहेति तुल्ययोग इति समासः। उपसर्जनस्येति सभावो बहुव्रीहौ स्वरः॥ ॥इति प्रथमस्य द्वितीये षष्ठो वर्गः॥ ॥प्रातः सवने सोमातिरेके एवं शस्त्रं शं
स नीयं। अतो देवा इत्या द्या पंचर्चः। सोमातिरेक इति खंडे सूत्रितं च॥ महां इंद्रो वृत्रओजसा तादेवा अवंतु न इत्येंद्री भिर्विंद्रमचश्चेति अत्यायामिछाया
मातिरेका भ्यायिता पंचर्चं तत्स्त्रियानुरूपार्थः। तथाचयस्य पशव इतिखंडे सूत्रितं अतो देवा अवंतु न इति स्त्रियानुरूपाविति। दर्शपूर्णमा
सयोः प्रायश्चित्त होमस्थायविनियुक्ते तथैव स्वदं पत्न्या इति खंडे सूत्रितं अतो देवा अवंतु न इति द्वाभ्यां हुतिभिश्चेति। याज्यानुवाक्ययोर्मध्ये लोकि
कुभाय णे अतो देवा इत्येषा याज्यानुसूत्रितं। आपघातो देवा अवंतु न इति पाडिति॥ तामेतां सूक्तेऽष्टादशीमृचमाह॥ ॥अतो देवा अवंतु नो य
तो विष्णुर्विचक्रमे॥ पृथिव्याः सप्त धामभिः॥ विष्णुः परमेश्वरः सप्त धामभिः सप्तभिर्गायत्र्यादिभिः छंदोभिः साधनभूतैः यतः पृथिव्याः प्र
देशाद्विचक्रमे विविधं पादक्रमणं कृतवान् अतो स्मात् पृथिवीप्रदेशात् देवा अवंतु॥ विष्णुः पृथिव्यादिलोकेषु छंदोभिः साधनैर्ज
यं तैत्तिरीया आमनंति विष्णुमुखा वै देवाः छंदोभिरिमांल्लोकाननपजय्यमभ्यजयन्निति। विष्णोः त्रिविक्रमावतारे पादत्रयक्रमणस्य पृथिव्युत
पादनं पृथिवीप्रदेशं कृत्स्नं नाम भूलोके वर्तमानानां पापनिवारणं। अतएव यच्छब्दात् पंचम्यास्तसिलिति तसिल्। एतद्द्विरित्यशास्त्रात् लित्स
रेणाकार उदात्तः॥ यतः तसिलः प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञायां त्यदाद्यत्वं। लित्स्वरः विष्णुः विषेः क्निप् चेति। नुप्रत्ययः किदाद्यगुणः॥
नित्त्वानुवृत्तेराद्युदात्तत्वं। विचक्रमे सवितुर्योगविभागाद्विशब्दस्य समासः समासांतोदात्तत्वं। यद्वृत्तयोगान्न निघातः॥ सप्त सप्तं सुलुगि
ति भिसो लुक्। धामभिः दुधातेर्मनिन्नित्त्वात् मनिन्नित्स्वरः॥ वैष्णवो पांशुयाज्यस्य। इदं विष्णुर्विचक्रम इत्येषा पुरोनुवाक्या इदं क्रतुर्वता इति खंडे सूत्रितं॥
इदं विष्णुर्विचक्रम इति देवः पृथिवी मे पयतामिति। गार्हपत्याहवनीययोर्मध्ये अतिक्रमणे अनयेवर्चा पदे पुभस्मप्रक्षिपेत्। विध्यपराध
इति खंडे सूत्रितं। भस्मना कृतः पदप्रकृतिवपेदिदं विष्णुर्विचक्रमे इति॥ आतिथ्यायां प्रधानस्य हविषः एषैवानुवाक्या अयातिथ्ये क्रांते
ति खंडे सूत्रितं। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदमित्याचक्षते अश्यामिति। उपसत्सु वैष्णवस्यैषैवानुवाक्या। अथोपसदिति खंडे सूत्रितं। ---

भा॰ ब॰ गयस्तनो अमीव हेदं विष्णुर्वि चक्रम इति तामेतां सूक्तस्य सप्तदशीमृचमाह ॥ ॥ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदं ॥ समूळ्हमस्य पांसुरे ॥ विष्णुस्त्रिविक्र
मावतारं धारयन् इदं प्रतीयमानं सर्वं जगदुद्दिश्य विचक्रमे विशेषेण क्रमणं कृतवान् त्रेधा त्रिभिः प्रकारैः पदं निदधे स्वकीयं पादं प्रक्षिप्तवान् । अस्य वि
५० ष्णोः पांसुरे धूलियुक्ते पादस्थाने समूळ्हमिदं सर्वं जगत् सम्यगन्तर्भूतं । सेयमृक् यास्केनैवं व्याख्याता । विष्णुर्विशतेर्वा व्यश्नोतेर्वा यदिदं किंच तद्विक्रम
ते विष्णुस्त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः समूळ्हमस्य पांसुरे
प्यायनेन्तरिक्षे पदं न दृश्यते अपि वोपमार्थे स्यात् समूळ्हमस्य पांसुल इव पदं न दृश्यत इति पांसवः पादैः सूयन्त इति वा पन्नाः शेरत इति
वा पिंसनीया भवन्तीति वेति । त्रेधा एधाच् इत्येधाच् प्रत्ययः चितः अन्त उदात्तः । समूळ्हं वह प्रापणे निष्ठा क्तः वचिस्वपीत्यादिना संप्रसारणं ढत्वधत्वष्टु
त्वढलोपदीर्घत्वानि गतिरनन्तर इति गतेः प्रकृतिस्वरत्वं । अस्य इदमोन्वादेश इत्यश् अनुदात्तः प्रत्ययस्वरेण । पांसुरे पांसवः पादुभ्यः सन्ति
यस्मिन्निति मत्वर्थीयो रः प्रत्ययः स्वरः । उपमदिव्येन्मवस्य यागस्य प्रातःकाले याज्या सायंकाले नुवाक्या । त्रीणि पदेत्येषा सूत्रितं च त्रीणि पदा वि
चक्रम इति खण्डे सूत्रितं तृच उच्यत इति ॥ ॥ तामेतां अष्टादशीमृचमाह ॥ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः ॥ अतो धर्माणि धारयन् ॥ अदाभ्यः के
नापि हिंसितुमशक्यः गोपाः सर्वस्य जगतो रक्षको विष्णुः पृथिव्यादिस्थानेषु त्रीणि पदानि विचक्रमे । किं कुर्वन् धर्माण्यग्निहोत्रादीनि धारयन् पोष
यन् । पदा । सुपां सुलुगित्यादिना विभक्तेराकारादेशः तस्य छान्दसत्वादनुदात्तत्वे प्राप्ते उदात्तनिवृत्तिस्वरेणोदात्तत्वं । गोपाः गोपायतेरस्येत्यत्रोक्तं । अदा
भ्यः दभेः ऋहलोर्ण्यदिति ण्यत् नञ्समासः अव्ययपूर्वपदप्रकृतिस्वरत्वं । धारयन् शपः पित्वादनुदात्तत्वं । शतुश्च लसार्वधातुकस्वरेण णिच एव
स्वरः शिष्यते ॥ ॥ एकोनविंशीमृचमाह ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ॥ इन्द्रस्य युज्यः सखा ॥ हे ऋत्विगादयः विष्णोः कर्माणि पाल
नादीनि पश्यत यतो यैः कर्मभिर्व्रतान्यग्निहोत्रादीनि पस्पशे स्पृशति यजमानः स एव विष्णोरनुग्रहादनुतिष्ठतीत्यर्थः । तादृशो विष्णुरिन्द्रस्य यु
ज्यो योग्योनुकूलः सखा भवति । विष्णोरिन्द्रानुकूल्यं तैत्तिरीया पुत्र इत्यनुवाके अथ वै तर्हि विष्णुरन्या आसीदित्यादिना प्रपञ्चेन तैत्तिरीया आमनन्ति । पस्पशे ।
स्पश बाधनस्पर्शनयोः । लिटि द्विर्भावे शर्पूर्वाः खय इति पकारः शिष्यते । सकारो लुप्यते । यद्वृत्तयोगादनिघातः । युज्य युजेर्वा इत्युक्त्वात् । क्यपि
त्वाद्गुणाभावः क्यपः पित्वादनुदात्तत्वे धातुस्वरः ॥ ॥ विंशीमृचमाह ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ॥ दिवीव चक्षुराततं ॥ सूरयो विद्वां
सः ऋत्विगादयः विष्णोः संबंधि परमं उत्कृष्टं तत्पदं स्वर्गस्थानं शास्त्रदृष्ट्या सर्वदा पश्यन्ति । तत्र दृष्टान्तः दिवीव आकाशे यथा ततं स
र्वतः प्रसृतं चक्षुः निरोधाभावेन विशदं पश्यति तद्वत् । सदा सर्वैकान्यकिंयत्तदः काले दा प्रत्ययः । सर्वस्य सोन्यतरस्यां दीति सर्वशब्दस्य स भावः । व्यत्ययेनाद्यु
दात्तत्वं । दिवि ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । आततं तनोतेः कर्मणि क्तः यस्य विभाषेतीट्प्रतिषेधः अनुदात्तोपदेशेत्यादिना नलोपः । कृदुत्तरपदप्र
कृतिस्वरत्वे प्राप्ते गतिरनन्तर इति गतेरुदात्तत्वं ॥ एकविंशीमृचमाह ॥ ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ॥ विष्णोर्यत्परमं पदं ॥ पूर्वोक्तं
विष्णोर्यत्परमं पदमस्ति तत्पदं विप्रासो मेधाविनः समिन्धते सम्यग्दीपयन्ति । कीदृशाः विपन्यवो विविधं पणस्तोतारः जागृवांसः जागरणार्थं यो ५०
प्रमादराहित्येन जागरूकाः विप्रासः आज्जसेरसुक् विपन्यवः पन स्तुत्यर्थः स्यपनो वसिष्ठ औणादिको युः प्रत्ययः । तत्र प्रत्ययस्वरः । जागृवांसः जा
गृ निद्राक्षये लिटः क्वसुः क्रादिनियमात्प्राप्तस्य इटो वस्येकाजाद्घसामिति नियमान्निवृत्तिः ॥ ॥ ७ ॥ इति प्रथमस्य द्वितीये सप्तमो वर्गः ॥ ७ ॥

तीव्रा इति चतुर्विंशत्यृचं पंचमं सूक्तं ॥ अत्रेयमनुक्रमणिका ॥ तीव्राश्चतुर्विंशतिर्वायव्यैकेंद्रवायव्यौ मैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचाः शे
षा आप्याः प्राग्ध्याग्नेयास्तु तं पुरउष्णिक् परानुष्टुप् तिस्रश्चान्त्याः कृविंशी प्रतिष्ठेति ॥ ऋषिश्चान्यस्मादिति परिभाषमानुवर्तमानो मेधातिथिः
कण्व ऋषिः अप्स्वन्तरित्येषा पुरउष्णिक् । प्रथमपादस्य द्वादशाक्षरत्वेन आद्यश्चेत्पुरउष्णिगिति लक्षणसंज्ञावात् । अप्सु मे सोम इत्येषानुष्टुप्
इदमाप इत्याद्यास्तिस्रोनुष्टुभः शिष्टा एकोनविंशतिसंख्याका ऋचो गायत्र्यः ॥ आदौ गायत्रमिति परिभाषितत्वात् आद्या वायुदेवता ॥ 117/1924
ततो द्वृचा ऐन्द्रवायुदेवताकः । ततः एकस्तृचो मित्रावरुणदेवत्यः ततः उत्तरस्तृचस्य मरुद्गणविशिष्ट इन्द्रो देवता । ततः एकस्तृचो वैश्वदेव्यः
तदनन्तरभावी पौष्णः शिष्टा ऋचोब्देवताकाः ॥ पयस्वानग्न इत्यर्धर्चं मुक्त्वा सं माग्न इत्येषा त्वग्निदेवताका ॥ सूक्तविनियोगो लिङ्गादव
गन्तव्यः अभिप्लवषडहस्य द्वितीयेहनि प्रउगशस्त्रे वायव्यतृचस्य तीव्राः सोमास इत्येषा तृतीया ॥ द्वितीयस्य चतुर्विंशेति खंडे सूत्रितं च ती
व्राः सोमा आगहीत्येकेति । एतस्य षडहस्य द्वितीयेहनि प्रउगतृचा ॥ ॥ तामेतां सूक्ते प्रथमामृचमाह ॥ तीव्राः सोमास आ गह्याशीर्वन्तः सुता इमे
॥ वायो तान्प्रस्थितान्पिब ॥ ॥ हे वायो इमे सोमासः इन्द्रवायव्यग्रहादिरूपाः सोमाः सुता अभिषुताः ते च तीव्राः प्रभूतरसाः त्वां तर्पयितुं समर्थाः
आशीर्वन्तः आशीर्भिर्युक्ताः अतस्त्वमागहि अस्मिन्कर्मण्यागच्छ प्रस्थितानुत्तरवेदिं प्रत्यानीतान् तान् सोमान् पिब । सोमासः अतिक्र
लित्यादिना मनित्वादाद्युदात्तः ॥ आज्जसेरसुक् ॥ गहि मरुद्गि रुग्न आगही त्यत्रोक्तं ॥ आशीर्वन्तः श्रीञ् पाके अपस्पृधेथामित्यादिसूत्रे आ
ङ्पूर्वस्य श्रपि शिरादेशो निपातितः करस्यापि श्रयणद्रव्यस्य स्वव्यापारकर्तृत्वविवक्षया कर्तरि क्तः । न विरध्यते आशीरिपामस्तीत्या
तिस्वरत्वं ॥ वायो आमन्त्रिताद्युदात्तत्वं ॥ प्रस्थितान् प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरं बाधित्वा व्यत्ययेनाव्ययपूर्वपदप्रकृ
तिस्वर इति द्रष्टव्यं ॥ ॥ तयोः प्रथमां सूक्ते द्वितीयामृचमाह ॥ ॥ उभा देवा दिविस्पृशेन्द्रवायू हवामहे ॥ अस्य सोमस्य पीतये ॥ दिविस्पृशा
दिव्याकाशः दिविस्पृशौ उभा उभौ देवौ इन्द्रवायू हवामहे आह्वयामः किमर्थं अस्य सोमस्य पीतये ॥ असरूपाख्यात ॥ उभा देवा सुपां सुलु
गित्याकारः दिविस्पृशा स्पृश उदकेति क्विन् तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् कृदुत्तरपदप्रकृतिस्वरत्वं ॥ इन्द्रवायू इन्द्रश्च वायुश्च उभयत्र वायोः प्र
तिषेधो वक्तव्य इत्यानङो निषेधः देवताद्वंद्वे चेति प्राप्तस्योभयपदप्रकृतिस्वरत्वस्य नोत्तरपदेनुदात्तादाविति निषेधात् ॥ समासांतो
दात्तत्वमेव शिष्यते हवामहे स्वभ्यस्य थायां ह्वञ् बहुलं छन्दसीति संप्रसारणं ॥ संप्रसारणाच्चेति पूर्वरूपत्वं ॥ लोपे गुणावादेशौ
शपः पित्वादनुदात्तत्वं ॥ तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । तिङ्ङतिङ इति आत्मनेपदे निघातः ॥ अस्य ऊडिदमित्यादिना
पष्ठ्या उदात्तत्वं पीतये पा पाने स्त्रियां क्तिन् घुमास्थेतीत्वं व्यत्ययेनाद्युदात्तत्वं ॥ ॥ तृतीयामृचमाह ॥ इन्द्रवायू मनो
जुवा विप्रा हवन्त ऊतये ॥ सहस्राक्षा धियस्पती ॥ विप्रा मेधाविन ऋत्विग्यजमानाः इन्द्रवायू रक्षणार्थमिन्द्रवायू हवन्ते आह्वयन्ति कीदृशौ
मनोजुवा मनोवद्वेगयुक्तौ सहस्राक्षा सहस्रनयनयुक्तौ यद्यपीन्द्र एव सहस्राक्षः तथापि छत्रिन्यायेन वायुरपि तथोच्यते धियस्पती

कर्मणो वृधे वर्धपालकौ। मनोजुवा जवतिर्गतिकर्मा मनोवज्जवत इति मनोजुवान इव वेगयुक्तौ। उत्तरपदप्रकृतिस्वरत्वं॥ सुपां सुलुगित्याकारः॥ विप्रा
ओणादिकरन्प्रत्ययांत आद्युदात्तः॥ ऊतये ऊतियूतिजूतीत्यादिना क्तिन उदात्तत्वं॥ सहस्राक्षा सहस्रमक्षीणि ययोस्तौ॥ बहुव्रीहौ सक्थ्यक्ष्णोरिति ष
च्समासांतः बहुव्रीहिस्वरे प्राप्ते समासांतप्रत्ययस्य सतिशिष्टत्वाच्चित इत्यंतोदात्तत्वं॥ धियः। सावेकाच इति ङस उदात्तत्वं। षष्ठ्याः पतिपुत्र
ति संहितायां विसर्जनीयस्य सकारः। पती इत्यंत उदात्तः॥ चतुर्विंशके इति प्रातःसवने मैत्रावरुणशस्त्रे मित्रं वयं हवामह इति तृचः प्रउगस्तोत्रियः
।चतुर्विंश इति खंडे सूत्रितं। आ नो मित्रावरुणा मित्रं वयं हवामह इति। अभिप्लवषडहे प्रातःसवने मैत्रावरुणस्य मंत्रं च आवापार्थः। अभि
प्लवषडहस्याहानीति खंडे सूत्रितं॥ परिशिष्टानावापानुध्यत्या मित्रं वयं हवामह इति। मैत्रावरुणस्य मित्रं वयं हवामह इत्येषा प्रातःसवने प्रस्थि
तयाज्या प्रशास्ता ब्राह्मणाच्छंसीत्युपक्रम्य इदं ते सोम्यं मधु मित्रं वयं हवामह इति इति सूत्रितं॥ ॥तामेतां सूक्ते चतुर्थीमृचमाह॥ मित्रं वयं ह
वामहे वरुणं सोमपीतये॥ जज्ञाना पूतदक्षसा॥ वयमनुष्ठातारः सोमपानार्थं मित्रावरुणं चोभावाह्वयामः कीदृशावुभौ जज्ञाना कर्मप्रदेशे
प्रादुर्भावं प्राप्तौ पूतदक्षसा शुद्धबलौ वरुणं॥ वृञ् वरणे। कृवृदारिभ्य उनन् इति नित्त्वादाद्युदात्तः। सोमपीतये दासीभारादित्वात् पूर्वपदप्रकृ
तिस्वरत्वं। जज्ञाना जनी प्रादुर्भावे॥ छंदसि लिट् तस्य लिटः कानज्वा इति कानजादेशः गमहनेत्यादिना उपधालोपः तस्याचः परस्मिन्निति स्थानिवद्भावात्
न द्विर्वचनं श्नात्श्वोर्नाश्चुरिति नकारस्य ञकारः चित इत्यंतोदात्तत्वं॥ पूर्ववदाकारः पूतदक्षसा पूञ् पवने। निष्ठेति क्तः श्र्युकः कितीतीट्
प्रतिषेधः। पूतं दक्षं ययोस्तौ बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरत्वं (पूर्ववदाकारः)॥ ॥पंचमीमृचमाह॥ ऋतेन यावृतावृधावृतस्य ज्यो
तिषस्पती॥ ता मित्रावरुणा हुवे॥ यौ मित्रावरुणौ ऋतेन सत्यवचनेनानुग्रहकारिणा ऋतावृधौ ऋतमवश्यंभावितया सत्यं कर्मफलं तस्य
वर्धकौ ऋतस्य सत्यस्य प्रशस्तस्य ज्योतिषः प्रकाशस्य पती पालकौ। अत्यंतरमित्रावरुणयोरदितिपुत्रत्वेन श्रुतत्वात् द्वादशादित्येष्वंतर्भूत
त्वेन ज्योतिः पालकत्वं युक्तं। श्रूयते च अष्टौ पुत्रासो अदितेरित्युपक्रम्य मित्रश्च वरुणश्चेत्यादिकमाम्नातं। ता मित्रावरुणा तथाविधौ मित्रावरु
णौ हुवे आह्वयामि॥ ऋतावृधा। वृधु वृद्धौ। क्विप् चेति क्विप् अन्येषामपि दृश्यत इति दीर्घः कृदुत्तरपदप्रकृतिस्वरत्वं। ज्योतिषः द्युतेरिसि
न्नादेश्च ज इति इसिन्प्रत्ययांतत्वादाद्युदात्तः। षष्ठ्याः पतिपुत्रेति संहितायां विसर्जनीयस्य सत्वं॥ मित्रावरुणा देवताद्वंद्वे चेत्यान
ङ् देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। सुपां सुलुगिति पूर्वसवर्णदीर्घ आकारः॥ हुवे ह्वेञ् आत्मनेपदे उत्तमपुरुषैकवचने संप्रसारणे पर
पूर्वत्वे च कृते बहुलं छंदसीति शपो लुक् गुणे प्राप्ते क्ङिति चेति प्रतिषेधः उवङादेशः तिङ्ङतिङ इति निघातः॥ ॥इति प्रथमस्य द्वितीये
ऽष्टमो वर्गः॥ ॥षष्ठीमृचमाह॥ वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः॥ करतां नः सुराधसः॥ अयं वरुणोऽस्माकं प्राविता भुवत् प्रक
र्षेण रक्षको भवतु मित्रश्च विश्वाभिरूतिभिः सर्वाभिः रक्षाभिः प्राविता भुवत् ता उभावपि नोऽस्मान् सुराधसः प्रभूतधनयुक्तान् करतां कुरुतां॥ अवि ३२
ता। तृचः श्चित्स्वरेणांतोदात्तत्वं॥ प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते॥ भुवत्। भू सत्तायां। लेटि लेटोऽडाटावित्यडागमः। इतश्च लो
पः इतीकारलोपः। बहुलं छंदसीति शपो लुक् गुणे प्राप्ते भूसुवोस्तिङीति प्रतिषेधः। उवङादेशः तिङ्ङतिङ इति निघातः। विश्वाभिः। अशिप्रुषीत्यादि
ना क्वन्नंतो विश्वशब्द आद्युदात्तः। टाप्युपरि नुदात्तत्वात् तदेव शिष्यते॥ ऊतिभिः ऊतियूतीत्यादिना क्तिन् उदात्तः॥ करतां। डुकृञ् करणे। भौवादिकः लोटस्तस्

तस्तामादेशः शिष्यते। सुराधसः। राध साध संसिद्धौ। राध्नोत्यनेनेति राधो धनं शोभनं राधो येषां ते बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते नञ्सुभ्या
मित्युत्तरपदांतोदात्तत्वं प्राप्तं सोमनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वेन बाध्यते॥ ॥सप्तमीमृचमाह॥ मरुत्वंतं हवामह इंद्रमा सोमपीत
ये॥ सजूर्गणेन तृंपतु॥ मरुत्वंतं मरुद्भिर्युक्तमिंद्रं सोमपीतये सोमपानाय आ हवामहे आह्वयामः॥ स इंद्रो गणेन मरुत्समूहेन सजूः सहितः सं 119
तृप्तो भवतु॥ मरुत्वंतं मरुतोऽस्य संतीति मरुत्वान् झय इति मतुपो वत्वं तसौ मत्वर्थ इति भसंज्ञायां पदसंज्ञाया बाधितत्वात् जश्त्वाभावः मतुप्सु 1924
पित्वादनुदात्तौ॥ ननु ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वेन भवितव्यं। स्वरविधौ व्यंजनमविद्यमानवदिति तकारस्याविद्यमानत्वेन ह्रस्वात्पर
त्वात्। न। ह्रस्वनुड्भ्यामित्यत्र नुड्ग्रहणसामर्थ्यादविद्यमानपरिभाषानाश्रयणादिति वृत्तावुक्तं। अतो मरुच्छब्दस्य स्वर एव शिष्यते॥ सजूः जुषी
प्रीतिसेवनयोः संपदादिलक्षणो भावे क्विप् समाना प्रीतिर्यस्येति॥ बहुव्रीहिः समानस्य छंदसीति सभावः ससजुषो रुरिति रुत्वं र्वोरुपधाया इत्युपधा
दीर्घः॥ बहुव्रीहिस्वरे प्राप्ते त्रिचक्रादीनां छंदसीत्युत्तरपदांतोदात्तत्वं। तृंपतु। तृप तृंफ तृप्तौ। तुदादिभ्यः शः शे तृंफादीनामिति नुमागमः॥ ॥अष्ट
मीमृचमाह॥ इंद्रज्येष्ठा मरुद्गणा देवासः पूषरातयः॥ विश्वे मम श्रुता हवं॥ हे देवासः इंद्रमरुद्गणाः विश्वे सर्वे यूयं मम हवं आह्वानं श्रुत शृणुत कीदृ
शाः इंद्रज्येष्ठाः इंद्रो ज्येष्ठो मुख्यो येषु तेन तथाविधा मरुद्गणाः मरुत्समूहरूपाः पूषरातयः पूषा रातिर्दाता येषामिंद्रमरुतां ते पूषरातयः।
इंद्रज्येष्ठा आमंत्रिताद्युदात्तत्वं पादादित्वादनिघातः मरुद्गणाः विभाषितं विशेषवचने बहुवचनमिति पूर्वस्याविद्यमानवत्त्वान्निघातः देवा
सः पूषरातयः पूर्ववत् श्रुत श्रवणे। लोण्मध्यमबहुवचनं तस्थस्थमिपामिति तादेशः व्यत्ययेन शप् बहुलं छंदसीति शपो लुक् सार्वधातुकार्धधातुकयो
रिति गुणे प्राप्ते क्ङिति चेति प्रतिषेधः अन्येषामपि दृश्यत इति दीर्घः हवं ह्वेञोऽस्पर्धायां शब्दे च। भावेऽनुपसर्गस्येत्यप् संप्रसारणं परपूर्वत्वं गुणावादेशौ
पित्वादनुदात्तत्वं धातुस्वरः शिष्यते॥ ॥नवमीमृचमाह॥ हत वृत्रं सुदानव इंद्रेण सहसा युजा॥ मा नो दुःशंस ईशत॥ हे सुदानवः शोभनयुक्ताम
रुद्गणाः सहबलवता युक्तायोग्येनेंद्रेण सह वृत्रं शत्रुं हत नाशयत तत्र दुःशंसः दुष्टेन शंसनेन कीर्तनेन युक्तोऽत्रोनास्मान् प्रतिमेशात समर्थो
मा भूत्॥ हत हन हिंसागत्योः। लोटस्तस्य तादिप्रभृतिभ्यः शप इति शपो लुक्। अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः। सुदानवः। इदा
ञ् दाने दाभाभ्यां नुरित्यौणादिके नुप्रत्ययः प्रादिसमासे आमंत्रितनिघातः। युजा युजिर् योगे। कृत्विगित्यादिना क्विन् सावेकाच इति तृतीयै
कवचनस्योदात्तत्वं दुःशंसः इषदुष्विति खलुतीति प्रत्ययात्पूर्वस्योदात्तत्वं। ईशत। ईश ऐश्वर्ये माङि प्राप्ते छंदसि लुङ्लङ्लिटः इति व्यत्ययेन लङ्
ङ् तस्य बहुलं छंदसीति शपो लुक् न माङ्योगे इत्याडागमाभावः तिङ्ङतिङ इति निघातः॥ ॥दशमीमृचमाह॥ विश्वान्देवान्हवामहे मरुतः
सोमपीतये॥ उग्रा हि पृश्निमातरः॥ मरुतो मरुत्संज्ञकान् विश्वान् सर्वान् देवान् सोमपीतये हवामहे सोमपानार्थमाह्वयामः॥ ते न मरुतः उग्राः
शत्रुभिरसह्यबलाः पृश्नेर्नानावर्णयुक्ताया भूमेः पुत्रा हि शब्दः प्रसिद्ध्यर्थः सा च प्रसिद्धिः पृश्नेः पुत्रा इति मंत्रांतरादवगंतव्या। पृश्निमातरः पृश्नि
र्माता येषां ते पृश्निशब्दो घृणिपृश्नीत्यौणादिकः निपातितः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥इति प्रथमस्य द्वितीये नवमो वर्गः॥ ९॥
॥एकादशीमृचमाह॥ जयतामिव तन्यतुर्मरुतामेति धृष्णुया॥ यच्छुभं याथना नरः॥ मरुतां देवानां तन्यतुः शब्दो धृष्णुया धार्ष्ट्ययुक्तः सन्नेति गच्छ
ति कथमिव जयतामिव शत्रुजययुक्तानां शूराणां भटानामिव॥ हे नरो नेतारो मरुतो यूयं यदा शुभं शोभनं देवयजनं याथन प्राप्नुथ तदा त्वदीयः शब्दो ग

भा॰ प्र॰ धर्तीति पूर्ववदन्वयः ॥ तन्यतुः तनु विस्तारे । कृहनिभ्यां त्वादिनायतुप्रत्ययः । धरुणमु धारणे धाप्रत्यये धिधि पिशिषेः कारितिनुः सुपां सुलुगिति सो
६१ यातुरेश ॥ याथनतमन मनथनाश्वतिथनाद्रेशः यज्ञ्छन्दयोगान्निघाताभावः ॥ ॥ दूरदशीमृचमाह ॥ हस्काराहि घृतस्पर्शो लोज्ञाता अवंतु नः ॥ मरुतो
मृळयंतु नः ॥ हस्कारात् दीप्तिकारात् विद्युतो विद्युत्पन्दीप्यमानात् अतः । अंतरिक्षात् परिजाताः सर्वतउत्पन्नाः मरुतो नोस्मान् अवंतुरक्षंतु तथाविधा
मरुतो नोस्मान्मृळयंतु रक्षंतु ॥ हस्कारात् । हस हसने । अत्रतु प्रकाशमात्रे वर्तते अस्मात्संपदादिलक्षणः क्विप् अस्मिन्नुपपदे दुकृञ्करणे इत्यस्मात्
कर्मण्यणिणप्रत्ययः तत्पुरुषे तुल्यार्थेत्यादिना पूर्वपदप्रकृतिस्वरत्वे प्राप्ते गतिर्मिकारकेत्यादिना कृदुत्तरपदप्रकृतिस्वरत्वं । अतः कृकमित्यादिना विस
र्जनीयस्य सत्वं ॥ ॥ त्रयोदशीमृचमाह ॥ आ पूषं चित्रबर्हिषमाघृणे धरुणं दिवः ॥ आजानष्टं यथापशुं ॥ हे पूषन् चित्रबर्हिषं विचित्रदर्भयुक्तं धरुणं
यागस्य धारकं सोमं दिव आद्युलोकात् आहर तिरोपः ॥ पूषा विशेष्यते ॥ आघृणे । आगतदीप्तियुक्त तत्र दृष्टांतः ॥ हे अजाग मनशीलस्य आलोकेन नष्टं
पशुं मदाहरण्याद्यावन्नीश्यकश्चिदाहरति तद्वत् आघृणे । घृ क्षरणदीप्त्योरित्यस्मात् घृणिः दृश्निरित्नि प्रत्ययो निपातितः कृवर्णाच्चेतिन त्वमिति
णत्वं प्रादिसमासः । आमंत्रिताद्युदात्तत्वं धरुणं धृञ् धारणे अस्मात् ध्यताप ध्यातार्णिनुकृच्चेत्युनन् प्रत्ययः अत्ययेन नित्त्वभोवो वे प्रत्ययस्वरः ॥ दि
वः उडिदमित्यादिनापंचम्याउदात्तत्वं । अजागतिक्षेपणयोः ॥ ॥ चतुर्दशीमृचमाह ॥ पूषा राजानमाघृणिरपगूळ्हं गुहा हितं ॥ अविंदच्चित्रबर्हिषं ॥
आघृणिः पूषा राजानं सोमम विंदत अलभत कीदृशं अपगूळ्हं अत्यंत गूळ्हं तत्र हेतुः गुहा गुहासदृशे दुर्गमे लोके हितं ॥ तथा चित्रबर्हिषं अपगूळ्हं
गुहसंवरणे निष्ठा ति कर्मणि क्तः ढत्व इति ढत्वं ॥ ष्टुत्वं ढोढे लोप इति ढकारलोपः पूर्वस्य दीर्घः ॥ समासे गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । गुहा । सु
पां सुलुगिति सप्तम्या लुक् हितं । निष्ठायां दधातेर्हिः ॥ ॥ पंचदशीमृचमाह ॥ उतो स मह्यमिंदुभिः षड्युक्तां अनुसेषिधत् ॥ गोभिर्यवं न चर्कृषत् ॥
उतो अपिच सपूषा मह्यं यजमानाय इंदुभिः यागहेतुभिः सोमैर्युक्तान् षड् वसंतादीन् ऋतून् अनुसेषिधत् । अनुक्रमेण पुनः पुनर्निर्वर्तयतु वर्तत इति शे
षः ॥ तत्र दृष्टांतः ॥ गोभिर्बलीवर्दैर्यवं न चर्कृषत् तत्र शब्द उपमार्थः ॥ यथा यवमुद्दिश्य भूमिं प्रतिसंवत्सरं पुनः पुनः कर्षति तद्वत् । मह्यं । पितंत्वा धुदात्त
त्वां इंदुभिः । इंदीकृदन । इंदेरिच्चादित्यादिना उप्रत्ययः उकारादेशश्च ॥ निंदित्यनुवृत्तेरा द्युदात्तत्वं ॥ युक्तान् । दीर्घादटिसमानपादे इति संहितायां नकारस्य
रत्वं ॥ अत्रानुनासिकः पूर्वस्य तु वेति सानुनासिक आकारः सेषिधत् षिधु गत्यां धातोः कीचडति यङ्लुगन्तात् लेटि तिपः रुयणो अप्रत्ययलक्षणेन सन्वद्भावादित्त्वे द्वि
र्भावः हलादिशेषः गुणो यङ्लुकोरिति अभ्यासस्य गुण । एकाचित्यतम सनाद्यन्ता धातवः संज्ञायां लेटोडाटाविति अडागमः अदादिवच्चेति शपो लुक्
इतुसितिनुमः प्रतिषेधः । प्रत्ययस्वरे प्राप्ते अभ्यस्तानामादिरित्याद्युदात्तत्वं । गोभिः सावेकाच इति भिस उदात्तत्वे प्राप्ते न गोश्वन्निति प्रतिषेधः । च
र्कृषत् कृष विलेखने । यङ्लुकि द्विर्भावः हलादिशेषोरत हल्यादिर्लोप चर्कृतीतिमर्निकोचलुकीत्यभ्यासस्य रुगागमः अस्मा घुलुगंताट् लेटिप ॥
इतश्च लोपः । लेटोडाटाविति अडागमः । अदिप्रभृतिभ्यः शप इति शपो लुक् । लघूपधगुणे प्राप्ते नाभ्यस्तस्याचि पितीति निषेधः । तिङ् ङतिङ इति निघा
तः ॥ ॥ इति प्रथमस्य द्वितीये दशमो वर्गः ॥ ॥ आपो नप्त्रीयएकं धर्तारुषानीताः सुस्वयमनुग्रहं नव यदितिद्ध अनुक्रांतं तृतीयया अपोदेवी ६१
रित्यनेन यकश्चनासह विधानं प्रविश्य सुस्वयमनु प्रवेशत । तथैव सत्रितम ॥ अंबयो यंत्यध्वभिरिति तिसृ उत्तमया नु प्रपंच्छ्येतेति ॥ ॥ अस्मिंस्तंत्रे
प्रथमा सूक्ते षोडशीमृचमाह ॥ अंबयो यंत्यध्वभिर्जामयो अध्वरीयतां ॥ पृंचतीर्मधुना पयः ॥ अध्वरीयतामध्वरमात्मान इच्छतां अस्माकं

अंबयो मातृस्थानीया आपः तथाच कौषीतकि ब्राह्मणे समाम्नायते ॥ अंबयो यंत्यध्वभिरित्यापो वा अंबय इति ता आपो ध्वर्युभिर्दर्यंयज
मानमार्गैर्यंति गच्छंति कीदृश्य आपः जामयो हितकारिण्यो बंधुकः तथा मधुना माधुर्यरसेन युक्तं पयः पृंचतीः गवादिषु योजयंत्यः ॥
अध्वभिः अदेर्धर्वनिकनिपथिलाप्रत्ययस्यानुदात्तत्वे धातुस्वरः अध्वरीयतां ॥ अध्वरशब्दात्कपात्मनः क्यजिति क्यच ॥ क्य 121
चिचेतीत्वं ॥ अपुनादीनामिव कंयमितिवचनान्नर्छ दस्य पुत्रस्येतीत्व प्रतिषेधाभावः । सर्वेविधयः छंदसि विकल्प्यंत इति क्यध्वरए 1924
त नास्य त्यकारलोपो न भवति ॥ क्यच् प्रत्ययात् धातोर्लटः शतृ शपः पित्वादनुदात्तत्वं ॥ शतुश्च लसार्वधातुकस्वरेण तयोः क्यजासाः हे
कादेशः । एकादेश उदात्तेनोदात्त इत्येकादेशस्योदात्तत्वं सति शतुरनुमो नद्यजादी इति षष्ठ्या उदात्तत्वं ॥ पृंचतीः पृची संपर्के । रुधादिभ्यः श्नम् रुधादि
भ्यः श्नमाश्नसोरल्लोपः । अनुस्वारपरसवर्णौ । उगितश्चेति ङीप् वा छंदसि पूर्वसवर्णदीर्घत्वं शतुरनुम इति ङीप उदात्तत्वं ॥ ॥ सप्तदशी
मृचमाह ॥ अमूर्या उप सूर्ये याभिर्वा सूर्यः सह ॥ ता नो हिन्वंत्वध्वरं ॥ या अमूः आपः सूर्ये उप समीपे नावस्थिता आपः सूर्ये समाहिता इति श्रु
त्यंतरात् वा अथवा सूर्यो याभिरद्भिः सह वर्तते पूर्वत्रापां प्राधान्यं उत्तरत्र सूर्यस्येति विशेषः । ता स्तादृश्या अपो नोस्मदीयमध्वरं याग
हिन्वंतु प्रीणयंतु ॥ प्रक्रियास्पष्टा । याभिः सावेकाच इति विभक्त्युदात्तस्य न गोश्वन्साववर्णेति प्रतिषेधः ॥ ॥ अष्टादशीमृचमाह
॥ अपो देवीरुप ह्वये यत्र गावः पिबंति नः ॥ सिंधुभ्यः कर्त्वं हविः ॥ नोस्मदीया गावो यत्र यासु अप्सु पिबंति पानं कुर्वंति । ता आपो देवीरुप
ह्वये आह्वयामि सिंधुभ्यः स्यंदनशीलाभ्यस्ताभ्यो देवताभ्यः हविः कर्त्वं अस्माभिः कर्तव्यं ॥ अपः ऊडिदमित्यादिनाशस उदात्तत्वं ॥ पि
बंति पाघ्रेत्यादिना पिबादेशः । शपः पित्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वरेण घुदात्तत्वं । निपातैर्यद्यदीति
नानि घाताभावः । कर्त्वं डुकृञ् करणे कृत्यार्थे तवैकेनकेन्यत्वन इति कर्मणि त्वन् ॥ प्रत्ययः गुणश्चित्त्वस्वरेण घुदात्तत्वं ॥ ॥ एकोनविं
शीमृचमाह ॥ अप्स्वंतरमृतमप्सु भेषजमपामुत प्रशस्तये ॥ देवा भवत वाजिनः ॥ अप्सु जलेषु अंतः मध्ये अमृतं पीयूषं वर्तते । त
स्यां निकारत्वात ॥ अमृतं वा आप इति श्रुत्यंतरात् ॥ तथैवाप्सु भेषजमौषधं वर्तते ॥ शुद्धरोगनिवर्तकस्यान्नस्याप्कार्यत्वात् उत अपि
च । तादृशीनामपां देवतानां प्रशस्तये प्रशंसार्थं हे देवाः ऋत्विजादयो ब्राह्मणाः ॥ एते वै देवाः प्रत्यक्षं यद्ब्राह्मणा इति श्रुत्यंतरात् ॥ वाजिनो वे
गवंतो भवंतु शीघ्रं स्तुतिं कुरुतेत्यर्थः ॥ अप्सु । ऊडिदमित्यादिना सप्तम्या उदात्तत्वं संहितायामुदात्तस्वरितयोर्यणः स्वरित इति स्वरितत्वं । अ
मृतं न ञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं ॥ प्रशस्तये तादर्थ्ये चतुर्थी तितुत्रेति इतीति गतेः प्रकृतिस्वरत्वं ॥ भवत आमंत्रितं पूर्वमविद्यमानवदिति
पूर्वस्यामंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः । कारीयां मुत्तरस्याऽय भागस्याप्सु म इत्येषानुवाक्या वर्षकाको मप्सिरिति खंड अ
प्स्वग्ने सधिष्टवाप्सु मे सोमो अब्रवीदिति सूत्रितं ॥ ॥ विंशीमृचमाह ॥ अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा ॥ अग्निं च विश्वशंभुव
मापश्च विश्वभेषजीः ॥ अप्सु जलेषु अंतर्मध्ये विश्वानि भेषजानि सर्वाण्यौषधानि संतीति मह्यं मंत्रद्रष्ट्रे मुनये सोमो देवो ब्रवीत् । तथा
विश्वशंभुवं सर्वस्य जगतः सुखकरमेतन्नामकं चाग्निं चाप्सु वर्तमानं सोमोब्रवीत ॥ तथा च तैत्तिरीया अग्नेस्त्रयोज्यायांसइत्यनुवाके सो
मः प्राविशदित्यग्नेरप्सु प्रवेशमामनंति लतागुल्म मृलादीनामौषधीनां रक्षितत्वेन जलवर्तित्वं प्रसिद्धं विश्वभेषजीः विश्वानि भेषजानि

भा॰ प्र॰ निषीमुनर्थाविधा आपोप्यब्रवीत् भेषजामु पांसुलुगित्याकारः। विश्वशंभुवं। भवतेः अंतर्भावितण्यर्थात् क्विप्प्रत्ययेन पूर्वपदप्रकृतिस्वरत्वं। विश्वा
विश्वे सर्वे पिप्यापाताः सरस्वरूपत्वस्य च बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। आपः। कर्मणि शसि प्राप्ते व्यत्ययेन जस्। अन्येषामपि दृश्यत इति
६२ दीर्घः। विश्वभेषजीः। विश्वशंभुरितिवत्॥ ॥इति प्रथमस्य द्वितीये एकादशो वर्गः॥ एकविंशीमृचमाह॥ आपः पृणीत भेषजं वरूथं तन्वे३ मम॥
ज्योक् च सूर्यं दृशे॥ हे आपो मम तन्वे शरीरार्थं वरूथं रोगनिवारकं भेषजं मा पधं पृणीत पूरयत। किं च वयं ज्योक् चिरं सूर्यं दृशे द्रष्टुं निरोगाय यं
त्रो वामेति शेषः। पृणीत। पृ पालनपूरणयोः। लोण्मध्यमबहुवचनं थ तस्य तप्तनप्तनथनाश्चेति तादेशः॥ प्वादीनां ह्रस्वः। तिङ्ङतिङ इति निघाते। आप
इत्यस्यामंत्रितं पूर्वमविद्यमानवदिति विद्यमानत्वेन पादादित्वान्निघाताभावः। वरूथं। वृञ् वरणे। जॄवृञ्भ्यामूथन्निति ऊथन् नित्त्वादाद्युदात्तः। तन्वे। उदात्तयणो
तिनदी संज्ञायामाश्रितो याडागमभावः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वे प्राप्ते व्यत्ययेनोदात्तस्वरितयोरिति स्वरितत्वं। दृशे। दृशे विख्ये
चेति तुमर्थे निपात्यते॥ पशौ मार्जने इदमापः प्रवहतेत्यस्यानिनियुक्ता इत्यायां चपायामिति सूत्रितं। इदमापः प्रवहतेति। एकैकवाभृथे
ष्ठिताने विनियुक्तो। पत्नीसंयाजेष्वतिदेशेन इदमापः प्रवहतमशुचिस्थानं आप ओषधयः संविति सूत्रितं॥ ॥तामेतां सप्तविंशीमृचमा
ह॥ इदमापः प्रवहत यत्किं च दुरितं मयि॥ यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं॥ मयि यजमाने यत्किंचिदुरितं। अज्ञानात् निष्पन्नं पापमस्ति यद्वा
अहं यजमानः अभिदुद्रोह सर्वतो बुद्धिपूर्वकं द्रोहं कृतवानस्मि वा अथवा शेपे माधुजनं शप्तवानस्मीति यदस्ति उत अपि च उत अनृतं
सुकृतवानिति यदस्ति तदिदं सर्वमपराधजातं प्रवहत मत्तो पनीय प्रवाहेण नयत तान् यत॥ मयि मपर्यंतस्य त्वमावेकवचनं इतिमा
देशः कृतो अतेगुणे इति पररूपे च सति योचीति इकारस्य यकारादेशः। एकदेशस्वरेण मकारात्परस्याकारस्योदात्तत्वं। दुद्रोह। द्रुह
जिघांसायां। णलि गुणे द्विर्वचनं हलादिशेषः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। यद्वृत्तयोगान्निघाताभावः। शेपे। शप आ
क्रोशे। लिटि व्यत्ययेन तङ्। उत्तमैकवचनमिट्। एत्वं अत एकहल्मध्ये इत्येत्वाभ्यासलोपौ प्रत्ययस्वरेणांतोदात्तत्वं। पूर्ववन्नि
घाताभावः॥ पत्नीसंयाजेष्वहवनीयोपस्थाने आपो अद्यान्वचारिषमित्येषा मंत्रोत्तरीयम् प्रविश्य इति संसूत्रितं॥ एत्यापतितेवंतं आपो
अद्यान्वचारिषमिति॥ ॥तामेतां त्रयोविंशीमृचमाह॥ आपो अद्यान्वचारिषं रसेन समगस्महि॥ पयस्वानग्न आगहि तं मा
संसृज वर्चसा॥ अद्यास्मिन्दिने अवभृथार्थमापोन्वचारिषं जलान्यनुप्रविष्टोस्मि। प्रविश्य च रसेन जलसारेण समागस्महि संगताः
स्म हे अग्ने पयस्वान् जले वर्तमानत्वेन पयोयुक्तस्त्वं आगहि अस्मिन्कर्मण्यागच्छ तं मां तादृशं स्नातं मां वर्चसा तेजसा संसृज संयोज
य। आपः। कर्मणि शसि प्राप्ते व्यत्ययेन जस्। अचारिषं। चर गत्यर्थः। लुङि च्लेः सिच्। आर्धधातुकस्येड्वलादेरिति इट्। नेटीति वृद्धि
प्रतिषेधे प्राप्ते वदव्रजहलंतस्याच इति हलंतलक्षणा वृद्धिः। अगस्महि। समो गम्यृच्छिभ्यामिति तङ्। च्लेः सिच्। मंत्रे घसेत्यादिना च्लेः
लुगभावः। छांदसः एकाच उपदेशेनुदात्तादिति इट्प्रतिषेधः। गमः इति सिचः किद्वत् अनुदात्तोपदेशेत्यादिनानुनासिकलो ६२
पः। गहि। गमेर्लोट्। सिप्। हेः अपितत्वेन ङित्त्वात् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। अतो हेरिति लुग्भवति। असिद्धव
दत्राभादिति मलोपस्यासिद्धत्वात्॥ ॥चतुर्विंशीमृचमाह॥ सं माग्ने वर्चसा सृज सं प्रजया समायुषा॥ विद्युर्मे अस्य देवा

इंद्रो विद्यात्सह ऋषिभिः॥ हे अग्ने वर्चः प्रजायुर्भिर्मा संयोजय देवाः सोमपातारः। अस्य मम यजमानस्य विद्युः अनुष्ठानं जानीयुः किं च इंद्र
इंद्रश्च ऋषिगणैः सह मम अनुष्ठानं जानीयात्। विद्युः। विद ज्ञाने। लिङि उस्। लोपो व्योर्वलीति सलोपः इति सकारलोपः। अस्यपदांतादिति पररूपत्वं।
कृदुदात्तत्वेन एकारे उदात्ते उदात्तस्य सुदात्तः। अस्य इदमोन्वादेशे अशनुदात्तः। विभक्तिरपि सतिनानुदात्ता। सह ऋषिभिः। इत्यत्र ऋत्यक इति 123
प्रकृतिभावः॥ ॥इति प्रथमस्य द्वितीये द्वादशो वर्गः॥ ॥इति ऋक्संहिताभाष्ये प्रथममंडले पंचमोनुवाकः॥ प्रथममंडलस्य षष्ठानु ——
वाके सप्त सूक्तानि। तत्र कस्य नूनमिति पंचदशर्चं प्रथमं सूक्तं। अजीगर्तपुत्रस्य शुनःशेपस्यार्षं त्रैष्टुभं अभितादेवेति तृचो गायत्र्यः 1924
आद्यायाः अनिरुक्तत्वात् प्रजापतिर्देवता। अग्नेर्वयमित्यस्याग्निः अभितादेवेत्यस्यास्तृचस्य सविता भगभक्तस्येत्येषा भगदेवताका
वा। शिष्टा वारुण्यः। तथा चानुक्रांतं। कस्य पंचोनाजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातो वारुणं तु त्रैष्टुभमाद्ये काप्याग्नेय्यौ
सावित्रस्तृचो गायत्रश्चांत्या भागी वेति॥ राजसूयेभिषेचनीये दशपेये ... निवर्तनीये परिसमाप्ते सति एतदादिकं सप्तकं अभिषिक्तस्य पु
त्रादिभिः परिवृतस्य राज्ञः पुरस्ताद्धोत्रा आख्यातव्यं। तथा च सूत्रेऽभिहितं संस्थितेऽमरवनीये दक्षिणत आहवनीयस्य हिरण्यकशि
पावासीनोऽभिषिक्ताय पुत्रामात्यपरिवृताय राज्ञे शौनःशेपमाचक्षीतेति। आख्यानं च भवति तदेतत्सर्वं कुंतापगाथं शौनःशेपमाख्या
नं तत्र होता राज्ञेऽभिषिक्ताय आचष्टे हिरण्यकशिपावासीन आचष्टे हिरण्यकशिपावासीनः वासीनः प्रतिगृणातीति॥ ॥तस्मिन्सूक्ते
प्रथमामृचमाह॥ कस्य नेत्यस्य च शुनःशेपो यूपे बद्धः कांचिद्देवतां कं देवमुपधावानीति विचिकित्सति तथा चाम्नायते॥ हंतारं देव
तामुपधावामीति स प्रजापतिमेव प्रथमं देवतानामुपससारेति॥ वयं शुनःशेपनामका अमृतानां देवानां मध्ये कतमस्य कितिजातीयस्य
ना दिकस्य देवस्य चारु शोभनं नाम मनामहे उच्चारयामः। को देवो मामुमुक्षुं पुनरपि मह्यं मह्यै अदितये पृथिव्यै दात् दद्यात् तेन दानेनाहमस्य
तः सन् पितरं च मातरं दृशेयं पश्येयं को ह वै नाम प्रजापतिरिति श्रुतेः कस्येति शब्दसामान्यादनया प्रजापतिरेवोपसृत इति ग
म्यते कतमस्य किंशब्दात् बहूनां जातिपरिप्रश्ने डतमच् चित इत्यंतोदात्तत्वं॥ अमृतानां नञ् सुसाभ्यामित्युत्तरपदांतोदात्तत्वप्राप्ते
न ओऽन्तरमित्रमता इत्युत्तरपदाद्युदात्तत्वं। मनामहे। मनः शनिव्यत्ययेन श्नापपाद्यादित्वादनिघातः। मह्यै उदात्तयणो हल्पूर्वादिति
विभक्तेरुदात्तत्वं। दात्। गातिस्थेति सिचो लुक्। बहुलं छंदस्यमाङ्योगेपीत्यडभावः। दृशेयं दृशिर् प्रेक्षणे आशीर्लिङि मिपोमह
द्वेर्यगस्य इत्यमिति अङ्प्रत्ययः। आपाप वादः किंवाल्लघूपधगुणाभावः। लिङ्याशिष्यङित्यङि ऋदृशोऽङि गुण इति भावः गु
णः स्यात्। यासुट् सुलोपः। अतो येयः आ ह्रुणाः यासुटः स्वरेणेकार उदात्तः। मातरं चेत्यत्र च शब्दात्। दृशेयमित्यनुषज्यते॥ अत
स्तदपेक्षया चो वातिङ्विभक्तिः प्रथमेति वा योगे प्रथमेति न निहन्यते॥ ॥द्वितीयामृचमाह॥ अग्नेर्वयं प्रथमस्यामृतानां मना
महे चारु देवस्य नाम॥ स नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च॥ इत्थं प्रथमया चा विचिकित्सां कृत्वा प्रजापतेः सकाशा
त् देवमग्निं निश्चित्य अनया तुष्टाव तथा च श्रूयते। तं प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति सोऽग्निमुपससारा
ग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चेति। पूर्ववद्योजना। दात् दद्यात् दृशेयं पश्यानीत्येवमाद्याः परत्वेन पठितुं। योऽयं॥ ७॥

प्रथमे छंदोमे वैश्वदेवशस्त्रे अभि त्वा देव सवितरिति सावित्रस्तृचः सूक्तमुखीयः। अथ छंदोमा इति खंडे अभि त्वा देव सवितः प्रेतां यज्ञस्य शंभुवेति सू
भा०प्र० त्रितं। अभि त्वेत्येषा अग्निमंथने विनियुक्ता॥ प्रातर्वैश्वदेव्यामिति खंडे अभि त्वा देव सवितर्मही द्यौः पृथिवी च न इति सूत्रितं। श्रूयते च अभि त्वा
देव सवितरिति सावित्रीमन्वाहेति। तथात्र वसतीवर्य्येष्ये विनियुक्ता। अथो नर इति खंडे अभि त्वा देव सवितः समीवत्सं न मातृभिरिति सूत्रितम्।
६३ तथा ग्रावस्तोत्रेपि एतन्निक्का ग्रावस्तुदिति खंडे मध्यमस्वरेण इंसवनमभि त्वा देव सवितरिति सूत्रितं। ॥ तामेतां सकेतृतीयामृचमाह॥
अभि त्वा देव सवितरीशानं वार्याणां। सदावन्भागमीमहे॥ अथाग्निना प्रेरितः सन् सवितारमभि त्वेत्यनेन तृचेन प्रार्थयते। तथैव च श्रूयते
तमग्निरुवाच सविता वै प्रसवानामीशे तमेवोपधावेति स सवितारमुपससाराभि त्वा देव सवितरित्येतेन तृचेनेति। हे सदावन् सदा सर्वदार
क्षक हे सवितर्देव वार्याणां वरणीयानां धनानामीशानं ईश ऐश्वर्ये। लटः शानच्। तास्यनुदात्तेदिति लसार्वधातुकानुदात्तत्वे धातुस्वरः। वार्याणां
वृञ् संभक्तौ। ऋहलोर्ण्यत्। ईडवंदेत्यादिना आद्युदात्तत्वं। भज भागं। सदावन् आमंत्रितनिघातः। भागं कर्मणि घञ् इति घञो ञित्वादाद्युदात्तः॥ ॥चतुर्थीमृच
माह॥ यश्चिद्धि त इत्था भगः शशमानः पुरा निदः॥ अद्वेषो हस्तयोर्दधे॥ हे सवितर्यो भगो भजनीयो धनविशेषस्ते तव हस्तयोर्दधे धृतो
भूत धनविशेषं दधे इति पूर्वत्रान्वयः॥ चिच्छब्दः पूजार्थः हिशब्दः प्रसिद्धौ धनस्य पूज्यत्वप्रसिद्धिं द्योतयति। इत्था शशमानः अनेन प्रका
रेण शस्यमानः स्तूयमानः धनस्तुतिप्रकारं सर्वजनीनं तेनस्तुत्यः धने चौरैरपहृते सति चौरैर्गृहीतं धनं सर्वो लोको निंदति ईदृश इति। अतो धनस्तु
तिर्न नियतेत्याशयमाह॥ निदः पुरा अद्वेषः निंदायाः पूर्वस्मिन्काले चौरेणापहृते सति तदानीं द्वेषरहितः तस्मात्स्वकीयत्वाभिप्रायेण स्तूयमानत्व
मुक्तमित्यर्थः। इत्थं प्रकारवचने इदमस्थमुः। सुपां सुलुगिति व्यत्ययेन विभक्तेर्डादेशः डित्वात्टिलोपः उदात्तनिवृत्तिस्वरेण आकार उदात्तः। शशमानः शशप्लुत
गतौ। इह स्तुत्यर्थः॥ ताच्छील्यवयोवचनशक्तिषु चानश्। ताच्छीलिकश्चानश्। कर्तरि शप्। चित इत्यन्तोदात्तत्वं। णिदः णिदि कुत्सायां। संपदादिलक्षणः क्विप्। सा
वेकाच इति पंचम्या उदात्तत्वं॥ अद्वेषः न विद्यते द्वेषो यस्येति बहुव्रीहौ। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥ दध कर्मणि लिट् तस्य आर्धधातुकत्वे
न अभ्यस्तानामादिरित्याद्युदात्तो न भवति॥ प्रत्ययस्वर एव शिष्यते॥ यद्वृत्तयोगान्निघाताभावः॥ ॥ पंचमीमृचमाह॥ भगभक्तस्य ते वयमु
दशेम तवावसा॥ मूर्धानं राय आरभे॥ हे सवितः त्वदीया वयं शुनःशेपनामानः भगभक्तस्य धनेन संयुक्तस्य तवावसा रक्षणेन उदशेम उ
त्कर्षेण व्याप्नुमः॥ किं कर्तुं। रायो धनस्य मूर्धानमुत्कर्षमारभे आरब्धुं धनिकत्वप्रसिद्धिमाप्याप्नुयामेत्यर्थः॥ भगशब्दो वृषादिकत्वादाद्युदात्तः
तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। अशेम। अश व्याप्तौ लिङि व्यत्ययेन परस्मैपदं शप् शयः उदात्तत्वं। आरभे कृत्यार्थे
तवैकेनकेन्यत्वन इति तुमर्थे केन्प्रत्ययः नित्स्वरेणाद्युदात्तत्वं॥ ॥इति प्रथमस्य द्वितीये त्रयोदशो वर्गः॥ ॥षष्ठीमृचमाह॥ नहि ते क्षत्रं
न सहो न मन्युं वयश्चनामी पतयंत आपुः॥ नेमा आपो अनिमिषं चरंतीर्न ये वातस्य प्रमिनंत्यभ्वं॥ अथ सविता प्रेरितः शुनःशेप एत
दादिकेन सूक्तशेषेण वरुणं तुष्टाव तथा च श्रूयते॥ तं सवितोवाच वरुणाय वै राज्ञे नियुक्तोसि तमेवोपधावेति स वरुणं राजानमु ६३
पससारात उत्तराभिरेकत्रिंशतेति। हे वरुण पतयंतः प्रोड्डीयमानाः अमी दृश्यमानाः वयश्चन श्येनादयः पक्षिणोपि ते क्षत्रं त्वदीयं
शरीरबलं नापुः नैव प्राप्ताः॥ त्वत्सदृशं शारीरबलं पक्षिणामपि नास्तीत्यर्थः। तथा सहः त्वदीयं पराक्रमं तत्सामर्थ्यमपि न प्रापुः

तथा मन्युं त्वदीयं कोपमपि न प्रापुः त्वयि क्रुद्धे सति सोढुमशक्यं का इत्यर्थः। अनिमिषं सर्वदा चरंतीः प्रवाहरूपेण गच्छंत्य आपः त्वदीयं बलं
न प्रापुः। वातस्य वायोर्ये गतिविशेषाः त्वदीयमभ्वं वेगं न प्रमिनंति न हिंसंति अतिक्रमं कर्तुं न शक्ता इत्यर्थः। नापि न प्रापुरिति पूर्वत्रान्वयः पतयं 125
तः पतनशीलाः चुरादिरदंतः। लटः शत्रादेशः गुणायादेशौ अनुपदेशात् लसार्वधातुकानुदात्तत्वे णिचः स्वरः। आपुः। आप्लृ व्याप्तौ लिटि द्विर्भावह
लादिशेषौ अत आदेरित्यात्वं॥ अत्र न सहो न मन्युमित्यादिभिरापुरित्यस्य संबंधात् तदपेक्षया प्राथम्यात् चादिलोपे विभाषेति प्रथमा तिङ् 1924
विभक्तिर्न निहन्यते॥ चरंतीः वा छंदसीति पूर्वसवर्णदीर्घः॥ प्रमिनंति मीञ् हिंसायां। क्र्यादिभ्यः श्ना। श्नाभ्यस्तयोरात इत्याकारलोपः। मी
नातेर्निगम इति ह्रस्वत्वं प्रत्ययस्वरः॥ तिङि चोदात्तवतीति गतिरनुदात्तः। यद्वृत्तयोगान्निघातः॥ ॥सप्तमीमृचमाह॥ अबुध्ने राजा वरुणो वनस्यो
र्ध्वं स्तूपं ददते पूतदक्षः॥ नीचीनाः स्थुरुपरि बुध्न एषामस्मे अंतर्निहिताः केतवः स्युः॥ पूतदक्षः शुद्धबलो वरुणो राजा अबुध्ने मूलरहिते अंतरिक्षे
ति वनं वननीयस्य तेजसः स्तूपं संघं ऊर्ध्वमुपरि देशे ददते धारयति। नीचीनाः स्थुः ऊर्ध्वदेशे वर्तमानस्य वरुणस्य रश्मय इत्यध्याहार्यम्।
तेषां यथा मूलमुपरि तिष्ठंति एषां रश्मीनां बुध्नो मूलं उपरि तिष्ठंतीति शेषः। तथासति केतवः प्रज्ञापकाः प्राणाः अस्मे अस्मास्वंतर्निहिताः स्थापिताः
स्युः मरणं भविष्यतीत्यर्थः। अबुध्ने न विद्यते बुध्नो मूलमस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। स्तूपं स्त्यै ष्ट्यै शब्दसंघातयोः। स्थुः
संप्रसारणमुच्चेति प्रत्ययः। तत्संनियोगेन यकारस्य संप्रसारणं परपूर्वत्वे उकारादेशश्च निदित्यनुवृत्तेराद्युदात्तत्वं। ददाति भौवादिकः। नीची
नाः निपूर्वादंचतेः ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। विभाषांचेरदिक्स्त्रियामिति स्वार्थे खः। आयनेयीत्यादिना तस्येनादे
शः। आद्युदात्तः उपदेशिवद्वचनं स्वरसिध्यर्थमिति वचनादीकार उदात्तः। अचः इत्याकारलोपे चाविति दीर्घत्वं। स्थुः गातिस्थेति सिचो लुक्। आत इति झेर्जुसादेशः। अस्य पदान्तादिति पररूपत्वं बहुलं छंदस्यमाङ्योगेपीत्यडभावः। अस्मे सुपां सुलुगिति सप्तम्याः शे आदेशः
निहिताः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। स्युः अस्तेर्लिङि श्नसोरल्लोपः॥ ॥अष्टमीमृचमाह॥ उरुं हि राजा वरुणश्चकार सूर्याय पंथा
मन्वेतवा उ॥ अपदे पादा प्रतिधातवेकरुतापवक्ता हृदयाविधश्चित्॥ वरुणो राजा सूर्याय सूर्यस्य पंथां मार्गमुरुं विस्तीर्णं चकार। हिशब्दः
प्रसिद्धौ उत्तरायणदक्षिणायनमार्गस्य विस्तारः प्रसिद्धः। किमर्थमनेनोरुत्वमिति तदुच्यते। अन्वेतवा उ अनुक्रमेण उदयास्तमयौ गंतुमेव
। तथा अपदे पादरहिते अंतरिक्षे पादा प्रतिधातवे पादौ प्रक्षेप्तुं अकः मार्गं कृतवान् पूर्वत्र स्वस्य मार्गः अत्र पादस्येति विशेषः। यद्वा अपदे
यूपबद्धं न मया गंतुमशक्ये प्रदेशे पादौ प्रक्षेप्तुमुपायं बंधविमोचनरूपं करोत्वित्यर्थः। उत अपि च हृदयाविधश्चित्। अस्मदीयवध
कस्य चोरस्य अपवक्ता अपवदिता निराकर्ता भवतु उकारश्चित्स्वरेण आकार उदात्तः द्विपदेति निघातप्रतिषेधः॥ पंथां। पथिमथ्यृभुक्षा
मात्। इति द्वितीयायामपि व्यत्ययेनात्वं॥ पथिन् आस्य पतस्त्रा चेति निप्रत्ययांतत्वेन अंतोदात्तत्वं प्राप्ते पथिमथोः सर्वनामस्थाने इत्याद्युदात्त
त्वं। अन्वेतवे अनुपूर्वादेतेस्तुमर्थे सेसेनिति तवेप्रत्ययः। तवै चांतश्च युगपदिति धातोरंतयोरुदात्तत्वं। पादा सुपां सुलुगित्याकारः। प्रतिधात
वे दधातेस्तुमर्थे तवेन्प्रत्ययः। तादौ च निति कृत्यतौ इति गतेः प्रकृतिस्वरत्वं। अकः करोतेश्छंदसि लुङ्लङ्लिट इति लङर्थे लुङ्। तस्य
तिप मंत्रे घसह्वरेत्यादिना च्लेर्लुक्। गुणो रपरत्वं। हल्ङ्याबिति लोपः। अडागमः। हृदयाविधः विध्यतेः क्विप्। नहिवृतीति पूर्वपदस्य दीर्घ

त्वं कृदुत्तरपदप्रकृतिस्वरत्वं ॥ ॥ नवमीमृचमाह ॥ शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु । बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः
प्र मुमुग्ध्यस्मत् ॥ हे राजन्वरुण ते तव शतं भिषजः बंधनिवारकाणि शतसंख्याकान्यौषधानि संति तेषु तव सुमतिरनुग्रहबुद्धिः उर्वी
विस्तीर्णा गंभीरा गांभीर्योपेता अस्तु ॥ निर्ऋतिमस्मदनिष्टकारिणीं निर्ऋतिं पापदेवतां पराचैः पराङ्मुखीं कृत्वा दूरे अस्मत्तो व्यवहितदेशे स्था
पयित्वा तां बाधस्व । कृतं चित् । अस्माभिरनुष्ठितमपि एनः पापं अस्मतः प्र मुमुग्धि प्रकर्षेण मुंच । तव स्तुत सुमतिः ॥ तादौ चेति पूर्वपदप्रकृतिस्वरत्वे
प्राप्ते मन्क्तिन्व्याख्यानेत्यादिना उत्तरपदांतोदात्तत्वं । संहितायां विसर्जनीयस्य सकारस्य युष्मत्तत्तक्षुःष्वंतःपादमिति षत्वं । बाधस्व । बाधृ विलोडने । अनुदात्तेत्
त्वादनुदात्तत्वं तिङ्श्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते ॥ निर्ऋतिं तादौ चेति गतेः प्रकृतिस्वरत्वं । मुमुग्धि मुच्लृ मोक्षणे बहुलं छंदसीति
श्लुः हुझल्भ्यो हेर्धिः तस्यापि वनङितां गुणाभावः चोः कुरिति कुत्वं ॥ ॥ दशमीमृचमाह ॥ अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चि
द्दिवेयुः । अदब्धानि वरुणस्य व्रतानि विचाकशच्चंद्रमा नक्तमेति ॥ अमी रात्रावस्माभिर्दृश्यमाना ऋक्षाः सप्तर्षयः तथा च वाजसनेयिन आम
नंति । ऋक्षा इति ह स्म वै पुरा सप्तर्षीनाचक्षते । यद्वा ऋक्षाः सर्वेपि नक्षत्रविशेषाः ऋक्षा स्तृभिरिति नक्षत्राणामिति यास्केनोक्तत्वात् । उच्चा उच्चै
रुपरि द्युप्रदेशे निहिताः संस्थापिता ये संति ते ऋक्षा नक्तं रात्रौ ददृश्रे सर्वैर्दृश्यंते दिवा अहनि कुह चिदीयुः क्वापि गच्छेयुः न दृश्यंत इत्यर्थः ॥ व
रुणस्य राज्ञो व्रतानि कर्माणि नक्षत्रस्त्रीनाशिकर्माणि अदब्धानि केनाप्यहिंसितानि । किंच वरुणस्याज्ञयैव चंद्रमा नक्तं रात्रौ विचाकशद्विशेषेण दी
प्यमान एति गच्छति निहितासः । आज्जसेरसुक् थाथादिस्वरेणोत्तरपदांतोदात्तत्वे प्राप्ते गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । ददृश्रे । दृशिर्लिटि इरयो
रे इति रे आदेशः व्यत्ययेनाद्युदात्तत्वम् ॥ यद्वृत्तयोगादनिघातः । कुह । वा ह च छंदसीति किमो ह प्रत्ययः कुतिहोरिति किमः कु आदे
शः स्थानिवद्भावाल्लित्स्वरेणाद्युदात्तत्वं । विचाकशत् । काशृ दीप्तौ यङ्लुगंताच्छतृप्रत्ययः ॥ अभ्यस्तानामादिरित्याद्युदात्तत्वे समासस्वरः यङ्लुका
शतेर्वा व्यत्ययेनोपधाह्रस्वत्वं ॥ चंद्रमाः चंद्रे मो डिदिति असि प्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं ॥
॥ इति प्रथमस्य द्वितीये चतुर्दशो वर्गः ॥ ॥ ७ ॥ एकादशिनस्य वारुणस्य पशोर्वपापुरोडाशयोस्तत्त्वा यामीति द्वे ऋचौ याज्ये सूत्रितं च तत्त्वा यामि
ब्रह्मणा वंदमान इति द्वे असून्मा धामानि वरुणप्रघासेषु वारुणस्य हविषो याज्यानुवाक्ये तत्त्वा यामीत्येषा पंचम्यां पौर्णमास्यामित्यत्र सूत्रितं । इमं मे व
रुण श्रुधि तत्त्वा यामि ब्रह्मणा वंदमान इति ॥ ॥ तामेतां सूक्ते एकादशीमृचमाह ॥ तत्त्वा यामि ब्रह्मणा वंदमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ॥ हे वरुण शुनःशेपः त्वां प्रति तदायुर्यामि याचे कीदृशः ब्रह्मणा प्रौढेन स्तोत्रेण वंद
मानः स्तुवन् सर्वत्र यजमानोपि हविर्भिस्तदायुराशास्ते प्रार्थयते त्वं चेह कर्मणि अहेळमानः अनादरमकुर्वन् बोध अस्मदपेक्षि
तं बुध्यस्व हे उरुशंस बहुभिः स्तुत्य नोस्मदीयमायुः मा प्र मोषीः प्रमुषितं मा कुरु ॥ [illegible] मीति
पठितं ॥ यमोत्र लोपः छांदसः । अहेळमानः हेड अनादरे अदुपदेशात् लसार्वधातुकानुदात्तत्वे शपश्च पित्त्वादनुदात्तत्वे सति धातु ६४
स्वरः शिष्यते ॥ नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ बोधि बुध अवगमने लोटः सेर्हिः बहुलं छंदसीति विकरणस्य लु
क् बाहुलकात्सेर्हि पित्त्वाभावेन ङित्त्वाभावाल्लघूपधगुणः हुझल्भ्यो हेर्धिरिति हेर्धिरादेशः धातोरंत्यलोपः छांदसः मोषीः मुष

स्तेये लोडर्थे छांदसो लुङ् बहुलं छंदसीति प्राप्तस्याः इधेर्नेटीति प्रतिषेधे सति लघूपधगुणः बहुलं छंदस्यमाङ्योगेपीत्यडभावः ॥ ॥
द्वादशीमृचमाह ॥ तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आ वि चष्टे । शुनःशेपो यमह्वद्गृभीतः सो अस्मान्राजा वरुणो मुमो
क्तु ॥ तदित् तदेव वरुणविषयं स्तोत्रं नक्तं रात्रौ मह्यं शुनःशेपाय आहुः कथयंत्यभिज्ञाः कथयंति तथा दिवापि तदेवाहुः
हृदये मदीयमानसे निष्पन्नोयं केतः प्रज्ञाविशेषोपि तदेव कर्तव्यत्वेनाभिमतं सर्वतो विशेषेण प्रकाशयति गृभीतः गृहीतो यूपे बाध
रूपपाशेन बद्धोजनः यं वरुणमह्वत् आहूतवान् स च वरुणो राजा अस्मान् शुनःशेपान् मुमोक्तु बंधान्मुक्तं करोतु ॥ मह्यं । ऊर्ध्वं चेत्या
द्युदात्तत्वं । आहुः ब्रुवः पंचानामिति ब्रुवो लटि झेरुसादेशः धातोराहादेशश्च हृदः पदन्नित्यादिना हृदयशब्दस्य हृदादेशः उदीर्
पदाद्यादीति पंचम्या उदात्तत्वं ॥ शुनःशेपः शुन इव शेपो यस्येति समासे शुनःशेप पुच्छलांगूलेषु शुनः संज्ञायामिति षष्ठ्या अलुग्वक्तव्य इत्यलुक्
॥ पूर्वपदस्य प्रकृतिस्वरत्वे प्राप्ते उभे वनस्पत्यादिषु युगपदिति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं । अह्वत् । ह्वेञ् स्पर्धायां लिपिसिचिह्वश्चेति च्लेरङादेशः
आतो लोप इटि चेत्याकारलोपः । अडागमः उदात्तः यद्वृत्तयोगादनिघातः गृभीतः हृग्रहोर्भ इति भत्वं ॥ सो अस्मान् प्रकृत्यांतःपादमिति प्रकृति
भावः मुमोक्तु बहुलं छंदसीति विकरणस्य श्लुः ॥ ॥ त्रयोदशीमृचमाह ॥ शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ॥ अवैनं राजा वरुणः
ससृज्याद्विद्वाँ अदब्धो वि मुमोक्तु पाशान् ॥ गृभीतो बंधनाय गृहीतः त्रिसंख्याकेषु द्रुपदेषु काष्ठमयस्य पादबंधविशेषेषु बद्धः शुनः
शेप आदित्यमदितेः पुत्रं वरुणं अह्वत् आहूतवान् हि यस्मादेवं तस्मात् स वरुणो राजा एनं शुनःशेपमवससृज्यात् अवसृष्टं बंधनाद्विमुक्तं करोतु ।
विमोकप्रकारः स्पष्टीक्रियते । विद्वान् विमोकप्रकाराभिज्ञः अदब्धः केनाप्यहिंसितो वरुणः पाशान् बंधनरज्जुविशेषान् वि मुमोक्तु विश्लिष्टेनं मु
क्तं करोतु । त्रिषु पद्भ्यश्च चतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वं । संहितायां उदात्तस्वरितयोर्यण इति परआकारः स्वर्यते । ससृज्यात् सृज विसर्गे
प्रार्थनायां लिङ् बहुलं छंदसीति विकरणस्य श्लुः ॥ विद्वान् विदेः शतुर्वसुः उगिदचामिति नुम् हल्ङ्याब्भ्य इति संयोगांतलोपो संहिता
यां दीर्घादटि समानपाद इति नकारस्य रुत्वं । आतोटि नित्यमिति सानुनासिक आकारः । अदब्धः दंभु दंभने निष्ठायां अनिदितामिति नलोप उ
पसर्गाद्धो धः इति धत्वं । अव्ययपूर्वपदप्रकृतिस्वरत्वं । अवभृथे अव ते हेळ इति द्वे ऋचौ वारुणस्य हविषो याज्यानुवाक्ये पत्नीसंयाजेष्वा
तं तस्य दस्सूत्रितं । अव ते हेळो वरुण नमोभिरिति द्वे इति तयोराद्यां सूक्ते चतुर्दशीमृचमाह ॥ ॥ अव ते हेळो वरुण नमोभिरव यज्ञेभिरीम
हे हविर्भिः ॥ क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि ॥ हे वरुण ते तव हेळः क्रोधं नमोभिः नमस्कारैः अव ईमहे अवनयामः
हे असुर अनिष्टक्षेपणशील प्रचेतः प्रकर्षेण प्रज्ञायुक्त राजन् दीप्यमान वरुण अस्मभ्यमस्मदर्थं क्षयन् अस्मिन् कर्मणि निवसन् कृतान्य
स्माभिरनुष्ठितानि एनांसि पापानि शिश्रथः श्रथितानि शिथिलानि कुरु । हेळः असुनादिस्वरेणाद्युदात्तत्वं । यज्ञेभिः बहुलं छंदसीत्यैसभावः
ईमहे । ईङ् गतौ विकरणस्य लुक् क्षयन् क्षि निवासगत्योः शपो व्यत्ययेन श्नः आमंत्रितत्वान्निघातः । शिश्रथः श्रथ शैथिल्ये
नादित्वं छांदसं लुङि णिश्रिद्रुस्रुभ्य इति च्लेः चङ् [illegible] शिश्रथः श्रथ दीर्घं लघु
यद्डभावः ॥ ॥ पंचदशीमृचमाह ॥ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ॥ अथा वयमादित्य व्रते तवानागसो अ

127
1924

भा॰ प्र॰ दितये स्याम॥ हे वरुण उदुत्तमं मुमुग्धि शिरसि बद्धं पाशं अस्मत्तः ऊर्ध्वमुत्कृष्य शिथिलं कुरु। अधमं निकृष्टं पादे बद्धं पाशं अवश्रथय अव
ताय शिथिलं कुरु मध्यमं नाभिप्रदेशगं पाशं विश्रथय वियुज्य शिथिलं कुरु॥ अथानंतरं आदित्य अदितेः पुत्र वयं वरुण शुनःशेपाः तव
व्रते त्वदीये कर्मणि अदितये खंडनराहित्याय अनागसो अपराधरहिताः स्याम भवेम। उत्तमं। तमपः पित्वादनुदात्तत्वेन आद्युदात्तत्वे प्राप्ते उत्त
६५ मशब्दस्तु मो सर्वत्र त्विकं छादिषु पाठादंतोदात्तत्वं॥ अश्रथय श्रथ दौर्बल्ये संहितायां छंदसो दीर्घः॥ तवयुष्मदस्मदोर्ङसीत्याद्युदात्तत्वम्।
अनागसः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ नञ्सुभ्यामिति तु व्यत्ययेन न प्रवर्तते। यद्वा आगसः आत् अस्मायामेधेति मत्वर्थीयो
विनिः तस्यात् अतो लुगिति लुप् नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥ इति प्रथमस्य द्वितीये पंचदशो वर्गः॥ यच्चिद्धित्येक
विंशत्यृचस्य द्वितीयं सूक्तं॥ तथा चानुक्रांतं॥ यच्चिदेकेति। ऋषिश्चान्यस्मादिति परिभाषया शुनःशेप एव ऋषिः। आद्या गायत्रमिति परिभाषित
त्वात् गायत्री छंदः॥ वारुणं त्विति पूर्वोक्तत्वात् तु ह्यादि परिभाषया वरुणो देवता विनियोग उक्तः शौनःशेपाख्याने। विशेषविनियोगस्तु अभिप्लव
षडहे इदं सूक्तं होत्रकशंसे स्तोमरक्षिनिमित्तमावापार्थं अभिप्लवषळहस्याहानीति खंडे तथैव सूत्रितं। यच्चिद्धि ते विश इति वारुणमेतस्य तृ
चमावपेत मैत्रावरुण इति॥ ॥तत्र प्रथमामृचमाह॥ यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतं॥ मिनीमसि द्यविद्यवि॥ हे वरुण यथा लो
के विशः प्रजाः कदाचित् प्रमादं कुर्वंति तथा वयमपि ते तव संबंधि यच्चिद्धि यद्यपि व्रतं कर्म द्यवि द्यवि प्रतिदिनं प्रमिनीमसि प्र
मादेन हिंसितवंतः तत् अपि व्रतं प्रमादपरिहारेण सांगं कुर्विति शेषः यथाक्षिस्वरेणाद्युदात्तत्वे प्राप्ते यथेति थाल्ंत इति सर्वानुदात्तत्वं मिनीम
सि मीञ् हिंसायां इदंतो मसि। क्र्यादिभ्यः श्ना मीनातेर्निगम इति ह्रस्वं। ई हल्यघोरितीकारः। सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति
वचनात् इह एव स्वरः शिष्यते। यद्वृत्तयोगान्निघाताभावः॥ ॥द्वितीयामृचमाह॥ मा नो वधाय हत्नवे जिहीळानस्य रीरधः॥ मा हृणानस्य म
न्यवे। हे वरुण जिहीळानस्य अनादरं कृतवतः हत्नवे हंतुः पापिहननशीलस्य तव संबंधिने वधाय वधायनो अस्मान् मा रीरधः सं
सिद्धान् विषयभूतान् मा कुरु हृणानस्य हृणीयमानस्य क्रुद्धस्य तव मन्यवे क्रोधाय मा अस्मान् रीरधः॥ वधाय हनश्च वध इति अप् तो वधस्रा
देशः। उञ्छादिषु पाठादंतोदात्तः॥ हत्नवे हन हिंसागत्योः सृहनिभ्यां क्त्नुरिति क्त्नुप्रत्ययः। धातोर्नकारस्य तकारः। जिहीळानस्य हेड अनादरे अस्मा लि
टः कानच् द्विर्भावहलादिशेषः ह्रस्वः चुत्वं जश्त्वानि एकारस्य इकारादेशः। सिर्छंदसः चित इत्यंतोदात्तत्वं। रीरधः राध संसिद्धौ णिचि लुङि णिलोप
उपधाह्रस्वत्वं द्विर्वचनहलादिशेषः ह्रस्वः सन्वद्भावेत्वाभ्यासदीर्घाः नमाङ्योग इत्यडभावः। हृणानस्य हृणीङ् लज्जायां अस्मात् शानचि व्य
त्ययादृशादित्वाद्भिमतरूपसिद्धिः॥ ॥ तृतीयामृचमाह॥ वि मृळीकाय ते मनो रथीरश्वं न संदितं॥ गीर्भिर्वरुण सीमहि॥ हे वरुण मृळीकाय अ
स्मत्सुखाय ते तव मनो गीर्भिः स्तुतिभिः विसीमहि विशेषेण बध्नीमः प्रसादयाम इत्यर्थः। तत्र दृष्टांतः रथी रथस्वामी संदितं सम्यक् खंडितं
दूरगमनेन श्रांतं अश्वं न अश्वमिव यथा स्वामी श्रांतमश्वं घासप्रदानादिना प्रसादयति तद्वत्। रथी मत्वर्थीय ईकारः। संदितं शोऽवखंडने नि ६५
ष्ठतिक्तः॥ द्यतिस्यतिमास्थामित्तिकितीत्यादेशः॥ गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। गीर्भिः सावेकाच इति भिस उदात्तत्वं। सीमहि षिञ् बंधने तुस
तानस्य व्यत्ययेनात्मनेपदं। बहुलं छंदसीति विकरणस्य लुक् वलिलोपः। यद्वा षिञ् बंधने॥ उत्तरमादिकरणस्य तु कृदीर्घश्छांदसः॥ ॥७॥

॥ ॥चतुर्थीमृचमाह॥ परा हि मे विमन्यवः पतंति वस्यइष्टये॥ वयो न वसतीरुप॥ हे वरुण मे मम शुनःशेपस्य विमन्यवः क्रोधरहिताः बुद्धयः वस्य
इष्टये वसीयसः अतिशयेन वसुमतो जीवनस्य प्राप्तये परा पतंति पराङ्मुखाः पुनरावृत्तिरहिताः प्रसरंति हि शब्दः प्रसिद्ध्यर्थः सर्वजनप्रसिद्धमादृ
परापतने दृष्टांतः॥ वयो न पक्षिणो यथा वसतीर्निवासस्थानानि उपसमीप्येन प्राप्नुवंति तद्वत्। पतंति पादादित्वान्निघाताभावः॥ वस्यइष्टये॥ 129
वसुमच्छब्दादिष्ठनि विन्मतोर्लुगिति मतुपो लुक् टिलोपे ईयसुनो यकारलोपः छांदसः वसतीः शतुरनुम इति ङीप उदात्तत्वं॥ ॥पंचमीमृचमाह॥ कदा 1924
क्षत्रश्रियं नरमा वरुणं करामहे॥ मृळीकायोरुचक्षसं॥ मृळीकाय अस्मत्सुखाय वरुणं कदा कस्मिन्काले आ करामहे अस्मिन्कर्मण्यागतं करवा
म। कीदृशं क्षत्रश्रियं बलसेविनं। नरं नेतारं उरुचक्षसं बहूनां द्रष्टारं क्षत्रश्रियं क्षत्राणि श्रयतीति क्षत्रश्रीः क्विप्वचीत्यादिना क्विप् दीर्घश्च
कृदुत्तरपदप्रकृतिस्वरत्वं। नरं स्टोरबिति अबंत आद्युदात्तः॥ करामहे करोतेर्व्यत्ययेन शप्। उरुचक्षसं चक्षेर्बहुलं शिच्चेत्यसुन् शिद्भाव
ख्या आदेशाभावः॥ इति प्रथमस्य द्वितीये षोडशो वर्गः॥ ॥षष्ठीमृचमाह॥ तदित्समानमाशाते वेनंता न प्र युच्छतः॥ धृतव्रताय दाशुषे॥ धृत
व्रताय अनुष्ठितकर्मणे दाशुषे हविर्दत्तवते यजमानाय वेनंतौ कामयमानौ मित्रावरुणाविति शेषः। तौ उभौ समानं साधारणं तदित् अस्माभि
र्दत्तं हविः आशाते अश्नुवाते न प्रयुच्छतः कदाचिदपि प्रमादं न कुरुतः॥ आशाते अश्नोतेर्लिटि द्विर्भावहलादिशेषौ अत आदेरित्यात्वं अनित्य
मागमशासनमिति वचनात् अश्नोतेश्चेति नुडभावः। वेनंता वेनतिः कांतिकर्मा। सुपां सुलुगित्याकारः। प्रयुच्छतः युछ प्रमादे दाशुषे दाशृ दाने इत्यस्मात्
दाश्वान्साह्वान्मीढ्वांश्चेति क्वसुप्रत्ययो निपातितः वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं॥ ॥सप्तमीमृचमाह॥ वेदा यो वीनां प
दमंतरिक्षेण पततां॥ वेद नावः समुद्रियः॥ अंतरिक्षेण पततां आकाशमार्गेण गच्छतां वीनां पक्षिणां पदं यो वरुणो वेद। तथा समुद्रे अवस्थितो वरु
णः नावो जले गच्छत्याः पदं वेद जानाति सोऽस्मान् बंधनान्मोचयत्विति शेषः। वेद विद ज्ञाने विदो लटो वेति णल् लित्स्वरेणाद्युदात्तत्वं। द्व्यचो
ऽतस्तिङ इति संहितायां दीर्घः॥ वीनां नामन्यतरस्यामिति नाम उदात्तत्वं॥ पततां शपः पित्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण। धातुस्वरः
नावः सावेकाच इति षष्ठ्या उदात्तत्वं। समुद्रियः भवार्थे समुद्राभ्राद्घ इति घप्रत्ययः॥ ॥अष्टमीमृचमाह॥ वेद मासो धृतव्रतो द्वादश प्रजावतः॥ वे
दा य उपजायते॥ धृतव्रतः स्वीकृतकर्मविशेषः यथोक्तमहिमोपेतो वरुणः प्रजावतः तदा तदा उत्पद्यमानप्रजायुक्तान् द्वादश मासः चैत्रादीन्
फाल्गुनांतान् वेद जानाति। यस्त्रयोदशोऽधिकमास उपजायते संवत्सरसमीपे स्वयमेवोत्पद्यते तमपि वेद यावस्त्रशेषः पूर्ववत्। मासः इदिदंमिति
द्यास उदात्तत्वं। द्वादश द्वौ च दश चेति द्वंद्वः द्व्यष्टनः संख्यायामित्यात्वं। संख्येति सूत्रेण पूर्वपदप्रकृतिस्वरत्वं। प्रजाः एषां संतीति तदस्यास्त्यस्मिं
निति मतुप् मादुपधाया इति मतुपो वत्वं। उपजायते जनेः कर्मकर्तरि लिट् कर्मवद्भावादात्मनेपदं यक् जनादीनां उपदेशवत्त्वं। वक्त्यमिति
वचनादचः कर्तृयकीत्याद्युदात्तत्वं॥ तिङि चोदात्तवतीत्युपसर्गस्य निघातः। न च तिङ्तिङ इति निघातः यद्वृत्तान्नित्यमिति प्रतिषेधात्॥ ॥
नवमीमृचमाह॥ वेद वातस्य वर्तनिमुरोर्ऋष्वस्य बृहतः॥ वेद ये अध्यासते॥ उरोर्विस्तीर्णस्य ऋष्वस्य दर्शनीयस्य बृहतो गुणैरधिकस्य
वातस्य वायोर्वर्तनिं मार्गं वेद वरुणो जानाति ये देवाः अध्यासते उपरि तिष्ठंति तानपि वेद जानाति। वातस्य असिहसीत्यादिना तन्प्रत्यया
न्तो वातशब्दो नित्वादाद्युदात्तः॥ वर्तनिं वर्तते अनेनेति वर्तनिः स्तोत्रे इति स्तोत्रवाचकस्य वर्तनीशब्दस्य अंतोदात्तत्वसिध्यर्थं मुंछादिषु पाठात् अ

स्यप्रत्ययस्वरेण मध्योदात्तत्वे प्राप्ते व्यत्ययेनांतोदात्तत्वं। बृहतः बृहन्महतोरुपसंख्यानमिति ङस उदात्तत्वं। अध्यासते लसार्वधातुकानुदात्तत्वे सति धा
भा॰ प॰ तुस्वरः॥ ॥दशमीमृचमाह॥ नि षसाद धृतव्रतो वरुणः पस्त्यास्वा॥ साम्राज्याय सुक्रतुः॥ धृतव्रतः पूर्वोक्तो वरुणः पस्त्यासु दैवीषु प्रजासु आ
६६ निषसाद आगत्य निषण्णवान् किमर्थं प्रजानां साम्राज्यसिद्ध्यर्थं सुक्रतुः शोभनकर्मा निषसाद। सदिरप्रतेरिति षत्वं। साम्राज्याय सम्राजो भावः
साम्राज्यं गुणवचनब्राह्मणादिभ्य इति ष्यञ् ञित्यादिर्नित्यमित्याद्युदात्तत्वं सुक्रतुः क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं॥ ॥इति प्रथमस्य द्वितीये
सप्तदशो वर्गः॥ ॥एकादशीमृचमाह॥ ॥अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति॥ कृतानि या च कर्त्वा॥ अतः अस्माद्वरुणाद्धेतोः विश्वान्यद्भुतानि सर्वाण्या
श्चर्याणि चिकित्वान् प्रज्ञावान् अभिपश्यति सर्वतोऽवलोकयति। या कृतानि यान्याश्चर्याणि पूर्वं वरुणेन संपादितानि च कर्त्वा कर्त्तव्यानि यान्याश्चर्याणि कर्त्वा इतः
परं कर्त्तव्यानि सर्वाण्यभि पश्यतीति पूर्वेणान्वयः। अद्भुता। शेश्छंदसि बहुलमिति शिलोपः प्रत्ययलक्षणेन नपुंसकस्य झलचः इति नुम् नलोपः। चिकि
त्वान् कित ज्ञाने लिटः क्वसुः अभ्यासहलादिशेषचुत्वानि वस्वेकाजाद्घसामिति नियमादिडभावः रुत्वानुनासिकानुस्वारौ संहितायां। पश्यति पाघ्रेत्या
दिना दृशेः पश्यादेशः। कर्त्वा कृत्यार्थे तवैकेनिति करोतेस्त्वन्। नित्वादाद्युदात्तत्वं पूर्ववच्छिलोपः॥ ॥द्वादशीमृचमाह॥ स नो विश्वाहा सुक्रतुरादित्यः
सुपथा करत्॥ प्र ण आयूंषि तारिषत्॥ सुक्रतुः शोभनप्रज्ञः स आदित्यो वरुणः विश्वाहा सर्वेष्वहःसु नो अस्मान् सुपथा शोभनमार्गेण सहितान् कु
रतु करोतु किंच नोऽस्माकमायूंषि प्रतारिषत् प्रवर्धयतु। सुपथा स्वती पूजायामिति समासेन पूजनादिति समासांतप्रतिषेधः अव्ययपूर्वपदप्रकृ
तिस्वरप्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। यद्वा तृतीयाया आकारादेशः अव्ययपूर्वपदप्रकृतिस्वरत्वं तिङ्स्वरेण बाध्यते। करत्
यश्चेत्येतं न भवति अयद्बहुव्रीहित्वात् बहुव्रीहौ हितद्धितं आद्युदात्तं च छंदसीत्येतदपि न भवति पाथिन्द्रास्यांतोदात्तत्वात्। करता कृ
रोतेर्लेटि व्यत्ययेन शप् शपो वा लुक् लेटोऽडाटावित्यडागमः इतश्च लोप इतीकारलोपः। यद्वा छांदसे लुङि कृमृदृरुहिभ्य इति च्लेरङ्। ऋदृशोऽङि गुण इति गुणः
बहुलं छंदस्यमाङ्योगेऽपीत्यडागमाभावः। प्रणः उपसर्गाद्बहुलमिति णत्वं। तारिषत् तारयतेर्लेट्यडागमः सिब्बहुलं लेटीति सिप् आदेश
प्रत्यययोरिति षत्वम्॥ ॥त्रयोदशीमृचमाह॥ बिभ्रद्द्रापिं हिरण्ययं वरुणो वस्त निर्णिजं॥ परि स्पशो नि षेदिरे॥ हिरण्मयं सुवर्णमयं द्रापिं कव
चं बिभ्रत् धारयन् वरुणो निर्णिजं पुष्टं शरीरं वस्त आच्छादयति स्पशः हिरण्यस्पर्शिनो रश्मयः परि नि षेदिरे सर्वतो निषण्णाः॥ बिभ्रत् बिभर्ते
श्शतरि नाभ्यस्ताच्छतुरिति नुमभावः। अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ द्रापिं। द्रा कुत्सायां गतौ। द्रापयतीति पिन् कुत्सितां गतिं प्रापयतीति द्रापिः
कृवनं अर्तिह्रीत्यादिना पुगागमः। औणादिक इप्रत्ययः णिलोपः। हिरण्ययं ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छंदसीति हिरण्यशब्दादुत्तरा
र्थे विधेयस्य मयटो मशब्दस्य लोपो निपातितः। वस्त वस आच्छादने लङि अदादित्वाच्छपो लुक् पूर्ववदडभावः। निर्णिजं णिजिर् शौचपोषणयोः
स्पशः स्पश बाधनस्पर्शनयोः क्विप् चेति क्विप्। नि षेदिरे षद्लृ विशरणगत्यवसादनेषु अस्माल्लिटि ... एत्वाभ्यासलोपौ सदि
रप्रतेरिति षत्वं॥ ॥चतुर्दशीमृचमाह॥ न यं दिप्संति दिप्सवो न द्रुह्वाणो जनानां॥ न देवमभिमातयः॥ दिप्सवो हिंसितुमिच्छंतो वैरिणः यं वरुणं न ६६
दिप्संति भीताः संतो हिंसितुमिच्छां परित्यजंति जनानां प्राणिनां द्रुह्वाणो द्रोग्धारो यं वरुणं प्रति न द्रुह्यंति। अभिमातयः पाप्मानः पाप्मा
नाभिमातिरिति श्रुतत्वात्। देवं वरुणं न स्पृशंति। दिप्संति दंभु दंभे॥ अस्मात्सनि सनीवंतर्ध इत्यादिना इडभावः। हलंताच्चेत्यत्र हल

ग्रहणस्य जातिवाचित्वात् सनः कित्वात् दंभ इच्चेति दकारात्परस्याकारस्येकारः अनिदितामिति नलोपः अभ्यासाभावः छांदसः अत्र लोपोऽभ्यास
स्येत्यभ्यासलोपः शपः। इपित्वादनुदात्तत्वं तिङश्च लसार्वधातुकस्वरेण सनो नित्वान्नित्स्वरेणाद्युदात्तत्वं यद्वृत्तयोगादनिघातः। दिप्सवः सनंताद्भिः 131
सनाशंसभिक्ष उरिति उप्रत्ययः प्रत्ययस्वरः। द्रुह्वाणः द्रुह जिघांसायां अन्येभ्योऽपि दृश्यंत इति क्वनिप्प्रत्ययस्य पित्वादनुदात्तत्वे धातुस्वरेणा 1924
द्युदात्तत्वं॥ ॥पंचदशीमृचमाह॥ उत यो मानुषेष्वा यशश्चक्रे असाम्या॥ अस्माकमुदरेष्वा॥ उत अपि च यो वरुणो मानुषेषु यशोऽन्नं आ
चक्रे सर्वतः कृतवान् स वरुणः कुर्वन्नपि आ सर्वतः असामि संपूर्णं चक्रेण तदन्नं कृतवान्। किंच। अस्माकमुदरेषु आ सर्वतः चक्रे। मानुषे
षु मनोर्जातावञ्यतौ षुक् चेत्यञ् प्रत्ययः ञित्यादिर्नित्यमित्याद्युदात्तत्वं। चक्रे प्रत्ययस्वरः। असामि। अव्ययेन नञ्समासः अनिपातानामिति वक्तव्यमि
त्यव्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥इति प्रथमस्य द्वितीये अष्टादशो वर्गः॥ ॥षोडशीमृचमाह॥ परा मे यंति धीतयो गावो न गव्यूतीरनु॥ इच्छंती
रुरुचक्षसं॥ उरुचक्षसं बहुभिर्द्रष्टव्यं वरुणं इच्छंतीः मे धीतयः शुनःशेपस्य बुद्धयः परा यंति परायंति पराङ्मुखानि वृत्तिरहिता गच्छंति
तत्र दृष्टांतः गावो न यथा गावः गव्यूतीरनु गोष्ठानि अनुलक्ष्य गच्छंति तद्वत्। गव्यूतीः गावोऽत्र यंतीत्यधिकरणे क्तिन्। गोर्यूतौ छंद
सीति अवादेशः। दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वं। यद्वा यूतिर्यवनं गवां यवनं मत्रेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। इच्छंतीः इषु इ
च्छायां लटः शतृ तुदादिभ्यः शः इषुगमियमां छ इति छत्वं। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते॥ ॥सप्तदशीमृ
चमाह॥ सं नु वोचावहै पुनर्यतो मे मध्वाभृतं॥ होतेव क्षदसे प्रियं॥ यतो यस्मात्कारणात् मे मम जीवनार्थं मधुरं हविः आभृतं आंशः सवाक्य
कर्मणि संपादितं अतः कारणात् होतेव होमकर्त्तेव त्वमपि प्रियं हविः क्षदसे भक्षयसि पुनर्हविः स्वाहाकारादूर्ध्वं तत्पश्चात् जीवन्नहं त्वं च अनुभवथः
संवोचावहै संभाषावहै कृतार्थौ भवावहे इत्यर्थः। वोचावहै लुङि कृत्वोचः अस्यतिवक्तिख्यातिभ्योऽङ् इत्यङ्। वच उम् इति उमागमे गुणः अव्ययेन देत्वम्।
यद्वा लोट्यत्र वचुरादेशः स्थानिवद्भावादेत्वं। आभृतं हृग्रहोर्भः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥ ॥अष्टादशीमृचमाह॥ दर्शं नु विश्व
दर्शतं दर्शं रथमधि क्षमि॥ एता जुषत मे गिरः॥ विश्वदर्शतं सर्वैर्दर्शनीयमस्मदनुग्रहार्थमाविर्भूतं वरुणं अहं दर्शं दृष्टवान् खलु। क्षमि क्ष
मायां भूम्यां रथं वरुणसंबंधिनं अधि दर्शं आधिक्येन दृष्टवानस्मि। एता उच्यमाना मे गिरो मदीयाः स्तुतीः जुषत वरुणः सेवितवान्। दर्शं दृ
शिर् दर्शने इति लुङि कृमृदृरुहिभ्य इति च्लेरङ्। ऋदृशोऽङि गुण इति गुणः। विश्वदर्शतं दृशेर्भृमृदृशीत्यादिना अतच्प्रत्ययः। दर्शतशब्दः मरुद्वृधादित्वात् पूर्वपदां
तोदात्तत्वं। यद्वा विश्वं दर्शनीयमस्येति बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। क्षमि आतो धातोरित्यत्र आत इति योगविभागा
दाकारलोपः। वरुणप्रघासेषु इमं मे वरुणेति वारुणस्य हविषो याज्यानुवाक्ये पौर्णमास्यामिति खंडे सूत्रितं। इमं मे वरुण श्रुधी तत्त्वा यामि
ब्रह्मणा वंदमान इति॥ ॥तामेतां सूक्तस्यैकोनविंशीमृचमाह॥ इमं मे वरुण श्रुधी हवमद्या च मृळय॥ त्वामवस्युरा चके॥ हे वरुण मदी
यमिमं हवमाह्वानं श्रुधि शृणु किंच। अद्यास्मिन् दिने मृळय अस्मान् सुखय अवस्युः रक्षणेच्छुरहं त्वां वरुणं अभिमुख्येन चके शब्दया
मि स्तौमीत्यर्थः। श्रुधि श्रुशृणुपॄकृवृभ्यश्छंदसीति हेर्धिरादेशः बहुलं छंदसीति विकरणस्य लुक् अन्येषामपि दृश्यत
इति संहितायां दीर्घः। अवस्युः अव रक्षणे असुन्। सुप आत्मनः क्यच् क्याच्छंदसीत्युप्रत्ययः। आचके। केपृ शब्दे अस्माल्लिटि आदेश्चेत्या

त्वं द्विर्भावश्चुत्वे आतो लोप इटि चेत्याकारलोपः तिङ्ङतिङ इति निघातः॥ ॥विंशीमृचमाह॥ त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि॥ स यामनि
प्रति श्रुधि॥ हे मेधिर मेधाविन् वरुण त्वं दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्यापि एवमात्मकस्य विश्वस्य सर्वस्य जगतो मध्ये राजसि दीप्यसे स
तादृशस्त्वं यामनि क्षेमप्रापणे अस्मदीये प्रति श्रुधि प्रतिश्रवणमाज्ञापनं कुरु॥ रक्षिष्यामीति प्रत्युत्तरं देहीत्यर्थः॥ दिवश्च उडिदमित्यादिना
षष्ठ्या उदात्तत्वं ग्मः ग्मेत्येतद्भूनामसु पठितं। अतो धातोरित्यत्र आत इति योगविभागादातो लोप इति प्रवृत्ते पथि पिथ्यत्ययेनाकारलोपः उदा
त्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। यामनि। या प्रापणे आतो मनिन्क्वनिब्वनिपश्चेति मनिन्। नित्वादाद्युदात्तत्वं। श्रुधि उक्तं॥ ॥एकविंशी
मृचमाह॥ उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत॥ अवाधमानि जीवसे॥ नोऽस्माकं उत्तमं शिरोगतं पाशं उदुन्मुमुग्धि उत्कृष्य मोचय। मध्य
मं उदरगतं पाशं विचृत वियुज्य नाशय। जीवितुं अधमानि पादगतानि पाशानि अवचृत अवकृष्य नाशय। उत्तमं उत्कादिपुपा
द्यंतोदात्तत्वं॥ मुमुग्धि मुचॢ मोक्षणे बहुलं छंदसीति विकरणस्य श्लुः द्विर्भावः हलादिशेषः हुझल्भ्यो हेर्धिरिति हेर्धित्वं तिङ्ङतिङ इति निघा
तः॥ चृत॥ चृती हिंसाग्रंथनयोः तुदादिभ्यः शः अतो हेरिति हेर्लुक् जीवसे जीव प्राणधारणे। तुमर्थे सेसेनिति असे प्रत्ययः प्रत्य
यस्वरः॥ ॥इति प्रथमस्य द्वितीये एकोनविंशो वर्गः॥ ॥वसिष्वेति दशर्चं तृतीयं सूक्तं अत्रानुक्रम्यते। वसिष्व दशाग्नेयं त्विति। शुनःशे
प ऋषिः गायत्री छंदः इदमुत्तरं च सूक्तमाग्नेयं प्रातरनुवाके आग्नेये क्रतौ गायत्रे छंदसि एतदादि सूक्तद्वयमनुक्तत्वं॥ तथा च सूत्रितं वसिष्वा ही
ति सूक्ते यो रजमामुदिरेति अग्निमन्थने प्रथमामृचमाह॥ ॥वसिष्वा हि मियेध्य वस्त्राण्यूर्जां पते॥ सेमं नो अध्वरं यज॥ वरुणेन अग्निस्तो
प्रेरितः शुनःशेप एतदादि सूक्तद्वयेनाग्निमस्तौत्। तथा चाम्नायते। तं वरुण उवाचाग्निर्वै देवानां मुखं हृदयतमस्तं नु स्तुह्यथ त्वोत्स्र
क्ष्याम इति सोऽग्निं तुष्टाव उत्तराभिर्द्वाविंशत्येति॥ हे मियेध्य मेध्य यज्ञस्य योग्य ऊर्जां पते अन्नानां पालक अग्ने वस्त्राणि आच्छा
दकानि तेजांसि वसिष्व आच्छादय प्रज्वलितस्तेजसा भवेत्यर्थः। यस्मात् प्रज्वलितः तस्मात्तादृशस्त्वं नोऽस्मदीयमिमं अध्वरं यज नि
ष्पादय। वसिष्व वस आच्छादने। लोटि थासः से सवाभ्यां वामौ छंदस्युभयथेत्यार्धधातुकत्वात् आर्धधातुकस्येड्वलादेरितीडागमः॥
ऌसार्वधातुकानुदात्तत्वे धातुस्वरः अन्येषामपि दृश्यत इति संहितायां दीर्घः॥ मियेध्य मकारेकारयोर्मध्ये इयागमः॥ छांदसः ऊ
र्जां पते सुबामंत्रिते पराङ्गवत्स्वर इति पराङ्गवद्भावात् षष्ठ्यामंत्रितस्य समुदायस्याष्टमिको निघातः॥ सेमं सोऽचि लोपे चेत्पादपूरणमिति सोर्लोपः॥ ॥
द्वितीयामृचमाह॥ नि नो होता वरेण्यः सदा यविष्ठ मन्मभिः॥ अग्ने दिवित्मता वचः॥ सदा यविष्ठ सर्वदा युवतम हे अग्ने वरेण्यो वरणी
यस्त्वं नोऽस्माकं होता होमनिष्पादको भूत्वा दिवित्मता दीप्तिमता वचो वचसा स्तूयमानः सन् नि षीदेति शेषः कीदृक्त्वं मन्मभिः तापिकेस्ते
ज्ञाभिर्युक्त इति शेषः। यविष्ठ युवन्शब्दादिष्ठनि स्थूलदूरेत्यादिना यणादिपरस्य लोपः पूर्वस्यो कारस्य गुणश्च अवादेशः आमंत्रितनि
घातः॥ मन्मभिः मननानि अन्येभ्योऽपि दृश्यंत इति मनिन्प्रत्ययः नित्वादाद्युदात्तत्वं॥ दिवित्मता दिवु क्रीडादौ इति धातुनिर्देश इ ६७
ति इक्प्रत्ययः॥ तेन च धातुवाचिना दिविशब्देन धात्वर्थो दीप्तिर्लक्ष्यते। यद्वा औणादिको भावे किप्रत्ययः दिविशब्दान्मतुप
तकारोपजनः छांदसः यद्वा वास्त्वकादिषु भावेऽतः॥ मतुपि तसौ मत्वर्थ इति भत्वाज्जश्त्वाभावः वचः सुपां सुलुगिति तृती

यैकवचनस्य लुक्॥ ॥तृतीयामृचमाह॥ आ हि ष्मा सूनवे पितापिर्यजत्यापये॥ सखा सख्ये वरेण्यः॥ हे अग्ने वरेण्यो वरणीयः पिता पितृस्थानीयस्त्वं
सूनवे पुत्रस्थानीयाय मह्यं अभीष्टं ददातीति शेषः॥ हि ष्मेति निपातद्वयसमर्थत्यमुमर्थमाचष्टे। अभिमतदाने दृष्टांतद्वयमुच्यते यथा आपिर्बंधु
रापये बंधवे आयजति हि स्म सर्वथा ददाति शेषः सखा प्रियः सख्ये प्रियाय मह्यं। अभीष्टं सर्वथा ददाति तथा त्वमपि देहि। स्मा सूनवे निपात
स्य चेति दीर्घः॥ तृतीयस्य सखा सख्ये इत्यत्राप्यनुषंगात् द्वयोः पादयोर्यथा इदं प्रथमेति चादिलोपे विभाषेति न निहन्यते॥ यद्वा हि चेति निघात
प्रतिषेधः सख्ये समानख्यः वा दान इति समि ख्याञ इण्प्रत्ययान्त आद्युदात्तः सपः पित्वादनुदात्तत्वे सण्वञिष्यते॥ ॥चतुर्थीमृचमाह॥ आ
नो बर्ही रिशादसो वरुणो मित्रो अर्यमा॥ सीदंतु मनुषो यथा॥ हे अग्ने वरुणादयो देवास्त्वद्बंधवस्त्वया प्रेरिताः रिशादसः हिंसकानत्तारः नो
ऽस्मदीयं बर्हिः यज्ञं आसीदंतु तत्र दृष्टांतः यथा मनुः प्रजापतेर्यज्ञमासादंति तद्वत्। बर्हिः रिशादसः विसर्जनीयस्य रत्वे रो रीति रेफलोपः ढ्रलो
पे पूर्वस्य दीर्घोऽण इति इकारस्य दीर्घत्वं रिशादसः रिश हिंसायामित्यतो रिशंति हिंसंतीति रिशः इगुपधज्ञाप्रीकिरः क इति कः तानदंतीति रिशादसः स
र्वधातुभ्योऽसुन् कृदुत्तरपदप्रकृतिस्वरत्वं। सीदंतु षद्लृ विशरणगत्यवसादनेषु। पाघ्रेत्यादिना सीदादेशः शपः पित्वादनुदात्तत्वं। तिङश्च लसार्व
धातुकस्वरेण धातुस्वरः शिष्यते॥ मनुषः मनते जानातीति मनुः प्रजापतिः जनेरुसिर्निर्दिश्यनुषः नैव हृलमन्यत्रापि औणादिक उसि
प्रत्ययः नित्वादाद्युदात्तत्वं॥ यथा यथेति पदांत इति सर्वानुदात्तत्वं॥ ॥पंचमीमृचमाह॥ पूर्व्य होतरस्य नो मंदस्व सख्यस्य च॥ इमा उ षु श्रुधी गि
रः॥ हे पूर्व्य अस्मात्पूर्वमुत्पन्न होतः होमनिष्पादकाग्ने नोऽस्मदीयस्यास्य प्रवर्तमानस्य यज्ञस्य सख्यस्य चास्मदनुग्रहस्य च सिद्ध्यर्थं मं
दस्व त्वं हृष्टो भव इमा अस्माभिः प्रयुज्यमाना गिरः उ षु स्तुतीरूपा वाचोऽपि शृणु॥ पूर्व्य आमंत्रिताद्युदात्तत्वं। होतरित्यस्य नामंत्रिते समा
नाधिकरण इति पूर्वस्याविद्यमानत्वादाष्टमिको निघातः॥ अस्य उडिदमिति षष्ठ्या उदात्तत्वं। मंदस्व मदि स्तुतिमोदमदस्वप्नकांतिगतिषु। शपः पि
त्वादनुदात्तत्वे तिङश्च लसार्वधातुकस्वरेण धातुस्वरः अपादादित्वात् युष्मदस्य दाष्टमिकनिघाताभावः सख्यस्य सख्युः कर्म सख्यं सख्युर्य इति य
प्रत्ययः यस्येति लोपे प्रत्ययस्वरः॥ उ षु सत्त इति षत्वं। श्रुधि श्रु श्रवणे श्रुशृणुपॄकृवृभ्यः छंदसीति हेर्धिरादेशः बहुलं छंदसीति श्नो लुक्
॥ ॥इति प्रथमस्य द्वितीये विंशो वर्गः॥ ॥षष्ठीमृचमाह॥ यच्चिद्धि शश्वता तना देवंदेवं यजामहे॥ त्वे इद्धूयते हविः॥ हे अग्ने यच्चिद्धि यद्य
पि शश्वता शाश्वतेन नित्येन तना विस्तृतेन हविषा देवंदेवं अन्यमन्यं वरुणेंद्रादिरूपं नानाविधं देवताविशेषं यजामहे तथापि तद्धविः सर्वं त्वे
इत् त्वय्येव हूयते अतो देवांतरविषयायामपि त्वय्येव सर्वमित्यर्थः॥ तनातनु विस्तारे क्विप्। यद्वा पचाद्यच् कर्मणां सुपां सुलुगिति तृतीयाया आका
रः देवं देवं नित्यवीप्सयोरिति द्विर्भावः तस्य परमाम्रेडितमिति उत्तरस्य आम्रेडितसंज्ञायां अनुदात्तं चेति सर्वानुदात्तत्वं॥ यजामहे निपातैर्यद
ति हि इति निघातप्रतिषेधः त्वे युष्मच्छब्दात्सप्तम्येकवचनस्य सुपां सुलुगिति शे आदेशः त्वमावेकवचने इति मपर्यंतस्य त्वादेशः शे
लोपे अतो गुण इति पररूपत्वं शे इति प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावः॥ हूयते अजन्तार्धधातुकयोर्दीर्घ इति दीर्घः॥
॥ ॥सप्तमीमृचमाह॥ प्रियो नो अस्तु विश्पतिर्होता मंद्रो वरेण्यः॥ प्रियाः स्वग्नयो वयं॥ विश्पतिर्विशां प्रजानां पालको होता होमनि
ष्पादको मंद्रो मदनः हर्षहेतुः वरेण्यो वरणीयो योऽग्निर्नोऽस्माकं प्रियोऽस्तु वयमपि स्वग्नयः शोभनाग्नियुक्ताः संतस्तस्य प्रिया भूयास्मेति शेषः विश्पतिः

133
1924

भा० प्र०
६८

--पत्यादिश्वर्य इति पूर्वपदप्रकृतिस्वरं प्राप्ते परादिश्छन्दसि बहुलमिति उत्तरपदाद्युदात्तत्वं। वरेण्यः वृञ एण्यः इत्यादिनेण्यप्रत्ययः। आद्युदात्तत्वं। स्वग्नयः बहु
व्रीहौ नञ्सुभ्यामिति उत्तरपदान्तोदात्तत्वं॥ ॥अष्टमीमृचमाह॥ स्वग्नयो हि वार्यं देवासो दधिरे च नः॥ स्वग्नयो मनामहे॥ स्वग्नयः शोभनाग्नियु
क्ता देवा दीप्यमाना ऋत्विजो नोऽस्मदीयं वार्यं वरणीयं हविः हि यस्मात् दधिरे धृतवन्तः स्मात् वयं स्वग्नयः शोभनाग्नियुक्ताः सन्तो मनाम
हे त्वां याचामहे। वार्यं वृङ् सम्भक्तौ ऋहलोर्ण्यत् ईडवन्द्येत्याद्युदात्तत्वं। दधिरे। इरयो रे इति रेआदेशः। चित्त्वादन्तोदात्तत्वं। हि चेति निघातप्रतिषेधः। मनामहे
मन ज्ञाने व्यत्ययेन शप्॥ ॥नवमीमृचमाह॥ अथा न उभयेषाममृत मर्त्यानां॥ मिथः सन्तु प्रशस्तयः॥ हे अग्ने अमृत मरणरहिताग्ने अथ कर्मा
नुष्ठानानन्तरं मर्त्यानां मनुष्याणामस्माकं अमृतानां त्वामिन्द्रादीनां च उभयेषां मिथः परस्परं प्रशस्तयः प्रशंसारूपा वाचः सन्तु सम्यगनुष्ठितमिति यजमा
नविषया प्रशंसा सम्यगनुगृहीतमित्यग्निविषया। अथेति निपातस्य चेति संहितायां दीर्घः। अमृत अपादादाविति पर्युदासात् आष्टमिकमाद्युदात्तत्वम्।
मर्त्यानाम् मृङ् प्राणत्यागे असिहसीत्यादिना तन्प्रत्ययः। तो मर्तशब्दः। तस्माद्भवे छन्दसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं॥ सन्तु अस्तेर्लोटि श्नसोरल्लोपः। प्रशस्
यः नाधीतिगतेः प्रकृतिस्वरत्वं॥ ॥दशमीमृचमाह॥ विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः॥ चनो धाः सहसो यहो॥ सहसो बलस्य य
हो पुत्र हे अग्ने विश्वेभिरग्निभिः सर्वैराहवनीयादिभिर्युक्तस्त्वं इमं अस्मदीयं यज्ञं इदं अस्मदीयं वचः स्तोत्रं च सेवमानः चनोऽन्नं धाः अ
स्मभ्यं धेहि। विश्वेभिः बहुलं छन्दसीति भिस ऐसादेशाभावः। चनः चायृ पूजानिशामनयोः। चायतेरन्ने ह्रस्वश्चेत्यसुन्। तत्सन्नियोगेन नुडागम
श्च नित्त्वादाद्युदात्तत्वं॥ धाः। दधातेर्लुङि बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः। सहसो यहो इत्यत्र सुबामन्त्रिते इति पराङ्गवद्भावात्
मन्त्रितस्य चेति षष्ठ्यामन्त्रितसमुदायो निहन्यते॥ ॥इति प्रथमस्य द्वितीये एकविंशो वर्गः॥ ॥अश्वं न त्वेति त्रयोदशर्चं चतुर्थं सूक्तं पूर्वव
च्छुनःशेप ऋषिः त्रयोदशी नमो महद्भ्य इत्यस्यास्त्रिष्टुप् छन्दः विश्वे देवा देवता। अथाचानुक्रान्तं अश्वं सप्तोना गायत्रं त्वन्त्या त्रिष्टुबिति। प्रातरनु
वाकाश्विनशस्त्रयोः गायत्रे छन्दस्याग्नेये क्रतौ अस्य विनियोग उक्तः॥ ॥तत्र प्रथमामृचमाह॥ अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः।
सम्राजन्तमध्वराणां॥ अध्वराणां यज्ञानां सम्राजन्तं सम्राड्रूपेण स्वामिनं अग्निं त्वां नमोभिः॥ वन्दध्यै वन्दितुं प्रवृत्ता इति शेषः॥ अत्र दृष्टान्तः
वारवन्तं वालयुक्तं अश्वं न अश्वमिव अश्वो यथा वालैः बाधकान् मशकमक्षिकादीन् परिहरति तथा त्वमपि ज्वालाभिरस्मद्विरोधिनः परिहरसीत्यर्थः
वारवन्तं वारयन्तं दंशकादीनिति वारः पचाद्यच्। कपिलकादित्वाल्लत्वविकल्पः। मतुपः पित्त्वादनुदात्तत्वं। घञ्भिन्नमित्याद्युदात्तो वारशब्दः। कर्षात्वत इति
अन्तोदात्तत्वं व्यत्ययेन न प्रवर्तते। वन्दध्यै वदि अभिवादनस्तुत्योः इदितो नुम् धातोरिति नुम्। तुमर्थे सेसेनित्यध्यैप्रत्ययः। प्रत्ययस्वरः। सम्राजन्तं शपः
पित्त्वादनुदात्तत्वं। शतुश्च सार्वधातुकस्वरेण। धातुस्वरः शिष्यते। समासेऽपि कृदुत्तरपदप्रकृतिस्वरेण स एव। अध्वराणां। नञ्सुभ्यामित्युत्तरपदान्
तोदात्तत्वं॥ ॥द्वितीयामृचमाह॥ स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः॥ मीढ्वाँ अस्माकं बभूयात्॥ स घ स एवाग्निर्नोऽस्माकं सुशेवः सुसुखो ६८
भवत्विति शेषः। कीदृशः शवसो बलस्य सूनुः पुत्रः पृथुप्रगामा पृथुप्रगमनः किं च। अस्माकं मीढ्वान् कामानां वर्षिता बभूयात् भवतु। ऋचि तुनु
घमक्षुतङ्कुत्रोरुष्याणामिति दीर्घः। शवसा कर्पाकर्पा भवतीति इत्थम्भूतलक्षणे तृतीया। पृथुप्रगामा प्रकर्षेण गमनं प्रगामः हलश्चेति घञ्। पृथुः प्र
गामोऽस्यासौ पृथुप्रगामा सुपां सुलुगिति पूर्वसवर्णं आकारः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। सुशेवः इणशीङ्भ्यां वन्निति शीङो वन्प्रत्य

यान्त आद्युदात्तः। तेन बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वे प्राप्ते आद्युदात्तं द्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वं। मीढ्वान् मिह सेचने। उत्तरस्मात्क्वसुप्रत्य
यान्तो दाश्वान्साह्वान्मीढ्वांश्चेति निपातितः। एवं भूयात् भवतेः छान्दसस्य लिङः तिङ्ङातिङ इति भवतीति तिङो देशः। यासुट् इत्यानीव शपादार्धधातुकत्वाच्छपभा
वः। द्विर्वचनेऽभवत्तेरपीत्यत्वं तिङ्ङतिङ इति निघातः॥ ॥तृतीयामृचमाह॥ स नो दूराच्चासाच्च नि मर्त्यादघायोः॥ पाहि सदमिद्विश्वायुः॥ हे अग्ने विश्वा 135
युर्व्याप्तगमनः सर्वं दूरात् दूरेऽपि आसाच्च आसन्ने देशेऽपि अघायोः अपं पापमिच्छतः नुमिच्छतो मर्त्यात् मनुष्यात् वैरिणोऽस्मान् सदमित् सर्वदैव निपा 1924
हि नितरां पालय अघायोः। अघमात्मन इच्छति। क्यच्। अश्वाघस्यात्। इत्यात्वं। पाहि पादादित्वादनिघातः। विश्वायुः इण गतावित्यस्मादुणः। वेन्(?) तोर्णिज्वलसिः॥ --
विश्वमयनं गमनं यस्येति बहुव्रीहिः। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदान्तोदात्तत्वं॥ ॥चतुर्थीमृचमाह॥ इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसं॥ अ
ग्ने देवेषु प्र वोचः॥ हे अग्ने त्वमस्माकमस्मत्संबन्धिनं इमम् उ षु पुरोदेशे अनुष्ठीयमानमपि सनिं हविर्धानं नव्यांसं नवतरं गायत्रं गायत्रच्छन्दोरूपं वचोऽपि देवेषु
देवानामग्ने प्रवोचः ब्रूहि। पुषु निपातस्य चेति संहितायां दीर्घत्वं। सुञ इति षत्वं॥ नव्यांसं नवशब्दादीयसुनि इकारलोपः छान्दसः। ईयसुनो नित्त्वादा
द्युदात्तत्वं। वचः छन्दसि लुङ्लङ्लिटः लोडर्थे प्रार्थनायां लुङि अस्यतिवक्तिख्यातिभ्योऽङ् इति च्लेरङादेशः। वच उम्॥ ॥पञ्चमीमृचमाह॥ आ नो भज परमेष्वा वाजेषु
मध्यमेषु॥ शिक्षा वस्वो अन्तमस्य॥ हे अग्ने परमेषूत्कृष्टेषु द्युलोकवर्तिषु वाजेष्वन्नेषु नोऽस्मानाभज सर्वतः प्रापय। मध्यमेषु अन्तरिक्षलोकवर्तिषु
वाजेष्वाभज। अन्तमस्य अन्तिकतमस्य भूलोकस्य संबन्धीनि वस्वो वसूनि शिक्ष देहि। शिक्षाविधोपादाने। शपः पित्त्वाद्धातुस्वरः। द्व्यचोऽतस्तिङ इति
संहितायां दीर्घः। अन्तमस्य अन्तिकतमस्य तमेतादेश्चेति तिकशब्दलोपः॥ ॥इति प्रथमस्य द्वितीये द्वाविंशो वर्गः॥ ॥षष्ठीमृचमाह॥ विभक्ता
सि चित्रभानो सिन्धोरूर्मा उपाक आ॥ सद्यो दाशुषे क्षरसि॥ हे चित्रभानो विचित्ररश्मियुक्ताग्ने विभक्ता विशिष्टस्य धनस्य प्रापयितासि त्वं ह
ष्टंतरुच्यते आकार उपमार्थः। यथा सिन्धोर्नद्या उपाके समीपे ऊर्मौ ऊर्मिं तरङ्गोपलक्षितं कुल्यादिरूपप्रवाहं विभजति तद्वत् दाशुषे हविर्दत्तवते
यजमानाय सद्यस्तदानीमेव क्षरसि कर्मफलं तं वृष्टिं करोषि। सिन्धोः स्यन्दतेः इत्युप्रत्ययः। ऐक्ष्यं देः संप्रसारणं धश्चेत्युप्रत्ययः निदिति
नुप्रत्ययान्तत्वादाद्युदात्तत्वं। दाशुषे। दाश्वांसमवद्य इत्यभावे॥ ॥सप्तमीमृचमाह॥ यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः॥ स यन्ता शश्वतीरिषः॥
हे अग्ने पृत्सु संग्रामेषु यं मर्त्यं यजमानमवाः अवसि रक्षसि यं पुरुषं वाजेषु संग्रामेषु जुनाः प्रेरयसि स नरः यजमानः शश्वतीरिषः नित्यान्नानि
नियन्ता नियन्तुं समर्थो भवति। पृत्सु पदादिषु मांस्पृत्स्नूनामुपसंख्यानमिति पृतनाशब्दस्य पृदादेशः। सावेकाचस्तृतीयादिर्विभक्तिरुदात्तत्वं। अवाः
अवतेः अकाराकारयोर्विपर्ययः। यद्वा लेट्याडागमः। इतश्चेति सिप इकारस्य लोपः। जुनाः जु इति गत्यर्थः। सौत्रो धातुः। लङ् सिपक्र्यादिभ्यः श्ना
बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः। यद्वृत्तयोगादनिघातः। यन्ता तृनो नित्त्वादाद्युदात्तत्वं। शश्वतीः उगितश्चेति ङीप्॥ ॥अष्टमीमृचमाह॥ न
किरस्य सहन्त्य पर्येता कयस्य चित्॥ वाजो अस्ति श्रवाय्यः॥ हे सहन्त्य शत्रूणामभिभवनशीलाग्ने अस्य त्वदनुगृहीतस्य यजमानस्य कयस्य चित् कस्या
पि पर्येता नकिः आक्रमिता नास्ति किं वास्य यजमानस्य श्रवाय्यः श्रवणीयो वाजोऽस्ति बलविशेषोऽस्ति॥ कयस्य यकारोपजनः छान्दसः॥ श्रवा
य्यः श्रुदक्षिस्पृहिगृहिभ्य आय्यः इत्याय्यप्रत्ययः॥ ॥नवमीमृचमाह॥ स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता॥ विप्रेभिरस्तु सनिता॥ विश्व
चर्षणिः सर्वमनुष्यरूपेणः सोऽग्निः सनिता फलस्य दाता अस्तु विश्वचर्षणिर्यस्य बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदान्तोदात्तत्वं। अर्वद्भिः अश्वैः
अन्यः।

भ्यापि दृश्यं तदिति विनिपाभिमिअर्णस्समावन इति निकारस्य त्वआदेशः तरतात् प्लवनतरणयोः अस्मादृमिनक्षमितेतितस्त्वंतोनिपातितः निपात
नादेवेकारस्यात्वं अप्रोर्धामेहोतुरतिरि छाहृष्येजरा बोधतिस्तान्नियस्त्वः यस्य पशवोनोपधरेरन्निति संदृसन्नितं अतिरिक्तोस्मान्निजरा बोधत
द्वितीयादृति॥ ॥तामेतां सप्तकंठ जर्मीमृचमाह॥ जराबोधतद्विविड्ढि विशेविशेयज्ञियाय॥ स्तोमंरुद्राय दृशीकं॥ हे जराबोधजरे स्तुति जरया स्तुत्या
बोध्यमानाग्नेविंशे विशे तेन यजमानरूपप्रजानुग्रहार्थं यज्ञियाय यज्ञसंबध्यनुष्ठानासिध्यर्थं तदृन यतनं तं विविड्ढि प्रविशय जमानोपिरुद्रा
यक्रूराय त्वस्मै दृशीकं दर्शनीयं समीचीनं स्तोमं करोतीतिशेषः॥ अत्र यास्क एवं व्याख्यातवान्। जरास्तुतिर्जरतेः स्तुतिकर्मणस्तां बोधयता बो
धयितरितिवातद्विविड्ढि तकुरु मनुष्यस्य मनुष्यस्य यज्ञतांस्तोमं रुद्राय दर्शनीयमिति। जराबोधत् प्रवृत्या हानो अत्र तु स्तुत्यर्थः विड्ढिशब्दः
श्यातिडिस्यड तत प्रापजरयास्तुत्या बोधो यस्यास्येजराबोधः यद्वाजरया बोध्यत इतिजराबोधः कर्मणि धञ्ज आमंत्रिता घृदात्तत्वं। विविड्ढि
विशप्रवेशने लोटाहिः बहुलं छंदसीति शपश्लुः अभ्यासहलादिः शेषो हुझल्भ्य इति हेर्धत्वं तोर्लिडेत्वयद्धावि ष्टुत्वाद्दिरस्मालोण्मध्यमैकवचनं
न अभ्यासस्य गुणाभावः॥ यज्ञियाययज्ञर्त्विग्भ्यां घखञावितिघः दृशीकं अनिदृशिभ्यां चेति कीकन्निसृत्वरः॥ ॥इतिप्रथमस्यद्वितीयेत्रयोविंशो
वर्गः॥ ॥एकादशीमृचमाह॥ सनोमहां अनिमानोधूमकेतुः पुरुश्चंद्रः॥ धियेवाजायहिन्वतु॥ सो अग्निर्नोस्मान् धियेकर्मणेवाजायान्नाय चहि
न्वतु प्रीणयतु कीदृशः महान् गुणाधिकः अनिमानः निमानवर्जितः अपरिच्छिन्न इत्यर्थः॥ धूमकेतुः धूमेन ज्ञाप्यमानः पुरुश्चंद्रः बहुदीप्तिः महां
ईपरप्रकृतिस्वरत्वं पुरुश्चंद्रः बहि आह्लादने दीप्तौच। अस्मात् स्फायितंचीत्यादिनाक्तरिक्रक् पुरुश्चासौ चंद्रश्चेतिसमासांतोदात्तत्वं धूमकेतुः प्र
तरपदे मंत्र इति सुट् तस्य श्रुत्वेन शकारः धियेसावेकाचस्तृतीयादिर्विभक्तिरिति तृतीयादिश्च तुर्थ्याउदात्तत्वं ह्रस्वाचंद्रोत्तरपदेमंत्रइतिसुट् तस्यश्चुत्वेन शकारः॥ उदात्तवंहि
न्विः उक्थैः स्तोत्रिर्युक्तानतः अस्मान् श्रृणोतुतव दृष्टांतः रेवानिव यथाक्षो कधनवान्राजाबंदिनांस्तोत्रं श्रृणोतितद्वत्। कीदृशः विश्पतिः प्रजा
पालकः दैव्यः देवानां संबंधी अग्निर्वैदेवानां होतेतिश्रुत्यंतरात् केतुः दूत आज्ञापकः अग्निर्वैदेवानांदूत आसीदितिश्रुतेः॥ स्वहृद्भानुः प्रोद्दरश्मि
व्याप्तिमत्वपदत्वं॥ बचस्यामितिविश्पतिः परादित्वं छंदसिबहुलमित्युत्तरपदाद्युदात्तत्वं॥ आहृणः घृंदीप्तौ इतिमतुपावत्वं आरूढस्य अमतुपउदात्तत्वं
सयोस्तूगात्पनान पूर्वभाविनिज्ञपनेमाम हस्वउत्पाद्य स्तोदनप्राज्ञियमाणइतिसंइसर्वोनादिव स्यानुनमामहस्तान॥ ॥तामेतां सकेत्रयोदशीमृचमाह॥ नमोमहद्भ्योनमोअर्भकेभ्यो नमोयुवभ्योनमआशिनेभ्यः॥ यजामदेवान्यदिशक्नवाममाज्यायसः शंसमावृक्षिदेवाः॥ अग्निनानृरितः स्तुतः शुनःशेपो विश्वान्देवानतयानुष्टाव॥ तथाचाम्नायते तंमग्निरस्तावविश्वान्देवान्स्तुत्वस्तवेति तरस्व
स्वामइतिस विश्वान्देवांस्तुष्टावनमो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चेति। महांतो गुणैरधिकाः अर्भकागुणैः न्यूनाः युवानस्तरुणाः आ
शिनाः वयसा व्याप्ताः वृद्धाः यथोक्तचतुर्विधदेवेभ्यो महद्भ्यो नमोस्तु। यदिशक्नवाम कथंचिच्छक्नुयाम् संपत्याज्ञात्वाश्चतेनदानीं देवान्

यजामदेवान्यजाम सोज्यायसश्चस्यदेवतावृद्धे यस्य आसर्वतः प्रसृतं शंसं स्तोत्रं मावृक्षि अहं विच्छिन्नं माकर्षं आशिनेभ्यः अशूङ् व्याप्तौ बहुलमन्य
त्रापीत्यौणादिक इणन् प्रत्ययः चित इत्यंतोदात्तत्वं॥ यजामशप्यः पित्वादनुदात्तत्वं। तिङ्श्च लसार्वधातुकस्वरेण धातुस्वरः शक्नवाम शक्लृशक्तौ 137 / 1924
आकृतमस्यपि ध्वेतिति पिड्ढावादनुदात्तत्वे सतिस्यादेशः उपादीयस इति ईसत ईकारस्यात्वं नित्वादाद्युदात्तत्वं शंसं हलश्चेति घञ्। वृक्षिव्र
श्चछेदने व्यत्ययेनात्मनेपदं उत्तमपुरुषैकवचनं इट्॥ सिच। स्वरतिसूतीत्यादिना इडभावः। स्कोः संयोगाद्योरिति पधास कारलोपः॥ वृश्चादि
नाषत्वं। षढोः कः सीतिकत्वं आदेशप्रत्यययोरितिषत्वं न माङ्योगे इत्यडभावः॥ ॥इतिप्रथमस्यद्वितीये चतुर्विंशोवर्गः॥ यत्रग्रावेतिपंचम
सूक्तं नवर्चं आदितः षळनुष्टुभः आयजीइत्याद्यास्तिस्रोगायत्र्यः। आदितश्चतसृणामिंद्रोदेवता। ततो द्वेउलूखलदेवत्ये। तदनंतरभावि
न्यौ उलूखलमुसलदेवताके। अंत्यायाउच्छिष्टमित्यस्या हरिश्चंद्राधिषवणचर्मसोमानामन्यतमोवादेवता तथाचसूक्तदेवतायामुक्तं चर्माधिष
वणीयंवासोमंवांत्याप्रशंसतीतितदुक्तमनुक्रमण्यांयत्रपञ्चाधिकानयप्लनुप्पवाद्यस्चिचोलूखलपापरेमौसल्योप्रजापतेर्हरिश्चंद्रस्यांत्या
चर्मप्रशंसावेति। आद्याश्चतस्त्रः सर्वहोमेविनियुक्ताः पंचम्याद्याश्चतस्रो भिषवो अंत्या द्रोणकलशसोमावनयने। तथाचब्राह्मणं॥
अथाहैतंशुनःशेपोंजः सवपृद्दचतुद्दर्शंतमेताभिश्चतसृभिरभिषुत्याव ग्रहीद्विलांप्रहेगृहइत्ययं द्रोणकलशमभ्यवनिन्योच्छिष्टं चम्वो
र्भरेत्येतयर्चाथहास्मिनन्वारब्ध पूर्वाभिश्चतसृभिः ससाहाकाराभिः र्जुहवांचकार॥ ॥तत्रप्रथमामृचमाह॥ यत्रग्रावापृथुबुध्नऊर्ध्वोभ
वतिसोतवे॥ उलूखलसुतानामवेद्विंद्रजल्गुलः॥ हे इंद्र यत्र यस्मिन्यज्ञे सवे कर्मणि सोतवे अभिषवार्थं ग्रावा पाषाणः पृथुबुध्नः स्थूलमूल
ऊर्ध्व उन्नतो भवति तस्मिन्कर्मणि उलूखलसुतानां उलूखलेनाभिषुतानां सोमानां रसं अवेत् स्वकीयत्वेनावगत्यैव जल्गुलो भक्षय। सोतवे षुञ्
अभिषवे तुमर्थे सेसेनिति तवेन्प्रत्ययः॥ नित्वादाद्युदात्तत्वं। उलूखलसुतानां उलूखलेन सुतानां तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। जल्
गुलः गृ निगरणे अस्माद्यङ्लुकि लोण्मध्यमैकवचने लेटो डाटावित्यडागमः॥ इतश्च लोपइतीकारलोपः॥ उपधायाश्चेत्वं हलादिशेषाभाव
श्च पृषोदरादित्वात्॥ ॥द्वितीयामृचमाह॥ यत्र द्वाविव जघनाधिषवण्या कृता॥ उलूखलसुतानामवेद्विंद्रजल्गुलः॥ यत्र यस्मिन्कर्मणि अ
भिषवण्या उभे अधिषवणफलके द्वाविव जघनाविव जघनप्रदेशाविव जघनं जघ्न्यते इतियास्कः कृता विस्तीर्णे कृते संपादिते। अन्यत पूर्व
वत् जघनाक पांसलुगित्याकारः॥ अधिषवण्या षुञ् अभिषवे ल्युट् भवे छंदसीति यत् उपसर्गान्सुनोतीतिषत्वं तित्स्वरितमितिस्वरितः
न च यतोनाव इत्याद्युदात्तत्वं। तत्रहि नित्याचयजनाहित्यस्यानुवृत्तेर्दिक्त्यैवत इति। कृता पूर्ववदाकारः॥ ॥तृतीयामृचमाह॥ यत्रना
र्यपच्यवमुपच्यवं च शिक्षते॥ उलूखलसुतानामवेद्विंद्रजल्गुलः॥ यत्र अस्मिन्कर्मणि नारी पत्नी अपच्यवं शालाया निर्गमनं उपच्यवं च
शालाप्रवेशं च शिक्षते॥ अभ्यासं करोति। अन्यत पूर्ववत्। अपच्यवं च्युङ् गतौ अस्माद्दोरविप्यगुणावादेशौ थाथादिनोत्तरपदांतोदा
त्तत्वं। शिक्षते शिक्ष विद्योपादाने। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः निपातैर्यद्यदिहंतेतिनिघातप्रतिषेधः॥ ॥चतु
र्थीमृचमाह॥ यत्रमंथां विबध्नते रश्मीन्यमितवाइव॥ उलूखलसुतानामवेद्विंद्रजल्गुलः॥ यत्र यस्मिन्कर्मणि मंथां आज्ञिरमंथनदं
डं मंथानं विबध्नते विबध्नातितत्र दृष्टांतः रश्मीन् अश्वबंधनार्थान्प्रगाहान्यमितवा इव नियंतुमिव। अन्यत पूर्ववत्। मंथां पथि

भा॰ प्र॰ मथ्यं मुक्ता। मारितिद्वितीयायामपि व्यत्ययेनात्वं। प्रातिपदिकस्वरेणान्तोदात्तत्वे प्राप्ते पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं॥ यत्रामन्थ्य
ते दधि अनयेति मन्थाः मन्थ विलोडने इत्यस्मात् हलश्चेति करणे घञ् तत्र पायवित्वादाद्युदात्तत्वं। विबध्नते बंध बंधने क्र्यादिभ्यः श्नाअ
७० निदितामिति नलोपः श्नाभ्यस्तयोरात इत्याकारलोपः। छांदसः। प्रत्ययस्वरः तिङ् श्नाद्यनुदात्तत्वे तिङतिङ इति निघातः॥ यमितावै यम उपर
मे तुमर्थे सेसेनिति तवै प्रत्ययः इडागमः छांदसः। यद्वा एवं तातवै प्रत्ययस्य डागमे सति णिलोपः छांदसः। अंतश्च तवै युगपदि
त्याद्यंतयोरुदात्तत्वं॥ अभिषवे विनियुक्तासु चतसृषु मध्ये प्रथमां सूक्ते पंचमीमृचमाह॥ ॥ यच्चिद्धि त्वं गृहेगृह उलूखलक यु
ज्यसे॥ इह द्युमत्तमं वद जयतामिव दुंदुभिः॥ हे उलूखलक यच्चिद्धि यद्यपि त्वं अवघातार्थं गृहेगृहे युज्यसे तथापि इदं इह कर्मणि इ
त्र मुसलप्रहारेण द्युमत्तमं अतिशयेन दीप्तं प्रभूतध्वनियुक्तं शब्दं वद। तत्र दृष्टांतः। जयतामिव दुंदुभिः यथा युद्धे जयं प्राप्नुवतां राज्ञां दुं
दुभिर्महांतं ध्वनिं करोति तद्वत्। उलूखलशब्दं यास्क एवं व्याख्यातवान् उलूखलं मुसलं वोर्ध्वखं वोरु मे कुर्वित्यब्रवीत्तदुलूखलम
भवदुरुकरं वै तदुलूखलमित्याचक्षते परोक्षेणेति च ब्राह्मणमिति। उलूखलक। अदादावितिपर्युदासादाष्टमिकनिघाताभा
वे षाष्ठिकमाद्युदात्तत्वं॥ युज्यसे अदुपदेशात्सार्वधातुकानुदात्तत्वे यकारः स्वरः शिष्यते। न च तिङ् तिङ इति निघातः निपातैर्य
द्यदिहंतेति प्रतिषेधात्। द्युमत्तमं दीव्यतेर्द्युः स्त्यर्थस्य संपदादिलक्षणः। क्विप्। दिव उदित्युकारः यणादेशः ह्रस्वनुड्भ्यां मतुबिति म
तुप उदात्तत्वं॥ ननु दिव उदित्यत्र प्रातिपदिकस्य तत्र धातुरित्युक्तत्वात्। अक्षद्युरित्यादावपि यथा भवितव्यम्॥ एवं तर्हि दी
प्तिमत्त्वगर्वाच कनिन्दिवु प्रातिपदिकेन तल्लक्षितेन इत्युक्तं भविष्यति॥ ॥ इति प्रथमस्य द्वितीये पंचविंशो वर्गः॥ ॥ षष्ठीमृचमा
ह॥ उत स्म ते वनस्पते वातो वि वात्यग्रमित्॥ अथो इंद्राय पातवे सुनु सोममुलूखल॥ उत अपि च हे वनस्पते उलूखलरूप वृक्ष ते अग्र
मित् तव पुरत एव वातो विवाति स्म त्वरायै मुसलप्रहारे वायुविशेषेण प्रसरति खलु अथानंतरं हे उलूखल इंद्रोपकारार्थं पातवे पातुं
सोमं सुनु सोमाभिषवं कुरु॥ वनस्पते पारस्करादित्वात्सुट् कार्यकारणशब्दः पातवे पा पाने तुमर्थे सेसेनिति तवेन्प्रत्ययः। ञ्निति
त्यादिर्नित्यमित्याद्युदात्तत्वं सुनु। उतश्च प्रत्ययादसंयोगपूर्वादिति हेर्लुक्। विकरणस्वरेणान्तोदात्तत्वं पादादित्वान्निघातः॥ उलूखल
क ऊर्ध्वं खमस्य स्थूलखलप्रेषादयादि॥ ॥ सप्तमीमृचमाह॥ आयजी वाजसातमा ता ह्युच्चा विजर्भृतः॥ हरी इवांधांसि बप्सता
॥ इह उलूखलमुसले आयजी सर्वतोयजनसाधने वाजसातमा अतिशयेनान्नप्रदे॥ ता हि ते खलु उच्चा प्रौढध्वनिर्यथा भवति तथा
विजर्भृतः॥ विशेषेण पुनःपुनर्विहारं कुरुतः॥ तत्र दृष्टांतः। अंधांस्यन्नानि चणकादीनि बप्सता भक्षयंतौ हरी इव इंद्रस्या
श्वाविव अत्र यास्क एवं व्याचख्यौ आयजी। आयष्टव्ये अन्नानां संभक्ततमे ते ह्युच्चैर्विह्रियेते हरी इवान्नानि भुंजाने इति। आयजी य
जेरौणादिकः करणे इन्प्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वं॥ वाजसातमा वाजं सनोतीति वाजसाः। षणु दाने। जनसनखनेत्यादिना वि
ट्प्रत्ययः विड्वनोरनुनासिकस्यादित्यात्वं कृदुत्तरपदप्रकृतिस्वरत्वं। अतिशयानिकः तमप्। सुपां सुलुगिति पूर्वसवर्णदीर्घः॥ विज ७०
र्भृतः हृञ् हरणे। अस्माद्यङ्लुकि अभ्यासहलादिशेषे रतश्चेपु कृते रुग्रिकौ च लुकीति रुगागमः ततः प्रत्ययलक्षणेन धातु

संज्ञायां विद्युद्वचनं तस्य अडादिष्वचोऽतिष्वचनार्थाल्लुकि गुणे प्राप्ते क्ङिति चेति प्रतिषेधः। हृग्रहोर्भः छंदसीति भत्वं। प्रत्ययस्वरः द्विवे
तिनिघातप्रतिषेधः भसं भर्त्सनदीप्त्योः लट्। जुहोत्यादिभ्यः श्लुः घसिभसोर्हलि चेत्युपधालोपः नाभ्यस्ताच्छतुरिति नुमप्रति
षेधः अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ ॥ अष्टमीमृचमाह॥ ता नो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः॥ इंद्राय मधुमत्सुतं॥ अस्मि 139
न्कर्मणि हे वनस्पती उलूखलमुसलरूपौ ता युवां ऋष्वौ दर्शनीयौ सोतृभिरभिषवकर्तृभिः सह दर्शनीयौ भूत्वा इंद्राय इंद्रार्थं मधुमत् 1924
माधुर्योपेतं सोमद्रव्यं अस्मदीयं सुतं अभिषुणुतं॥ ता रूपं सुपां सुलुगित्याकारः। नो अद्य प्रकृत्यांतःपादमिति प्रकृतिभावः वनस्पती उभयप
दप्रकृतिस्वरत्वं प्राप्ते आमंत्रितस्येति सर्वानुदात्तत्वं। प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावः सुतं। षुञ् अभिषवे। बहुलं छंदसीति विकरणस्य
लुक् निघातः॥ सोमावनयने विनियुक्तां नवमीमृचमाह॥ ॥ उच्छिष्टं चम्वोर्भर सोमं पवित्र आ सृज। नि धेहि गोरधि त्वचि॥ हे ऋत्विक् शिरो
यद्वा हरिश्चंद्रपक्षे हे हरिश्चंद्र इति वा। चम्वोः सोमस्य भक्षे शास्त्रे अधिषवणफलकयोः शिष्टं अभिषवावशिष्टं यद्वा हविर्भिः शेषं सो
मं उद्धरणं कृत्वा प्रतिहर सोमं अभिषुतं सोमं पवित्रे दशा॥ पवित्र आसृज आनीय प्रक्षिप प्रक्षेपसमयवशिष्टं सोमं गोस्त्वचि आनडुहे चर्म
णि अधिनिधेहि अध्यारोप्य स्थापय। चम्वोः। चमु अदने। चम्यते भक्ष्यते नेनेति चमूः। कृषिचमितनीत्यादिना औणादिकः ऊप्रत्ययः स्वरः। सप्त
मीद्विवचनस्य उदात्तस्वरितयोर्यणः स्वरित इति स्वरितत्वं॥ उदात्तयणो हल्पूर्वादिति व्यत्ययेन न भवति। भर हृग्रहोर्भः। धेहि घ्वसोरेद्धा
वभ्यासलोपश्चेत्यभ्यासलोपो निघातः॥ त्वचि सावेकाचस्तृतीयादिर्विभक्तिरुदात्तत्वं॥ ॥ इति प्रथमस्य द्वितीये षड्विंशो वर्गः॥ यच्चिद्धि सत्य
सोमपा इति सप्तर्चं सप्तमं सूक्तं शुनःशेपस्यार्षं पांक्तं ऐंद्रं। अत्रानुक्रमणिका यच्चिद्धि सप्त पांक्तमिति। पृष्ठ्यषडहस्य पंचमेहनि माध्यंदि
ने होत्रकाय यच्चिद्धीति सप्तर्चं सूक्तं शस्त्रं तत्र चान्तरोक्तं सूत्रं एकैकं च माव परेण चतुर्थेहनीति खंडे यच्चिद्धि सत्य सोमपा इत्येकैकमयमेवं ति
सूत्रितं॥ ॥ तत्र प्रथमामृचमाह॥ यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि॥ आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ
॥ विश्वैर्देवैः प्रेरितः शुनःशेपस्तच्छादिकाभिः विंशतिसंख्याकाभिः ऋग्भिरिंद्रं तुष्टाव। तथा च ब्राह्मणं तं विश्वे देवा ऊचुरिंद्रो वै देवाना
मोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमः तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति स इंद्रं तुष्टाव यच्चिद्धि सोमपा इत्येतेन सूक्तेनोत्तरस्य च पंच
दशभिरिति। हे सोमपाः सोमस्य पातः सत्य वाग्मिन् इंद्र यच्चिद्धि यद्यपि वयं अनाशस्ता इव स्मसि अप्रशस्ता इव आहो भवाम तथापि हे तुविम
घ बहुधनेंद्र त्वं गोषु अश्वेषु शुभ्रिषु सहस्रेषु सहस्रसंख्याकेषु च निमित्तभूतेषु नोऽस्मान् आशंसय सर्वतः प्रशस्तान् कुरु अस्मद्रूपम
न यं वेश्मगवादीन् प्रयच्छेत्यर्थः॥ सोमपाः। विशेषणामंत्रितेति निघातः॥ अनाशस्ताः शंसु स्तुतौ निष्ठायामिट्प्रतिषेधः यस्य विभाषेतीट्प्रति
षेधः॥ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं। स्मसि इदंतो मसि। तु नु घ मक्षुतङ्कुत्रोरुष्याणामिति दीर्घः। गोषु सावेकाच इति प्राप्तस्य वि
भक्तेरुदात्तत्वस्य न गोश्वन्साववर्णेति प्रतिषेधः॥ अश्वेषु अश्नुतेऽध्वानमित्यश्वः। अशिप्रुषीत्यादिना क्वन्प्रत्ययः नित्त्वादाद्युदात्तत्वं। शुभ्रि
षु शुभ दीप्तौ अशिशुभिभ्यः क्रिन्निति क्रिन् प्रत्ययः प्रत्ययस्वरेणांतोदात्तत्वं॥ ॥ द्वितीयामृचमाह॥ शिप्रिन्वाजानां पते शचीवस्तव
दंसना॥ आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ॥ हे शचीवः शक्तिमन् शिप्रिन् शोभनहनुयुक्त वाजानां पते अन्ना

गोपालकत्वं दमनात्कर्मविशेषोनुग्रहरूपः सर्वत्र वर्तते॥ अन्यत पूर्ववत्॥ शिप्रिन् शिप्रे अस्य नासिके वेति शिप्रवान्॥ अत इनिठनौ इति मत्वर्थीय इनिः॥ आमंत्रि
भा० प्र० ताद्युदात्तत्वं॥ वाजानां पते॥ वाजानां पते इति वामंत्रिते परांगवत्स्वरे इति परांगवद्भावात् षष्ठ्यामंत्रितसमुदायनिघातः॥ न त्वामंत्रितं पूर्वमविद्यमानवदिति शिप्रि
७१ त्वस्याविद्यमानवत्त्वेन पदात्परत्वात् पादादित्वाच्च न निघातः॥ नामंत्रिते समानाधिकरणे सामान्यवचनमित्यविद्यमानवत्त्वप्रतिषेधात्॥ शचीवः॥ छं
दसीर इति मतुपो वत्वं मतुवसो रुरिति रुत्वं खरवसानयोर्विसर्जनीयः॥ पादादित्वादामंत्रितनिघाताभावः॥ ॥ तृतीयामृचमाह॥ निष्वापया मि
थूदृशा सस्तामबुध्यमाने॥ आतून इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ॥ मिथूदृशा परस्परं संगत्वेन दृश्यमाने यमदूत्यौ निष्वापय नि
तरां स्वापं कुरु ते चास्मान् मारयितुमबुध्यमाने सत्यौ सस्तां निद्रां प्राप्नुतां॥ अन्यत पूर्ववत्॥ निष्वापयस्व॥ वामादित्वात् अंपत्वं अन्येषामपि दृ
श्यत इति दीर्घः॥ मिथुनं तथा युगरूपेण पश्यत इति मिथूदृशा क्विप् च विदृशः कर्तरि क्विप्॥ कृदुत्तरपदप्रकृतिस्वरत्वं॥ पूर्ववत् पूर्वपदस्य दी
र्घः॥ सुपां सुलुगिति विभक्तेराकारः॥ सस्तां षस स्वप्ने॥ सादितस्तस्ताम् अदिप्रभृतिभ्यः शप इति शपो लुक्॥ प्रत्ययस्वरः॥ पादादित्वान्निघाता
भावः॥ अबुध्यमानेन नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥ चतुर्थीमृचमाह॥ ससंतु त्या अरातयो बोधंतु शूर रातयः॥ आतून इंद्र
शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ॥ त्याः अस्माभिर्दृश्यमानाः परोक्षा अरातयः अदानशीलाः शत्रवः ससंतु॥ निद्रां कुर्वंतु हे शूर
शौर्ययुक्तेंद्र रातयो दानशीलाः बंधवो बोधंतु॥ अस्मान् बुध्यंतां॥ अन्यत पूर्ववत्॥ ससंतु प्रत्ययस्वरः॥ अरातयः रा दाने मंत्रे वृषेत्यादिना भावे क्ति
न् न विद्यते रातिर्येषां ते इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ नञः सुभ्यामिति तु सर्वविधयः छंदसि विकल्प्यंत इति न भवति॥ यद्वा क्तिच्क्तौ च सं
ज्ञायामिति कर्तरि क्तिच्॥ नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ बोधंतु पादादित्वात् तिङ्ङतिङ इति निघाताभावः॥ ॥ पंचमीमृचमाह॥
समिंद्र गर्दभं मृण नुवंतं पापयामुया॥ आतून इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ॥ हे इंद्र अमुया अनया अस्माभिः श्रूयमा
णया पापया निंदारूपया वाचा नुवंतं स्तुवंतं अपकीर्तिं प्रकटयंतमित्यर्थः॥ तादृशं गर्दभसमानं वैरिणं संमृण सम्यक् मारय॥ यथा गर्दभः
श्रोतृमनुष्याणां पुरतोपशब्दं करोति॥ तथा शत्रुरपि॥ अन्यत पूर्ववत्॥ गर्दभं तर्द गर्द शब्दे॥ कृशृशलिगर्दिभ्यो भच्॥ चित इत्यंतोदात्तत्वं॥ मृण मृ
हिंसायां॥ तौदादिकः॥ शस्य ङित्वाद्गुणाभावः॥ नुवंतं णु स्तुतौ॥ अदादिः अदिप्रभृतित्वात् शपो लुक्॥ शतुर्ङित्वाद्गुणाभावे उवङ्॥ शत्रः प्रत्यया
द्युदात्तत्वं॥ ॥ षष्ठीमृचमाह॥ पताति कुंडृणाच्या दूरं वातो वनादधि॥ आतून इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ॥ वातोस्म
त्प्रतिकूलो वायुः कुंडृणाच्या कुटिलगत्या सह वातपरित्यज्य वनादधि अरण्यादुपर्यधिकं दूरं गच्छतु॥ कारात्परस्याकारस्य ककारः छांदसः कु
वर्णाच्चेति वक्तव्यमिति णत्वं॥ तदंचतीति कुंडृणाची॥ ऋत्विग्दधृगित्यादिना क्विन्॥ अनिदितामिति नलोपः॥ अंचतेश्चेति वक्तव्यमिति ङीप्॥ अच इत्य
कारलोपः॥ चाविति पूर्वपदस्य दीर्घत्वं॥ अंचतेश्चावित्याकारस्योदात्तत्वं॥ ॥ सप्तमीमृचमाह॥ सर्वं परिक्रोशं जहि जंभया कृकदाश्वं॥ आतू ७१
न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ॥ परिक्रोशं अस्मद्विषये सर्वत आक्रोशकर्तारं सर्वं पुरुषं जहि मारय॥ कृकदाश्वं अ
स्मद्विषये हिंसाप्रदं शत्रुं जंभय॥ अन्यत पूर्ववत्॥ परिक्रोशं क्रुश आह्वाने परितः क्रोशयतीति परिक्रोशः॥ पचाद्यच्॥ कृदुत्तरपदप्रकृ
तिस्वरत्वं॥ जहि॥ हन हिंसागत्योः हंतेर्जः इति जादेशः॥ तस्यासिद्धवदत्राभादित्यसिद्धत्वात् हेरिति हेर्लुक् न भवति॥ जंभय॥ जभि ना

शने चुरादित्वात्स्वार्थिको णिच् शपः पित्वादनुदात्तत्वं॥ णिचश्च स्वरः शिष्यते॥ कृकदाश्वं॥ कृञ् हिंसायां॥ कृदाधारार्चिकलिभ्यः कन्निति भावे कं
प्रत्ययः किदित्यनुवृत्तेर्गुणाभावः॥ तथा दश दंशने हिंसायां दाशतीति प्रयच्छतीति कृकदाशः॥ बहुलग्रहणाद् अन्यत्रापि कृकउपपदे कर्मवचः कृत्स्वे 141
ल्यण्प्रत्ययस्वरेणांतोदात्तः॥ द्वितीयायाममिपूर्वत्वप्राप्तौ वाच्छंदसीति तस्य बाधितत्वाद्यणादेशः॥ उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं॥ ॥
इति प्रथमस्य द्वितीये सप्तविंशो वर्गः॥ ॥ आ व इंद्रमिति द्वाविंशत्यृचं सप्तमं सूक्तं शुनःशेपस्यार्षं गायत्रं अस्माकमित्येषा पादनिचृत् द्वाविंशीत्रयः 1924
सप्तकाः पादनिचृदिति कत्वान् त्र्यष्टादि इंद्रः त्वे पादनिचृत् आदितः षोडशर्चः इंद्रः आश्विनाववश्वावंत्या त्रिस्र आश्विन्यः कस्त उषः इत्याद्यास्तिस्र
उषोदेवताकाः॥ तथा चानुक्रमणिका॥ आवो द्व्यधिकास्माकं पादनिचृत् तथाश्विन्यस्तृचपरा त्वावाश्विनौष स्याविति॥ ॥ प्रथमामृचमाह॥ आव
इंद्रं क्रिविं यथा वाजयंतः शतक्रतुं॥ मंहिष्ठं सिंच इंदुभिः॥ वाजयंतो अन्नमिच्छंतो वा युष्मभ्यं शुनःशेपाः हे ऋत्विग्यजमाना वो युष्माकं संबंधिनमिममिं
द्रमिंदुभिः सोमैः रासिंचे सर्वतः सिंचामः हे तर्पयामः॥ कीदृशं शतक्रतुं शतसंख्याककर्मोपेतं॥ स्वचं न दृष्टांतः यथार्थेन प्रकारेण क्रिविं कूपं
वटं जलेन पूरयंति तद्वत्॥ क्रिविरित्येतद्व्यवधिः कादुरित्यादिषु चतुर्दशकूपनामसु क्रिविरूपः सदस्यति पठितं क्रिविं॥ कृति छेदने कल्पत इति क्रिवि
घ्विच्छविस्रवीत्यादौ क्विन्प्रत्ययांतानि पातितः॥ अत एव तत्र यलोपः॥ नित्वादाद्युदात्तत्वं॥ यथा यथेति पादांते इति सर्वानुदात्तत्वं॥ वाजयंतः
वाजमात्मन इच्छंतः॥ सुप आत्मनः क्यच्॥ न च्छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः॥ अश्वाघस्यादिति पुनरीत्वं ... धानात् प्रकात मंहिष्ठं
हिंसद्वा अतिशयेन संहिता मंहिष्ठः॥ तुश्छंदसीति तदंतादिष्ठन्प्रत्ययः॥ तुरिष्ठेमेयस्स्विति तृलोपः॥ इष्ठनो नित्वादाद्युदात्तत्वं॥ सिंचे षिच क्ष
रणे॥ व्यत्ययेनैकवचनं॥ शे मुचादीनामिति नुमागमः॥ ॥ द्वितीयामृचमाह॥ शतं वा यः शुचीनां सहस्रं वा समाशिरां॥ एदु निम्नं न रीयते॥
य इंद्रः शुचीनां शुद्धानां सोमानां शतं वा शतसंख्याकं समूहं वा समाशिरां समीचीनेन आशिरा सत्त्वेन श्रपणद्रव्येणोपेतानां सोमानां वा स
हस्रं वा सहस्रसंख्याकं समूहं वा एदु रीयते आगच्छत्येव सोस्माननुगृह्णात्विति शेषः॥ साम प्राप्नोतीदृष्टांतः॥ निम्नं न यथा निम्नं प्रदेशं आपः
आप्नुवंति तद्वत्॥ समाशिरां॥ श्रीञ् पाके इत्यस्य समाङ्पूर्वकस्य क्विपि अपस्पृधेथामित्यादौ आशीरादेशो निपातितः॥ बहुव्रीहौ पूर्व
पदप्रकृतिस्वरत्वं॥ रीयते रीङ् श्रवणे॥ दिवादिभ्यः श्यन्॥ ॥ तृतीयामृचमाह॥ सं यन्मदाय शुष्मिण एना ह्यस्योदरे॥ समुद्रो न व्यचो
दधे॥ यत् यो सोमः शतं सहस्रं वा शुष्मिणो बलवत इंद्रस्य मदार्थं संगतं भवति॥ एना हि अनेन शतेन सहस्रेण च अस्येंद्रस्योदरं व्य
चो व्याप्तिं दधे धृता भवति॥ तत्र दृष्टांतः॥ समुद्रो न समुद्र एव यथा समुद्रमध्ये जलं व्याप्तं तद्वत्॥ एना सुपां सुलुगिति तृतीयाया डादेशः
व्यचः व्याप्तौ व्यचेः कुटादित्वमनसीति ङित्वाद्वस्य प्रतिषेधत्वात् ग्रहिज्येत्यादिना संप्रसारणं न भवति॥ असुन्नित्वादाद्युदात्तत्वं॥
दधे दधातेः कर्मणि अभ्यासस्य ह्रस्वत्वे पुरस्तात् परतो लोप इटि चेत्याकारलोपः॥ प्रत्ययस्वरेणांतोदात्तत्वं॥ हि चेति प्रतिषेधान्निघा
ताभावः॥ ॥ चतुर्थीमृचमाह॥ अयमु ते समतसि कपोत इव गर्भधिं॥ वचस्तच्चिन्न ओहसे॥ हे इंद्र अयमु अयमपि दृश्य
मानः सोमः ते तवार्थं संपादितः॥ यः सोमः तं समतसि सम्यक् सातत्येन प्राप्नोषि॥ तत्र दृष्टांतः॥ कपोत इव यथा कपोताख्यः पक्षी
गर्भधिं गर्भधारिणीं कपोतीं प्राप्नोति तद्वत्॥ तच्चित् तस्मादेव कारणात् नोस्मदीयं वचः ओहसे प्राप्नोषि॥ अतसि॥ अत सातत्य

गयने॥ गर्भधिं। गर्भास्यां धीयत इति गर्भधिः कर्मण्यधिकरणे चेति किप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वं। ओहसे नुहिर दुहिर उहिर अ
भा॰ प्रथ॰ र्दनेऽस्यत्ययेनात्मनेपदं॥ ॥पंचमीमृचमाह॥ स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते॥ विभूतिरस्तु सूनृता॥ हे इंद्र राधानां धनानां पते
१२ पालक गिर्वाहो गीर्भिर्वर्धमान वीर यस्य ते तव स्तोत्रं अस्य स्तोत्रं भवति तस्य तव विभूतिर्लक्ष्मीः सूनृता प्रियसत्यरू
पास्तु॥ राधानां पते राधांसि धनानि सुबामंत्रित इति पराङ्गवद्भावात् षष्ठ्यामंत्रितसमुदायस्य निघातः। गिर्वाहः वहना
पणेः वहिराधात्वरः छंदसीति कारकपूर्वस्यापि कृत्तरसप्रत्ययः। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं॥ चेकुकत्वानणिदिसनु
वृत्तेरुपधारभ्धिः पूर्वपदस्य वेरुपधाया इति दीर्घत्वाभावः छांदसः पाष्ठिकमामंत्रिताद्युदात्तत्वं॥ विभूतिः तादौ च निति तिग
तेः प्रकृतिस्वरत्वम्॥ ॥इति प्रथमस्य द्वितीये षाविंशो वर्गः॥ षष्ठीमृचमाह॥ ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो॥ समन्ये
षु ब्रवावहै॥ हे शतक्रतो शतसंख्याककर्मोपेत अस्मिन् प्रसक्ते वाजे संग्रामे नोऽस्माकमूतये रक्षणाय ऊर्ध्वस्तिष्ठ उन्नतः उत्कर्षेण भव
त्वं चाहं च मिलित्वा अन्येषु कार्यांतरेषु सम्ब्रवावहै सम्यक् विचारयावः। तिष्ठ द्व्यचोऽतस्तिङ इति संहितायां दीर्घः। क्रतयः क्रतु क्रतीत्यादि
नाश्चित्वोदात्तत्वं अस्मिन् उडिदमित्यादिना समस्याउदात्तत्वं॥ ॥सप्तमीमृचमाह॥ योगेयोगे तवस्तरं वाजेवाजे हवामहे॥ सखाय इंद्र
मूतये॥ योगेयोगे प्रवेशेतनकर्मोपक्रमे वाजेवाजे कर्मविघातिनि तस्मिन् संग्रामे तवस्तरं अतिशयेन बलिनमिंद्रं ऊतये रक्षार्थं सखा
यः सखिवत्प्रिया वयं हवामहे॥ आह्वयामः॥ योगेयोगे युजिर्योगे हलश्चेति घञ् चजोः कुघिण्यतोरिति कुत्वं॥ तवस्तरं तवसः शब्दा
त् अस्माया मेधाति मत्वर्थीयो विनिः तस्य छांदसो लोपः विन्मतोर्लुगिति तस्य लुक्॥ ॥अष्टमीमृचमाह॥ आघा गमद्यदि श्रवत्सह
स्रिणीभिरूतिभिः॥ वाजेभिरुप नो हवं॥ यदि श्रवत यदि शृणुयात् इंद्रो नोऽस्मदीयं हवमाह्वानं शृणुयात् तदानीं स्वयमेव सहस्रि
णीभिरूतिभिर्बहुभिः पालनैः वाजेभिरन्नैश्च सह उपसमीपे आघ अवश्यमागमत् आगच्छतु॥ घ ऋचि तु नुघेत्यादिना संहिता
यां दीर्घः। गमत् लिङर्थे लेट् लेटोऽडाटावित्यडागमः इतश्च लोपः इतीकारलोपः। यद्वा छांदसे लुङि पुषादिद्युताद्यॢदितः परस्मैपदे
ष्विति च्लेरङादेशः बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। श्रवत् श्रु श्रवणे। पूर्ववल्लेट्यडागमः वाजेभिः बहुलं छंदसीति भिस ऐसादेशा
भावः॥ हवं भावेऽनुपसर्गस्येति कर्मण्यप् संप्रसारणं च॥ अपः पित्वादनुदात्तत्वं॥ धातुस्वरेणाद्युदात्तत्वं॥ ॥नवमीमृचमाह॥
अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरं॥ यं ते पूर्वं पिता हुवे॥ प्रत्नस्य पुरातनस्य ओकसः स्थानस्य स्वर्गरूपस्य सकाशात्। तुविप्रति
बहून्यत्नमानान् प्रतिगच्छंतं नरं पुरुषमिंद्रं अनु हुवे अनुक्रमेण कर्मसु आह्वयामि॥ यं ते त्वामिंद्रं पिता अस्मदीयो जनकः पूर्वं पुरा स्वकी
यानुष्ठानकाले हुवे आहूतवान्॥ तमाह्वयामि इति पूर्वेणान्वयः। ओकसः नब्विषयस्येत्याद्युदात्तत्वं। हुवे ह्वेञ् स्पर्धायां शब्दे च १२
इति बहुलं छंदसीति संप्रसारणं। परपूर्वत्वं गुणप्राप्तौ क्ङिति चेति प्रतिषेध उवङादेशः प्रत्ययस्वरेणांतोदात्तत्वं। पादादित्वादनि
निघातः। तुविप्रतिं तुवीनां बहूनां प्रतिगंतारं अत्र प्रतिशब्दोऽभिमुखेनाभिमुख इतिवत् प्रतिगंतृत्वं लक्षयति तादृशानिह शब्दे लक्ष
यति अतः प्रतिः प्रतिनिधिप्रतिदानयोरिति वत् सत्ववचनत्वनानिपातत्वादनव्ययत्वेन पूरणगुणेत्यादिना न षष्ठीसमासनिषेधः

हुवेके ओलि रिवि बहुलं छंदसीति पूर्ववत्संप्रसारणे परपूर्वत्वे द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः यद्वृत्तयोगादनि
घातः॥ ॥दशमीमृचमाह॥ तं त्वा वयं विश्ववारा शास्महे पुरुहूत॥ सखे वसो जरितृभ्यः॥ हे विश्ववार सर्वैर्वरणीय पुरुहूत बहुभिः 143
स्वस्वकर्मण्याहूत सखे सखिवत्प्रिय वसो निवासहेतो इंद्र तं पूर्वोक्तगुणयुक्तं त्वां जरितृभ्यः स्तोतृणां अनुग्रहार्थं आशास्महे प्रा 1924
र्थयामहे आशास्महे आङः शासु इच्छायां अदिप्रभृतिभ्यः शपो लुक्। वसो नामंत्रिते समानाधिकरणे इति पूर्वस्याविद्यमानवत्त्वनिषेधा
त् पराङ्गवद्भावे सति शेषनिघातेन आमंत्रितस्य चेति वा सर्वानुदात्तत्वं जरितृभ्यः जरितस्तुतिकर्मा तच्छिल्वादंतोदात्तत्वं॥ ॥इति
प्रथमस्य द्वितीये एकोनत्रिंशो वर्गः॥ ॥एकादशीमृचमाह॥ अस्माकं शिप्रिणीनां सोमपाः सोमपाव्नां॥ सखे वज्रिन्त्सखीनां॥ हे सो
मपाः सोमस्य पातः सखे सखिवत्प्रियः वज्रिन् वज्रयुक्तेंद्र सखीनां सखिवत्प्रियाणां सोमपाव्नां सोमस्य पातॄणामस्माकं शिप्रि
णीनां अन्नेभ्यो ङीप् तस्याः पित्वादनुदात्तत्व इति प्रत्ययस्वरः शिष्यते सोमपाः आमंत्रितस्य सतिशिष्टत्वादामंत्रिताद्युदात्तत्वं॥ सोम
पाव्नां आतो मनिन्क्वनिब्वनिपश्चेत्यादिना वनिप् अल्लोपोऽन इत्यकारस्य लोपः॥ ॥द्वादशीमृचमाह॥ तथा तदस्तु सोमपाः सखे वज्रिन्तथा कृ
णु॥ यथा त उश्मसीष्टये॥ हे सोमपाः सखे वज्रिन् इष्टये अभिलषितार्थं तत् दानुग्रहं यथा येन प्रकारेण उश्मसि वयं कामयामहे
त्वं तथा कुरु त्वत्प्रसादान्नरभी तत्तथास्तु। कृणु कृवि हिंसाकरणयोश्च इदित्वान्नुम् धिन्विकृण्व्योर च इत्युप्रत्ययः तत्संनियोगेन वका
रस्य चाकारः अतो लोप इति तस्य लोपः तस्य स्थानिवद्भावात् लघूपधगुणाभावः उतश्च प्रत्ययादसंयोगपूर्वादिति हेर्लुक् उश्म
सि वश कांतौ। इदंतो मसि। अदादित्वाच्छपो लुक् ग्रहिज्यादिना संप्रसारणं प्रत्ययस्वरः यद्वृत्तयोगादनिघातः। इष्टये। इषु इच्छायां
क्तिनिति तु तितुत्रेत्यादिना इट्प्रतिषेधः। यद्वा यजतेः क्तिनि वचिस्वपीत्यादिना संप्रसारणं व्रश्चादिना षत्वष्टुत्वं। पूर्वस्मिन्पक्षे मंत्रे
वृषेत्यादिना क्तिन उदात्तत्वं द्वितीये तु व्यत्ययेन॥ ॥त्रयोदशीमृचमाह॥ रेवतीर्नः सधमाद इंद्रे संतु तुविवाजाः॥ क्षुमंतो याभिर्मदेम
॥ क्षुमंतो अन्नवंतो वयं याभिर्गोभिः सह मदेम हृष्येम इंद्रे सधमादे अस्माभिः सह हर्षयुक्ते सति नोऽस्माकं ता गावः
रेवतीः क्षीरादिधनवत्यः तुविवाजाः प्रभूतबलाश्च संतु रेवतीः रयिशब्दान्मतुप् रयेर्मतौ बहुलमिति संप्रसारणं परपूर्वत्वं
छंदसीर इति मतुपो वत्वं॥ वा छंदसीति पूर्वसवर्णदीर्घः आरेशब्दाच्च मतुप उदात्तत्वं वक्तव्यमिति रेशब्दादुत्तरस्यापि भवती
ति पूर्वमेवोक्तं सधमादे मदेम सहयोगे चोपादिकः सध इत्यादेशः इति सधमादः पचाद्यच् सधमादस्थयोः छंदसीति सहस्य
सधादेशः थाथादिना उत्तरपदांतोदात्तत्वे प्राप्ते पादादित्वात् छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। तुविवाजाः बहुव्रीहौ पूर्वपदप्रकृति
स्वरत्वं। क्षुमंतः क्षु इत्यन्ननाम अस्मात् मतुप् गुणाभावः छांदसः ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं॥ मदेम मद हर्षे व्यत्ययेन शप् अदुपदेशाल्लसा
र्वधातुकानुदात्तत्वे शपः पित्वादनुदात्तत्वं। ततो धातुस्वरः शिष्यते॥ ॥चतुर्दशीमृचमाह॥ आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः
॥ ऋणोरक्षं न चक्र्योः॥ हे धृष्णो धार्ष्ट्ययुक्त त्वावान् त्वत्सदृशो इंद्र त्वां विशेषः आत्मना आप्तः अस्मदनुग्रहस्य ज्ञातः स्वयमेवाप्तः सन् इयानो
ऽस्माभिर्याच्यमानः स्तोतृभ्यः स्तोतॄणां अनुग्रहाय तदभीष्टमर्थं घ अवश्यं आ ऋणोः आनीय प्रक्षिपतु। तत्र दृष्टांतः चक्र्योः रथ

भा॰प्र॰ स्य चक्रयोः अक्षं न यथा अक्षं प्रक्षिपंति तद्वत्‌। त्वावान्‌ त्वत्प्रकरणे युष्मदस्मदोश्छंदसी सादृश्ये उपसंख्यानमिति वतुप्‌ प्रत्ययोऽनरपद्योश्च
तिमपर्यंतस्य त्वादेशः। आ सर्वनाम्न इति दकारस्य। त्वं वतुप्‌ पित्वादनुदात्तत्वे प्रातिपदिकस्वर एव शिष्यते। त्मना मंत्रेष्वाङ्यादेरात्मन इत्याका
७३ रलोपः। धृष्णो धृष्णिः धृषा प्रगल्भ्ये धृषिं अधि धृषाविषिपः कुः। आमंत्रितानुदात्तत्वं। इयानः ईङ्‌ गतौ छंदसि लुङ्‌लङ्‌लिटः इति कानच्‌। तिका
वतादेशः अचि श्नुधात्वित्यादिना इयङादेशः। द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति वचनाद्भ्यासाभावः। चित इत्यंतोदात्तत्वं। ऋणोत्‌
तौ। ऋ गतौ। व्यत्ययेन तिपः सिपि इतश्चेति इकारलोपः तनादिकृञ्भ्य उः सार्वधातुकगुणः। हलङ्‌छंदस्य माङ्योगापीडो त्यनमाभावः विकर
णस्वरेणांतोदात्तत्वं। अक्षं अक्षस्यादेवतस्येत्याद्युदात्तत्वं। चक्र्योः अकारस्येकारः छांदसः॥ ॥पंचदशीमृचमाह॥ आ यद्दुवः शतक्रतवा का
मं जरितॄणां। ऋणोरक्षं न शचीभिः॥ हे शतक्रतो इंद्र यत्‌ दुवः धनं कामिकार्थरूपं आ लोकतुभिरात्मव्यमस्ति तं कामं जरितॄणां स्तोतॄणां अनुग्रहाय आर्णोः
आनीय प्रक्षिपसि। तत्र दृष्टांतः शचीभिः कर्मभिः त्वत्कर्याचिंत्यव्यापारविशेषैः अक्षं न यथा अक्षं प्रक्षिपंति तद्वत्‌ शचीभिः। शची शब्दः शार्ङ्गर
वादिङीनंत आद्युदात्तः॥ ॥इति प्रथमस्य द्वितीये त्रिंशो वर्गः॥ ॥षोडशीमृचमाह॥ शश्वदिंद्रः पोप्रुथद्भिर्जिगाति नानदद्भिः शाश्वसद्भिर्धना
नि। स नो हिरण्यरथं दंसनावान्त्स नः सनिता सनये स नोऽदात्‌॥ तस्मिन्निंद्रेण दत्तं हिरण्यरथं दृष्ट्वा तमेतया तमेतया तमेतया प्रतीयाय द्वाभ्यां हिरण्यदृती॥ इंद्रः श
श्वत्‌ सर्वदा धनानि वैरिसंबंधिनि जिगाति जितवान्‌ अश्वैरिति शेषः। कीदृशैः पोप्रुथद्भिः घासभक्षणानंतरभावेन मोक्षशब्दं कुर्वद्भिः नानदद्भिः
नादमात्मगतं शब्दं कुर्वद्भिः शाश्वसद्भिः पुनः पुनः श्वासमास्थावद्भिः। दंसनावान्‌ कर्मवान्‌ कर्मवान्‌ सनिता दाता स इंद्रो नोऽस्माकं सनये संभजन
नार्थं हिरण्यरथं सुवर्णेन निर्मितं रथं अदात्‌ दत्तवान्‌ स नः सनोतिरदात्‌ दत्तार्थं। पोप्रुथद्भिः पोपूर्वयोर्मो अस्मात्‌ यङ्‌ लुकि अभ्यासहलादिशे
षान्त्स इति रुस्तवे कृते गुणाय ङ्लुकोरिति गुणः धातोरुपधायाः ऋवर्णस्य छांदसं। अस्मात्‌ यङ्‌ लुगंतात्‌ शतरि अभ्यस्तानामादिरित्याद्युदात्तत्वं। जि
गाति जयतिर्वा लिट्‌ वा णलि वृद्धिः द्विर्वचने नीतिस्थानिवद्भावात्‌ जिः। ऊर्ध्वं द्विर्वचनं साल्लिटोर्जेरिति अभ्यासादुत्तरस्य कुत्वं। नानदद्भिः णद अव्यक्ते शब्दे
पूर्ववत्‌ यङ्‌ लुकि दीर्घोऽकित इति अभ्यासस्य दीर्घः पूर्ववदाद्युदात्तत्वं। शाश्वसद्भिः श्वस प्राणने अन्यत्सर्वं पूर्ववत्‌। हिरण्यरथं समासस्यांत
ोदात्तत्वं। अदात्‌ गातिस्थेति सिचो लुक्‌। दंसनावान्‌। दंसना शब्दः आंसोदंसा वपुरिति कर्मनामसु पठितं। दंसनावद्‌ सनात्‌ दस्यास्तीति मतुप्‌
। तदस्यतत्‌ भवनेनेति दंसना आश्विनावश्वावत्येति तृचः प्रातरनुवाक आश्विने क्रतौ गायत्रे छंदसि। अथाश्विन इति खंडे आश्विनायत्‌
रीति पाश्विनावश्वावत्येति सूत्रितं। तत्र प्रथमा सूक्तस्य सप्तदशीमृचमाह॥ ॥ आश्विनावश्वावत्येषा यातं शवीरया। गोमद्दस्रा हिर ७३
ण्यवत्॥ इंद्रेण प्रेरितः शुनःशेपः अश्विनौ तुष्टाव तथा च ब्राह्मणं। तमिंद्र उवाचाश्विनौ नु स्तुहि अथ त्वोत्स्रक्ष्याम इति सोऽश्विनौ
तुष्टाव उत्तरेण तृचेनेति। हे अश्विनौ अश्वावत्या बहुभिः अश्वैर्युक्तया शवीरया प्रेर्यमाणया इषा अन्नेन सह आयातं अस्मिन्‌ कर्मण्या
गतं हे दस्रा अश्विनौ युवयोः प्रसादात्‌ गोमत्‌ बहुभिर्गोभिर्युक्तं हिरण्यवत्‌ बहुना हिरण्येन युक्तं अस्मदीयं गृहमस्त्विति शेषः। अश्वा
वत्या मंत्रे सा मा श्विंद्रियविश्वदेव्यस्य मतावितिदीर्घत्वं। इषा सव का चरति तृतीयायाः उदात्तत्वं। यातं या प्रापणे। लोटि तस्य तं अदा
दित्वाच्छपो लुक्‌। शवीरया। शुगतौ। शृ गृ भूपृ कटिप दिशिगादिभ्यः ईरन्‌ प्रत्ययो बहुवचनाद्‌ स्मादपि भवतीति नित्त्वादाद्युदात्तत्वम्॥

अष्टादशीमृचमाह॥ ॥समानयोजनो हि वां रथो दस्रावमर्त्यः॥ समुद्रे अश्विनेयते॥ हे दस्रावश्विनौ वां युवयोः संबंधी रथः समानयोजनः तुल्ययोजनः
युवयोर्द्वयोरपि रथारूढत्वादुभयार्थं समरूढ इव युज्यते युक्तः स रथः अमर्त्यो विनाशरहितः अप्रतिहतगतिरित्यर्थः। अत एव हे अश्विनौ दिवस्पृ 145
तसमुद्रे अंतरिक्षे ईयते गच्छति। समुद्र इति अंतरिक्षनामसु पठितं। समुद्रशब्दं यास्क एवं व्याचष्टे। समुद्रः कस्मात्‌ समुद्द्रवंत्यस्मादापः समभिद्रवंत्ये 1924
नमापः संमोदंतेऽस्मिन्‌ भूतानि समुदको भवति समुनत्तीति वेति। समानयोजनः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अमर्त्यः अव्ययपूर्वपदप्र
कृतिस्वरत्वं। ईयते। ईङ्‌ गतौ। अदुपदेशात्‌ लसार्वधातुकानुदात्तत्वे धातोः स्वरः आद्युदात्तत्वं हि चेति निघातप्रतिषेधः॥ ॥एकोनविंशीमृचमाह
॥ न्यघ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः॥ परि द्यामन्यदीयते॥ हे अश्विनौ युवां अघ्न्यस्य हंतुं विनाशयितुमशक्यस्य दृढस्य पर्वतस्य मूर्धनि उ
परि चक्रं मदीयरथ संबंधि एकं चक्रं नियेमथुः नियमितवंतौ अन्यच्च चक्रं परि द्यां परितो द्युलोकस्य परितः ईयते गच्छति। अघ्न्यस्य। अहन
नमघ्न्यः यत्प्रत्ययार्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थमिति हंतेः कप्रत्ययः अघ्नस्य हंत्यघ्न्यः छंदसि चेति यप्रत्ययः प्रत्ययस्वरेणांतोदात्तत्वं।
येमथुः यम उपरमे लिटि थलि अत एकहल्मध्य इत्येत्वाभ्यासलोपौ। प्रातरनुवाके आश्विनशस्त्रे उषस्ये क्रतौ गायत्रे छंदसि कस्त उषः इति तृचः
। अथोषस्य इति खंडे कस्त उष इति तिस्र इति सूत्रितं। तस्मिन्‌ सूक्ते प्रथमा सप्तविंशीमृचमाह॥ ॥कस्त उषः कधप्रिये भुजे मर्तो अमर्त्ये॥ कं न
क्षसे विभावरि॥ अश्विभ्यां प्रेरितः शुनःशेपः उषसं तुष्टाव। तथा च ब्राह्मणं॥ तमश्विनावूचतुरुषसं नु स्तुहि अथ त्वोत्स्रक्ष्याम इति स उषसं तु
ष्टाव उत्तरेण तृचेन तस्य ह स्म ऋच्युक्तायां विपाशो मुमुचे कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्यामेवर्च्युक्तायां विपाशो मुमुचे अगद ऐक्ष्वा
क आसेति। हे कधप्रिये स्तुतिप्रिये अमर्त्ये मरणरहिते उषः एतन्नाम्ना अभिधेये उषः कालाभिमानिनि देवते भुजे त्वद्भोगाय मर्तो मनुष्यः
कस्ते विद्यते। हे विभावरि विशिष्टप्रभावयुक्ते उषो देवि कं पुरुषं नक्षसे। आ प्नोषि न कोऽपि त्वद्भोगाय तुं न कोऽपि मनुष्यः समर्थः अत एव त्वं कम
पि पुरुषं भोगाय स्तुत्यान प्राप्नोषि। कधप्रिये शस्तवं महिमेत्यर्थः तमयावेनद्वचनस्येति युष्मच्छब्दस्य ते आदेशः सर्वानुदात्तः। कधप्रिये कथ
थ वाक्यप्रबंधे चुरादिरदंतः णौ अतो लोपस्य स्थानिवद्भावात्‌ उपधावृद्ध्यभावः चिंति पूजि कथि कुंबि चर्चश्चेत्यङ्‌ प्रत्ययः णेरनिटीति णि
लोपः णौ अतो लोपश्च न तत्टाप्‌। षष्ठीसमासे आपो संज्ञाछंदसोर्बहुलमिति ह्रस्वत्वं थकारस्य धकारः छांदसः आमंत्रितानुदात्तत्वं। भुजे
भुज पालनाभ्यवहारयोः संपदादिलक्षणः क्विप्‌ सावेकाच इति विभक्तेरुदात्तत्वं मर्तः असिहसीत्यादिना तन्प्रत्ययांत आद्युदात्तः नक्ष
से। नक्ष गतौ। विभावरि भादीप्तौ विपूर्वादस्मादातो मनिन्क्वनिब्वनिपश्चेति वनिप्‌ वनोरचेति ङीप्‌ तत्संनियोगेन नकारस्य रेफा
देशः अंतार्थं नत्वानदसत्वम इति रुत्वं॥ ॥एकविंशीमृचमाह॥ वयं हि ते अमन्मह्यान्तादा पराकात्‌॥ अश्वे न चित्रे अरुषि॥ अश्वे व्यापनशीले
चित्रे चायनीये अरुषि आरोचमाने उषः कालाभिमानिनि देवते तव स्वरूपं आंतात्‌ समीपपर्यंतं आ पराकात्‌ दूरपर्यंतं वयं मनुष्याः न अमन्महि
न बोद्धुं समर्थाः। हि शब्दः प्रसिद्धौ देवतामहिम्नः पारावारयोरज्ञानमस्माकं प्रसिद्धमित्यर्थः। अमन्महि मन ज्ञाने बहुलं छंदसीति बहुलवच
नात्‌ श्नालुकं लुङ्‌ लङ्‌ लृङ्‌क्ष्वडुदात्तः हि च इति निघातप्रतिषेधः। अश्वे अश्नोतेः अशूप्रुषि लटि कणि रसिभ्यः क्वन्‌ इत्यादिना क्वन्‌ प्रत्ययः। आमंत्रिताद्युदात्तत्वं।
॥ ॥द्वाविंशीमृचमाह॥ त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिवः॥ अस्मे रयिं नि धारय॥ हे दिवो दुहितः द्युदेवतायाः पुत्रि उषो देवि त्येभिर्वाजेभिः

भा॰प्र॰
७४

रश्विः सहृत्तमा गहि अश्वागच्छ। अस्मे अस्माकं रयिं धनं नि धारयतं नितरां स्थापयत। यैर्भिः बहुलं छंदसीति त्वं शब्दात् भिस ऐसादेशाभावः। गहि
असद्वृत्तं। दुहितर्दिवः परस्यामंत्रितस्य अंगवत्पूर्वस्मिन्नित्यन्वये सतिपूर्वतात् मृ आमंत्रितं इति परांगवद्भावेन पश्चामंत्रितं समुदायस्य सर्वानु
दात्तत्वं। यद्वा कार्यकाले हि संज्ञापरिभाषमिति न्यायेन मृ आमंत्रित इति अस्यामंत्रितस्य चेत्याष्टमिकेन योगेन च वाक्यतः सति परत्वात् परांगवः
द्भावे सति सर्वानुदात्तत्वं। उत्तरयोः षष्ठ्यामंत्रितयोः षष्ठ्या शब्दयोर्बहुलमिति व्यवहारयोगः ॥ अस्मे सुपां सुलुगिति सप्तम्याः शे आदेशः ॥ ॥
इति प्रथमस्य द्वितीये एकत्रिंशो वर्गः ॥ ॥ इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे प्रथममंडले षष्ठोनुवाकः समाप्तः ॥ ७ ॥ सप्तमे
नुवाके पंच सूक्तानि तत्र त्वमग्ने प्रथम इति प्रथमं सूक्तं अष्टादशर्चं आंगिरसो हिरण्यस्तूप ऋषिः अष्टमी षोडश्यष्टादश्यस्त्रिष्टुभः शिष्टाः
त्रिष्टुबंत परिभाषया जगत्योग्निर्देवता तथा चानुक्रमणिका त्वमग्ने षळूनाहिरण्यस्तूप आग्नेयं ह्यंतं त्रिष्टुबंत्याष्टमी षोडश्यौ चेति। प्रातरनुवाके
आग्नेये क्रतौ आश्विनशस्त्रे च त्वमग्ने प्रथम इति सूक्तं। अथ तस्यादौ अग्निस्तवे त्वमग्ने प्रथमो अंगिरा ऋषिः नृचिन्त्य होता अमृतानि तु इत्
इति सूक्तं। अभिप्लवषडहस्य तृतीयेहनि आग्निमारुते शस्त्रे इदं सूक्तं जातवेदस्यनिविद्धानीयं तथा च तृतीयस्य सर्वमिति खंडे सूत्रितं। त्वम
ग्ने प्रथमो अंगिरा इत्याग्निमारुतमिति वाजपेये आग्निमारुते एतत्सूक्तं जातवेदस्यनिविद्धानीयं तृतीयेनाग्निप्लविकेनातं तृतीयसवन
मित्यतिदिष्टत्वात् ॥ ॥ तस्मिन्सूक्ते प्रथमामृचमाह ॥ त्वमग्ने प्रथमो अंगिरा ऋषिर्देवो देवानामभवः शिवः सखा ॥ तव व्रते कवयो विद्मनापसो
जायंत मरुतो भ्राजदृष्टयः ॥ हे अग्ने त्वं प्रथमः आद्यो देवः आंगिरसानामृषीणां सर्वेषां जनकत्वात् ताद्रूप्यं गिरोनामन्येषां शिवः शोभनः स
खाभवः। तव व्रते त्वदीये कर्मणि कवयो मेधाविनः विद्मना पसो ज्ञानेन व्याप्तवानाः ज्ञातकर्माणो वा भ्राजदृष्टयः दीप्यमानायुधाः मरुतो मरुत्संज्ञ
का देवाः अजायंत। विद्मनापसः विदज्ञाने विद्यावेदनं बहुलवचनादौणादिको मक् प्रत्ययः तदस्यास्तीति पामादिलक्षणो नः प्रत्ययस्वरेणांतोदा
त्तत्वं विद्मनान्यपांसि येषां ते विद्मनापसः। पूर्वपदस्य अन्येषामपि दृश्यत इति छांदसदीर्घत्वं। अजायंत जनिप्रादुर्भा
वे तस्य लङि ज्ञाजनोर्जा इति जा देशः। भ्राजदृष्टयः भ्राजद्दीप्तौ व्यत्ययेन शप् तस्य लसार्वधातुकानुदात्तत्वे धातुस्वरः अधीगताविप्रत्यक्षेति कीच
संज्ञामिति क्तिन्नंतः ऋष्टिशब्दः। तत्र बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ॥ द्वितीयामृचमाह ॥ त्वमग्ने प्रथमो अंगिरस्तमः कविर्देवानां परि भूष
सि व्रतं ॥ विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे ॥ हे अग्ने त्वं प्रथम आद्यः अंगिरस्तमः अतिशयेनांगिरा भूत्वा
कविः मेधावी सन् देवानामन्येषां व्रतं कर्म परिभूषसि परितोलंकरोषि। कीदृशस्त्वं विश्वस्मै भुवनाय समस्तलोकानुग्रहार्थं विभुः बहुविध आ
हवनीयाद्यनेकरूपधारीत्यर्थः ॥ मेधिरो मेधावान् द्विमाता द्वयोररण्योः संतानः यद्वा द्यावा लोकयोर्निर्माता आयवे मनुष्यार्थं कतिधा चित् क
तिभिः प्रकारैः सर्वत्र शयुः शयानः तत्र तत्र मनुष्यगृहेवस्थितस्य तव प्रकारा इयंत इति केनापि ज्ञायत इत्यर्थः। भूषसि भूषणअलंकारे भौवा
दिकः विभुः विप्रसंभ्यो ड्वसंज्ञायामिति विपूर्वाद्भवतेर्डु प्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वं। भुवनाय भूसूधूभ्रस्जिभ्यः छंदसीति क्युन् योर
नादेशः नित्स्वरेणाद्युदात्तत्वं। मेधिरः मेधृसंगमे च। अस्माद्बाहुलकात् इरन् प्रत्ययः नित्स्वरः। द्विमाता द्वे माता यस्या सौ द्विमाता नद्यृतश्चेति क
प्रत्ययो न भवति मातृमातृकमातृकेषु वेति पाक्षिकत्वात् नद्यृतश्चेति कप् विभाष्यत इति तस्य मातृशब्दस्य पाक्षिकत्वात् निः स्त्रिच कप्ताद्बहुव्रीहौ अत्र ७४

पदांतोदात्तत्वं। यद्वा द्यावा भूमी द्विमाता समासस्येत्यंतोदात्तत्वं शयुः शीङ् स्वप्ने भृमृशीत्यादिना उ प्रत्ययः कतिधा इत्यत्र किमः संख्यापरिमाणे डति च बहुगण
वतुडति संख्येति संख्यासंज्ञायां संख्याया विधार्थे धेति धा प्रत्ययः। आयवे छंदसीण इत्येतरण प्रत्ययः ॥ ॥ तृतीयामृचमाह ॥ त्वमग्ने प्रथमो 147
मातरिश्वन आविर्भव सुक्रतूया विवस्वते ॥ अरेजेतां रोदसी होतृवूर्येसघ्नोर्भारमयजो महो वसो ॥ हे अग्ने त्वं मातरिश्वन प्रथमो मुख्यो भूत्वा
वर्तसे अग्निर्वायुरादित्य इति वेपापेक्षया सर्वत्र मुख्यत्वावगमात् ताद्रूप्यं त्वं सुक्रतूया शोभनकर्मेच्छया विवस्वते परिचरते यजमानाय 1424
आविर्भव प्रकटीभव ॥ तव सामर्थ्यं दृष्ट्वा रोदसी द्यावापृथिव्यौ अरेजेतां अकंपेतां भ्यसने रेजत इति भयवेपनयोरिति यास्कः। होतृवूर्ये
होतृवरणयुक्ते कर्मणि भारं भरणं असघ्नोः उढवानसि हव्यसोनिवासहेतो वन्नेमहः पूज्यो देवान यजः इष्टवानसि। मातरिश्वने निर्माणि
हेतुत्वान्माता तां तरिश्वं तत्र श्वसिति प्राणितीति मातरिश्वा वायुः श्वन्नुक्षन्नित्यादौ मातरिश्वन शब्दः कनिन् प्रत्ययांतो निपातितः सुक्रतूः
या सुक्रतुमात्मन इच्छति सुप आत्मनः क्यच् अकृत्सार्वधातुकयोरिति दीर्घः क्यजंतस्य धातुसंज्ञायां अ प्रत्यय इति भावे आकार
प्रत्ययः तत टाप् सुपां सुलुगिति तृतीयैकवचनस्य डादेशः टिलोपः उदात्तनिवृत्तिस्वरेण कर्मा असमा तेपा टादिलक्षणः क्विप्प्रत्यये
लोपधात्स्वत्वं। तदस्यास्तीति मतुप मादुपधाया इति मातोर्वत्वं तसौ मत्वर्थ इति भयत्वेन पदत्वाभावात् रत्वाभावः मतुपः पिता
दनुदात्तत्वं। धातुः स्वरः शिष्यते रोदसी वा छंदसीति पूर्वसवर्णदीर्घत्वं। होतृवूर्ये होत्रा वित्रियत इति होतृवूर्ये यज्ञः वृञ् वरणे बहुल
वचनादौणादिकः क्यप् अनित्यमागमशासनमिति तुगभावः अकृत्सार्वधातुकयोरिति दीर्घत्वपूर्वत्वं उत्वं दीर्घो प्रत्ययस्यापि
दानादनिघातः अयजः भारमित्यस्य पूर्वपदस्य वाक्यांतरगतत्वात् सुपो भयास्यनिघातान भवति। समाने वाक्ये निघा
तं युष्मदस्मदादेशा वक्तव्या इति वचनात्। महः पूजायां क्विप् सुपां सुपा भवंतीति ङसो डु सादेशः सावेकाच इति तस्योदात्
तं। यद्वा त्वामितिसहसस्य अछ लोपः छांदसः अदन्त हतार यसंख्यानमिति ङसः उदात्तत्वं ॥ ॥ चतुर्थीमृचमाह ॥ त्वमग्ने
मनवे द्यामवाशयः पुरूरवसे सुकृते सुकृत्तरः ॥ श्वात्रेण यत्पित्रोर्मुच्यसे पर्यात्वा पूर्वमनयन्नापरं पुनः ॥ हे अग्ने त्वं मनवे मनोरनुग्र
हार्थं द्यां द्युलोकं अवाशयः शब्दितवानसि पुण्यकर्मभिः साध्यो द्युलोक इति प्रकटितवानसि सुकृते न च परिचरणं कुर्वते पुरूरव
से तन्नामकस्य राज्ञोनुग्रहार्थं सुकृत्तरः अतिशयेन शोभनकार्योभिः यद्यदा पित्रोररण्याः श्वात्रेण क्षिप्रमथनेन परिमुच्यसे
पश्चात् परं प्रथमदेशं अनयन् गार्हपत्यरूपेण प्राप्तितवंतः आहवनीयत्वेन स्थापितवंतः पुनः
अवाशयः वाशृशब्दे पुरूरवसे पुरु रौतीति पुरूरवा रुशब्दे अस्माद्दौणादिके सुनि पुरसि च पुरवा इति पूर्वपदस्य दीर्घो निपात्यते ॥ सु
कृत सुकर्मपापमंत्रपुण्येषु कृञ् इति क्विप् तत्कृतयिवोः उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। मुच्यसे अदुपदेशात् लसार्व
धातुकानुदात्तत्वे यक्यपि सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात् विकरणस्वरः सतिशिष्टोपि लसार्वधातुकस्य ..

भा॰प्र॰ ७५.

रस्य बाधको न भवति। तथापि धातुस्वरं आ स्वरः उपजनवान्। अतो यण्स्वरे प्राप्तेऽप्यत्ययेनाद्युदात्तत्वं॥ ॥पंचमीमृचमाह॥ त्वमग्ने वृ
षभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः॥ य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवाससि॥ हे अग्ने त्वं वृषभः कामा
नां वर्षिता पुष्टिवर्धनो यजमानस्य धनादिभिः पोषाभिवृद्धिः उद्यतस्रुचे उद्यतया स्रुचा युक्ताय यजमानाय तदनुग्रहा
र्थं श्रवाय्यः मंत्रैः श्रवणीयो भवसि। यो यजमानो वषट्कृतिं वषट्कारयुक्तामाहुतिं परि वेद परितो जानाति सम्पर्यतीत्यर्थः।
एकायुः मुख्यायुः त्वमग्ने प्रथमं तं यजमानं विशः तदनुकूलाः प्रजाः आविवाससि सर्वतः प्रकाशयसि। पुष्टिवर्धनः पुष्टेर्धाता।
असमासेऽपि तन्नान्धात्वित्वात् कृत्तिकर्मणो नरपदस्याद्युदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वेन समासस्वरोऽपि बाध्यते॥ उद्यतस्रुचे। यम उप
रमे अस्मात् कर्मणि निष्ठा। प्रत्ययोऽनुदात्तोपदेशेत्यादिना अनुनासिकलोपः। गतिरनन्तर इति गतेः प्रकृतिस्वरत्वं। उद्यता स्रुक् येनेति बहुव्री
हौ पूर्वपदप्रकृतिस्वरत्वं। वेदः। अन्येषामपि दृश्यत इति संहितायां दीर्घत्वं॥ ॥इति प्रथमस्य द्वितीये द्वात्रिंशो वर्गः॥ ॥षष्ठीमृचमाह॥ त्वमग्ने
वृजिनवर्तनिं नरं सक्मन् पिपर्षि विदथे विचर्षणे। यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता हंसि भूयसः॥ हे विचर्षणे विशि
ष्टज्ञान मुत मग्ने वृजिनवर्तनिं वृजिनं मार्गं सदाचाररहितं नरं पुरुषं सक्मन् सचनीये समवेतुं योग्ये विदथे यज्ञकर्मणि पिपर्षि पालयसि
पूरयसि वा सत्कर्मानुष्ठानयुक्तं करोषीत्यर्थः॥ यस्त्वं परितक्म्ये परितो गन्तव्ये धने निमित्ते शूराणां प्रियते शूरसाता शूरैः संभजनीये यु
द्धे दभ्रेभिश्चित् अल्पैरपि शौर्यरहितैः पुरुषैः दभ्रमर्भकमित्यल्पस्येति यास्कः॥ समृता सम्यक् योद्धुं प्राप्ता सति तदनुग्रहार्थं भूय
सः प्रौढान् प्रतिपक्षिणः शत्रून् हंसि मारयसि ईदृशस्त्वं महानित्यर्थः॥ वृजिनवर्तनिं। वृजिना वर्तनी यस्येति बहुव्रीहौ पूर्वपदप्र
कृतिस्वरत्वं॥ सक्मन्। षच समवाये। अन्येभ्योऽपि दृश्यंत इति मनिन्। न ङिसंबुद्ध्योरिति नलोपप्रतिषेधः। चोः कुरिति कुत्वं। सुपां सुलुगिति
सप्तम्या लुक्। पिपर्षि। पॄ पालनपूरणयोः। सिपि श्लौ द्विर्भावे उत्त्वं रपरत्वं हलादिशेषः॥ अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं॥ शूरसा
ता शूराणां। शूर विक्रान्तौ दीर्घश्चेति शूरशब्दो रक्प्रत्ययांत आद्युदात्तः। वन षण संभक्तावित्यस्मात् क्तिन्। तनः सातिः शब्दः। जनसनखनां
सञ्झलोरित्यात्वं। शूराणां सातिः संभजनं यस्मिन्निति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। सुपां सुलुगिति सप्तम्या डादेशः। परितक्म्ये तक हस
ने अस्मात् औणादिको भावे मक्। तदर्हतीति छंदसि चेति यः। प्रादयो गताद्यर्थे प्रथमयेति समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं। दभ्रे
भिः। दंभु दंभे। स्फायितंचीत्यादिना रक्। बहुलं छंदसीति भिस ऐसादेशाभावः॥ समृता। गतिरनन्तर इति गतेः प्रकृतिस्वरत्वं। पूर्ववत्
डाकारः। हंसि। हंतेर्लटि सिपि नश्चापदांतस्येत्यनुस्वारः। यद्वृत्तयोगात् निघातः। भूयसः। बहोर्लोपो भू च बहोरिति बहुशब्दादुत्तरस्यनु
रस्य यम ईकारलोपः बहोर्भूभावश्च नित्वादाद्युदात्तत्वं॥ ॥सप्तमीमृचमाह॥ त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे
दिवेदिवे। यस्तातृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सूरये॥ हे अग्ने त्वं तं मर्तं तथाविधं त्वां सेवितुं मनुष्यं दिवे दिवे प्रतिदिनं ७५.
श्रवसे आर्थं उत्तमे अमृतत्वे उत्कृष्टे मरणरहिते पदे दधासि धारयसि। यो यजमानः उभयाय जन्मने द्विपदां चतुष्पदां लाभा
यं त्यर्थः तातृषाणः अतिशयेन तृष्णायुक्तो भवति तस्मै सूरये अभिज्ञाय यजमानाय त्वं मयः सुखं प्रयः अन्नं च आ कृणोषि तरातमयश्च

अन्नमपि आकृणोषि सर्वतः करोषि। तातृषाणः ञितृषा पिपासायां लिटः कानच् अभ्यासस्य दीर्घश्छांदसः। आद्युदात्तत्वं। संहितायां दीर्घश्छांदसः। कृणोषि कृवि हिंसा
करणयोश्च। धिन्विकृण्व्योरच्चेत्युप्रत्ययः। चादिलोपे विभाषेति निघातप्रतिषेधः॥ ॥अष्टमीमृचमाह॥ त्वं नो अग्ने सनये धनानां यशसं कारुं 149
कृणुहि स्तवानः। ऋध्याम कर्मापसा नवेन देवैर्द्यावापृथिवी प्रावतं नः॥ हे अग्ने स्तवानः स्तूयमानस्त्वं नोऽस्माकं धनानां सनये दानार्थं यशसं यशोयुक्तं का
रुं कर्मणां कर्तारं पुत्रं कृणुहि। कुरु। नवेन नूतनेन अपसा प्रामेन त्वद्दत्तेन पुत्रेण कर्म यागदानादिरूपं ऋध्याम वर्धयाम। हे द्यावापृथिवी उभे देवते देवैर 1924
न्यैः सह नोऽस्मान् प्रावतं प्रकर्षेण रक्षतं। यशसं। अर्शआदिभ्योऽच्प्रत्ययः। प्रत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वं। यद्वा सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्य इति
यशः शब्दात् क्विप्। तस्य प्रत्ययांतत्वात् धातुसंज्ञायां क्विपिति क्विप्॥ प्रत्ययांतधातोः सतिशिष्टत्वाद्युदात्तत्वं। कृणुहि। उतश्च प्रत्यया
च्छंदोवा वचनमिति हेर्लुगभावः। स्तवानः। ष्टुञ् स्तुतौ बहुलवचनात् केवलस्यापि चानश् प्रत्ययः आद्युदात्तत्वं। ऋध्याम। ऋधु
वृद्धौ बहुलं छंदसीति विकरणस्य लुक्। यासुट् उदात्तत्वं। द्यावापृथिवी। दिवो द्यावेति द्यावादेशः। आमंत्रितानुदात्तत्वं॥ ॥नवमीमृचमाह॥ त्वं
नो अग्ने पित्रोरुपस्थ आ देवो देवेष्वनवद्य जागृविः। तनूकृद्बोधि प्रमतिश्च कारवे त्वं कल्याण वसु विश्वमोपिषे॥ हे अनवद्य दोषरहिताग्ने देवेषु
सर्वेषु मध्ये जागृविः जागरूकस्त्वं पित्रोर्मातापितृरूपयोर्द्यावापृथिव्योरुपस्थे समीपस्थाने आ देवः वर्तमानः सन् नोऽस्माकं तनूकृत् पुत्ररूपशरी
रकारी भूत्वा बोधि बुध्यस्व अनुग्रहाणेत्यर्थः। तथा कारवे कर्मकर्त्रे यजमानाय प्रमतिश्च अनुग्रहरूपप्रकृष्टमतियुक्तश्च भवेति शेषः। हे क
ल्याण मंगलरूपाग्ने त्वं विश्वं वसु सर्वमपि धनं ओपिषे यजमानार्थमावपसि। डुवप बीजसंताने। कृत्प्रत्ययः आतो लोप इटि चेत्याका
रलोपः मरुद्वृधादीनां छंदस्युपसंख्यानमिति पूर्वपदांतोदात्तत्वं। जागृविः जागृ निद्राक्षये। जॄशॄस्तृजागृभ्यः क्विन्निति क्विन्। नित्वादाद्युदात्तत्वं॥ बो
धि बुध अवगमने बहुलं छंदसीति शपो लुक्। छंदसि लिट् ... अडिन्त्वसति अडिन्त्श्च ... दिर्धिरादेशः। लघूपध
गुणः धातोरंत्यलोपः छांदसः। प्रमतिः मन ज्ञाने। क्तिन्। अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः। प्रकृष्टा मतिर्यस्येति बहुव्रीहौ पूर्वप
दप्रकृतिस्वरत्वं। ओपिषे डुवप बीजसंताने। छंदसि लिट् थासः से वचिस्वपीत्यादिना संप्रसारणं परपूर्वत्वं द्विर्भावहलादिशेषौ काद्विनियमा
दिट्॥ ॥दशमीमृचमाह॥ त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयं। सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यंति व्रतपामदाभ्य॥ हे
अग्ने त्वं प्रमतिः अस्मदनुग्रहरूपप्रकृष्टमतियुक्तोऽसि। तथा त्वं नोऽस्माकं पिता पालकोऽसि। तथा त्वं नोऽस्माकं वयस्कृत् आयुष्यप्रदोऽसि वयमनुष्ठातारस्त
व जामयो बंधवः। हे अदाभ्य केनाप्यहिंसनीयाग्ने सुवीरं शोभनपुत्रयुक्तं व्रतपां कर्मणः पालकं त्वां शतिनः शतसंख्यायुक्ताः रायो धनानि संयं
ति सम्यक् प्राप्नुवंति। तथा सहस्रिणः सहस्रसंख्याका रायः संयंति। सुवीरं बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। व्रतपां व्रतपा इति
रपदाद्युदात्तत्वं। अदाभ्य। दभिः प्रकृतिरमर्त्यानि किंचिदाहुः दंभेश्चेति यत् ण्यमिति ण्यत्॥ ॥इति प्रथमस्य द्वितीये त्रयस्त्रिंशो वर्गः॥ ॥
एकादशीमृचमाह॥ त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुषस्य विश्पतिं। इळामकृण्वन्मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य जायते॥ हे अ
ग्ने त्वां पुरा देवाः प्रथमं पुरा देवाः आयवे आयोर्मनुष्यरूपस्य नहुषस्य एतन्नामकराजविशेषस्य आयुं मनुष्यरूपं विश्पतिं सेनापतिं अकृण्वन् कृत
वंतः। तथा मनुष्यस्य मनोः इळां एतन्नामधेयां पुत्रीं शासनीं धर्मोपदेशकर्त्रीं अकृण्वन् कृतवंतः। तथा चैत्तिरीये आम्नायते। इळा वै मा

नवीयसा नूतनेन कान्त्यासीदिति। यास्मनेन पितॄव्यवमामनंति। प्रयाजानुयाजानां मध्ये यत् यदा ममकस्य मदीयस्य हिरण्यरूपसंबंधिनो यः पितांगि
भा॰प्र॰ राः तस्य पितुः पुत्रो जायते तदानीं हे अग्ने त्वमेव पुत्ररूप आसीरिति शेषः॥ आयवेत्यत्र अर्थे चतुर्थी व्यत्ययेन चतुर्थी। नहुषस्य णह बंधने
७६ हिकलिहन्यर्तिलसिभ्यः उषच्प्रत्ययादिलात्युदात्तत्वं॥ विश्पतिं पत्यावैश्वर्य इति छंदसि वहुलमिति उत्तरपदाद्युदात्तत्वं। मनुष्यस्य मनोर्नष्टि स्वप च बाहु
कान्त्यभावः। पूर्वपदाद्युदात्तत्वं। शासनीं शिष्यते नयेति। शासनीकरणाधिकरणयोश्चेति ल्युट्। टिड्ढाणञित्यादिना ङीप्। लित्स्वरेणाद्युदात्त
त्वं॥ ममकस्य ममेदमित्यर्थे तस्येदमित्यणि तवकममकावेकवचन इत्यस्मच्छब्दस्य ममकादेशः। संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः। व्यत्य
येनाद्युदात्तत्वं॥ ॥ द्वादशीमृचमाह॥ त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वंद्य। त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाण
स्तव व्रते॥ हे वंद्य वंदनीयाग्ने देव त्वं तव पायुभिस्त्वदीयैः पालनैः मघोनो धनयुक्तानस्मान् रक्ष। तथा तन्वश्च तनूः पुत्रादीनपि रक्ष। तोकस्यास्म
दीयस्य पुत्रस्य यस्तनयस्तस्मिन् त्राता त्वमसि त्वदीये कर्मणि अनिमिषं निरंतरं रक्षमाणः सावधानो वर्तते तस्मिन् तनये या गावः संति तासां
गवां त्राता रक्षकोसि इदानीमस्य तव व्रते कर्मणि विमुच्यत्वमित्यर्थः॥ मघोनः श्वयुवमघोनामतद्धित इति संप्रसारणं। तन्वः सुपां सुपो
भवंतीति शसो जसादेशः पूर्वसवर्णदीर्घस्य दीर्घाज्जसि चेति प्रतिषेधः। उदात्तस्वरितयोर्यण इति स्वरितत्वं शासिहितउदात्तयणो हल्पूर्वादि
ति विभक्त्युदात्तत्वं स्यात्॥ ॥ त्रयोदशीमृचमाह॥ त्वमग्ने यज्यवे पायुरंतरोनिषंगाय चतुरक्ष इध्यसे। यो रातहव्योवृकाय धायसे की
रेश्चिन्मंत्रं मनसा वनोषि तं॥ हे अग्ने त्वं यज्यवे यज्वने यजमानस्य पायुः पालयिता इंद्रियस्थानीयत्वात् युक्तः उ इध्यसे दीप्यसे अवृकायाहिंसकाय धा
यसे पोषकाय तुभ्यं रातहव्यो दत्तहविः यो यजमानोस्ति कीरेश्चित्स्तोतुरेव मंत्रं स्तोत्रं तस्य संबंधिनं मंत्रं त्वदीयस्तोत्ररूपं मनसा वनोषि
वसि। यज्यवे यजिमनिशुन्धित्यादिना यजेर्युप्रत्ययः। पायुः कृवापाजीत्यादिना उण् आतो युगागमः॥ अनिषंगाय। षञ्ज संगे। नञि षञ्जेर्नि
षंगोस्येति बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदांतोदात्तत्वं। चतुरक्षः चत्वार्यक्षीणि ज्वालारूपाणि यस्यासौ चतुरक्षः। बहुव्रीहौ सक्थ्यक्ष्णोरिति षु
गागमः। कीरेः कृ तसंशब्दने। अस्मादंतादवइरिति प्रत्ययः णिलोपः धातोरयंतलोपः छांदसः। मंत्रं मंत्रि गुप्तभाषणे। पचाद्यच्। नित्स्वरेण पाचिपुणाया
द्युदात्तत्वं। वनोषि वनु याचने तनादिभ्य उः प्रत्ययस्वरः॥ ॥ चतुर्दशीमृचमाह॥ त्वमग्न उरुशंसाय वाघते स्पार्हं यद्रेक्णः परमं वनोषि
तत्॥ आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः॥ हे अग्ने त्वं उरुशंसाय बहुभिः स्तोतव्याय वाघते ऋत्विजे तदुपकारा
र्थं स्पार्हं स्पृहणीयं परमं उत्तमं यद्रेक्णः धनं यदस्ति तद्धनं वनोषि अनुयाजानालभनाभितिकामयसे। तथा त्वं आध्रस्य चित् सर्वतो धारणी
यस्य पोषणीयस्य दुर्बलस्य यजमानस्यापि प्रमतिः प्रकृष्टबुद्धियुक्तः पिता पालक उच्यसे अभिधीयसे तथा विदुष्टरो विद्वत्तरः त्वं पाकं
शिशुं पातः पाकार्भकादिभ इत्यभिधानात्। यास्कोप्याह॥ पाकः पक्तव्यो भवतीति तथाविधं यजमानं प्रशासि प्रकर्षेणानुशास्सि। तथा
दिशः प्राच्यादिकाः प्रशास्सि तद्यथा सतो भावेनुष्ठातृणां विभ्रमः स्यात्। तथा च श्रूयते। यज्ञेन मस्य च सायदिशो भन् प्रज्ञानन्निति
सर्वमादक्षिणादिग्भागान्नितानि वर्तते॥ तदपि तत्रैवाम्नातं अथोत्तरवर मर्णमिमं यच्च प्राचीं दिशं प्रज्ञानाभाग्निनादक्षिणामिति। उ ७६
रुशंसाय। शंसु स्तुतौ कर्मणि घञ्। नित्स्वरेणाद्युदात्तत्वं। उदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते स्पार्हं। स्पृहासंबंधि

तस्येदमित्यनुरेक्णः रिचिर् विरेचने। रिचेर्धने घिच्चेत्यसुन् चकारान्नुडागमः च जो अघिण्यतोरिति कुत्वं। आध्रस्य ध्रेञ्जो आदेच उपदेशेऽशिती
त्यात्वं आतश्चोपसर्ग इति कप्रत्ययः। शासि शासु अनुशिष्टौ। अदादित्वाच्छपो लुक् सिप्। पित्वादनुदात्तत्वे धातुस्वरः। पाकं च प्रशास्सि दिशश्च
प्रशासीति अत्र चार्थो गम्यते॥ अतश्चातिङ इति प्रथमा तिङ्विभक्तिर्न निहन्यते॥ विदुष्टरः विद्वच्छब्दात् तरप् अमसमासादिति छंद
सीति भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं परपूर्वत्वं शासिवसीति षत्वं। तरपः पित्वादनुदात्तत्वे वसोः स्वरेणाकार उदात्तः॥ ॥ पंचद
शीमृचमाह॥ त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः॥ स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोपमा दिवः॥ हे अग्ने
प्रयतदक्षिणं येन यजमानेन ऋत्विग्भ्यो दक्षिणा दत्ता तादृशं नरं पुरुषं यजमानं विश्वतः सर्वतः परिपासि सम्यक् पालयसि तत्र दृष्टांतः
स्यूतं निश्छिद्रं सूचीभिः सम्यक् निष्पादितं वर्मेव यथा कवचं युद्धे पालयति तद्वत्। स्वादुक्षद्मा स्वादून्नः वसतौ निवासभूते स्वगृहे स्योनकृत्
अतिथीनां सुखकारी यो यजमानो जीवयाजं जीवयजनसहितं यज्ञं यज्ञद्रव्यं निष्पाद्य यजते। अनुतिष्ठति स यजमानो दिवः स्वर्गस्योपमा इहलोके
भवति यथा स्वर्गोनुष्ठातॄन् सुखयति तथायमप्यतिथ्यादीनित्यर्थः। स्यूतं षिवु तंतुसंताने निष्ठेति क्तः यस्य विभाषेतीट्। प्रतिषेधश्छ्वोः
शूडनुनासिके चेति वकारस्य ऊठादेशः। स्वादून्यक्षदतीति स्वादुक्षद्मा क्षदतिरत्तिकर्मा अन्येभ्योपि दृश्यंत इति मनिन्। नित्वादाद्यु
दात्तत्वं उत्तरपदप्रकृतिस्वरत्वं च। बहुव्रीहौ तु व्यत्ययेन जीवयाजं जीवाः क्वचित् इज्यंते दक्षिणाभिः पूज्यंते अत्र अधिकरणे घञ् कुत्वाभावः छांद
सः यद्वा जीवैः पशुभिर्याजनं जीवयाजः यजतेर्घञ् णेरनिटीति णिलोपस्य अचः परस्मिन्निति स्थानिवद्भावाज्जो कुघिण्यतोरिति कुत्वाभा
वः थाथादिस्वरेणांतोदात्तत्वं। सोपमा सो चिल्लोपे चेत्पादपूरणमिति संहितायां सोर्लोपः दिवः ऊडिदंपदादीति विभक्तेरुदात्तत्वं॥ ॥ इति प्र
थमस्य द्वितीये चतुस्त्रिंशो वर्गः॥ ॥ इमामग्न इत्यनया अनाहिताग्निरग्निं त्यक्त्वा स्वाग्नावाहुतिं जुहुयात्॥ कल्पितं शरणीनं इति खंड एवम
नाहिताग्नेश्च इमामग्ने शरणिं मीमृषो न इति सूत्रितं॥ तामेतां सूक्तपोडशीमृचमाह॥ ॥ इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम
दूरात्। आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानां॥ नोस्मत्संबंधिनी इमामिदानीं संपादितां शरणिं हिंसां व्रतलोपरूपां मीमृषः क्ष
मस्व तथा त्वदीयसेवां अग्निहोत्रादिरूपां परित्यज्य दूरात् दूरदेशनिमित्तं यमिममध्वानं अगाम वयं गतवंतः तमपि क्षमस्वेति शेषः। सोम्यानां
सोमार्हाणां मनुष्यातृणां मर्त्यानां त्वमाप्यादिगुणयुक्तोसि आपिः प्रापणीयः पिता पालकः। प्रमतिः प्रकृष्टः मननयुक्तः भृमिः भ्रामकः कर्मनिर्वाह
क इत्यर्थः। ऋषिकृत् दर्शनकारी अनुष्ठिष्टस्य प्रत्यक्षो भवसीत्यर्थः॥ शरणिं। शृ हिंसायामित्यस्मादौणादिकोनिप्रत्ययः। मीमृषः मृष
तितिक्षायां अस्माण्णौ चङि गुणो प्राप्तो नित्यं छंदसीति उपधाऋकारस्य ऋकारादेशः णिलोपः द्विर्भाव हलादिशेषोरदत्वं सन्वद्भावेत्व दीर्घत्वानि।
तिङ्ङतिङ इति निघातः। अगाम। इण् गतौ इणो गा लुङीति गादेशः गातिस्थेति सिचो लुक् अडागम उदात्तः। भृमिः। भ्रमु अनवस्थाने। भ्रमेः सं
प्रसारणं चेतीन् प्रत्ययः संप्रसारणं। परपूर्वत्वं। इगुपधात्किदित्यनुवृत्तेः कित्वाद्गुणप्रतिषेधः। नित्वादाद्युदात्तत्वं॥ ॥ सप्तदशीमृचमाह॥ मनुष्व
दग्ने अंगिरस्वदंगिरो ययातिवत्सदने पूर्ववच्छुचे। अच्छ याह्यावहा दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियं॥ हे शुचे शुद्धियुक्त अंगिरोगन्त्री
रुह्यविरादानाय तत्र तत्र गमनशीलाग्ने अच्छ आभिमुख्येन सदने देवयजनदेशे याहि गच्छ॥ तत्र च त्वा रोदृशांताः। मनुष्वत्। यथा मनुरनुष्ठान

157/1924

भा०प्र०
११

देवान्गच्छति। अंगिरस्वत् यथांगिरा गच्छति ययातिवत् यथा ययातिर्नाम राजा गच्छति पूर्ववत् अन्ये च पूर्वे पूर्वपुरुषा यथा गच्छंति तथा आमन्त्वाद्योयज्ञेग
च्छति इत्यग्ने त्वं दैव्यं दैवतासमूहं अच्छ यन्नमावह अस्मिन्कर्मण्यानय। अनीयद्बर्हिषि अस्मिन् बर्हिषि आसादय तान्देवानुपवेशय उपवेशय
प्रियमभीष्टं हविः देहि मनुष्वत्तेन तुल्यमिति प्रथमार्थे वा तत्र तस्येव तिष्पस्थर्थे वा वतिः अयस्मयादित्वेन भत्वात्तरः तात्पभावः प्रत्ययस्वरः
एवमंगिरस्वदित्यादिषु। वहह्व चानम्लिङ् इति संहितायां दीर्घः। यद्यिकादिवचु लं छंदसीति पालुक् सत्यपि इति ह्रस्वभावः स्यादसः पवनकत्वेन साम्नि
चयेन कृता इन्ताम् संभरणीयायामिष्टाववर्त्रं ब्राह्मणं तत् पुरोनुवाक्याएतेनाग्ने इत्येषा दर्शपूर्णमासाभ्यामिष्ट्वेतिखंडे एतेनाग्ने ब्रह्मणा वावृधस्व। श्र
क्षंच ते ज्ञानं वर्धनमश्वति सूत्रितं। तामेतां स्कंदरा द्वाविंशमित्यमाह। ॥ एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा। उत प्रणेष्यभिवस्यो
अस्मान्संनः सृज सुमत्या वाजवत्या॥ हे अग्ने एतेन अस्मत्प्रयुक्तेन ब्रह्मणा मंत्रेण वावृधस्व अभिवृद्धो भव॥ शक्ती वा विदा वा अस्मदीयशक्त्या
स्मदीयज्ञानेन च यत्तेनयन्नस्तोत्रं कर्म वयं कृतवंतः एतेन ब्रह्मणेति पूर्वेणान्वयः। उत अपि च अस्माननुष्ठातन् वस्यः वसुमत्तरं लक्षणं श्रेयः प्र
णेषि प्रकर्षेण प्रापयन्नो अस्मान्वाजवत्याः अन्नभूतायाः सुमत्या अनुष्ठानविषयशोभनबुद्ध्या संसृज संयोजय॥ वावृधस्व। वृधु वृद्धौ। लेड्यडागमे बहुलं
छंदसीति शपः श्लुः द्विर्भावे हलादिशेषोरत्वात् अभ्यासस्य संहितायां दीर्घश्छांदसः॥ शक्ती। सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घत्वम्। तित्स्वरिते
नान्तोदात्तत्वं। विदा। सावेकाचस्तृतीयादिरिति तृतीयायाउदात्तत्वं। नेषि। णीञ् प्रापणे। बहुलं छंदसीति शपो लुक्। उपसर्गाद्समासे इति णत्वं। समृत्याम्
न क्तिच् क्तावित्यादिना नञ्पदात्तो दात्तत्वं प्रथमाध्यायस्य पंचितं दात्तस्वर्णोहलपूर्वादिति विभक्तेरुदात्तत्वं। ॥ इति प्रथमस्य द्वितीये पंचत्रिंशो वर्गः
॥ ॥ इंद्रस्य नु वीर्याणि प्रति पंचदशर्चं द्वितीयं सूक्तं। आंगिरसो हिरण्यस्तूप ऋषिः त्रिष्टुप् छंदः इंद्रो देवता। इंद्रस्य पंचोनेत्यनुक्रमणिका॥
अग्निष्टोमे माध्यंदिनसवने निष्केवल्य शस्त्रे इंद्रस्य नु वीर्याणीति तानि द्विधानीयं सूक्तं। निष्केवल्येति खंडे इंद्रस्य नु वीर्याणीत्यस्मिन्निंद्रीति
विदंद्यादिति विषुवत्यपि तस्मिन् शस्त्रे एतदेव सूक्तं द्विधा निविद्धानीयं इति खंडे सूत्रितं। इंद्रस्य नु वीर्याणीत्यस्मिन्निंद्रीतिविदंमरुत्वं
महाव्रते निष्केवल्ये पि एतदेव विनियुक्तं रथंतरं दक्षिणः पक्ष इति खंडे तस्मिन्सर्ताः पड्वृहतीः कुरो तीद्रस्य नु वीर्याणि प्र वोचमिति
॥ ॥ तत्र प्रथमामृचमाह॥ इंद्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री। अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्व
तानां॥ वज्री वज्रयुक्त इंद्रः प्रथमानि पूर्वसिद्धानि मुख्यानि यानि वीर्याणि पराक्रमयुक्तानि कर्माणि चकार इंद्रस्य तानि वीर्याणि नु क्षिप्रं प्रब्र
वीमि कानि तानि वीर्याणीति तदुच्यते॥ अहिं मेघं अहन् हतवान् तदेकं वीर्यं अनु पश्चात् अपो जलानि ततर्द हिंसितवान् भूमौ पातितवानित्य
र्थः। इदं द्वितीयं वीर्यं पर्वतानां संबंधिनीः वक्षणाः प्रवहणशीला नदीः प्राभिनत् अभिन्नवान् कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः। इदं तृती
यं वीर्यं एतमुत्तरत्रापि द्रष्टव्यं। वीर्याणि शूरस्य वीर कर्मणां। ष्यञ् तादर्थ्ये त्यादि यतीति यत्॥ णरनिरद्यातिणि लोपः। तित्स्वरितमिति स्वरितत्वं यतोनाव ११
इत्याद्युदात्तत्वं न भवति आद्युदात्तत्वं हि सुद्राचेन वद्धुर्हा। आवत्द्वा नञ्च चं छंदसीत्यनेन यो नञ्पदायुदात्तत्वस्य सिद्धत्वात् वीरवी
यौ चेति पुनर्विधानमनर्थकं स्यात् अतो वगम्यते यतो नाव इत्याद्युदात्तत्वं। वीर शब्देन प्रवर्तत इति। अतः परिशेषात्तित्स्वरितं उ
तिप्रत्ययस्य स्वरितत्वमेव। वोचं अस्यतिवक्तिख्यातिभ्योङिति च्लेरङादेशः बहुलं छंदस्यमाङ्योगेपीत्यडभावः। चकारेणेति

सं०द

रणप्रत्ययात्पूर्वस्योदात्तत्वं। यद्वृत्तयोगादनिघातः। अहन् हन्तेर्लङि इतश्चेति इकारलोपः हल्ङ्याब्भ्य इति तकारलोपः। अहिं आङ्पूर्वात् हन्तेराङि च ह्रस्वश्च 153
हनिभ्यां ह्रस्वश्चेति प्रत्ययः। आङो ह्रस्वत्वं च छान्दसं आङि तसमानस्य थाथादाद्युदात्तत्वं पूर्वपदोदात्तत्वं चानुवर्त्यन्ते तत्पुरुषे कृति पूर्वपदस्योदा 1924
त्तत्वं। ततर्द उत्तृदिर् हिंसानादरयोः लिट् तिप् इति निघातः॥ ॥ द्वितीयामृचमाह॥ अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष।
वाश्रा इव धेनवः स्यंदमाना अंजः समुद्रमव जग्मुरापः॥ अहन्नहिमिति। पर्वते शिश्रियाणं आश्रितं अहिं मेघं अहन् हतवान्। अस्मा
इंद्राय स्वर्यं सुष्टु प्रेरणीयं वज्रं दूरपातनीयं स्तुत्यं वा त्वष्टा विश्वकर्मा ततक्ष तनूकृतवान् तेन वज्रेण मेघभिन्ने सति स्यंदमानाः प्रस्रव
णयुक्ताः आपः समुद्रं अंजः सम्यग् अव जग्मुः प्राप्ताः तत्र दृष्टांतः वाश्रा वत्सान्प्रति हंभारवोपेताः धेनवः इव यथा धेनवः सहसा वत्सं गच्छंति
गच्छंति तद्वत्। शिश्रियाणं श्रिञ् सेवायां लिटः कानच् द्विर्भावहलादिशेषो यणादेशः। चित इत्यंतोदात्तत्वं। स्वर्यं ऋगतौ। अस्मात्पूर्वाति
ऋहलोर्ण्यदिति ण्यत्। तित्स्वरितमिति। तिण्पत संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः। यद्वा स्वृ शब्दोपतापयोः अस्मात् ण्यति वृद्ध्यभावः।
तित्स्वरितमिति स्वरितत्वं। वाश्रा इति वाश्राः इत्यत्र वाश्र शब्दे स्फायितंचीत्यादिना रक्। जग्मुः इसीगमहनेत्युपधालोपः॥ ॥ तृतीयामृचमा
ह॥ वृषायमाणोवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य। आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनां॥ वृषायमाणः वृषइवा
चरन्निंद्रः सोमं अवृणीत वृतवान् त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नामकेषु यागेषु त्रिकद्रुका इत्युच्यंते। तेषु सुतस्याभिषुतस्य सोमस्यांशमपि
तवान् मघवा धनवान् इंद्रः सायकं वज्रं आदत्त स्वीकृतवान् तेन च वज्रेण अहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं अहन् हतवान् वृषा
यमाणः वृष इवाचरन् कर्तुः क्यङ् सलोपश्चेति क्यङ् अकृत्सार्वधातुकयोरिति दीर्घः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातोरंतोदा
त्तत्वं। सायकं। षिञ् बंधने सिनोतीति सायकः ण्वुल् लित्स्वरेणाद्युदात्तत्वं॥ प्रथमजां प्रथमं जायत इति प्रथमजाः जनसनखन क्रमग
मो विट् विड्वनोरनुनासिकस्यात्॥ ॥ चतुर्थीमृचमाह॥ यदिंद्राहन्प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः॥ आत्सूर्यं जनयन्द्यामु
षासं तादीत्ना शत्रुं न किला विवित्से॥ उत अपि च हे इंद्र यदा अहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघं अहन् हतवानसि
आत् अनंतरं मायिनां मायोपेतानामसुराणां संबंधिनीर्मायाः प्र अमिनाः प्रकर्षेण नाशितवानसि आत् अनंतरं सूर्यं उषासं उषः
कालं द्यामाकाशं च जनयन् उत्पादयन् आवरकमेघनिवारणेन प्रकाशयन् वर्तसे तादीत्ना तदानीं आवरकांधकाराभावात् शत्रुं घातकं वै
रिणं न विवित्से किल न लब्धवान् खलु। अहन् हंतेर्लङि हल्ङ्याब्भ्य इति तिलोपः अडागम उदात्तः यद्वृत्तयोगादनिघातः मायिनां
माया अस्यास्तीति व्रीह्यादिषु पाठात् व्रीह्यादिभ्यश्चेति मत्वर्थीय इतिः। अमिनाः मीञ् हिंसायां क्र्यादिकः मीनातेर्निगम इति ह्रस्वत्वं॥
तादीत्ना तदानीमित्यस्य पृषोदरादित्वात् वर्णविपर्ययः। किल निपातस्य चादित्वात् दीर्घत्वं। विवित्से विद्लृ लाभे क्र्यादित्वेन यमप्राप्त इट्
त्ययेन भवति॥ ॥ पंचमीमृचमाह॥ अहन्वृत्रं वृत्रतरं व्यंसमिंद्रो वज्रेण महता वधेन॥ स्कंधांसीव कुलिशेना विवृक्णाहिः शय
त उपपृक्पृथिव्याः॥ अयमिंद्रो वज्रेण संपादितो महान् वधः तेन वज्रेण वृत्रतरं अतिशयेन लोकानामावरकं अंधकारूपं
पं यद्वा वृत्रं शत्रुः आवरणः सर्वान् शत्रून्तरतीति वृत्रं मतं नामकमसुरं व्यंसं विगतांसं छिन्नं बाहुर्यथा भवति तथा। असच्छेदे दृष्टांतः

भा॰ प्र॰ १८

कुलिशेन वृत्रशरीरं विदारणा निर्गतानि स्कंधानि विभक्ता अवयवा यथाऽधः पतंति तद्वत् । तथा सति अहिर्वृत्रः पृथिव्या उपपृक् उपरि संपृक्तः सामीप्येन
संपृक्तः शयनं करोति स्म वज्रपातेन भूमौ पतितोऽभूदित्यर्थः ॥ स्कंधांसि । स्कंदेरसुन् । तस्य बाहुलकात्सकारस्य धकारः । वृश्चतेः कर्मणि निष्ठा । ओदितश्चेति
निष्ठानत्वम् । कुलिशेन । कुलं शीर्यतेऽनेनेति करणे घञर्थे कः । विवृक्णा ओव्रश्चू छेदने कर्मणि निष्ठा यस्य विभाषेतीट्प्रतिषेधः । उदात्तत्वादित्वे
मिति निपातितम् । ईसंभवाभावस्य अत्वं । उदात्तत्वेन कृदुत्तरपदप्रकृतिस्वरत्वम् । शयते । शीङ् स्वप्ने अदादित्वाच्छपो लुक् । शीङः सार्वधातुके गुणः । लोपस्त आत्मनेपदेष्विति तलोपः । संहितायामुपपृक् इति
पृक्स्वरत्वम् । पृथिव्याः उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वम् ॥ ॥ इति प्रथमस्य द्वितीये षष्ठो
वर्गः ॥ ॥ षष्ठीमृचमाह ॥ अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषम् । नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इंद्रशत्रुः ॥ दुर्मदो दुष्ट
मदोपेतो दर्पयुक्तोऽयोद्धेव अयोद्धा युद्धरहित इव वर्तमानः । वृत्र इत्यर्थः । इंद्रमाजुह्वे आहूतवान् खलु । कीदृशमिंद्रं महावीरं गुणैर्महांतं शूरं तुविबाधं बहूनां
बाधकं ऋजीषं शत्रूणामपार्जकम् । अस्येंद्रस्य संबंधिनां वधानां शत्रुवधानां समृतिं संगमं नातारीत् । न तरति स्म । अपि तु संगत एवेत्यर्थः । इंद्रशत्रुः इंद्रः शात
यिता शत्रुर्यस्य स वृत्रः रुजानाः इंद्रेण हतो नदीषु पतितः सन् रुजानाः नदीः संपिपिषे सम्यक् पिष्टवान् । सर्वान् लोकान् आवृण्वता तेन वृत्रेण
पतता नदीनां कूलानि तत्पाषाणादीनि चूर्णीभूतानीत्यर्थः ॥ अयोद्धेव नञ्पूर्वस्य युधेस्तृन् । तस्य तृन्नित्स्वरः । नञ्समासे तृन्नंतत्वेन उत्तरपदांतोदात्तत्वम् ॥ समा
सांतविधेरनित्यत्वान्न कप् । तथेति भावः ॥ जुह्वे । ह्वेञ् स्पर्धायां शब्दे च । अभ्यस्तस्य चेति संप्रसारणं । उरदत्वाभावः छांदसः । इंद्रशत्रुः इंद्रः शत्रुर्यस्य बहुव्रीहौ पूर्वपद प्रकृतिस्वरत्वम् । वधानां हनश्च वध इति भावे अप् तस्य
तिसार्वधातुकं हंतेर्हुत्रुवां सार्वधातुक इति यणादेशः । तत्र लक्षण प्रतिपदोक्त परिभाषाया अस्थानुरोधात्राभीयत इत्तरथा हि आतु ऊलुंडुलो
दित्रीयणादेशो न स्यात् । न च वर्णसति सानन्वये हवेन व्यायाम इत्यादावपि यणादेशः स्यादिति वाच्यं । अनेकाच्त्वाभावात् अनेकाच इति तत्रानुवर्तते ॥
प्रत्ययस्वरः । हिंसाति निघात प्रतिषेध इति तुविबाधः पचाद्यच् कृदुत्तरपदप्रकृतिस्वरत्वं । समृतिं तादौ च निति कृत्यतौ इति गतेः प्रकृतिस्वरत्वं रुजानाः रु
जो भंगे रुजंति कूलानीति रुजाना नद्यो भवंति रुजंति कूलानीति यास्कः ॥ व्यत्ययेन चानश् तुदादिभ्यः शः नुम भावः छांदसः अदुपदेशाल्लु
सार्वधातुकानुदात्तत्वे विकरणस्वरः ॥ पिपिषे पिष्लृ संचूर्णने व्यत्ययेन तङ् । इंद्रशत्रुः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ॥ सप्तमीमृचमाह ॥ अ
पादहस्तो अपृतन्यदिंद्रमास्य वज्रमधि सानौ जघान । वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥ अपादपगतपादोऽच्छिन्नत्वात् पाद र
हितः अहस्तो हस्तरहितो वृत्रः इंद्रमुद्दिश्य अपृतन्यत् पृतनां युद्धमैच्छत् इंद्रं प्रत्याधिक्येन बहुधा विभीषयितुं युद्धं न परिहृतवानित्यर्थः ॥ अस्य हस्तपादहीनस्य
वृत्रस्य सानौ पर्वतसानु सदृशे प्रौढे स्कंधे अधि उपरि वज्रं आजघान इंद्र आभिमुख्येन प्रक्षिप्तवान् अत एव स्यापि युद्धे बाहुल्यात् उपरि दृष्टांतः । वध्रिः छिन्नमुष्कः
पुरुषः अस्मात्तः सेचन समर्थस्य पुरुषांतरस्य प्रतिमानं साम्यं बुभूषन् प्राप्तुमिच्छन् यथा न शक्नोति तद्वदयमिति शेषः । स वृत्रः पुरुत्रा बहु
षु अवयवेषु व्यस्तः विविधं क्षिप्तः ताडितः सन् अशयत् भूमौ पतितवान् अपात् । बहुव्रीहौ पादशब्दस्यांत्यलोपश्छांदसः । अहस्तः बहुव्रीहौ

१८

नञ्सुभ्यामिति उत्तरपदांतोदात्तत्वं । अपृतन्यत् पृतनामात्मनः इच्छति । क्यचि कव्यध्वरपृतनस्यर्चि लोप इति अलोपः । बुभूषन् सनि ग्रहगुहोश्चेति इट्प्रतिषेधः । पुरुत्रा
देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलमिति सप्तम्यर्थे त्राप्रत्ययः । अशयत् । व्यत्ययेन परस्मैपदं बहुलं छंदसीति शपो लुगभावः । व्य
स्तः असु क्षेपणे इत्यस्मात् कर्मणि क्तः । यस्य विभाषेतीट्प्रतिषेधः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । संहितायामुदात्तस्वरितयोर्यण इति परस्या
नुदात्तस्य स्वरितत्वं ॥ ॥ अष्टमीमृचमाह ॥ नदं न भिन्नममुया शयानं मनो रुहाणा अति यंत्यापः । याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतःशीर्ब
भूव ॥ अमुया अमुष्यां पृथिव्यां शयानं पतितं मृतं आपो नदी यान्ति कूलं भित्त्वातिक्रम्य गच्छतीति तद्वत् । वृत्रस्य आपः मनो रुहाणाः तृणांश्चित्तमा
रोहंत्यः । पुरा वृत्रे जीवति सति तेन निरुद्धा मेघस्थिता आपो भूमौ पतनं न भवति तदानीं तृणां मनः शिव पते वृत्रे निरोधरहिता आपो वृत्रशरीरमु
लंघ्य प्रवहंति तदा वृष्टिलाभेन मनुष्याः तुष्यंतीत्यर्थः ॥ तदेव दृष्टांतरेण स्पष्टीयते । वृत्रो जीवन् दशायां महिना स्वकीयेन महिम्ना याश्च मेघगता
आपः पर्यतिष्ठत् पर्यतिष्ठत् परिरक्षितवान् अहिर्वृत्रो मेघः तासामपां पत्सुतःशीः पादस्याधःशयानो बभूव अद्यप्यपां पादेनाक्रान्त था
प्यद्भिर्वृत्रस्योल्लंघितत्वात् पादस्याधःशयनमुपपद्यते । भिन्नं रदाभ्यां निष्ठातो न इति नत्वं । अमुया सुपां सुलुगिति सप्तम्या याजादेशः । शयानं
शीङ् सार्वधातुक इति गुणो धातोर्ङित्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । रुहाणाः रुह बीजजन्मनि प्रादुर्भावे च । व्यत्ययेन शानच् । शपि प्राप्ते शः
अनित्यमागमशासनमिति वचनात् मुगभावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरे प्राप्ते व्यत्ययेन धातुस्वरः । महिना । मह पूजा
यां इन सार्वधातुभ्य इतीन प्रत्ययः । व्यत्ययेन विभक्तेरुदात्तत्वं । यद्वा महिना महत्त्वस्य पृथ्व्यादिषु पाठात्तस्य भाव इत्येतस्मिन्नर्थे पृथिव्यादिभ्यः
इमनिज्वेतीमनिच् प्रत्ययः टेरिति टिलोपः । चित इत्यंतोदात्तत्वं ॥ तृतीयैकवचने अल्लोपे सति उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं मकारलोपः छांदसः ॥
पत्सुतःशीः पादस्याधः शेत इति पत्सुतःशीः क्विप् चेति क्विप् नतिप दंति लघ्व्यादिना पादशब्दस्य पदादेशः वास्य प्रभृतिक्षितिप्रभृति शब्दः प्रकारव
चन इति शाकल्येन पणीत्यनापि प्रपन्नादेशो भवतीत्यनिवृत्तान मध्यस्क इति अभ्यपञ्जनः छांदसः यद्वा पादशब्दस्य समासे बहुवचने पद्यादेशे कृ
ते इतरेभ्योऽपि दृश्यंत इति तमर्थस्य तसिल् लुगभावः छांदसः ॥ ॥ नवमीमृचमाह ॥ नीचावया अभवद्वृत्रपुत्रेंद्रो अस्या अव वधर्जभार । उत्त
रा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः ॥ वृत्रपुत्रा वृत्रः पुत्रो यस्या मातुः सेयं माता वृत्रपुत्रा नीचावयाः न्यग्भावं प्राप्ता हता भ
वत् । पुत्रं प्रहाराद्रक्षितुं पुत्रदेहस्योपरि तिरश्ची पतितवतीत्यर्थः ॥ तदानीमस्यामिंद्रः अस्या मातुः अव अधोभागे वृत्रस्योपरि वधः हननसा
धनमायुधं जभार प्रहृतवान् तदानीं सू माता उत्तरा उपरिस्थिता सीत् पुत्रस्तु अधोभागस्थित आसीत् सा च दानुर्दानवी वृत्रमाता शये मृता
शयनं कृतवतीति तत्र दृष्टांतः धेनुर्लोकप्रसिद्धा गौः सहवत्सा न यथा वत्ससहिता शयनं करोति तद्वत् । नीचावयाः वेतिरवाद्दातीति वयो वाद्रु
औणादिकोऽसिप्रत्ययः । न्यग्वयो यस्याः सा नीचावयाः नीचा वयो यान्वृत्राः स्त्रात उत्तरस्य विभक्तेः सुपां सुलोप भवंतीति तृतीयैकवचनादेशः अचउ
त्यकारलोपे चाविति दीर्घत्वं । अचः छंदस्य सर्वनामस्थानमिति स्योदात्तत्वं समासे लुगभावः छांदसः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं य
दानी चौनिष्क्रांतावयः सा यस्याः सा पूर्वपदस्य दीर्घः छांदसः वधः हन्यतेऽनेनेति वधः असंज्ञायां हंतेर्वधादेशः निपातः कृदात्तत्वं जभा
र हृञ् हरणे इति भस्य हः प्राणिगर्भाविमोचने । स तेगर्भं विमुंचतीति सू सोनांक्विप्चेति क्विप् ॥ दानुः दो अवखंडने दाभ्यां नुः इत्यौणादि

आ॰ प्र॰ लोपश्च आत्मनेपदेष्वन्यतरस्याम् इति लोपः। शीङः सार्वधातुके इति गुणः अयादेशः॥ ॥दशमीमृचमाह॥ अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरं॥ वृ
त्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः॥ वृत्रस्य शरीरमौपाधिकं चरंति तिरश्चेण पर्याक्रम्य प्रवहंति। किं तु वृत्रशरीरं निण्यं निर्नामधेयं अप्रका
१० शत्वेन गूढत्वात् अदीयं नाम न केनापि ज्ञायते एतद्वृत्रस्य शरीरं क्रियते॥ काष्ठानामपां मध्ये निहितं निक्षिप्तं कीदृशानां काष्ठानां अतिष्ठन्तीनां स्थितिरहिता
नां अनिवेशनानां उपवेशनरहितानां प्रभवद्गुणस्वभावत्वादेतासां मनुष्यवत् क्वापि स्थितिः संभवति। इंद्रशत्रुः वृत्रो जलमध्ये शरीरे प्रक्षिप्ते स
ति दीर्घं निद्रात्मकं मरणं यथा भवति तथा आशयत सर्वतः पतितवान्। अतिष्ठन्तीनां। अव्ययपूर्वपदप्रकृतिस्वरत्वं। अनिवेशनानां निविशंत्यस्मि
न्निति निवेशनं स्थानं करणाधिकरणयोश्चेत्यधिकरणे ल्युट् तत् रहितानां। बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदान्तोदात्तत्वं। काष्ठाः काष्ठाः पृ
षोदरादिः निहितं गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। अत्र यास्कः अतिष्ठन्तीनामनिविशमानानां नामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मे
घः शरीरं शृणातेः शम्नातेर्वा वृत्रस्य निण्यं निर्णामं विचरंति विजानंत्याप इति दीर्घं द्राघतेः तमः तनोतेः आशयदाशेतेः इंद्रशत्रुरिंद्रोऽस्य
शमयिता वा शातयिता वा तस्मादिंद्रशत्रुस्तत्कोवृत्रो मेघ इति नैरुक्ताः त्वाष्ट्रोऽसुर इत्यैतिहासिका इति॥ ॥इति प्रथमस्याष्टके द्वितीये सप्तत्रिंशो
वर्गः॥ ॥एकादशीमृचमाह॥ दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः॥ अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्व
वार॥ दासा विश्वोऽस्य सपत्नीः यस्य वृत्रः पतिः स्वामी यासां ताः दासपत्नीः अत एवाहिगोपाः अहिर्वृत्रो गोपा रक्षको या
सां ताः गोपनं नाम तच्छंदनं यथा न प्रवहेति तथा निरोधनं एतद्वृत्रस्य क्रियते॥ आपो निरुद्धा अतिष्ठन्निति॥ तत्र दृष्टांतः पणिने
व गावः पणिनामकोऽसुरः गा अपहृत्य बिले स्थापयित्वा बिलद्वारमाच्छाद्य यथा निरुद्धवांस्तद्वदित्यर्थः अपां यद्बिलं प्रवहणद्वारं अ
पिहितं वृत्रेण निरुद्धमासीत् तद्बिलप्रवहणद्वारं वृत्रं जघन्वान् हतवानिंद्रः अप ववार अपवृतमकरोत् वृत्रकृतमपां निरोधं परि
हृतवान्। अत्र यास्कः। दासपत्नीर्दासाधिपत्न्यो दासो दास्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ता अहिरयनादेत्यंत
रिक्षेऽयमपीतरोऽहिरेतस्मादेव निर्ह्रसितोपसर्ग आहंतीति निरुद्धा आपः पणिनेव गावः पणिर्वणिग्भवति पणिः पणनाद्वणिक् पण्यं
नेनेक्ति॥ अपां बिलमपिहितं यदासीत्। बिलं भरं भवति बिभर्तेर्वृत्रं जघ्निवानपववार तद्वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा यदवृणोत्
तद्वृत्रस्य वृत्रत्वमिति विज्ञायते यदवर्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते यदवर्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते। दासपत्नीरुक्तं उपक्षयप
त्यर्तीति दासः दस उपक्षये पचाद्यच् चित इत्यंतोदात्तत्वं। दासः पतिर्यासां विभाषा सपूर्वस्येति ङीप् तत्संनियोगेन नकारस्य नकारः बहुव्रीहौ पू
र्वपदप्रकृतिस्वरत्वं॥ अहिगोपाः गुपू रक्षणे गोपायतीति गोपाः आ
यादय आर्धधातुके वेत्यायप्रत्ययः। ततः क्विप् अतो लोपः वेरपृक्तलोपाद्वलि लोपो वलि व्योरिति यकारलोपः न चाचः परस्मिन्
१० तिलोपस्य स्थानिवत्त्वं पदांतद्विर्वचनेति निषेधात्। अहिगोपा आप पूर्ववत्स्वरः निरुद्धाः रुधिर् आवरणे। निष्ठायां झषस्तथोर्धोऽध इति निष्ठात
कारस्य धकारः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। जघन्वान् हंतेर्लिटः क्वसुः अभ्यासाच्चेत्यभ्यासादुत्तरस्य हकारस्य कुत्वं काद्विनिय
मप्राप्तस्य इटो विभाषा गमहनेत्यादिना विकल्पविधानादभावः संहितायां नकारस्य रुत्वानुनासिकाद्युक्तौ॥ ॥द्वादशीमृचमाह॥

अश्व्यो वारो अभवस्तदिन्द्र सृके यत्त्वा प्रत्यहन्देव एकः॥ अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून्॥ सृके नेमस्त्रत्रे वृक इति वज्रनाम।
पवितवान्। देवदीप्यमानः सर्वायुधकुशलः एकः अद्वितीयः वृत्रः यत् यदा त्वां प्रत्यहन् प्रतिकूलत्वेन प्रहृतवान् तत्तदा घातं अश्व्यो वारः अश्वसंबंधी 157
वालो भवः यथा अश्वस्य वालो नायासेन मक्षिकादीनि वारयति तद्वद् वृत्रमगणयित्वा निराकृतवानित्यर्थः। किं च गाः पणिना प्रहृतास्त्वमजयः 1924
जितवान् हे शूर शौर्ययुक्तेंद्र सोममजयो जितवान् तथा चैत्तिरीयाः त्वष्टा हतपुत्र इत्यस्मिन्नुपाख्याने सोममाहरंत इत्यत्र संहृतो प्रातःसो
ममपिबदिति। सप्त सिंधून् इमं मे गंगे इत्यस्यामृचि प्रोक्ता गंगाद्याः सप्तसंख्याका नदीः सर्तवे सर्तुं प्रवाहरूपेण गंतुं अवासृजः त्यक्तवान्
वृत्रकृतं प्रवाहनिरोधनं निराकृतवानित्यर्थः॥ अश्व्यः अश्वे भवः भवे छंदसीति यत् यतोऽनाव इत्याद्युदात्तत्वं॥ वारः वारयति दंशकानिति वारः पचा
द्यच् कपिलकादित्वाल्लत्वविकल्पः वृषादित्वादाद्युदात्तत्वं॥ प्रत्यहन् यद्वृत्तान्नित्यमिति निघातप्रतिषेधः तिङ्ङ्चोदात्तवति गतेरनुदात्तत्वं। अ
जयः गाः इत्यस्य वाक्यांतरगतत्वान्न पक्षस्यास्य तिङ्ङतिङः इति निघातो भवति समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात्।
सर्तवे तुमर्थे सेसेनिति तवेन्प्रत्ययः। नित्वादाद्युदात्तत्वं॥ ॥त्रयोदशीमृचमाह॥ नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च॥
इंद्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये॥ इंद्रं निषेद्धुं वृत्रो यां विद्युदादीन् मायया निर्मितवान्। तत्सर्वमेनं निषेद्धुमशक्
सामर्थ्यमनेन मंत्रेणोच्यते॥ अस्मै इंद्रार्थं निर्मिता विद्युत् न सिषेध इंद्रं न प्राप्नोत्। तथा तन्यतुः गर्जनं या मिहं सेचनक्षमां वृष्टिं अकिरत् वृत्रो वि
क्षिप्तवान् सापि वृष्टिर्न सिषेध ह्रादुनिं च अशनिमपि यां वृत्रः प्रयुक्तवान् सापि न सिषेध इंद्रश्चाहिश्चेंद्रवृत्रावुभावपि यद्यदा युयुधाते युद्धं
कृतवंतौ तदानीं युध्यमानयोः प्राप्तेति पूर्वोक्तान्वयः उत अपि च मघवा धनवानिंद्रः अपरीभ्यः अपराभ्यः अन्यासामिति वृत्रनिर्मितानां सका
शादितिज्जिग्ये विजयेन जितवानसिषेध सिधु गत्यामित्यस्मिन् मिह सेचने मेहतीति मिह्यते ने मिहिरुष्टि क्विप् वर्तते क्विप् अकिरत् कॄ विक्षेपे तुदादिभ्यः
शः ऋत इद्धातोरितीत्वं॥ अडागमउदात्तः। यद्वृत्तयोगान्निघातः। युयुधाते युध संप्रहारे लिटि द्विवचने प्रत्ययस्वरः। जिग्ये जि जये लिटि इस्याभ्यासादुत्तर
स्य जकारस्य कुत्वं॥ ॥चतुर्दशीमृचमाह॥ अहेर्यातारं कमपश्य इंद्र हृदि यत्ते जघ्नुषो भीरगच्छत्॥ नव च यन्नवतिं च स्रवंतीः श्येनो न भीतो अतरो
रजांसि॥ हे इंद्र जघ्नुषः वृत्रं हतवतस्ते तव हृदि चित्ते यत्तदा भीरगच्छत् भयमागच्छत् हननेन वृजिनं भवति किल्बिषं प्राप्नुयात्॥ नहि अहेर्वृत्रस्य यातारं हंतारं कम
पश्यः त्वत्तोऽन्यं कं पुरुषं दृष्टवानसि नास्त्येव त्वत्तोऽन्यो हंता इत्यस्य पुरस्तात्तस्माद्भयमाभूदित्यभयमित्यर्थः॥ यद्यस्मात्कारणात्तं नव च नवतिं च स्रवंतीः एकोनशतसंख्या
काः स्रवंतीः प्रवहंतीर्नदीः आप्लवरजांसि तत्रत्यान्युदकानि अतरः तीर्णवानसि तत्र दृष्टांतः श्येनो न श्येननामकोऽबलवान् पक्षी वृत्रगमनात्तव भय
मासीदिति। गम्यते तद्वत्पलायमानस्य भिप्रायः तत्र दूरगमनं ब्राह्मणसमाम्नातं। इंद्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः परां परावतमगच्छदिति।
तैत्तिरीयाश्चामनंति इंद्रो वृत्रं हत्वा परां परावतमगच्छदपाराधमिति मन्यमान इति। हृदि सर्वनाम्नित्यादिना हृदयस्य हृदादेशः। उदिदमित्यादि
ना विभक्तेरुदात्तत्वं। जघ्नुषः हंतेर्लिटः क्वसुः वचस्वनवसांसंप्रसारणमिति। संप्रसारणं परपूर्वत्वं शासिवसिघसीनां चेति षत्वं। न च षत्व
नुकारसिद्धइति इकारादेशोऽस्यासिद्धवात् एवं न प्राप्नुयादिति वाच्यं संप्रसारणाश्रयत्वप्रतिषेधाच्छन्दस्युभयथा इति असिद्धत्वस्य प्रतिषिद्धत्वात् गमहनेत्यादिनोपधालोपः न चासिद्धवदत्राभादिति संप्रसारणस्यासिद्धत्वं भिन्नाश्रयत्वात् संप्रसारणं हि वस्येकं च विवचने उपधालोपस्तु कः

भा०प्र० मावितिभिन्नाथयता म्नयंतीत्यत्र नोऽपयन्नेनार्नित्यमितिनुमागमः उपःपिबादनुदात्तत्वं॥ शतश्चलसार्वधातुकस्वरेणाद्युदात्तत्वं॥ अनरः यद्वन्
धीगादिनिघातः॥ ॥पंचदशीमृचमाह॥ इंद्रो यातोऽवसितस्य राजा शमस्य च शृंगिणो वज्रबाहुः॥ सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परिताबभू
८० व॥ वज्रबाहुरिंद्रः यातो गंतुर्जंगमस्य अवसितस्य एकत्रावस्थितस्य स्थावरस्य शमस्य शांतस्य शृंगरहितस्य शृंगिणः शृंगोपेतस्य प्रहर
णादेश्च प्रवृत्तस्याश्वगर्दभादेः शृंगिणः शृंगोपेतस्याप्युग्रस्य महिषवृषादेश्च राजा भवति॥ सेदु स एवेंद्रः चर्षणीनां मनुष्याणां राजा भूत्वा क्षय
ति निवसति तानि पूर्वोक्तानि जंगमादीनि सर्वाणि परिबभूव व्याप्तवान् तत्र दृष्टांतः अरान्नेमिः यथा रथचक्रस्य वर्तिता वर्तमानान् अरान्नाभौ
कीलितान् काष्ठविशेषान् व्याप्नोति तद्वत् यातः याप्रापणे यातिगच्छतीति। यततकः। आतः सावकाचइति विभक्तेरुदात्तत्वं। ससोविलोपे चेदितिसं
हितायां सोर्लोपः। तातोः शृंगमिवह्रस्वमितिद्वेलोपः बभूव भवतेर्लिट् णलि भवतेरइत्यभ्यासस्यात्वं॥ ऋताकृतप्रसंगितयावुगागमस्यासिद्ध
त्वाद्भुवः एवुं वुगागमः। यद्वारंधिभवतिभ्यां चेति लिटः कित्वाद्गुणाभावः न चासिद्धवदत्राभादिति तस्यासिद्धत्वादुवङादेशः शंकनीयः वुग्
द्वावुवङ्गुणाः सिद्धो भवतीति इति न इतिनस्यासिद्धत्वात्। तिङ्ङतिङ इतिनिघातः॥ ॥इति वेदार्थप्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो दे
यान्विद्यातीर्थमहेश्वरः॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण वि
रचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके द्वितीयोऽध्यायः॥ समाप्तः॥ ॥२॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं ज
गत॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ३॥ ॥७॥ श्रीसांबसदाशिवार्पणमस्तु॥ ॥श्रीगजाननार्पणमस्तु॥ ॥१ ० ८ १
॥ ॥श्रीगणेशाय नमः॥ ॥अथ तृतीयाध्याय आरभ्यते॥ ईळिष्वाग्ने प्रथम इति सप्तमानुवाके पंचसूक्तानि तत्र एतायामेति त्रयोदशर्चं स
तं पंचदशर्चं कण्वपुत्रस्यांगिरसो हिरण्यस्तूपस्यार्षं अनुक्रांतत्वादिंद्रदेवताकं त्रिष्टुप्छंदः एत इत्यनुक्रमणिका। गोस
वनीयेऽध्याये नित्याश्च एतयाऽयामेति सूक्तं विनियुक्तं। तथाच सूत्रितं। अतिमूर्तिनायक्ष्यमाण इति खंडे गोसववीवधौ पवश्रुत्काम इंद्र सोमं मतावा
मेति संध्यंतिनी इति॥ ॥तत्र प्रथमामृचमाह॥ एतायामोप गव्यंत इंद्रमस्माकं सुप्रमतिं वावृधाति॥ अनामृणः कुविदादस्य रायो गवां केतं प
रमावर्जते नः॥ देवाः परस्परमेवं कथयंति हे देवाः गव्यंतः पणिनामकैरसुरैरपहृता अस्मदीया गाः प्राप्तुमिच्छंतो वयं एत आगच्छत। युष्मा
भिः सहितावयमिंद्रं गवान्वेषणक्षमं उपयाम प्राप्नुयाम स चेंद्रः अनामृणः हिंसकरहितः सन् अस्माकं देवानां प्रमतिं गोलाभेन हर्षयित्वा प्रकृष्टां
बुद्धिं सुवावृधाति सुष्ठु वर्धयति अतः अनंतरं स इंद्रः अस्य रायो धनस्य गवां गोरूपस्य संबंधिपरं केतमुत्कृष्टं ज्ञानं नोऽस्माकं कुविदावर्जयते
अधिकं प्रापयति। इत इण् गतौ। अदादित्वाच्छपो लुक्। अयाम। एतेर्लोटि उत्तमबहुवचने आडुत्तमस्य पिच्चेत्याडागमः। पित्त्वाद्वाऽसार्वधातुकलक्षणे
गुणे अयादेशः नत्वेणो यणितियणादेशः मध्ये यवादेः पूर्वान्विधीन्बाधंत इति वचनात्स्ययण्देशापवादत्वात्। अतः परत्वाद्गुणेन यणादे ८०
शो बाध्यते विधेर्द्वा वातप्रत्ययस्यानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं। गव्यंतः गा आत्मन इच्छंतः सुप आत्मनः क्यजितिक्यच्। गोशब्दात्कर्मणः क्यच्वा
तोऽयिप्रत्यय इत्यवादेशः प्रत्ययांताद्गोनो लटः शत्रुतस्यानुपदे शात्सार्वधातुकानुदात्तत्वे धातुस्वरः प्रमतिं मंत्रे तः क्तिनि अनुदात्तोपदेशेत्या
दिनानुनासिकलोपः। तादौ च निति गतेः प्रकृतिस्वरत्वं। वव्धाति। वृधु वृद्धौ। लेट्याडागमः बहुलं छंदसीति शपः श्लुः संहितायामभ्यासस्य

दीर्घः छांदसः। अनामृणः मृण हिंसायां मृणंति हिंसंतीति मृणाः इगुपधलक्षणः कः। न संत्या मृणा अस्येति बहुव्रीहौ नञः सुभ्यामित्युत्तरपद
स्योदात्तत्वं॥ अस्यरायः। उडिदमित्यत्र विभक्तेरुदात्तत्वं। गवां साविकाचइति प्राप्तस्य विभक्त्युदात्तस्य न गोश्वन्साववर्णेतिप्रतिषेधः 159
कं तं कितज्ञाये घञंतत्वं आद्युदात्तः। आवर्जते। वृजी वर्जने। अदादित्वाच्छपो लुक्। किंतरामेवं बहुलं छंदसीति नद्याभावः उपसर्गस्यादनुदात्त ——
त्वतिङ्श्चलसार्वधातुकत्वेन धातुस्वरः। तिङि चोदात्तवतीति गतेरनुदात्तत्वं। कुविद्योगान्निपातैर्यद्यदिहंतेत्यादिना निघातप्रतिषेधः॥ ॥द्वितीया 1924
मृचमाह॥ उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि॥ इंद्रं नमस्यन्नुपमेभिरकैर्यः स्तोतृभ्यो हव्यो अस्ति यामन्॥ यः इंद्रः स्तोत
भ्यः स्तोतॄणामनुग्रहार्थं यामन् नदीय शत्रुभिः सह प्रवृत्ते युद्धे हव्योऽस्ति तेराह्वातव्यो भवति॥ तमिंद्रमहं नेपातां उपेतप
तामि उपागतोऽस्मि च। किं कुर्वन् उपमेभिः उपमानस्थानीयैरर्कैः स्तोत्रैः मदनाम स्यन् पूजयन् कीदृशमिंद्रं धनदां धनप्रदं अप्रती
तं अप्रतिगतं शत्रुभिरतिरस्कृतमित्यर्थः। ईदृशमिंद्रं दृष्टांतः जुष्टां पूर्वैः सेवितां वसतिं स्वकीयनीडरूपां निवासभूमिं श्येनो न यथा श्ये
ननामकोविगवान् पक्षी यस्त्वकीयस्थानं प्रत्यादरेण धावति। तद्वदहमिंद्रं त्वरया प्राप्नोमि। धनदां धनं ददातीति धनदाः अतो मनिन्क्विप
इनाविच अप्रतीतं प्रत्युभिर्न प्रतिगतं अव्ययपूर्वपद प्रकृतिस्वरत्वं। जुष्टां जुषी प्रीतिसेवनयोः श्वीदितो निष्ठायामितीट्प्रतिषेधः नित्यं
मंत्रइत्याद्युदात्तत्वं। पतामि पत्लृ गतौ। अडागमः नमस्यन् नमसः पूजार्थे नमोवरिव इति क्यच् प्रत्ययस्वरः अदुपदेशाल्लसार्वधा
तुकानुदात्तस्य एकादेशः स्वरेणोदात्तत्वं। उपमेयैः न उपमीयते उपमाः माङ्माने। घञर्थे कविधानमिति कः बहुलं छंदसीति भिस ऐसादे
शाभावः कृदुत्तरपद प्रकृतिस्वरत्वं॥ हव्यः ह्वेञ् आवहुलं छंदसीति संप्रसारणं अचो यदितियत् गुणे धातोस्तन्निमित्तस्यैव वांतादेशः य
तोऽनाव इत्याद्युदात्तत्वं॥ यामन्। याप्रापणे निनानितिता आद्युदात्तत्वं॥ सुपां सुलुगिति सप्तम्या लुक्॥ ॥तृतीयामृचमाह॥ नि सर्वसेन इषु
धीरसक्त समर्यो गा अजति यस्य वष्टि॥ चोष्कूयमाण इंद्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध॥ सर्वसेनः कृत्स्नसेनायुक्तः इषुधीन्
बाणानामाधारभूतान्निषंगान्स्यसक्त निर्गतं पृष्ठभागे संबद्धवान् अर्यः स्वामिरूप इंद्रः यस्य देवस्य वष्टि असुरेणापहृता गाः
प्रदातुं कामयते तस्य देवस्य गृहे तां गाः समजति सम्यक्प्रापयति हे प्रवृद्ध प्रकर्षेण वृद्धियुक्त इंद्र भूरि वामं प्रभूतं गोरूपं धनं चोष्कूयमा
णः अस्मभ्यं प्रयच्छन् अस्मदधि अस्मासु पणिर्माभूः यवहारी मा भूयाः गवां मूल्यं मा याचस्वेत्यर्थः॥ सर्वसेनः सेनया सह वर्तते इति
सेनायोपसर्जनस्येति सभावः सर्वा सेना यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं प्रत्ययलक्षणेनाप्यह यस्वर उच्यत इति वचना
त् प्रत्ययलक्षणेन सर्वस्य सर्वादि सर्वशब्द आद्युदात्तः॥ इषुधीन् इषवः पुधीयंत इति इषुधयः कर्मण्यधिकरणे चेति किप्रत्ययः संहितायां
दीर्घादटीत्यादिना नाकारस्यरूलं अत्रानुनासिकः पूर्वस्य तु। वातिपूर्वस्य रोनुनासिकः असक्त। पच समवाये। बहुलं छंदसीति शपो लुक्। अर्यः
अर्यः स्वामिवैश्ययोरितियत्स्वयांतो निपातितः। अर्यः स्वाम्याख्या चेत्यंतोदात्तत्वं। अजति। अजगतिक्षेपणयोः। वष्टि वश कांतौ
अदादित्वाच्छपो लुक् व्रश्चादिषत्वष्टुत्वं॥ चोष्कूयमाणः कुङ् आप्रवणे॥ धातोरेकाच इति यङ् अकृत्सार्वधातुकयोर्दीर्घः॥ द्विर्वचनं तत्प
र्वः स्वय इति कः। कारः छियंतस्य कारान्त्यस्य कुहोश्चुरिति चुत्वं गुणोयङ्लुकोरिति गुणः सन्वाभावादित्वात् यलं यङ् तालुदः शानचे

भा॰ त्र॰ ढुपदेशात्सार्वधातुकानुदात्तत्वे धातुस्वरः। भः गातिस्थेतिसिचो लुक्॥ ॥चतुर्थीमृचमाह॥ वधीर्हि दस्युं धनिनं घनेन एकश्चरन्नुपशाके
८१ भिरिंद्र। धनोरधि विषुणक् ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः॥ हे इंद्र धनिनं बहुधनोपेतं दस्युं चोरं वृत्रं घनेन कठिनेन वज्रेण
वधीर्हि हतवान् खलु। धनिनं। यात्रसनयितोपि स्यत्प्रमामनंति यत्र स्थेनः सर्वदेवाः सर्वाश्च विद्याः सर्वाणि हवींषि वासन्निति उपशा
केभिः समीपवर्तिभिः शक्तियुक्तैर्मरुद्भिः सहितो भूत्वा सहितः एकश्चरन् प्रहर्तुं स्वयमेक एव। तं गच्छन्नयघवि मरुतः समीपवर्तितेन
थापि तत्प्रात्माहत्यैव वृत्रं प्रहरतिप्रहर्तानु स्वयमेक एव। तथा च ब्राह्मणे समाम्नातं। मरुतो हैनं नाजुहुः प्रहरभगवो जहि वीरय
स्वेत्येव न मर्ता। आर्वच इति दुपाति वनेति। धनोरधि उ इमं बंधिना धनुषः उपरि। विषुणक् विविधं नाशमुद्दिश्य यद्वा विषुक् समंततः
शृन्वानु चराः व्यायन् विविधमागमन आगत्य च अयज्वानः यज्ञविरोधिनः संतः सनकाः एतन्नामकाः वृत्रानुचराः प्रेतिमीयुः मरणं प्राप्ताः। वधीः। हनहि
सागत्योः। लुङि वधिदेशः सचादेशः तस्मात्तालोपः इति लोपः सति तस्मादिवडादावादेती इत्यादेशादितिरूपभावः। इट ईटीति सिचो लोपः। आगमानुदा
त्तत्वे धातकारस्योदात्तत्वं। धनेनएकः इयाः अश्वादिषु पुंदसिन क्षतिभावमात्रे चेत्यमिति संहितायां प्रकृतिभावः। अनुनासिकश्छांदसः। उपशा
केभिः उपशाकं शक्तेतीति उपशाकाः शकु शक्तौ। अस्मात्तु नमण्पनात्पचा घच्च यथादित्स्वरेणा न्तरपदांतोदात्तत्वं। विषुणक् विषुवर्चा नञोः सपरा
दिलक्षणः विनगर्थेति वृत्तं यद्वा विषु वंस्यांच ततनुड् आगमः सनकाः उत्क मरणांनामधेय दाने स्यन तिद दंतीति सनाः दतारः प वा घच्च सनान
कार्यति शब्दयंतीति सनकाः अनुतोप सर्गके। अतोलोप इति चेत्माकाल्लोपः। कृदुत्तरपदप्रकृतिस्वरत्वं। प्रेतिं। नहे चानितीति गतेः प्रकृतिस
रत्वं। ईयुः एतेरसिपरस्वादिणोयणिति यणादेशाद्विर्वचनर्चेति स्थानि वद्भावादिकारस्य द्विर्वचनं दीर्घ इणः कितीत्यभ्यासस्य दीर्घत्वं। ॥
पंचमीमृचमाह॥ पराचिच्छीर्षा ववृजुस्त इंद्रायज्वानो यज्वभिः स्पर्धमानाः॥ प्र यद्दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः॥ हे इंद्र ते त्व
दनुचराः शीर्षाणि शिरांसि पराचित् पराङ्मुखान्येव ववृजुः गतवंतः कीदृशास्ते अयज्वानः स्वयं यागरहिताः। प्रत्युत यज्वभिः या
गानुष्ठातृभिः सह स्पर्धमानाः हे हरिवः हरिनामाश्वयुक्त स्थातः स्थितियुक्त युद्धेपलायनरहित। उग्रगंभीर्य युक्तेंद्र यद्यदादिवो नरिक्षात रोदस्योर्द्यावा
पृथिव्योः सकाशाच्च अव्रतान् व्रतरहितान् वृत्रानुचरान् निरधमः। निःशेषेण धमनं कृतवानसि तदानी त्वदीयमुखवायुनानुचराः संतापयन्निति
ति पूर्वत्रान्वयः शीर्षाणि शिरः छंदसीव हुलमिति शीर्षादेशः। ववृजुः वृजी वर्जने। असंयोगाल्लिट्कितिकित्वात् गुणाभावः अयज्वानः यज्ञेनेजानः यज्ञो
निर्वर्तितभूत इनिप्रत्ययस्य। पित्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं। ह्वितः इडिति इमिति विभक्तेरुदात्तत्वं।
हरिवः हरी अस्यस्त इति हरिवान् छंदसीर इति मतुपो वत्वं। संबुद्धौ मानुव संहितिरुत्वं। अव्रतान् बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। दी
र्घादटीति संहितायां नकारस्य रुत्वं। अतोटि नित्यमिति सानुनासिक अकारः। अधमः। ध्मा शब्दाग्निसंयोगयोः। लङि सिपि पाघ्राध्मेत्यादिना ध
मादेशः॥ ॥इति प्रथमस्य तृतीये प्रथमो वर्गः॥ ॥षष्ठीमृचमाह॥ अयुयुत्सन्ननवद्यस्य सेनामयातयंत क्षितयो नवग्वाः॥ वृषायुधो न व
ध्रयो निरष्टाः प्रवद्भिरिंद्राच्चितयंत आयन्॥ अनवद्यस्य गर्हणीयदोषरहितस्येंद्रस्य सेनांप्रति अयुयुत्सन् वृत्रस्यानुचरा योद्धुमैच्छन् तदानीं ८१
नवग्वाः नवनीतगतयः स्तोतव्यचरित्राः यद्वा अंगिरसां सत्रमासीनानां नामधेयमेतन्नवभिर्मासैस्तदायं फलमुषिताः ते यानवग्वा इति संज्ञानवग्वाः

ति संज्ञानवग्वासः मनुसोमास इंद्रमित्यादिषु तथाभिहितान् क्षितयो मनुष्याः अंगिरसप्रभृतयः क्षितयः कृत्स्य उतितं नाम समभावात। अयातयंत पुरु
र्थमिंद्रेनानाविधैर्मंत्रैः प्रोत्साहितवंतः। इंद्रपुरुगत मतिनिरस्ताः तेनेंद्रेणनिरस्कृताः वृत्रानुचराश्चितयंतः स्वकीयामशक्तिं ज्ञापयंतः इंद्रात इंद्रस्य 161
सकाशात् प्रवद्भिः प्रवणैः पलायितुं शक्रैर्मार्गैः आयन् दूरं गतवंतः। तत्र दृष्टांतः। वृषायुधः। वृषेण सेचनसमर्थेन पुंस्त्वयुक्तेन अरेणस ह युद्धं 1924
कुर्वतो वध्रयः नपुंसका इव निसर्गपंचाधिश्चेत्यादि स्मृतिषु प्रयोगात। ते यथा प्रबलेन दूरं निराकृता भवंति तद्वत। अयुयुत्सन् युध संप्रहा
रे। सनिहलंतात्त्वाति सनः किनाद्गुणाभावः एकाच उपदेशेनुदात्तादितीट् प्रतिषेधः व्यत्ययेन परस्मैपदं सेनां इनेन सह वर्तत इति सेना पापसर्जन
स्येति सहस्य सभावः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अपायंतत्यर्तीप्रयत्नहेतुमति चेति णिच्। क्षितयः। क्षि निवासगत्योः क्षियंति गच्छ
तीति क्षितयो मनुष्याः क्तिच् क्तौ च संज्ञायामिति क्तिच्। नवग्वाः नवभिर्मासैर्गच्छंतीति नवग्वाः गाः गामेगणादिको डुप्रत्ययः पृषादित्वि गमः का
वित्यनुनासिकलोपः इंद्रगमादीनामिति वक्तव्यमिति अकारस्य ईकारः अभिसंकर्षितयणादेशाः दीर्घश्छांदसः। वृषायुधः क्विप् चेति क्विप् क्विप्
त्यत्र सोपपदेभ्यानि रूपपदेभ्य उत्कृतादत्र सोपपदे क्विप् अन्येषामपि दृश्यत इति पूर्वपदस्य संहितायां दीर्घः। निरष्टाः। अश् व्याप्तौ। भावे निष्ठा
यस्य विभाषेतीट् प्रतिषेधः व्रश्चादिनाषत्वे ष्टुत्वं निसाच बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं यद्वा निरस्ता इत्यत्र सकारस्य पत्वं छांदसं तदानीमस्ताउ
त्येत न कर्मणि निष्ठेति गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। प्रवद्भिः वन षण संभक्तौ अस्मात् प्रपूर्वात् क्विप् गमादीनामिति वक्तव्यमित्यनुनासिकलो
पः ततस्तुक् कृदुत्तरपदप्रकृतिस्वरत्वं। चितयंतः चिती संज्ञाने। अस्याण्यंताल्लुङः शात् शप अनित्यमागमशासनमिति वचनाल्लघूपधगुणाभावः
॥ ॥सप्तमीमृचमाह॥ त्वमेतान्रुदतो जक्षतश्चायोधयो रजस इंद्र पारे॥ अवादहो दिव आ दस्युमुच्चा प्र सुन्वतः स्तुवतः शंसमावः॥ हे इंद्र त्वं रुदः
तो रोदनं कुर्वतः जक्षतः भक्षणं हसनं वा कुर्वतश्च एतान् द्विविधानपि वृत्रानुचरान्। रजसः पारे अंतरिक्षस्य परतोऽवकाशानीयद्युलोके अयोद
हः दग्धवानसि वृत्रं सपरिवारं भागं रजसः शब्दोंतरिक्षवाची लोकाः रजांस्युच्यंत इत्युक्तत्वात। अयोधयः युद्धं मकारोः युद्धेन मारितवानित्य
र्थः। दस्युं उपक्षयितारं वृत्रं दिव आ द्युलोकादानीय उच्चा उत्कर्षेण अवादहः दग्धवानसि वृत्रं सपरिवारं विनाश्य तत उर्धं सुन्वतः सोमाभिष
वं कुर्वतः स्तुवतः स्तोत्रं कुर्वतो यजमानस्य शंसं स्तुतिं प्रावः प्रकर्षेण रक्षितवानसि। रुदतः। रुदिर् अश्रुविमोचने लटः शतृ अदादित्वाच्छपो लुक् प्र
त्ययस्वरेणांतोदात्तत्वं। शतुरनुम इति नद्यजादेः सर्वनामस्थाने उदात्तत्वं। जक्षतः जक्ष भक्षहसनयोः पूर्ववच्छपो लुक् जक्षित्यादयः षडिति अभ्यस्तसंज्ञा अतो
अभ्यस्तानामादिरित्याद्युदात्तत्वं। स्तुन्वतः सुनोते। शतरि स्वादिभ्यः श्नुः हुश्नुवोः सार्वधातुक इति यणादेशः। शतुरनुम इति विभक्तेरुदात्तत्वं।
स्तुवतः ष्टुञ् स्तुतौ अदादित्वाच्छपो लुक् उवङादेशः पूर्ववत्स्वरः॥ ॥अष्टमीमृचमाह॥ चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुंभ
मानाः॥ न हिन्वानासस्तितिरुस्त इंद्रं परि स्पशो अदधात्सूर्येण॥ ते वृत्रानुचराः पृथिव्याः भूमेः परीणहं आच्छादनं सर्वतो व्याप्तिं चक्रा
णासः कुर्वाणाः हिरण्येन हिरण्ययुक्तेन मणिना कंठवाह्यादिगतेन मण्याद्याभरणेन शुंभमानाः शोभमानाः हिन्वानासः वर्धमानाः
संतो वर्तंते तथाविधा वृत्रानुचराः सूर्येण दीप्त्या पर्यदधात् परिहितान् व्यवहितान् करोत्। तथा च ब्राह्मणं आदित्यो हैवोद्यन् पुर
स्ताद्रक्षांस्यपहंतीति। चक्राणासः। करोतेः छंदसि लिट् इति वर्तमाने लिट् लिटः कानच् तसः कुचितिइत्यंतोदात्तत्वं। परीणहं परीण

भा०प्र०

८२ हतं यथा भवति। न यस्यानभावे किंचिदपि हिरण्येत्यादिना पूर्वपदस्य दीर्घः। पृथिव्याः। उदात्तयण इति विभक्तेरुदात्तत्वं। हिरण्यनाभासः। हिरण्मयी धौ चेताद्भालिकः

चानश्लातितिरः तिरतिर्गत्यर्थः॥ ॥नवमीमृचमाह॥ परि यदिंद्र रोदसी उभे अबुभोजीर्महिना विश्वतः सीं॥ अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभि

रधमो दस्युमिंद्र॥ हे इंद्र यद्यदा रोदसी उभे द्यावापृथिव्यौ उभे लोकौ महिना त्वदीयेन महिम्ना विश्वतः सीं सर्वतः परिगृह्य पर्यबुभोजीः परितो भु

क्तवानसि तदानीं त्वं अमन्यमानान् मंत्रार्थमनुध्यातुं अजानानपि वलं पाठकान् यजमानान् अमन्यमानैः अस्मदीयैर्यजमानैः रक्षणी

यात्वाभिमानवद्भिः ब्रह्मभिर्मंत्रैः स्तुवद्भिः सार्धं अभिभवन् निरधमः निर्धमानि मारितवानसि। धमतिर्गतिकर्मेति यास्कः। अबुभोजीः भुज पालना

भ्यवहारयोः लङि सिपि बहुलं छंदसीति विकरणस्य श्लुः। छंदसि वा हलमिति ईडागमः। अडुदात्तः। यद्वृत्तयोगादनिघातः। महिनाम

हिम्ना महेश्च अस्य धातोः लक्षणाभावेऽमनिन्प्रत्ययान् इति टिलोपः। तृतीयैकवचने अल्लोपे सति उदात्तनिवृत्तिस्वरेणोदात्तत्वं मल्लोपः छांदसः

अमन्यमानान् मन्यतेः ज्ञानकर्मणो मन्यमानः। मन ज्ञाने दिवादिभ्यः श्यन् श्यनो नित्त्वादाद्युदात्तत्वं। समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं संहिता

यां रत्वानुनासिकावुक्तौ॥ ॥दशमीमृचमाह॥ न ये दिवः पृथिव्या अंतमापुर्न मायाभिर्धनदां पर्यभूवन्॥ युजं वज्रं वृषभश्चक्र इंद्रो निर्ज्योतिषा

तमसो गा अदुक्षत्॥ ये वृत्रानुचरा असुराः दिवो द्युलोकात् पृथिव्या अंतं भूमेः स्थानं नापुः नाप्नुवन्। मेघरूपमापन्नं वृत्रं वज्रेण निरस्यत्। अत एव भूमि

प्राप्त्यभावात्। धनदां धनप्रदां भूमिं मायाभिः स्वकीयकापट्यैर्भवकर्मभिः न पर्यभूवन् परितो न व्याप्ताः जलापनयस्त्वाभिर्द्यावापृथिव्योरुपकारं

न कृतमित्यर्थः। तदानीमयमिंद्रो मेघभेदनाय वज्रं युजं सहायं युक्तं चक्रे कृतवान्। ज्योतिषा द्योतमानेन वज्रेण तमसः अंधकाररूपान्मेघान्निर्गाः गम

नशीलाः वृष्टिकारिणीः निरधुक्षत् निःशेषेण दुग्धवान् मेघं भित्त्वा जलं वृष्टवानित्यर्थः। दिव स्थु इति दृषमिति पूर्वादुदात्तत्वं। आपुः आप्लृ व्याप्तौ लि

ति रूपं यद्वृत्तयोगादनिघातः। पर्यभूवन् अत्रापि यच्छब्दस्यानुषंगादनिघाताभावः। युजं। युजिर् योगे। ऋत्विगित्यादिना क्विन्। अनित्यमागमशा

सनमिति वचनान्नुमभावः। अधुक्षत् दुह प्रपूरणे लुङि शल इगुपधादनिटः क्सः इति क्सः। दादेर्धातोर्घ इति घत्वं एकाचो बशो भष् इत्यादि

ना भष्भावः। संहितायां भष्भावः छांदसः॥ ॥इति प्रथमस्य तृतीये द्वितीयो वर्गः॥ ॥एकादशीमृचमाह॥ अनु स्वधामक्षरन्नापो अस्यावर्ध

त मध्य आ नाव्यानां॥ सध्रीचीनेन मनसा तमिंद्र ओजिष्ठेन हन्मनाहन्नभि द्यून्॥ अपो जलानि अस्येंद्रस्य स्वधाम् अन्नं व्रीह्यादिरूपमनुलक्ष्य अक्षर

न् मेघादवाक्षरन् अभवन्। तदानीमयं इंद्रो नाव्यानां नावा तरणयोग्यानां नदीनां अपां मध्ये आ समंतात् अवर्धत वृद्धिं प्राप्तः प्रभूतजले वर्तमानोऽपि

न ममार किंत्वभिवृद्ध एवेत्यर्थः। तदानीमिंद्रः सध्रीचीनेन सहगच्छता मनसा युक्तं तं वृत्रं ओजिष्ठेन अतिबलयुक्तेन हन्मना हननसाधनेन वज्रेण अभि

द्यून् कतिचिद्दिवसानभिलक्ष्य अहन्। तं वृत्रं मेघं हतवान्। जलमध्यपतितस्यापि शत्रोस्य मनो यत्नं ज्ञातवानेव सहगच्छतिता... अभि

लक्ष्य हतवानित्यर्थः॥ अक्षरन्। क्षर संचलने। नाव्यानां नावा तार्याणां नौवयोधर्मेत्यादिना यत्। तार्ये यत्प्रत्ययः स्वरितत्वात्। यतोऽनाव इति प

र्युदासादाद्युदात्तः। विभाषांचेरदिक्स्त्रियामिति स्वार्थे खप्रत्ययः। तस्य आयनेयीत्यादिना ईनादेशः। अचः इत्यकारलोपे चाविति दीर्घत्वं। स्वादेश ८२

स्य अकृत्प्रत्ययविधानादुदात्तत्वं। ओजिष्ठेन। ओजोऽस्यास्तीत्योजस्वी अस्मायामेधास्रजो विनिः तत आतिशायनिक इष्ठन् विन्मतोर्लुगिति वि

नो लुक् टेरिति टिलोपः नित्त्वादाद्युदात्तत्वं। तृतीयैकवचने अल्लोपे प्राप्ते न संयोगाद्वमंतादिति प्रतिषेधः॥ ॥द्वादशीमृचमाह॥ ॥

न्याविध्यदिलीबिशस्य दृल्हा वि शृंगिणमभिनच्छुष्णमिंद्रः॥ यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युं॥ इलीबिशस्य इलायाः भूमेर्बिले शया

नस्य वृत्रस्य संबंधिनी इलीबिशस्येति यास्कः। दृल्हानि दृढानि अमरणानि रुद्धानि प्रभूतान्युदकानि इंद्रो न्याविध्यत् नितरां विद्धवान् यद्वा दृढानि प्रव 163

लानि सैन्यानि नितरां विद्धवान्। ततः शृंगिणं शृंगवद्भिरायुधैर्युक्तं गमनशीलं युध्यमानं शुष्णं जगतः शोषकं वृत्रं व्यभिनत् विविधं ताडितवान्। हे मघव 1924

न्धनयुक्तेंद्र त्वं यावत्तरो यावतो वेगस्तावता वेगेन यावदोजः यावद्बलमस्ति तेन सर्वेण युक्तस्त्वं पृतन्युं पृतनां युद्धमिच्छंतं शत्रुं वृत्रं वज्रेणावधीः हतवानसि॥ अ

विध्यत् व्यध ताडने श्यन्। ग्रहिज्येत्यादिना संप्रसारणं। तिङ्ङतिङ इति निघातः। उदात्तस्वरितयोर्यण इति संहितायां आडागमस्य स्वरितत्वं। इलीबिशस्य

पृषोदरादित्वादभिमतरूपस्वरसिद्धिः॥ दृल्हा दृढानि स्थूलं दृल्हबलयोरिति निपात्यते। शेः छंदसि बहुलमिति शेर्लोपः। अभिनत् भिदिर् विदार

णे लङि रुधादिभ्यः श्नम्। इतश्चेति इकारलोपे हल्ङ्याब्भ्य इति लोपः। शुष्णं शुष शोषणे शोषयतीति शुष्णः। तृषिशुषिरसिभ्यः कित् इति नप्रत्ययः। निदि

त्यनुवृत्तेराद्युदात्तत्वं॥ अवधीः लुङि हनो वध इति हंतेर्वधादेशः। पृतन्युं। पृतनाशब्दात् क्यचि कव्यध्वरपृतनस्यर्चि लोपः क्याच्छंदसीत्युप्रत्ययः॥ ॥

त्रयोदशीमृचमाह॥ अभि सिध्मो अजिगादस्य शत्रून्वि तिग्मेन वृषभेणा पुरोऽभेत्॥ सं वज्रेणासृजद्वृत्रमिंद्रः प्र स्वां मतिमतिरच्छाशदानः॥ अस्येंद्रस्य सिध्मः

साधको वज्रः शत्रून् अभि इंद्रवैरिणो अभिलक्ष्य अजिगात् गतवान्। जिगातिर्गतिकर्मा। गतिजिगातीति गतिकर्मसु पाठात्॥ स चेंद्रस्तिग्मेन तीक्ष्णेन

वृषभेण श्रेष्ठेन आयुधेन तेन वज्रेण पुरः शत्रुस्य पुराणि व्यभेत्। विविधं भिन्नवान्। ततः स इंद्रो वज्रेण स्वकीयेन वृत्रं समसृजत्॥ संयोजितवान् संयोज्य

च शाशदानः शत्रून् हिंसन् स्वां मतिं स्वकीयां बुद्धिं प्र अतिरत् प्रकर्षेण वर्धितवान्। सिध्यायिधृसेराधो अस्मादौणादिको मक्। अजिगात्। गातु

लौ। अत्र तु गत्यर्थः। जुहोत्यादित्वात् श्लुः द्विर्भावः बहुलं छंदसीत्यभ्यासस्येत्वं॥ अभेत्। भिदिर् विदारणे अस्माल्लङि व्यत्ययेन शप्। तस्य बहुलं छंदसी

ति लुक्। लघूपधगुणः हल्ङ्याब्भ्य इति लोपः। यद्वा लुङि च्लेर्लुक्। अतिरत्। प्रपूर्वस्तिरतिर्वर्धनार्थः। यद्वा तरतेर्व्यत्ययेन शः। ऋत इद्धातोरितीत्वं। शा

शदानः शद्लृ शातने। अस्माच्छंदसि लिटः कानच् तस्य छंदस्युभयथेत्यार्धधातुकत्वादतो लोपयलोपौ सार्वधातुकत्वादभ्यस्तानामादिरित्याद्युदात्

त्तं॥ ॥चतुर्दशीमृचमाह॥ आवः कुत्समिंद्र यस्मिंचाकन्प्रावो युध्यंतं वृषभं दशद्युं॥ शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ॥ आवः

कुत्सं एतन्नामकं गोत्रप्रवर्तकमृषिं आवः रक्षितवानसि। यस्मिन्कुत्से चाकन् तं कामयमानो वर्तसे तं कुत्समिति पूर्वत्रान्वयः। तथा दशद्युं एतन्नाम

कं दशसु दिक्षु दीप्यमानमृषिं प्रावः प्रकर्षेण रक्षितवानसि। किंभूतं युध्यंतं स्वकीयैः शत्रुभिः सह युद्धं कुर्वंतं वृषभं गुणैः श्रेष्ठं। शफच्युतः तदीयाश्व

स्य शफात् खुरात् च्युतो रेणुः धूलिर्द्यां द्युलोकं नक्षत व्याप्नोत्। श्वैत्रेयः श्वित्रायाः योषितः पुत्रः शत्रुभयाज्जले मग्नः सन् त्वदनुग्रहात् नृषाह्याय नृभिः

पुरुषैः साह्याय युद्धाय जलादुत्थितवान्। चाकन्। कनी दीप्तौ। अस्माद्यङंताच्छंदस्युभयथेत्यार्धधातुकत्वाण्णिलोपः यावभावस्य प्रत्ययस्वरेणांतोदा

त्तत्वं॥ यद्वा कमु कांतावित्यस्माद्यङ्लुगंताल्लुङि सिपि अभ्यासस्य नुमाभावश्छांदसः दीर्घ अकित इति दीर्घत्वं सिलोपे मो नो धातोरिति मकारस्य नका

रः धातुस्वरः यद्वृत्तयोगादनिघातः युध्यंतं व्यत्ययेन परस्मैपदं दशद्युं। दीव्यतेः प्रकाशनार्थात् संपादितलक्षणः क्विप् च्छ्वोः शूडित्यूठ् दश दिक्षु

द्यु यस्यासौ दशद्युः। छांदसं ह्रस्वत्वं। यद्वा द्युशब्दोऽहर्नामसु पठितः तेन प्रशस्तिनिमित्तभूतः प्रकाशो लक्ष्यते बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। श

फच्युतं। शफेन च्युतः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। नक्षत। नक्ष गतौ व्यत्ययेनात्मनेपदं। श्वैत्रेयः। श्वित्राया अपत्यं। स्त्रीभ्यो ढक्॥ ॥

भा०प्र० ८३ न्समस्याय आक् सहोश्चेतिक्रमणियत यतोनाव उत्यायुदात्ततं॥ समासे रु दुतरपदप्रकृतिस्वरत्वं। पूर्वपदादिति षत्वं। पूर्वपदात्संज्ञायामिति णत्वं। संहितायां दीर्घ
श्छांदसः॥ ॥ पंचदशीमृचमाह॥ आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गां। ज्योक् चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः॥
हे मघवन् धनवन् इंद्र श्वित्र्यं श्वित्रायाः पुत्रं एतन्नामकं पुरं आवः रक्षितवानसि। कं अर्थं क्षेत्रजेषे शत्रुभिः सह युद्धे तस्याः क्षेत्रप्राप्त्यर्थं की हृशं शमं तदीय
परिपालने नचिरव्याकुलता परित्यज्य शांतं वृषभं गुणैः श्रेष्ठं तुग्र्यासु गां जलेषु गतं मग्नमित्यर्थः॥ तुग्र्या वृर्णमिति उदकनामसु पठितत्वात्॥ अत्र अ
स्माभिः सह युक्तयुद्ध्यां क्वचित् चिरकालमपि तस्थिवांसः अवस्थिताः संतः अक्रन् ये वैरिणः शत्रुत्वमकुर्वन् शत्रूयतां शत्रुनात्मनः इच्छतां तेषां अधारा
वेदनानि दुःखानि अकः अकरोः। तुग्र्यासु आवहतीति श्वित्रयत्रः तत्रभवास्तोषधयाः तुग्र्याः ऊर्मिति धनधस्य यादेशः इकार लोपः छांदसः॥ निपाताद्युदात्त
त्वं। क्षेत्रजेषे अन्येषामपि दृश्यत इति दीर्घ समास इत्यतो ऽपि षण्णत्वं॥ अंतोदात्तादुत्तरपदादिति इत्यादि नाविभक्ते र
दात्तत्वं॥ श्वित्र्यं श्वित्रियां भावः॥ भवे छंदसीति यत् तयतो नाव उत्यदात्ततत्वं तस्थिवांसः तिष्ठतेः कसुः वस्वेकाजाद्घसामिती डागमः॥ अक्रन् करोते लुङि मंत्रे
घसेत्यादिना च्लेर्लुक्॥ शत्रूयतां। शत्रुमात्मन इच्छंतीति शत्रूयंतः सुप आत्मनः क्यजिति क्यच् तदंतात् लटः शतृ। तस्य लसार्वधातुकानुदात्तत्वे क्यचश्चकारेण
दात्तत्वं। तस्य च पूर्वबलासिद्धत्वं नेष्यत इत्युक्तत्वात् छंदसि मं तोदात्तत्वमिति शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं। अधरा वेदनानि भयत्रः छं
दसि वहुलमिति लोपः॥ अकः करोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक् गुणः॥ ॥इति प्रथमस्य तृतीये तृतीयो वर्गः॥ ॥त्रिश्चिन्नो अद्येति द्वादशर्चं चतुर्थं सूक्तं हिरण्यस्तूपस्यार्षं
ऋषिश्चान्यस्मादृषयिति परिभाषया आंगिरसो हिरण्यस्तूप ऋषिः। अश्विनौ देवता। ऋचीच कौतिनवमी आ नो अश्विना त्रिवृता इत्येषा त्रिष्टुप् शेषा
एकादश्यं जगत्यः। त्रिश्चिन्नो द्वादशाश्विनं नवम्यंते त्रिष्टुभावित्यनुक्रमणिका। प्रातरनुवाके आश्विने क्रतौ जागते छंदसि इदं सूक्तं। अथा
श्विन इति खंडे सूत्रितं। त्रिश्चिन्नो अद्य भवतं द्यावा पृथिवी इत्यादि। तिसृतगतमिति आश्विनशस्त्रे प्यतस्य नं प्रातरनुवाक न्यायेन त्यादिति सूत्रात्॥ ॥तत्र प्रथमा
मृचमाह॥ त्रिश्चिन्नो अद्या भवतं नवेदसा विभुर्वां याम उत रातिरश्विना॥ युवोर्हि यंत्रं हिम्येव वाससोभ्यायंसेन्या भवतं मनीषिभिः॥ हे नवेदसा अभि
नामेधाविनाविश्चि हे नवेदाः इति मेधाविनामन वेदाः कविः मनीषीति नामसु पठितत्वात् तादृशौ युवां त्रिश्चित् त्रिवारमपि अद्यास्मिन् कर्मणि
नः अस्मदर्थं भवतं आगच्छतं अत्र त्रिरिति वचनं सवनत्रयापेक्षं आदरातिशयद्योतनार्थं वा। त्रिषत्यादिदेवा इति श्रुत्यंतरात् वां युवयोः यामो
गमनसाधनभूतो रथो विभुः व्याप्तः उत अपि च रातिर्दानं विभुरिति शेषः युवोर्युवयोरुभयोर्यंत्रं हिम्यस्य रात्रिर्नियमरूपः संबंधो विद्यते खलु। तत्र दृष्टांतः वाससः सर्वांगव्यापिवासस्य हिमवति सयुक्ता यथा भ्रव यथा रात्र्यां सह दिवसस्य संबंधः कदाचिदपि न पतितः इतः युवां
मनीषिभिः मेधाविभिः ऋत्विग्भिः मनीषीति मेधाविनाम मनीषीति पठितत्वात्। अभ्यायंसेन्या अभितो नियंतव्या अनुग्रह
वज्ञानदाधीनौ भवतं। अत्र चनिपातस्य चेति संहितायां दीर्घः नवेदसाविपरीतं न विदंतीति नवेदसौ विदज्ञाने इत्यस्माद्दौणादिकोसुन् नञ्समासेन नभ्रा
ण्नपादित्यादिना नकारस्य प्रकृतिभावः॥ सुपां सुलुगित्याकारः आमंत्रितनिघातः यामः यायते गम्यते नेनेति यामो रथः आर्तिस्तुस्त्रित्यादिना म ८३
न्निता द्यदात्ततत्वं॥ यद्वा यम उपरम इत्यस्मात् कर्मणि घञ् वृषादित्वादंतोदात्तत्वं॥ रातिः रादान इत्यस्मात् भावे क्तिन् मंत्रे वृषेत्यादिना तस्यो
दात्तत्वम्॥ युवोः सुपां सुपो भवंतीति षष्ठीद्विवचनस्य षष्ठीद्विवचनादेशः अतः आदेशविषये वा षष्ठीति यतं न भवति ओस्य लोपइतिटि लो
पेउदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं॥ अंत्यालोपपक्षे तु एकादेशस्वरेण हिम्यादृ हिमेतिरात्रिनाम उ धः पयोहिमेतितन्नामसु पठितत्वात्॥ तत उ
त्पत्यरेत् तृतीयैकवचनस्य सुपां सुलुगिति ड्यादेशः॥ ततस्त्रिलोपे उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं॥ वाससः वस आच्छादने। वासयति प्रकाशेनाच्छा
दयतीत्यहर्वासः॥ अभ्यायंसेन्या अभ्याङ् पूर्वात् यमउपरम इत्यस्मादौणादिकः सेन्यः प्रत्ययः सुपां सुलुगित्याकारः॥ ॥
द्वितीयामृचमाह॥ त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद्विदुः॥ त्रयः स्कंभासः स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा॥
मधुवाहने मधुवाहनद्रव्याणां नानाविधखाद्यादीनां वहनेन युक्ते अश्विनोः संबंधिनि रथे त्रयः वज्रसमानाः दृढाः चक्रविशेषाः त्रयः त्रि
संख्याकाः संति इत्युक्तं चक्रत्रयसद्भावप्रकारं विश्वे सर्वे देवाः सोमस्य चंद्रस्य वेनां कमनीयां भार्यामभिलक्ष्य यात्रायां विदुः जानंति यदा सोम
स्य वेनयासह विवाहः तदानीं नानाविधखाद्ययुक्तं चक्रत्रयोपेतं प्रौढं रथमारुह्याश्विनौ गच्छत इति सर्वे देवा जानंतीत्यर्थः। तस्य रथस्योपरि स्कं
भासः स्तंभविशेषाः त्रयः त्रिसंख्याकाः स्कभितासः स्थापिताः किमर्थं आरभे आरब्धं अवलंबितुं यदा रथस्त्वरया याति तदानीं पतनभीतिनिवृत्त्य
र्थं हस्तालंबनभूताः स्तंभा इत्यर्थः। हे अश्विना युवां तादृशेन रथेन नक्तं रात्रौ त्रिर्याथः त्रिवारं गच्छथः तथा दिवा अपि त्रिर्यायार्थः॥ गत्वा च हविः रथ
मारुह्य पुनः पुनः क्रीडथ इत्यर्थः॥ मधुवाहने मधु उह्यते अनेनेति मधुवाहनः करणे ल्युट् इदिदुः वेत्तेर्लटि विदो लटो वेति झेरुसादेशः स्कंभासः स्त
भिः स्कभ्नाति प्रतिबंधे स्कंभेन प्रतिबद्धा भवंतीति स्कंभाः पचाद्यच्॥ स्कभितासः स्कंभुः सौत्रो धातुः अस्मान्निष्ठायां यस्य विभाषेतीट्प्रति
षेधप्राप्तः यस्मितस्कभितेत्यादिना इडागमो निपातितः॥ आरभे रभराभस्ये॥ अस्माद्धतोः पूर्वात्संपदादिलक्षणो भावे क्विप् कृदुत्तरपदप्रकृतिस्वरत्वं
॥ ॥तृतीयामृचमाह॥ समाने अहन् त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतं॥ त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतं॥
हे अश्विना अश्विनौ देवौ युवं युवां समाने अहन् एकस्मिन्नेवानुष्ठानादिने त्रिरवद्यगोहना त्रिवारमनुष्ठानगतानां दोषाणां संवरणकारिणौ भवतं
अद्यास्मिन् यज्ञे यज्ञगतं हविः मधुना मधुररसेन त्रिर्मिमिक्षतं त्रिवारं सिंचतं। किंच दोषा उपसश्च रात्रिषु दिवसेषु च निरंतरं वाजवतीः बलका
रिणीः इषो अन्नानि अस्मभ्यं पिन्वतं सिंचतं प्रयच्छतमित्यर्थः॥ अहन् सुपां सुलुगिति सप्तम्या लुक्॥ अवद्यगोहना॥ गुहू संवरणे अवद्यस्य गूह
यितारौ तत् द्यादिवाल्युः इदुपधाया गोह इति प्राप्तस्य ऊत्वस्याभावः छांदसः मिमिक्षतं मिह सेचने सन्निएकाच उपदेशेनुदात्तादितीट्प्रतिषेधः हलं
ताच्चेति सनः कित्वात् लघूपधगुणाभावः द्विर्भावहत्वादि ब्राह्मणोदश्च कत्वं वाजवतीः इति तश्चेति डीप् पिन्वतं पिवि मिवि णिवि सेचने॥ इदि
तो नुम् धातोरिति नुम्॥ ॥ चतुर्थीमृचमाह॥ त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतं॥ त्रिर्नांद्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अ
क्षरेव पिन्वतं॥ हे अश्विनौ युवं त्रिर्वर्तिर्यातं। अस्मदीयवर्तनसाधनं गृहं त्रिर्यातं त्रिवारं प्राप्नुतं तथा अनुव्रते अस्मदनुकूलव्यापारयुक्ते ज
ने त्रिर्यातं त्रिवारं तदनुग्रहाय गच्छतं। त्रिः सुप्राव्ये त्रिवारं सुष्ठु प्रकर्षेण भवद्भ्यां रक्षणीये वर्तमानान् अस्मान् त्रेधेव त्रिभिरेव प्रकारैः शिक्षि
तं पुनः पुनरनुष्ठानमुपदेष्टव्यमित्यर्थः तथा नांद्यं नंदनीयं संतोषकरं फलं त्रिर्वहतं प्रापयतं अस्मे अस्मासु पृक्षो अन्नं त्रिः पिन्वतं त्रिवारं प्रय
च्छतं। तत्र दृष्टांतः अक्षरेव अक्षराण्युदकानि अक्षरं स्रोतः क्षरितिति तन्नामसु पाठात्॥ तानि पर्जन्यो यथा प्रयच्छति तद्वत्॥ वर्तिः वृतु वर्तने त्रेति
वर्तिर्गृहं हुविधिश्रुहृश्वरितीत्यादिना इप्रत्ययः कर्मणि सुपां सुलुगिति द्वितीयैकवचनस्य सु आदेशः सुप्राव्ये उपसर्गद्वयोपसृष्टादवतेः कर्मणि ण्यत
संताप्रर्थकाविधिरनित्य इति वृद्ध्याभावः तित्स्वरितमिति स्वरितत्वं शिक्षतं शिक्षविद्योपादाने॥ नांद्यं णंदेतः॥ पृक्षः पृची संपर्के। असु
165
1924

निअमऌ आगमः॥ अस्मे। सुपां सुलुगिति शे आदेशः॥ अक्षराइव। अश्नुवते व्याप्नुवंतीत्यक्षराण्युदकानि ओणादिकः सरप्रत्ययः। लोपः॥ ॥पंचमी
मृचमाह॥ त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवताता त्रिरुतावतं धियः॥ त्रिः सौभगत्वं त्रिरुत श्रवांसि नस्त्रिष्ठं वां सूरे दुहिता रुहद्रथं॥ हे अश्विना युवं
नोस्मान् रयिं धनं त्रिर्वहतं त्रिवारं प्रापयतं देवताता देवतानां देवैर्युक्ते कर्मणि। त्रिः त्रिवारं मा गच्छतमिति शेषः॥ उत अपि च अस्मदीयानि नो
स्मभ्यं त्रिर्वहतं वायुवयोः संबंधिनं त्रिसंचक्रवये वस्थितं रथं सूरेः सूर्यस्य दुहिता पुत्री दुहिता दुर्हिता दूरे हितेति यास्कः॥ सा आरुरुवती॥
देवताता सर्वदेवात्तातिलिति स्वार्थकस्तातिल्प्रत्ययः। तेन देवतातिशब्देन देवसंबंधो यज्ञो लक्ष्यते देवतानामस्त्विति तत्र भामसूपविलत्वात्।
लितीति प्रत्ययात् पूर्वस्योदात्तत्वं सुपां सुलुगिति सप्तम्या लुक्। डादेशः॥ त्रिष्ठं त्रिषु चक्रेषु तिष्ठतीति त्रिष्ठः सुपि स्थ इति कः। अंबांबेत्यादि
ना सकारस्य षत्वं सूरे पुत्र प्रकरणे॥ रुहद्रथं रुधिभ्यः क्विन्निति क्तिन्नित्वादाद्युदात्तः। विभक्तिप्रत्ययः आरुहत् रुहमदरदिभ्यश्छंदसीति च्लेर
ङादेशः॥ ॥ षष्ठीमृचमाह॥ त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरु दत्तमद्भ्यः॥ ओमानं शंयोर्ममकाय सूनवे त्रिधातु शर्म वह
तं शुभस्पती॥ हे अश्विना नोस्मभ्यं दिव्यानि द्युलोकवर्तीनि भेषजा औषधानि त्रिर्दत्तं तथा पार्थिवानि पृथिव्यामुत्पन्नानि औषधानि त्रिर्दत्तं।
अद्भ्यः अंतरिक्षसकाशादपि औषधानि त्रिर्दत्तं॥ अप इत्यंतरिक्षनाम आपः पृथिवी भूरिति तन्नाम सु पाठात्॥ शंयोः एतन्नामकस्य बृहस्पति
पुत्रस्य तं शंयुं बार्हस्पत्यमवृणीतेति ब्राह्मणांतरात् तस्य संबंधिनं ओमानं सुखविशेषं ममकाय मनवे मदीयाय पुत्राय दत्तं शुभस्पती शो
भनस्योदकस्य पालकौ युवां त्रिधातु वातपित्तश्लेष्मधातुत्रयशमनविषयं शर्म सुखं वहतं प्रापयतं॥ दिव्यानि द्युप्रागपागुदक्प्रतीचो यत् इति यत्प्रत्ययः॥ अ
द्भ्यः अद्भिरिति वाच्ये विभक्तिव्यत्ययः॥ ओमानं अवतेरन्येभ्योपि दृश्यत इति मनिन् ज्वरत्वरेत्यादिना अकारवकारयोरूठ् सार्वधातुका
र्धधातुकयोरिति गुणः यदि ज्वरत्वरेत्यत्रानुनासिक इति नानुवर्तते तर्हि पूर्वेण सूत्रेण वकारस्य ऊठादेशो भविष्यति॥ शुभस्पती॥ शु
भस्पती। सुपामिति षष्ठ्याः लुक् पतिपुत्रेति संहितायां विसर्जनीयस्य सत्वं सुबामंत्रिते इति पराङ्गवद्भावात् षष्ठ्यामंत्रित स
मुदायस्याष्टमिकं सर्वानुदात्तत्वं॥ ॥इति प्रथमस्य तृतीये चतुर्थो वर्गः॥ ॥सप्तमीमृचमाह॥ त्रिर्नो अश्विना यजता दिवेदिवे परि
त्रिधातु पृथिवीमशायतं॥ तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतं॥ हे अश्विना दिवेदिवे प्रतिदिनं दिवेदिवे इति
वीप्सा यजना हि सपठितत्वात्॥ यजता यजनीयौ युवां नोस्मदीयां पृथिवीं वेदिरूपां भूमिं परिसर्वतः प्राप्य त्रिधातु धातुत्रययुक्ते आ
स्तीर्णे बर्हिषि अशायतं शयनं कुरुतं हे रथ्या रथ्यौ रथस्वामिनौ तिस्रः त्रिसंख्याकाः दृष्टिकपालरूपसोमिकरूपवेदीर्गच्छतं॥ तत्र दृष्टां
तः॥ स्वसराणि शरीराणि आत्मेव वातः यथा प्राणिनामात्मभूतः प्राणवायुः तदीयानि शरीराणि गच्छति तद्वत्॥ यजता यजनं मृगयदेत्या
दिना अतच् चित्त इत्यंतोदात्तत्वं त्रिधातु धाधीयते निधीयत इति त्रिधातु सितनिगमीत्यादिना धात्वर्थे तुन् नित्वादाद्युदात्तत्वं॥ समासे कृदु
त्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते सुपां सुलुगिति सप्तम्या लुक्॥ अशायतं अदादिगणत्वाच्छपो लुक्॥ अशायतमित्यस्य ह्रस्वदीर्घयो
र्व्यत्यासः॥ नासत्या सत्यो न असत्यो असत्यो न भवत इति नासत्यौ॥ सत्यावेव वा सत्यावित्यौर्णवाभ इति यास्कः॥ नभ्राण्नपादि
त्यादिना नञः प्रकृतिभावः रथ्या रथ्यशब्दः स्वामिना वित्यर्थः छंदसि वनीयत्प्रत्ययः॥ स्वसराणि सरंति गच्छंतीति सराः इंद्रियाणि स

कीया सरा येषां शरीराणां बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥अष्टमीमृचमाह॥ त्रिरश्विना सिंधुभिः सप्तमातृभिस्त्रय आहावास्त्रेधा
हविष्कृतं॥ तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितं॥ ॥हे अश्विना सप्तमातृभिः इमं मे गंगे इत्यादिमंत्रोक्ताः सप्तसं
ख्याकाः गंगादिनद्यो मातरः इत्यादिका येषां जलविशेषाणां ते सप्तमातरः तैः सिंधुभिः स्यंदनस्वभावैः उदकैः वसतीवरीनामभिः त्रिः सो
माभिषवः कृत इति शेषः तथा चान्यत्र ब्राह्मणे समाम्नातं अथैष एताभिः सुनोति एकादशाहं वसति यदहः वसतीवरीर्गृह्णाति यदिति शेषः॥ मि
ति आहावाः यथोक्तजलयुक्तस्य सोमस्याधारभूताः कृपसदृशाः त्रयः त्रिसंख्याकाः द्रोणकलशाधवनीयपूतभृदाख्याः निष्पन्ना इति
शेषः॥ तिस्रः पृथिवीरुपरि त्रिभ्यः पृथिव्यादिलोकेभ्य ऊर्ध्वं प्रवा प्रवंतौ गच्छंतौ युवां दिवो नाकं द्युलोकसंबंधिनमादित्यं रक्षेथे॥ कीदृशं
नाकं द्युभिरह्नोभिः अक्तुभी रात्रिभिश्च हितं स्थापितं अहर्निशं सूर्य इति रात्रौ वह्निं गच्छती यद्वा अहोरात्राभ्यां सूर्यो व्यवस्थाप्यत इत्यर्थः॥ सप्त
मातृभिः बहुव्रीहौ पूर्वपदस्वरः॥ आहावाः निपानमाहाव इति आङ्पूर्वान्ह्वयतेरप्प्रत्ययः संप्रसारणं वृद्धिश्च निपातनात् थाथादिना उत्तरप
दांतोदात्तत्वं॥ प्रवा प्रुङ्गतौ प्रवर्तेते गच्छत इति। प्रवौ पचाद्यच् सुपां सुलुगित्याकारः॥ नाकं नास्मिन्नकमस्तीति नाकः॥ नभ्राण्नपाड्
त्यादिना नञः प्रकृतिभावः द्युभिः उडिदमित्यादिना प्राप्तस्य विभक्त्युदात्तत्वस्य दिवो झलिति प्रतिषेधः॥ ॥नवमीमृचमाह॥ क्व त्री चक्रा
त्रिवृतो रथस्य क्व त्रयो वंधुरो ये सनीळाः॥ कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः॥ हे नासत्यावश्विनौ त्रिवृतः त्रिसं
ख्याकैरश्रिभिरुपेतस्य भवदीयस्य रथस्य इषाइयं पूर्वभागे संयोज्यते सेयमेकाश्रिः पृष्ठभागे विसृज्यते तेन त्रिकोणोयं संपद्यते ईदृश
स्य रथस्य संबंधीनि त्रीणि चक्राणि क्व कुत्र स्थितानि इत्यस्माभिर्न दृश्यंते यकाष्ठविशेषाः बंधुरः नीडबंधनाधारभूतास्त्रयः अक्षरे
ण सहिते इति पठ्यते त्रिसंख्याकाः क्व कुत्र स्थिता इति अस्माभिर्न ज्ञायते वाजिनो बलवतो रासभस्य भवदीयाश्वस्थानीयस्य गर्द
भस्य योगो रथयोजनं कदा कस्मिन्काले निष्पन्नमित्यस्माभिर्दृश्यते येन च त्रित्रयनाडिकाब्रयरासभयोजनसहितेन रथेन यज्ञं
मस्मदीयं यागस्थानं उपयाथः युवां प्राप्नुथः तादृशस्य रथस्येति पूर्वेणान्वयः॥ त्री चक्रा उभयत्रापि शेश्छंदसि बहुलमिति शेः
लोपः॥ वंधुरो वंधेरौणादिक उरप्रत्ययः बलंबयोः सं॥ सनीळाः वोपसर्जनस्येति सभावः॥ ॥दशमीमृचमाह॥ आ नासत्या गच्छतं हूय
ते हविर्मध्वः पिबतं मधुपेभिरासभिः॥ युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवंतमिष्यति॥ हे नासत्या अश्विनौ इहैक
र्मण्यागच्छतं॥ अस्माभिर्हविर्हूयते युवां च मधुपेभिः मधुरद्रव्यपानयुक्तैः आसभिः भवदीयैरास्यैः मध्वो मधुरद्रव्याणि ह
वींषि पिबतं॥ सविता सूर्यः उषसः पूर्वं उषःकालात्पुरा युवयोरश्विनोः संबंधिनं रथं यज्ञतात्मादस्मद्यज्ञार्थमिति हि प्रेरयति खलु की
दृशं चित्रं पूर्वोक्तैश्चक्रयंत्रोत्थिभिः विचित्रं घृतवंतं अक्षांजनसाधनेन घृतेनोपेतं॥ गच्छतं अदुपदेशात् लसार्वधातुकानुदात्तत्वे
शपः पित्वादनुदात्तत्वं॥ धातुस्वरः॥ अत्र गच्छतं पिबतं चेति वार्थप्रतीतेश्चादिलोपविभाषेति प्रथमायास्तिङ् विभक्तेर्निघातप्र
तिषेधः॥ हूयते लसार्वधातुकस्वरानुदात्तत्वे यकस्वरः॥ मध्वः लिंगव्यत्ययः॥ डाधुणादेशः छांदसः॥ नुम् मधुपेभिः मधु पिबंतीति
मधुपानि॥ आतानुपसर्गे कप्रत्ययः॥ आसभिः॥ पद्दन्नित्यादिना आस्यशब्दस्यासन्नादेशः युवोः युवयोरित्यत्र मित्यत्रोक्तं॥ इष्यति॥

167/1924

140775

भा॰ प्र॰ इषयतेश्चेतनित्वादाद्युदात्तत्वं हि चेति निघातप्रतिषेधः॥ ॥एकादशीमृचमाह॥ आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना॥ प्रा
८५ युस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा॥ हे नासत्या असत्येनासत्येन रहिता अश्विना अश्विनौ देवा युवां त्रिभिरेकादशैः यद्देवासो दिव्ये
कादशस्थेत्यादिमंत्रप्रतिपादितैस्त्रिसंख्याकैः एकादशात्मकवर्गयुक्तैर्देवैः सह मधुपेयं मामात्मकं मधुरद्रव्यपानमभिलक्ष्य इहास्मिन्देव
यजने इहा आयातमागच्छतं। आयुरस्मदीयमायुष्यं प्रतारिष्टं प्रवर्धयतं। पांस्यस्मादीयानि पापानि निर्मृक्षतं निःशेषेण शोधयतं। द्वेषः द्वेष्टारं
न सेधतं प्रतिषेधतं सचाभुवा अस्माभिः सहावस्थितौ भवतं॥ त्रिभिः षड्भिश्चतुर्भ्य इति विभक्तेरुदात्तत्वं॥ एकादशानां पूरणः तस्य पूरणे ड
ति डट्। मधुपेयं पापानि अवाप्तीति कर्मणि यत् ई घत्याकारस्य ईकारादेशः यतोनाव इत्याद्युदात्तत्वं मधुपेयमिति समासे कृदुत्तरपद
प्रकृतिस्वरत्वं। तारिष्टं तॄ प्लवनतरणयोः छांदसे प्रार्थनायां लुङि च्लेः सिच् इडागमः इतो वृतिश्रामस्य दीर्घस्याभि च परस्मैपदेष्विति प्रतिषेधः
बहुलं छंदस्यमाङ्योगेपीत्यडभावः। अत्र तारिष्टमक्षतं चेति च्छन्दार्थ प्रतीतेः तस्य चाप्रयोगात् चादिलोपे विभाषेति निघातप्रतिषेधः मृक्ष
तं। मृक्ष आमर्शने। छंदसि लुङ्लङ्लिट इति लोडर्थे लुङ्। शल इगुपधादनिटः क्सः इति क्सादेशः। एकाच उपदेशेनुदात्तादितीट् प्रतिषेधः पत्वकु
त्वे पूर्ववदडभावः सेधतं षिधु गत्यां। अत्र कृत्स्नापि विधिः प्रति पूर्वस्यार्थं वर्तते प्रार्थनायां लोट्। शपः पित्वादनुदात्तत्वं। तिङश्च सार्वधातुकस्व
रेण धातुस्वरः। पादादित्वात्तिङः परत्वाद्वा निघाताभावः। द्वेषः अन्येभ्योपि दृश्यन्त इति कर्तरि विच् भवतं द्वेष इत्यस्य वाक्यान्तरगत्वात्। तदपेक्षया
स्य निघातो न भवति। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात्। सचाभुवा सचेत्ययं निपातः सह इत्यस्य समानार्थः। तथा
च यास्कः। सचा सहेत्यर्थ इति। सचा भवत इति सचाभुवौ क्विप् ओः सुपीति यणादेशस्य न भूसुधियोरिति प्रतिषेधः। सुपां सुलुगिति विभक्तेरा
कारः॥ ॥द्वादशीमृचमाह॥ आ नो अश्विना त्रिवृता रथेनार्वाञ्चं रयिं वहतं सुवीरं॥ शृण्वन्ता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ॥ हे
अश्विनौ त्रिवृता रथेन अप्रतिहतगतित्वात् त्रिषु लोकेषु वर्तमानेन रथेन सह नोस्माकं अर्वाञ्चं अभिमुखं सुवीरं शोभनैर्वीरैः पुत्रभृत्यादिभिरुपेतं रयि
धनं आवहतं आनीय प्रयच्छतं। शृण्वन्ता अस्मदीयस्तुतिं शृण्वन्तौ वां युवां अवसे अस्मद्रक्षणार्थं जोहवीमि भृशमाह्वयामि नोस्माकं वाजसातौ संग्रामे वाजसातौ
महाधन इति संग्रामनामसु पाठात्। वृधे वर्धनाय च भवतं॥ सुवीरं शोभना वीरा यस्येति बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। शृण्वन्ता श्रु
श्रवणे इति श्रुवः शृ चेति शृ भावश्च हुश्नुवोः सार्वधातुक इति यणादेशः। सुपां सुलुगित्याकारः॥ जोहवीमि ह्वेञ् स्पर्धायां शब्दे च यङ्लुकि अ
भ्यासस्य च तिकृत संप्रसारणं ह्वः संप्रसारणादस्मात् लङि तमेकवचने यङो वेतीडागमः॥ वृधे वृधु वृद्धावित्यस्मात् संपदादिलक्षणो भावे क्विप्। वाजसातौ षणु
दाने ऊतियूतिजूतिसातिहेतिकीर्तयश्चेत्यादिना उदात्तप्रतिषेधः तेन सनत्यादिना आत्वं वाजानां सातिर्यस्मिन्निति पूर्वपदप्रकृतिस्वरत्वं॥ ॥इति प्रथमस्य तृतीये पंचमो व
र्गः॥ ॥ह्वयाम्यग्निमित्येकादशर्चं पंचमं सूक्तं हिरण्यस्तूप ऋषिः॥ आद्या नवमी च जगती शिष्टास्त्रिष्टुभः॥ कृत्स्नस्य सूक्तस्य सविता देव
ता। आद्यायाः ह्वयाम्यग्निमित्यस्या अग्निमित्रावरुणरात्रिसवित्रालिंगोक्तदेवताः। तथा चानुक्रांतं। ह्वयाम्येकादश सावित्रं नवमी जगत्याद्या च
लिंगोक्तदेवतापाद्यस्येति। अभिप्लवषडहस्य चतुर्थेहनि वैश्वदेवशस्त्रे इदं सूक्तं सावित्रनिविद्धानं। तृतीयस्य त्र्यर्यमेतिखंडे सूत्रितं। ह्वयाम्य ८५
ग्निमस्य द्यावापृथिवी इति तिस्र इति॥ ॥तत्र प्रथमामृचमाह॥ ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे॥ ह्वयामि रात्रीं जग

तो निवेशनीं ह्वयामि देवं सवितारमूतये॥ स्वस्तये अस्माकमविनाशाय स्वस्तीत्यविनाशनामेति यास्कः। प्रथममादौ अग्निं ह्वयामि इहास्मिन्कर्मण्यवसे अस्मद्र
क्षणाय मित्रावरुणा ह्वयामि जगतो जंगमस्य प्राणिजातस्य निवेशनीं उपवेशनहेतुभूतां रात्रीं रात्रिदेवतां ह्वयामि जंगमाः सर्वे प्राणिनो दिवसे स्वव्यापारा 169
न्कृत्वा स्वस्वगृहे रात्रावुपविशंतीति प्रसिद्धं ऊतये अस्मद्रक्षार्थं सवितारं देवं ह्वयामि॥ मित्रावरुणौ देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः देवताद्वंद्वे चेत्युभ
यपदप्रकृतिस्वरत्वं॥ रात्रीं रात्रेश्चाजसाविति ङीप् निवेशनीं निविशंत्यस्यामिति निवेशनी करणाधिकरणयोश्चेति। ल्युट् टिड्ढाणञित्यादिना ङी 1924
प्॥ ऊतये अवतेः क्तिन् ज्वरत्वरेत्यादिना वकारस्य ऊठ् उपधायाश्च ऊती यूतीत्यादिना क्तिन उदात्तत्वं॥ ॥द्वितीयामृचमाह॥ आ कृष्णेन रजसा वर्तमानो
निवेशयन्नमृतं मर्त्यं च॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ सविता सूर्यः कृष्णेन रजसा कृष्णवर्णेन लोकेन कृष्णं कृष्यतेर्निकृष्टो
वर्णः इति यास्कः। लोका रजांस्युच्यंत इति च अंतरिक्षलोके हि सूर्यागमनात्पुरा कृष्णवर्णो भवति। तेनांतरिक्षमार्गेण आवर्तमानः पुनः पुनराग
च्छन् अमृतं देवं मर्त्यं मनुष्यं च निवेशयन् स्वस्वस्थानेषु स्थापयन् यद्वा अमृतं मरणरहितं प्राणं मर्त्यं मरणसहितं शरीरं च निवेशयन्॥ तथा चारण्यके
ऽमर्त्यो मर्त्येना सयोनिरित्येतस्य मंत्रभागस्य व्याख्यानरूपे ब्राह्मणे यथोक्तार्थोवगम्यते। मर्त्यानि हीमानि शरीराणि अमृतैषा देवतेति यथोक्त
गुणायतः सविता देवो भुवनानि सर्वान् लोकान् पश्यन् अवेक्षमाणः प्रकाशयन्नित्यर्थः॥ हिरण्ययेन सुवर्णनिर्मितेन रथेन आयाति अस्मत्स
मीपमागच्छति॥ अमृतं मृतं मरणं नास्त्यस्येति बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं॥ मर्त्यं मर्ते भवं भवे छंदसीति यत् यतोनाव इ
त्याद्युदात्तत्वं॥ हिरण्ययेन ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छंदसीत्यादिना मयटो मकारलोपो निपातितः॥ यस्येति लोपे प्रत्ययस्वरः॥ भुवनानि भू सत्तायां। भूसूधूभ्रस्जि
भ्यः छंदसीति क्युन् प्रत्ययः योरनादेशः उवङादेशः नित्वादाद्युदात्तत्वं॥ ॥तृतीयामृचमाह॥ याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो ह
रिभ्यां॥ आ देवो याति सविता परावतोप विश्वा दुरिता बाधमानः॥ देवो दीप्यमानः सविता प्रवता प्रवणवता मार्गेण याति गच्छति तथा उद्वतोत्कृष्टेनोद्
र्ध्वायुक्तेन मार्गेण याति। उदयानंतरं आ मध्याह्नं ऊर्ध्वो भागः तत उपरि आसायं प्रवणो मार्ग इति विवेकः तथा यजतो यष्टव्यः स देवः शुभ्राभ्यां श्वेता
भ्यां याति देवयजनदेशं गच्छति। सविता देवो विश्वा दुरितानि सर्वाणि पापान्यपबाधमानो विनाशयन् परावतः दूरदेशात् परावत इति दूरनामसु पठि
तत्वात्। तादृशात् द्युलोकादायाति आगच्छति आगच्छति। प्रवता वन षण संभक्तौ॥ अस्मात्प्रपूर्वात् क्विप् गमादीनामिति वक्तव्यमित्यनुनासिकलोपः।
ततस्तुक्। कृदुत्तरपदप्रकृतिस्वरत्वं॥ उद्वता उत्पूर्वाद्वनतेः पूर्ववत्प्रक्रिया। यजतः भृमृदृशीत्यादिना यजतेः कर्मण्यतच् प्रत्ययः विश्वा दुरिता अप
त्र शेः छंदसि बहुलमिति शेर्लोपः॥ ॥चतुर्थीमृचमाह॥ अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहंतं॥ आस्थाद्रथं सविता चित्रभा
नुः कृष्णा रजांसि तविषीं दधानः॥ सविता रथमास्थात् आश्रितवानारूढवानित्यर्थः कीदृशं अभीवृतं अभितो वर्तमानं तथा कृशनैर्विश्वरूपं
सुवर्णैर्नानारूपं कृशनं लोहमिति सुवर्णनामसु पाठात् क्वचित्सुवर्णनिर्मितगजपंक्तिः क्वचिन्मनुष्यपंक्तिरित्येवं बहुरूपत्वं॥ हिरण्यशम्यं
अश्वानां स्कंधप्रदेशे योजनवेलायां निर्यंतु प्रक्षिप्यमाणाः शंकवः शम्याः ताः सुवर्णमय्यो रथवर्तंते तं बृहंतं प्रौढं कीदृशः सविता यजतो यष्टव्यः
चित्रभानुः विविधरश्मियुक्तः कृष्णा रजांसि अंधकारयुक्ततया कृष्णवर्णान् लोकान् दृश्यमानो निवारणार्थं तविषीं बलं स्वकीयं प्रकाशरू
पं दधानः॥ अभीवृतं अभितो वर्तत इत्यभीवृत् वृतु वर्तने क्विपि नहिवृतीत्यादिना पूर्वपदस्य दीर्घत्वं॥ विश्वरूपं विश्वानि रूपाणि यस्यासौ

भा॰ प्र॰
८६
विश्वरूपः बहुव्रीहौ विश्वं संज्ञायामिति विश्वस्य येना संज्ञायामपि पूर्वपदोदात्तत्वं। हिरण्यशम्यं हर्य गतिकांत्योः हर्यतेः कन्यन्हरिच्चेति कन्यन्प्रत्ययो
धातोर्हिरादेशश्च नित्वादाद्युदात्तत्वं॥ बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ आस्थात् तिष्ठतेर्लुङि गातिस्थेति सिचो लुक्। कृष्णा कृष वर्ण इति नक्प्रत्ययः शे
षं पूर्ववत्। बहुलमिति शेर्लोपः॥ न निवर्तयति सो अंतकर्मणि धातुः तत्र वर्णार्द्वृत्तीति टिप् चडि ल्वादि द्विर्वचनं याद्विनाडी पद्यलयेना युदात्तत्वं यादिलात् द्व
ष्यंदधानः दधातेः शानचि अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ ॥पंचमीमृचमाह॥ वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहंतः॥
शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः॥ श्यावाः श्यावनामकाः सूर्यस्याश्वाः श्यावाः सवितुरिति निघंटावुक्तत्वात्। ते च शितिपा
दः श्वेतपादाः एते हिरण्यप्रउगं रथस्य मुखमिषायां रथयुगबंधनस्थानं प्रउगमित्युच्यते तत्र सुवर्णमयं तं रथं वहंतो जनान्प्रा
णिनो व्यख्यन् विशेषेण प्रकाशयंत इत्यर्थः॥ शश्वत् सर्वदा विशः प्रजा दैव्यस्य तु देवसंबंधिनः सवितुः प्रेरकस्य सूर्यस्य उपस्थे समीपस्थाने त
स्थुः स्थितवत्यः न केवलं प्रजाः किंतर्हि विश्वा भुवनानि सर्वे च लोकाः प्रकाशसूर्यसमीपतस्थुः। शितिपादः शितयः श्वेतवर्णाः पादा येषां ते शितिपादः
सं॰ पांसलुगिति लुस्सः स॰ आदेशः यद्वा शितः श्वेतवर्णः स्फटिकादिः स एव पादा येषां। पादस्य लोप इत्यादिभ्य इतिसमासांतः पादशब्दस्यांत्य
लोपः। उपमानाद्वितीयेत्यत्र अनुवर्तते पादशब्दस्य पादित्वाद्युदात्तत्वं॥ तस्य बहुव्रीहौ समासद्वितीयेत्यादि बहुव्रीहौ प्रकृत्या पूर्वपदमिति प्रकृति
स्वरत्वं। अख्यन् ख्यातेर्लुङि अस्यतिवक्तिख्यातिभ्य इत्यादिना च्लेरङादेशः। हिरण्यप्रउगं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ वहंतः शपः पित्वादनुदात्तत्वं श
तुश्च लसार्वधातुकस्वरेण धातुस्वरः कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते॥ दैव्यस्य तस्येदमित्यर्थे देवाद्यञञाविति देवशब्दात् प्राग्दीव्य
तीयोऽञ् तद्धितञ्चामादेरित्यादिवृद्धिः ञित्यादिर्नित्यमित्याद्युदात्तत्वं। उपस्थे आतश्चोपसर्गे इति कः अतो लोप इति चेत्याकारलोपः गम
हृधादित्वात् पूर्वपदप्रकृतिस्वरत्वं॥ ॥षष्ठीमृचमाह॥ तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट्॥ आणिं न रथ्यममृताधि तस्थुरिह
ब्रवीतु य उ तच्चिकेतत्॥ द्यावः स्वर्गोपलक्षिताः प्रकाशमाना लोकाः तिस्रः त्रिसंख्याकाः संति तत्र द्वौ लोकौ सवितुः सूर्यस्य उपस्थासमीपस्थाने वर्तेते
। द्युलोको भूलोकश्च। सूर्येण प्रकाश्यत्वात् एका अन्यमा भूमिरंतरिक्षलोकः यमस्य भुवने पितृपतेर्गृहे विराषाट् विराजनं गंतॄन् सहते प्रेताः पु
रुषा अंतरिक्षमार्गेण यमलोकं गच्छंतीत्यर्थः॥ अमृता अमृतानि चंद्रनक्षत्रादीनि ज्योतींषि उत्तानि वा अधितस्थुः सवितारमधि गम्य स्थिताः
तत्र दृष्टांतः रथ्यमाणिं न रथाद्बहिः क्षिप्ते अक्षकीलके आणिरित्युच्यते रथसंबंधिनमाणिमधिगम्य यथा रथः स्थितस्तद्वत् यः
मानवः तम विद्यत्र पंचिकेत जानाति स मानवः इहास्मिन्विषये ब्रवीतु केनापि च कुमद्वाक्यः सवितुर्महिमेत्यर्थः। तिस्रः तिसृभ्यो जस इति वि
भक्तेरुदात्तत्वं॥ द्वौ संहितायामवदितो लोपः॥ शाकल्यस्येति विकारस्य लोपः उपस्था आत्याशयावीतोपसंस्थानमिति समस्या आदृशेषाः आदेशानुना
सिकः घंदसीति इत्वं तथा सति प्रकृतिभावः विराषाट् षह मर्षणे धत्यर्थकविधानमिति समस्या आदशेषः कर्मणि कः बहुलं छंदसीति इत्वं तथा
सति कृयं तद्वति विराड्युक्तो भवति। ताने सहते इति विराषाट् छंदसि सह इति सहणिः सहेः साडः इति षत्वं अन्येषामपि दृश्यत इति पूर्वपदस्य ८६
दीर्घः। रथस्येदं रथ्यं रथाद्यदिति यत् यतोनाव इत्याद्युदात्तत्वं॥ अमृता शेः छंदसि बहुलमिति शेर्लोपः चिकेतत् कितज्ञाने लेटि अडागमः इत
श्च लोप इतीकारलोपः जुहोत्यादित्वात् श्लुः लघूपधगुणः अनुत्ते चेत्यभ्यस्तस्याद्युदात्तत्वं। यद्वृत्तयोगादनिघातः॥ ॥इति प्रथमस्य तृती

यो वर्गः॥ ॥सप्तमीमृचमाह॥ वि सुपर्णो अंतरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः॥ क्वेदानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्याततान॥ सु 171
पर्णः शोभनपतनः सूर्यस्य रश्मिः सुपर्णा इति पंचदश रश्मिनामानि तेन नाम सुपर्णितत्वात्॥ अंतरिक्षाणि अंतरिक्षोपलक्षितानि लोकत्रय
स्थानानि व्यख्यत् विशेषेण ख्यापितवान् प्रकाशितवान् कीदृशो रश्मिः गंभीरवेपाः गंभीरकंपनः रश्मिप्रकंपनं च लग्नं केनापि दृष्टुमशक्यमित्यर्थः 1924
। असुरः सर्वेषां प्राणदः तथा चाम्नायते स वै वाभूतानां प्राणानादायोदेतीति सुनीथः सुनयनः शोभनप्रापणः मार्गप्रकाशनेनाभिमते
ण प्रापयंतीत्यर्थः॥ तादृशरश्मियुक्तः सूर्यः इदानीं रात्रौ कुत्र वर्तते। तदेतद्वृत्तं कश्चिकेत कोऽजानाति न कोपीत्यर्थः॥ अस्य सूर्यस्य रश्मिः कतमां द्या
मततान कं द्युलोकं रात्रौ व्याप्तवान् एतदपि को जानाति। सुपर्णः न त्र सुभ्यामित्युत्तरपदांतोदात्तत्वं॥ गंभीरवेपाः दुवेपृ कंपने असुन् गभीरं वेपो
यस्य पूर्वपदप्रकृतिस्वरत्वं॥ असुरः असु क्षेपणे अस्यतेरुरन् नित्यसुरः असेरुरन्नितिद्वाद्युदात्तत्वं॥ यद्वा असून्प्राणान्राति ददातीत्यसुरः आ
तोनुपसर्गे क इति कप्रत्ययः सुनीथः णीञ् प्रापणे हनिकुषिनीरमिकाशिभ्यः क्थन्निति क्थन् प्रादित्यमासः थाथादिना उत्तरपदांतोदात्तत्वं॥ इ
दानीं इदम शब्दात् सप्तम्यर्थे दानीं चेति दानीप्रत्ययः इदम इश्चेति इदम शब्दस्येशादेशः। प्रत्ययाद्युदात्तत्वं। सूर्यः षू प्रेरणे सृ गतौ इति सूर्यः राज
सूयसूर्येत्यादिना रुडागमसहितः क्यप्रत्ययांतो निपातितः॥ प्रत्ययस्यानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं॥ चिकेत कित ज्ञाने लिट् कतमां किं जाती
यो वा बहूनां जातिपरिप्रश्ने डतमच् इति किम शब्दात् डितादिलोपः चित इत्यंतोदात्तत्वं॥ ॥अष्टमीमृचमाह॥ अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री ध
न्व योजना सप्त सिंधून्॥ हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि॥ पृथिव्याः संबंधिनीरष्टौ ककुभः प्राच्याद्याश्चतस्रो दिशः आ
ग्नेय्याद्याश्चतस्रो विदिश इत्येवमष्टौ दिशः व्यख्यत् सविता प्रकाशितवान् तथा योजना प्राणिनः स्वस्वभोगेन योजयितृन् धन्व सविता व्यख्यत् हि
रण्याक्षः हितरमणीयचक्षुर्युक्तः हिरण्मयाक्षो वा सविता देव आगात् इह आगच्छतु किं कुर्वन् दाशुषे हविर्दत्तवते यजमानाय वार्याणि वरणीया
नि रत्नानि दधत् धारयन् अख्यत् ख्यातेर्लुङि अस्यतिवक्तिख्यातिभ्य इत्यादिना च्लेरङादेशः॥ त्रीः शसः छंदसि बहुलमिति शेर्लोपः धन्व रवि धवि गत्यर्थौ इदि
तो नुम् धातोरिति नुम् अस्मात् कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन् सुपां सुलुगिति विभक्तेर्लुक् नलोपः प्रत्ययस्य नित्वादा
द्युदात्तत्वं॥ योजना योजयति प्राणिना उपभोगेनेति योजनानि करणाधिकरणयोश्च इति करणे ल्युट् णेरनिटीति णिलोपः पूर्ववच्छेर्लोपः हिरण्याक्षः हिरण्य
मयानि अक्षीणि यस्यासौ हिरण्याक्षः बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच् इति समासांतः षच् प्रत्ययः आगात् एतेर्लुङि इणो गा लुङि इति गादेशः गातिस्थेति
सिचो लुक् दधत् डुधाञ् धारणे इत्यस्य शतरि नाभ्यस्ताच्छतुरिति नुमागम प्रतिषेधः श्नाभ्यस्तयोरातः इत्याकारलोपः अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ दाशु
षे दाश्वान् साह्वान् मीढ्वांश्चेत्यादिना क्वसुप्रत्ययांतो निपातितः॥ चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं परपूर्वत्वं शासिवसिघसीनां
चेति षत्वं। वार्याणि वृञ् वरणे। ऋहलोर्ण्यत् ईडवंदेत्यादिना आद्युदात्तत्वं॥ ॥नवमीमृचमाह॥ हिरण्यपाणिः सविता विचर्षणिरुभे
द्यावापृथिवी अंतरीयते॥ अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति॥ हिरण्यपाणिः सुवर्णमयहस्तयुक्तः यद्वा यजमानेभ्यो
दातुं हिरण्यहस्तः स्तवान् विचर्षणिः विविधदर्शनयुक्तः विचर्षणिः पश्यत्यर्थः॥ विचर्षणिः विश्वचर्षणिरिति तन्नाम सुपात् वान् सविता देवः
उभे द्यावापृथिवी अंतः उभयोर्लोकयोः मध्ये इयते गच्छति अमीवां रोगादिबाधां आपबाधते सम्यक् निराकरोति तथा सूर्यं च एति गच्छति॥

भा॰प्र॰ यद्यपि सवितुः सूर्यमंडलस्य देवतात्वं तथापि मूर्तिभेदेन गंतृगंतव्यभावः । कृष्णेन तमसः कृष्णवर्णेन रजसा तेन लोकं आक्रांतं अभ्यर्णोति सर्वतः
आप्नोति । द्यावापृथिवी आदिवत् सत्यपृथिव्यामिति च शब्दादिवत् अस्य द्यावादेशः देवताद्वंद्वे चेत्यभयपदप्रकृतिस्वरत्वेनोत्तरपदेनुदात्तत्वादाद्युदात्तत्वं निघ
८३ पः ॥ अपृथिवीरद्भ्यः प्र मंथिक्ष्विति पर्युदासात्तान् ईयते । ईङ् गतौ । तिङ् तिङ इति निघातः बाधते चेति चेति समुच्चयार्थप्रतीतेश्च शब्दस्याप्रयोगा
आदितो पदविभाषेति निघातप्रतिषेधः वर्तते गतिप्रवर्तनेन क्वाप्यन्यत्र स्वादनेषु आदिवाधु पादपूरणार्थः पिन्वादनुदात्तत्वं धातुस्वरः । यद्यपि
पादिर्वितीयात् तथापि तिङः परत्वान्निघाताभावः । क्रणोति । कृण गतौ । तनादित्वादुः तानादिषु कृणोतिर्नास्ति तथाप्यस्मिन् विकरणेऽपि गुणाभा
वः ॥ ॥ दशमीमृचमाह ॥ हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ् । अपसेधन् रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥ हिरण्य
हस्तः असुरः प्राणदातास्मदीयः सु उन्नताप्रज्ञास्य इत्यर्थः सुनीथः याकाइति प्रज्ञास्य नाम सुपाठात ॥ सुमृळीकः सुसुखयिता स्ववान् धन
वान् अर्वाङ् अस्मदभिमुखः कर्मस्थाने गच्छतु किंचायं देवः प्रतिदोषं प्रतिरात्रिं गृणानः स्तूयमानः अस्थात् स्थितवान् किं कुर्वन् रक्षसो बाधकत्वेन रक्षणानि मि
त्तभूतान् रक्षार्थं रक्षितव्यम् अस्मादिति यास्कः ॥ यातुधानान् सतान् अपसेधन्निराकुर्वन् हिरण्यहस्तादयो गताः सुमृळीकं सुखं यस्यासौ तथोक्तः
नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥ स्ववानस्य मस्यास्तीति स्ववान् मादुपधाया इति वत्वं संहितायां नकारस्य दीर्घादटि समानपाद इति रुत्वं अत्रानुनासिकात्परोऽनुस्वार इति
यामिति सानुनासिक आकारः । गत्वं यलोपश्च । अपसेधन् षिधु गत्याम् भ्वादिः । पिन्वादनुदात्तत्वं तातुश्चलसार्वधातुकस्वरेण धातुस्वर उत्तरपदप्रकृतिस्वर
त्वं । रक्षसः रक्ष पालने इत्यस्माद्धातोः औणादिको असि प्रत्ययः । यद्वा रक्षंत्यस्मात् रक्षः बलं कुर्वन्नसुन तद्येषामस्तीति रक्षस्विनः । मत्वर्थीय
स्य यलोपः छांदसः प्रत्ययस्वर । यातुधानान् यातना उत्तरापसंस्कारयोः तस्माण्यंताद्दोणादिको भावे प्रत्ययः । यातना यातुनाम्ना धीयंत इ
ति यातुधानाः अधिकरणे ल्युट् लितीति प्रत्ययात्पूर्वोदात्तत्वं ॥ आस्थात् गातिस्थेति सिचो लुक् प्रति दोषं दोषायां दोषायां प्रति वीप्सालक्षणे यथार्थे अ
व्ययीभावः । गृणानः । गृ शब्दे कर्मणि लटः शानच् व्यत्ययेन श्नाप्वादीनां ह्रस्व इति ह्रस्वत्वं चित इत्यंतोदात्तत्वं ॥ ॥ एकादशीमृचमाह ॥ ये ते पं
थाः सवितः पूर्व्यासोऽरेणवः सुकृता अंतरिक्षे । तेभिर्नो अद्य पथिभिः सुगेभिः रक्षा च नो अधि च ब्रूहि देव ॥ हे सवितः ते तव पंथाः मार्गाः पू
र्व्यासः पूर्वैः पूर्वमार्गैः आ गत्य अद्यास्मिन्दिने अस्मान् रक्ष च पालनमपि कुरु तथा हे देव अस्मान् अनु ज्ञातुं अधि ब्रूहि च देवानां अधिकत्वेन
कथय च पंथाः सुपांसुलुगिति जसः सुपथिमथ्याः सर्वनोमोमस्थान इत्यायुदात्तत्वं पूर्व्यासः पूर्वैः कृतमिनयौ चेति यः स्वरः । असुगागमः अरेण
वः न ञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥ सुकृताः कर्मणि क्तः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं सुगेभिः सुखेन गम्यंत इति सुगाः सुदुरोरधिकरणे
इति गमेर्डप्रत्ययः ॥ कृदुत्तरपदप्रकृतिस्वरत्वं । रक्ष ध चो तस्तिङ इति संहितायां दीर्घः ॥ ॥ इति तृतीये सप्तमो वर्गः ॥ ॥ इति सायणाचार्यविरचि
ते माधवीये वेदार्थप्रकाशे प्रथममंडले सप्तमोनुवाकः ॥ ॥ अष्टमानुवाके षोडश सूक्तानि ॥ तत्र प्र वो यह्वं प्रथमस्य । सूक्तस्य एकादशर्चस्य घोरपुत्रः कण्व
ऋषिः अयुजो बृहत्यः तृतीयपादस्य द्वादशाक्षरत्वात् । युजः सतोबृहत्यः प्रथमतृतीययोः पादयोर्द्वादशाक्षरत्वात् ॥ अग्निर्देवता ऊर्ध्व ऊ षु ण इत्यादिके य ८७
पदे वत्स्य तथा चानुक्रांतं ॥ प्र वो विंशतिः कण्वो घौर आग्नेयं प्रागाथमूर्ध्व ऊ ष्वित्यैयूप्यापिति । ननु ऊर्ध्व ऊ ष्वित्यादिकयोरपि अग्निर्देवतात्वेन भवितव्यं ॥
आग्नेय कृतावनयोरनुकूरात ॥ यथाहि सत्रप्रतोनां अग्निप्र वायवमिति प्रतीकमात्रस्य वापादानात कृत्स्न सूक्तमाग्नेयमिति गम्यते ॥ यद्य

त अन्यदेवतस्यात्तांवुसि घासीति सक्तयोरनामुद्दिरहितेन दृद्धारेष यात ॥ न च ब्रूते अतः कथं यूप्यावितिने दोषः यूपाधिष्ठानस्याग्नेः स्तूयमान
त्वादनयोरप्यग्निर्देवता त्वाग्नेयत्वं ताद्रूप्यात्मतः अधिष्ठानप्राधान्यविवक्षया यूप्यावित्यपदिश्यते ॥ प्रातरनुवाक आग्नेये क्रतौ बार्हं १७३
त च्छंदसि प्रवो यह्वमिति सूक्तं । अथैतस्याग्नेर्विवास काल इति खंडे सूत्रितं ॥ प्रवो अग्निं प्र वो यह्वमिति ॥ ॥ तत्र प्रथमामृचमाह ॥ प्र वो यह्वं १९२४
पुरूणां विशां देवयतीनां । अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य ईळते ॥ हे ऋत्विग्यजमानाः देवयतीनां देवान्कामयमानानां पुरूणां च बहूनां
विशां प्रजानां वः युष्माकं मनुष्याणां यह्वं महांतं यह्व इति महन्नाम सुपाठात ॥ अग्निं सूक्तेभिर्वचोभिः सुकरूपैर्वाक्यैः प्र ईम
हे प्रकर्षेण याचामहे ॥ ईमहे याञ्चाकर्मसु पाठात ॥ अन्य इत् अन्येपि यः यमग्निं सीं सर्वतः ईळते स्तुवंति तमग्निमिति पूर्वत्रान्वयः
पुरूणां नाम्न्यन्यतरस्यामिति नाम उदात्तत्वं ॥ विशां सावेकाच इति विभक्तेरुदात्तत्वं ॥ देवयतीनां देवानात्मन इच्छत्यादेवयतः क्यच आत्मनः
क्यच् । न च्छंदस्यपुत्रस्येति ईत्वस्य दीर्घस्य चाप्रतिषेधः । अश्वाद्यस्यादिति पुनरात्वविधानात् ज्ञापकात् क्यजंतात् उः उत कर्तरि शप् शपत्ययः शपः
पित्वादनुदात्तत्वं ॥ उगितश्चेति ङीप ॥ अनित्यमागमशासनमिति वचनात् नुमभावः । एकादेश स्वरस्य पूर्वत्रासिद्धत्वं । नेत्यनद्ये इति वचनात् अनुदात्त
त्वं । सिद्धम् अवति । शतुरनुम इति न द्याउदात्तत्वं ॥ सूक्तेभिः वृकैः । निच कोच संज्ञायामिति त्रः । थाथादिना उत्तरपदांतोदात्तत्वं ॥ ईळते । ईड स्तुतौ ।
अदादित्वाच्छपो लुक् । अनुदात्तत्वात् सार्वधातुकानुदात्तत्वे धातुस्वरः यद्वृत्तयोगादनिघातः ॥ ॥ द्वितीयामृचमाह ॥ जनासो अग्निं दधिरे स
होवृधं हविष्मंतो विधेम ते । स त्वं नो अद्य सुमना इहाविता भवा वाजेषु संत्य ॥ जनासः अनुष्ठातारो जनाः सहोवृधं बलस्य वर्धयितारमग्निं दधि
रे धृतवंतः हविष्मंतः हविर्युक्ता वयं हे अग्ने ते त्वां विधेम परिचरेम । विधतिः परिचरणकर्मणो विधेम सपर्यतीति परिचरणकर्मसु पाठात् तत्वा
त ॥ वाजेषु अन्नेषु संत्य दानशील हे अग्ने स त्वम् अद्यास्मिन्दिने इह कर्मणि नोस्मान् प्रति सुमनाः शोभनमनस्कः अविता रक्षिता भव ॥ सहोवृधं ।
वृधु वृद्धौ । अस्मादंतर्भावितण्यर्थात् क्विप् कृदुत्तरपदप्रकृतिस्वरत्वं ॥ हविष्मंतः तसौ मत्वर्थ इति भत्वेन पदत्वाभावात् रुत्वाद्यभावः ॥ विधेम ॥
विध विधाने । तुदादित्वाच्छः सुमनाः शोभनं मनो यस्यासौ सुमनाः सोमनसो अलोमोषस इत्युत्तरपदाद्युदात्तत्वं ॥ भाव । पादादित्वात् तिङ्ङतिङ इ
ति निघाताभावः द्व्यचोतस्तिङ इति संहितायां दीर्घः । संत्य पुणु दाने कि चिन्तितु इत्यादिना उः प्रतिषेधः । नक्किचिदीर्घश्चेत्यनुनासिकलोपदीर्घ
योर्निषेधः । संतिर्दाता तत्र भवः संत्यः भवश्छंदसीति यत ॥ ॥ तृतीयामृचमाह ॥ प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसं । महस्ते सतो वि चरं
त्यर्चयो दिवि स्पृशंति भानवः ॥ हे अग्ने होतारं होमनिष्पादकं आह्वातारं वा विश्ववेदसं सर्वज्ञं धनं दोषानादेत्य प्रवृत्तं अग्निर्वै देवानां दूतः
आसीदिति श्रुत्यंतरात् तादृशं त्वा प्रवृणीमहे प्रकर्षेण वरणं कुर्मः महो महतः सतो नित्यं वर्तमानस्य ते तव अर्चयो दीप्तयः विचरंति वि
विधं प्रचरंति भानवः त्वदीया रश्मयो दिवि द्युलोकस्य इति तत्रात्यान प्राणिनः प्रकाशयंतीत्यर्थः । विश्ववेदसं विश्वानि वेत्तीति विश्ववेदाः अस
मर इत्यादिवात पूर्वपदांतोदात्तत्वं ॥ यद्वा वेद इति धननाम विश्वं वेदो धनं यस्य बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं ॥ महः महत् प्रज्ञा
यां विप चेति क्विप सावेकाच इति विभक्तेरुदात्तत्वं ॥ दिवि ऊडिदमिति विभक्तेरुदात्तत्वं ॥ ॥ चतुर्थीमृचमाह ॥ देवासस्त्वा वरुणो मित्रो अर्यमा
सं दूतं प्रत्नमिंधते । विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥ हे अग्ने वरुणादयः त्रयो देवासो देवाः प्रत्नं पुरातनं दूतं त्वां समिंध

तं सम्यक्दीपयंति यो मर्त्यो मनुष्यो यजमानस्तुभ्यं ददाश हविर्ददाति स यजमानस्त्वया सहायभूतेन विश्वं सर्वं धनं जयति अर्यमा अर्यमन्निमिमीतऽत्यर्यमा श्वन्नुक्षन्नित्यादिना कनिन्प्रत्ययांतो निपातितः। इंधते। ञिइंधी दीप्तौ। अस्माल्लुङि च्लेरङादेशः श्नम् श्नान्नलोप इत्यकारलोपः। ददाश। दाश्र् दाने। लिटि णलि लित्स्वरेण प्रत्ययात्पूर्वस्याकारस्योदात्तत्वं। यद्वृत्तयोगादनिघातः॥ ॥पंचमीमृचमाह॥ मंद्रो होता गृहपतिरग्ने दूतो विशामसि। त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत॥ हे अग्ने त्वं मंद्रो हर्षहेतुः होता देवानामाह्वाता विशां यजमानरूपाणां प्रजानां गृहपतिर्गृहस्य पालको दूतो देवदूतोसि। त्वे त्वयि विश्वा व्रतानि सर्वाणि कर्माणि संगतानि। व्रतं कर्वरमिति कर्मनामसु व्रतं तच्छब्दः पठितः। पृथिव्यादयो देवाः ध्रुवाणि स्थिराणि यानि कर्माणि अकृण्वत कृतवंतः पृथिवी धारयति पर्जन्यो वर्षति सूर्यः प्रकाशयति तान्येतानि त्वयि संगतानीति पूर्वत्रान्वयः। गृहपतिः पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं। त्वे सुपां सुलुगिति सप्तम्येकवचनस्य शे आदेशः आदेशमात्रे कवचन इति मपर्यंतस्य त्वादेशः शेप्लोप इति लोपपक्षे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं॥ अंत्यलोपपक्षे तु एकादेशस्वरेण। संगतानि गमेः कर्मणि निष्ठायामकाच इतीट्प्रतिषेधः अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। व्रता ध्रुवा शेश्छंदसि बहुलमिति शेर्लोपः॥ अकृण्वत कृवि हिंसाकरणयोश्च व्यत्ययेनात्मनेपदं इदित्वान्नुम् धिन्विकृण्व्योरच्चेत्युप्रत्ययः॥ ॥इति प्रथमस्य तृतीये षष्ठो वर्गः॥ ॥षष्ठीमृचमाह॥ त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः। स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या॥ हे यविष्ठ्य युवतमाग्ने सुभगे सौभाग्ययुक्ते त्वे इत् त्वय्येव विश्वं सर्वं हविराहूयते सर्वतः प्रक्षिप्यते स त्वं नो अस्मान्प्रति सुमनाः शोभनमनस्कः सन् अद्यास्मिन्नहनि उत अपि च अपरं श्वः अपरश्व इत्याह्निकमुत्तरं कालं सर्वस्मिन्नपि काले इत्यर्थः। सुवीर्या शोभनवीर्योपेतान् देवान्यक्षि यज। सुभगे। शोभनो भगो यस्येति बहुव्रीहावाद्युदात्तत्वे प्राप्ते आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। यविष्ठ्य युवशब्दादिष्ठनि स्थूलदूरेत्यादिना यणादिपरस्य लोपः पूर्वस्य च गुणः। छांदसो यकारोपजनः। यक्षि बहुलं छंदसीति शपो लुक्। सुवीर्या शोभनं वीर्यं येषां वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। सुपां सुलुगिति विभक्तेराकारः। अभिप्लवे सायंकालीन उत्तरस्मिन्पदे ले तं घेमित्था नमस्विन इत्येषा विनियुक्ता। अथात्र रमिति खंडे सूत्रितं प्रागाथं पूर्वाण्हे काण्वीमपराह्ण इति॥ तामेतां सप्तमीमृचमाह॥ ॥तं घेमित्था नमस्विन उप स्वराजमासते। होत्राभिरग्निं मनुषः समिंधते तितिर्वांसो अति स्रिधः॥ हे अग्ने नमस्विनः अन्नयुक्ता नमस्कारयुक्ता वा। नमः आयुः सूनृतेति अन्ननामसु पाठान्नमःशब्दस्यान्नवाचित्वं। तादृशा यजमानाः स्वराजं स्वतो दीप्यमानं तं घ तमेव पूर्वोक्तसर्वगुणविशिष्टं त्वां इत्था अनेन प्रकारेण हविःप्रदानादिरूपेणोपासते। मनुषो मनुष्या यजमानाः होत्राभिः सप्तभिर्वषट्कर्तृभिः सप्त होत्राः प्राचीर्वषट्कुर्वंतीति श्रुत्यंतरात्। अग्निं त्वां समिंधते सम्यक्दीपयंति कीदृशा मनुष्याः स्रिधः शत्रून् अति तितिर्वांसः अतिशयेन तरंतः। नमस्विनः अस्मायामेधास्रजो विनिः। स्वराजं स्वभासा राजत इति स्वराट् सत्सूद्विषेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। आसते आस उपवेशने। अदादित्वाच्छपो लुक्। तितिर्वांसः तॄ प्लवनतरणयोः। छंदसि लिट् इति वर्तमाने लिट् क्वसुः क्वसुश्चेति क्वसुः। वस्वेकाजाद्घसामिति नियमादिडभावः। ऋत इद्धातोरितीत्वं। ... कृत्स्नस्य हलि चेति दीर्घाभावः छांदसः। द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वचनं भवति सतापूर्वकाविधिरनित्य इत्वात्तदभावः। तितिर्वांस इति। स्रिधः स्निधु शोषणे क्विप्॥ ॥अष्टमीमृचमाह॥ घ्नंतो वृत्रमतरन्रोदसी अप उरु क्षयाय चक्रिरे। भुवत्कण्वे वृषा द्युम्न्याहुतः क्रंददश्वो गविष्टिषु॥ हे अग्ने घ्नंतः व ८८

ृत्रमहायेन इतरे देवाः प्रहरंतो वृत्रमतरन्तीर्णवंतः तदनंतरं रोदसी द्यावापृथिव्यौ अपोंतरिक्षं च क्षयाय प्राणिनां निवासार्थं उरु विस्तीर्णं यथा भवति तथा चक्रिरे अपश्शब्दोंतरिक्षवाची आपः पृथिवी तिस्र इति नामसु पठितत्वात्। भवानपि कण्वे कण्वनामके महर्षौ वृषा कामानां वर्षिता द्युम्नी धनवान् आहुतः सर्वतो होमयुक्तश्च भुवत् भवतु तत्र दृष्टांतः। गविष्टिषु गोविषयेच्छायुक्तेषु संग्रामेषु अश्वः क्रंदत् शब्दं कुर्वन् यथाभीष्टप्रापकस्तथेत्यर्थः। घ्नंतः हंतेर्लटः शतृ गमहनेत्यादिना उपधालोपः। हो हंतेर्ञ्णिन्नेष्विति घत्वं। अपः उडिदमिति शस उदात्तत्वं। क्षयाय। क्षि निवासगत्योः क्षियंति निवसंत्यस्मिन्निति क्षयो निवासस्थानं पुंसि संज्ञायां घः प्रायेणेति घः क्षयो निवास इत्याद्युदात्तत्वम्। भुवत् भुवतेर्लेटि अडागम इतश्च लोप इति ईकारलोपः बहुलं छंदसीति शपो लुक्। भुसुवोस्तिङीति गुणप्रतिषेधः अडागमस्यानुदात्तत्वे धातुस्वरः। गविष्टिषु इषु इच्छायां गवामिष्टिर्येषु संग्रामेषु बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। आहुतः आहूयत इत्याहुतः हु दानादानयोः कर्मणि क्तः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। क्रंदत् क्रदि आह्वाने रोदने च लेटि अडागमः इदित्वान्नुम् अभावः छांदसः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः॥ ॥प्रवर्ग्ये महावीरस्य खरे संसाद्यमानं संसीदस्व महाँ असीति खंडे सूत्रितं संसीदस्व महाँ असीति संसाद्यमान इति॥ तामेतां सूक्ते नवमीमृचमाह॥ ॥संसीदस्व महाँ असि शोचस्व देववीतमः। वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम्॥ हे अग्ने संसीदस्व वेदिं प्रविश महान् असि गुणाधिको भवसि देववीतमः। अतिशयेन देवान्कामयमानः शोचस्व दीप्यस्व हे मियेध्य मेधार्ह प्रशस्त उत्कृष्टाग्ने अरुषं गमनशीलं दर्शतं दर्शनीयं धूमं विसृज विशेषेण संपादय सीदस्व षद्लृ विशरणगत्यवसादनेषु व्यत्ययेनात्मनेपदं। प्रार्थनायां लोट् शिद्ध्रुव्धाघ्मेत्यादिना सीदादेशः। महान्संहितायां नकारस्यो रुत्वानुनासिकाबुक्तौ। शोचस्व। शुच दीप्तौ॥ अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः तिङ्परत्वान्निघाताभावः। देववीतमः वी गतिप्रजनकांत्यसनखादनेषु देवान्वेतिगच्छतीति देववीः क्विप् चेति क्विप् अतिशयेन देववीः देववीतमः तमपः पित्वादनुदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं। अरुषं रुषो पर्णो। रिफरुषसंहितायां॥ यत्रार्थे कगमः छांदसः। सृज त्वं सृज विसर्गे। तुदादित्वाच्छः विकरणस्वरः पादादित्वादनिघातः। दर्शतं भृमृदृशीत्यादिना दृशेः कर्मण्यतच्प्रत्ययः॥ ॥ मियेध्य छंदसि चेत्यर्थे यप्रत्ययः मकारस्य रुग्या दशमीमृचमाह॥ ॥यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन। यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः॥ हे हव्यवाहन हविषो वाहकाग्ने मनवे मनोरनुग्रहाय देवासः सर्वे देवाः यजिष्ठं अतिशयेन पूज्यं यष्टृतमं वायं त्वां विहदेवयजने दधुः धृतवंतः मेध्यातिथिः मेध्यातिथिभिर्युक्तः कण्वः एतन्नामकोमहर्षिः यं त्वां धनस्पृतं धनेन प्रीणयितारं कृत्वा दधुः इति शेषः तथा वृषा श्रेयसोपि स्तोतायजमानो यं त्वां दधे स त्वं संसीदस्वेति पूर्वत्रान्वयः दधुः लिटि घृसिकित्वे आतो लोप इटि चेत्याकारलोपः नित्वादाद्युदात्तत्वं। हव्यवाहन। हव्यं वहतीति हव्यवाहनः हव्यनंतः पादमिति वहतेर्युट् मेध्यातिथिं मेध्या अतिथयो यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ धनस्पृतं धनेन स्मान्प्रणाति प्रीणयतीति धनस्पृत स्पृ प्रीतिबलयोः क्विप् ततस्तकृदुत्तरपदप्रकृतिस्वरत्वं॥ उपस्तुतः क्तिच् क्तौ च संज्ञायामिति कृतं क्तिच्रः थाथादिना उत्तरपदांतोदात्तत्वम्॥ ॥इति प्रथमस्य तृतीये नवमो वर्गः॥ ॥एकादशीमृचमाह॥ यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि। तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि॥ ॥मेध्यातिथिः यागयोग्या अतिथयः ऋत्विग्रूपा यस्य तादृशाः

175
1924

कण्वऋषिः॥ ऋतादधि आदित्यादध्याहृता यमग्निमीधे दीपितवान् तस्याग्नेरिषो गमनस्वभावा रश्मयः प्रदीदयुः प्रकर्षेण दीप्यंते तथा तमग्नि
भा० व० मिमा अस्माभिः प्रयुज्यमाना ऋचो वर्धयंतीति शेषः॥ वयमपि तमग्निं वर्धयाम। मसि वर्धयामः। ईधे दीप्तौ। इंधिभवतिभ्यां चेति लिटः
८० कित्त्वादनिदितामिति नकारलोपः। द्विर्भावहलादिशेषयोः कृतयोः सवर्णदीर्घः। प्रत्ययस्वरः। यद्वृत्तयोगादनिघातः॥ इषः॥ इष गतौ। इष्यं
तिगच्छंतीति इषो रश्मयः। दीदियुः। दीदेतिश्छांदसो धातुर्दीप्तिकर्मा। लिटि उसि इयङादेशः। एरनेकाच इति यणादेशाभावः छांदसः। वर्धयामसि
इदंतो मसीति मस इकारागमः॥ ॥ द्वादशीमृचमाह॥ ॥ रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यं। त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ म
हां असि॥ स्वधा अन्नं इति तन्नामसु पाठात्॥ अस्माकं रायो धनानि पूर्धि पूरय देहि वा॥ पूर्धि पूरयतेर्देहीति वा तयास्कः॥ हे अग्ने तव देवे
षु आप्यं प्रापणीयं सख्यमस्ति हविर्वहनत्वात् खलु॥ त्वं श्रुत्यस्य श्रवणीयस्य वाजस्यान्नस्य राजसि ईश्वरो भवसि॥ स त्वं नोऽस्मान् मृळ सुखय म
हान् गुणैरधिकोऽसि। रायः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं॥ पूर्धि। पृ पालनपूरणयोः। श्रुशृणुपृकृवृभ्यः छंदसीति हेर्धिरादेशः। बहु
लं छंदसीति शपो लुक्। हेरपित्त्वेन ङित्त्वाद्गुणाभावे उदोष्ठ्यपूर्वस्येत्युत्वं। हलि चेति दीर्घः॥ स्वधावः। संबुद्धौ मतुवसो रु इति रुत्वं। बहु
धत्वाभावश्छांदसः। अपा पोरदुपधादिति कर्मणि यत्। यतोऽनाव इत्याद्युदात्तत्वं। यद्वा ण्यति छांदसो घुदात्तत्वम्। श्रुत्यस्य श्रवणं औणा
दिकः क्यप्। तुगागमः। यद्वा श्रुतिशब्दात् भवे छंदसीति यत्॥ स हि लमः उसत्वम्॥ छांदसत्वाल्लघूपधगुणाभावः॥ त्रयोदशी ऋचमाह॥ ऊ
र्ध्व ऊ षु ण ऊतये इति द्वे परिशिष्टे इति संसृजति। ऊर्ध्व ऊ षु ण ऊतय इति द्वे इति॥ ॥ तयोराद्यामृचमाह॥ ऊर्ध्व ऊ
षु ण ऊतये तिष्ठा देवो न सविता। ऊर्ध्वो वाजस्य सनिता यदंजिभिर्वाघद्भिर्विह्वयामहे॥ हे यूप यद्वा यूपात्मक दारु यद्वा अग्ने नोऽस्माकमूतये र
क्षणाय ऊर्ध्व इति सुतरां तिष्ठ। सविता देवो न। यथा सविता देव उन्नतस्तिष्ठति तद्वत् ऊर्ध्व उन्नतः सन् वाजस्यान्नस्य सनिता दाता भवसि।
यस्मात्कारणादंजिभिः आज्येन यूपमंजद्भिः यजमानैर्वाघद्भिः ऋत्विग्भिः सह विह्वयामहे॥ अन्नदानाय त्वां विशेषेणाह्वयामः। तस्मादन्न
स्य दाता भवेति प्रार्थनया॥ ऊ षु णः। इकः सुञीति संहितायां दीर्घः। सुञः इति षत्वं। नश्च धातुस्थोरुषुभ्य इति णत्वं॥ ऊतये। अवतेः क्ति
ज्वरत्वरेत्यादिना ऊठ्। ऊतियूतीत्यादिनाक्तिनुदात्तत्वं। तिष्ठ। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः॥ अत्र चातस्तिङ इति संहितायां दीर्घः। वाजः
स्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी॥ सनिता॥ षणु दाने। उदितो वा इत्यस्य वलादिलक्षण इट्। इति पाक्षिक इट्।
टिलोपः। उदात्तनिवृत्तिस्वरेणातिथादेशस्योदात्तत्वप्राप्तौ तस्यानुदात्तेदिति तस्यानुदात्तत्वं॥ धातुस्वरः न लुडिति निघातप्रतिषेधः॥
अंजिभिः। अंजू व्यक्तिम्रक्षणगतिषु। इगुपधकिदिति इन् प्रत्ययः। विह्वयामहे। निसमुपविभ्यो ह्व इति कर्त्रभिप्राये आत्मनेप
दं। अदुपदेशात् सार्वधातुकानुदात्तत्वे धातुस्वरः। तिङि चोदात्तवतीति गतेरनुदात्तत्वं॥ यद्वृत्तयोगादनिघातः॥ ॥ चतुर्दशीमृ
चमाह॥ ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं दह। कृधी न ऊर्ध्वां चरथाय जीवसे विदा देवेषु नो दुवः॥ ॥ हे यूप यद्वा तदात्मक अग्ने
त्वमूर्ध्व उन्नतः सन् नोऽस्मान् केतुना ज्ञानेन अंहसः पापान्नि पाहि नितरां पालय॥ विश्वं समत्रिणं सर्वमत्तारं भक्षकं राक्षससंघं दह भस्म ८०
कुरु भस्मीकुरु॥ नोऽस्मान् धनिनः ऊर्ध्वान् कृधि। किमर्थं चरथाय लोके चरणाय जीवसे जीवनाय च नोऽस्माकं दुवो धनं च हविः स्वरूपं देवेषु

विदाः लाभाय। अत्त्रिणं अद भक्षणे। अदेस्त्रिनिश्चेति औणादिकस्त्रिनिप्रत्ययः। यद्वा अदनस्वभावं नयत्तः आतोऽनुपसर्गे क इति कः अत्रोऽमत्वर्थीय इनिः
कृधि श्रुशृणुपृकृवृभ्यः छंदसीति हेर्धिरादेशः। बहुलं छंदसीति विकरणस्य लुक्। अन्येषामपि दृश्यत इति संहितायां दीर्घः। ऊर्ध्वान्। उभयथर्क्ष्विति विकल्पः 177
विधानान्नकारस्य रुत्वाभावः। चरथाय चरेर्गोणादिकोऽथप्रत्ययः। जीवसे। जीव प्राणधारणे तुमर्थे से सेनित्यसप्रत्ययः। वि —
दाः विद्लृ लाभे। अस्माल्लेट्यडागमः लेटोऽडाटाविति आडागमः। तुदादिभ्यः शः इति शः। मुचादीनामिति नुमनभावात् अनित्यमागमशासनमि 1924
ति नुमभावः। पाहि रिषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य॥ हे अग्ने हे बृहद्भानो बृहत्प्रभ यविष्ठ्य युवतम हे यविष्ठ्य नोऽस्मान् रक्षसः बाधकाद्रक्षसः
दः पाहि पालय। तथा अराव्णः धनादीनामदातुः धूर्तेः हिंसकात् पाहि। तथा रिषतः हिंसार्थः। रिष हिंसायां। कर्मणि घञर्थे कः सकाशात्पाहि। उत वा अथ
कारलोपः हलि चेति दीर्घत्वं। अराव्णः। रा दाने। आतो मनिन्क्वनिप्वनिपश्चेति वनिप् नञ् समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं। पंचम्येकवचने अल्लो
पोऽन इत्यनो अकारस्य लोपः। रिषतः। रिष हिंसायां। तुदः। शत्रन्तः बहुलं छंदसीति शपो लुक्॥ प्रत्ययस्य प्रागमस्यत्ययेनाद्युदात्तत्वं। जिघांसतः। हन हिंसार्थ
सनि अज्झनगमां सनीति दीर्घः। अभ्यासाच्चेत्यभ्यासादुत्तरस्य हकारस्य धत्वं। सन्यत इतीत्वं। आदुपदेशात्सार्वधातुकानुदात्तत्वे
सति सनो नित्वान्नित्स्वरेण पदस्याद्युदात्तत्वात् द्रुस्रो आमंत्रितस्य चेति षाष्ठिकमाद्युदात्तत्वं। पादादित्वाद्दाष्टमिकनिघाताभावः। यविष्ठ्य युवन् दूर
हाराव्णः स पुत्रं भयाद् अस्म भव॥ यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत॥ हे तृतीयपुत्रं भव तथारानरश्मियुक्तेन अराव्णः अस्मभ्यं दस्य
धनस्य अदातृत्वेन वैरिणः विषकृतं सर्वतो विपरीतहिंसां वृषणं मारयन् बहुतः घनाइव यथा वेगेन दंडपाषाणादिना भोग्यादि भंगं करोति तद्वत्
तयान्यापि पुरुस्मभक्तः अस्मद्विषयद्रोहकारी भर्त्सनादिना बाधकस्तं। यश्चान्यो मर्त्यः मनुष्यः शत्रुरक्तुभिः रात्रिभिः शत्रुरत्यंतशत्रुतां करोति अस्मा
कं तान् हृदयं पीडयति। तद्वत् भर्त्सनप्रहरकारादिविधायि शत्रुमोऽस्मान् प्रति भिक्षितं ईश्वरः स्वामी माभूत्। घनाइव सर्पास्तृणानि तृतीयामात्र द्रवाः। जहि
भ्यां तदावत्याभिरिति भाष्यायुधानि यस्यासौ स पुत्रं भव आमंत्रिताद्युदात्तत्वं॥ अस्मभ्रं क्रूरं हंति जिघांसयां सत्ककृत् इत्यादिना क्विपवाद्रहं हृणु दस्मि
दसीत्यस्यासस्यतं। ईत्वं ध्यानेनीतिस्यमयेनाघुदात्तत्वं॥ यद्वृत्तयोगादिघातः॥ ईशत्। ईश ऐश्वर्ये। लङि बहुलं छंदसीतिशपो लुगभावः। न तोऽडू वर्त्मनि बहुलं छंदस्य
माभावः॥ ॥ सप्तदशीमृचमाह॥ अग्निर्वव्ने सुवीर्यमग्निः कण्वाय सौभगं॥ अग्निः प्रावन्मित्रोत मेध्यातिथिमग्निः साता उपस्तुतं॥ ॥ अग्निर्द
वः सुवीर्यं शोभनवीर्योपेतं धनमुद्दिश्य याचितः सोऽग्निः कण्वाय महर्षये सौभगं शोभनधनादिरूपं भाग्यं प्रायच्छदिति शेषः। तथा अग्निः मित्रा
अस्मत मित्राणि प्रावत प्रकर्षेण रक्षितवान्। उत अपि च मेध्यातिथिं मेधयोग्यं रातिथिरूपं तं ऋषिं प्रावत तथा उपस्तुतं अन्यमपि स्तोतारं यज

मानं सतो धनादिलाभनिमित्तत्वाद्वा दितिरोषः ॥ वव्रे । वतुर्वनुषा वने कर्मणि लिट् न शसददवादिगुणानामित्येत्वाभ्यासलोपयोः प्रतिषेधः उपधालोपः
भा॰ अ॰ छांदसः । सौभगं सुभगमंत्रे इत्युद्गात्रादिषु पाठात्तस्य भाव इति तस्मिन्नर्थे अञ् अजितादायुदात्तत्वं न विभाषेशः हृद्भगसिन्ध्वन्ते हलमिति लोपः । उपस्कृतं । स्मितं ॥
१० कौ च संज्ञायामिति ल्यो नेः कर्तरि क्तः थाथादिना उत्तरपदांतोदात्तत्वं ॥ ॥अष्टादशीमृचमाह ॥ अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे ॥ अग्निर्न
यन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः ॥ ॥अग्निना सर्वत्र ज्वलितेन तुर्वशं नामकं यदुं नामकं च राजानं परावतो दूरदेशादागत्य हवामहे ॥ आहूया
मः । स चाग्निः नववास्त्वनामकं बृहद्रथनामकं तुर्वीतिनामकं च राजानं कर्षन् इहानयतु । कीदृशोऽग्निः दस्यवे सहः अस्मदुपद्रवहेतोश्चोरस्याभिभविता
नयतु णीञ् प्रापणे लोट् ... इत्यत्र लोप इत्याकारलोपः । नववास्त्वं नवं वास्तु यस्यासौ नववास्त्वः । ... पूर्वत्वाभावे यणादेशः
बृहद्रथं बृहद्रथं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ॥एकोनविंशीमृचमाह ॥ नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ॥ दीदेथ कण्व ऋतजात उक्षितो यं नमस्य
ति कृष्टयः ॥ ॥ हे अग्ने ज्योतिः प्रकाशरूपं त्वां शश्वते बहुविधाय जनाय मनुः प्रजापतिः नि दधे देवयजनदेशे स्थापितवान् । हे अग्ने त्वं ऋतजातः ऋ
तेन यज्ञेन निमित्तभूतेनोत्पन्नः उक्षितः हविर्भिः सिक्तः सन् कण्वे एतन्नामके महर्षौ दीदेथ दीप्यमानोऽभूः । यं त्वां कृष्टयः मनुष्याः नमस्य
इति मनुष्यनामसु पठितत्वात् नमस्यंति नमस्कुर्वंति स त्वमिति पूर्वेणान्वयः ॥ दीदेथ दीदेतिः छांदसो दीप्तिकर्मा ... द्विर्वचनप्रकरणे छंदसि वेति वक्त
व्यमिति द्विर्वचनाभावः अनित्यमागमशासनमिति वचनादिडभावः तिङ्वर्णप्रत्ययात्पूर्वस्याद्युदात्तत्वं । ऋतजातः ऋतेन जात इति ऋतजातः श्चम
दीनां निष्ठायामितीट्प्रतिषेधः तृतीया कर्मणीत्युत्तरपदांतोदात्तत्वं ... पूर्वपदप्रकृतिस्वरत्वं । नमस्यंति नमो वरिवश्चित्रङः क्यच् । अदुपदेशाल्लसार्वधातुकानुदा
त्तत्वे क्यच एव धातुस्वरः कृषेः ... कृषेर्वर्णवृद्धिश्च । तौ च संज्ञायामिति क्तिच् ॥ ॥विंशीमृचमाह ॥ त्वेषासो अग्नेरमवंतो अर्चयो भीमासो न प्रतीतये ॥
रक्षस्विनः सदमिद्यातुमावतो विश्वं समत्रिणं दह ॥ ॥अग्नेर्ज्वालाः त्वेषासो दीप्ताः अमवंतो बलवंतः भीमासो भयंकराः । अतः प्रतीयते अस्माभिः प्रत्ये
तुं न शक्या इति शेषः । हे अग्ने रक्षस्विनो बलवतः यातुमावतः यातुधानान् सदमित् सर्वदैव सं दह सम्यक् भस्मीकुरु । तथा विश्वं सर्वं अत्रिणं भक्षकं
अस्मत् बाधकं शत्रुं संदह । त्वेषासः त्विष दीप्तौ पचाद्यच् ... इत्यंतोदात्तत्वं ॥ अमवंतः अम गत्यादिषु ... सौ बलं पचाद्यच् ... वृषादित्वादाद्युदात्तत्वं ॥
तदेव मत्वीत्यमवंतः प्रतीयते तादर्थ्ये निगतः प्रतिस्वरत्वं । रक्षस्विनः रक्षस्यनेनेति रक्षो बलं करणे असुन् अस्मायामेधास्रजो विनिः यातुमा
वतः यातवो यातना तानु मिमितेनिर्मिमत इति राक्षसव्यापारो यातुमा आतोऽनुपसर्गे क इति कः । तदेषामस्तीति मतुप् मतो बहुच इति दीर्घत्वं संज्ञाया
मिति वत्वं मतुपः पित्वादनुदात्तत्वे बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ अत्रिणं अदेस्त्रिनिश्चेति कर्तरि त्रिनिप्रत्ययः ॥ ॥इति प्रथमस्य तृतीये एकादशो वर्गः ॥
॥ ॥क्रीळं वः इति पंचदशर्चं द्वितीयं सूक्तं अत्रानुक्रमणिका क्रीळं पंचोना मारुतं हि गायत्रं चेति । ऋषिश्चान्यस्मादृषेर्वाक्यविशिष्ट इति परिभाष
या घोरपुत्रः कण्व ऋषिः इदमुत्तरं च गायत्री छंदस्कं इदमादि सप्तत्र्यं मरुद्देवताकं तु हि इत्याद्यतिपरिभाषितत्वात् । सूक्तविनियोगो द्वितीये छंदोम आग्नि
मारुतशस्त्रे एतत्सूक्तं निविद्धानीयं द्वितीयस्याग्निमारुत इति खंडे सूत्रितं क्रीळं वः शर्धो अग्नेम् तुल्याग्निमारुतमिति । ब्राह्मणं च क्रीळं वः शर्धो मा
रुतमिति मरुत्वतः क्रीडिभ्यः पुरोडाशं सप्तकपालमित्यस्यामिष्टौ क्रीळं व इत्येषा प्रधानस्यानुवाक्या तथा च इति खंडे सूत्रितं ॥ क्रीळं वः शर्धो १०
मारुतमत्या सां नयेमारुतः स्वच इति ॥ ॥तामेतां सूक्ते प्रथमामृचमाह ॥ क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभं ॥ कण्वा अभि प्र गायत ॥

हे कण्वाः कण्वगोत्रोत्पन्ना महर्षयः यद्वा मेधाविन ऋत्विजः वा युष्मदर्थं मारुतं मरुत्समूहसंबंधि शर्धो बलं अभि प्र गायत अभितः प्रकर्षेण स्तुध्वं कीदृ 179
शं शर्धः क्रीळं विहरणशीलं अनर्वाणं आततरहितं अतएव शत्रुसंबंधिनः प्रसहनेन मंतारं मेव व्याख्यात् ॥ अनर्वा प्रैहीत्याह भ्रातृव्यो वा अर्वा अभ्रातृव्या 1924
पनुत्वा इति । रथेशुभं स्वकीये रथे वर्त्तमानं शोभमानं । क्रीळं क्रीड विहारे पचाद्यच् । शर्धः शृधु प्रसहने शर्धयत्यनेन शत्रूनिति बाहुलकं असुन्
नित्वादाद्युदात्तत्वं ॥ मारुतं मरुतां संबंधि तस्येदमित्यण् प्रत्ययेनाद्युदात्तत्वं ॥ यद्वा समूहार्थे अनुदात्तादेरञ् इति अनुदात्तो हि लक्षणो । अत्र प्रत्य
यः अनर्वाणं प्रत्ययेन पुंलिंगता नञ्सुभ्यामिति उत्तरपदांतोदात्तत्वं । रथेशुभं शुभ दीप्तौ रथे शोभत इति रथेशुभं पचाद्यच् । तत्पुरुषे कृति बहुलं
मित्यलुक् कृदुत्तरपदप्रकृतिस्वरत्वं । गायत गै शब्दे लोटि छंदसि उभयथेति शप् इति घातः ॥ ॥द्वितीयामृचमाह ॥ ये पृषतीभिरृष्टिभिः साकं वाशीभिरंजि
भिः ॥ अजायंत स्वभानवः ॥ ये मरुतः पृषतीभिः साकं स्वभानवः स्वकीयदीप्तिभिः युक्ताः अजायंत इति संपन्नाः पृषत्यो बिंदुयुक्ता मृग्यो मरुतां वाहनभूताः
पृषत्यो मरुतामिति निघंटावुक्तत्वात् ऋष्टयः आयुधानि वाश्यः शब्दविशेषाः परकीयसेनाभीतिहेतवः वाशीर्वाणीति वाङ्नामसु पठितत्वात् । अंजि
योलंकरणानि तान्सह इति शेषः । अजायंत जनी प्रादुर्भावे ज्ञाजनोर्जा इति जादेशः अडागम उदात्तः स्वभानवः स्वकीया भानवो येषां बहु
व्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ॥तृतीयामृचमाह ॥ इहेव शृण्व एषां कशा हस्तेषु यद्वदान् ॥ नि यामं चित्रमृंजते ॥ येषां मरुतां हस्तेषु स्थिताः कशाः
स्वस्वारस्तान् तेन वः यद्वदान् यद्वदंति ध्वनिं कुर्वंति तं ध्वनिमिहेव अंतिके स्थिता शृण्वे शृणोमि सध्वनि युद्धे यामन् संग्रामे चित्रं विविधं शौर्यं
जनितं नगमलंकरोति ॥ ऋंजतिः प्रसाधनकर्मेति यास्कः ॥ शृण्वे श्रु श्रवणे व्यत्ययेनात्मनेपदं श्रुवः शृ च इति श्नुः श्रूभावश्च सार्वधातुक इति यणादेशः वदान् ॥
वद व्यक्तायां वाचि । लेट्याडागमः इतश्च लोप इतीकारलोपः संयोगांतलोपः । अगमानुदात्तत्वे धातुस्वरः यद्वृत्तयोगादनिघातः यामन् सुपां सुलुगि
ति सप्तम्या लुक् । न ङिसंबुद्ध्योरिति नलोपप्रतिषेधः ऋंजते ऋंजि भृजि भर्जने अत्र प्रसाधनार्थः ॥ ॥चतुर्थीमृचमाह ॥ ॥प्र वः शर्धाय घृष्वये त्वेष
द्युम्नाय शुष्मिणे ॥ देवत्तं ब्रह्म गायत ॥ हे ऋत्विजः वो युष्माकं संबंधिने शर्धाय प्रसहनशीलाय घृष्वये शत्रुघर्षणयुक्ताय त्वेषद्युम्नाय दीप्यमानय
शसे घृष्व घातते । यशो वा अन्नं वेति यास्कः ॥ शुष्मिणे बलवते शुष्मं शुष्ममिति बलनामसु पाठात् ॥ ब्रह्म स्तुतिलक्षणं मंत्रमुद्दिश्य एवंभूताय मरुद्ग
णाय प्र गायत उच्चरध्वं । कीदृशं ब्रह्म देवत्तं देवैर्दत्तं देवतानुग्रहाल्लब्धं । शर्धाय शृधु प्रसहने शर्धयत्यभिभवतीति शर्धो बलं पचाद्यच् । वृषादि
त्वादाद्युदात्तत्वं ॥ घृष्वये । घृष संघर्षे कुवि घृषीत्यादिना वित्प्रत्ययांतो निपातितः त्वेषद्युम्नाय द्युम्न दीप्तौ ॥ पचाद्यच् त्वेषो दीप्तं द्युम्नं यस्य बहुव्रीहौ
पूर्वपदप्रकृतिस्वरत्वं । देवत्तं देवैर्दत्तं छांदसो वर्णलोपः इति च । द्वौ वापरौ वर्णविकारनाशाविति ॥ तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥ ॥पंचमी
मृचमाह ॥ प्र शंसा गोष्वघ्न्यं क्रीळं यच्छर्धो मारुतं ॥ जंभे रसस्य वावृधे ॥ गोषु मरुद्गणान्मातृभूतप्रश्निप्रभृतिषु धेनुषु वर्तमानं प्रश्नियै वै पयसो मरुतो जा
ता इति श्रुतेः गता । अघ्न्यं अहंतव्यं क्रीळं विहारोपेतं मारुतं मरुत्संबंधि शर्धः प्रसहनशीलं तेजः यदस्ति तत् प्रशंस हे ऋत्विक् समर्तरसमदिर सस्य गो
क्षीरस्य संबंधितेन जंभे मुखे उदरे वा वावृधे वृद्धं अभूत । जंसकाकल्तो ह्यत्रात्मनि इति संहितायां दीर्घः । गोषु साव काच्च इति प्राप्तस्य विभक्
द्रतस्य नगोश्वन साववर्णेति प्रतिषेधः । अघ्न्यं अहननेनेधात्र्यर्थे कृत्यविधानमिति हंतेः यत्प्रत्ययादिना उपधालोपः हो हंतेर्ञ्णिन्नेष्विति घत्वं तदर्हतीति यत्
इति वा तयन् नञ्पूर्वं अघ्न्यं अव्यय पूर्वपदप्रकृतिस्वरत्वं ॥ क्रीडार्थयोगताः जंभे जंभिताः नेतृ भ्यते नभ्यते तेन ते त्वत्तिजंभमास्यं करणत्रयस्थे ॥ र

भा-अ-
९.१

धुरः॥ छोभिर्हृदयांसंहितायामभ्यासस्य दीर्घत्वं॥ ॥इति प्रथमस्य तृतीये द्वादशो वर्गः॥ ॥षष्ठीमृचमाह॥ को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः॥ यत्सी
मंतं न धूनुथ॥ दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्यापि ग्मेति भुवनामसु पठितत्वात्। धूतयः कंपनकारिणः हे नरः नेतारो मरुतः वो युष्माकं
मध्ये आ समंतात् वर्षिष्ठो वृद्धतमः कः यद्यस्मात्कारणात् सीं सर्वतः अंतं वस्त्रमिव धूनुथ तस्मात्कारणात् कं पवितॄणां पवितॄणां युष्माकं म
ध्ये कः प्रबल इति प्रश्नः॥ वर्षिष्ठः वृद्धशब्दादिष्ठनि प्रियस्थिरेत्यादिना वर्षादेशः निपातस्य द्वातः ग्मः ग्माशब्दात् षष्ठ्येकवचने आतो धातोरिति योगविभा
गः कर्तव्यः इत्याकारलोपः उदात्तनिवृत्तिस्वरेणांतोदात्तत्वं॥ धूतयः धूञ् कंपने क्तिच् क्तौ च संज्ञायामिति क्तिच्। तितुत्रेत्यादिना इट्प्रतिषेधः॥ आमं
त्रितस्य चेति सर्वानुदात्तत्वं। धूनुथ स्वादिभ्यः श्नुः सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात् सतिशिष्टोपि विकरणस्वरः सार्वधा
तुकस्वरं न बाधते अतस्तिङ एव स्वरः॥ यद्वृत्तयोगादनिघातः॥ ॥सप्तमीमृचमाह॥ नि वो यामाय मानुषो दध्र उग्राय मन्यवे॥ जिहीत पर्वतो गिरिः॥ हे
मरुतो वो युष्माकं यामाय गमनार्थं मानुषः मनुष्यः स्वामी कश्चिन्मानुषः निदध्रे दृढं धारयति उग्राय उद्गूर्णाय मन्यवे दीप्तिमते भवदीयगमनेन चालितः पतिष्यतीति भी
त्या तन्निवारणार्थं दृढं भवनं कीदृशाय मन्यवे उग्रायतीग्राय मन्यवे चानार्थमभिमन्यमानाय युष्मदीयगमनाद्भीतियता भयेन त्वया चालितः
पर्वतो बहुविधपर्वयुक्तो गिरिः जिहीत गच्छति॥ मानुषः मनोर्जातिन्यश्च तौ षुक् चेति मनुशब्दात् प्रत्ययार्थे अत्र युगमेन इत्यनित्यादिर्नित्यमिः
पुदात्तत्वं॥ दध्रे। ध्रञ् अवस्थाने इत्यस्य लिटि तादृणाभावेसति यणादेशः। प्रत्ययस्वरः पादादित्वान्न निघातः जिहीत ओहाङ् गतौ लिङि जुहो
त्यादित्वात् शपः श्लुः भृञामित्यभ्यासस्यत्वं। श्नाभ्यस्तयोरात इत्याकारलोपः॥ पर्ववान् पर्वतः मतौ मस्य प्रत्ययः॥ ॥अष्टमीमृचमाह॥ येषा
मज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः॥ भिया यामेषु रेजते॥ हे मरुतः येषां युष्माकं यामेषु गमनेषु अज्मेषु क्षेपकेषु सत्सु पृथिवी भूमिः रेजते। कंप
ते॥ तत्र दृष्टांतः॥ जुजुर्वान् इव विश्पतिः। यथा वयोहानिं गतो जीर्णः प्रजापालकोराजा वैरिभयात् कंपते तद्वत्। अज्मेषु। अज गतिक्षेपण
योः बहुलवचनादौणादिको मन् अजेर्व्यघञपोरिति वीभावो न भवति। वलादावार्धधातुके विकल्प इष्यत इति वचनात् निपातस्य द्वातस्तं॥ जुजु
र्वान्। जॄष् वयोहानौ लिटः कसुः बहुलं छंदसीति द्वित्वं अभ्यासहलादिशेषः। बसकारान्तसामिति नियमात् इडागमाभावः कित्त्वात् गुणाभावः इति
बहिर्दीर्घ संप्रसारणं पूर्वकाविधिरनित्य इति वचनात्र भवति। विश्पतिः विशापतिः विश्पतिः पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरः प्राप्ते परादिश्छंदसि बहुल
मिति गुणो हलि चेति दुत्तरपदाद्युदात्तत्वं भिया सावेकाच इति विभक्तेरुदात्तत्वं रेजते। रेजृ कंपने। अदुपदेशाल्लसार्वधातुकानुदात्तत्वं धातुस्व
रः यद्वृत्तयोगादनिघातः॥ ॥नवमीमृचमाह॥ स्थिरं हि जानमेषां वयो मातुर्निरेतवे॥ यत्सीमनु द्विता शवः॥ एषां मरुतां जानं जन्मस्थानं माकाशं
स्थिरं हि चलनरहितं खलु। मातुः मरुतां जननीस्थानाद्याकाशात् वयः पक्षिणो निरेतवे निर्गंतुं समर्था भवंतीति शेषः। यद्यस्मादाकाशात् भवन्तः
जाति मरुतां ज्ञातिः यद्यस्मात्कारणात् शवः भवदीयं बलं अनुक्रमेण सीं सर्वतः द्विता द्विधा द्यावापृथिव्योर्विभज्य वर्तते॥ अतो भवदीयं जा
नं स्थिरं हीति पूर्वत्रान्वयः॥ जान। जन्यंतेस्मिन्निति जानं मंतरिक्षं अत्याधिकरणे घञ् यद्यपि दमान्त्वाद्युदात्तत्वं प्राप्नोति तथा आदेशानुदात्तनं॥ विभक्तिश्च सुब्बाद
नुदात्ता॥ नचोदिदमिति मित्यादिना विभक्त्युदात्तत्वं। अंते। टानादिदं द्वाद्युदात्तत्वविधानात्तनिरेतवे। इणगतौ तुमर्थे सेसेनिति तवेन्प्रत्ययः॥ नादौ चेति ९१
गतेः प्रकृतिस्वरत्वं॥ ॥दशमीमृचमाह॥ उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत॥ वाश्रा अभिज्ञु यातवे॥ ये पूर्वं त्वं नागिरः सूनवः वाच

उत्पादुकाः मरुतः वायवोदितास्त्रोधादिषु संचरंतो वाचमुत्पादयंति॥ अज्मेषु स्वकीयेषु गमनेषु सत्सु काष्ठा आपः आपो पिकाष्ठानुच्यंते क्रांता 181
स्थितिमभवंतीति यास्कः॥ उत् उत्कर्षेणैव अत्नत अनिपत विस्तारितवंतः उदकं विस्तारितवंत इत्यनार्थं वा श्राः हंभारवोपेता गाः अभिज्ञु जान्वभि 1924
मुख्यं यथा भवति तथा यातवे गंतुं प्रेरितवंत इति शेषः सूनवः षूङ् प्रेरणे कूवः किदिति नुप्रत्ययः कित्त्वाद्गुणाभावः अत्नत। तनु विस्तारे लुङि
तस्यादादेशो बहुलं छंदसीति विकरणस्य लुक्। तनिपत्योश्छंदसीत्युपधालोपः अडागमः अभिज्ञु अभिगते जानुनी यस्य तदभिज्ञु प्र
संभ्यां जानुनोर्ज्ञुरिति व्यत्ययेनाभिपूर्वस्यापि जानुशब्दस्य ज्ञुशब्दादेशः समासांतः यातवे तुमर्थे सेसेनिति तवेन्प्रत्ययः॥ नित्त्वादाद्युदा
त्तत्वं॥ ॥इति प्रथमस्य तृतीये त्रयोदशो वर्गः॥ ॥एकादशीमृचमाह॥ त्यं चिद्घा दीर्घं पृथुं मिहो नपातममृध्रं॥ प्र च्यावयंति यामभिः॥ याम
भिः॥ त्यं चिद्धं प्रसिद्धो यो मेघः तमपि मेघं यामभिः स्वकीयगमनैः प्रच्यावयंति मरुतः प्रकर्षेण गमयंति। कीदृशं दीर्घं। आयामोपेतं पृ
थुं तिर्यग्विस्तृतं मिहो न पातं सेचनीयस्य जलस्य नपातयितारं वृष्टिमकुर्वंतमित्यर्थः। अमृध्रं केनाप्यहिंस्यं घकं च्चित्तु घेत्यादिना दीर्घः मि
हः मिह सेचने मिहतेः संपदादित्वात् क्विप् बालाक्षिकं पंचमीविपसावेकाच इति विभक्तेरुदात्तत्वं। न न पातं। न पातयतीति निपात। नभ्राणन
पादित्यादिना नञ् प्रकृतिभावः अव्ययपूर्वपदप्रकृतिस्वरत्वं। अमृध्रं। मृधु मृधु उंदने धातोरुदके न नतौ रिति मृध्रः बहुलवचनादौणा
दिको रक् प्रत्ययः नञ् समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ यद्वा संग्रामवाचि नाम। धशब्देन हिंसा लक्ष्यते मत्वर्थे यः पूर्ववत्स्वरस
मासे। वयंति। च्युङ् गतौ णिचि वृद्ध्यादेश पदकालेन्द्रस्वः छांदसः॥ ॥द्वादशीमृचमाह॥ मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन॥ गिरीँ
रचुच्यवीतन॥ हे मरुतः यद्यस्मात्कारणात् वो युष्माकं बलमस्ति। अस्मादेव कारणात् जनान् प्राणिनः अचुच्यवीतन॥ स्वस्वव्या
पारे पु प्रेरयत। तथा गिरीन् मेघान् अचुच्यवीतन प्रेरयत॥ मरुतः आमंत्रितायुदात्तत्वं॥ अचुच्यवीतन॥ च्यवतेर्लङि व्यत्यये
न परस्मैपदं। तस्य तनप्तनथनाश्चेति तस्य तनबादेशः॥ बहुलं छंदसीति शपः श्लुः॥ बहुलं छंदसीति ईडागमः गुणावादेशौ तिङतिङ इति
निघातः॥ गिरीन् दीर्घादटि समानपादे इति संहितायां नकारस्य रुत्वं। अत्रानुनासिकः इति ईकारस्यानुनासिकः॥ ॥त्रयोदशीमृचमा
ह॥ यद्ध यांति मरुतः सं ह ब्रुवतेऽध्वन्ना॥ शृणोति कश्चिदेषां॥ ॥यद्ध यदा खलु मरुतो यांति गच्छंति तदानीं अध्वना मार्गेण सर्वतः संब्रुव
ते ह संभूय ध्वनिं। मत्वश्यं कुर्वंति एषां मरुतां संबंधिनं शब्दं कश्चित् यः कोपि शृणोति। यांति या प्रापणे अदादित्वाच्छपो लुक् सप्तांत इति
ता देशस्य परेणीवद्भावात् तेत्यतंदा युदात्तत्वं। धातुना सहैकादेशे एकादेश स्वरः यद्वृत्तयोगादनिघातः श्रुनते। ब्रूञ् व्यक्तायां वाचि म
स्यात्मनेपदेशत्वे परत्वात्प्राप्तस्य गुणस्य ङिल्लेन बाधितत्वात् उवङादेशः॥ अध्वन् कूपांसलुगिति सप्तम्यालुक् शृणोति तिपः पित्त्वादनुदात्त
त्वे विकरणस्वरः॥ ॥चतुर्दशीमृचमाह॥ प्र यात शीभमाशुभिः संति कण्वेषु वो दुवः॥ तत्रो षु मादयाध्वै॥ हे मरुतः आशुभिः शीघ्रगामिभि
र्द्धिः स्वकीयैर्वाहनैः शीभं शीघ्रं शीभं तु तूर्णमिति क्षिप्रनामसु पाठात् प्रयात प्रकर्षेण कर्मभूमिं गच्छत। कण्वेषु मेधाविषु अस्मा
सु युष्माकं दुवादुवांसि परिचरणानि संति॥ तत्रो तत्रैव परिचारकेषु कण्वेषु मादयाध्वै तृप्ता भवत। आशुभिः अशूङ् व्याप्तौ॥ कृ
वापाजी त्यादिना उण्प्रत्ययस्वरः॥ संति श्नसोरल्लोपः इत्याकारलोपः॥ मादयाध्वै। मद तृप्तियोगे चुरादिरात्कुरसीय आत्मनेपदे लेटि

भा० म०
९२

ध्याद्यागमः। दीर्घत्वं नेतोन्यत्रेत्यकारस्यैकारादेशः॥ ॥पंचदशीमृचमाह॥ अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषां॥ विश्वं चिदायुर्जीवसे॥ हे मरुतो वो
युष्माकं मदाय तृप्तये अस्ति हि ष्म अस्माभिः प्रयुज्यमानं हविर्विद्यते खलु॥ एषां युष्माकं भक्ता वयं स्मसि ष्म भवाम खलु तथा विश्वं चित्सर्वमपि आयुः जीवसे जीवितुं
भवति॥ स्मसि। इदंतो मसिः। भवतेः अस्तेर्वा। निपातस्य चेति संहितायां दीर्घः। स्मसि इदंतो मसिः श्नसोरल्लोपः। जीवसे। तुमर्थे सेसेनिति असे प्रत्ययः॥ ॥इति प्रथमस्य
तृतीये चतुर्दशो वर्गः॥ ॥कद्ध नूनमिति पंचदशर्चं तृतीयं सूक्तं घोरपुत्रः कण्व ऋषिः। अपि विश्वान्यस्मादिति परिभाषितत्वात् पूर्ववत्सर्वमारुतं
तृतीयं चतुर्दशो वर्गः॥ ॥कद्ध नूनं कधप्रिय इत्यादिकं गायत्रं विनियोगः ...। गायत्रीछंदस्कं कद्धेत्यनुक्रमणिका। विनियोगो लैंगिकः॥ ॥तत्र प्रथमामृचमाह॥ कद्ध नूनं
कधप्रियः पिता पुत्रं न हस्तयोः॥ दधिध्वे वृक्तबर्हिषः॥ हे मरुतः कद्ध कदा खलु नूनमवश्यं हस्तयोर्दधिध्वे यूयमस्मान् हस्ते धारय। तत्र दृष्टांतः।
पिता पुत्रं न हस्तयोः यथा लोके पिता हस्तयोः स्वकीयं पुत्रं धारयति तद्वत्। कीदृशा मरुतः कधप्रियः स्तुतिप्रीताः। वृक्तबर्हिषः वृक्तं छिन्नं बर्हिः
दर्भो यैः ... मानाय हे मरुतः स्तथाविधाः। कद कदा ...पदस्यावर्णविकारत्वाद्वा ... कारलोपः। कधप्रियः कथाः स्तुतिः तया प्री
णातीति कधप्रियः प्रीञ् प्रीतौ क्विप् पूर्वपदस्य ... संहितायां ... छंदसो ... ह्रस्वत्वं धकारः छांदसः आमंत्रितनिघातः। दधिध्वे। दधातेः
छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। क्रादिनियमादिट् प्रत्ययस्वरः। वृक्तबर्हिषः। आमंत्रितनिघातः॥ ॥द्वितीयामृचमाह॥ क्व नूनं कद्वो अर्थं
गंता दिवो न पृथिव्याः॥ क्व वो गावो न रण्यंति॥ ॥हे मरुतः नूनमिदानीं यावद्यूयं तु ... कदा वा युष्माकं अर्थं अरणदेवयजनदेशं गमनं
विलंबनमाकुरुतेत्यर्थः। दिवो गंत द्युलोकात् कुतः पृथिव्या न गंत भूलोकात् मा गच्छत वा युष्मान् क्व रण्यंति देवयजनरूपायाः पृथिव्या अन्यत्र कुत्र
रण्यंति यजमानाः ... तद्वद्दृष्टांतः। गावो न यथा गावो रणंति शब्दयंति तद्वत्। क्व कुत्र। अर्थं। ... किमोत्॥ ... त्रल्ययः क्वातीति किमः
क्वादेशः। तित्स्वरितं इति स्वरितत्वं। अर्थं ऋगतौ उषिकुषिगार्तिभ्यस्थन्निति भावे थन्नित्वादाद्युदात्तत्वं। गंत गमेर्लोटि बहुलं छंदसीति शपो लुक्
थादेशस्य तप्तनप्तनथनाश्चेति तबादेशः अतएव ङित्त्वाभावादनुदात्तोपदेशेत्यादिना अनुनासिकलोपो न भवति। प्रत्ययस्य पित्त्वादनुदात्त
त्वे धातुस्वरः क्व वो न त्रिङ् इति संहितायां दीर्घत्वं। दिवः ऊडिदमिति विभक्तेरुदात्तत्वं पृथिव्याः उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। रण्यं
ति रणतिः शब्दार्थः व्यत्ययेन श्यन्॥ ॥तृतीयामृचमाह॥ क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता॥ क्वो३ विश्वानि सौभगा॥ ॥हे मरुतो यु
ष्माकं संबंधीनि नव्यांसि नवतराणि सुम्ना सुम्नानि सुखरूपाणि धनानि प्रजाश्च पशवः सुम्नमीति श्रुत्यंतरात्। क्व कुत्र वर्तंते तथा सुविता सुविताणि शोभना
नि प्राप्यानि मणिमुक्तादीनि भवदीयानि क्व कुत्र वर्तंते। विश्वानि सर्वाणि सौभगा सौभाग्यरूपाणि गजाश्वादीनि क्वो कुत्र वा वर्तंते॥ भवदी
यैः सुम्नादिभिः सर्वैः सह वर्गंतव्यमित्यर्थः। सुम्ना शेश्छंदसि बहुलमिति शेर्लोपः। नव्यांसि नवशब्दादीयसुनि ईकारलोपः छांदसः॥
सुविता। सुष्ठु इतानि सुवितानि तनादीनां छंदसि बहुलमुपसंख्यानमित्युत्वं शेरादेशः। सौभगा सुभगानां भाव इति तस्य भाव इत्यर्थे अत्र पूर्ववत्
शेर्लोपः॥ ॥चतुर्थीमृचमाह॥ यद्यूयं पृश्निमातरो मर्तासः स्यातन॥ स्तोता वो अमृतः स्यात्॥ हे पृश्निमातरः पृश्निनामक धेनुपुत्रा मरुतो यूयं यद्यपि ९२
मर्तासो मनुष्याः स्यातन भवथ तथापि युष्माकं स्तोता यजमानः अमृतः स्यात् देवो भवतु। पृश्निमातरः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः नित्यत्वात्। न
पृश्निर्विकल्पभावः मर्तासः असिद्धवदत्रेत्यादिनाऽपि यतश्चतुप्रत्ययः। आज्जसेरसुक्। स्यातन अस्तेर्लिङि तस्य तप्तनप्तनथनाश्चेति त

नादेशः॥ यास इड्डात्तत्वं अमृतः नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं॥ ॥पंचमीमृचमाह॥ मा वो मृगो न यवसे जरिता भूदजोष्यः॥ प
था यमस्य गादुप॥ हे मरुतो युष्माकं जरिता स्तोता अजोष्यः असेव्यो मा भूत्॥ तत्र दृष्टांतः। मृगो न यवसे यथा तृणभक्षणीये मृगः कदाचि
दप्यसेव्यो न भवति किंच सर्वदा तृणं भवति तद्वत् किंच। स्तोता यमस्य पथा यमलोकसंबंधि मार्गेण मोप गात मा गच्छतु तस्य मरणं मा भूदि
त्यर्थः। जरिता। जृ स्तुतौ तृच् इडागमः चितोंतोदात्तत्वं। भूत् लुङि गातिस्थेति सिचो लुक् न माङ्योग इत्यडभावः। अजो
ष्यः जुषी प्रीतिसेवनयोः ऋहलोर्ण्यदिति कर्मणि ण्यत् नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं। यथाः तृतीयैकवचनेभ्यस्य टेर्लोप इति टि
लोपः उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं॥ गात इण्लुङि इणो गा लुङीति गादेशः गातिस्थेति सिचो लुक् पूर्वपदं भावः॥ ॥इति प्रथम
स्य तृतीये पंचदशो वर्गः॥ ॥षष्ठीमृचमाह॥ मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत्॥ पदीष्ट तृष्णया सह॥ हे मरुतः नोस्मान् निर्ऋतिः रक्षोजा
तिर्देवता मो षु वधीत्। सर्वथा वधं मा कार्षीत् कीदृशी परापरा उत्कृष्टा अतिबलेत्यर्थः॥ अतएव दुर्हणा केनापि हंतुं दुःशक्या सा निर्ऋतिः तृष्ण
या सह पदीष्ट पततु अस्मदीयात् स्थानाद्बाधिका निर्ऋतिर्विनश्यत्वित्यर्थः॥ मो षु णः। सुञ इति षत्वं नश्च धातुस्थोरुषुभ्य इति णत्वं दुर्हणा दुर
दुःख्यात्यादिना खल् कर्मणि खलु लित्स्वरेण प्रत्ययात्पूर्वपदस्योदात्तत्वं। वधीत् लुङि हनो लुङि वधादेशः सिचि ईडागमः वधादेशस्या
दंतत्वात् एकाच उपदेश इतीट्प्रतिषेधो न भवति॥ अतो लोप इति तस्य स्थानिवत्त्वाद्धलादेरिति वृद्धेरभावः इट ईटि इति सिचो लोपः। प
दीष्ट पद गतौ आशीर्लिङि छंदस्युभयथेति सार्वधातुकत्वात्सलोपः। आर्धधातुकत्वात् सुडागमः। प्रत्ययस्वरः। तृष्णयाङ्ग पापिपा
सायां तृषेः धृषिपिशिभ्यः क्निप् चेति न प्रत्ययः॥ निदित्यनुवृत्ता आद्युदात्तत्वं॥ ॥सप्तमीमृचमाह॥ सत्यं त्वेषा अमवंतो धन्वंश्चिदा रुद्रियासः॥
मिहं कृण्वंत्यवातां॥ ॥धन्वन्नचितमरुद्देशे रुद्रियासः रुद्रेण पालितत्वात्पुत्रा मरुतः आसर्वतः अवतां वायुरहितां मिहं वृष्टिं कृण्वंति
कुर्वंति। तदेतत्सत्यं। रुद्रियासः त्वेषा दीप्ता अमवंतो बलवंतः मरुतां रुद्रपालनमाख्याने पु प्रसिद्धं। धन्वन्निति निरवधिवीगत्यर्थः
इति दृत्वात् सुमा कनिन्युर्वृ घनशीत्यादिना कनिन् नित्वादाद्युदात्तत्वं। रुद्रियासः। गितिसप्तम्यालुक् रुद्रियासः रुद्रस्येमे रुद्रियाः तस्येदमित्यर्थः
आज्जसेरसुक्। मिहं मिह सेचने क्विप् चेति क्विप्। कृण्वंति कृवि हिंसाकरणयोश्च धिन्विकृण्व्योरच्च उप्रत्ययः तत्संनियोगेन वकारस्य च अकार
देशः अतो लोपे न तु तस्य स्थानिवद्भावात् लघूपधगुणाभावः॥ कृतार्थ्यां मारुतं सप्तमकपालमित्यस्य हविषो याज्याश्रवेति युद्दिरित्येषानुवाक्यावर्ष
कामेष्टिरिति सूत्रितं॥ वाश्रेव विद्युन्मिमाति पर्वतश्चिमाहिरुद्रावि भायेति॥ ॥तामेतामष्टमीमृचमाह॥ वाश्रेव विद्युन्मिमाति वत्सं
न माता सिषक्ति॥ यदेषां वृष्टिरसर्जि॥ वाश्रेव वाश्रशब्दयुक्ता प्रभूततृण नवती धेनुरिव विद्युन्मेघस्यादृश्यमानासती मिमाति शब्दं करोति वि
द्युद्रूपाया इमे घगर्जनं प्रसिद्धं। माता धेनुर्वत्सं न वत्समिव सिषक्ति इत्यं विद्युन्मरुतः सेवते सिषक्ति सेवनार्थः सिषक्तु सचत इति सेवमा
नस्यति या लोक ... य यस्मात्कारणात् एषां मरुतां संबंधिनी वृष्टिः असर्जि सृज्यते। कालेवृष्टामवति तस्मादिवृतामरुत्सेवन
मुपपन्नं। वाश्रा इव वाश्र शब्दस्य ... तत्र ... आदिनारकमिमाति माङ् माने ... व्यत्ययेन परस्मैपदं॥ जु हो त्यादित्वा छुः भृञामिदित्यभ्यासस्येत्वं
सिषक्ति षच समवाये लुङि छंदसीति शपः श्लुः बहुलं छंदसीत्यभ्यासस्येत्वं॥ असर्जि सृजः चिण् भावकर्मणोरिति चि

183
1924

यांत्रिणो लुप्तमिति तद्राञ्ञस्य उकः ॥ गुणः अडागम उदात्तः ॥ यद्वृत्तयोगादनिघातः ॥ ॥ नवमीमृचमाह ॥ ॥ दिवा चित्तमः कृण्वंति पर्जन्येनोदवाहेन ॥ यत्पृथि
आ०१० वीं व्युंदंति ॥ हे मरुतः उदवाहेन उदकधारिणा पर्जन्येन मेघेन सर्वमाच्छादयंति दिवा चित् अहन्यपि तमः कृण्वंति अंधकारं कुर्वंति यद्यदा पृथिवीं भूमिं
९३ व्युंदंति विशेषेण क्लेदयंति ॥ तदानीमेव वृष्टिकाले तमः कुर्वंतीति पर्वतान्वयः ॥ उदवाहेन उदकानि वहतीत्युदवाहः कर्मण्यण् मेघविशेषस्येयं सं
ज्ञा ॥ उदकस्योदः संज्ञायामिति उदकशब्दस्योदभावः कृदुत्तरपदप्रकृतिस्वरत्वं ॥ व्युंदंति । उंदी क्लेदने रुधादिर्वात श्नसोरल्लोप इति नलोपः
यद्वृत्तयोगादनिघातः ॥ ॥ दशमीमृचमाह ॥ ॥ अध स्वनान्मरुतां विश्वमा सद्म पार्थिवं ॥ अरेजंत प्र मानुषाः ॥ मरुतां संबंधिनः स्वनात् ध्वनेर्गर्ज
नरूपाच्छब्दात् पार्थिवं पृथिवीसंबंधि विश्वं सद्म सर्वं गृहं आ समंतात् अरेजतेति शेषः ॥ तथा मानुषाः मनुष्याः अपि प्रारेजंत प्रकर्षे
ण कंपितवंतः ॥ अध छांदसं धस्तंस्य अपद्धनिवाग्नगत्यवसादनेषु अन्येभ्योपि दृश्यंत इति मनिन् पार्थिवं पृथिव्याः संबंधि पृथिव्या आञावि
ति प्राग्दीव्यतीयो अञ्प्रत्ययः ञित्वादाद्युदात्तत्वं ॥ अरेजंत रेजृ कंपने ॥ ॥ इति प्रथमस्य तृतीये षोडशो वर्गः ॥ ॥ एकादशीमृचमाह ॥ मरुतो
वीळुपाणिभिः चित्रा रोधस्वतीरनु ॥ यातेमखिद्रयामभिः ॥ हे मरुतः यूयं वीळुपाणिभिः दृढहस्तैः सादिताः संतो रोधस्वतीः कूलयुक्ता नदीरनुलक्ष्य
अखिद्रयामभिः अखिन्नगमनैः यातेमं गच्छतेव ॥ मरुतः आमंत्रितानुदात्तत्वं ॥ वीळुपाणिभिः वीळ्विति बलनाम ॥ वीळु यक्ष्ममिति नाम सपाठात् ॥ तेन
चेतद्दृढत्वं लक्ष्यते वाळवश्च ते पाणयश्च ॥ समासस्यांतोदात्तत्वं ॥ रोधस्वतीः रुधिर आवरणे ॥ रुणद्धि स्रोत इति रोधः कूलं निरुणद्धि स्रोत उत्कत
त्वात ॥ असमंतानित्वाद्युदात्तत्वं ॥ न च तद्गोधस्वत्वः मादुपधाया इति मतुपो वत्वं ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वे पित्वादनुदात्तत्वे अस्मतः स्वरश्च
श्रियते ॥ यात या प्रापणे अदादित्वाच्छपो लुक् ईडादयोनुदात्ता इत्यनुदात्तत्वं गुणे एकादेशे उदात्तेनोदात्तत्वं ॥ अखिद्रयामभिः खिद दैन्ये अस्मा
खिदेर्बाहुलकादौणादिको रक् खिद्रं यामं येषां तानीति खिद्रयामानः न खिद्रयामानः अखिद्रयामानः तैः अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ ॥ द्वादशीमृचमाह ॥ स्थिरा वः संतु नेमयो रथा
अश्वास एषां ॥ सुसंस्कृता अभीशवः ॥ हे मरुतः एषां युष्माकं नेमयो रथचक्रधारयाः स्थिराः संतु रथा अश्वाः अश्वाश्च स्थिराः संतु अभीशवोंगु
लयः अभीशवः दीधितय इति तन्नाम सपाठात् ॥ असंस्कृताः अश्वबंधनरज्जवो वा प्रग्रहणस्वलंकृताः सावधानाः संतु ॥ सुसंस्कृताः संपर्युपेभ्यः करोतौ
भूषणे इति सुट् पुनः सुशब्देन प्रादिसमासः अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ अभीशवः अभिपूर्वादश्नोतेः कृवापाजीत्यादिना उण् व
र्णव्यत्ययेन अकारस्य विकारः ॥ उक्तं च वर्णागमो वर्णविपर्ययश्चेति अभीशवोभ्यश्नुवते कर्माणीति निरुक्तं ॥ ॥ त्रयोदशीमृचमाह ॥ अच्छा वदा
तना गिरा जरायै ब्रह्मणस्पतिं ॥ अग्निं मित्रं न दर्शतं ॥ हे ऋत्विक् समस्तेन तनातनाथा देवतास्वरूपप्रकाशयत्या वाचा ब्रह्मणस्पतिं मंत्रस्य हवि
र्लक्षणस्यान्नस्य वा पालकं मरुद्गणं अग्निं दर्शतं दर्शनीयं मित्रं न मित्रमिव अपि जरायै स्तुत्यै अच्छ आभिमुख्येन वद ब्रूहि अच्छ ॥ निपातस्य चेति संहि
तायां दीर्घत्वं ॥ वद द्वचोतस्तिङ इति संहितायां दीर्घः ॥ तना तनु विस्तारे ॥ तनोति देवतामाहात्म्यं विस्तारयतीति तना यचाघञ् ॥ वृषादित्वादाद्युदात्त
त्वं ॥ तृतीयाया आदेशः ॥ गिरा ॥ सावेकाच इति विभक्तेरुदात्तत्वं ॥ ब्रह्मणः ब्राह्मणः पतिपुत्रेति संहितायां पत्वं ॥ ॥ चतुर्दशीमृचमाह ॥ मिमीहि श्लो
कमास्ये पर्जन्य इव ततनः ॥ गाय गायत्रमुक्थ्यं ॥ हे ऋत्विक् समस्तेन आस्ये स्वकीये मुखे श्लोकं स्तोत्रं मिमीहि निर्मितं कुरु ॥ तं च श्लोकं ततनः विस्ता ९३
रयतनहन्तानः पर्जन्य इव यथा मेघो वृष्टिं विस्तारयति तद्वत् ॥ उक्थ्यं शास्त्रयोग्यं गायत्रीछंदस्कं सूक्तं गायत्रं गाय मिमीहि माङ् माने जुहोत्या

दिकः व्यत्ययेन परस्मैपदं भृञामित् इत्यभ्यासस्येत्वं ॥ आस्ये आसे प्रक्षेपणे अस्यते क्षिप्यतेस्मिन्नित्यास्यं ऋहलोर्ण्यदिति बहुलमित्यधिकरणे ण्यत् तित्स्व 185
रितमिति स्वरितत्वं ॥ ततनः तनु विस्तारे लेटि सिप् बहुलं छंदसीति विकरणस्य श्लुः लेटोडाटावित्यडागमः ॥ इतश्च लोप इति इकारस्य लोपः ॥ गायत्रं गा 1924
यत्र्याः संबंधि तस्येदमित्यण् यद्वा गायत इति गायत्रं आतोनुपसर्गे कः ॥ ॥ पंचदशीमृचमाह ॥ वंदस्व मारुतं गणं त्वेषं पनस्युमर्किणं ॥ अस्मे वृ
द्धा असन्निह ॥ हे ऋत्विक् संतमारतं मरुत्संबंधिनं गणं समूहं वंदस्व नमस्कुरु कीदृशं त्वेषं दीप्तं पनस्युं स्तुतियोग्यं ॥ अर्किणं अर्चनावंतं अ
स्मे अस्माकं इहास्मिन् कर्मणि वृद्धाः असन् मरुतः प्रवृद्धा भवंतु वंदस्व वदि अभिवादनस्तुत्योः अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः पनस्युं प
न व्यवहारे स्तुतौ च धातुः अस्मात् पनः स्तोत्रं आत्मनः इच्छतीति पनस्यति सुप आत्मनः क्यच् छंदसि दीर्घः क्यच् प्रत्ययः ॥ अर्किणं अर्च स्तुतौ ॥ पुंसि संज्ञायामि
ति घः ॥ अर्कोस्यास्तीत्यर्की ॥ अत इनिठनौ ॥ असन् बहुलं छंदसीति शपो लुग्भावः इतश्च लोप इतीकारलोपः तिङ्ङतिङ इति निघातः ॥ ॥ इति प्रथम
स्य तृतीये सप्तदशो वर्गः ॥ ॥ प्रयदित्थेति दशर्चं चतुर्थं सूक्तं घोरपुत्रस्य कण्वस्यार्षं ॥ मरुद्देवताकं ॥ युजः सतोबृहत्यः अयुजो बृहत्यः ॥ प्रयदित्था
गाथेति त्वनुक्रमणिका ॥ गतो विनियोगः ॥ ॥ तत्र प्रथमामृचमाह ॥ प्र यदित्था परावतः शोचिर्न मानमस्यथ ॥ कस्य क्रत्वा मरुतः कस्य वर्पसा कं
याथ कं ह धूतयः ॥ हे धूतयः शत्रूणां कंपनकारिणो मरुतः यद्यदा मानं मननीयं युष्मदीयं बलं परावतो दूरात् ॥ आरे परावत इति दूरनामसु
पाठात् ॥ इत्था अस्माद्देशात् प्रास्यथ भूमौ प्रक्षिपथ ॥ तत्र दृष्टांतः ॥ शोचिर्न तेज इव यथा सूर्यः स्वतेजोंतरिक्षात् भूमौ प्रक्षिप्यति तद्वत् ॥
तदानीं यूयं कस्य यजमानस्य क्रतुना कर्मणा संगच्छध्व इति शेषः ॥ तथा कस्य यजमानस्य वर्पसा स्तोत्रेण संगच्छध्वं कं यजमानमुद्दिश्य यथाद
नयजनं देशं गच्छथ ॥ कं स्वं खलु यजमानमनुग्रहीष्यथेति शेषः ॥ इत्था हेतौ च छंदसीति इदंशब्दात् प्रकारवचने थाप्रत्ययः ॥ यद्विनं वृत्तेद्रा
दस्य नानुवृत्तिः तद्धितश्च प्रत्ययस्यांतोदात्तत्वं मरुद्भ्यो दुतस्यायविभक्तेर्व्यत्ययेन थकारस्य तु अभिप्रायः ॥ प्रथमपदे प्रत्ययस्वरः द्वितीयपदे
तु दात्तनिवृत्तिः स्वरः ॥ अस्यथ ॥ असु क्षेपणे ॥ अदुपदेशात् लसार्वधातुकानुदात्तत्वे श्यनो नित्वादाद्युदात्तत्वं ॥ यद्वृत्तयोगादनिघातः ॥ क्रत्वा
मादिपुरुषं दर्शिवान् वचनमिति ज्ञाना भावस्य विकल्पितत्वाद्भावः ॥ वर्पसा ॥ वृञ् वरणे भक्तौ वृञो भ्यां रूपप्रकाशयोः युष्मे त्यसन् तत्संनियो
गेन युगागमश्च नित्वादाद्युदात्तत्वं ॥ अत्र रूपाभिधायिना वर्पस शब्देन देवतास्वरूपप्रकाशकं स्तोत्रं लक्ष्यते क्रतुनासहचर्यात् ॥ ॥ द्वितीया
मृचमाह ॥ स्थिरा वः संत्वायुधा पराणुदे वीळू उत प्रतिष्कभे ॥ युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ॥ हे मरुतः व आयुधा युष्माकं
मायुधानि पराणुदे शत्रूणामपनोदनाय स्थिराः संतु स्थिराणि भवंतु उत अपि च प्रतिष्कभे शत्रूणां प्रतिबंधाय वीळूनि दृढानि संतु युष्माकं
तविषी बलं पनीयसी अतिशयेन स्तोतव्यं भवतु ॥ मायिनः अस्मासु छद्मचारिणो मर्त्यस्य मनुष्यस्य शत्रोर्मा बलं मा भवतु स्थिरा आयुधा
नि ॥ शीलोपः सुपां सुलुगिति विभक्तेर्लुक् ॥ दृंपा अष्टाबाध्यरुतिभावः प्रतिष्कभे स्कंभु स्तंभे सौत्रो धातुः संपदादिलक्षणो भावे क्विप् अनिदितामि
ति नलोपः ॥ पनीयसी ॥ पनतिः स्तुत्यर्थः ॥ अस्माद्दाणादिकः कृन्नतः ईयसुन् निर्दोरिति दिलोपः ॥ उगितश्चेति ङीप् ईयसुनो नित्वादाद्युदा
त्तत्वं ॥ मायिनः माया छद्म अस्यास्तीति व्रीह्यादिभ्यश्चेति मत्वर्थीय इनिः ॥ ॥ तृतीयामृचमाह ॥ परा ह यत्स्थिरं हथ नरो वर्त

र्तयथागुरु॥ विघाथनवनिनः पृथिव्याव्याशाः पर्वतानां॥ ॥हेनरोनेनतारोमरुतः यद्यद्राशिरं वस्तु पराहथ वृक्षाञ्छिं पराहतं भग्नं कुरुथ गुरु

भा०न० पाषाणादिकं गुरु तोपेतं वर्तयथ प्रेरयथ तदानीं पृथिव्याः संबंधिनः वनिनो वनवतो वृक्षान्वियाथ वियुत्य मध्ये गच्छथ॥ अरण्यगता

९४ नानि विदनो वृक्षाणां मध्ये यस्य कस्यपि वृक्षस्य भग्नत्वात् इतरवृक्षाणां परस्परवियोगेन प्रोदामार्गा भवति तथा पर्वतानामाशाः पर्व

तपार्श्वदिशः वियाथन वियुत्य गच्छथा हथ हनहिंसागत्योः अनुदात्तोपदेशत्वात् इत्यादिनानुनासिकलोपः॥ यद्वृत्तयोगादनिघातः॥ नरः पाद्या

दित्वादामंत्रितनिघाताभावः वर्तयथ अदुपदेशात् लसार्वधातुकानुदात्तत्वे सति स्वरः वृक्षाणि यद्वृत्तानुयोगान्निघाताभावः॥ याः

थन तमन मनथनार्थे तिथनादेशः॥ ॥चतुर्थीमृचमाह॥ ॥नहिवः शत्रुर्विविदे अधिद्यवि न भूम्यां रिशादसः॥ युष्माकमस्तु तवि

षीतना युजा रुद्रासो नूचिदाधृषे॥ हे रिशादसः शत्रुहिंसका मरुतः अधिद्यवि द्युलोकस्योपरि वा युष्माकं शत्रुर्नहि विविदे न बभूव॥

तथा भूम्यामपि शत्रुर्न बभूव हे रुद्रासो रुद्रपुत्रा मरुतः युष्माकं एकोनपंचाशत्संख्यानां भवतां युजा योगेन परस्परैकमत्येन अरु

षे वैरिणां सर्वतो धर्षणाय तविषी बलं नूचित् क्षिप्रमेव तना अस्तु विस्तृता भवतु॥ विविदे विदसत्तायां लिटि प्रत्ययस्वरः दिवि न दिवि

इ भूम्यां च न विविदे इति चवार्थ प्रतीतेश्चाद्दिलोपे विभाषितेति प्रथमायाम् तिङ् विभक्तेर्निघातप्रतिषेधः। प्रथमं चानुसक्ती

यापेक्षया रिशादस रिश हिंसायाम् अत्ति हिंसंतीति रिशादसः इगुपधलक्षणः कः तानं दत्तीति रिशादसः॥ असकृन आमंत्रितनिघातः

।युजा। युजिर्योगे॥ क्विन्॥ इत्यादिना क्विन्नसावेकाच इति विभक्तेरुदात्तत्वं रुद्रासः। रुद्रशब्देन तत्संबंधिनो मरुतो लक्ष्यंते॥ आज्जसे

रसुक्।नूचित। क्विचिनन्तु युधार्थादिना दीर्घः॥ आधृषे निधृषा प्रागल्भ्ये संपदादिलक्षणो भावे क्विप्॥ कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥

पंचमीमृचमाह॥ ॥प्रवेपयंति पर्वतान्वि विंचंति वनस्पतीन्॥ प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा॥ ॥पर्वतान्मरुद्भिमवदादीन्

प्रवेपयंति मरुतः प्रकर्षेण कंपयंति वनस्पतीन् वटाश्वत्थादीन् विविंचंति परस्परवियुक्तान्कुर्वंति॥ हे मरुतो देवासो देवाः सर्वया विशा

प्रजया सहिता यूयं प्रो आरत प्रकर्षेण सर्वतो गच्छत तत्र दृष्टांतः दुर्मदा इव यथा मदोन्मत्ताः स्वेच्छया सर्वतः क्रीडंति तद्वत् वेपयंति

टुवेपृ कंपने वेपमानान् प्रयुंजंत हेतुमणिच विविंचंति विचिर पृथग्भावे रुधादित्वाच्छ्नम् श्नसोरल्लोप इति अकारलोपः वनस्पतीन्वना

नां पतयो वनस्पतयः पारस्करादित्वात्सुट् वानस्पतिशब्दावाद्युदात्तौ उभे वनस्पत्यादिषु युगपदिति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्व

रत्वं आरत। ऋगतौ।लिङ्। मध्यमबहुवचने बहुलं छंदसीति शपो लुग भावः॥ आडजादीनामित्याडागमः॥ आटश्चेति वृद्धिः देवासः आम

त्रिताद्युदात्तत्वं॥ सर्वया। सर्वस्य सुपीत्याद्युदात्तत्वं। विशासंविकाच इति विभक्तेरुदात्तत्वं॥ ॥इति प्रथमस्य तृतीये षोडशो वर्गः॥ ॥

षष्ठीमृचमाह॥ उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः॥ आ वो यामाय पृथिवी चिदश्रोदबीभयंत मानुषाः॥ हे मरुतः रथेषु भव

दीयेषु पृषतीः बिंदुयुक्ता मृगीरुप सामीप्येन अयुग्ध्वं योजितवंतः प्रष्टिः एतन्नामको वाहनविशेषः ... रोहितः ... ९४

लोहितवर्णः ... वहति रथं नयति। वो युष्माकं यामाय गमनाय पृथिवी चित् ... आश्रोत ॥ आभिमुख्येन ... अनुतानाती

त्यर्थः। पृथिवीत्यंतरिक्षनाम। पृथिवी भूः स्वयंभुवेति तंनामसु पाठात्॥ मानुषाः भूर्लोकवर्तिनः पुरुषाः अबीभयंत स्वयं भीताः

संतो अन्यानपि भीषितवंतः उपो उप उ इति निपातद्वयसमुदायात्मकत्वान्निपातांतरं ओदिति प्रगृह्यत्वं अयुग्ध्वं लङि झलो झलीति सकारस्य लो 187

पः चाकुरिति कुत्वं। रोहितः रुहेरश्च लोवेति इतन् प्रत्ययांतः निबादायुदात्तः॥ यामाय यमो भावे घञ् कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते वृषादिषु पाठात् आ 1924

द्युदात्तत्वं। अश्रोत।श्रुश्रवणे बहुलं छंदसीति विकरणस्य लुक्॥ अबीभयंत ञिभी भये अस्माण्णिजंताल्लिङि भीस्म्योर्हेतुभये इत्यात्मने पदं बिभे

हेतुभये इत्यात्वस्य विकल्पितत्वात् ... हेतुभये पुगिति पुगभावः ... णौ चङ्युपधाया ह्रस्वः ...

॥ ॥सप्तमीमृचमाह॥ आवाम क्षूतनाय कं रुद्रा आवो वृणीमहे॥ गंता नूनं नोवसा यथा पुरेत्था कण्वाय बिभ्युषे॥ हे रुद्रा रुद्रपुत्रा मरुतः नः अस्माकं

अस्मदीय पुत्रार्थं मक्षु शीघ्रं वो युष्मदीयमवो रक्षणं आवृणीमहे सर्वतः प्रार्थयामहे॥ मक्षिविति क्षिप्रनाम मक्षु इति तन्नामसु पठितत्वात्। पु

रापूर्वस्मिन्काले कण्वाय ... यथा गमनं कृतवंतः इत्था अनेन प्रकारेण बिभ्युषे भीतियुक्ताय कण्वाय ... नियन्तृमानाय

तदनुग्रहार्थं ... गंत प्राप्नुत॥ मक्ष कश्चित्तु ... दीर्घः। तनाय। तनोतीति तनः पचाद्यच् वृषादित्वादाद्युदात्तत्वं॥ य

द्वा तनयशब्दे अप अत्ययस्य लोपः छांदसः कृमितनयोरन्तस्य ... पादपूरणार्थः ... इति वत उकंत। अथापि पदपूरणाः इमीमिद्ध

ईति। रुद्राः रोदयंतीति रुद्राः रोदेर्णिलुक् चेति रक् प्रत्ययः आमंत्रिताद्युदात्तत्वं पादादित्वान्निघाताभावः॥ गंता लोटि बहुलं छंदसीति शप उकंत।

... तमनन विस्यादिनात वादेशः॥ अतः पितादनुनासिकलोपाभावः बिभ्युषे बिभेतेर्लिटः क्वसुः वस्वेकाजाद्घसामिति नियमादिडभावः॥ च

तुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं परपूर्वत्वं॥ ... इति षत्वं॥ ॥अष्टमीमृचमाह॥ ॥युष्मेषितो मरुतो मर्त्येषित आ

यो नो अभ्व ईषते॥ वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः॥ हे मरुतः यः कश्चिदभ्वः शत्रुः युष्मेषितः युष्माभिः प्रेषितः मार्केण्य

प्रेषितः सन् नोस्मान्प्रति आ ईषते आभिमुख्येन प्राप्नोति तं शत्रुं शवसा अन्नेन वियुयोत विभक्तं कुरुत॥ तथा ओजसा बलेन वियुयोत युष्माका

भिः ऊतिभिः युष्मत्संबंधिभी रक्षणैश्च वियुयोत युष्मेषितः युष्माभिरिषितः सतृतीयेति तत्पुरुषः ... तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरत्वं॥ मर्त्येषितः पूर्ववत्। अभ्वः अभा

वतीत्यभ्वः ... इषगतिहिंसादर्शनेषु। अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः॥ युयो

त। युमिश्रणामिश्रणयोः लोण्मध्यमबहुवचने बहुलं छंदसीति शपः श्लुः॥ तप्तनप्तनथनाश्चेति तबादेशः पिताद्गुणः युष्माकाभिः युष्मत्सं

बंधिनीभिः तस्मिन्नणि च युष्माकास्माकाविति युष्मच्छब्दस्य युष्माकादेशः ङीपि ... छांदसत्वात् ... ऊतिभिः अवतेः ... स्वरत्वं ...

ईड्ईतीयूती इत्यादिना क्तिन् उदात्तत्वं॥ ॥नवमीमृचमाह॥ ॥असामि हि प्रयज्यवः कण्वं दद प्रचेतसः॥ असामिभिर्मरुत आ न ऊतिभिर्गंता वृष्टिं

न विद्युतः॥ असामि हि संपूर्णं यथा भवति तथा प्रयज्यवः कण्वं ददप्रचेतसः प्रकृष्टज्ञानयुक्ताः हे मरुतः कण्वं मेधातिथिं युष्मान् ...

वारं धारयत। हि यस्मात् ... कण्वनामकं ... धारितवंतः॥ तस्मात्कारणात् असामिभिः ऊतिभिः संपूर्णैः रक्षणैः अस्मान् प्रत्यागंत। आगच्छत तत्र दृष्टां

तः वृष्टिं न विद्युतः यथा विद्युतो वृष्टिं गच्छति तद्वत्। असामि साम्य ... असामि अव्ययपूर्वपदप्रकृतिस्वरत्वं। प्रयज्यवः प्रकर्षेण यष्टव्यः

यजि मनि शुंधि दसि जनिभ्यो युरिति कर्मणि युप्रत्ययः आमंत्रितनिघातः ददः डुदाञ् दाने। लोण्मध्यमबहुवचने स्यति ... भवंतीति ...

इत्मनेपदे प्रथमपुरुषे बहुवचनादेशः। श्लौ द्विर्भावे सति श्नाभ्यस्तयोरातः इत्याकारलोपः। लोपस्त आत्मनेपदेष्विति तलोपः। अतो गुण इति पररूपत्वं।
भवति। किं तु प्रत्ययस्वरेणाहि चेति निघातः प्रतिषेधः। प्रचेतसः। प्रकृष्टं चेतो येषां आम
भा॰ प्र॰ छंदस्युभयथेत्यार्धधातुकत्वादभ्यस्तानामादिरित्याद्युदात्तत्वं भवति। प्रत्ययस्य पित्वादनुदात्तत्वे धातुस्वरः पादादित्वान्निघाता
९५ भावः। गंत। गमेर्लोण्मध्यमबहुवचनस्य तबादेशः। बहुलं छंदसीति शपो लुक्। प्रत्ययस्य पित्वादनुदात्तत्वे धातुस्वरः। पादादित्वान्निघाता
भावः। द्व्यचोतस्तिङः इति संहितायां दीर्घत्वं। विद्युतः विद्योतते इति विद्युत। भ्राजभासेत्यादिना क्विप्। ॥ द्वितीयामृचमाह॥ असाम्योजो बिभृथा सुदानवो
दानवो असामि धूतयः शवः। ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषं॥ हे सुदानवः शोभनदाना मरुतः असामि संपूर्णमोजो बलं बि
भृथ धारयथ। हे धूतयः कंपनकारिणो मरुतः असामिसंपूर्णं शवो बलं परिमन्यवः कोपपरिहताय ऋषिद्विषे ऋषीणां द्वेष्ट्रे नराय तद्विः
नानार्थं द्विषं द्वेषकारिणं हतारं सृजत। तत्र दृष्टांतः। इषुं न यथा बाणार्थं परिवाणं मुंचति तद्वत्। अत्र निरुक्तं। असामि सामि प्रतिषिद्धं सामि स्यतेः
असाम्योजो बिभृथा सुदानवः असमाप्तं बलं बिभृथ कल्याणदाना इति विभृथ। कृभृजपारणपोषणयोः। जुहोत्यादित्वात् श्लुः। भृञामित
इत्यभ्यासस्यत्वं। ऋषिद्विषे ऋषिं द्वेष्टीति ऋषिद्विट्। सत्सूद्विषेत्यादिना क्विप्। परिमन्यवे मन्युना परिगताः परिमन्युः प्रादिसमासः परिरभितो
भाविमं इत्यभिसरपूर्वपदात्युदात्तत्वं॥ सृजत। सृज विसर्गे। विकरणस्याइदत्वाद्गुणाभावः द्विषंदिष प्रीतिकिप॥ ॥ इत्याद्यस्यत्रतीयमृचोवः
बिंशोवर्गः॥ ॥ उत्तिष्ठेत्यष्टर्चं पंचमं सूक्तं कण्वस्यार्षं बार्हतं युजः सतोबृहत्यः। ब्रह्मणस्पतिर्देवता। अनुक्रम्यते च। उत्तिष्ठाष्टौ ब्राह्म
णस्पत्यमिति। सूक्तविनियोगो लैंगिकः। चतुर्विंशाहनि मरुत्वतीये प्रगाथा ब्राह्मणस्पत्यास्तत्र प्रगाथः पूर्वे उत्तिष्ठ ब्रह्मणस्पते त्याद्यः पत्रपत्योनिता
इति आद्या तु प्रयत्ने पिशिवत्र्व विनियुक्त इति सुत्र ब्रह्मणस्पत इत्येता मृकावतिष्ठत इति सूत्रितत्वात्॥ ॥तत्र प्रथमामृचमाह॥ उत्तिष्ठ ब्रह्मण
इति आद्यातु प्रवर्ग्ये अभिष्टव विनियुक्ता इति च ब्रह्मणस्पत इत्येता मृकावतिष्ठत इति सूत्रितत्वात्। एतेनामकदेवं उत्तिष्ठ अस्मदनुग्रहाय त्वदीयं निवासाद
स्पते देवयंतस्त्वेमहे। उपप्रयंतु मरुतः सुदानव इंद्र प्राशूर्भवा सचा॥ हे ब्रह्मणस्पते। एतन्नामक देव उत्तिष्ठ अस्मदनुग्रहाय त्वदीयं निवासाद
स्थानं कुरु। देवयंतो देवान् कामयमाना वयं त्वां ईमहे। सुदानवः शोभनदाना युक्ता मरुतः उपप्रयंतु। समीपप्रकर्षेण गच्छंतु हे इंद्र त्वं सचोत्तब्र
णस्पतिना सह प्राशूः सोमस्य प्राशको भव। यद्वाश्वस्य हिंसको भव। इति ऋ। ईर्ध्व कर्मत्वादात्मनेपदाभावः। ब्रह्मणस्पते। सुवामंत्रितइति
पराग वद्भावात् आद्यामंत्रित समुदायस्याष्टकमिसर्वानुदात्तत्वं। देवयंतः देवानात्मन इच्छंतः सुप आत्मनः क्यच् न च्छंदस्य पुत्रस्येति तास्येवसीधे
स्यापिनिषेधः। अश्वाघस्येतिपुनरात्वाविधान सामर्थ्यात् ईमहे इत्यादेयोगताः प्राशूः अशूहिंसायां प्रकर्षेण आसमंतात् अश्नाति हिनस्तीति
प्राशूः। बहुलं छंदसीत्युपधावाधीर्घः कृदुत्तरपदप्रकृतिस्वरत्वं। भवत्युधा चोतस्तिङः इति संहितायां दीर्घत्वं॥ ॥द्वितीयामृचमाह॥ ॥
त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते। सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके॥ हे सहसस्पुत्र बलस्य बहुपालक ब्रह्मणस्पते पुत्रः पुरत्रा
यतानिपरणाद्वेति निरुक्तं मर्त्यो मनुष्यः हिते धनं धुनिनिमित्तभूते सति त्वामित्त्वामेवोपब्रूते हि समयं प्राप्य स्तौति खलु॥ तद्वन संपादना
यपार्थयतइत्यर्थः। हेमरुतः। प्रार्थनार्थं इमर्त्यः वो युष्मान् ब्रह्मणस्पतिसहितान् आचके स्तौति स मर्त्यः स्वश्व्यं शोभनाश्वयुक्तं सुवीर्यं शोभ ९५
नवीर्ययुक्तं च धनं दधीत धारयत सहसस्पुत्र ब्रह्मणस्पत इति तत्पष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं उपब्रूते। हि चेति निघातप्रतिषेधः।
तिङि चोदात्तवतीति गतेरनुदात्तत्वं। हिते निधायां दधातेर्हिरिति हिरादेशः। सुवीर्यं शोभनं वीर्यं यस्येति बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्यु

दात्तत्वं॥ स्वश्व्यं। अश्वानां समूहोऽश्व्यं केशाश्वाभ्यां यञ्छावन्यतरस्यामिति समूहार्थे यत्प्रत्ययः। यस्येति चेति लोपः। शोभनमश्व्यं यस्य तत्स्वश्व्यं। ई 189/1924
कारलोपश्चांदसः पतादिः छंदसि च इत्युत्तरपदाद्युदात्तत्वं। दधीत। सीयुटः सकारलोपे सति अभ्यस्तानामादिरित्याद्युदात्तत्वं पादादित्वान्निघा
ताभावः। आचके। कै गै शब्दे। आ रेच इत्यात्वं लिटि द्विर्वचने अभ्यासस्य ह्रस्वत्वे। अतो लोप इति चेत्याकारलोपः प्रत्ययस्वरः। यद्वृत्तयोगान्नि
घातः॥ चतुर्विंशाहनि मरुत्वतीये उत्तिष्ठ ब्रह्मणस्पतिरित्यस्मात् प्रगाथात् पूर्वं प्रैतु ब्रह्मणस्पतिरित्ययं प्रगाथो विनियुक्तः सूत्रं तूत्तिष्ठ ब्रह्मणस्पत इत्य
यो वाम्नाहुतं महावीरमादाय शालां प्रतिगच्छन्प्रैतु ब्रह्मणस्पतिरित्येतां पठन् होतानुगच्छेत्॥ सूत्रं च। प्रैतु ब्रह्मणस्पतिरित्यनुब्रजेदिति। एवं
वाग्नीषोमीयप्रणयनेऽपि विनियुक्ता सूत्रितं च प्रैतु ब्रह्मणस्पतिर्होता देवो अमर्त्य इति॥ ॥तामेतां सूक्ते तृतीयामृचमाह॥ प्रैतु ब्रह्मणस्पतिः प्र दे
व्येतु सूनृता। अच्छा वीरं नर्यं पंक्तिराधसं देवा यज्ञं नयंतु नः॥ ब्रह्मणस्पतिर्देवः प्रैतु अस्मान् प्राप्नोतु सूनृता देवी प्रियसत्यरूपा वाग्देवता प्रैतु अस्मा
न् प्राप्नोतु देवाः ब्रह्मणस्पत्यादयो देवताः वीरं शत्रूणां विशेषेण दूरप्रेरयितुं। तं नर्यं मनुष्येभ्यो हितं पंक्तिराधसं ब्राह्मणाकृतहविष्यत्यादिभिः सम्
यक्तं यज्ञं प्रति नोऽस्मान् अच्छाभिमुख्येन नयंतु। प्रैतु एङि पररूपमिति पररूपं प्राप्ते एत्येधत्यूठ्स्विति वृद्धिः देवीत्यत्र उदात्तस्वरितयोर्यणः स्वरितोनु
दात्तस्येति स्वरितत्वम्। नर्यं। नरेभ्यो हितं। प्राग्दिति तं उगवादिभ्यो यदिति यत्प्रत्ययः। पंक्तिराधसं पंक्तिभी राध्नोतीति पंक्तिराधाः ग
तिकारकोपपदात्पूर्वपदप्रकृतिस्वरत्वं यतं यज्ञाश्चेत्यादिना यज्ञ नेर्नङः॥ ॥चतुर्थीमृचमाह॥ ॥यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः॥
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसं॥ यो यजमानो वाघते ऋत्विजे सूनरं सुष्ठु नेतव्यं वसु धनं ददाति॥ स यजमानो ब्रह्मणस्पतेः प्रसादाद् दक्षि
तिक्षयरहितं श्रवोऽन्नं धत्ते धारयति। तस्मै तादृशाय यजमानायार्थाय इळां एतन्नामधेयां मनोः पुत्रीं। इळां वा मानवीं यज्ञानुकाशिनीं आसीदिति श्रुत्यंतरात्॥ आ
यजामहे। वयं ऋत्विजः सर्वतो यजामः कीदृशीं इमिळां सुवीरां शोभनैर्वीरैर्भटैर्युक्तां सुप्रतूर्तिं सुष्ठु प्रकर्षेण हिंसाकारिणीं॥ अनेहसं केनाप्यहिंस्यां इत्य
ति॥ अनुदात्तं चेत्यभ्यासस्याद्युदात्तत्वं। यद्वृत्तयोगान्निघातः। सूनरं सुष्ठु नेतव्यमिति सुनरं इण् वादुः सुषि तिस्व इति निपातस्य च इत्युपसर्गस्य दीर्घत्वं॥
अक्षिति क्षियो नास्त्यस्येत्यक्षितं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ न ब्रह्मभ्यामिति तु सर्वविधयः छंदसि विकल्प्यंते इति वचनाच्च प्रवर्तते श्रवः श्रूयत
इति श्रवः। श्रु श्रवणे। असुन्नोनित्वादाद्युदात्तत्वं॥ सुवीरां शोभना वीरा यस्याः सा सुवीरा ताम्। सुवीरं वा वीर्यं चेत्युत्तरपदाद्युदात्तत्वं। सुप्रतूर्तिं तुर्वी
हिंसार्थः प्रपूर्वात्तस्मात् क्तिन्। शोभना प्रतूर्तिः शत्रूणां हिंसनं यस्याः सा तां परादिः छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं॥ ऋत्वादिर्वा द्रष्टव्यः॥
अनेहसं। न हन्यत इत्यनेहाः। नञि हन एह च इत्यसुन्प्रत्ययः धातोरेहादेशश्च नलोपो नञ इति नकारस्य लोपः। तस्मान्नुडचीति नुट्॥ अग्निष्टोमे
मरुत्वतीयशास्त्रे उत्तिष्ठेत्युक्तप्रगाथानंतरं प्रनूनमिति प्रगाथः मरुत्वतीये न तिसृश्चेति सूत्रितं प्रनूनं ब्रह्मणस्पतिर्ब्राह्मणस्पत्य इति॥ ॥प्रगाथे प्रथ
मां सूक्ते पंचमीमृचमाह॥ प्रनूनं ब्रह्मणस्पतिर्मंत्रं वदत्युक्थ्यं। यस्मिन्निंद्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे॥ ब्रह्मणस्पतिर्देव उक्थ्यं उक्थ्य
योग्यं मंत्रं नूनं मवश्यं प्रवदति होतृमुखे स्थितं सन् प्रब्रूते यस्मिन्मंत्रे इंद्रादयश्च सर्वे देवाः ओकांसि स्थानानि चक्रिरे॥ तादृशं सर्वदेवप्रतिपाद
कं मंत्रमिति पूर्वेणान्वयः मंत्रं। मंत्रि गुप्तभाषणे। पचाद्यच्। वृषादिषु पाठादाद्युदात्तत्वं॥ उक्थ्यं उक्थमर्हतीति छंदसि चेति यत्प्रत्ययः। यद्वा भवे
छंदसीति यत्। सर्वविधयश्छंदसि विकल्प्यंत इति वचनाद्यतोनाव इत्याद्युदात्तत्वाभावे यस्यापि तिस्वरितमिति स्वरितत्वं॥ ओकांसि। उच सम

मवा यसम यं यजेत्य। धिकरणे ओणादिको सन यकृतय रणात कुर्वं द्वस्थ्यामिति अंकृ ओक उवः कउत्य नव आविष्कर्त चक्रिरे॥ इन्द्रेचश्विवादं
तो दात्तत्वं॥ यद्वनयागानिघातः॥ ॥ इति प्रथमस्य तृतीये विंशो वर्गः॥ ॥ षष्ठीमृचमाह॥ तमिद्धोश्वमाविदथ पुत्रोभुवमं त्रे देवा अनेहसं॥
इमां च वाचं प्रतिहर्यथा न रो विश्वेद्वामावो अश्नवत॥ हे देवाः ब्रह्मणस्पतिप्रभृतयः॥ तमित तमेव इमानि वं देवता प्रतिपादकमंत्रविशिष्ट
यूयं त्रेपुत्रो ने मंत्रस्य मतितो ब्रवाम॥ कीदृशं गंभुवं मंत्रस्य भावयितारं॥ अनेहसं अहिंसनीयं दोषरहितं हेनरो नेतारो देवा इमामस्माभि
रच्यमानां मंत्ररूपां वाचं प्रतिहर्यथ च। स्पृहयंकामयध्वं चेत तर्हि विश्वेत सर्वा वियामावननीयाया वाक् वो युष्मानश्नवत व्याप्नुयात॥ वोचेम॥
वचपरिभाषणे। आशीर्लिङि लिङ्याशिष्यङिः। स्यदेः व चउमागमः॥ छंदस्युभयथेति सर्वधातुकत्वात् लिङः सलोपाभावः। स्यति यासुटः
सकारस्य लोपः अतो येय इतीयादेशः। आद्गुणः तिङ्ङतिङ इति निघातः। विदथे पुत्रे विदत्राने। विघतं फलसाधनत्वेन ज्ञानत्व्य इति विदथो यज्ञः
रविदिभ्यां विदित्यथप्रत्ययः। गं भुवं भवतेर्नं भावित यथा किबुपपचेतिक्विप॥ ओः सुपीति यणादेशः। अस्य नभसकाधियीति प्रतिषेधः। मंत्रा
दयो गताः। प्रतिहर्यथ। हर्य गतिकांत्योः शपः पित्वाद नुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण धातुस्वरेण घुदात्तत्वं॥ इमां च यच्चत्र चशब्दे
श्चेदर्थः। चणिति निपातात्तरं। न च समुच्चयाद्यर्थः। तेन निपातैर्यद्यदिहंत कुविन्नेच्चणइति निघातप्रतिषेधः। अश्नवत अश्नुव्याप्ता
। लेटागमः। व्यत्ययेन परस्मैपदं। इतश्च लोप इतीकारलोपः। उपदृष्टं करं यं॥ गुणवृद्धी भवतीति प्रतिषेधेनेति गुणः॥ ॥ सप्तमीमृच
माह॥ ॥ को देवयंतमश्नवज्जनं को वृक्तबर्हिषं॥ प्रप्र दाश्वान्पस्त्याभिरस्थितांतर्वावत्क्षयं दधे॥ देवयंतं देवान् कामयमानं जनं को
ऽश्नवत। ब्रह्मणस्पतिव्यतिरिक्तः को नाम देवो व्याप्नुयात॥ तथा वृक्तबर्हिषं अनुष्ठानाय छिन्नबर्हिषं यजमानं को नाम व्याप्नुयात्॥ दाश्वान
श्वान हविर्दत्तवान् यजमानः पस्त्याभिः मनुष्यैः कृतिगभिः सह प्रप्र प्राधिकं दैवयज्ञ मानदेशं प्रति प्रस्थितवान अंतर्वावत। अंतस्थितबे
दुधनोपेतं यद्वा। अंतस्थितपुत्रपौत्रादिप्रयुत बहुविधगोपेत क्षयं निवासस्थानं गृहं दधे धृतवान् भवति॥ देवयंतमित्यादि
योगताः प्रप्र। प्रसमुपोदः पादपूरण इति प्रशब्दस्य द्विर्भावः। अनुदात्तं चेत्याम्रेडितानुदात्तत्वं। अस्थित। ष्ठा गतिनिवृत्तौ। लुङ् समवप्र
विभ्यस्थ इत्यात्मनेपदं। स्थाघ्वोरिच्चेति धातुसिचोरितिकित्वं ह्रस्वादंगादिति लोपः अंतर्वावत। वागतिगंधनयोः अंतर्वातिगच्छतीत्यं
तर्वाः पुत्र पश्वादयः अतो मनिन्क्वनिप्वनिपश्चेति विच् ततः स्यास्मीतिमतुप मतुपस्वरः अनुदात्तत्वेऽरदुत्तरपदप्रकृतिस्वरत्वं। यद्वा वावदी
तेः क्विप्। क्षयं। क्षि निवासगत्योः। क्षियंति निवसंत्यस्मिन्निति क्षयः। पुंसि संज्ञायामिति घाधिकरणे घः। क्षयो निवास इत्याद्युदात्तत्वं॥ ॥ अष्टमीमृच
माह॥ उप स्तवं पृंचीत हंति राजभिर्भये चित्सुक्षितिं दधे॥ नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः॥ ब्रह्मणस्पतिर्देवः क्ष
त्रं बलं उपपृंचीत स्यात्मनि संपृक्तं कुर्यात् ततो राजभिर्वरुणादिभिः अहंहंति शत्रून् मारयति। भयेचिद्भीतिहेतौ युद्धे सुक्षितं सुधसं
स्थनिवासस्थैर्यं धारयति तन्नुपालयति तावद्वज्रिणो वज्रधायुधवतोस्य ब्रह्मणस्पतेर्महाधने प्रभूतधनमित्ते युद्धे वर्तयिता अन्यः नास्ति
स्वयमेव प्रवर्तत इत्यर्थः। महाधन इति संग्रामनाम महाधने समीप इति तन्नामसु पाठात॥ तथा न तरुता तरिता धनस्य क
र्ताऽन्यः कोपि नास्ति। तथा चार्भे स्वल्पेपि युद्धेप्यन्यः प्रवर्तयिता नास्ति। पृंचीत। पृचीसंपर्के। लिङि रुधादित्वाच्छ्नम् श्नसोरल्लोपः

त्याकारलोपः। प्रत्ययस्वरः। क्षत्रं। क्षणोतेर्वा त्रायतेर्वा हंतेर्हिंसाकर्मण इति बाहुलकात् मुन्प्रत्ययः। ब्रूहि यक्षाण्यं वाच्यस्य ष्टनादिरूपविभाषेति प्रथमायाः लिङ् विभक्तेर्न घातप्रतिषेधः।
हंतीत्यत्र चादिलोपे विभाषेति परत्वान्निहन्यते। सुक्षितिं। शोभना क्षितिः मन्क्तिन्व्याख्यानेति पूर्वपदांतोदात्तत्वं। वर्ता वर्तते र्ण्यंतात् तृन्। आत्मानुशासनस्योत्
त्य वा दि भावः। तरुता। तृप्लवनतरणयोः। ग्रसितस्कभितेत्यादिना तृ उपधा मोनिपातितः। चितइत्यंतोदात्तत्वं। महाधने महच्च तद्धनं च महाधनं। आन्म
हतः इत्यात्वं तेन महत्वं तदनुभूतः संग्रामोलक्ष्यते। अर्भेकृताः। अर्तेर्गत्यर्थात् भन्निति भन्प्रत्ययः निस्वरादुदात्तत्वं॥ ॥ इति प्रथमस्य तृतीये एकविंशो व
र्गः॥ ॥ इमा गिर इति षडृचं सप्तमं सूक्तं। अनुक्रमणं। इमा गिर इति षट् वरुणमित्रार्यम्णाम ध्ये नेत्य आदित्येभ्यो गायत्रं ह्रीति। घोरपुत्रः कूर्मऋषिः उदमा
दीनि त्रीणि मक्तानि गायत्राणि आद्यंतमोल्ल च यो वरुण मित्रार्यम्णो देवताः मध्यमस्त्य उपस्यंथार्थस्य आदित्यादेवताः गतविनियोगः॥ ॥ प्रथमा
मृचमाह॥ इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि॥ शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः॥ वृणातु मित्रो अर्यमा॥ न चितमप्यते जन॥ प्रचेतसः प्रकृष्टज्ञानयुक्ता वरुणादयो देवाय यजमानं रक्षंति सततो यज्ञमा
नानपि चितः क्षिप्रमेव रक्ष्यते। रभ्यति। उपगतिरूपतिः। प्रचेतसः प्रपूर्वः चेता यपो बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। न चित कश्चित्तु घत्यादिना दीर्घः॥
रभ्यते। रभु रभ। व्यत्ययेन श्येन आत्मनेपदं च॥ ॥ द्वितीयामृचमाह॥ यं बाहुतेव पिप्रति पांति मर्त्यं रिषः॥ अरिष्टः सर्व एधते॥ यं यजमानं पिपति
वरुणादयो देवा धनैः पूरयंति। तत्र दृष्टांतमाह बाहुतेव स्वकीय बाहुवर्गोपेक्षितं धनमात्मीय यथा पूरयति। तद्वत्। तथा यं मर्त्यं मनुष्यं यजमानं
रिषो हिंसकात् पांति रक्षंति स सर्वो यजमानः अरिष्टः केनाप्यहिंसितः सन् एधते वर्धते। बाहुता बाहुत्वं भाव चोक्तिनानेन ज्ञानेनबाहव त्तरार्थ
याऽऽश्रयंते। यद्वा सम हार्थे तल प्रत्ययो द्रष्टव्यः लितीति प्रत्ययात् पूर्वस्योदात्तत्वं। पिप्रति। पृ पालनपूरणयोः। जुहोत्यादित्वात् श्लुः। अ
र्तिपिपर्त्योश्चेत्यभ्यासस्येत्त्वं। अभ्यस्तानामादिरित्याद्युदात्तत्वं। पांति। तिङ्परात्वात्याद्युदात्तत्वं निघाताभावः। रिषः। रिषहिंसायां क्वि
प् चेति क्विप्॥ सावेकाचइति विभक्तेरुदात्तत्वं॥ अरिष्टः। रिषहिंसायां एकाच इतीट प्रतिषेधः। ष्टुत्वं नापत्वं। नञ्समासे अव्ययपूर्वपदप्रकृति
स्वरत्वं॥ ॥ तृतीयामृचमाह॥ विदुर्गाविद्विषः पुरो घ्नंति राजान एषां॥ नयंति दुरिता तिरः॥ राजानो वरुणादयः एषां स्वकीययजमानानां पुरः
पुरस्तात् दुर्गा दुर्गाणि शत्रुनगराणि विघ्नंति विशेषेण नाशयंति। तथा द्विषः शत्रूनपि विघ्नंति तथा दुरितानि यजमानसंबंधीनि दुरिता
नि तिरो नयंति विनाशं प्रापयंति। दुर्गाः दुःसुखेन गम्यंते इति दुर्गाणि। सुदुरोरधिकरणे इति गमेर्डप्रत्ययः। शेश्छंदसि बहुलमिति शेर्लोपः पुरः
कालवाचिनः पूर्वशब्दात् सप्तम्यर्थे पूर्वाधारावराणामिति असिप्रत्ययः तत्संनियोगेन पूर्वशब्दस्य पुरादेशः प्रत्ययस्वरः घ्नंति हनलि
टि अदादित्वाच्छपो लुक् गमहनेत्यादिना उपधालोपः। हो हंतेरिति घत्वं। अंतादेशस्य उपदेशावचनाद्युदात्तत्वं। पादादित्वान्न निघातः॥ ॥ चतु
र्थीमृचमाह॥ सुगः पंथा अनृक्षर आदित्यास ऋतं यते॥ नात्राव खादो अस्ति वः॥ हे आदित्यासः ऋतं यज्ञं यते गच्छते भवत्समीपाय पंथा मार्गः
सुगः सुखेन गंतुं शक्यः। अनृक्षरः कंटकरहितश्च अत्रास्मिन्मार्गे वो युष्माकं अवखादः। अवमंतव्यः स्वादो जुगुप्सितः किंचिदपि नास्ति। तस्मादिहा
गंतव्यमित्यर्थः। सुगः सुदुरोरधिकरणे इति गमेर्डप्रत्ययः॥ पंथा पथिमथः सर्वनामस्थान इत्याद्युदात्तत्वं॥ अनृक्षरः ऋक्षी गतौ ऋक्षितिगच्छति
इत्याकाराः ऋक्षकाः तत्र अपिभ्यां क्सरन्निति क्सरप्रत्ययः। क्वित्वाद्गुणाभावः। रुत्वं। यास्त्वस्मा ह्यक्षरः कंटकः ऋच्छतेरिति निवियंते ऋक्षरा अस्मिन्नि
त्यनृक्षरः नञ् सुभ्यामित्युत्तरपदांतोदात्तत्वं। आदित्यासः अदितेः पुत्राः आदित्यादित्यादित्यादिना ण्यप्रत्ययः आज्जसेरसुक्। आमंत्रितायु

भा०प्र० दात्तत्वं याददित्वात्पूर्वपदप्रकृतिस्वराभावः ॥ यन्तः इण् गतौ । ऋदः शतृ अदादित्वाच्छपो लुक् । इणो यणिति यणादेशः । शतुरनुम इति विभक्तेरुदात्तत्वं । अवृकादः ॥
वृकादानभक्षणे । भावे घञ् अवृगतः स्वादिभ्यः थाथादिनोत्तरपदान्तोदात्तत्वं ॥ ॥ पंचमीमृचमाह ॥ यं यज्ञं नयथा नर आदित्या ऋजुना पथा ॥ प्र वः स
१० धीतये नशत् ॥ हे नरो नेतार आदित्या यं यज्ञं ऋजुना पथा अविकलेन मार्गेण नयथ प्रापयथ स यज्ञः वो धीतये युष्माकं पानाय उपभोगाय
प्रणशत् प्राप्नोतु ॥ नयथ अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । यद्वृत्तयोगान्निघातः । अन्येषामपि दृश्यत इति संहितायां दीर्घत्वं ॥
पथा तृतीयैकवचने भस्य टेर्लोप इति टिलोपः । अनुदात्तस्य च यत्रोदात्तलोप इति विभक्तेरुदात्तत्वं । धीयते धेट् पाने ॥ आदेच उपदेशेऽशिति आत्वं क्तिचक्तौ च संज्ञा
यामिति क्तिच् । नशत् नशतिर्व्याप्त्यर्थः । लेट्यडागमः । इतश्च लोप इतीकारलोपः । [अनुदात्तस्य च यत्रोदात्तलोप इति विभक्तेरुदात्तत्वं । धीयते धेट् पाने ॥]
॥ इति प्रथमस्य तृतीये द्वाविंशो वर्गः ॥ ॥ षष्ठीमृचमाह ॥ स रत्नं मर्त्यो वसु विश्वं तोकमुत त्मना ॥ अच्छा गच्छत्यस्तृतः ॥ हे आदित्याः भवद्भिर
नुगृहीतो मर्त्यो मनुष्यो यजमानः अस्तृतः केनाप्यहिंसितः सन् रत्नं रमणीयं विश्वं वसु सर्वं धनं अच्छ आभिमुख्येन गच्छति प्राप्नोति । उत अपि च त्मना
आत्मना स्वयमेव तोकं अपत्यं गच्छति । त्मनामंत्रेष्वाङ्यादेरात्मन इति अकारलोपः । अच्छेति निपातस्य दीर्घत्वं । अस्तृतः स्तृञ् हिंसायां नञ्समासः । अव्यय
पूर्वपदप्रकृतिस्वरत्वं ॥ ॥ सप्तमीमृचमाह ॥ कथा राधाम सखायः स्तोमं मित्रस्यार्यम्णः ॥ महि प्सरो वरुणस्य ॥ हे सखायः समिभूता ऋत्विजः मित्रादीनां
त्रयाणां महिमहत् प्सरो रूपं अनल्पं रूपं स्तोमं स्तोत्रं कथा केन प्रकारेण राधाम साधयाम । कथा था हेतौ च छंदसीति किंशब्दात्प्रकारवचने थाल्प्रत्ययः
अविभक्तिरिति विभक्तिसंज्ञायां किमः क इति कादेशः । प्रत्ययस्वरः । राधाम राध साध संसिद्धौ । लेटि बहुलं छंदसीति विकरणस्य लुक् । तिङ्ङतिङ इति नि
घातः । स्तोमं स्तु स्तुतौ । अर्तिस्तुसुहु इत्यादिना भावे मन् नित्वादाद्युदात्तत्वं ॥ अर्यम्णः षष्ठ्येकवचने अल्लोपोऽन इत्यकारलोपे उदात्तनिवृत्तिस्वरे
ण विभक्तेरुदात्तत्वं । महि मह पूजायां । औणादिक इप्रत्ययः । प्सरः प्सा भक्षणे प्साति भक्षयतीति प्सरो रूपं ॥ औणादिको असुन्प्रत्ययः ॥ ॥
अष्टमीमृचमाह ॥ मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तं ॥ सुम्नैरिद्व आ विवासे ॥ हे मित्रादयो देवाः देवयन्तं देवान् कामयमानं यजमानं यः ह
न्तुं हन्ति घ्नन्तं ताडयन्तं शत्रुं युष्मभ्यं मा प्रति वोचे दुरुक्तवचनानि त्वा अहं न कथयामि । तथा यजमानं यः शत्रुः शपति तं अभिशापं मा प्रति वो
चे भवद्भ्यो दूरे विचार्य अशिक्षणीय इत्यर्थः ॥ अहं तु सुम्नैरित् धनैरेव वो युष्मान् आ विवासे सर्वतः परिचरामि । घ्नन्तं हन्तीति घ्नन् । गमहनेत्यादिना
उपधालोपः । हो हन्तेरिति कुत्वं प्रत्ययस्वरः । शपन्तं शप आक्रोशे । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः ॥ वोचे । ब्रूञ् व्यक्तायां वाचि माङ्यो
लुङि ब्रुवो वचिरिति वचिः अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः । वच उमित्युमागमः । न माङ्योग इत्यडभावः । देवयन्तं सुप आत्मनः क्यच् । न च्छंदस्य
पुत्रस्येति ईत्वप्रतिषेधः । सुम्नैः स्म्ना अभ्यासे सुम्नायते अभ्यस्यते इति सुम्नं । अतश्चोपसर्गे इति प्रत्ययः । आतो लोप इटि चेति साकारलोपः ।
विवासतिः परिचरणकर्मा ॥ ॥ नवमीमृचमाह ॥ चतुरश्चिद्ददमानाद्बिभीयादा निधातोः ॥ न दुरुक्ताय स्पृहयेत् ॥ घ्नन्तं शपन्तं च मा प्रति वोचे
इति यदुक्तं तदुपपादयति । न दुरुक्ताय स्पृहयेत् । दुरुक्तं वक्तुं न कामयेत किंतु दुरुक्ताद्बिभीयात् । तत्र दृष्टांतमाह चतुरश्चिदि १०
त्युपमार्थे वर्तते अक्षान् कितवः । चतुरः चतुःसंख्याकान् कपर्दान् ददमानात् ददतो हस्ते धारयतः पुरुषात् आ निधा
तोः कपर्दकनिपातपर्यंतं बिभीयात् । अस्य पातो भविष्यतीति अन्योऽभीतिं प्राप्नुयात् ॥ अत्र यथा भयं तथा दुरुक्ताद्भयमिति धर्मतः

स्येन अस्मादहं घ्नन्तं शपन्तं मा प्रति वोचे इत्यभिप्रायः ॥ अत्र निरुक्तं । चतुरः अक्षान् धास्यत इति तद्यथा कितवाद्बिभीयादेवमेव दुरुक्ताद्बिभीयान्न दुरुक्ताय 193/1924
स्पृहयेदिति । चतुरः उत्तरशतीति विभक्तेः पूर्वस्योदात्तत्वं ॥ ददमानात् ददाने । अत्र धारणार्थः । पेञः पित्वादनुदात्तत्वम् । उपदेशाल्लसार्वधा
तुकानुदात्तत्वे शपि अनुदात्तः धातुस्वरः शिष्यते । बिभीयात् ञिभी भये । लिङि जुहोत्यादित्वाच्छपः श्लुः । यासुट उदात्तत्वं पादादित्वान्निघा
ताभावः । निधातोः निपूर्वाद्धातेः सितनिगमीत्यादिना भावे तुन्प्रत्ययेनाद्युदात्तत्वं । तादौ च निति गतिस्वरेण भवति । अतएवेति पर्युदासत्वा
त् दुरुक्ताय स्पृहेरीप्सित इति संप्रदानसंज्ञायां चतुर्थी संप्रदाने इति चतुर्थी । स्पृहयेत् । स्पृह ईप्सायां चुरादिरदंतः ॥ अतोलोपस्य स्थानिव
द्भावाल्लघूपधगुणाभावः ॥ ॥ इति प्रथमस्य तृतीये त्रयोविंशो वर्गः ॥ ॥ संपूषन्निति दशर्चं सप्तमं सूक्तं काण्वं गायत्रं पूषदेवताकं । संपूष
न्नापो दशेति अनुक्रांतं स्मार्तमिदं महतमध्वानमप्यनिर्देशं जपेत । संपूषन्नध्वनस्तिरेति महांतमध्वानमप्येनं प्रतिभयं वेति सू
चितत्वात् । तत्र जप विनियोगोऽनुवर्तते ॥ ॥ तत्र प्रथमामृचमाह ॥ सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात् ॥ सक्ष्वा देव प्र णस्पुरः ॥ हे पूषन् जगत्पो
षक पृथिव्यभिमानिदेव अध्वनो मार्गान् संतिर अस्मान् अभिलक्ष्य सम्यक् प्रापय । अंहो विघ्नहेतुं पापं वितर विनाशय प्रजापतेः विमु
चो नपात् । विमोचस्य पुत्र नपादिति पुत्रनामसु पाठात् । पुत्रनामसु पाठात् । श्रुत्यंतरेऽपि पृथिवीति तल्लक्ष्म्युत्पत्तिः श्रूयते । त
था च बृहदारण्यकं पृथिव्याः श्रूयते । तद्यदपां शर आसीत्तत्समहन्यत सा पृथिव्यभवदिति मघस्य जलधारस्य उदकपुत्र एवमघपुत्रो भव
ति । न च पृथिव्या मघपुत्रत्वे पूष्णः किमायातमिति वाच्यं । पृथिव्या एव पूषत्वात् । तथा च श्रुत्यंतरे कृष्णचिन्मंत्रस्य ब्राह्मणमेवमाम्नायते ।
पूषाध्वनः पात्वित्याहेयं वै पूषेति तन्निर्वचनं चान्यत्रैवमाम्नायते । इयं वै पूषेयं हीदं सर्वं पुष्यतीति यदिदं किंचेति । हे देव पूषन् नः पुरः अस्माकं
पुरतः प्र सक्ष्व । प्रसक्तो भव पुरतो गच्छेत्यर्थः ॥ विमुचो नपात् उदकं विमुंचतीति विमुक् मेघः । क्विप् चेति क्विप् । न पातयति कुलमिति नपा
त् पुत्रः । नभ्राण्नपादिति नञः प्रकृतिभावः । नपात् आमंत्रितस्येति पराङ्गवद्भावात् । षाष्ठ्यामंत्रितसमुदायस्याष्ट
मिकं सर्वानुदात्तत्वं । सक्ष्व षच समवाये । अनुदात्तेत्वादात्मनेपदं । लोटि बहुलं छंदसीति शपो लुक् । तास्यनुदात्तेदिति लसार्वधातुकानुदात्तत्वे धातु
स्वरः ॥ प्रणः उपसर्गाद्बहुलमिति नसो णत्वं । पुरः उक्तं ॥ ॥ द्वितीयामृचमाह ॥ यो नः पूषन्नघो वृको दुःशेव आदिदेशति ॥ अप स्म तं पथो जहि ॥
हे पूषन् यः प्रतिपक्षी नः अस्मान् आदिदेशति अनेन मार्गेण न गंतव्यमित्येवमाज्ञापयति कीदृशः अघः आहंता वृकः अस्मदीयधनस्यादाता । अ
पहर्तेत्यर्थः । दुःशेवः सेवितुं दुःशकः दुःखेन सेवितुं शक्यः तादृशं प्रतिपक्षिणं पथो मार्गात् अप जहि स्म अवश्यम् अपाकुरु । वृकः वृक आदाने । वृ
कत इति वृकः । इगुपधलक्षणः कः । वृकादित्वादाद्युदात्तत्वं । दुःशेवः दुष्टं शेवं यस्यासौ दुःशेवः परादिश्छंदसि बहुलमिति उत्तरपदाद्युदात्तत्वम् ।
यद्वा दुःखेन सेव्यत इति दुःशेवः वर्णव्यत्ययेन सकारस्य शकारः । ईषद्दुःसुष्विति खलि लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं । कृदुत्तरपदप्रकृतिस्व
रत्वम् । आदिदेशति दिश अतिसर्जने । लेटोऽडाटावित्यडागमः । बहुलं छंदसीति शपः श्लुः । बहुलं छंदसीति वचनात् नाभ्यस्तस्याचीति लघूप
धगुणप्रतिषेधाभावः । पथः उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं ॥ ॥ तृतीयामृचमाह ॥ अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितं ॥ दूरमधि
स्रुतेरज ॥ एतान् हे पूषन् पूर्वोक्तगुणयुक्तं स्रुतेर्मार्गादधि दूरं अत्यंतदूरदेशं प्रति अपाज अपगमय । कीदृशं परिपन्थिनं मार्गप्रतिबंधकं मु

भा॰प्र॰ षीवाणं हुरश्चितं तस्कररूपं मुषीवा इति तस्करस्य नाम मुषीवान् वनिप्रत्ययः इति तं नाम सकृत्पाठात्। दुरश्चितं कौटिल्यानां संचेतारं परिपंथिनं छेदसि परि
पंथि परिपरिणो पर्यवस्थातरीति ऊत्रावभिधेय इति प्रत्ययांतो निपातितः। मुषीवाणं। मुष स्तेये मोषणं मुषिः औणादिको भावे इन्प्रत्ययः मुषि
९८ वनति संभजत इति मुषीवा वन षण संभक्तौ। अन्येभ्योपि दृश्यंत इति विच्प्रत्ययः। सर्वनामस्थाने चासंबुद्धाविति दीर्घः। अन्येषामपि दृश्यत इ
ति पूर्वपदस्य दीर्घत्वं। हुरश्चितं हूर्छा कौटिल्ये। संपदादिलक्षणो भावे क्विप्। राल्लोप इति छकारलोपः। हुरश्चिनोतीति हुरश्चित् चिञ् चयने। क्विपि तु
गागमः। तत्पुरुषे कृति बहुलमिति अलुक्। कृदुत्तरपदप्रकृतिस्वरत्वं। घ्नतः। स्कगतानि नक्कौ च संज्ञायामिति निचिन इत्यंतोदात्तत्वं। अज्ञभ
तु गतिश्च पणयोः॥ ॥चतुर्थीमृचमाह॥ त्वं तस्य द्वयाविनोऽघशंसस्य कस्यचित्। पदाभि तिष्ठ तपुषिं॥ हे पूषन् त्वं तस्य चोरस्य तपुषिं परसंताप
कं देहं पदाभि तिष्ठ भवदीयेन पादेनाक्रम्य तिष्ठ। द्वयाविनः प्रत्यक्षापहारः परोक्षापहारश्चेति यत्र द्वयं तद्युक्तस्य अघशंसस्य अ
स्माकं घातिशंसं मंतः। अघशंस इति स्तेननाम च निघंटुः अघशंसः वृकः इति तं नाम सकृत्पाठात्। कस्यचित् अनिर्दिष्टस्वरूपस्य कस्यापि द्वयावि
नः। द्वयमस्यास्तीति द्वयावी। बहुलं छंदसीति मत्वर्थे विनिः। अन्येषामपि दृश्यत इति दीर्घत्वं। अघशंसस्य अघं पापं शंसो मनस्यभिलाषो य
स्य सोऽयमघशंसः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। तपुषिं तापयत्यनेनान्यमिति तपुषिः। औणादिक उषिन्प्रत्ययः बहुलवचनादिकारस्य नेत्संज्ञा
नित्वादाद्युदात्तत्वं॥ ॥पंचमीमृचमाह॥ ॥आ तत्ते दस्र मंतुमः पूषन्नवो वृणीमहे॥ येन पितॄनचोदयः॥ हे मंतुमः ज्ञानवन् दस्र दर्शनीय पञाः
वेर्युपक्षयकारिन् तत्त्वदीयं तादृशं रक्षणं आ वृणीमहे सर्वतः प्रार्थयामहे॥ येन रक्षणेन पितॄन् अंगिरःप्रभृतीन् पितॄन् इदानीं अचोदयः प्रेरितवा
नसि॥ तद्रक्षणमिति पूर्वत्रान्वयः। दस्र दसि दंसनदर्शनयोः। स्फायितंचीत्यादिना रक् आगमानुशासनस्यानित्यत्वान्नुमभावः यद्वा द
सुः उपक्षये इत्यस्मादंतर्भावितण्यर्थात् पूर्ववद्रक्। मंतुमः मन ज्ञाने॥ कमिमनिजनीत्यादिना भावे तुन्प्रत्ययः। मंतुर्ज्ञानमस्यास्तीति मं
तुमान्। संबुद्धौ मतुवसो रुरिति रुत्वं॥ अचोदयः चुद प्रसंचोदने ण्यंतः॥ ॥इति प्रथमस्य तृतीये चतुर्विंशो वर्गः॥ षष्ठीमृचमाह॥ ॥
अधा नो विश्वसौभग हिरण्यवाशीमत्तम॥ धनानि सुषणा कृधि॥ ॥हे विश्वसौभग कृत्स्नधनयुक्त यद्वा कृत्स्नसौभाग्ययुक्त हिरण्यवाशी
मत्तम॥ अतिशयेन सुवर्णमयायुधवन् पूषन् अध पूर्वोक्तस्मादीयप्रार्थनानंतरं नोऽस्माकं धनानि सुवर्णमणिमुक्तादीनि सुषणा सु
प्रदानयुक्तानि कृधि कुरु॥ अध अथशब्दे धत्वं छांदसं निपातस्य चेति संहितायां दीर्घत्वं॥ विश्वसौभग सुभगानां कर्म सौभगं उत्पद्यादिषु पाठा
दण् हृद्भगसिंध्वंते पूर्वपदस्य चेत्युत्तरपदवृद्धौ प्राप्तायां सत्यां सर्वविधीनां छंदसि विकल्पितत्वादुत्तरपदवृद्धिर्न भवतीति तावु
क्तं। विश्वानि सौभगानि यस्यासौ विश्वसौभगः॥ आमंत्रितनिघातः। हिरण्यवाशीति तु एषामस्तीति हिरण्यवाशीमंतः अतिशयेनाहि
रण्यवाशीमान् हिरण्यवाशीमत्तम॥ आमंत्रितनिघातः। सुषणा॥ वन षण संभक्तौ सुखेन संभज्यंत इति सुषणानि ईषद्दुःसुषु
तिखलु आश्चर्यं छंदसीति नलोपः लितीति प्रत्ययात्पूर्वस्योदात्तत्वं॥ कृदुत्तरपदप्रकृतिस्वरत्वम्॥ कृधि। डुकृञ् करणे। श्रुशृणु। पृकृवृभ्यश्छं ९८
दसीति हेर्धिरादेशः। बहुलं छंदसीति विकरणस्य लुक्॥ ॥सप्तमीमृचमाह॥ अति नः सश्चतो नय सुगा नः सुपथा कृणु॥ पूषन्निह क्र
तुं विदः॥ सश्चतः अस्मद्बाधनाय प्राप्नुवतः शत्रून् अति अस्मानतिक्रम्य नय अन्यत्र प्रापय। नोऽस्मान् सुगा सुगमानि सुखेन गंतुं शक्यानि सुपथा

शोभनमार्गेण कृणु॥ गंतव्य। हे पूषन् इहाध्वनि क्रतुं प्रज्ञानं अस्मद्रक्षणरूपं विदो जानीहि॥ सश्चतः। षश्च गतौ॥ इत्यत्र सश्चिमप्येके पठंतीति धा 195
तुः वनानुक्तं। अस्मात् लटः शतृ बहुलं छंदसीति शपो लुक्। प्रत्ययस्वरेणांतोदात्तत्वे प्राप्ते नुमडिति विभक्त्युदात्तत्वाभावश्छांदसः। सुगा छंदस्यत्र 1924
सुगाः सुखारधिकरण इति ड प्रत्ययः। सुपां सुलुगिति विभक्तेर्याजादेशः आकारः। सुपथा। शोभनेन पथा। न पूजनादिति समासांतप्रतिषे
धः। पथादिः छंदसि बहुव्रीहाविति वचनात्॥ कृणु। कृवि हिंसाकरणयोः। धिन्विकृण्व्योरच्चेत्यु प्रत्ययः। उतश्च प्रत्ययादिति हेर्लुक्। विदः वि
द ज्ञाने लेट्यडागमः। इतश्च लोप इतीकारलोपः॥ ॥अष्टमीमृचमाह॥ अभि सूयवसं नय न नवज्वारो अध्वने॥ पूषन्निह क्रतुं विदः॥
॥ हे पूषन् सूयवसं शोभमानतृणोपलक्षितसर्वौषधियुक्तं देशमभिनय अस्मानभितः प्रापय॥ अध्वने मार्गाय नवज्वारो नूत
नः संतापो न भवतीति शेषः मार्गगच्छतामस्माकं इदानीतन इः कोपि मा भूदित्यर्थः। गतार्थमन्यत्। सूयवसं शोभनं यवसं यस्मिन्देश
स सूयवसो देशः। निपातस्य चेति पूर्वपदस्य दीर्घत्वं। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं॥ क्वाहित्वाद्बहुव्रीः नवज्वारः ज्वरा
गे। भावे घञ्। नवश्चासौ ज्वारश्च नवज्वारः। थाथादिनोत्तरपदांतोदात्तत्वं॥ ॥नवमीमृचमाह॥ ॥शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युद
रं॥ पूषन्निह क्रतुं विदः॥ हे पूषन् शग्धि अस्माननुग्रहीतुं शक्तो भव॥ पूर्धि अस्मद्गृहं धनेन पूरय किंच प्रयंसि अन्यदप्यपेक्षितं वस्तु प्रयच्छ शिशीहि
अस्मान् सर्वपुमर्थतीक्ष्णीकुरु। तेजस्विनः कुर्वित्यर्थः। उदरमस्मदीयं प्रासि प्रास्यान्नेन सोमरसेन वा पूरय। अन्यत्पूर्ववत्। शग्धि शक्ऌ शक्तौ॥ छ
दसिः बहुलं छंदसीति विकरणस्य लुक्। हुझल्भ्यो हेर्धिरादेशः हेरपित्वात्। प्रत्ययस्वरेणोदात्तत्वं। पूर्धि। पृ पालनपूरणयोः। श्रुशृणुपृकृवृभ्यः
छंदसीति हेर्धिरादेशः। पूर्ववद्विकरणस्य लुक्। उदोष्ठ्यपूर्वस्येत्युत्वं। हलि चेति दीर्घः तिङ्परत्वान्निघाताभावः। यंसि। यम उपरमे। लोडर्थे लट् सिप्
पूर्ववद्विकरणस्य लुक् निघातः शिशीहि। शो तनूकरणे। कोटि बहुलं छंदसीति अभ्यासस्येत्वं ई हल्यघोरितीत्वं प्रत्ययस्वरः प्रासि प्र पूरणे। अ
दादित्वाच्छपो लुक्। सिपः पित्त्वादनुदात्तत्वं धातुस्वरः॥ ॥दशमीमृचमाह॥ ॥न पूषणं मेथामसि सूक्तैरभि गृणीमसि॥ वसूनि दस्ममीमहे॥
सर्वं त्यक्त्वा मः दस्मं दर्शनीयं पूषणं प्रति वसूनि धनानि ईमहे याचामहे॥ मेथामसि। मेथृ मेधाहिंसनयोः। लटि इदंतो मसि इति मस इकारागम
मः सूक्तैः सुष्ठु उच्यंते देवताः प्रकाश्यंते इति सूक्तानि क्तो च संज्ञायामिति कर्तरि क्तः वचिस्वपीत्यादिना संप्रसारणं थाथादिस्वरः यद्वा कर्म
णि निष्ठा सूर्यमानाक इत्युत्तरपदांतोदात्तत्वं। गृणीमसि। गृ शब्दे प्वादीनां ह्रस्व इति ह्रस्वत्वं। इदंतो मसि दस्मं इषियुधींधिदा॥ धूसूभ्याम
गिति मक्प्रत्ययः॥ ॥इति प्रथमस्य तृतीये पंचविंशो वर्गः॥ ॥कद्रुद्रायेति नवर्चं अष्टमं सूक्तं॥ अत्रानुक्रम्यते॥ कद्रुद्राय नव रौद्रं तृतीया
मैत्रावरुणी चांत्यस्तृचः सौम्यांत्यानुष्टुबिति। घोरपुत्रः कण्व ऋषिः गायत्री छंदः यास्तु प्रजा इत्यंत्यानुष्टुप् रुद्रो देवता यथा नो मित्र इत्येषा मित्रा
वरुणदेवताका च। अस्मे सोमेत्यादिरंत्यस्तृचः सौम्यः एवं सर्वत्र रुद्रो देवता केषु कर्मसु अनेन सूक्तेन द्विगुपस्थानं कर्तव्यं। तथा च सूत्रितं।
कद्रुद्राय मा रुद्राय मा ते पितरिमा रुद्राय स्थिरधन्वन इति सर्वरुद्रयज्ञे पुच्छिरामुपस्थानमिति॥ ॥तत्र प्रथमामृचमाह॥ कद्रुद्राय प्रचेतसे मी
ढुष्टमाय तव्यसे॥ वोचेम शंतमं हृदे॥ कत् कदा रुद्राय एतन्नामकाय देवाय शंतमं अतिशयेन सुखकरं स्तोत्रं वोचेम पठेम॥ कीदृशाय प्र
चेतसे प्रकृष्टज्ञानयुक्ताय मीढुष्टमाय सेक्तृतमाय अभीष्टकामवर्षकायेत्यर्थः। तव्यसे। अतिशयेन प्रवृद्धाय। हृदे अस्मदीयहृदि
स्थायकृत कदा अंत्यलोपः छांदसः। रुद्राय रोदयति सर्वमंतकाल इति रुद्रः रोदेर्णिलुक् चेति रक्प्रत्ययः प्रचेतसे चिती संज्ञाने॥ प्रकृष्टं चे

भा॰ष॰ ततीति प्रवेताः गतिकारकयोरिति पूर्वपदप्रकृतिस्वरत्वं चेत्यसत्पूर्वपदप्रकृतिस्वरत्वं ॥ चमीढुष्टमीय अतिशयेन मीढ्वान् मीढुष्टमः । अश्वादसा
ढ्वान् मीढ्वांश्चेति क्वसुप्रत्ययांतो निपातितः । तमपि अयस्मयादित्वेन भत्वाद् वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं । व
९९ यस्संतवतिर्व्यर्थः सोढा धातुः अतिशयेन नवितातवीयान् । तुश्छंदसीति यसुन्प्रत्ययः । तुरिष्ठेमेयःस्विति तृलोपः । ईयसुनईकारलोपः श्रो
दसः निपातादि घवादात्तत्वं । वोचेम । वोचपरिभाषणे लिङ्यादिश्यङ् वच उमित्कमागमः यासुटः स्वरेण एकार उदात्तः ॥ हृदे । पद्दन्नित्यादिना हृदयश
ब्दस्य हृदादेशः ॥ अदिदमित्यादिविभक्तेरुदात्तत्वं ॥ ॥द्वितीयामृचमाह ॥ यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे ॥ यथा तोकाय रुद्रियं ॥ अ
दितिर्भूमिः नोस्माकं रुद्रियं रुद्रसंबंधि भेषजं यथा येन प्रकारेण सिध्यति करत् तथा करोतु ॥ किंच ॥ यथा येन प्रकारेण पश्वे अस्मदीयाश्वमहि
ष्यादिपशवे नृभ्यो अस्मदीयपुरुषेभ्यः विशेषेण गवे गोजातये हितं रुद्रियं सिध्यति तथा करोतु ॥ किंच ॥ तोकाय अस्मदीयपुत्राय रुद्रियं यथा सि
ध्यति तथा करोतु ॥ भेषजस्य रुद्रसंबंधित्वं मंत्रांतरे समाम्नातं यातेरुद्र शिवा तनूः शिवा विश्वाहभेषजी शिवा रुद्रस्य भेषजीति ॥ गवादिविषयभेष
जं चान्यत्र समाम्नातं भेषजं गवेश्वाय पुरुषाय भेषजमथो अस्मभ्यं भेषजं सुभेषजमिति ॥ करत् । डुकृञ्करणे । लेट्यडागमः । व्यत्ययेन शप् । यद्वा लेड्य
डागमः । इतश्च लोपः इतीकारलोपः । यद्वा लुङि कृमृदृरुहिभ्यश्छंदसीति च्लेरङादेशः । ऋदृशोङि गुण इति गुणः । आद्ययोः पक्षयोः प्रत्ययस्य पित्त्वाद
नुदात्तत्वे धातुस्वरः तृतीये न । यद्वृत्तयोगादनिघातः । पश्वे संज्ञापूर्वकस्य विधेरनित्यत्वात् घेर्ङितीति गुणाभावः । यथादेशः । नृभ्यः न चान्यतरस्यामि
ति विभक्त्युदात्तत्वाभावः । गवे । सावेकाच इति प्राप्तस्य विभक्त्युदात्तस्य न गोश्वन्साववर्णेति प्रतिषेधः । रुद्रियं रुद्राच्चातस्यमित्यर्थे घप्रत्ययः ॥ ॥
तृतीयामृचमाह ॥ यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति ॥ यथा विश्वे सजोषसः ॥ मित्रो वरुणश्च नोस्माकं यथा येन प्रकारेण चिकेतति अनुग्रहेण
जानाति । रुद्रोपि यथा चिकेतति । सजोषसः समानप्रीतयः विश्वे सर्वे देवाः यथा चिकेतंति तथा भवत्विति शेषः । यद्वा यथा उपमेयोपमानमंत्र द्वयस्य तथा
करद्वाचे मतिपूर्वत्वान्वयः ॥ चिकेतति । कित ज्ञाने । लेट्यडागमः ॥ अभ्यस्तस्याचि गुणनिषेधान भवति । बहुलं छंदसीति बहुलमितिवचनात्सार्व
धातुकत्वात् चाभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ सजोषसः । जुषी प्रीतिसेवनयोः समानं जुषंतीति सजोषसः । समानस्य छंदसीति भावः । असु
नोनित्वादुत्तरपदस्याद्युदात्तत्वं ॥ तदेव उत्तरपदप्रकृतिस्वरत्वं न शिष्यते ॥ ॥ चतुर्थीमृचमाह ॥ गाथपतिं मेधपतिं रुद्रं जलाषभेषजं ॥
तच्छंयोः सुम्नमीमहे ॥ रुद्रमभिलक्ष्य यद्धं यो बृहस्पतिपुत्रस्य संबंधि तत्प्रसिद्धं सर्वप्रजाभ्यो हितं सुम्नं सुखमीमहे याचामहे । कीदृशं रु
द्रं गाथपतिं स्तुतिपालकं मेधपतिं यज्ञपालकं जलाषभेषजं सुखरूपं वा दीप्तं यद्वा उदकरूपौषधोपेतं उदकं हि रुद्रेणाभिमंत्रितं सदौ
षधं भवति । गाथपतिः गाथतिवाङ्नाम गाथा गण इति तत्रनामसु पठितत्वात् । वाग्रूपायाः स्तुतेः पति गाथपतिः । कंगेरुकाद्व आदेच उत्यादयः ॥
उषिकुषिगार्तिभ्यस्थन्निति थन्प्रत्ययः निपातादिघवादात्तत्वं ॥ ग्रहीष्यतोः संज्ञायां छंदसोर्बहुलमिति पूर्वपदस्य ह्रस्वत्वं । पत्यावैश्वर्य इति पूर्वपदप्रकृ
तिस्वरं प्राप्तं मरुद्वृधादीनां छंदस्युपसंख्यानमिति पूर्वपदांतोदात्तत्वं । मेधपतिं पूर्ववत् । जलाषभेषजं जलं जनयतीति प्रादुर्भावं जायंत इति जलाः अप्य
प्रत्ययात् इति डप्रत्ययः । लष कांतौ । कांतिरभिलाषः भावे घञ् । जलानां लाषो यस्मिन् तज्जलाषं सुखं
लाषरूपं भेषजं यस्मिन् उदा सज्जनभेषजः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । शंयोः कंशंभ्यामिति मत्वार्थीयो युस्प्रत्ययः तितिनि

तिपदसंज्ञायां अनुस्वारपरसवर्णौ प्रत्ययस्वरः ॥ ॥ पंचमीमृचमाह ॥ यः शुक्र इव सूर्यो हिरण्यमिव रोचते ॥ श्रेष्ठो देवानां वसुः ॥ योरुद्रः सूर्य इव 197
शुक्रः सूर्यवद्दीप्तिमान् हिरण्यमिव रोचते यथा सर्वेषां प्राणिनां हिरण्यं प्रीतिकरं भवति तथा रुद्रोपि सच देवानां सर्वेषां मध्ये श्रेष्ठः वसुः 1924
निवासहेतुश्च रोचते । रुचिर्दीप्तावभिप्रीतौ च । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः ॥ श्रेष्ठः वसुः निवासहेतुश्च प्रशस्यतरः
प्रशस्यश्रः अजादि गुणि प्रशस्यस्य श्र इति श्रादेशः निपातादिघवादात्तत्वं । वसुः वासयति सर्वमिति वसुः । वस निवासे । अंतर्भावितण्यर्थात् शृस्व
स्निहीत्यादिना उप्रत्ययः नित्वादित्यनुवर्तमानेन आद्युदात्तत्वम् ॥ ॥ इति प्रथमस्य तृतीये षड्विंशो वर्गः ॥ ॥ आग्निमारते । शंनः करतीति
धाय्या अथस्ययथनमितिसं इस्मृतितं ॥ वैश्वानराय पृथुपाजसे शंनः करत्यर्वत इति ॥ तामेतां सप्तर्चषष्ठीमृचमाह ॥ ॥ शंनः करत्यर्व
ते सुगं मेषाय मेष्ये ॥ नृभ्यो नारिभ्यो गवे ॥ नोस्माकं संबंधिभ्यो अर्वादिभ्यः सुगं सुगम्यं शं सुखं करति देवः करोति । अर्वते अश्वाय अर्वन्
शब्दोश्वनाम अर्वा वाजीति तन्नामसु पाठात् ॥ मेषाय मेषजातीयपुरुषाय मेष्ये मेषजातीयस्त्रियै नृभ्यः पुरुषेभ्यः नारिभ्यः स्त्रीभ्यः गवे
गोजातये करोति । डुकृञ्करणे । व्यत्ययेन शप् अर्वते अर्तिगच्छतीत्यर्वा अन्येभ्योपि दृश्यंत इति वनिप् ॥ चतुर्थ्येकवचने । अर्वणस्त्रसावन
ञ इति नकारस्य तृ आदेशः वनिपः पित्वादनुदात्तत्वे धातुस्वरः ॥ मेषाय मिष स्पर्धायां पचाद्यच् देवसेनमेषादयः पचादिषु द्रष्टव्या इति वच
नात् । मेष्ये जातेरस्त्रीविषयादयोपधादिति ङीष्प्रत्ययस्वरः चतुर्थ्येकवचने आगमानुशासनस्यानित्यत्वादाडागमाभावः । उदात्तस्व
रितोर्यणः स्वरितोनुदात्तस्येति स्वरितत्वं ॥ नुदात्तयणा हस्वपूर्वादिति न भवति । सर्वे विधयः छंदसि विकल्प्यंत इति वचनात् ॥ नृभ्यः सावे
काच इति प्राप्तस्य विभक्त्युदात्तत्वस्य न चान्यतरस्यामिति प्रतिषेधः नारिभ्यः नरस्य नृनरयोर्वृद्धिश्चेति शार्ङ्गरवादिषु पाठात् ङीन्प्रत्य
यः नित्वादाद्युदात्तः गवे न गोश्वन्साववर्णेति विभक्त्युदात्तस्य प्रतिषेधः ॥ ॥ सप्तमीमृचमाह ॥ अस्मे सोम श्रियमधि नि धेहि शतस्य
नृणां ॥ महि श्रवस्तुविनृम्णं ॥ हे सोम देव नृणां पुरुषाणां शतस्य पर्याप्तां श्रियमस्मे अस्माकं अधि नि धेहि अधिक्येन स्थापय । तथा
महि महत् तुविनृम्णं प्रभूतबलयुक्तं श्रवोन्नं अधि नि धेहि । अस्मे अस्माकं सुपां सुलुगिति सप्तम्याः शे आदेशः । नृणां नृचेति दीर्घप्रतिषेधः
नामन्यतरस्यामिति नाम उदात्तत्वं महि इत्यादयोगताः ॥ ॥ अष्टमीमृचमाह ॥ मा नः सोमपरिबाधो मारातयो जुहुरंत ॥ आ न इंदो वाजे भ
ज ॥ सोमपरिबाधः सोमस्य परितो बाधकाः यागरहिताः नोस्मान्मा जुहुरंत माहिंसंतु तथा अरातयः शत्रवो मा जुहुरंत हे इंदो सोम वाजे
बलविषये अन्नविषये वा नोस्मान् आ भज सर्वतः सेवस्व । सोमपरिबाधः सोमं परिबाधंते येन तादृशाः क्विप् चेति क्विप् कृदुत्तरपदप्रकृति
स्वरत्वं ॥ अरातयः रा दाने । कृत्यल्युटो बहुलमिति बहुलवचनात्कर्तरि क्तिन् ॥ यद्वा क्तिच्क्तौ च संज्ञायामिति क्तिच् नञ्समास अव्ययपूर्व
पदप्रकृतिस्वरत्वं । जुहुरंत । ह्वृ प्रसह्यकरणे । व्यत्ययेनात्मनेपदं लङि जुहोत्यादित्वात् श्लुः बहुलं छंदसीति बहुलवचनादिकारस्या
युत्वं द्विर्भाव हलादिशेषः सर्वविधयः छंदसि विकल्प्यंत इति वचनात् हृदेभ्यस्तादित्वादादेशाभावः सति सात इत्यंतादेशः नमाङ्योग
इत्यडभावः ॥ ॥ नवमीमृचमाह ॥ ॥ यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य ॥ मूर्धा नाभा सोम वेन आभूषंतीः सोम वेदः ॥ ॥
हे सोम तव संबंधिन्यायाः प्रजाः संति स्तोत्रं वा कुर्वंति ताः मूर्धा शिरःस्थानीये स्वनाभा संनहनयुक्ते यज्ञगृहे वेनः कामयः कीदृशस्य

भा॰ष॰ ते अमृतस्य ते अमृतस्य मरणरहितस्य परस्मिन् धामन् तस्य। उत्तमे स्थाने प्राप्तस्य हे सोम आभूषंतीः सर्वतस्त्वामलंकुर्वतीः प्रजाः वेदुः
जानीहि। धामन् सुपां सुलुगिति सप्तम्या लुक्। नाभ्याण इवंधने न ह्यो भ्रश्वेति कर्मणि उन्प्रत्ययः। निवादाद्युदात्तत्वं। सुपां सुलुगि
१०० ति सप्तम्या डादेशः। वेनः। वेनतिः कांतिकर्मा। इदिसिम्य इगमः तिङ्ङतिङ इति निघातः। आभूषंतीः। भूष अलंकारे भौवादिकः श
पः पित्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण धातुस्वरः। समासे कृदुत्तरपदप्रकृतिस्वरत्वं। वेदः विद ज्ञाने लिङि सिप्यडागमः
॥ ॥ इति प्रथमस्य तृतीये सप्तविंशो वर्गः॥ ॥०॥ इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये अ
ष्टमोऽनुवाकः॥ ॥०॥ नवमेऽनुवाके सप्त सूक्तानि तत्राग्ने विवस्वदिति चतुर्दशर्चं प्रथमं सूक्तं। तत्रानुक्रमणिका। अग्ने पंचोना प्रस्क
ण्वः काण्व आग्नेयं तु प्रागाथमाद्यतृतीये त्वाद्यौ चाश्विप्युषसां चेति कण्वपुत्रः प्रस्कण्व ऋषिः। अत्र द्वितीया चतुर्थ्याद्या युजः सतो बृहत्यः प्रथमा तृ
तीयाद्या अयुजो बृहत्यः कृत्स्नस्य सूक्तस्याग्नेयमुत्तरं च आद्यर्चेऽश्विनौ उषा देवता केऽपि देवताः अनन्तरानुवाके आग्नेयकतो बार्हतं छंदसि
आश्विने शस्त्रे चेदं सूक्तं। अथ तस्या गत्रेति खंडे सूत्रितं। अग्ने विवस्वदुषसस्त्वस्याय स्तनीति। वाजपेय आग्निमारुत आद्यः प्रगाथोऽनु
रूपः। वाजपेयेन तिस्रः सूत्रितं। चित्रवतीषु चन स्तवीरन्नं तनश्विवर्ग्या ग्ने विवस्वदुषस इत्यग्निष्टोम साम्ना स्तोत्रियानुरूपाविति।
पर्यायस्युपाबाश्विनाद्याज्यस्यायमेव प्रगाथः स्तोत्रियः यदि पुर्यायान भियु छंदिति खंडे आश्विनायैक स्तोत्रियोऽग्ने विवस्वदुषस इति
सूत्रितं॥ ॥तत्र प्रथमामृचमाह॥ अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य। आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः॥ ॥हे अग्ने
त्वं उषसः उषो देवतायाः सकाशात् राधो धनं दाशुषे हविर्दत्तवते यजमानाय आवह आनीय प्रापय सोऽग्निर्विवस्वत् अमर्त्य मरण
रहित जातवेदः जातानां विद्वन्। तमेतं ज्ञात्वेयास्को व्याचष्टे जातवेदाः कस्माज्जातानि वेद जातानि चैनं विदुर्जाते जाते विद्यत इ
ति वा जातवित्तो वा जातधनो वा जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूननविंदत तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणं तं
स्मात् सर्वानृतून्पशवोऽग्निमभिसर्पंतीति चेति। कीदृशं राधः। विवस्वत् विविधं निवासोपेतं चित्रं नानाविधं। किंच। अद्यास्मिन्दिने उषर्बुधः उषः
काल प्रबुद्धान्देवान् आवह। विवस्वत् विवासनं विवः तद्युक्तं। वसति वा विविधं वासं न भावे न्यर्थात् संपादादिलक्षणो भावे क्विप्। तदस्यास्तीति मतु
प्। मादुपधायाश्चेति वत्वं। तसौ मत्वर्थ इति भत्वेन पदत्वाभावादुत्वाभावः। ह्रस्वादित्वादाद्युदात्तत्वं। राधः राध साध संसिद्धौ। राध्नोत्यनेनेति राधो
धनं करणे असुन् नित्वादाद्युदात्तत्वं। दाशुषे। दाशृ दाने। दाश्वान् साह्वानिति क्वसुप्रत्ययांतो निपातितः॥ चतुर्थ्येकवचने वसोः संप्रसारण
मिति संप्रसारणं शासिवसिघसीनां चेति षत्वं जातवेदः। जातानि वेत्तीति जातवेदः। गतिकारकोपपदात्कृदुत्तरपदप्रकृतिस्वरत्वं चेत्यसुन्। जातवेदः इति धनना
मजातं धनं यस्य स तादृशः। आमंत्रितनिघातः। वह। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। देवान्दीर्घादटि समानपाद इति संहितायां नकारस्य र
त्वं। आतोऽटि नित्यमिति सानुनासिक अकारः। उषर्बुधः। उषसि बुध्यंत इत्युषर्बुधः। बुध अवगमने क्विप् चेति क्विप्। सेर स्वाभावः छांदसः। कृदुत्तर
पदप्रकृतिस्वरत्वं॥ ॥द्वितीयामृचमाह॥ जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणां। सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृह १००
त्॥ हे अग्ने त्वं जुष्टः सर्वैः सेवितः इत्यर्थः। दूतः देवानां दूतः। हव्यवाहनः हविषां वोढा अध्वराणां यज्ञानां रथीः रथस्थानी

199
1924

यः। तथा च मंत्रांतरं ब्राह्मणेन व्याख्यातं। रथीरध्वराणामित्याह एष हि देवरथ इति। ब्राह्मणांतरं च। रथीरध्वराणामित्याह रथो ह वा एष भूतेभ्यो
देवेभ्यो हव्यं वहतीति। तादृशस्त्वमश्विभ्यां देवताभ्यां उषया देवतया च सजूः सहितो भूत्वा सुवीर्यं शोभनवीर्ययुक्तं बृहत् महत् श्रवोऽन्नं अस्मे ध
हि। अस्मास्वा प्रतिष्ठापय। जुषः। जुषी प्रीतिसेवनयोः। नित्यं मंत्रे इत्याद्युदात्तत्वं। असि। सिप्यादेशः। स्तोर्लोप इति सलोपः। हि चेति निघातप्रतिषेधः।
हव्यवाहनः हव्यं वहतीति। वहश्चेति ल्युट्। ल्युट्। ल्युट्। उदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। अग्ने पादादित्वादामंत्रितनिघाताभावः। रथीः
रथशब्दान्मत्वर्थिक ईकारप्रत्ययः। अध्वराणां ध्वरतिना स्येवित्तिवत् बहुव्रीहौ नञ् सुभ्यामित्युत्तरपदांतोदात्तत्वं। सजूः। सवोर्यवीर्योश्चेत्युत्तरपदा
द्युदात्तत्वं। अस्मे सुपां सुलुगिति सप्तम्याः शेआदेशः॥ ॥तृतीयामृचमाह॥ अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियं। धूमकेतुं भाऋजीकं व्यु
ष्टिषु यज्ञानामध्वरश्रियं॥ ॥अद्यास्मिन्दिने अग्निं वृणीमहे। कीदृशं दूतं देवानां हारं वसुं निवासहेतुं पुरुप्रियं बहूनां प्रियं धूमकेतुं धूमरूपध्वजयुक्तं
भाऋजीकं प्रसिद्धभासालंकृतं। भाऋजीकः प्रसिद्धभा इति यास्कवचनं। व्युष्टिषु उषःकालेषु यज्ञानां यजमानानां अध्वरश्रियं यागसेविनं। अद्येति निपातस्य
चेति दीर्घत्वं। पुरूणां प्रियः पुरुप्रियः समासस्येत्यंतोदात्तत्वं। धूमकेतुं उपयुधीत्यादिना धूमशब्दो मक्प्रत्ययांतोऽंतोदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वर
त्वं। भाऋजीकं ऋजगतिस्थानार्जनोपार्जनेषु ऋजेरीकान्प्रत्ययः किलस्यानुवर्तनान्न गुणाभावः। भासः प्रकाशस्य ऋजीकः प्रार्जयिता आयुदात्तप्र
कारेणाशिवोदासानां छंदस्युपसंख्यानमिति पूर्वपदाद्युदात्तत्वं। यद्वा भासोऽर्जनं यस्मिन् बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। व्युष्टिषु। उछी विवासे विवासोव
र्जनं। विशेषेणोच्छंत्यनयेति व्युष्टयः। उषःकालाः कर्मणि क्तिन् तितुत्रेत्यादिना इट्प्रतिषेधः। श्वश्वादिनांतत्वं। तादौ चेति पूर्वपदप्र
कृतिस्वरत्वं। यणादेशः। उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। अध्वरश्रियं अध्वरं श्रियत इत्यध्वरश्रीः क्विब्वचीत्यादिना क्विप्प्रत्ययः त
त्संनियोगेन संप्रसारणाभावः दीर्घश्च द्वितीयैकवचने अचि श्नुधात्वित्यादिना इयङादेशः॥ ॥चतुर्थीमृचमाह॥ श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं
जनाय दाशुषे। देवाँ अच्छा यातवे जातवेदसमग्निमीळे व्युष्टिषु॥ व्युष्टिषु उषःकालेषु देवान् इतरान्सर्वान्देवान् अच्छ अभिमुख्येन यातवे
गंतुं अग्निं देवमीळे स्तौमि। कीदृशं श्रेष्ठं अतिशयेन प्रशस्तं यविष्ठं युवतमं अतिथिं सततगमनशीलं स्वाहुतं सुष्ठु आसमंतात् होमाधिकर
णं दाशुषे हविर्दत्तवते जनाय यजमानाय जुष्टं प्रीतं जातवेदसं जातानां वेदितारं। यविष्ठं। युवन्शब्दादतिशायनिकः इष्ठन्प्रत्यये स्थूलदूरेत्यादिना यणादेः परस्य लोपः पूर्वस्य च गुणः भवाद्युदात्तः नित्वादाद्युदात्तत्वं। अतिथिं। अत सातत्यगमने। ऋतन्यंजीत्यादिना इथिन्प्रत्ययः नित्वादाद्युदात्तत्वं।
स्वाहुतं। हु दानादनयोः। आहूयते अस्मिन्निति आहुतः। सुः पूजायामिति सुशब्दस्य कर्मप्रवचनीयसंज्ञायां स्वती पूजायामिति समासः अव्यय
पूर्वपदप्रकृतिस्वरत्वं न च गतिकारकोपपदात्कृदुत्तरपदप्रकृतिस्वरत्वं। अस्य सुशब्दस्य गतिसंज्ञाया बाधितत्वात्॥ ॥पंचमीमृचमाह॥ स्तविष्यामि त्वाम
हं विश्वस्यामृत भोजन। अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन॥ हे अमृत मरणरहित विश्वस्य भोजन सर्वस्य जगतः पालक हव्य
वाहन हविषां वोढः मियेध्य यज्ञार्ह एवंविध हे अग्ने विश्वस्य त्रातारं सर्वस्य जगतो रक्षकं अमृतं मरणरहितं यजिष्ठं अतिशयेन यष्टारं त्वां
अहमनुस्तविष्यामि स्तविष्यामि स्तविष्यामि सुप्रत्ययत्वात्। व्यत्ययेन इडागमः। आगमानुदात्तत्वे प्रत्ययस्वरः। भोजन कर्मफलं भो
जयतीति भोजनः नंद्यादिलक्षणो ल्युः। त्रातारं त्रैङ् पालने। अदेच इत्यात्वं नविट्काच उपदेशादिति इट्प्रतिषेधः। अमृतं न जरममि

चमृता इत्यत्र परत्वादुदात्तत्वं । मियेध्य ईत्यागमः छांदसः यजिष्ठं येष्ठशब्दात् । नुष्टं दमीति इत्यन्त्यस्य नुरियमे यः स्थितिलोपः ॥ ॥ इति प्रथम
भा॰प्र॰ स्य नतीये द्वाविंशो वर्गः ॥ ॥ षष्ठीमृचमाह ॥ सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः ॥ प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनं ॥
१०१ हे यविष्ठ्य युवतमाग्ने त्वं गृणते स्तुवते यजमानार्थं सुशंसः सुष्ठु शंसनीयः मधुजिह्वः मादयितृज्वालः स्वाहुतः सुष्ठु अभिमुख्येन हुतः सन् बोधि
अस्मदभिप्रायं बुध्यस्व । किंच । प्रस्कण्वस्यैतन्नामकस्य कण्वपुत्रस्य महर्षेः प्रस्कण्वः कण्वपुत्रः कण्वप्रभव इति यास्कवचनात् ॥ तस्यजीवसे
जीवनार्थमायुः प्रतिरन् प्रकर्षेण वर्धयन् दैव्यं देवसंबंधिनं जनं नमस्य पूजय । सुशंसः सुतरां आ वध शंसनः शंसो यस्यासौ सुशंसः
। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदांतोदात्तत्वं । बोधि बुध अवगमने । लोटि हि बहुलं छंदसीति विकरणस्य लुक् । हु झल्भ्यो हेर्धिरिति हेर्धिरादेशः
। बाधिंचंदसीत्यपि तस्य विकल्पितत्वात् लघूपधगुणः । धातोरंत्यलोपः छांदसः । गृणते । गृ शब्दे । क्र्यादिभ्यः श्ना । श्नाभ्यस्तयोरात इत्या
कारलोपः । शतुरनुम इति विभक्तेरुदात्तत्वं । यविष्ठ्य गतं । प्रस्कण्वस्य प्रभृतिरस्यातिः कण्वादस्य प्रस्कण्वः प्रस्कण्वहरिश्चंद्राविति सुडागम
निपातितः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । प्रतिरन् प्र पूर्वस्तिरतिर्वर्धनार्थः नमस्य । नमो वरिवश्चित्रङः क्यजिति पूजार्थे क्यच् प्रत्ययस्वरः
। अन्येषामपि दृश्यत इति संहितायां दीर्घत्वं । दैव्यं । देवाद्यञञाविति तस्येदमित्यर्थे प्रा ॥ ग्दीव्यतीयो यञ्प्रत्ययः ॥ ॥ सप्तमीमृचमाह ॥ होतारं वि
श्ववेदसं सं हि त्वा विश इंधते ॥ स आ वह पुरुहूत प्रचेतसोऽग्ने देवाँ इह द्रवत् ॥ ॥ होतारं होमनिष्पादकं विश्ववेदसं सर्वज्ञं त्वामग्निं विशः प्रजाः सं
मिंधते हि सम्यग्दीपयंति खलु । हे पुरुहूत बहुभिराहूताग्ने सत्वं प्रचेतसः प्रकृष्टज्ञानयुक्तान्देवानिह कर्मणि द्रवत् क्षिप्रं आवह आभिमुख्ये
न प्रापय । द्रवदिति क्षिप्रनाम । द्रवत् । अंधुर्यमिति तन्नाम सु पाठात् । विश्ववेदसं विश्वानि वेत्तीति विश्ववेदाः । असुन्प्रत्ययः धातुस्वरः पूर्वपदांतो
दात्तत्वं । यद्वा वेद इति धननाम विश्वानि वेदांसि यस्यासौ विश्ववेदाः बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं । इंधते । ञिइंधी दीप्तौ । श्न
सोरल्लोप इत्याकारलोपः सत्ययस्वरः हि चेति निघातप्रतिषेधः ॥ ॥ अष्टमीमृचमाह ॥ सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षपः ॥ कण्वा
सस्त्वा सुतसोमास इंधते हव्यवाहं स्वध्वर ॥ हे स्वध्वर शोभनयागयुक्ताग्ने व्युष्टिषु उषः कालेषु सवितादीन्देवान् आवहेत्यनुवर्तते । स्वध्वरत्वा
द्धवनीयाग्नेः संबोधनं अग्निमिति हविषु द्रष्टव्यं देवतांतरमुच्यते सुत सोमासः अभिषुतसोमासः कण्वासो मेधाविनः ऋत्विजः हव्यवाहं हवि
षः प्रापकं आहवनीयं त्वां इंधते दीपयंति । व्युष्टिषु । उच्छी विवासावि वासो वर्जनं व्युष्यंते तमसा वर्ज्यंत इति व्युष्टिरुषः कालः । कर्मणि क्तिनितो
दात्तत्वं तिन्नतिगतः प्रकृतिस्वरत्वं । संहितायामुदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं । क्षपः क्षपति गच्छति नामज्ञसि आतो धातोरिति
आत इति योगविभागादाकारलोपः । सुतसोमासः सुतः सोमो यैरिति निष्ठांतस्य पूर्वनिपातः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । हव्यवाहं हव्यं वहती
ति हव्यवाट् वहश्चेति ण्विप्रत्ययः ॥ ॥ नवमीमृचमाह ॥ पतिर्ह्यध्वराणामग्ने दूतो विशामसि ॥ उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृ २०१
शः ॥ हे अग्ने विशां प्रजानां संबंधिनाम् अध्वराणां तेषां पतिः पालकः दूतोऽसि हि देवानां वार्ताहारो भवसि खलु । उषर्बुधः उषः कालप्रबु
धान् स्वर्दृशः सूर्यदर्शिनो देवान् अद्यास्मिन्दिने सोमपीतये सोमपानार्थं आवह आभिमुख्येन प्रापय । असि हि चेति निघातप्रतिषेधः सो

मपीतये । पा नौ ल्कागापाप च भाव इति भावे क्तिन् घुमास्थेतीत्वं सोमस्य पीतिः । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वं । स्वर्दृशः सुष्ठु अर्तिं गच्छ 201
तीति स्वरादित्यः अर्तेरन्येभ्योपि दृश्यंत इति विच्प्रत्ययः तं पश्यंतीति स्वर्दृशः । क्विप्चेति क्विप् कृदुत्तरपदप्रकृतिस्वरत्वं ॥ ॥ दशमीमृचमाह ॥ अग्ने पू 1924
र्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः ॥ असि ग्रामेष्ववितापुरोहितोऽसि यज्ञेषु मानुषः ॥ हे विभावसो दीप्तिप्रकाशनरूपधनतन्मेन वि
श्वदर्शत सर्वैर्दर्शनीय त्वं पूर्वा उषसो नु अतीतान् उषः कालान् अनुलक्ष्य दीदेथ दीप्यसे ताद्दृशस्त्वं ग्रामेषु जननिवासस्थानेषु
अविता रक्षको भवसि । यज्ञेषु पुनरिष्टेषु यज्ञकर्मसु पुरोहितः देवैः पूर्वस्मिन् दिक् व्यवस्थितः मानुषो मनुष्याणां यजमानानां मानुषाणां हितोऽसि । दीदेथ
। दीदेति । दीदतिर्दीप्तिकर्मा आगमानुशासनस्या । नित्यत्वादित्याभावः द्विर्वचनप्रकरणे छंदसि चेति वक्तव्यमिति वचनात् द्विर्वचनाभावः वि
श्वदर्शतः विश्वैर्दर्शनीयः । भृमृदृशी त्यादिनादृशेरतच्प्रत्ययः धातोरिवात् पूर्वपदांतोदात्तत्वं । पुरोहितः पूर्वाधरावराणामसिपुरधवश्चैषा
मित्यसि प्रत्ययांतः पुरःशब्दः तद्धितश्चासर्वविभक्तिरित्यव्ययत्वात्पुरोऽव्ययमिति गतिसंज्ञायां समासे गतिसमासे गतिरनंतर इति पूर्वपद
प्रकृतिस्वरत्वं ॥ ॥ इति प्रथमस्य तृतीये एकोनत्रिंशो वर्गः ॥ ॥ एकादशीमृचमाह ॥ नि त्वा यज्ञस्य साधनमग्ने होतारमृत्विजं ॥ मनुष्वद्देवधी
महि प्रचेतसं जीरं दूतममर्त्यं ॥ हे अग्ने देव मनुष्वत् यथा मनुर्यागदेशे निदधाति तद्वद्वयं त्वां निधीमहि अत्र स्थापयाम । कीदृशं यज्ञस्य सा
धनं यज्ञनिष्पादकं होतारं ऋत्विजं अतोवसंतादिकालेष्टारं प्रचेतसं प्रकृष्टज्ञानयुक्तं जीरं क्षिप्रं शत्रूणां वयोहानिकरं दूतं देवानां दूतकर्मणीयं अमर्त्यं
मरणरहितं मनुष्वत् औणादिक उसिप्रत्ययांतो मनुश्शब्दः तेन तुल्यं क्रिया चेदिति तिरिति वतिप्रत्ययः अयस्मयादित्वेन भत्वात्त्वाद्यभावः
धीमहि इ धाञ् धारणपोषणयोः । लिङि अभ्यासलोपश्छांदसः । जीरं जु इति सौत्रो धातुः जोरीचेति रक्प्रत्ययः । कात्यायनस्ता हेरतिज्य इति सं
प्रसारणे जीर इति ॥ ॥ द्वादशीमृचमाह ॥ यद्देवानां मित्रमहः पुरोहितोंतरो यासि दूत्यं ॥ सिंधोरिव प्रस्वनितास ऊर्मयोऽग्नेर्भ्राजंते अर्चयः ॥
हे मित्रमहः मित्राणां पूजकाग्ने यद्यदा पुरोहितस्त्वं देवैः पूर्वस्यां दिशि स्थापितः अंतरः देवयजमानमध्ये वर्तमानः सन् देवानां दूत्यं दूतक
र्म यासि प्राप्नोषि तदानीं अग्नेस्तवार्चयो दीप्तयः भ्राजंते दीप्यंते । तत्र दृष्टांतः सिंधोरिव यथा समुद्रस्य प्रस्वनितासः प्रकृष्टध्वनियु
क्ता ऊर्मयस्तरंगाः भ्राजंते तद्वत् । मित्रमहः महपूजायां मित्रैः क्रियते पूज्यत इति मित्रमहः । औणादिकोऽसुन् । यासि यद्वृ
त्तयोगादनिघातः । दूत्यं दूतस्य कर्म दूत्यं दूतस्य भाकर्मणी इति यत्प्रत्ययः सर्वे विधयः छंदसि विकल्प्यंत इति वचनाद्यतोनावि
इत्याद्युदात्तत्वाभावे तित्स्वरितं इति स्वरितत्वं । प्रस्वनितासः स्वन शब्दे ध्वनक्षेभावनिष्ठाप्रकृष्टं स्वनितं येषां ते प्रस्वनिताः असुगागमः बहुव्री
हौ पूर्वपदप्रकृतिस्वरत्वं ॥ ॥ त्रयोदशीमृचमाह ॥ ॥ श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ॥ आ सीदंतु बर्हिषि मित्रो अर्यमा प्रातर्यावा
णो अध्वरं ॥ हे श्रुत्कर्ण श्रवणसमर्थाभ्यां कर्णाभ्यां युक्ताग्ने श्रुधि अस्मदीयवचनं शृणु या मित्रो देवः यश्चार्यमा ये चान्ये प्रातर्यावाणः
प्रातः प्रातः काले देवयजमानं गच्छंतो देवाः तेः सर्वे सयावभिः आहवनीयाग्निना सह यास्यमानगतिभिः वह्निभिर्देवैः सह अध्वरं क्रतुमु
द्दिश्य बर्हिषि दर्भे आसीदंतु उपविशंतु । श्रुधि । श्रु श्रवणे । श्रुशृणुपॄकृवृभ्यश्छंदसीति हेर्धिरादेशः ॥ बहुलं छंदसीति विकरणस्य लुक् । श्रुत्कर्णश्रृ
णोतीति श्रुत् क्विपि तुगागमः श्रुतौ कर्णौ यस्य सोऽश्रुत्कर्णः ॥ वह्निभिः वह प्रापणे । वहिश्रियुश्रुग्लाहात्वरिभ्यो नित्विति निप्रत्ययः नित्वाद्

पदात्ततं। सयावभिः समानं यातीति सयावानः। याप्रापणे। आतो मनिन्क्वनिब्वनिपश्चेति वनिप्। कृदुत्तरपदप्रकृतिस्वरत्वं। प्रातर्यावाणः पूर्ववत् प्रातिपदि
भा॰प्र॰ कान्तनुमविभक्तिषु चेति णत्वं॥ ॥चतुर्थीमृचमाह॥ श्रृण्वंतु स्तोमं मरुतः सुदानवोग्निजिह्वा ऋतावृधः॥ पिबतु सोमं वरुणो धृतव्रतोश्वि
भ्यामुषसा सजूः॥ मरुतो देवाः स्तोमं मदीयं स्तोत्रं श्रृण्वंतु। कीदृशाः। सुदानवः सुष्ठु फलस्य दातारः। अग्निजिह्वाः अग्निजिह्वास्थानी
१०२ यो मुख्यो येषु मरुत्सु ता दृशाः। ऋतावृधः सत्यस्य यज्ञस्य वा वर्धकाः। तथा धृतव्रतः धृतकर्मा वरुणो देवः अश्विभ्यां देवाभ्यां उषसा देव
तया च सजूः सह सोमं पिबतु। सुदानवः दुदाञ् दाने। दाभाभ्यां नुरिति भावे नुप्रत्ययः। शोभनं दानुर्येषां आद्युदात्तं द्व्यच
छंदसीत्युत्तरपदाद्युदात्तत्वं। अग्निजिह्वाः अग्नेर्जिह्वयेव जिह्वया ताभिर्भांतीत्यर्थः। तात्स्थ्यात्ताच्छब्द्यं अग्निजिह्वास्थानीया येषां तः
छंदसमेत्याद्युदात्तत्वं। ऋतावृधः। ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारः। वृधेरंतर्भावितण्यर्थात् क्विप् चेति क्विप्। अन्येषामपि दृश्यत इति
पूर्वपदस्य दीर्घत्वं॥ ॥इति प्रथमस्य तृतीये द्वात्रिंशो वर्गः॥ ॥त्वमग्ने वसूनिति दशर्चं द्वितीयं सूक्तं। अत्रानुक्रमणिका। त्वमग्ने दशानु
ष्टुभमंत्यार्धं वांत्यो देवता इति। प्रस्कण्व ऋषिः। आनुष्टुभं छंदः। इदमग्निदेवताकं पूर्वं चाग्नेयमित्युक्तत्वात्। अयं सामेत्यर्धं चांत्ये देवस्तुतिः
तन्नु वाक आग्नेयत्वात्। आश्विनशस्त्रे च तत्सूक्तं। अथैतस्या रात्रेरिति खंडे सूचितं। त्वमग्ने वसून्तं हि शेते वशिनि। तथा गार्गत्रिरात्रस्यांत्य
दिवस्य च तत्सूक्तं। आंगिरस्यैकस्तोमं मतिस्वरे सूचितं। पारयतीयमुत्तानमत्त्वमग्ने वसूनिति वाज्यमिति॥ ॥तत्र प्रथमामृचमाह
॥त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत॥ यजा स्वध्वरं जनं मनुजातं घृतप्रुषं॥ हे अग्ने त्वं इह कर्मणि वस्वादीन्यज उत अपि च जनं अन्यमपि
देवताकरूपं प्राणिनं यज। कीदृशं स्वध्वरं शोभनयागयुक्तं मनुजातं मनुना प्रजापतिना उत्पादितं घृतप्रुषं उदकस्य सेक्तारं। यज घ्वात्तस्ति
ङः इति संहितायां दीर्घत्वं। स्वध्वरं शोभनो अध्वरो यस्यासौ स्वध्वरः नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥ मनुजातं जनेरंतर्भावितण्यर्थ
त्वं मणिकः क्तो। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। घृतप्रुषं प्रुषप्लुषस्नेहनसेचनपूरणेषु। घृतेनोदकेन प्रुष्णाति पूरयतीति घृतप्रुट् क्वि
प् चेति क्विप्॥ ॥द्वितीयामृचमाह॥ ॥श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः॥ तान्रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वह॥ हे अग्ने वि
चेतसः विशिष्टप्रज्ञा देवाः दाशुषे हविर्दत्तवते यजमानाय श्रुष्टीवानो हि श्रुष्टिः सुखस्य दानं तद्युक्ताः खलु। हे रोहिदश्व रोहिन्नामकौ अश्वौ
यस्य हे गिर्वणः गीर्भिः स्तुतिभिर्वननीय अग्ने गिर्वणो देवो भवति गीर्भिरेनं वनयंतीति यास्कः। त्रयस्त्रिंशतं अनया संख्यया संख्या
तान् देवानावह उद्धान यथ। श्रुष्टीवानः श्रुष्टिः प्रेरणार्थः भावक्तिन् श्रुष्टिर्वनंति संभजंत इति श्रुष्टीवानः अन्येभ्योपि दृश्यत इति छां
दसो दीर्घत्वं। विचेतसः। विशिष्टं चेतायस्यांत बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं गिर्वणः गीर्भिर्वननीयो गिर्वणाः वनने रसुन्। पूर्वपदस्य
ह्रस्वत्वं छांदसं। त्रयस्त्रिंशतः त्रयस्त्रिंशत त्रयस्य इति त्रिशब्दस्य त्रयसादेशः। संख्येति पूर्वपदप्रकृतिस्वरत्वं छांदसं॥ त्रयस्त्रिंशत
त्रयस्त्रिंशत्रयस्य इति त्रिशब्दस्य त्रयसादेशः। संख्येति पूर्वपदप्रकृतिस्वरत्वं॥ ॥तृतीयामृचमाह॥ प्रियमेधवदत्रिवज्जातवेदो वि १०२
रूपवत्॥ अंगिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवं॥ ॥हे महिव्रत प्रभूतकर्मन् जातवेदोग्ने प्रस्कण्वस्य कण्वपुत्रस्य महर्षेः हवमाह्वा
नं श्रुधि श्रृणु तत्र चत्वारो दृष्टांतः। प्रियमेधात्रिविरूपांगिरोनामकास्तेषामाह्वानं यथा श्रृणोषि तद्वत्॥ अत्र निरुक्तं। प्रियमेधः प्रि

यो अस्य मेधायथैते यागस्येषामेवं प्रस्कण्वस्य श्रृणु ह्वानं प्रस्कण्वः कण्वस्य पुत्रः कण्वप्रभवो यथा प्राग्रमिति विरूपो नानारूपो महिव्रतो महाव्रत इति च प्रि 203/1924
यमेधवत् प्रियमेधस्य यज्ञस्येव ततस्य वतिप्रत्ययो वतिः। त्वमत्रिवदित्यादावपि प्रस्कण्वात्स्मृयागतः॥ ॥चतुर्थीमृचमाह॥ महिकेरव ऊतये प्रियमेधा अहूष
त॥ राजंतमध्वराणामग्निं शुक्रेण शोचिषा॥ महिकेरवः प्रौढकर्माणः प्रियमेधाः प्रियमेधस्य कुले जाता एतनामकाः ऋषयः ऊतये रक्षार्थं अग्निमहूषत आहूतवंतः
कीदृशं अध्वराणां यज्ञानां मध्ये शुक्रेण शोचिषा दीप्तप्रकाशेन राजंतं दीप्यमानं महिकेरवः। महत्पूजायां अंगणादिरुन्प्रत्ययः इति केरवः कर्मणि। सं
तीलकर्म महयाम हांतः कारवा येषांते तथोक्ता आकारस्य एकारादेशः छांदसः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। प्रियमेधाः प्रिया मेधा येषांते।
अहूषत ह्वेञ् स्पर्धायां शब्दे च॥ दुहिमिति बहुलं छंदसीति संप्रसारणं परपूर्वत्वं हलः इति दीर्घत्वं। आदेशप्रत्यययोरिति षत्वं॥ ॥पंचमीमृचमाह॥
घृताहवन संत्येमा उ षु श्रुधी गिरः॥ याभिः कण्वस्य सूनवो हवंतेवसे त्वा॥ हे घृताहवन घृतेनाहूयमान संत्य फलप्रदाग्ने इमा उ गिरः अस्माभिः प्रयु
ज्यमाना अपि स्तोत्ररूपा वाचः सु श्रुधि सुष्ठु श्रृणु कण्वस्य महर्षेः सूनवः पुत्राः याभिर्गीर्भिरवसे रक्षार्थं त्वां हवंते त्वामाह्वयंति। घृताहवनः
घृतेनाहूयमानास्मिन्निति घृताहवनः अधिकरणे ल्युट् आमंत्रितानुदात्तत्वं। श्रुधि श्रृणु श्रुवः श्रृ च छंदसीति हिधिरादेशः। बहुलं छंदसीति विकरणस्य लुक्
॥ ॥इति प्रथमस्य तृतीये त्रयस्त्रिंशो वर्गः॥ ॥अश्वमेधे चाप्यामिष्टौ स्विष्टकृतानुवाक्या त्वां चित्रश्रवस्तमेत्येषा। सर्वान्कामानाप्स्यन्तीति खंडे सूचि
तं। त्वां चित्रश्रवस्तमयद्वाहिष्ठं तद्दग्न इति॥ ॥तामेतां षष्ठीमृचमाह॥ त्वां चित्रश्रवस्तम हवंते विक्षु जंतवः॥ शोचिष्केशं पुरुप्रियाग्ने हव्याय वो
ळ्हवे॥ हे चित्रश्रवस्तम अतिशयेन विविधकीर्तियुक्त पुरुप्रिय बहूनां यजमानानां प्रीतिकराग्ने त्वां हव्याय वोळ्हवे हविर्वोढुं विक्षु जंतवः प्रजासु
स्तोत्रयजमाना हवंते आह्वयंति। कीदृशं शोचिष्केशं दीप्तिरूपकेशोपेतं तथा च यास्कमनसयिनः आमनंति। शोचंत इव द्युतस्य समिद्धस्य रश्मयः
कृशा इति चित्रश्रवस्तमं श्रवः इत्यन्नाम चित्रं श्रवो यस्यासौ चित्रश्रवाः अतिशयेन चित्रश्रवाश्चित्रश्रवस्तमः आमंत्रितानुदात्तत्वं। शोचिष्केशं शुचिर्
दीप्तौ। अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिरिति इसिः प्रत्ययस्वरः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। हव्याय हवनक्रियायां प्राप्यत्वात् क्रियाग्रहणं
कर्तव्यमिति संप्रदानत्वाच्चतुर्थी वोळ्हवे। वहप्रापणे तुमर्थे सेसेनिति तवेन्प्रत्ययः ढत्वढत्वलोपे ष्टुत्वं सहिवहोरोदवर्णस्येति अका
रस्य ओकारः नित्त्वादाद्युदात्तत्वं॥ ॥सप्तमीमृचमाह॥ नि त्वा होतारमृत्विजं दधिरे वसुवित्तमं॥ श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु॥ हे अग्ने
विप्रा मेधाविनो दिविष्टिषु यागेषु त्वां निदधिरे वसुवित्तमं। श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु यत्नेन स्थापितवंतः। वसुवित्तमं अतिशयेन धनस्य ल
म्भयितारं श्रुत्कर्णं श्रवणयोग्यकर्णोपेतं सप्रथस्तमं। अतिशयेन प्रख्यातं। दधिरे। इरयो रे चेत्यादेशः। तोदात्तत्वं पादादित्वान्निघाताभावः। दिविष्टिषु
दिवः यज्ञाः ता निष्ठिते सर्गस्य लोपणा निष्टपु यागेषु तद्धिविष्टयः सर्वविध यस्मिंस्तस्मिविकल्प्यंत इति वचनाद्दिव उद्दित्यस्य लोपः क्रियते। बहुव्रीहौ पूर्वपद
प्रकृतिस्वरत्वं॥ ॥अष्टमीमृचमाह॥ आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः॥ बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे॥ हे अग्ने सुतसोमा
अभिषुतसोमयुक्ताः विप्रा मेधाविनः ऋत्विजः प्रयो अभिहविर्लक्षणमन्नमभिलक्ष्य त्वा अचुच्यवुः त्वामागमयंति। कीदृशं त्वां बृहत् महांतं भाः भासमानं। दृशा विप्राः दाशुषे मर्ताय हविः प्रदत्तस्य यजमानस्य संबंधि हविर्बिभ्रतो धारयंतः। अचुच्यवुः च्युङ् गतौ। अस्मात् ण्यंताद्भा
वितण्यर्थात् लुङि च्लेश्चङ् परस्मैपदं बहुलं छंदसीति दापः श्रु। सिज्भ्यस्तविदिभ्यश्चेति झेर्जुसादेशः। जुसि चेति गुणः बृहद्भा उभयत्र कर्मणि सु
लुगिति विभक्तेर्लुक्। बिभ्रतः डुभृञ् धारणपोषणयोः शतरि नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। मर्ताय।

दाश्वेषे। उभयत्रापि चार्थे चतुर्थ्येकवचनं यति चतुर्थ्या॥ ॥नवमीमृचमाह॥ प्रातर्यावाणः सदस्कृतः सोमपेयाय संत्य॥ इहाद्य दैव्यं जनं बर्हिरासादया वसो॥
१ भा॰ प॰ हे सदस्कृतः यजनमथितवती अग्ने अनुपदानः बसानि यजमहतुभ्यं नानि इहदैवयजने दैव्यं अस्माकं यज्ञे सोमपेयाय सोमपानार्थं प्रातर्यावाणः प्रातरागच्छतो
१०३ देवान् दैव्यं जनं अन्यमपि देवताजनं बर्हिरासादय प्रापय। प्रातर्यावाणः॥ आशि अनुपान इत्याकारलोपः॥ सदस्कृतः सदनं विभक्त यजनेति सहोबलेन
क्रियत इति सदस्कृतः। संत्य सदोभसंभवेति तायां अनुप्रभावश्छांदसः॥ ॥दशमीमृचमाह॥ अर्वांचं दैव्यं जनमग्ने यक्ष्व सहूतिभिः॥ अयं
सोमः सुदानवस्तं पात तिरो अह्न्यं॥ हे अग्ने अर्वाचं अभिमुखं दैव्यं जनं देवतारूपं प्राणिनं सहूतिभिः समानाह्वानैः देवानां सह यक्ष्व यजस्व। हे सुदानवः
सुष्ठु फलदातारो देवाः अयं सोमः युष्मदर्थः इत्युक्तं हविर्भूयं स्तस्य तन्नामधेयं देयं बाध्यया आवितिप्राग्दीव्यति योषितः। यक्षु लोटि बहुलं छंदसीति
शपो लुक्। प्रत्ययस्वरः आद्युदात्तः। अग्ने इत्यस्य पादादावनंमानत्वामंत्रितं पूर्वमविद्यमानवदिति विद्यमानवत्वान्निघातः॥ ॥ इति निघाताभावः सहूति
भिः समानाहूतिराह्वानं यया तसहूतयः समानस्य छंदसीति सभावः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। पात पापाने बहुलं छंदसीति शपो लुक्। अह्न्यं
सकोपान इत्यकारलोपः। यत्वाभावकर्मणादिति प्रतिभवनस मर्वविधीनां छंदसि विकल्पितत्वाः नित्यत्वाद्वैद्यां अह्नि भवं अह्न्यं पूर्ववत्यांतः पादादि
ति प्राप्तनिघाताभावः। अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥इति प्रथमस्य तृतीये द्वात्रिंशो वर्गः॥ ॥ एषो उषा इति पंचदशर्चं तृतीयं सूक्तं प्रस्कण्वस्या
र्षं इदमुत्तरं चाश्विनं गायत्रीछंदस्कं॥ अत्रानुक्रमणिका॥ एषो पंचोना आश्विनं तु गायत्रमिति। प्रातरनुवाके आश्विने क्रतौ गायत्रीछंदसि आश्विनशस्त्रे
च विनियुक्तं। अथाश्विने एषो उषा इति सूत्रितं॥ ॥तत्र प्रथमामृचमाह॥ एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः॥ स्तुषे वामश्विना बृहत्॥ एषा ल
वास्माभिः परिदृश्यमाना प्रियामवं या प्रीतिहेतुं अपूर्वा पूर्वं यं मध्यरात्रिकाले विद्यमाना न भवति किंत्विदानीं उषाः उषोदेवता दिवो द्युलोक
स्य मध्ये शांदगत्य व्युच्छति तमो विवर्जयति। हे अश्विनौ वायुवां बृहत् प्रभूतं यथा भवति तथा स्तुषे स्तौमि॥ स्तुषे। षुञ् स्तुतौ। तिङ्ङतिङ इति
लसक॰ वचनस्य मध्यमैकवचनादेशः। बहुलं छंदसीति मकारवचनमिन्द्रकुलं स्तौतीति लिपि॥ ॥द्वितीयामृचमाह॥ या दस्रा सिंधुमातरा मनोतरा रयीणां॥
धिया देवा वसुविदा॥ या दस्रा यानु भावश्विनौ वक्ष्यमाणगुणयुक्तौ तौ स्तुव इति पूर्वेणान्वयः। कीदृशौ दस्रौ दर्शनीयौ सिंधुमातरा। समुद्रमातृकौ य
द्विजयं द्वौ समा बबसमुद्रौ तौ तथाश्विनौ। वयं चिमं ततदुपनात् ज्यात्। रयीणां धनानां मनोतरा मनसा तारयितारौ धिया कर्मणा वसुविदानिवा
पितरः चंद्रममा वसमुद्रौ तौ तथाश्विनौ। रथाः धनस्थानस्य भश्वितागमनात गमनमीत इतइति मनोतंभतरं तं। भावितण्ययात्। कंदोगविस्य पदे यदं तस्य सकारस्य रत्वं सति। छांदसमुत्वं। रयी
णां। नामन्यतरस्यामिति नामुदात्तत्वं। धियामावका नदुति विभक्तेरुदात्तत्वं। वसुविदावसूनि निवा समस्तानि विंदत इतिव सु विदौ क्विप्रत्ययः॥ ॥
तृतीयामृचमाह॥ वच्यंते वां ककुहासो जूर्णायामधि विष्टपि॥ यद्वां रथो विभिष्पतात्॥ हे अश्विनौ वायुवयोः संबंधी रथः। जूर्णायां जानाव्रतिः स्तुता
यां अधि विष्टपि॥ स्वर्गलोके यद्यदा विभिरश्वैः पतात् पतति गच्छति तदानीं वां युवयोः। ककुहासः स्तोतारो वच्यंते। अस्माभिरच्यंते। वच्यंते वचितेर
कर्मणि यक्। वचिस्वपियजादीनां संप्रसारणं संप्रसारणाच्चेत्यत्र वाच्छंदसीत्यनुवृत्तेः परपूर्वत्वस्याप्राप्तिकत्वात् गुणादेशः। प्रत्ययस्वरः १०३
ककुहासः ककुभंशं गाविदुः प्रधानेतुल्याभिधानात् प्राधान्याभिधायिना ककुभशब्देन तत्प्रतिपादिकाः स्तोतारो लक्ष्यंते॥ हलं फोडसं। आज्जसेरसुक्
नित्यं सुक्॥ जूर्णायां जूर्युवयोर्हानो भवत्यर्थः धातुनामनेकार्थत्वात्। निष्ठायां श्वयुक्तिकीतीति इट्प्रतिषेधः। बहुलं छंदसीति तत्र लिङ्गवेति

दीर्घः। रदाभ्यामिति निष्ठानत्वं प्रत्ययस्वरः। विभिः वीगत्यादिष्विति गच्छंतीति वयोश्वाः। औणादिकः इ प्रत्ययः। पतात् पतगतौ लेट्याडागमः 205
इतश्च लोप इतीकारलोपः॥ ॥चतुर्थीमृचमाह॥ हविषा जारो अपां पिपर्ति पपुरिर्नरा॥ पिता कुटस्य चर्षणिः॥ हे अश्विनौ नरा अपां जारः 1924
सकीयतापेनोदकानां जरयिता सूर्यः। हविषा अस्मद्दत्तेन पिपर्ति देवान् पूरयतीत्युदितः सूर्यः सूर्ये हविः प्रदानात् सूर्यस्य पूरकत्वं द्रष्टव्यं
अतः सूर्योदयकाले युवाभ्यामागंतव्यमित्यर्थः॥ कीदृशो जारः पपुरिः कर्मणा पूरणभावः। पिता पालकः कुटस्य चर्षणिः कर्मणां द्रष्टा
अत्र निरुक्तं॥ हविषा याजरयिता पिपर्ति पपुरिरिति पृणातिनिगमो वा प्राणातिनिगमो वा पिता कुटस्य कर्मणः स्यायिता दित्य इति। जा
रः जरयतीति जारः आदित्यः जारजारो कर्तरि णिलुकृत्व तिधं जं तानि पातिनः कृदंतत्वं इत्यंतोदात्तत्वं। अपां उडिद्मिति विभक्तेर
दात्तत्वं। पिपर्ति। पृपालनपूरणयोः शपः श्लुः। अर्तिपिपर्त्योश्च इत्यभ्यासस्येत्वं। अनुदात्तं चेत्यभ्यस्तस्याद्युदात्तत्वं।
पपुरिः आदृगमहनजन इति किन्प्रत्ययः। लिड्वद्भावात्किन्त्वाद्द्विर्वचनं पिपुनः किन्करणसामर्थ्यात्। ऋच्छत्यृतामितिगुणाभावः। उदोष्ठ्यपूर्वस्य
त्वं प्रत्ययस्वरः दित्वान्नित्यादिर्नित्यमित्याद्युदात्तत्वं॥ ॥पंचमीमृचमाह॥ आदारो वां मतीनां नासत्या मतवचसा॥ पातं सोमस्य धृष्णुया॥ हे मतवचसा अभिम
तस्तोत्रौ नासत्या अश्विनौ वां युवयोर्मतीनां बुद्धीनां आदारः प्रेरकोयः सोमोस्ति सोमस्य तं सोमं पातं युवां पिबतं कं। इदं सोमं धृष्णुया धृ
र्षणशीलमदकरत्वेनतीव्रमित्यर्थः आदारः। दृङ् आदारः। आदारयतीत्यादरः दारजारौ कर्तरि णिलुक्चेति घञ्प्रत्ययः। थाथादिस्व
रापवादेनान्तोदात्तत्वं। मतीनां। नामन्यतरस्यामिति नामुदात्तत्वं। मतवचसा मतं अभिमतं स्तोत्ररूपं वचो ययोः सुपां सुलुगिति विभक्तेरा
कारः। पातं पापाने बहुलं छंदसीति शपो लुक्। सतिपाघ्रत्यादिना पिबादेशो न भवति। सोमस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्र
दानत्वाच्चतुर्थ्यर्थे षष्ठी। धृष्णुया सुपां सुलुगिति विभक्तेर्यादेशः॥ ॥इति प्रथमस्य तृतीये त्रयस्त्रिंशो वर्गः॥ ॥षष्ठीमृ
चमाह॥ या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः॥ तामस्मे रासाथामिषं॥ हे अश्विनौ ज्योतिष्मती रसवी यादिरूपा याति युक्तया
नेनास्मान्पीपीरमारयत्॥ तम्भिंत्राप यत॥ किंरुत्वा तमोदारिद्र्यरूपमधंकारं तिरः अंतर्हितं विनष्टं कृत्वा। तामिषं ता दृशमन्नं अस्मे
अस्मभ्यं रासाथां प्रयच्छतं। पीपरत्। पृपालनपूरणयोः ण्यंतलुङि चङि णिलोपः उपधायाः ह्रस्वः सन्वद्भावात् ह्रस्वे इत्वं सन्वद्भावात् दीर्घः
बहुलं छंदस्यमाङ्योगेपीत्यडभावः चङ्यन्यतरस्यामित्युपोत्तमस्य धातकारस्योदात्तत्वे प्राप्ते सत्यत्ययेनाभ्यासस्योदात्तत्वं। यद्वृत्ता
न्नित्यमितिनिघातप्रतिषेधः अस्मे सुपां सुलुगिति चतुर्थीबहुवचनस्य शे आदेशः। रासाथां। रादाने। छांदसे प्रार्थनायां लुङि व्य
त्ययेनात्मनेपदं॥ च्लेः सिच् एकाच इतीट्प्रतिषेधः। पूर्ववदडभावः तिङ्ङतिङ इति निघातः॥ ॥सप्तमीमृचमाह॥ आ नो नावा
मतीनां यातं पाराय गंतवे॥ युंजाथामश्विना रथं॥ हे अश्विनावस्मदीनां नौकाः पाराय गंतवे पारं गंतुं नावा नौरूपेण गमनसाध
नेनास्मान्प्रति आयातं समुद्रमध्याद्वागच्छतं भूमावागंतुं रथं भवदीयं युंजाथां सज्जीकुरुतं॥ नावा सावेकाच इति विभक्तेर
दात्तत्वं॥ गंतवे तुमर्थे सेसेनिति तवेन्प्रत्ययः निलान्तद्युदात्तत्वं। युंजाथां युजिर्योगे लङि व्यत्ययेनात्मनेपदं छंदस्युभयथा सार्वधातुकत्वाच्छपः
इत्यकारलोपः प्रत्ययस्वरः॥ ॥अष्टमीमृचमाह॥ अरित्रं वां दिवस्पृथु तीर्थे सिंधूनां रथः॥ धिया युयुज्र इंदवः॥ ॥हे अ

भा०प्र० श्विनौ वां युवयोर्दिवस्पृथु यत्नो कार्ष्ण्यं वर्त्मनि अरित्रं गमनसाधनं नौरूपं सिंधूनां समुद्राणां तीर्थे अवतरणप्रदेशे विद्यत इति शेषः रथश्च भूमौ गन्तुं विद्यते । इंद
२०४ वः सोमाः धिया भवद्विषयेण कर्मणा युयुज्रे युक्ता अभूवन् । अरित्रं कगतो अर्तिकर्मणः सस्वनसहचरा इत्र इतिकरणे इत्रप्रत्ययः स्वरः । दिवः इदिद्वमितिविभक्तेरुदा
त्तत्वं । तीर्थं तरन्त्यनेनेति तरणं यासां पातृतुदिवचिरिचिसिचिभ्यस्थक् इति थक्प्रत्ययः । अक्तौ तारितौ तं हलि नोति दीर्घः । युयुज्रे लिटि इरयोरे इति इरे वा रे आदेशः ॥ ॥नवमी
चमाह ॥ दिवस्कण्वास इन्दवो वसु सिंधूनां पदे । स्वं वव्रिं कुह धित्सथः ॥ हे कण्वासः कण्वपुत्राः यद्वाम धावित कृतित्रः अश्विनाविदं पृच्छतीति शेषः ॥ कथमिति
दुच्यते दिवो द्युलोकस्य काशात् इन्दवः सर्वस्य प्रादुर्भूताः सिंधूनामपां वृष्टिरूपाणां स्यंदनस्वभावानां पदे स्थाने अंतरिक्षे वसु अस्मदीयं निवासहेतुभूत
मुषः कीदृशीनं ज्योतिः आविर्भूतमिति शेषः । अस्मिन्नवसरे युवां स्वं वव्रिं स्वकीयं रूपं कुह धित्सथः । कुत्र स्थापयितुमिच्छथः । अत्रागत्य प्रदर्शनीयमितिभा
त्पर्यार्थः । कुहशब्दश्च कुहे मीतिकिं शब्दात्सप्तम्यर्थे हप्रत्ययः ॥ कुतिहोरिति कुमः कु । धित्सथः । दुधाञ् धारणपोषणयोः सनि मीमाघुरभ इति अभ्यासलोपश्च
इति । अकारस्य इत्वादेशः ॥ अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः सः स्यार्धधातुक इति सकारस्य तकारः ॥ ॥ दशमीमृचमाह ॥ अभूदु भा उ अंशवे हि
रण्यं प्रति सूर्यः ॥ व्यख्यज्जिह्वयासितः ॥ भा उ भासमानं ज्योतिः अंशवे अंशवे अप्सु व्याप्तवते सोमाय उ प्रकाशनार्थं अभूत् प्रादुर्भूत् । तावत्सूर्यश्चाहिरण्यं प्रति स्वकीयाद
यनाद्धिरण्यसदृशो भूत् अग्निश्च असितः कृष्णवर्णः स्वकीयया दीप्त्या सर्वं व्यख्यत् प्रकाशितवान् । यत एवं भासमानः अतोऽस्य सोमस्यागम
मश्विनोर्युवयोरागमनकाल इत्यर्थः ॥ अभूत् । भूसत्तायां अस्तिसिचोऽपृक्त इतीडागमः । प्रति । यद्यपि हिरण्यप्रतीति प्रतिनिधिप्रतिदानयोरिति प्रतेः कर्मप्रवचनीयत्वं कर्म
प्रवचनीययुक्ते द्वितीयेति द्वितीया । अख्यत् । चक्षिङः ख्याञादेशः । लुङि अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः ॥ ॥ इतिप्रथमस्य तृतीये चतुस्त्रिंशो वर्गः ॥
॥ ॥ एकादशीमृचमाह ॥ अभूदु पारमेतवे पंथा ऋतस्य साधुया ॥ अदर्शि वि स्रुतिर्दिवः ॥ ऋतस्य सत्यस्य यज्ञस्य पारं एतवे पारं गंतुं समुद्रमवगाहितुं पथा
मार्गः साधुया सम्यक् अभूत् । अभूदिति अन्ये । स्वादिकः श्रोतना मकस्य सूर्यस्य स्तुतिः प्रसृता दीप्तिः । व्यदर्शि विशेषेण दृष्टा तस्मादश्विनौ युवाभ्यां
मागन्तव्यं ॥ एतवे इण् गतौ । तुमर्थे सेसेनिति । तवेन्प्रत्ययः साधुया सुपां सुलुगिति विभक्तेर्याजादेशः ॥ अदर्शि कर्मणि लुङि च्लेश्चिण् दृशः का
णि लुगितितलो ... ॥ स्रुतिः स्रु गतौ क्तिन् ॥ ॥ द्वादशीमृचमाह ॥ ॥ तत्तदिदश्विनोरवो जरिता प्रति भूषति ॥ मदे सोम
स्य पिप्रतोः ॥ जरिता स्तोता अश्विनोः संबंधि तत्तदवः पुनः पुनः कृतं सर्वमपि अस्मासु रक्षणं प्रति भूषति प्रत्येकमलंकरोति प्रशंसतीत्य
र्थः ॥ कीदृशयोरश्विनोः सोमस्य मदे निमित्तभूते सति सोमस्य पिप्रतोः सोमं प्रयच्छतोः भूषति भूष अलंकारे भ्वादिकः । पिप्रतोः पृ पालनपूरणयोः
इत्यस्य अस्माल्लटः शतृ जुहोत्यादित्वाच्छपः श्लुः श्लौ इति द्विर्भावे उरदत्वमित्यादि अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । शतुर्नुम्विभाषा दुणोऽभावे यणादेशः
अभ्यस्तानामादिरित्याद्युदात्तः श्लुः द्विर्भावे उरत्वमित्यादि । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । शतुरनुमो नद्यजादी अभ्यस्तानामादिरिति आद्युदात्ता
त्तत्वं ॥ ॥ त्रयोदशीमृचमाह ॥ वावसाना विवस्वति सोमस्य पीत्या गिरा ॥ मनुष्वच्छंभू आ गतं ॥ हे शंभू सुखस्य भावयितारावश्विनौ म
नुष्वन्मनाविव विवस्वति परिचरणवति यजमाने वावसाना निवासं कुर्वाणौ युवां सोमस्य पीत्या सोमपाननिमित्तेन गिरा स्तुतिनिमित्तेन च आगतं ॥ आग
छतं । वावसाना । वस निवासे । ताच्छील्यवयोवचनशक्तिष्विति चानश् । बहुलं छंदसीति शपः श्लुः । अन्येषामपि दृश्यत इति संहितायामभ्यास २०४
स्य दीर्घत्वं सुपां सुलुगिति विभक्तेराकारः चित इत्यंतोदात्तत्वं ॥ पीत्या पा पाने स्थागापापचो भाव इति भावे क्तिन् घुमास्थेतीत्वं व्यत्ययेनांतोदात्तत्वं ॥

तृतीयैकवचनस्य यणादेशे उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं ॥ मनुष्वत् । मन ज्ञाने । मन्यते । जानातीति मनुः बहुलवचनादौणादिक उसिप्रत्ययः तेन तु
ल्यं वर्तत इति तत्र तस्येवेति वतिः प्रत्ययः स्वरः । गत । गम्लृ गतौ छांदसं बहुलं छंदसीति शपो लुक् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥ ॥ चतुर्दशीमृचमाह ॥ युवो 207/1924
रुषा अनु श्रियं परिज्मनोरुपाचरत् ॥ ऋता वनथो अक्तुभिः ॥ हे अश्विनौ परिज्मनोः परितो गन्त्रोर्युवोः युवयोः श्रियमनु आगमनरूपां शोभामनुसृत्य उ
षा उपाचरत् उषःकाले देवता इत्याह गच्छतु युवयोरागतयोः सतोः पश्चादागतेत्यर्थः । युवां च अक्तुभिः रात्रिभिः ऋता यज्ञगतानि हवींषि वनथः कामयेथे सं
भजेथ । युवोः युष्मच्छब्दात्षष्ठीद्विवचनस्य सुपां सुलुगिति षष्ठीद्विवचनाद्युवोः । अत आदेशाविषयत्वाद्योऽचीति यत्वाभावः शेषे लोपः । परिज्म
नोः परितो अज्मतो गच्छत इति परिज्मानौ श्वन्नुक्षन्नित्यादिना अजतेर्मनिन्प्रत्ययान्तो निपातितः ॥ ऋताः ऋतेः शेश्छंदसीति शेर्लोपः वनथः वन षण संभक्तौ
ति इतिङ् इति निघातः प्रवर्ग्ये पौर्वाह्णिके धर्मस्य हविषो द्वितीयायाज्या उभा पिबतमिस्येषा ॥ अथो नरामिति खंडे सूत्रितं उभा पिबतमश्विनेति चोभाभ्या
मनुवाचमिति । आश्विनशस्त्रे एषा द्वितीया याज्या ॥ सूत्रितं च । प्र वामंधांसि मद्यान्यस्थुरुभा पिबतमश्विनेति याज्ये इति ॥ ॥ तामेतां पंचदशीमृचमाह
॥ उभा पिबतमश्विनोभा नः शर्म यच्छतं ॥ अविद्रियाभिरूतिभिः ॥ हे अश्विनौ उभा युवामुभौ पिबतं सोमपानं कुरुतं ततः उभा युवामुभौ आविद्रिया
भिः प्रशस्ताभिरूतिभिः रक्षाभिः नोऽस्मभ्यं शर्म सुखं यच्छतं पिबतं पा पाने लोटि शपि पाघ्रेत्यादिना पिबादेशः अंगवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति वच
नात् लघूपधगुणाभावः यद्वा आद्युदात्तो अदंतः पिबादेशः तिङः तिङ इति निघातः यच्छतं दाण् दाने । लोटि शपि पाघ्रेत्यादिना यच्छादेशः आविद्रियाभिः
अविद्रियमानाभिः विपूर्वाद्दृणातेः औणादिकः किः आतो लोप इति चेत्याकारलोपः ॥ विद्रिर्निंदा । नाद्विर्येषां ताः अविद्रिः स्तुतिः तामर्हन्तीत्यविद्रियाः । अन्ये
भ्योऽपि दृश्यत इति विच् उरदुत्तरपदप्रकृतिस्वरत्वं ॥ ऊतिभिः अवतेः क्तिन् ज्वरत्वरेत्यादिना ऊठ् उदात्तो निपातनाद्यातोदात्तत्वं ॥ ॥ इति प्रथमस्य तृती
ये पंचत्रिंशो वर्गः ॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवै
दिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके तृतीयोध्या
यः ॥ समाप्तः ॥ ७ ॥ ७ ७ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ७ ७ ७ ७ ७ ० ७ ७ ॥ श्रीगणेशाय नमः ॥ यस्य निः
श्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ १ ॥ अथ प्रथमाष्टके चतुर्थोऽध्याय आरभ्यते ॥ नवमानुवाकस्य दशर्चं चतुर्थ सू
क्तं ॥ अत्रानुक्रांतं अयं दश प्रागाथं त्विति । ऋषिश्चान्यस्मादृष्य इति परिभाषितत्वात्कण्वपुत्रः प्रस्कण्व ऋषिः तथा पूर्वत्रान्त्विन्नित्यनुकृत्वात्तु ह्यादिपरि
भाषया इदमपि सूक्तमश्विदेवताकं अनयैव परिभाषया इदमुत्तरं च प्रागाथं अथ प्रथमा तृतीयाद्या अयुजो बृहत्यः द्वितीया चतुर्थ्याद्या युजः सतो
बृहत्यः प्रातरनुवाके आश्विने क्रतौ बार्हस्ते छंदसि यत एतत्सूक्तं अथाश्विन इति खंडे सूत्रितं ॥ इमा उ वामयं वामिति । आश्विनक्रतौ प्रेत्यनेनोक्तं प्रातर
नुवाकन्यायेनेत्यतिदिष्टत्वात् ॥ ॥ तत्र प्रथमामृचमाह ॥ अयं वां मधुमत्तमः सुतः सोम ऋतावृधा ॥ तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥
हे ऋतावृधा ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारौ अश्विना अश्विनौ वां युवयोः अयं पुरोवर्ती सोमः सुतः अभिषुतः कीदृशः मधुमत्तमः अति
शयेन माधुर्यवान् तिरोअह्न्यं त्यक्त्यं तिरोभूतं पूर्वस्मिन्दिने अभिषुतं सोमं पिबतं दाशुषे हवींषि दत्तवते यजमानाय रत्नानि रमणीयानि धनानि दत्तं
प्रयच्छतं । वां युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वान्नावाविति षष्ठीद्विवचनस्य वामादेशः स चानुदात्तः मधुमत्तमः मन ज्ञाने मन्वत इति म

भा॰अ॰ धुपलिपलिपाटिनमित्यादिनाउप्रत्ययःनिदित्यनुवृत्तेराद्युदात्तत्वं॥ धकारश्छांदसः। अतिशयेनमधुमान्मधुमत्तमः मनुपतमपोपित्वादनुदात्त
१०५ त्वे पदस्वरएवशिष्यते। व्रताव्रधाव्रधंतनभावितण्यर्थानक्विप्वर्तिक्विपू। अन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घत्वं। तिरोअन्हिभवोअन्हः भवेछं
दसियतअन्हः पूर्वाहनातिनियमान्नस्ततिइतिटिलोपाभावः सर्वविधयश्छंदसिविकल्प्यंतइतिवचनाद्वाभाकर्मणारितिप्रकृतिभावभावअल्लो
पोन इत्यकारलोपः तिरोहितोअन्हः तिरः धर्तोविरितिगतित्वात्निपातितत्वादव्ययत्वेपादिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ दाशूंषे दाश्वानसो
लानित्यानि त्यादिनाक्वसुप्रत्ययांतोनिपातितः॥ चतुर्थ्येकवचनेवसोःसंप्रसारणमितिसंप्रसारणंशासिवसिघसीनांचेतिषत्वं॥ ॥द्वितीयामृच
माह॥ ॥त्रिवंधुरेणत्रिवृतासुपेशसारथेनायातमश्विना॥ कण्वासोवांब्रह्मकृण्वंत्यध्वरेतेषांसुशृणुतंहवं॥ हे अश्विनात्रिवंधुरेणउन्नतानतरूपत्रिविधवंध
नकाष्ठयुक्तेनत्रिवृता अप्रतिहतगतिनथाल्पात्रवर्तमानेनसुपेशसाशोभनवर्णेनयुक्तेनरथेनआयातं इत्याहगच्छतं। कण्वासः कण्वपुत्रामेधातिथिप्रभृति
तोवांयुवयोरध्वरयागेब्रह्मस्तोत्ररूपंमंत्रंसुविलक्षणमंत्रंवांकृण्वंतिकुर्वंतितेषांकण्वानांहवामाह्वानंसुशृणुतंसम्यगादरेणशृणुतं त्रिवंधुरेणबध्नंतीति
वंधुरः वंधेर्गोणादिकउरनप्रत्ययःत्रयोवंधुरस्यासौत्रिवंधुरः त्रिचक्रादिषुपाठात्त्रिचक्रादीनांछंदस्युपसंख्यानमितिउत्तरपदांतोदात्तत्वंत्रिवृता
त्रिषुलोकेषुवर्ततइतित्रिवृत्क्विपचेतिक्विप्सुपेशसइतिहिरण्यनामशोभनंपेशोयस्यासौसुपेशाःआकृत्यतेभावनुपसर्गस्यप संप्रसारणमगुणा
वदेशाप्रत्ययस्यपित्वादनुदात्तत्वंधातुस्वरः॥ ॥तृतीयामृचमाह॥ अश्विनामेनोधुमत्तमंपातंसोममृतावृधा॥ अथाद्यदस्रावसुविभ्रतारथेदा
श्वांसमुपगच्छतं॥ हेऋतावृधायज्ञस्यवर्धकावाश्विनामधुमत्तमंसोमंपातंदस्राअश्विनासोमपानार्थंअथास्मदाह्वानांतरंअद्यास्मिन्दिने
रथेस्थितौयवसुविभ्रताअस्मदुपयुक्तंधनंधारयंतौदाश्वांसंहविःप्रदंयजमानंउपगच्छतंसमीपंप्राप्नुवंतंविभ्रता॥ डुभृञ्धारणपोषणयोः शत
रिजुहोत्यादित्वात्शपःश्लुःभृञामिदित्यभ्यासस्यत्वंशतुर्ङित्वात्गुणाभावेयणादेशः अभ्यस्तानामादिरित्याद्युदात्तत्वम्॥ ॥चतुर्थीमृचमाह॥ ॥
त्रिषधस्थेवर्हिषिविश्ववेदसामध्वायज्ञंमिमिक्षतं॥ कण्वासोवांसुतसोमाअभिद्यवोयुवांहवंतेअश्विना॥ हेविश्ववेदसासर्वज्ञावश्विनौत्रिषध
स्थेकक्षात्रयरूपेणास्तीर्णेनयात्रिषुस्थानेषुवस्थितेवर्हिषिदर्भस्थितामध्वामधुरेणरसेनयज्ञंमिमिक्षतंसेक्तुमिच्छतं हेअश्विनावांयुष्मदर्थंसुत
सोमाअभिषुतसोमयुक्ताअभिद्यवः अभिगतदीप्तयः अतोलोपइडिचेत्याकारलोपः। सधमादस्थयोःछंदसीतिसहशब्दस्यसधादेशःमध्वा।
आगमानुशासनस्यानित्यत्वात्नुमभावः तृतीयस्यापितुसर्वंछंदसिवावचनमितिवचनान्नाभावाभावश्चमिमिक्षतंमिहसेचनेसनिएकाच
इतीट्प्रतिषेधः हलंतोच्चेतिसनःकित्वात्लघूपधगुणाभावः अभ्यासहलादिशेषादेत्वषत्वानिसुतःसोमोयैस्तेबहुव्रीहिस्वरःअभिद्यवः
रित्यहनमितिनत्वंसंबंधीप्रकाशोलक्ष्यतेअभिगताद्यवोयेषांतेअत्यादयःक्रांताद्यर्थेद्वितीययेतिसमासःअव्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥पंचमीमृचमा
ह॥ याभिःकण्वमभिष्टिभिःप्रावतंयुवमश्विना॥ ताभिःष्वस्माँअवतंशुभस्पतीपातंसोममृतावृधा॥ हेअश्विनायुवंयुवामुभौयाभिरभिष्टिभिरपेक्षिता
भिरूतिभिःकण्वंमहर्षिंप्रावतंरक्षितवंतौहेशुभस्पतीशोभनकर्मणःपालकौताभिरक्षाभिःकण्वंमहर्षिंप्रावतंरक्षितवंतौरस्मानुष्ठातृन्स्ववसुरक्षतं
स्यक्षमन्यतअभिष्टिभिःआभिमुख्येनेष्यंतइत्यभिष्टयःपकलान्निइषुइच्छायांकर्मणिक्तिन्निति पुत्रेत्यादिनेट्प्रतिषेधःएमन्नादिषुछंदसिपररूपंव
क्तव्यमितिपररूपत्वं॥ उपसर्गाश्चाभिवर्जमित्यभिरंतोदात्तः शुभस्पती शुभदीप्तौक्विपचेतिक्विपषष्ठ्याःपतिपुत्रेत्यादिनाविसर्जनीयस्यसत्वं

सं
कपामंत्रितस्यइतिषष्ठ्यंतस्यपरांगवद्भावषष्ठ्यामंत्रितस्यसमुदायस्याष्टमिकंसर्वानुदात्तत्वं॥ ॥इतिप्रथमस्यचतुर्थेप्रथमोवर्गः॥ ॥षष्ठीमृचमाह॥सुदा 209
सेवसुविभ्रतारथेपृक्षोवहतमश्विना॥ रयिंसमुद्रादुतवादिवस्पर्यस्मेधत्तंपुरुस्पृहं॥ हेदस्रौईशानावश्विनौसुदासेशोभनदानयुक्तायराज्ञेपिजवनपु
त्रायरथेवसुविभ्रतायुवांपृक्षोन्नंवहतंप्रापितवंतौसमुद्रादंतरिक्षात्समुद्रइत्यंतरिक्षनामसमुद्रःअध्वरमित्यंतरिक्षनामसुपाठात उतवादिवस्परि 1924
अथवास्वर्गात्पर्याहित्यपुरुस्पृहंवहुभिःस्पृहणीयंरयिंधनंअस्मासुस्थापयतंसुष्ठुददातीतिसुदाः असुनिकृत उत्तरपदप्रकृतिस्वरत्वंदिवस्परिपंच
म्याःपरावध्यर्थइतिविसर्जनीयस्यसत्वं।पुरुस्पृहंवहुभिःस्पृहइच्छायांचुरादिरदंतः पुरुभिःस्पृहणीयइतिपुरुस्पृहःकर्मणिघञ्अतोलोपस्यस्थानिवत्वा
त्लघूपधगुणाभावः।नित्स्वरेणउत्तरपदस्याद्युदात्तत्वंकृदुत्तरपदप्रकृतिस्वरेणतदेवशिष्यते॥ ॥सप्तमीमृचमाह॥ यन्नासत्यापरावतियद्वास्थोअ
धितुर्वशे॥ अतोरथेनसुवृतानआगतंसाकंसूर्यस्यरश्मिभिः॥ हेनासत्यासत्यरहितावश्विनौयत्यदियुवांपरावतिदूरदेशेस्थःवर्तेथयद्वाअथवाअ
धितुर्वशेअधीकसमीपस्थःअतोस्माद्दूरात्समीपाद्वासूर्यरश्मिभिःसाकंसूर्योदयकालसत्वताशोभनवर्तनयुक्तेनरथेननोअस्मान्प्रतिआगतमा
गच्छतंनासत्यासुत्सुभवासत्यौनासत्यौअसत्येनअमत्यें।नासत्यानभ्राणत्यादिनञःप्रकृतिभावःस्थःअसभुविश्नसोरल्लोपाइत्याकारलोपःश्य
इत्तयागादनिघातःगसंगमक्लोटिबहुलंछंदसीतिशपोलुकअनुदात्तोपदेशत्यादिनानुनासिकलोपः॥ ॥अष्टमीमृचमाह॥ ॥अर्वांचा
वांसप्तयोध्वरश्रियोवहंतुसवनेदुप॥ इषंपृंचंतासुकृतेसुदानवआवर्हिःसीदतंनरा॥ हेअश्विनावध्वरश्रियोयागसेविनःसप्तयोश्वाः
सवनेदुपअस्मदनुष्ठेयानिःत्रीणिसवनान्युपलक्ष्यअर्वांचाभिमुखाःयांयुवांवहंतुप्रापयंतुहेनराअश्विनासुकृतेसुष्ठुकर्मकारिणे
सुदानवशोभनदानयुक्तायजमानायेषमन्नंपृंचंतौसंयोजयंतौयुवांवर्हिरासीदतंवर्हिप्राप्नुतंअर्वांचासुपांसुलुगित्याविभक्तेराकारः
अध्वरश्रियःअध्वरंश्रियंतोत्यध्वरश्रियःक्विब्वचिप्रच्छीत्यादिनाक्विपदीर्घश्चवहंतुवहप्रापणेशपःपित्वादनुदात्तत्वंतिङश्चलसार्वधा
तुकस्वरेणधातुस्वरेणाद्युदात्तत्वं॥ पादादित्वान्निघाताभावःसवनाषञ्श्चाभिषवेसूयतेसोमएष्विति सवनानिअधिकरणेल्युट्यार
नादेशःगुणावादेशौलितिइतिप्रत्ययात्पूर्वस्योदात्तत्वं।शेछंदसिबहुलमितिशेर्लोपः पृंचंतौपृचीसंपर्केशतरिरधादित्वात्श्नमश्नु
सोरल्लोपइतिप्रकृतिस्वरःसुकृतसुकर्मपापेत्यादिनाकरोतेर्भूतकालेक्विपह्रस्वस्यपितिइतितुकसुदानवेशोभनंदानुदानंयस्यासौ
सुदानुःदानुशब्दोनुप्रत्ययांतआपदातःअपस्कदात्तघञ्छंदसीतिवहुव्रीहौस्वरनरपदाद्युदात्तत्वंसीदतंषद्लृविशरणगत्यवसादनेषु
॥ ॥नवमीमृचमाह॥ ॥तेननासत्यागतंरथेनसूर्यत्वचा॥येनशश्वदूहथुर्दाशुषेवसुमध्वःसोमस्यपीतये॥ ॥हेनासत्यासूर्यत्वचासूर्य
इवसूर्यरश्मिसदृशेनवातेनप्रसिद्धेनरथेनआगच्छतंदाशुषेहविर्दत्तवतेयजमानायवसुधनंशश्वत्सर्वदायेनरथेनऊहथुःप्र
वितवंतौतेनरथेनेतिपूर्वत्रान्वयःकिमर्थमागमनमितितदुच्यते॥मध्वोमधुरस्यसोमस्यपीतयेसोमपानार्थंसूर्यत्वचात्वचसंवरणे।
त्वचतिवृणोतीतित्वग्रश्मिःसूर्यस्त्वगिवत्वग्यस्यसउपमानात्यादिनावहुव्रीहिरुत्तरपदलोपश्चसूर्यशब्दःप्रपूरणेइत्यस्मातस्य
पिराजसूयेत्यादिनारउगागमसहितोनिपातितःप्रत्ययस्यपित्वादनुदात्तत्वेधातुस्वरेणाद्युदात्तःसएवबहुव्रीहौपूर्वपदप्रकृतिस्वर
णशिष्यतेऊहथुःवहप्रापणेलिटिअसंयोगाल्लिट्कितीतिलिटःकित्वेवचिस्वपीत्यादिनासंप्रसारणंअभ्यासहलादिःशेषः

भा॰प्र॰ पुरूवसू प्रभूतधनावश्विनौ अवसे अस्मद्रक्षणार्थं उक्थेभिरर्कैः शस्त्रैः अर्कैश्च ॥ ॥ दशमीमृचमाह ॥ उक्थेभिरर्वागवसे पुरूवसू अर्कैश्च नि ह्वयामहे ।
शश्वत्कण्वानां सदसि प्रिये हि कं सोमं पपथुरश्विना ॥ साधनैः स्तोत्रैश्च अर्वागस्मदभिमुखेन नि ह्वयामहे नितरामाह्वयामः हे अश्विनौ कण्वानां कण्व
१०६ पुत्राणां विनां वा प्रिये सदसि यज्ञस्थाने शश्वत् सर्वदा सोमं पपथुः हि कं युवां पीतवन्तौ खलु ॥ उक्थेभिः बहुलं छन्दसीति भिस ऐसादेशाभावः बहुवचनेन
व्यदित्वं ॥ अर्कैः अर्कः कच्छतौ । पुंसि संज्ञायां घः प्रायेणेति करणे घः बज्ञाः कुधिशा पतोरिति कुत्वं ॥ निह्वयामहे ॥ निसमुपविभ्यो ह्व इत्यात्मनेपदं
सदसि सी ह्निनि सदः अस्मुनानिनाद्याद्युदात्तत्वं । पपथुः पाधातोर्लिटि आतो लोप इटि चेत्याकारलोपः । प्रत्ययस्वरः हि चेति निघातप्रतिषेधः
॥ ॥ इति प्रथमस्य चतुर्थे द्वितीयो वर्गः ॥ ॥ सह वामेनेति षोडशर्चं पंचमं सूक्तं प्रस्कण्व ऋषिः बार्हतस्यत्वाद्युजो बृहत्यः उषा देवता षोडशो
यस्यांत्वित्यनुक्रमणिका प्रातरनुवाकउषस्ये क्रतौ बार्हते छंदसि उषस्ये सूक्तं ॥ अथाप्यस्य खंडउसत्रिंतं प्रत्यक्त्यर्दशो सहवामेनेति बार्हतमिति । तथा
श्विनशस्त्रेऽप्येतत्सूक्तं प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् ॥ ॥ तत्र प्रथमामृचमाह ॥ सह वामेन न उषो व्युच्छा दुहितर्दिवः ॥ सह द्युम्नेन बृहता विभा
वरि राया देवि दास्वती ॥ हे दुहितर्दिवः द्युलोकस्य पुत्रि उषः कालस्य देवते अस्मदर्थं वामेन धनेन सह व्युच्छ उच्छ उछी विवासे दुहितर्दिवः सुबामंत्रिते परांग
वत्स्वरे इत्यत्र परमपि छंदसीति वचनात् दिव इत्यस्य पूर्वांगवद्भावे सति आमंत्रितस्य चेति षष्ठ्यामंत्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वं । बृहता बृह
न्महतोरुपसंख्यानमिति विभक्त्युदात्तत्वं ॥ विभावरि भा दीप्तौ आतो मनिन्निति आदिना वनिप् वनो र चेति ङीप् तत्सन्नियोगेन नकारस्य रेफादेशः संबु
द्धौ ह्रस्वत्वं दास्वती दाशृ दाने भावे असुन् प्रत्ययः दाः दानमस्यास्तीति दास्वती मादुपधाया मतुपो वत्वं उगितश्चेति ङीप् ॥ ॥ द्वितीयामृचमाह ॥
अश्वावतीर्गोमतीर्विश्वसुविदो भूरि च्यवन्त वस्तवे ॥ उदीरय प्रति मा सूनृता उषश्चोद राधो मघोनां ॥ अश्वावतीः बहुरश्वोपेताः गोमतीः बहुभिर्गो
भिर्युक्ताः विश्वसुविदः कृत्स्नस्य धनस्य सम्यक् लंभयित्र्यः उषा देवताः वस्तवे प्रजानां निवासाय भूरि प्रभूतं यथा भवति तथा च्यवन्त प्राप्ताः हे उषो देव
ते मा प्रति मामुद्दिश्य सूनृताः प्रियसहिता वाचः उदीरय ब्रूहि मघोनां धनवतां संबंधि राधो धनं चोदय अस्मदर्थं प्रेरय । अश्वावती मंत्रे सोमाश्वेंद्रिय
विश्वदेव्यस्य मताविति पूर्वपदस्य दीर्घत्वं । वा छंदसीति पूर्वसवर्णदीर्घः निषेधस्य पाक्षिकत्वात् पूर्वसवर्णदीर्घत्वं ॥ च्यवन्त च्युङ् गतौ लङि बहुलं छंद
स्यमाङ्योगेऽपीत्यडभावः ॥ वस्तवे वस निवासे तुमर्थे सेसेनिति तवेन् प्रत्ययः नित्वादाद्युदात्तत्वं उदीरय ईर गतौ कंपने च हेतुमति णिच् चुरादिः संवादने चोरादि
कः लोटि छंदस्युभयथेति आर्धधातुकत्वात् णेरनिटीति णिलोपः शपः पित्वादनुदात्तत्वे धातुस्वरः पादादित्वान्निघाताभावः मघोनां च
वन्बहुवचने श्वयुवमघोनामतद्धिते इति संप्रसारणं ॥ ॥ तृतीयामृचमाह ॥ उवासोषा उच्छाच्च नु देवी जीरा रथानां ॥ ये अस्या आचरणेषु दध्रिरे
समुद्रे न श्रवस्यवः ॥ उषाः देवी उवास पुरा निवासमकरोत् । प्रभातं कृतवतीत्यर्थः ॥ च नु अथापि उच्छात् व्युच्छति प्रभातं करोतु । कीदृशी देवी रथानां जी
रा प्रेरयित्री उषः काले हि रथाः प्रेर्यन्ते अस्याः उषसः आचरणेषु आगमनेषु पुरः रथादिरथाः धृताः सज्जीकृता भवंति तेषां रथानामिति पूर्वत्रान्वयः १०६
रथप्रेरणे दृष्टान्तः श्रवस्यवो धनकामाः समुद्रे नावः यथा समुद्रमध्ये नावः सज्जीकृत्य प्रेरयंति तद्वत् उवास वस निवासे णलि लिट्यभ्यासस्योभयेषामि
ति अभ्यासस्य संप्रसारणं शासिवसिघसीनां चेति षत्वं पूर्वस्यादात्तत्वं उच्छात् ॥ उच्छात् लेटि आडागमः इतश्च लोपः तुदादिभ्यः शः । आगमानुदात्त
ते प्रत्ययस्वरः । उषा इत्यस्य वाक्यान्तरगतत्वात् तदपेक्षया अस्य निघातो न भवति ॥ समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात् ॥

तीत्युषा गत्यर्थः । मा वां धातुः आर्धधातुकस्येति इट् प्रत्ययः अस्याः उदमान्यादेशो उत्यादेशोऽनुदात्तः विभक्तेरपि मतुप्लोपात् अनुदात्तेति सर्वानुदात्तत्वं ॥
आचरणेषु चर गत्यर्थः इति चरतिर्विभावस्य ल्युट् चरणप्रत्ययान्तपूर्वस्यादात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वं दध्रिरे ॥ धृङ् अवस्थाने । लिटः कित्वात् 211
गुणाभावे यणादेशः चितान्तोदात्तत्वं । यच्छब्दयोगादनिघातः ॥ श्रवस्यवः श्रूयत इति श्रवो धनं अस्मुन् तदात्मन इच्छंतीति श्रवस्यवः क्यचः आत्मनः
क्यच् क्याच्छन्दसीति उप्रत्ययः ॥ ॥ चतुर्थीमृचमाह ॥ उषो ये ते प्र यामेषु युञ्जते मनो दानाय सूरयः ॥ अत्राह तत्कण्व एषां कण्वतमो नाम गृणाति नृणां ॥ हे 1924
उषः ते तव यामेषु आगमनेषु मनस्ये यत्सर यान्ति सूरयः दानाभियुक्ताः दानाय धनादिदानार्थं मनः स्वकीयं प्रयुञ्जते प्रेरयंति दानशीलाः उदाराः प्रभवः प्रा
तः काले दातुमिच्छंतीत्यर्थः । एषां दातुमिच्छतां नृणां नेतॄणां नामदानं विषयलोकप्रसिद्धं नाम कण्वतमोऽतिशयेन मेधावी कण्वानां महर्षिरत्राह अत्रैव उषः का
लेनात्र उच्चारयति यो दातुमिच्छति यश्च नामग्रहणेन दातारं प्रशंसति तावुभावप्युषः काले एव तथा कुरुतः इदुक्षयः सः स्कृतिः गृणाति शब्दे क्र्यादिकः
शब्दानां ह्रस्व इति ह्रस्वत्वं गृणानामिति नः चाति दीर्घप्रतिषेधः न चान्यतरस्यामिति विभक्त्युदात्तत्वं ॥ ॥ पंचमीमृचमाह ॥ ॥ आ घा योषेव सूनर्युषा या
ति प्रभुञ्जती ॥ जरयन्ती वृजनं पद्वदीयत उत्पातयति पक्षिणः ॥ उषा देवी प्रभुंजती प्रकर्षेण सर्वं पालयंती आयाति प्रतिदिनमागच्छति खलु ॥ तत्र दृष्टांतः
सूनरी सुष्ठु नरीवृत्यसनेत्री योषेव गृहिणीव कीदृशी उषाः वृजनं गमनशीलं जंगमं प्राणिजातं जरयंती जरां प्रापयंती अस्मत् उषस्याः सतायां वयोहा
न्या प्राणिनां जीर्णा भवंति किं च उषः काले पद्वत् पादयुक्तं प्राणिजातं ईयते निद्रां परित्यज्य स्वस्वकार्यार्थं गच्छति किंच इयमुषाः पक्षिणः उत्पातयति प
क्षिणो ह्युषः काले समुत्थाय तत्र तत्र यंति । घ ऋचि तु नुघ इति सांहितायां दीर्घः मक्षुन इति णत्वं ॥ नरीः ॥ तन्नये अच इति इच प्रत्ययः गतिसमासेकृ
त्स्वरेण गतिकारकपूर्वपदस्यापि ग्रहणमिति वचनात् कृदिकारादक्तिन इति ङीप् । परादिश्छंदसि बहुलमित्यकारस्यानुदात्तत्वं निपातस्येति पूर्वपदस्य दीर्घः
। प्रभुंजती भुज पालनाभ्यवहारयोः रुधादित्वाच्छ्नम् श्नसोरल्लोप इत्यकारलोपः उगितश्चेति ङीप् शतुरनुम इति नद्या उदात्तत्वं तिनं वृजनीवर्जना
वृत्यनेति वर्जनं प्राणिजातं ... कृदातिविक प्रत्ययः विलात् लघूपधगुणाभावः योरनादेशो प्रत्ययस्वरः ॥ पद्वत् पद पादः तदस्या
स्तीति पद्वत् यतिमरतं । व्यत्ययेन मतुप् उदात्तत्वं । न चेवस्यविधानं ज्ञानस्याविद्यमानत्वे सति ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वमिति वाच्यम् ॥ ह्रस्वादित्येव वर्ण
अपुनर्नुड्ग्रहणसामर्थ्यादेव परिभाषानाश्रीयत इति वा युक्तं इतरथा हि मरुत्वानित्यत्रापि मतुप उदात्तत्वं स्यात् ॥ ॥७॥ इति प्रथमस्य चतुर्थे तृतीयो
वर्गः ॥ ॥ षष्ठीमृचमाह ॥ वि या सृजति समनं व्यर्थिनः पदं न वेत्योदती ॥ वयो नकिष्टे पप्तिवांस आसते व्युष्टौ वाजिनीवति ॥ या देवता समीचीनं चेष्टा
वंतं पुरुषं विसृजति प्रेरयति । गृहीरा मादिवद्यावुः काल्यकालः प्रयत्नादुत्थाप्य स्वस्वव्यापारे प्रेरयतीति प्रसिद्धं किंच ॥ उषा अर्थिनो याच
कानपि विसृजति तथा ह्युषः काले समुत्थाय स्वकीयदातृगृहं गच्छंति । ओदती उषो देवता पदं स्थानं न वेति न कामयते उषाः काले द्वौ प्रेंग च्छतीत्यर्थः ॥ हे वा
जिनीवति उषो देवते व्युष्टौ त्वदीयप्रभातकाले पप्तिवांसः तपनः व्युक्ताः वयः पक्षिणः न किरासते । नकि सेति किं तु स्वस्वनीडाद्विनिर्गत्य गच्छंतीत्यर्थः
सृजति सृज विसर्गे तुदादित्वाच्छः तस्य ङित्वात् लघूपधगुणाभावः । प्रत्ययस्य पित्वादनुदात्तत्वे विकरणस्वरः यद्वृत्तयोगादनिघातः । ओदति
उंदी क्लेदने । उनत्ति मर्येना ... ओदती उषाः शताव्यत्ययेन शप् व्यत्ययेनानुनासिकलोपे लघूपधगुणः उगितश्चेति ङीप् आगमानुशासनस्यानि
त्यत्वान्नुमभावः शपः पित्वादनुदात्तत्वं शतुरदुपदेशात्सार्वधातुकादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं अंतोदात्तादुत्तरपदादन्यतरस्यामिति धानांतुनकि

भा॰ प्र॰ ए युष्मा ननश्चयं नः पादमिति पत्वं पत्रिवासः पद्लृ गतौ लिटः क्वसुः क्रादिनियमात्प्राप्त इट् वस्येकाजाद्घसामिति नियमान्न प्राप्नोति। तच्छिपतेसर्व
विधीनां छन्दसि विकल्पितत्वात् तनिपत्योश्छन्दसीत्युपधालोपः द्विर्वचनं चातिल्लानि वड्वा वानाद्भावः प्रत्ययस्वरः वाजिनीवति वाजोऽन्नं अस्यास्ती
१०७ ति वाजिनी क्रियामन्वर्थ इयइति कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः इति च्विः यस्याः सा तदस्यास्तीति मतुप् संज्ञायामिति मतुपो वत्वं॥ ॥सप्तमीमृचमाह॥ एषा
युनक्ति परावतः सूर्यस्योदयनादधि। शतं रथेभिः सुभगोषा इयं वियात्यभि मानुषान्॥ एषा उषादेवतानां अयुनक्ति स्वकीयानां रथानां शतं योजित
वती। सुभगा सौभाग्ययुक्ता इयमुषाः परावतो दूरस्थानात् सूर्यस्योदयनात्स्थानादधिकात् द्युलोकान्मानुषानभि मनुष्यानुद्दिश्य रथेभिः शतसंख्याकैर्युक्तैः
रथैर्वियाति विविधं गच्छति अयुनक्तेर्युजिर् योगे लङि श्नसोरल्लोप इति लोपः उदयनात् उदित्यस्य उदयनं इणगतौ अधिकरणे ल्युट् कृदुत्तरपदप्रकृतिस्वर
त्वं। सुभगा भगो भाग्यं शोभनो भगो यस्याः सा आद्युदात्तं द्व्यच्छन्दसीति उत्तरपदाद्युदात्तत्वं मानुषान् मनोः पुत्रा मानुषाः मनोर्जातावञ्यतौ षुक् चेत्यञ् षुगा
गमश्च नित्त्वादाद्युदात्तत्वं॥ ॥अष्टमीमृचमाह॥ विश्वमस्या नानाम चक्षसे जगज्ज्योतिष्कृणोति सूनरी। अप द्वेषो मघोनी दुहिता दिव उषा उच्छदप स्रि
धः॥ विश्वं सर्वं जगत् जंगमं प्राणिजातं अस्या उषसश्चक्षसे प्रकाशाय ननाम प्रह्वीभवति रात्रौ तमसि मग्नाः सर्वे जनाः तन्निवारयित्रीमुषसमुपल
भ्य नमस्कुर्वन्तीत्यर्थः। कुतः यस्मात् सूनरी सुष्ठु नेत्री अभिमतफलस्य प्रापयित्री उषाः ज्योतिष्कृणोति सर्वं प्रकाशयति। किंच। मघोनी मघवती दिवो
दुहिता द्युलोकस्य कन्या उषा द्वेषः द्वेष्टॄनप उच्छत् अपवर्जयति तथा स्रिधः शोषयितॄनप उच्छत् अपवर्जयति तस्मादिदमस्य
पनिर्णयः परिहारमेतदुभयं ततो उषादेवतां विश्वं जगन्नमस्करोतीत्यर्थः। अस्या इदमोन्वादेश अशनुदात्तस्तृतीयादाविति अनुदात्तः विभक्तिश्च सुप्त्वादनुदात्तेति सर्वानुदा
त्तत्वं। ननाम संहितायामन्येषामपि दृश्यत इत्यभ्यासस्य दीर्घत्वं तुजादित्वेन तु ज्ञातव्यं इत्यादिनैव पदकालेदीर्घः श्रूयते ज्योतिः ज्युत दीप्तौ इसिन्नितिअनु
वृत्तौ इत्सः सामर्थ्यं इतिविसर्जनीयस्य षत्वं इदुदुपधस्य चाप्रत्ययस्येति। अन्येभ्योऽपि दृश्यन्त इति विच् लघूपधगुणः। मघोनी मघं धनं तत्संभजति मघा
नी श्वन्नुक्षन्नित्यादिना मघवन् शब्दः कनिन्प्रत्ययान्तो निपातः स्त्रियामृन्नेभ्यो ङीप् भसंज्ञायां श्वयुवमघोनामतद्धित इति संप्रसारणं उच्छत् उछी
विवासे विवासो वर्जनं छन्दसि लुङ्लङ्लिटः इति वर्तमाने लङ् बहुलं छन्दस्यमाङ्योगेऽपीत्यडागमाभावः स्रिधः स्रिधु शोषणे क्विप् चेति क्विप्॥
॥ ॥नवमीमृचमाह॥ उष आ भाहि भानुना चन्द्रेण दुहितर्दिवः॥ आवहन्ती भूर्यस्मभ्यं सौभगं व्युच्छन्ती दिविष्टिषु॥ हे दिवो दुहितः द्युलोकस्य पुत्रि
उषः उषादेवते चन्द्रेण सर्वेषामाह्लादकेन भानुना प्रकाशेन आ समन्तात् भाहि प्रकाशमाविष्कुर्वती। दिविष्टिषु दिवसेषु अस्मभ्यं भूरि प्रभूतं सौभाग्यं अस्मभ्यं आ
वहन्ती संपादयन्ती तथा व्युच्छन्ती तमांसि वर्जयन्ती॥ उषः षष्ठिकामान्त्रितात्वादानत्वं। दुहितर्दिवः परमपि छन्दसीति दिव इत्यस्य पदस्य पराङ्गवत्वं
संबोधनैकवाक्यत्वे आमन्त्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वं॥ आवहन्ती शप्पित्त्वादनुदात्तौ शतुश्चादुपदेशात् सार्वधातुकस्याष्टमिकं
मुदात्तत्वं। अंतो धातुस्वरः शिष्यते। समासे कृदुत्तरपदप्रकृतिस्वरत्वं। भूरि प्रभवति न विनश्यतीति भूरि अदिशदिभ्रूशुभिभ्यः क्रिन्निति क्रिन
१०७ नित्वादाद्युदात्तत्वं सौभगं भगस्य भावः सौभगं भगास्येन्द्रस्तु द्वात्त्रिंशपानात् अणप्रत्ययः। हृद्भगसिन्ध्वन्ते पूर्वपदस्य च त्वेति उभयपदवृद्धिमादायां
सर्वविधयः छन्दसि विकल्प्यन्त इति वचनात् उत्तरपदवृद्धिर्न भवति इति तन्नायुक्तं व्युच्छन्ती उछी विवासे वर्जने तादादिकः अदुपदेशात् सार्वधा
तुकानुदात्तत्वे विकरणस्वरः दिविष्टिषु दिविष्टिशब्देन दिविष्टि आदित्यालक्ष्यते तस्य उदयाद्यष्टानि गमनानि येषु दिवसेषु ते दिविष्टयः बहुव्रीहौ

पूर्वपदप्रकृतिस्वरत्वं॥ ॥दशमीमृचमाह॥ ॥ विश्वस्य हि प्राणनं जीवनं त्वे वि यदुच्छसि सूनरि। सा नो रथेन बृहता विभावरि श्रुधि चित्रामघे हवं॥
हे सूनरि उषादेवि विश्वस्य सर्वस्य प्राणिजातस्य प्राणनं चेष्टनं जीवनं प्राणधारणं च त्वे त्वयि हि त्वय्येव वर्तते यस्मात् त्वं व्युच्छसि तमांसि वर्जयसि हे
विभावरि विशिष्टकान्तियुक्ते सा तादृशी त्वं नोऽस्मान् बृहता प्रौढेन रथेन यागार्थं आगच्छ तथा हे चित्रामघे विचित्रधनयुक्ते उषादेवि नः अस्मदीयमाह्वा
नं श्रुधि शृणु प्राणनं॥ अन च प्राणात् ल्युट् चेति भावे ल्युट् यानाद्युदात्तः समासे अनितेरिति उपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णत्वं। नन्वनितेरि
ति इयं निर्देशात् अथ मनन चेष्टायामित्यस्य णत्वं न सिद्ध्येत् जीवनस्य पृथगुपादानात् नैतच्च धातूनामनेकार्थत्वात् समासे कृदुत्तरपदप्रकृतिस्वरत्वं संहिता
यां कान्दशब्दस्य रणकादर्शनाद्भ्यासस्य लुगिति प्रमत्यामुडादेशः। प्रशस्तिप्रीतिवाससीतादादिकः सिपः पित्त्वादनुदात्तत्वे विकरणस्वरः
निघातो यद्योगे इति निघातप्रतिषेधः सूनरी सु पूर्वान्नयतेर्नित्त्वान्नसंस्तु नय इत्यस्मात् नयतेरित्यादिना ड्वुन्प्रत्ययः प्रतिसमासेऽपि नयतेर्णत्वं गति
कारकोपपदस्य कृत्यकृत् कृदाकारोदात्तत्वं इति डीपौ निपातस्य चेति पूर्वपदस्य दीर्घत्वं। परादिश्छन्दसि बहुलमित्युत्तरपदाद्युदात्तत्वे प्राप्ते आ
मन्त्रितस्य चेत्याष्टमिकं निघातः विभावरि विपूर्वाद् भातेः आतो मनिन्क्वनिब्वनिपश्चेति वनिप् वनोर च इति ङीपततसंनियोगेन नकार
स्य रकारादेशः ग्ल धिकृश्छ्रुणुप्रकृष्ट्यभ्यश्चेति दीर्घत्वं विकरणस्य लुक् इति पित्त्वेन प्रत्ययस्वरेणातोदात्तत्वं पादादित्वान्निघाताभावः मघमिति धन
नामचित्रं मघं यस्याः सा चित्रामघा अन्येषामपि दृश्यत इति संहितायां पूर्वपदस्य दीर्घत्वं हवं ह्वेञ् स्पर्धायां शब्दे च भावेनुपसर्गस्य इत्यप्
प्रत्ययः तत्संनियोगेन संप्रसारणं च॥ ॥इति प्रथमस्य चतुर्थे चतुर्थो वर्गः॥ ॥एकादशीमृचमाह॥ उषो वाजं हि वंस्व यश्चित्रो मानुषे जने।
तेना वह सुकृतो अध्वराँ उप ये त्वा गृणन्ति वह्नयः॥ हे उषः वाजं विलक्षणमन्नं हि श्रुतिप्रसिद्धं वंस्व याचस्व स्वीकुर्वित्यर्थः। यो वाजश्चित्र
श्चायनीयः मानुषे मनुष्ये जने तत्र यजमाने वर्तते तं वाजमिति पूर्वेणान्वयः। तेन कारणेन सुकृतः सुष्ठु कृतवतो यजमानान् अध्वरान् हिंसा
रहितान् यागान् उप आवह प्रापय यं यजमानं वह्नयो यज्ञनिर्वाहकाः स्तोतारो गृणन्ति स्तुवन्ति तान् सुकृत इति पूर्वेण संबंधः एतदुक्तं भवति यज
मानैः प्रत्तं हविः स्वीकृत्य पुनरपि तान् यज्ञं संपादयति वज्रजगतो। कर्मणि घञ् अजिव्रज्योश्चेत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वात्
वाज्यावास्यमित्यत्र पि कुत्वाभावः कर्षात्वत इत्यन्तोदात्तत्वं प्राप्तं घञादित्वाद्यादात्तत्वं॥ वंस्व वनु याचने अनुदात्तेत् व्यत्ययेन धनुना तदुत्त
रभावाः सौकारान्ते लङ्बहुलं छन्दसीति विकरणस्य लुक् अनुदात्तत्वात्सार्वधातुकानुदात्तत्वे धातुस्वरः हिचेति निघातप्रतिषेधः सु
कृतः सुकर्मपापमन्त्रपुण्येषु कृञ इति क्विप् तुगागमः। कृदुत्तरपदप्रकृतिस्वरत्वं। अध्वरान् ध्वरतिर्हिंसाकर्मा तदभावोऽत्र बहुव्रीहौ नञसु
भ्यामित्युत्तरपदान्तोदात्तत्वं॥ अध्वरानित्यस्य उपेतत्वमतात कर्तरीमितमाभाति कर्मसंज्ञायां कृतस्य तु अकथितं चेति निरात्वे ह्यावे हर तेश्चेति द्विक
र्मकत्व वहतेः पाणिनिता अध्वरानित्यत्र नकारस्य संहितायां दीर्घादटि समानपादे इति रुत्वं। अतोऽटि नित्यमिति पूर्वस्याकारस्यानुनासिका। गृणन्ति गॄ
शब्दे क्र्यादिभ्यः श्ना प्वादीनां ह्रस्व इति ह्रस्वत्वं श्नाभ्यस्तयोरात इत्याकारलोपः प्रत्ययस्वरः यद्वृत्तयोगादनिघातः॥ ॥द्वादशीमृचमाह
॥ विश्वान्देवाँ आ वह सोमपीतयेऽन्तरिक्षादुषस्त्वं। सास्मासु धा गोमदश्वावदुक्थ्यमुषो वाजं सुवीर्यं॥ हे उषः त्वं सोमपीतये सोमपानाय
अन्तरिक्षात् अन्तरिक्षलोकात् विश्वान् देवान् आवह अस्मदीयं देवयजनदेशं प्रापय। हे उषः सा तादृशी त्वं गोमत् गोमन्तं बहुभिर्गोभि

213
1924

भा॰ प॰ युक्तं अश्ववन्तं अश्वैर्युक्तं तु उक्थ्यं प्रशस्यं गव्यं गवीयं गोभिर्नवी यां एतं वाजं अन्नं अस्मासु धानिधेहि स्थापयेत्यर्थः॥ धाः इ धातेः छंदसि लुङ्लङ्लि
१०८ टः इति प्रार्थनायां लुङ्। गतिर्गतौ इति निघातः। ऊर्ध्वं वृजनं ह्रस्वमाध्योगपीय्य ३ भावः। गोमत अश्वावत मंत्रे सोमाश्वेंद्रिय इति मतुपि दीर्घत्वं। गुरूपवल्क
पाणां नुमिति विभक्तेर्लुक्। इकड उक्थ्यं सोऽर्हन्नभवमुक्थ्यं भाव छंदसि निघातस्वरो वर्तितव्य यस्याकेंद्रसि निवृत्यंत इति यतोनावत्या युदात्तत्वाभा
वतिक्तवरिति मतिमस्वरितत्वं। उषः आमंत्रिता युष्मदात्तं पादादित्वान्निघाताभावः। गवीयं गोभ्यं वीर्यं यस्य वरिवीयोर्नेत्यकुत्तरपदा युदात्तत्वं॥ ॥
नवमीमृचमाह॥ ॥यस्या रुशंतो अर्चयः प्रति भद्रा अदृक्षत॥ सानो रयिं विश्ववारं सुपेशसमुषा ददातु सुग्म्यं॥ यस्या उषसः अर्चयः
प्रकाशाः रुशंतः दीप्यमानाः हिंसंतः भद्राः कल्याणाः अस्मद्भूतनप्रतिदृश्यंत मातथाभनाउषाः नोस्मभ्यं रयिं ददातु कीदृशं रयिं विश्ववारं विश्व
वारं सर्वैर्वरणीयं सुपेशसं पेश इति रूपनाम शोभनरूपोपेतं सुग्म्यं सुष्ठु गंतव्यं सुगमं सुग्म्यमिति सुम्ननाम तत्सुखयितव्यं वा
तः रुशाहिंसायां आत्मने पदाविहतस्य अदुपदेशात् सार्वधातुक अनुदात्तत्वे सतिशिष्टत्वाद्विकरणस्वरेणामस्य यथेनाघुदात्तत्वं अदृक्ष
त दृशेः कर्मणि लुङि तस्यात्मनेपदे झः क्सः सिन्नन इट् इतिवर्स प्रतिषेधः पूर्वावरलीड प्रतिषेधः लिङ्सिचावात्मनेपदेष्विति सिचः कित्वा
त् लघूपधगुणाभावः सर्वत्र विभाषा गोरिति प्रकृतिभावः तिङतिङ इति निघातः॥ अडागमो दात्तः यद्वृत्तयोगात् निघातः विश्ववा
रं विश्वैर्वरणीयं विश्ववारः कर्मण्यण् विश्वस्य वसुराटोरिति पूर्वपदस्य दीर्घत्वं दान्तं सुग्म्यं सुष्ठु
गंतव्यः सुगमः गम घं अर्थे विधानमिति प्रत्ययः गम हन इति उपधालोपः तत्र भवः सुग्म्यं भव छंदसीति यतो नाव उत्या घुदात्तत्वं।
॥ ॥चतुर्दशीमृचमाह॥ यच्चिद्धि वामपयः पूर्व ईतयज्जुहूरेवसमहि॥ मानुस्तामा अभिगृणीहि राधसा पः शुक्रेण शोचिषा॥ हे महि
महिते पूजनीये वाउषो दिवनसो यच्चिद्धि यस्मादेवप्रभृतयः पूर्वदिवसे तनाकुप्यामर्त्त इत्यारः ईतयेरक्षणाय अवकृत्यंननाम अवसे अन्ना
य च जुहूरे जुहुवुः आहूतवंतः स्वकृपमंत्रणं तं इत्यर्थः॥ हे उषः सा ता स्तोतृराधसाअन्नेभिर्देवेनहविर्लक्षणेन धनेन शुक्रेण शोचि
षा दीप्तेन तमानियावर्धितुं समर्थेन तेजसा वा पलक्षितमनीतपाम परणामिव नोस्मान्कृतो मानभिगृणीहि भिलश्यगृणाहि सम्यक् स्तुतिम
ति शब्द्य अस्मदीयाभिस्तुतिभिः मंत्रु त्वाभवत्यर्थः॥ ईत्यव अवतेः क्तिन् तिस्वरत्वात् स्यानिघायवपधाय्याष्वाद् इति पूतीत्यादिनान्निपातनादान्तत्वं नि
पातितः॥ जुहूरे ह्वेञ् स्पर्धायां शब्दे च लिटि अभ्यासस्य चेति द्विर्वचनात् पूर्वमेव अभ्यासकारणं ह्वयतेः संप्रसारणं अभ्यासस्य या ध
यतिः अभ्यासस्य कयतिः यस्तस्य कारणमिति व्याख्यातत्वात्। परपूर्वत्वे सत्यूह इति दीर्घत्वं द्विर्वचनादीनि उरयोरिति उरत्वं आद इति
इत्यंता युदात्तत्वं॥ यद्वृत्तयोगान्निघातः॥ तत्र उपञ्च मिनिर्दिष्ट अधि व्यवहितेपि कार्यं भवतीत्युक्तं॥ महि महत् पूजायां अणादिरुप्रत्ययः अ
द्रिकारादिकत्व इति ङीप् मंबुद्धावंबार्थनद्योर्ह्रस्वत्वं। स्तोमान् संहितायां नकारस्य रुत्वा यु कं नि त्वादा युदात्तत्वं गृणीहि गृ शब्दे क्र्यादिकः श्नातिघा १०८
तीनां ह्रस्व इति ह्रस्वत्वं अथ सांगं आत्मन नत्रिराधो अस्मान् अनि त्वादायुदात्तत्वं उषः पादादित्वादाष्टमिकनिघाताभावे पाष्ठिक आमंत्रिता युदा
त्तत्वं॥ ॥पंचदशीमृचमाह॥ उषो यदद्य भानुना विद्वारावृणवो दिवः॥ प्रनोयच्छतादवृकं पृथुच्छर्दिः प्रदेवि गोमतीरिषः॥ हे उषः त्वं अ
द्यास्मिन् प्रभातसमये यद्यस्मात् भानुना प्रकाशेन दिवोंतरिक्षस्य द्वारौ द्वारभूतौ पूर्वपरदिग्भागौ अंधकारेण छादितौ व्यूणोः विवृ

स्याप्रापोसि तस्मात्त्वं नोस्मभ्यं छर्दिरंतराले प्रयच्छ तातान् देहीत्यर्थः। कीदृशं छर्दिः अवृकं हिंसकरहितं पृथु विस्तीर्णं अपि च हे देवि देवनशीले गोमतीर्बहु
भिर्गोभिर्युक्ता इषो ऽन्नानि प्रत्युपसर्गस्यार्थे नः प्रयच्छतादित्यनुषज्यते प्रयच्छतात्। नः हाम् मनस्यास्म द्वक्षणार्थेतादस्मभीप्सहादिकं प्रयच्छेत्यर्थः।
छर्दिरिति गृहनाम छर्दिः छर्दिरितितं नाम सु पाठात् कृण्वः। कृणगत्ना। छादेर्गत्न्ताकिड् सिपितनादितादु प्रत्ययः ततोऽस्य येन ऋषिपि गुणावादेशो
दापः पित्वा रनुदात्तत्व उप्रत्ययः ततोऽस्य येन ऋषिपि गुणावादेशोपः इत्वरः क्रियते। यद्वृत्तयोगान्निघातः दिवः ऊडिदमित्यादिना विभक्तेरुदा 215
त्तत्वं। प्रनः उपसर्गाद्बहुलमिति वहुलवचनात् णत्वाभावः यच्छतात् दाण दाने वाघ्राध्माद्यादिना यच्छादेशः अवृकं नास्ति वृकोस्मिन्निति 1924
बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं पृथु पृथुस्त्वाने। पृथुस्तरदस्त्वांसंप्रसारणं सलोपश्चेति कुप्रत्ययः संप्रसारणं च छर्दिरिति
गृहनाम उच्छृदिर्दीप्तिदेवनयोः अर्चिशुचिहुसृपिछदिछर्दिभ्य इसिरिति सिप्रत्ययः लघूपधगुणः प्रत्ययःस्वरः॥ ॥षोडशीमृचमाह॥ संनोरा
या बृहता विश्वपेशसा मिमिक्ष्वा समिळाभिरा॥ सं द्युम्नेन विश्वतुरोषो महि सं वाजैर्वाजिनीवति॥ हे उषः नोस्मान् राया धनेन संमिमिक्ष्व संच
संयोजयेत्यर्थः। कीदृशेन धनेन बृहता प्रभूतेन विश्वपेशसा पेश इति रूपनाम बहुविधरूपयुक्तेन तथा इळाभिः गोभिश्चास्मान् संमिमिक्ष्व इ
केति गोनाम इगतीति तं नाम सुपाठात् आकारः॥ समुच्चयपदं तेन वर्तमानत्वात् उक्तं च॥ तत्तस्मिन्नर्थे एवमेवमपि तत्राप्यत्राकार इति चं
हे महि महती ये उषा देवते द्युम्नेन यशसा संमिमिक्ष्व द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः। कीदृशेन द्युम्नेन विश्वतुरा सर्वेषां शत्रूणां हिंसक
न तथा हे वाजिनीवति अन्नसाधनभूतक्रियायुक्ते वाजैरन्नैरस्मान् संमिमिक्ष्व। अन्नं वै वाज इति श्रुत्यंतरात् राया ऊडिदमित्यादिना विभक्तेरुदा
त्तत्वं। बृहता बृहन्महतोरुपसंख्यानमिति विभक्तिरुदात्तत्वं विश्वपेशसा विश्वानि पेशांसि यस्याः सा विश्वपेशाः बहुव्रीहौ विश्वं संज्ञायामिति व्यस्य
येन संज्ञायामपि पूर्वपदांतोदात्तत्वं। यद्वा मरुद्वृधादिदर्शनात् मिमिक्ष्व मिह सेचने व्यत्ययेनात्मनेपदं लोटि बहुलं छंदसीति शपः श्लुः द्विर्भा
वः सन्वदित्वम्। अभ्यासेत्वम्। तिङ्‌ सि स्याच्च तिप्रत्ययस्वरस्य सतिशिष्टत्वात् स एव क्रियते। पूर्वपदस्य समानवाक्यस्थत्वात् तिङ्ङतिङः इति निघातो न भवति स
मानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात् विश्वतुरा कुर्वतीत्यर्थः क्विप् चेति क्विप् वाक्लोपः इति वकारलोपः विश्वया तूर्विं ऊत्तुः स
मासस्यांतोदात्तत्वं। वाजिनीवति वाजोन्नमस्यास्तीति वाजिनी क्रिया नादिक्रिया यस्याः सा तथोक्ता॥ ॥ इति चतुर्थस्य प्रथमस्य पंचमो व
र्गः॥ ॥ उषो भद्रेभिरिति चतुर्ऋचं पंचमं सूक्तं अत्रानुक्रमणं॥ उषश्चतुष्कमानुष्टुभंत्विति कण्वपुत्रः प्रस्कण्व ऋषिः तुह्यादिपरिभाषयाउद
मुत्तरं चानुष्टुभं पूर्वत्र उषस्यत्वात् इदमपि सूक्तमुषस्यं प्रातरनुवाकस्योषस्ये क्रतौ आनुष्टुभे छंदस्येतत्सूक्तं सत्यं तेहि उषो भद्रेभि
रित्यानुष्टुभमिति आश्विनशस्त्रेप्येतत्सूक्तं उपश्च तुष्कमानुष्टुभं त्विति कण्वपुत्रः प्रस्कण्व ऋषिः प्रातरनुवाकन्यायेनेत्यतिदेशात्॥ ॥
तत्र प्रथमामृचमाह॥ उषो भद्रेभिरागहि दिवश्चिद्रोचनादधि॥ वहंत्वरुणप्सव उप त्वा सोमिनो गृहं॥ हे उषः उषो देवते भद्रेभिः भद्र
नीयैः शोभनैः मार्गैर्दिवोंतरिक्षलोकात् रोचनात् दीप्यमानात् अधि उपर्यर्थः उपरिवर्तमानात् चिदिति पूजार्थः पूजितादेवंवि
धात् अंतरिक्षलोकात् आगहि आगच्छ हे उषः अरुणप्सवः अरुणवर्णा गावः सोमिनः सोमयुक्तस्य यजमानस्य गृहं देवयजनं यज्ञ
रूपं त्वा त्वामुप वहंतु प्रापयंतु गहि गमेर्लोटि बहुलं छंदसीति शपो लुक् हेरपित्वेन ङित्वे अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः

भा॰प्र॰ अतो हेरिति हेर्लुक् भवति असिद्धवदत्राभादित्यनुनासिकलोपस्यासिद्धत्वाद्धेर्लुग्भवतीत्युक्तत्वादनुदात्तेतश्च हलादेरिति यजुच्योरन्ताद
त्तत्वमित्युक्तत्वादनुदात्तत्वं ॥ अरुणप्सवः । प्सा भक्षणे । प्सान्ति भक्षयन्तीति प्सवः । बाहुलकात् औणादिकः कुप्रत्ययः । आतो लोप इटि चेत्या
१०० कारलोपः । अरुणाः प्सवो यासां ताः तथोक्ताः । अत्र वर्णानामारुण्यप्रतिपादनान्मातृणामपि तथात्वं गम्यते । पितृकमत्वा अनुद
रते पितरं गावा अनुदर्तन्तीति गावो दीयुः तासां चोषोवहनत्वं निघंटावुक्तं । अरुण्यो गाव उषसामिति । अरुणशब्दः । आर्तेश्चेति उनन्
प्रत्ययान्तः । कृणास्थानीयाञ्चित्यनुवर्तनेन नित्त्वादाद्युदात्तः । स एव बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन शिष्यते ॥ ॥द्वितीयामृचमाह॥ ॥
सुपेशसं सुखं रथं यमध्यस्था उषस्त्वं । तेना सुश्रवसं जनं प्रावाद्य दुहितर्दिवः ॥ हे उषस्त्वं यं रथमध्यस्था अधितिष्ठसि सुपेशसं शो
भनरूपयुक्तं । शोभनावयवोपेतं वा पेश इति रूपनामेति यास्कः । यद्वा शोभनहिरण्ययुक्तं पेशः इति हिरण्यनामसु पाठात्
सुखं शोभनेन खेनाकाशेन युक्तं विस्तृतमित्यर्थः । यद्वा सुखस्य हेतुभूतं अथवा सुखमिति क्रियाविशेषणं सुखं यथा
भवति तथेत्यर्थः । हे दिवो दुहितः द्युलोकस्य सकाशादुत्पन्ने उषादेवते तेन रथेन अद्यास्मिन्काले सुश्रवसं शोभनहविर्युक्तं जनं
यजमानं प्रावन्नवस्वेत्यर्थः नात्मनेपदं लोङि बहुलं छन्दसीति शपः श्लुः हिर्भावादिकं दिवक्तव्यत्वात्प्रत्ययस्वरस्य सतिशिष्ट
त्वात् स एव शिष्यते पूर्वपदस्यास्समानवाक्यस्थत्वात् ... अस्मादरुन्प्रत्ययः नित्वादाद्युदात्तः
पञ्चमस्त्वं शोभनं पुत्राः यस्यासौ सुप्रजाः आ प्रजायन्ते इत्युत्तरपदाद्युदात्तत्वं ॥ अध्यस्थाः तिष्ठतेः छन्दसि लुङ्
लङ् लिट इति वर्तमाने लुङ् गातिस्थेति सिचो लुक् आगमश्चादात्तः ॥ यद्वृत्तयोगादनिघातः तिङ्ङतिङ इति प्राप्तनिघाते रनुदात्तत्वं । तेन अन्ये
षामपि दृश्यते इति संहितायां दीर्घः सुश्रवसं श्रवः इत्यन्ननामश्रूयत इति श्रव इति यास्कः सुपेशसं इति वत् उत्तरपदाद्युदात्तत्वं अव अवरक्षणगति
निप्रातिहृद्यौ लृङि लोट इत्यर्थः दुहितर्दिवः परमपि छन्दसीति पराङ्गवद्भावात् आमन्त्रितान्तवत्समातिपदद्वयस्यापि निघातः
दात्तत्वं ॥ ॥तृतीयामृचमाह॥ वयश्चित्ते पतत्रिणो द्विपच्चतुष्पदर्जुनि ॥ उषः प्रारन्नृतूँरनु दिवो अन्तेभ्यस्परि ॥ हे अर्जुनि शुक्लवर्णे उषः उषो
देवते तव ऋतूनि गमनान्यनुलक्ष्य द्विपात् द्विपान्मनुष्यादिकं चतुष्पात् गवादिकं तथा पतत्रिणः पत्रवन्तः पक्षिणो वयश्चित् पक्षिणश्चिद्
दिवो अन्तेभ्यः आकाशान्तेभ्यः परि उपरि प्रारन् प्रकर्षेण गच्छन्ति अवधिकारणाभिभूताः सर्वे प्राणिनस्त्वदागमने तत्संचरणवन्तो भवन्तीत्यर्थः
पतत्रिणः पतत्रं पक्षः पतत्यनेनेति पतत्रं अमिनक्षीत्यादिना अत्रन् प्रत्ययः नत्वामत्वर्थीय इनिः द्विपत् द्वौ पादौ अस्येति संख्यासु पूर्वस्येति पा
दस्यान्त्यलोपः समासान्तः उत्तरसमासयादिलेन भत्वात् पादः पदिति पदभावः द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । ऋतून्
गत्यनुरूपं तादृगुपधस्य दीर्घत्वं ... अर्जुनि ... ... येन ना
प्राप्तिन्यायेन तस्यापवादत्वात् अपवादस्यपरमपि पूर्वं बाधत इति वचनात् नानुनासिकः आरन् ऋ गतौ छन्दसि लुङ् लङ् लिट इति वर्तमाने लुङ् सर्ति १००
शास्त्यर्तिभ्यश्चेति च्लेरङ् ऋदृशोऽङि गुण इति गुणः अडागमः । ... आद्युदात्त इति अस्मात् दाणादिको भावे कुप्रत्ययः अनुदात्त
ण इति अन्तः कर्मप्रवचनीययुक्ते द्वितीया संहितायां दीर्घादटि समानपादे इति नकारस्य रुत्वं । अत्रानुनासिकः पूर्वस्य तु वेतिरः पूर्व
स्यानुनासिकत्वं दिव इति द्विर्भावि भक्तिरुदात्त अन्तेभ्यः पञ्चम्याः परावध्यर्थ इति विसर्जनीयस्य सत्वं ॥ ॥चतुर्थीमृचमाह॥ व्युच्छन्ती हि रश्मिभिर्विश्वमाभा
सि रोचनं ॥ तां त्वामुषर्वसूयवो गीर्भिः कण्वा अहूषत ॥ हे उषः व्युच्छन्ती तमो वर्जयन्ती त्वं रश्मिभिः स्वकीयैस्तेजोभिर्विश्वं सर्वं भूतजातं रोचनं रोचमानं प्र
काशयुक्तं यथा भवति तथा आभासि आसमन्तात् भावेन प्रकाशयसि हि यस्मात् एवं तस्मात् तां तादृशीं त्वां वसूयवः वसुकामाः कण्वाः मेधाविनः ऋ
त्विजः कण्वगोत्रोत्पन्ना वा महर्षयः गीर्भिः स्तुतिलक्षणैः वचोभिः अहूषत स्तुतवन्त इत्यर्थः कण्व इति मेधाविनाम कण्वः ऋभुरिति तन्नामसु पाठात् ।
आभासि भादीप्तौ आदादिकत्वाच्छपो लुक् तिपः पित्वादनुदात्तत्वे धातुस्वरः हि चेति निघातप्रतिषेधः तिङ्ङ्चोदात्तवतीति गतेरनुदात्तत्वं ॥ रोचनं रुच
दीप्तौ अनुदात्तेतश्च हलादेरिति युचि तद्युक्तं लित्त्वान्तं । वसूयवः वसु धनमात्मान इच्छन्तः सुप आत्मनः क्यच् अकृत्सार्वधातुकयोरिति दीर्घः
क्याच्छन्दसीति उप्रत्ययः गीर्भिः सावेकाच इति विभक्तेरुदात्तत्वं । कण्वाः कणतेः शब्दार्थः अशिपुषिलटिकणीत्यादिना क्वन् प्रत्ययः नित्त्वादाद्युदात्त
त्वं । अहूषत ह्वेञः लुङि ह्वः संप्रसारणमित्यनुवृत्तौ बहुलं छन्दसीति संप्रसारणं परपूर्वत्वे हल इति दीर्घत्वे लुः सिच् एकाच इतीट्प्रतिषेधः संज्ञा
पूर्वकस्य विधेरनित्यत्वात् गुणाभावः ॥ ॥इति प्रथमस्य चतुर्थे षष्ठो वर्गः॥ ॥उदु त्यमिति त्रयोदशर्चं सप्तमं सूक्तं प्रस्कण्वऋषिः सूर्यदेव
त्यं आद्या नवगायत्र्यः शिष्टाश्चतस्रोऽनुष्टुभः उदुत्यं तथा चानुक्रान्तं उदु त्यं सप्तोनात्सौर्यं नवाद्या गायत्र्य इति आश्विनशास्त्रे सूर्यकृतौ उदु त्यमित्या
द्यानवर्चः शंसनीयाः सूत्रितं च पञ्चिमायतिरवरस्त्रिनं । सूर्यो नादिव उदु त्यं जातवेदसमिति नवेति ॥ ॥तत्र प्रथमामृचमाह॥ उदु त्यं जातवे
दसं देवं वहन्ति केतवः ॥ दृशे विश्वाय सूर्यं ॥ केतवः प्रज्ञापकाः रश्मयः अश्वा वा त्यं तं प्रसिद्धं जातवेदसं जातानां सर्वेषां प्राणिनां
वेदितारं जातप्रज्ञं जातधनं वा देवं द्योतमानं अत्र निरुक्तं । उदु हरन्ति तं जातवेदसं देवमश्वाः केतवो रश्मयो
वा सर्वेषां भूतानां दर्शनार्थं सूर्यमिति । जातवेदसं । जातानि वेत्तीति जातवेदाः गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च इत्युत्तरपदप्रकृति
स्वरत्वं । दृशे दृशिर् प्रेक्षणे तुमर्थे निपातितः सूर्यं ... उत्सपात क्यपि ... निपातितः अ
तः अप्रत्ययस्यापित्वादनुदात्तत्वे धातुस्वरेण आद्युदात्तत्वं ॥ ॥द्वितीयामृचमाह॥ अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः ॥ सूराय विश्वच
क्षसे ॥ अप त्ये तायवो यथा प्रसिद्धास्तस्करा इव नक्षत्राणि देवगृहरूपाणि देवगृहा वै नक्षत्राणीति श्रुत्यन्तरात् यद्वा इह लोके कर्मा
नुष्ठानात् स्वर्गं प्राप्नोति तेन श्वेतरूपेण दृश्यन्ते तथा च श्रूयते यो वा इह यजते अमुं स लोकं नक्षते तन्नक्षत्राणां नक्षत्रत्वमिति यद्वा सुकृता
नां ज्योतींषि नक्षत्राण्युच्यन्ते सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणीत्यान्नानात् यास्कस्त्वाह नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि नक्षत्राणी
ति च ब्राह्मणमिति । तथाविधानि नक्षत्राणि अक्तुभिः सह अपयन्ति अपगच्छन्ति । विश्वचक्षसे विश्वस्य सर्वस्य प्रकाशयित्रे सूराय सूर्यस्य
आगमने । द्वितीयः तस्करा नक्षत्राणि च रात्रिभिः सह सूर्य आगमिष्यतीति भीत्या पलायन्त इत्यर्थः तायुरिति स्तेननाम तायुः तस्कर
इति तन्नामसु पाठात् । अक्तुभिरिति रात्रिनाम शर्वरी अक्तुरिति तन्नामसु पाठात् । यथा यथेति पादान्त इति सर्वानुदात्तत्वं । नक्षत्रा नक्षगतौ अ
मिनक्षियजिवधिपतिभ्योऽत्रन्निति अत्रन् प्रत्ययः नित्त्वादाद्युदात्तत्वं । नक्षत्राण्यपि ... शेश्छन्दसि बहुलमिति शेर्लोपः । नक्षरतेति दीर्घीयते ॥ इति वा नक्षत्रं ।

क्षीयते क्षरतेर्वा। नक्षत्रमिति निरुक्तं। इति। ज्योतिषां सर्वेषां इति। रात्रीणां च यथा इति। अपत्ये तायवो यथा। त्वं चक्षसे विश्वस्मै विश्वं चष्टे प्रकाशय
भा०१० तीति विश्वचक्षाः। चक्षेर्बहुलं छंदसीत्यसुन् प्रत्ययः। ङित्वेन सार्वधातुकत्वात् ख्याञादेशः। इभयत्र यस्यार्थे चतुर्थी। चतुर्थ्यर्थे बहुलं छंदसीति चतुर्थी॥ ॥तृतीयाम
३३० चमाह॥ ॥अदृश्रमस्य केतवो विरश्मयो जनाँ अनु। भ्राजंतो अग्नयो यथा॥ अस्य सूर्यस्य प्रज्ञापकाः रश्मयो दीप्तयः जनान् अनु अदृश्रं
जातान् सर्वान् अनुक्रमेण प्रेक्षंते सर्वं जगत् प्रकाशयंतीत्यर्थः। न च दृष्टांतः॥ भ्राजंतो दीप्यमानाः अग्नयो यथा अग्नय इव। अदृश्रं दृशि
र् प्रेक्षणे वर्तमाने लुङ्। इरितो वेति च्लेरङादेशः। ऋदृशोऽङि गुण इति गुणे प्राप्ते बहुलं छंदसीति रुडागमः॥ अत एव बहुलवचनात्। ऋदृशोऽङि गुण इति गुणाभावः। बहुलं
छंदसि अमाङ्योगेऽपि भवतीति प्रथमपुरुषबहुवचनस्य उत्तमपुरुषैकवचनादेशः। प्रथमपुरुषवचनांतानां वशात् संततरश्मयो अदृश्रन्नस्य केतवः इति। अ
नित्यस्य न कारस्य संहितायां रत्वं यवात्पूर्ववत्। भ्राजंतः भ्राजृ दीप्तौ। शपः पित्वादनुदात्तत्वं शतुश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। चातुर्मास्येषु शु
नासीरीयपर्वणि अग्निर्माहेंद्रकपालः तस्य तरणिरित्येषा अनुवाक्या॥ तथा च सूत्रितं तरणिर्विश्वदर्शतो चित्रं देवानामुदगादनीकमिति याज्यानुवाक्ये
इति तथाग्निमूर्तिं आलभ्य काहरुक्मपक्षे सौरषिः कर्तव्या॥ तस्यामप्येषा अनुवाक्या इति सूत्रितं निरुक्त षट्कं अरुणं एवं उक्तं सूत्रितं नवोनवो भवति
जायमानस्तरणिर्विश्वदर्शतः इति॥ ॥तामेतां च केचन तुर्थी ऋचमाह॥ ॥तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनं॥ हे सूर्य त्वं
तरणिः त्वरितः अन्येन गंतुं अशक्यस्य महतो अध्वनो गंता असि तथा च स्मर्यते॥ योजनानां सहस्रे द्वे द्वे शते द्वे च योजने एकेन निमिषार्धेन क्रममाण
नमोऽस्तु इति यद्वा॥ उपासकानां रोगात् तारयिता अस्ति आरोग्यं भास्करादिच्छेदिति स्मरणात् तथा विश्वदर्शतः विश्वैः सर्वैः प्राणिभिर्दर्शनीयः आदित्यदर्श
नस्य च ब्रह्मादिदर्शनजनितपापनिबर्हणहेतुत्वात्॥ तथा चापस्तंबः। दर्शने ज्योतिषां दर्शनमिति। यद्वा विश्वं सकलं भूतजातं दर्शतं द्रष्टव्यं प्रका
श्यं येन स तथोक्तः। तथा ज्योतिष्कृत् ज्योतिषः प्रकाशस्य कर्ता सर्वस्य वस्तुनः प्रकाशयितेत्यर्थः। यद्वा चंद्रादीनां रात्रौ प्रकाशयिता रात्रौ हि अम्मये
षु चंद्रादिबिंबेषु सूर्यकिरणाः प्रतिफलिताः संतो अंधकारं निवारयंति तथा द्वारस्थदर्पणप्रतिफलिताः सूर्यरश्मयो गृहांतर्गतं तमो निवारयंति
तद्वदित्यर्थः। अस्मादेव त्वं समस्तं विश्वं व्याप्तं रोचनं रोचमानं अंतरिक्षं आसमंतात् भासि प्रकाशयसि। यद्वा हे सूर्य अंतर्यामितया सर्वस्य प्रेरक
परमात्मन् तरणिः संसारसमुद्रस्य तारकोऽसि यस्मात् त्वं विश्वदर्शतः विश्वैः सर्वैः मुमुक्षुभिर्दर्शनीयः द्रष्टव्यः साक्षात्कर्तव्यः अधिष्ठानसाक्षात्का
रे सति आरोपितं निवर्तते ज्योतिष्कृत् ज्योतिषः सूर्यादेः कर्ता तथा चाम्नायते। चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायतेति। ईदृशस्त्वं चिद्रूपत
या विश्वं सर्वं दृश्यजातं रोचनं रोचमानं दीप्यमानं यथा भवति तथा आभासि प्रकाशयसि चैतन्यस्फुरणेन हि सर्वं जगत् दृश्यते॥ तथा चाम्नाय
ते। तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं भातीति। तरणिः तॄ प्लवनतरणयोः अस्मादंतर्भावितण्यर्थात् अर्तिसृधृधम्यम्यश्यवि
तॄभ्योऽनिरित्यनिप्रत्ययः प्रत्ययाद्युदात्तत्वं ज्योतिः करोतीति ज्योतिष्कृत् क्विप् चेति क्विप् नित्यं समासे नुत्तरपदस्थस्येति विसर्जनीयस्य षत्वं भासि।
भा दीप्तौ अंतर्भावितण्यर्थात् लिङि अदादित्वाच्छपो लुक्॥ ॥पंचमीमृचमाह॥ प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान्। प्रत्यङ् विश्वं स्वर्द ३१०
शे॥ हे सूर्य त्वं देवानां विशः मरुन्नामकान् देवान् मरुतो देवानां विश इति श्रुतेः तान् मरुत्संज्ञकान् देवान् प्रत्यंङ् उदेषि तान् प्रतिगच्छन् उदयं
प्राप्नोषि तेषामभिमुखं भवति तथा तथेत्यर्थः तथा मानुषान् मनुष्यान् प्रत्यङ् उदेषि तेषि यथा अस्मदभिमुख एव सूर्य उदेतीति मन्यंते॥

तथा विश्वं व्याप्तं स्वः स्वर्लोकं प्रत्यङ् उदेषि यथा स्वर्लोकवासिनो जनाः स्वस्वाभिमुखेन पश्यंति तथा उदेषीत्यर्थः एतदुक्तं भवति। लोकत्रयवर्तिनो जनाः 219
सर्वेऽपि स्वस्वाभिमुख्येन सूर्यं पश्यंति तथा उदेषीत्यर्थः तथाम्नायते। तस्मात्सर्व एव मन्यते मां प्रत्युदगादिति प्रत्यङ् प्रत्यंचतीति प्रत्यङ् अंचु
गतिपूजनयोः ऋत्विगित्यादिना क्विन् अनिदितां हल इति नलोपः उगिदचामिति नुम् हल्ङ्याब्भ्य इति संयोगांतस्य लोपः संयोगांतलोपस्यासिद्धत्वात्। 1924
उपधादीर्घनलोपयोरभावः क्विन् प्रत्ययस्य कुरिति कुत्वं अनिगंताचत्ताविति अनिगंत इति पर्युदासात् पूर्वपदप्रकृतिस्वराभावे कृदुत्तर
पदप्रकृतिस्वरत्वं। एषि इण् गतौ चत्ताविति अनिगंतवितिपर्युदासात् पूर्वपदप्रकृतिस्वरत्वं। भावेऽपि अदादित्वाच्छपो लुक् आदेशप्रत्य
योरिति षत्वं। स्वः पूर्ववदेव च गुणोत्पत्तिरादेशः अन्यत् स्वरितो स्वरितो वेति स्वरितत्वं॥ प्रेक्षणे इत्यस्माद्दृशेर्विख्ये चेति तुमर्थे निपातितम्॥ ॥
षष्ठीमृचमाह॥ ॥येना पावक चक्षसा भुरण्यंतं जनाँ अनु। त्वं वरुण पश्यसि॥ हे पावक सर्वस्य शोधक वरुण अनिष्टनिवारक सू
र्य त्वं जनान् जातान् प्राणिनः भुरण्यंतं धारयंतं पोषयंतं पोषयितारं इमं लोकं येन चक्षसा प्रकाशेन अनुपश्यसि अनुक्रमेण प्रकाशयसि
तं प्रकाशं स्तुम इति शेषः। यद्वा उत्तरस्यामृचि संबंधः तेन चक्षसा व्येषीति। तथा च। यास्केनोक्तं। तेन वयं स्तुम इति वा
क्यशेषोऽपि वा उत्तरस्यामन्वयस्तेन व्येषीति। भुरण्यंतं। भुरण धारणसंपोषणयोः कंड्वादित्वाद्यक् ततः शतरि कर्तरि शप्। अदुपदेशाल्लुः
सार्वधातुकानुदात्तस्वरेण यक् स्वरः शिष्यते वरुण वृञ् वरणे। अस्मादंतर्भावितण्यर्थात् कृवृदारिभ्य उनन्निति उनन् प्रत्ययः अंतर्वरणत्वेन
आदित्य एवाभ्यते तथा चान्यत्र श्रूयते स्वयं मित्रश्च वरुणश्चाजायतामिति मित्रश्च वरुणश्च धाता चार्यमा चेति॥ ॥सप्तमीमृचमाह॥
वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः॥ पश्यंजन्मानि सूर्य॥ हे सूर्य त्वं पृथु विस्तीर्णं रजो लोकं लोकाः रजांस्युच्यंते इति यास्कः। लोकं द्यां अंतरिक्षलो
कं व्येषि विशेषेण गच्छसि किं कुर्वन् अहा अहानि अक्तुभिः रात्रिभिः सह मिमानः इत्याद्यन् आदित्यगत्यधीनत्वात् अहोरात्रविभागस्य तथा जन्मानि ज
निवंति भूतानि पश्यन् प्रकाशयन् रजः सप्तम्यधिकरणे छंदसि पुथाप्रा इति याहितिविसर्जनीयस्य सत्वं। अहा। शेश्छंदसि बहुलमिति शेर्लोपः मिमानः माङ्
माने जुहोत्यादिकः शानच् श्लौ भवे मिर्भ्जामित्यभ्यासस्येत्वं श्नाभ्यस्तयोरात इत्याकारलोपः अभ्यस्तानामादिरिति अभ्यस्तत्वं उदात्तत्वं॥ जन्मानि
जनि प्रादुर्भावे अन्येभ्योऽपि दृश्यंत इति मनिन् नित्वादाद्युदात्तत्वं॥ ॥अष्टमीमृचमाह॥ सप्त त्वा हरितो रथे वहंति देव सूर्य॥ शोचिष्केशं वि
चक्षण॥ हे सूर्य देव द्योतमान विचक्षण सर्वस्य प्रकाशयितः सप्त सप्तसंख्याकाः हरितोऽश्वाः हरण शीला रश्मयो वा त्वां वहंति प्रापयंति
कीदृशं रथे अवस्थितमिति शेषः। तथा शोचिष्केशं शोचींषि ज्वालास्य एव केशा इव दृश्यंते स तथोक्तः। हरित इत्यादिम अश्वानां संज्ञा हरित आ
दित्यस्येति निघंटावुक्तत्वात्। शोचिष्केशं। शुचिर् दीप्तौ। अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिरिति प्रत्ययांतो दात्तः सएव बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन
शिष्यते नित्यं समासे नुत्तरपदस्थस्येति विसर्जनीयस्य षत्वं॥ ॥नवमीमृचमाह॥ अयुक्त सप्त शुंध्युवः सूरो रथस्य नप्त्यः॥ ताभिर्याति स्वयु
क्तिभिः॥ सूरः सर्वस्य प्रेरकः सूर्यः शुंध्युवः शोधिका अश्वस्त्रियः तादृशीः सप्त सप्तसंख्याकाः अयुक्त स्वरथे योजितवान् कीदृश्यः रथस्य नप्त्यः
न पातयित्र्यः याभिर्युक्ताभिः रथो याति न पतति तादृशीभिरित्यर्थः एवंभूताभिस्ताभिरश्वस्त्रीभिः स्वयुक्तिभिः स्वकीययोजनेन रथसंबद्धा
भिर्याति यजमानगृहं प्रत्यागच्छति अतस्तस्मै हविर्दातव्यमिति वाक्यशेषः अयुक्त युजिर् योगे। स्वरितेत्वात् कर्त्रभिप्राये आत्मनेपदं लुङि च्लेः

भा॰अ॰ सिचएकाच इतीट्प्रतिषेधः। लिङि सिचावात्मनेपदेष्विति सिचः कित्वात् लघूपधगुणाभावः। झलोझलीति सिचः सकारलोपः। चोः कुरिति कुत्वं। शुंध्युवः

शुंध्युविवरुधो यातिमानिशुंधिदसिदनिभ्यान्निभ्यायुरिति युप्रत्ययः। डामितनादिनां छंदसि बहुलमुपसंख्यानमिति इयङादेशः। स्वरः। स्वेन

१११ णमत्। धुपायधिभ्यः कित् इति क्तप्रत्ययः। निवादाद्युदात्तत्वं। नप्यः नपातयतीत्यर्थेन भनेस्तूष्ट्याविनाद्युणादिषु नस्तुङः। सत्तंतानि पातितः

कृत्नेभ्याडीविति यणादेशः उदात्तयणा हल्पूर्वादिति ङीप उदात्तत्वं। स्वपामपामभवनीतिद्वा संज्ञसादेशाः। ततो यणादेशः उदात्तस्वरितयोर्यण

इति स्वरितत्वं। रपलोपः छांदसः। इकंत्तद्वा चापरेत वर्णविकारनाशयविति। स्वासितरत्नुनय्य इति एवपक्षेते युक्ताभिः स्वकीयसर्वसंभूतिभ्यः

युक्ताभिर्योजनानि यास्यामीव इत्युक्ताः पूर्वपदप्रकृतिस्वरत्वं॥ अवभृतस्नानेतकाजस्वान्निकाम्य उदुत्यं तमसस्परीति मंत्रं ब्रूयुः। तथा पत्नीसंयाजे

श्वाविवेतिरेवं इस्रवितं। उदुत्यं तमसस्परीत्येति। ॥ तामेतांसज्ज्ञदशमीमृचमाह॥ उद्वयं तमसस्परि ज्योतिष्पश्यंत उत्तरं। देवं देवत्रासूर्यमग

न्मज्योतिरुत्तमं॥ वयमनुष्ठातारः तमसस्परितमस उपरि रात्रेरूर्ध्वं वर्तमानं पाप्मस्वरूपरि वर्तमानं वा पापरहितमित्यर्थः। तथा चाम्नायते॥

उदुयं तमसस्परीत्याह॥ पाप्मावैतमः पाप्मानमेवास्मादपहंतीति ज्योतिस्तत्वितं उत्तरं उत्कृततरं उत्तरं वा देवत्रा देवेषु मध्ये देवं दानादिगु

णयुक्तं सूर्यं पश्यंतः स्तुतिभिः हविर्भिश्च उपासीनाः संतः ज्योतिरुत्तमं उत्कृष्टतमं सूर्यरूपं आगन्म प्राप्नुयाम। तथा च श्रूयते॥ अगन्मज्योतिरुत्त

ममित्याह। असौ वा आदित्यो ज्योतिरुत्तमं आदित्यस्यैव सायुज्यं गच्छतीति यत्तं येन तं यथाय यथा वासते न दव भवंतीतिश्रूयंते। तमसस्परि

चम्याः पराव ध्यर्थ इति विसर्जनीयस्य सत्वं। ज्योतिष्पश्यंतः इसुसोः सामर्थ्ये इति विसर्जनीयस्य षत्वं। व्यपेक्षालक्षणं सामर्थ्यं नत्वागीक्रियते। देवत्रा

देवमनुष्यपुरुषमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलमिति सप्तम्यर्थे त्राप्रत्ययः। प्रत्ययस्वरः। अगन्म छंदसि लुङ्लङ्लिट इति वर्तमाने प्रार्थनायां लङ्। बि

हुलं छंदसीति शपो लुक्। म्वोश्चेति धातोर्मकारस्य नकारः। अडागमः। उदात्तः। पदादित्वान्निघाताभावः। इत्र मंतमपः पितादनुदात्तत्वे प्राप्ते उत्तमत्रा

श्वेतमा सर्वत्र वक्ष्यांसमिषा गात अंतोदात्तं॥ उद्यन्नित्यचं चोरोगघ्नीत्यर्थः। तथा चानुक्रमण्यामुक्तं॥ अंत्यः तृचो रोगघ्नः उपनिषदिति। युक्तं

चैतत् यस्मादनेन तृचेन सदाप्रवेशांत्यर्थं॥ प्रस्कण्वः स्वयं मस्तान अनेन तृचेन स्तुतः सूर्यः तमृषिं रोगान्निरगमयत् तस्मादिदानीमपि रोगशां

तये अनेन तृचेन सूर्य उपास्यनीयः। तदुक्तं नगेन कृत। उद्यन्नद्यति मंत्रोयं सौरः पापप्रणाशनः रोगघ्नश्च विषघ्नश्च भुक्तिमुक्तिफलप्रद इति।

चम्पाशौ॥ ॥ सरूक्णकादशीमृचमाह॥ उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवं॥ हृद्रोगं मम सूर्य हरिमाणं च नाशय॥ हे सूर्य सर्वस्य प्रेरक

मित्रमहः सर्वेषामनुकूलदीप्तियुक्त अद्यास्मिन्काले उद्यन् उदयं गच्छन् उत्तरां उद्गततरां दिवं नभोमंडलमारोहन्नाभिमुख्येन प्राप्नुवन् यद्वा

दिवं मंतरिक्षं उत्तरां मा रोहन् उत्कर्षेण प्राप्नुवन् एवंविधस्त्वं मम हृद्रोगं हृदयगतं आंतरं रोगं हरिमाणं शरीरगतकांतिहरणशीलं बाह्य

रोगं च। यद्वा शरीरगतं हरिद्वर्णं रोगं प्राप्तं वैवर्ण्यमित्यर्थः। तदुभयमपि नाशय। मां स्तोतारं उभयविधाद्रोगान्मोचयेत्यर्थः॥ मित्रम

हः मित्रमनुकूलं महस्ते यस्य सो मित्रमहाः। आमंत्रितनिघातः। उत्तरां उदित्यनेनोपसर्गेण सूर्यस्य धात्वर्थो लक्ष्यते। तस्मादातिशायनिकस्तर ३९

पप्रत्ययः। प्रथमपक्षे अंतरिक्षविशेषणत्वेन द्रव्यप्रकर्षप्रतीतिरामनभवतिद्वितीये त्वारोहणक्रियायाः प्रकर्षो गम्यत इति। किमेतिङ

व्ययघ॥ दाम इव्यप्रकर्ष इति आमप्रथमपक्षे तपतरपोः पित्वादनुदात्तत्वे उपसर्गस्वरेण च द्वितीये तु आमप्रत्ययस्यातिशि

221
1924

त्वात्तस्य च स्वरेणांतस्य येनाद्युदात्तत्वं। रथवादिनोद्रयः समासतिगणः हृद्रोगं। हृद्रोगायक्ष्यं रोगं मिति द्वयद्वस्यहृदादेशः। ममयुष्मदस्म

दोर्ङसीत्याद्युदात्तत्वं। हरिमाणं हञ्हरणे। हरिह्यामनिन्निकोणादिक इमनिन्प्रत्ययः। अल्ययेनांतोदात्तत्वं यद्वा हरितश्चस्य वर्णवाचित्वादृढ

दिद्यविभ्यष्यञ्चवातिरकारादिमनिन प्रत्ययः। इष्टेमयःस्वित्यनुवृत्तौ टेरिति टिलोपः॥ ॥ द्वादशीमृचमाह॥ शुकेषु मे हरिमाणं रोपणाकासुदध्म

सि॥ अथो हारिद्रवेषु मे हरिमाणं निदध्मसि॥ मे मदीयं हरिमाणं शरीरगतं हरिद्वर्णस्वभावं शुकेषु ताहश वर्णं कामयमानेषु पक्षिषु तथा रोपणाका

सु शारिकासु पक्षिविशेषेषु दध्मसि स्थापयामः। अथो अपि च हारिद्रवेषु हरिद्रतालद्रुमेषु नाहक वर्णेषु मम मदीयं हरिमाणं निदध्मसि निदधीम

हि। स च हरिमा तत्र व सक्तेनास्मानबाधिष्टेत्यर्थः। दध्मसि। इदंतो मसिरिति मसि इकारागमः॥ ॥ त्रयोदशीमृचमाह॥ उदगादयमादित्यो

विश्वेन सहसा सह॥ द्विषंतं मह्यं रंधयन्मो अहं द्विषते रधं॥ अयं पुरो वर्तमान आदित्यः अदितेः पुत्रः सूर्यः विश्वेन सहसा सर्वेण बलेन उदगात उदयं

प्राप्तवान् किं कुर्वन् मह्यं द्विषंतं रंधयन् ममापद्रवकारिणं रोगं हिंसन् अपि च अहं द्विषते अनिष्टकारिणे रोगाय। अस्माकं सामर्थ्यं नास्ति रोगनाशा

य। दुपकरणाय सामर्थ्यमस्तिनाशयनास्ति॥ हिंसां कर्त्तामिसूर्य एवास्मदनिष्टकारिणं रोगं विनाशयतित्यर्थः। अगात एतेर्लुङि इणोगालुङीतिगा

देशः। गातिस्थेति सिचो लुक् आदित्यः दित्यदित्यादित्यादित्यपत्यार्थे प्राग्दीव्यतोणिति ण्यप्रत्ययः। रंधयन् रधहिंसायां राध्योः ण्यंतात्लटः शतरि

रधिजभोरचीति णौ धातोर्नुमागमः। निपातद्वयसमुदायो मो वेत्यस्यार्थे ओदिति प्रगृह्यत्वेन पुनः प्रगृह्या अचिनित्यमिति प्रतिभावः। द्विषते शतनुम

इति। विभक्तेरदात्तत्वं रधं रधेर्लुङि पुषादित्वाच्च्लेरङादेशः। रधिजभोरचीति धातोर्नुम अनिदितामित्यनुषंगलोपः। न माङ्योगइत्यडभावः॥ ॥

इति प्रथमस्य चतुर्थे षष्ठो वर्गः॥ ॥६॥ अभि त्यं पंचदशर्चं सव्यस्याद्यत्रिष्टुबंतमांगिरसं इंद्रस्तुत्यं॥ पुत्रमिच्छन्नभ्यध्यायनसव्य इतीद्रएवास्य पुत्रो जा

यत इति अतिरात्रे प्रथमरात्रिपर्याये होतुः शस्त्रसकंशं सनीयं अतिरात्रे पर्यायाणामितिखंडे सूत्रितं अभि त्यं मेषमध्वर्यवो भरतेंद्राय सोममि

तिया स्य इति गवामयनस्य मध्ये विषुवत संज्ञकेऽन्यपि निष्केवल्य उदं सूक्तं। तथा च सूत्रितं यस्तिग्मश्रृंगो। भित्यं मेषमिंद्रस्य नु वीर्याणि इत्येतस्मिं

त्वेद्वानि विद्वंशस्त्वेति॥ ॥ तत्र प्रथमामृचमाह॥ अभि त्यं मेषं पुरुहूतमृग्मियमिंद्रं गीर्भिर्मदता वस्वो अर्णवं॥ यस्य द्यावो न विचरंति मानुषा

भुजे मंहिष्ठमभि विप्रमर्चत॥ त्यं तं प्रसिद्धं मेषं शत्रुभिः स्पर्धमानं यद्वा कण्वपुत्रमेधातिथिं यजमानं इंद्रो मेषरूपेणागत्य तदीयं सोमं पपौ॥

स ऋषिः तं मेष इत्यवोचत अत इदानीमपि मेष इतींद्रोऽभिधीयते॥ मेधातिथेर्मेषेति सुब्रह्मण्य मंत्रे वेदे इंद्रस्य व्याख्यानरूपं ब्राह्मणमेवमा

म्नायते मेधातिथिंह काण्वायनं मेषो भूत्वा जहारेति। आमत्य सोमं अपहृतवान् इत्यर्थः। पुरुहूतं पुरुभिर्यजमानैराहूतं ऋग्मियं ऋग्भिर्विक्रिय

माणं स्तूयमानमित्यर्थः। स्तुत्यादिदेवताविक्रीयतेक्ऋग्भिर्भुयते ज्ञाध्यत इति ऋग्मीतं वस्वो अर्णवं धननामावासभूमिं एवं गुणविशिष्टमिंद्रं

इत्ता नारीर्गीर्भिः स्तुतिभिरभिमदत आभिमुख्येन हर्षं प्रापयत। यस्येंद्रस्य कर्माणि मानुषा मनुष्याणां हितानि स्वरंतिविशेषेण वर्तंते तत्र दृष्टां

तः॥ ॥ द्यावो न यथा सूर्यरश्मयः सर्वेषां हितकराः भुजे भोगाय मंहिष्ठं अतिशयेन प्रवृद्धं विप्रं मेधाविनं तथाविधमिंद्रमभ्यर्चत अभिपूज

यत। मेषं मिष स्पर्धायां इगुपधलक्षणे। कृपातेरचिसेनमघादयः पचादिषु दृष्टव्या इति वचनात् अचिन्त्ययः ऋग्मियं तस्य विकार इत्यर्थे

एकाचानित्यमयड्मित्यविंतीति मयट्प्रत्ययः अकारस्यैकारस्थाद्सः प्रत्ययस्वरः यद्वामार्‌मानेरौब्रह्मचऋग्भिर्मीयत इति ऋग्भ्यः कृपिवा

भा॰ प॰ कीर्त्यपातपूर्व्यं मंदमपरस्या क्रमाख्तीतं अभिविश्वधातिव्यादिषु करटेज्ञाः॥ उदुत्तरपदप्रकृतिस्वरत्वं मस्त्तं। मदादिर्दर्पे। इतु मर्त्तीणि चमदीदर्पपूर्वयोरिति ष
२२२ त्वादिपुपावात इर्षादुर्वन्तं मानस्य घटादयामिताउतिमित्वं मतिमितांतां इत्यत्रेन्त्वं स्वर्तं। ज्ञाणमध्यमपुरषबहुवचनं उपिचैरण्कभयथाऽइति आर्ध
धातुकत्वात्। णेरनिटीतिणिलोपः तस्य डाद्वस्य सार्वधातुकमपिदितिङित्वे कचितनुयमअन्तरङ्‌गृत्यो रव्याणामिति दीर्घः। क्षत्यः इमीतिआग
मानुशासनस्यानित्यत्वानुमभावः तस्मादिपुइडिमिषावचनमितिवचनात धाडीतीतिगुणाभावश्च णेरड्डः अर्णवं अर्णउदकं अस्मान्न स्तीतिअ
र्णवः समुद्रः अर्णसोलोपश्चेतिमत्वर्थेउपायचप्रत्ययः सलोपश्च तेनउदकतामायश्रयवाचिना आश्रयमात्रंलक्ष्यते। प्रत्ययस्वरस्य वर्गंतिवरम
त्यर्थः अदुपदेशात्लसार्वधातुकानुदात्तत्वे धातुस्वरः तिङि चोदात्तवतीतिगतिरनुदात्ताय इत्यादीनि घातः मानुषा ओः छिद्रमिव इत्यमितिइत्को
पः भुज भुजपालनायवहारयोः संपदादिलक्षणाभावाद्रिपसावकाबइतिवभंजर दात्तलेनंमहिष्वंमहिषु धा अतिशयेन मंहितामहिषाः तुः छंदसी
ति उनप्रत्ययः नुरिच्छमयःस्त्विनिलोपःनित्वाद्यायुदात्ततत्वं अर्चतं अर्चपूजायांभावादिकः॥ ॥द्वितीयामृचमाह॥ अभीमवन्वन्त्स्वभिष्टिमूतयो
ऽन्तरिक्षप्रांतविषीभिरावृतं॥ इंद्रं दक्षास ऋभवो मदच्युतं शतक्रतुं जवनी सूनृतारुहत॥ ऊतयः अविता रक्षिता रदक्षासः दक्षयितारः प्र
वर्धयितारः ऋभवः ईर भांतीतिनर्मकृतवन्त्या ऋभवोमरुतइत्यन्येन वंभतामरुतः इं इमभीमवन्वन्आभिमुख्येनवलु अभवंवण
सहयुध्यमानमिंद्रं सर्वेदेवापर्यत्यजन्‌ मरुतस्त्वेनपर्यत्याक्षुः तथाचाम्नायते। विश्वेदेवा अजहुर्येसखायः मरुद्भिरिंद्रसख्यंतेअस्त्विति॥
ऋच्न णव्याम्नातं। मरुतोहेनंनाजहुरितिवाइद्राभिमुख्यभिमंगाभनाभ्यपणवंत गोभनाभिगमनमित्यर्थः॥ अंतरिक्षप्रां अंतरिक्षं द्यु
लोकं स्वतेजसाप्रातिपूरयन्तीति अंतरिक्षप्राः इंद्र इस्रावादित्येपु इंद्रस्यविद्यमानत्वात। ज्योत्यांतरपिश्रयन्तनस्या उंद्रस्यैविक स्वान्तावा
तामितिइंद्र आविव स्वाश्वस्यतउतिच। तविषीभिरावृतंतविषीतिबलनाम तविषीभिरावृतमितितत्या मसपावात। बलेरावृतं अतिबलीन
मित्यर्थः अतएवमदच्युतं शत्रूणांमदस्य गर्वस्य च्यावयितारं शतक्रतुं शतसंख्याकानां क्रतूनामाहर्तारं बहुविधकर्माणंवाप्रवीतं
तमिंद्रं जवनीऊववर्धं प्रति प्रयियी सूनृता तमारुहिः प्रयुक्ता प्रडरभगवा नदिवीरयस्वाविवाल्म णानं स्पाप्रियसत्यात्मिकावागपिआ
रुहत। आरुढवतीरूवबर्धं प्रतिसापिवाचा उंद्रस्यात्मा हैकाशिण्यवरिस्यर्थः। अवन्वन्‌ वन पणसंभक्तौ। लङि डापिप्राप्तव्यत्ययेन उप्रत्ययः
स्वाभिरिष्टिउपगंता भावविस्प्रत्ययः तितुत्रेत्यादिनइट्प्रतिषेधः नञ्‌संनादित्वातपरपूर्वत्वं शोभनाअभिष्टयस्येतिवहुव्रीहौ नञ्सुभ्यामितिउत्त
रपदांतोदात्तत्वं। अंतरिक्षप्राःरण अंतरिक्षंप्रातिपूरयतीत्यंतरिक्षप्राः आतामनिन्क्वनिप्विचश्चेतिविच्‌ आरुतं वृञ्‌ वरणे। आवृतेत्युपसर्गः
तृमंतिषाणगतिरनंतरगतेः प्रकृतिस्वरत्वं दक्षासः दक्ष वृद्धौ। दक्षंतइतिदक्षाः कर्मणिघञ्‌ चिता त्राता दात्तत्वं आज्जसेरसुक्‌ शतक्रतुं शात
क्रतवाद्यस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन जवनी जुउतिगत्यो आधातुः जुवरणाकारविकद्रूणा त्याहिनादिग्वित्सरेणउकारस्योदात्तत्वं भर हत रुह
लुङि कृमृहरुहिभ्यः छंदसीतिच्लेर ङादेशः॥ ॥तृतीयामृचमाह॥ त्वं गोत्रमंगिरोभ्योऽवृणोरपोतात्रये शतदुरेषु गातुवित्॥ ससेन चिद्वि २२२
मदायावहो वस्वाजावद्रिं वावसानस्य नर्तयन्‌॥ हे इंद्र त्वं गोत्रं अप्सुगवावृत्त मेघं अवृणोः भेदेनावा नेन्तिनिस्तु गारं पापिरावृणोः अंगिरसामृषीणां
र्थाय अपावृणोः अपावरणं कृतवानसि। अत्रयेऽस्मा वरं मघं गत्रेणाध्वाघवर्षेणं कृतवानसीत्यर्थः॥ यद्वा गोत्रं गोसमूहं पणिभिरपहृतं

गुहामानिहितं अंगिरोभ्यः ऋषिभ्योऽपावृणोः गहाद्वारोद्घाटनेन प्रकाशयउत अपिच। अत्रयेमहर्षये ऋषये शतदुरेषु शतद्वारेषुयंत्रेषु अस 223
रैः पीडार्थंप्रक्षिप्रायगातुवित्‌ मार्गस्यलंभयित्‌अपिवाभूः तथाविमदायचिनतदिमदनाम्नेमहर्षयेपिससेनअंनेनयुक्तं वसुधनंअवहः प्रापितवानसि 1924
था। आजौसंग्रामेऽप्रत्यर्थं वाव सानवस्यनिवसता वस्तमानस्यापि स्तोतुः अद्रिं वज्रं नर्तयन् रश्मणं कृतवानसीतिशेषः अतसवमहिमाकेनवर्ण
ऽनुं शक्यतइतिभावः गोत्रं गुड्‌अभ्यर्थं न शब्दे औणादिकः त्रनप्रत्ययः युद्धस्कलगोस्थादिस्यत्वानुवृत्तौ उनिनकः सवश्चेतिसमहाथर्थं नप्रत्ययः वं
दसंप्रसारणं परपूर्वत्वेन वयादिइयोः स्थानेभवतिसत्वभावे अत्यनत्यामपिवापदेनामित्युत्तरस्ये णरइतिपरतं भवति। यद्वा द्वारशब्दस्ये
वशोर्दसंप्रसारणं द्र इत्यंगातुवित गाउः गतौ अस्मात्कमिमनिजनि भागापायाहिभ्यश्चेकप्रत्ययः तेवेदयतीतिलंभयतीतिगातुवित
विद्लृलाभे। अंतर्भावितण्यर्थतान क्विप्‌ कृदुत्तरपदप्रकृतिस्वरत्वं। ससेनेनसमस्मिंत्नामससेनमः आयुरितितंनामसपात आजिरितिसंग्रा
मनाम अज गतिक्षेपणयोः अजिन्तिनपाता अद्रिं अतिभक्षयति विरणमित्यद्रिर्वज्रः अदिशदिभूशुभिभ्यः क्रिनितिक्रिनप्रत्ययः नित्वादाद्युदात्तत्वं या
वत्तमहिशब्देव्याचष्टे अद्रिरादृणात्येनेनापिवातेः स्वादितिवावसानस्य वसनिवासेत्‌ तेरिताघानिस्त्वानपूर्व इत्युत्तरसैनिशापःखुःद्विर्भा
वहलादिशेषोदीर्घश्छान्दसः॥ ॥चतुर्थीमृचमाह॥ त्वमपामपिधानावृणोरपाधारयः पर्वते दानुमद्वसु॥ वृत्रं यदिंद्र शवसावधीरहिमादि
त्सूर्यं दिव्यारोहयो दृशे॥ हे इंद्र त्वमपामुदकानां अपिधानानि आच्छादकानमेघान्‌ अपावृणोः अपवरितवान् तथा पर्वतेपर्वतिपरस्त्येपयम
हेत्रायुद्धानवत्‌ यनिवासकानदानुमत् दानुमतामहिंसायुक्तस्य यद्वा दनुरसुरमातास्ववदानुनद्वतः ता इत्यस्य वज्रात्वंसवर्धनं अधारयः शत्रून्जिता
नदीयंधनमपहत्यस्वस्य हस्ते विक्षिपइत्यर्थः यद्वा दानुमदितिवसुविशेषणं शोभनदानुयुक्तं इत्यर्थः हे इंद्र त्वं यत यदा शवसा बलेन वृत्रं कृत्रया
णांलोकानामावरितारं तथावशात्वांतरम मास्मात। यदि मालोकानवृणानइन्द्रस्य वृत्रत्वमिति अहिं आसमंतात हंतारं तथावाहिसंनयिनः
सत्नामनंतिसंगवी वामावर्भिसंवभवत्वसर्वांवि घोसर्वयशः सर्वमेनायं सर्वोभिंयसयतत्सर्वमेतत्‌ मम भवतस्माद्दिरातिएवंभूतमसुरंअव
धीः वधं प्रापयः अनंतरमेवदिवि द्युलोके दृशे द्रष्टुं सूर्यमारोहयः वृत्रेणावृतंस सूर्यतस्मात्‌ वृत्रात्‌ प्रमुच्य इत्यर्थः अपां इति षष्ठ्यात्स्वादिनावि
भक्त्युदात्तत्वं अपिधाना अपिधीयंत आधीयंत एभिरित्यपिधनानिकरणेल्युट् लोतीतिप्रत्ययात्पूर्वस्य धातोरकारस्योदात्तत्वं नन एकादेशस्व
रः कृदुत्तरपदप्रकृतिस्वरत्वं। सुपांसुलुगितिविभक्तेः पूर्वसवर्णदीर्घत्वं। अधारयः धाञ्‌ इत्यादिस्यान्निघाताभावः पर्वतपर्ववान्‌ पर्वतः पर्वपु
नः पृणातेः प्रीणतेर्वेतियास्कः दानुमत्‌। दानुः अखंडनेइत्यस्माद्दाण्‌ दानुरुत्यस्माद्दाभाभ्यांनुरित्योणादिकोनुप्रत्ययः असुरविशेषण
त्वमुपांसुलुगितिपक्षत्वात्‌॥ ॥पंचमीमृचमाह॥ त्वं मायाभिरप मायिनोऽधमः स्वधाभिर्ये अधि शुप्तावजुह्वत॥ त्वं पिप्रोर्नृमणः प्रारुजः
पुरः प्रऋजिश्वानं दस्युहत्येष्वाविथ॥ हे इंद्र त्वं मायाभिर्लयोपयक्तैः मायेति प्रज्ञानामायेतिनंनामसपाठात यद्वा मायाभिर्लोकप्रसिद्धैः
कपटैः मायिनः कपटलक्षणमायोपेतात्‌ शत्रून्‌ अपाधमः अपाजीगमः धमतिर्गतिकर्मेति यास्कः असुराः स्वधाभिरिडिर्दे
अणर्चे नः ज्ञ्यावधिशोभमानेस्वर्कोयेमुख्यस्व अजुहुत आहर्षेपुः नात्रीतानलक्षणानिति पूर्वेणसंबंधः तथाचकोपीतकीभिराम्नायते।
असुरावा आत्मन्नजुहुरुद्रातेगोतपराभवंतितिवाक्तेनापिभिरप्यपाम्नातं देवाश्चवा असुराश्चस्पर्धतेतताऽसुरा अभिमानेन कस्मिनज़ु

भा॰ १॰ द्रुम इति स्वेच वास्तिषु तु ऋतश्वेर सोपगव भ तुरितः। तथा हे नृमणः नृषु आयमानमनस्क पुस्तितव्येषु अनुग्रहबुद्धियुक्त त्वं पिप्रोः पुरयितुः एतन्नाम्नो अस
रस्य पुरः पुराणि निवासस्थानानि प्रारुजः प्रभग्नान्यकरोः। तथा तेनासुरेणापद्रुतं ऋजिश्वानं अनुगामिनं एतत्संज्ञकं राजानं दस्युहत्येषु दस्यूनामुपक्षपयि
१३३ तॄणां हननयुक्तेषु संग्रामेषु दस्युहननविमित्तभूतेषु आविथ प्रकर्षेण रक्षितवानसि। मायाशब्दस्य ग्रीह्यादिषु पाठात् व्रीह्यादिभ्यश्चेति मत
र्थीय इनिः। अन्येषामपि दृश्यत इति दीर्घः। नाकर्मनिष्ठिनितितु त्र त्यादिना द्रुप्रतिषेधः। दृपसत्यादिति धत्वाभावः। छांदसः स्वरितेवितिवत्वं। अनुदात्तत्तु हाते लङि व्य
त्ययेनाम्नातपदं अदृभ्यस्तादिति स्यादाद्युदात्तः। हृश्चलाः सार्वधातुक इति यणादेशः। पिप्रोः पृ पालनपूरणयोः। पृभिदिव्यधीत्यादिना कुप्रत्ययः। उ
दत्सपूर्वस्य त्वबहुलं छंदसीति कृत्वात् उत्वाभावः। छांदसं द्विर्वचनं अभ्यासस्य इत्वं हलादिशेषः। अर्तिपिपर्त्योश्चेति बहुलं छंदसी त्यभ्यासस्य
त्वं यणादेशः। नृमणः नृषु मनो यस्य छंदस्युदवग्रहात् इति णत्वं अरुजः रुजो भंगे आस्यडिवा गुणाभावः। ऋजिश्वानं ऋतु अश्वुते अप्राप्तितिस्त्रि
श्वापृथोदरादिः। हतग्रु हननहिंसागत्योः हननं वनिभावश्यप प्रत्ययः तकारश्चांतादेशः। दस्यूनां हत्या येषु संग्रामेषु पराहिः। छंदसिवहुलमिति
तरपदाद्युदात्तत्वं। तत्पुरुषपदसनुकृदुत्तरपदप्रकृतिस्वरत्वं आविथा अवरक्षण॥ ॥ इति प्रथमस्य चतुर्थे नवमो वर्गः॥ ॥ त्वं कुत्सं शुष्णहत्ये
ष्वाविथारंधयोतिथिग्वाय शंबरं। महांतं चिदर्बुदं निक्रमीः पदा सनादेव दस्युहत्याय जज्ञिषे॥ हे इंद्र त्वं कुत्सं कुत्सं संज्ञकमृषिं शुष्णहत्ये
शुष्णः शोषयिता एतन्नाम्नोसुरस्य हननयुक्तेषु संग्रामेषु आविथ रक्षितवान् तथा अतिथिग्वाय अतिथिभिर्गंतव्याय दिवोदासाय शंबरं एतन्ना
मकं असुरं अरंधयः हिंसां प्रापयः। तथा महांतं चित् अतिप्रवृद्धमपि अर्बुदं एतत्संज्ञकमसुरं पदा पादेन निक्रमीः नितरामाक्रमिताभूः यस्मा
देवं तस्मात् सनादेव चिरकालादेव दस्युहत्याय उपक्षयितॄणां हननाय जज्ञिषे सर्वदा त्वं दस्युहननशीलो भवसीत्यर्थः। अरंधयः रंध हिंसासं
राध्योः। रधिजभोरचीति धातोर्नुम्। अतिथिग्वाय गमेः डो गोरिति उप्रत्ययः। क्रमीः क्रमु पादविक्षेपे ति इधि प्रतिषेधः। बहुलं छंदस्यमाङ्योग
पीत्यडभावः। पदा सावेकाच इति अदिदंपदादीति विभक्तेरुदात्तत्वं। जज्ञिषे जनी प्रादुर्भावे लिटि गमहनेत्यादिनोपधालोपः॥ ॥ सप्तमी
मृचमाह॥ ॥ त्वे विश्वा तविषी सध्र्यग्घिता तव राधः सोमपीथाय हर्षते। तव वज्रश्चिकिते बाह्वोर्हितो वृश्चा शत्रोरव विश्वानि वृष्ण्या॥ हे इंद्र त्वे
त्वयि विश्वा तविषी सर्वं बलं सध्र्यक् सध्रीचीनं अपराङ्मुखं यथा भवति तथा हिता निहितं तथा तव राधः मनः सोमपीथाय सोमपानाय हर्षते
हृष्यति। किंच। तव बाह्वोर्हस्तयोर्हितो वस्थितो वज्रः चिकिते। अस्माभिर्ज्ञायते अतः शत्रोः शातयितुर्वैरिणः विश्वानि सर्वाणि वृष्ण्यानि वृष्ण्या
नि वीर्याणि अव वृश्च छेदनं कुरु। सध्र्यंचतीति सध्र्यक् अंचेः क्विन् ऋत्विगित्यादिना क्विन् अनिदितामिति नलोपः समासे सहस्य सध्रिरादेशः सह
शब्दस्य सध्यादेशः। चौ चाः कु इति कुत्वं। हृदुत्तरपदप्रकृतिस्वरत्वं प्राप्ते अद्रिसध्र्योरंतोदात्तत्वनिपातनं ऋत्स्वरनित्यर्थमिति वचनात् सध्र्यादेशोंता
दर्शोदात्तः। तस्य यणादेशे उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं राधः राध्नोति समृध्यो भवत्यनेन राधो मन उच्यते॥ अस
नाति वादाद्युदात्तत्वं। सोमपीथाय पा पाने पातृतुदिवचीत्यादिना थक्प्रत्ययः कुमारश्चेतीत्वं। हर्षते हृष तुष्टौ श्यनि प्राप्ते व्यत्ययेन शप् आत्मने १३३
पदं च। चिकिते कितज्ञाने छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लिट्। बाह्वोः उदात्तयण इति विभक्तेरुदात्तत्वं वृश्च। वृश्चू छेदने। ग्रहिज्याद्या
नां संप्रसारणं विकरणस्वरः संहितायां द्व्यचोतस्तिङ इति दीर्घत्वं। वृष्ण्या वृषस्य सेचनशाली आणादिको मक्प्रत्ययः। तत्र भवानि वृष्ण्यानि भवे छंद

सीति यत् यतोनाव इत्याद्युदात्तत्वं। शेश्छंदसि बहुलमिति लोपः॥ ॥ अष्टमीमृचमाह॥ ॥ वि जानीह्यार्यान्ये च दस्यवो बर्हिष्मते रंधया शासदव्रता 225
न्॥ शाकी भव यजमानस्य चोदिता विश्वेत्ता ते सधमादेषु चाकन॥ हे इंद्र त्वं आर्यान् विदुषोऽनुष्ठातॄन् विजानीहि विशेषेण बुध्यस्व। ये च दस्यवस्ते 1924
षामनुष्ठातॄणामुपक्षपयितारः शत्रवः तानपि विजानीहि इति शेषः। ज्ञात्वा च बर्हिष्मते बर्हिषा युक्ताय यज्ञयुक्ताय यजमानाय अव्रतान् व्रतमिति क
र्मनाम कर्मविरोधिनस्तान् दस्यून् रंधय हिंसां प्रापय यद्वा यजमानस्य वशं गमय रध्यतिर्वशगमन इति यास्कः। किं कुर्वन् शासत् दुष्टानामनुशा
सनं निग्रहणं कुर्वन्। अतः शाकी शक्तियुक्तः त्वं यजमानस्य चोदिता प्रेरको भव यज्ञविघातकानसुरान्निरस्य यज्ञान् यजमानैः सम्यगनुष्ठाप
येति भावः। अहमपि स्तोता ते तव तानि पूर्वोक्तानि कर्माणि विश्वेत्सर्वाण्येव सधमादेषु सहमादनयुक्तेषु यज्ञेषु स्तोतुं चाकन कामये। जानीहि ज्ञा
अवबोधने क्र्यादिकः ज्ञाजनोर्जेति जादेशः अत्र लोपो न भवति तदुक्तं लुप्तनिर्दिष्टतात्परिसमाप्त्यर्थमिति येषामभिप्रायः। अतः शत्रोः शातयितुर्वैरि
णः विश्वानि सर्वाणि वृष्ण्यानि वीर्याणि अववृश्च छेदनं कुरु। सहधर्यंचतीति सध्र्यक् अंचतेः ऋत्विगित्यादिना क्विन् अनिदितामिति नलोपः समासे
सहस्य सध्रिरिति सहशब्दस्य सध्यादेशः। चोः कुरिति कुत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं प्राप्ते अद्रिसध्र्योरंतोदात्तत्वनिपातनं स्वरनित्यर्थमिति वचना
त्सध्र्यादेशोंतोदात्तः। तस्य यणादेशे उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। राधः राध्नोति समृध्यो भवत्यनेन राधो मन उच्यते। अ
सुनित्याद्युदात्तत्वं सोमपीथाय पापाने पातृतुदिवचीत्यादिना थक्प्रत्ययः कुमारश्चेतीत्वं हर्षते हृष तुष्टौ श्यनि प्राप्ते व्यत्ययेन शप् आत्मनेपदं
च चिकिते कितज्ञाने छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लिट् बाह्वोः उदात्तयण इति विभक्तेरुदात्तत्वं दर्शनं तेषां द्वादीनां ह्रस्वत्वे भवितव्यं।
मेवं। शासनां त्रिनिदीर्घोच्चारणसामर्थ्यात् अत्र ह्रस्वो न भवतीति सिद्धं वर्हिष्यांगं तरणापि अतो दीर्घो यञीत्यनेन न दीर्घः। सिध्यति तस्मा
न्दीर्घोच्चारणं व्यर्थं प्रसंगात्कथ्यते। तमसोमतु अर्थ इति भावात् रवलस्त्वयोरभावः रंधय रंध हिंसाराध्योः शासत् शासु अनुशिष्टौ शातरि
अदादित्वात् शपो लुक् अशित्वादयः यङित्यभ्यस्तसंज्ञायां वाभ्यस्तात् शतुरिति नुम्प्रतिषेधः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। शाकी शक्नु
शक्तो भाव घञंत तामत्वर्थीय इनिः। व्यत्ययेनाद्युदात्तत्वं यद्वा शकादिभ्य इति। विश्वा ता भयत्र शेः छंदसीति लोपः। सधमादेषु सहमाद्यंते त्वि
ति सधमादाः यज्ञाः अधिकरणे घञ्प्रत्ययः ननु मदोनुपसर्गे त्यप्रत्ययेन भवितव्यमेवं घञ्यारनुपसर्गइत्यत्र समसद इति वक्तव्ये
यन्मदोनुपसर्गे इति पृथगुपादानं तत घञपि पक्षे यथास्यात् यथा इति न्यासकारेण प्रत्ययादित्यस्माभिः धातुरुदात्तवृत्ते॥ सधमादस्थयोः
छंदसीति सहस्य सधादेशः। चाकन कनी दीप्तिकांतिगतिषु अत्र कांत्यर्थः। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट् णलुत्तमो वेति णल्
स्यानिकर्त्वेनातृद्ध्यभावः तुजादित्वादभ्यासस्य दीर्घत्वं॥ ॥ नवमीमृचमाह॥ अनुव्रताय रंधयन्नपव्रतानाभूभिरिंद्रः श्नथयन्ननाभु
वः॥ वृद्धस्य चिद्वर्धतो द्यामिनक्षतः स्तवानो वम्रो वि जघान संदिहः॥ ॥ य इंद्रः अनुव्रताय अनुकूलकर्मणे यजमानाय अपव्रतान् अपगतकर्म
णः असुरान् रंधयन् हिंसन् वशीकुर्वन् वा यातथा आभूभिः आभिमुख्येन भवंति त्याभुवः स्तोतारः तैः अनाभुवः तद्विपरीतान् श्नथयन्
हिंसन् वर्तते। वृद्धस्य चित् वर्धतः पूर्वं वृद्धस्यापि पुनर्वर्धमानस्य द्यामिनक्षतः स्वर्गं प्राप्नुवतः तस्येंद्रस्य स्तवानः स्तुतिं कुर्वाणो वम्रः स्त
नुद्वारणवीलः एतत्संज्ञक ऋषिः संदिहः सम्यगुपचिताः वल्मीकवपाः वि जघान पराहतवान् गच्छतः सन् पृथिव्याः सारभूतं वल्मीकवपालक्षणं

भा०प्र० मंतसंभार्यं अहार्षीरित्यर्थः तथा च शाट्यायनकमाम्नातं। यहूनुशीनवपासंभारं भवति। इन्द्रं मेवशं पृथिव्याभरंते इति। अनुव्रताय। अनुकूले व्रतं यस्य वृत्तं हि पूर्वपद प्रकृतिस्वरत्वं भ्यय यन अथ हि सायांणिधि घ्रादिन्यां भितमितांत स्वइति ह्रस्वत्वं। वर्धतः व्यत्ययेन परस्मैपदं इनश्

११४ तः न समनतो इंकारपदनं अश्वो इमः यद्वा इनशितिर्गत्यर्थः प्रकृत्यंतर मनन व्यं स्मवान सम्यान व प्रवइति स्तोते वं ह्रस्व वनानतिरवपद्माख्यान च प्रत्ययः व्यत्ययेनाघ् उदात्तत्वं प्रधान अभ्यामात्स्य भ्यस्तादु तरस्य हंतर्दकारस्य वृत्तं। मंदिह स्पि ह इपच्ये। कृत्यल्युटो बहुलं इति वचनात कर्मणि विप्रत्ययः दुत्तर पदप्रकृतिस्वरत्वं॥ ॥दशमीमृचमाह॥ तक्षद्यत्त उशना सहसा सहो वि रोदसी मज्मना बाधते शवः॥ आत्वा वातस्य नृमणो मनोयुज आपूर्यमाणमवहन्नभिश्रवः॥ हे इंद्र यद्यदा उशना काव्यः सहसा आत्मीयेन बलेन ते तव सहो बलं तक्षत् तनूकृतवान सम्यक तीक्ष्णमकरोदित्यर्थः तदानीं तव शवः बलं मज्मना सर्वस्य शोधकेन स्वेन तेजसा रोदसी द्यावापृथिव्यौ वि बाधते विभीतयत इत्यर्थः तथा चाम्नातं। यस्य शुष्मा द्रोदसी अभ्यसेतामिति यद्वा रोदसी यस्माद्बलाद् द्विभीत स्तं बाधत इत्यर्थः हे नृमणः नृषु यष्टृषु अनुग्रहयुक्तं इंद्र आपूर्यमाणं पूर्णं बलेन सर्वतः पूर्यमाणं त्वां मनोयुजः मनोव्यापारमात्रेण युक्ताः वातस्य वायोः संबंधिनः त इव इगन ग इत्यर्थः एवंभूता अश्वाः अभि अभिमुख्येन प्रापयंतु तक्षत तक्षूत्वक्षू तनूकरणे छंदस्य ..

माङ्योगेपीयडभावः। व्यत्ययेन चत्वाक्तु सातत्वा धातुस्वरः। सिघ्यतेरूशनावयवे। उणादिनिनीतावशितिकृत्वा सप्रसारणं व्यत्यय ...। सर्वनामस्थाने चापधायाः। घर्तिर्गैर्दृणमाविर्तिन। बो मज्मना दमक्रुल्गु ओणादिको मनिप्रत्ययः नृमणः छंदस्यद वाहिति णत्वं॥ अवहन् छंदसिलुङ्लङ्लिट इति प्रार्थनायां लङ्॥ ॥इति प्रथमस्य चतुर्थे दशमो वर्गः॥ ॥एकादशीमृचमाह॥ मंदिष्ट यदुशने काव्ये सचाँ इंद्रो वंकू वंकुतराधि तिष्ठति॥ उग्रो ययिं निरपः स्रोतसा सृजद्वि शुष्णस्य दृंहिता ऐरयत्पुरः॥ यत् यदा इंद्रः उशने कामयमाने काव्ये सह मंदिष्ट स्तुतो भवत। तदानीं वंकू वंकुतरा अतिशयेन कुटिलं गच्छंतावश्वौ। अधितिष्ठति रथे संयोजयतामारोहतीत्यर्थः यद्वा वंकू वंकुतरा अतिशयेन वक्रंग उतिगत्यर्थं वंकू वक्रगमनशीलो अश्वौ संयोजितवानित्यर्थः उग्रः उद्गूर्णबल इंद्रः ययिं गमनयुक्तान मेघात स्रोतसा प्रवाहरूपेण अपो निरसृजत जलानि निरगमयत तथा शुष्णस्य सर्वस्य शोषयितुः असुरस्य दृंहिताः प्रवृद्धाः पुरः नगराणि निवासस्थानानि वैरयत। विविधं प्रेरितवान मंदिष्ट मादि स्तुतिमोदमदस्वप्नकांतिगतिषु। लुङि बहुलं छंदस्य माङ्योगेपी त्यडभावः उशन वशकांतौ। णादिकः क्युप्रत्ययः ग्रहिज्यादिना संप्रसारणं योरनादेशाः सचा पवसमवाये संपदादित्वात् लक्षणो भावे क्विप आद्युदात्तायां चापसंख्यानमितिविभक्तेराकारादेशः संहितायां आङोनुनासिकश्छंदसीति तस्मानुनासिकत्वं। वंकू वंकुतरा। ओणादिकः प्रत्ययः बहुलवचनात्कुत्वं। वंकुतराति शयेन वंकू वंकुतरा सुपां सुलुगिति विभक्तेराकारः अत्र गति सामान्यवाचिना गतिविशेषो लक्ष्यते। ययिं या प्रापणे। आदृगमहनजन इति किप्रत्ययः लिट्वद्भावात्द्विर्वचनम्। स्वरेआतोलोपइटिचेत्याकार लोपः प्रत्ययस्वरः स्रोतसा पाभवंतीति पंचम्या अमाङ्यः दृंहिताः दृहिवृंहिद्वृद्धावितिस्म इदितो नुम् ..स्यत ईरप्रेरणे चौरादिकः लङि आडागमः आद ११४ श्वर्यश्च॥ ॥द्वादशीमृचमाह॥ आ स्मा रथं वृषपाणेषु तिष्ठसि शार्यातस्य प्रभृता येषु मंदसे॥ इंद्र यथा सुतसोमेषु चाकनोनर्वाणं श्लोकमारोहसे दिवि॥ अत्र कौषीतकिनिरुक्तिहासमाचक्षतेशार्यातेनामानवराजर्षिः वसिष्ठ गुणा गोत्र आश्विनौ महर्षिः आश्विनं ग्रहं गृह्णात इंद्रस्तं

द्वावृ प्रोभूत तमिंद्रं अनुनीय पुनः सोमं तस्मै प्रादादिति। अयमर्थः मां प्रति पदाने इंद्र त्वं वृषपाणेषु वृष्णुः सेचनसमर्थस्य सोमस्य पानेनिरूपणा 227

णानितपूर्तिमित्र भूतपुरस्थानि तेषु सिमिमयमेवरथा मारोहस्य गच्छसि मंदिन्स्य कश्चिदपवर्नयितेति भावः एवं च सतियेषु त्वं मंदसहर्षं प्राप्नोषि 1924

ता दृशाः सोमाः शार्यातस्य एतन्नाम्नो राजर्षेः संबंधिनः प्रभृताः प्रकर्षेण संपादिताः अभिषवादिसंस्कारैः संस्कृता इत्यर्थः अतः सुतः सोमे षु अभिषुत सोमयुक्तेषु अन्यदीयेषु यज्ञेषु यथा चाकनः कामयसे एवमस्यापि शार्यातस्य सोमान् कामयस्व। तथा सति दिवि द्युलोके अनर्वाणं गमनरहितं स्थिरं श्लोकं स्तोत्रलक्षणं वचो यशो वा आरोहसि प्राप्नोषि। यद्वा इमं यजमानं दिवि द्युलोके उक्तलक्षणं वचः प्रापयसि। स्मनिपातस्य निदीर्घत्वं। वृषपाणे वृषापानेभावे ल्युट्। वृषाभावकरणयोरिति पूर्वपदस्थान्निमित्ता दुत्तरस्य पानशब्दनकारस्य णत्वं। प्रभृताः भृञ्भरणे कर्मणिनिष्ठा गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। मंदसे मदि स्तुतिमोदमदस्वप्नकांतिगतिषु। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः चाकनः कनदी प्तिकांतिगतिषु अत्र कांत्यर्थः कांतिश्चाभिलाषः। व्यत्ययेन शपः श्लुः बहुलं छंदसीति शपः श्लुः तुजादित्वादभ्यासस्य दीर्घत्वं। सर्वविधयश्छंदसि विकल्प्यंत इत्यभ्यस्तस्याद्युदात्तत्वं। भावात धातोरिति पत्वं स्यादात्तत्वं अनर्वाणं अर्तेरन्येभ्योपि दृश्यंत इति दृशिग्रहणाद्वनिप नञो बहुव्रीहिरभि अर्वणस्त्वसावनञ इति पर्युदासान आदेशाभावे सर्वनामस्थाने च त्यपधाया दीर्घत्वं नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥ श्लोकं। श्लोक संघाते श्लोक्यत इति श्लोकः कर्मणि घञ्ञित्वादाद्युदात्तत्वं। रोहसे रुह व्यत्ययेनात्मनेपदं॥ ॥त्रयोदशीमृचमाह॥ ॥अददा अर्भां महते वचस्यवे कक्षीवते वृचयामिंद्र सुन्वते॥ मेनाभवो वृषणश्वस्य सुक्रतो विश्वेत्ता ते सवनेषु प्रवाच्या॥ अत्रेयमाख्यायिका। अंगराजः कश्चित्स्वकीयाभिः क्रीडाभिः योषिद्भिः सह गंगायां जलक्रीडां चक्रे। तस्मिन्समये दीर्घतमा नाम ऋषिः स्वभार्यया पुत्रप्रभृतिभिश्च दुर्बलत्वात् क्षिपि ... तीति द्रविणं गंगायामिव्यप्रक्षिप्त सच ऋषिः कदाचित् पुत्रेन अंगराजस्य देशं प्रति समागमत्सच राजा सर्वज्ञं तमृषिं मत्वा पुत्रार्थं च मवाचत हे भगवन् मम पुत्रा नास्ति पामहिषी आ कंचित् पुत्रमुत्पादयेति। सत थेत्यब्रवीत। सा महिषी तुराज्ञां प्रति त था... भयं चात्मन गुप्तिनोम मयायं न भवतीति बुध्या स्वकीया मुशिंव संज्ञां दासीं प्राहैषीत। तत्र च सर्वज्ञेन ऋषीणां मंत्रपूतेन वारिणा भ्युक्षिता मत्वी सा ऋषि पत्नीव भवत्तस्या मुत्पन्नाः कक्षीवान्नाम ऋषिः स एव राज्ञः पुत्रो भवत। स च बहुविधेन राजसूयादिना इंद्रं स्तोत्रेन तं रा... नेयं तेः परितुष्ट इंद्रः वृचयाख्यां तरुणीं युवतिं प्रादात। अयमर्थः पूर्वार्धे प्रतिपाद्यते। हे इंद्र त्वं महते प्रवृद्धाय वचस्यते यते स्तोत्रलक्षणं वच आत्मन इच्छते। सुन्वते सुतवता कृपयज्ञेषु सोमाभिषवं कुर्वते कक्षीवते एतन्नाम्ने राज्ञे वृचयां वृचयाख्याम अर्भामल्यां युवतिमित्यर्थः। एवं भूता स्त्रियमदात् तथा सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा हे इंद्र त्वं वृषणश्वस्य एतदाख्यस्य राज्ञो मेना मेना नाम कन्यका भूः तथा च शाट्यायनिभिः ... मेनकेत्याख्यानरूपं ब्राह्मणमेवमाम्नायते। वृषणश्वस्य मेने इति वृषणश्वस्य मेना भूत्वा मघवा कुले उवासेति तां च प्राप्य तां च यो मे नं द्रव्यकं म। तथा च तांडिभिराम्नातं। वृषणश्वस्य मेना नाम दुहितासता मिंद्रस्य कामइति ऐतदुक्तरूपाणि यानि कर्माणि ते सायत्तानि ते तानि त्वदीयानि तानि विश्वेत सर्वाण्येव सवनेषु यज्ञेषु प्रवाच्या प्रकर्षेण वक्तव्यानि स्तोतृभिः स्तोतव्यानीत्यर्थः महते वृहन्महतोरुपसंख्यानमितिविभक्तेरुदात्तत्वं। वचस्यवे। सुपः आत्मनः क्यच् क्याच्छंदसीत्युप्रत्ययः कक्षीवते अश्वसंबंधनहेतवो रज्जवः कक्ष्याः

ऋ॰ भा॰ कक्षीवानकृत्वानिति यास्कः। आसन्दीवदष्टीवच्चक्रीवत्कक्षीवदिति संप्रसारणं मतुपो वत्वं च संज्ञायां निपात्यते। मेनेति स्त्रियो भागमेनाम्नाउ इति पाठात् मेन
ज्ञानमन्यते नया इत्यं ज्ञानातीति मेना पचाद्यच् नन्दिग्रह्यादिभ्यो ल्युरित्येकं वचनत्वमित्यवं। वृषाश्विदश्व इत्यः। मेनाभाव यत्येनाउ इति यास्कः। सवनेषु सवनमिति यज्ञ
२२७ नामसु पठितं। अभिमयत प्रविति अधिकरणे ल्युट्। मवाच्यावचपरिभाषणे ण्यन्तियजतं यावचरच अंशमवचयेति कृत्याभावः। तित्स्वरिते प्राप्ते ऋत्ययेना
द्युदात्तत्वं। यज्ञायाव यतेरश्वायदितियतयज्ञेनाव इत्यापृदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥चतुर्दशीमृचमाह॥ इंद्रो अश्रायि सुध्यो निरेके प
ज्रेषु स्तोमो दुर्यो न यूपः॥ अश्वयुर्गव्यू रथयुर्वसूयुरिंद्र इद्रायः क्षयति प्रयंता॥ इंद्रो देवः सुध्यः शोभनकर्मणो यजमानान् शोभनप्रज्ञा
न्वा निरेके नैर्धन्ये निमित्तभूते सति तान् रक्षितुं अश्रायि अश्रीयत। पज्रा इत्यंगिरसमाख्या। तथाच शाट्यायनिभिराम्नातं। पज्रा वा अं
गिरसः पशुकामास्तोमं नयंतीति। ये पु यजमानमंगिरसः स्तोमः स्तोत्रं निश्चितं तिष्ठति। दुर्यो न यूपः द्वारि निखातास्थूणेव तथा गव्युः गाः
इच्छन् रथयुः रथानिच्छन् वसूयुः एवमन्यदपि धनमर्थिन इच्छन्नि यजनिवर्तने अश्रायि श्रिञ सेवायां कर्मणि लुङ्। च्यय स्येनक्षुण्वत्ती
देशः सुध्यः धीरिति कर्मनाम शोभना धीर्येषां ते सुधियः। भावयामित्यत्र रपरतो नास्तित्वं। दाशिष्ठं दस्य भयतियणादेशः उदात्तस्वरितयो
र्यण इति स्वरितत्वं। निरेकः नितरां रेचनं निरेकः। रिचिर् विरेचने भावे घञ् अथाथादि निजरप्रसंतोदात्तत्वं। दुर्यः दुरभवोदुर्यः भवेछंदसीति यत्
यतोनाव इत्याद्युदात्तत्वं। यूपः युमिश्रणे युपन्तयुस्पनेर्मिलतीति यूपः। कुयुभ्यां चेति यप्रत्ययः दीर्घ इत्यनुवृत्तेर्दीर्घत्वं। अश्वयुः अश्वानात्मन
इच्छान् इच्छति छंदसि परेच्छायामिति क्यच् न छंदस्य पुत्रस्येति ईत्वदीर्घयोर्निषेधः अश्वाघस्यादित्यात्वं तु क्यच्प्रत्ययान्तत्वान्न भवति क्याछंदसीत्युप्र
त्ययः। गव्युरित्यत्र वाताप्यत्ययोदात्तत्वं न छंदसि क्यच्। गव्युरित्यत्र वातापि प्रत्ययस्वरः इत्यवादत्वाः याम्कस्त्वेवं व्याचष्टे इंद्रे गुरिश्वका मयमानो धापित इदये भा
ष्यते व सर्ति दावस मानित्यर्थः। अश्वयुर्गव्युरथयुर्वसूयुरिंद्र इत्यभिपन्नेगमो भवतीति। क्षियते। भौवादिकः प्रयंता यम उपरमे। कृच
एकाच इतीट्प्रतिषेधः चितइत्यंतोदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥पंचदशीमृचमाह॥ इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसेऽवाचि।
अस्मिन्निंद्र वृजने सर्ववीराः स्मत्सूरिभिस्तव शर्मन्स्याम॥ ॥इदं पुरोवर्तिनमः स्तुतिलक्षणं वचः हे इंद्र तुभ्यमवाचि अस्माभिः प्रायोजि किंभूताय
वृषभाय वर्षणशीलाय स्वराजे स्वयमेव राजमानाय सत्यशुष्माय सत्यमविसंवादि शुष्मं बलं यस्य स तादृशाय। तवसे प्रवृद्धाय। अत एवमभिगतम
र्थं तं प्रार्थयते। अस्मिन् वृजने वर्तनवति संग्रामे वृजनशब्दः संग्रामवाची वृणक्ति वर्जयति वा नितरां प्राणान् अत्र वृजने सर्ववीराः सर्वे शोभना वीरा भृत्याः पुत्राश्च येषां ते सर्ववीराः वयं स्मद्
इति निपातितः सहार्थः। सूरिभिः विद्वद्भिः सह तव शर्मन् शर्मणि सुखे स्याम भवेम। स्वराजे स्वयं राजत इति स्वराट् सत्पूर्वस्य राजतेः क्विप्
सत्यशुष्माय सत्यं शुष्मं बलं यस्य स इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। तवसे तवतिवृद्धिकर्मा। असुन् प्रत्ययः। वृजने वृजी वर्जने
वृजेः इति क्युन्प्रत्ययः। शर्मन् सप्तम्या लुक् सुपां सुलुगिति सप्तम्या लुक् न ङिसंबुद्ध्योरिति नलोपप्रतिषेधः। स्याम स्मद् इति संहिता २२७
यां सकारस्य धुडागमः स्वरितनिवर्तनं अविद्यमानत्वाद्वा इति तकारस्य थकारः॥ ॥इति प्रथमस्य चतुर्थे एकादशो वर्गः॥ ११॥
त्यं सु मेषमिति पंचदशर्चं द्वितीयं सूक्तं सव्यस्यार्षं स्वसृत्वाद्भावयति जगती छंदः त्रिष्टुबंता जगत्यः तथाचानुक्रांतं त्यं सु पंचोनाश्वतस्त्रिष्टुबंताभिः
तिगतामयनस्य मध्यमे हनि विषुवति सकमरुत्वतीयशस्त्रं इदं सूक्तं। विषुवानदिवाकीर्त्यं इति खंडे सूत्रितं॥ त्यं सु मेषं महयात्स्वर्विदमिति मरुत्वती
यमिति॥ ॥

त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते। अत्यं न वाजं हवनस्यदं रथमेंद्रं ववृत्यामवसे सुवृक्तिभिः॥ त्यं प्रसिद्धं मेषं शत्रुभिः सह स्पर्धमा 229
नं स्वर्विदं स्वर्गस्य द्योतनस्य वेदितारं लब्धारं यद्वा सर्वज्ञं अरण्यायन तस्य लभयितारं एवं गुणविशिष्टमिंद्रं हे अध्वर्यो मम हृदय सुसम्यक्प्र 1924
जय तस्य इन्द्रस्य दानसंख्याकाः सुभ्वः स्तोतारः साकं सहैव युगपदेव इरते अतो नात्र वर्तते। यद्वा यस्येंद्रस्य रथं शतं सुभ्वः शतसंख्याका अश्वाः साकं
सह ईरते गमयंति तमिंद्रमवसे रक्षणाय सुवृक्तिभिः शोभन आवर्जकैः स्तोत्रैः रथमावर्तयामि वृतिः रथं प्रति आवर्तयामि किंभूतं रथं हवनस्यदं हवन
माह्वानं यागं वा प्रति वेगेन गच्छंतं वेगेन गमनदृष्टांतः अत्यं न वाजं गमनसाधनं अत्वमिव महय महपूजायां चुरादिरदंतः संहितायामन्येषामपि
दृश्यत इति दीर्घत्वं सुभ्वः सुष्ठु भवंतीति सुभ्वः स्तोतारः क्विप् चेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। जसि ओः सुपीति यणादेशस्य न भूसुधियोरि
ति निषेधात् उवङादेशः उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। ईरते ईर गतौ कंपने च अदादि
त्वाच्छपो लुक् प्रत्यादेशः देरत्वं अनुदात्तत्वात् सार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते। यद्वृत्तयोगादनिघातः तत्र पंचमीनिर्देशेऽपि व्यवहितेऽपि का
र्यमिष्यत इत्युक्तं अत्यं अत इत्यश्वनाम अत्यः ह्यः इति पाणिनिः। वाजं वाजयते गम्यते अनेनेति वाजः वज व्रज गतौ करणे घञ् अजिव्रज्योश्चेत्यत्रजा
दृश्यानुवृत्तेः सन्नुपूर्वार्थत्वात् वाजाद्युदात्तत्वमिति वापि कुत्वाभाव इत्युक्तं। हवनस्यदं हवनं प्रस्यंदते स्यंदू प्रस्रवणे स्यदो जवे इति वेगे गम्यमाने घञंतो निपातितः॥
अत एव नलोपाद्यभावश्च न वन धातुलोप आर्धधातुके इति वृद्धिप्रतिषेधः इग्लक्षणा हि वृद्धिस्तत्र प्रतिषिध्यते न चेयमिग्लक्षणा घञ्जितो
कृदुत्तरपदस्याद्युदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वेन तदेवावशिष्यते। ववृत्यां वृतु वर्तने लिङि व्यत्ययेन परस्मैपदं बहुलं छंदसीति शपः श्लुः द्विर्वचनादि
याम उकारः अडागमः व्यत्ययेन लघूपधगुणाभावः तिङ्ङतिङ इति निघातः॥ ॥द्वितीयामृचमाह॥ स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे॥ इं
द्रो यद्वृत्रमवधीन्नदीवृतमुब्जन्नर्णांसि जर्हृषाणो अंधसा॥ अंधसा सोमलक्षणेनान्नेन जर्हृषाणः अत्यर्थं हृष्यन्निंद्रः यद्यदा वृत्रं यज्ञलोका
नामावरीतारमवधीत हतवान् कीदृशं वृत्रं नदीवृतं नदीनां वरीतारं किंतु कुर्वन् इंद्रः अर्णांसि जलानि उब्जन् अधः पातयन्
तदानीं स इंद्रः पर्वतो न पर्वतवान् शिलोच्चय इव धरुणेषु सर्वस्य धारकेषु उदकेषु मध्ये अच्युतः चलनरहितत्वेन स्थितः सहस्रमूतिः बहुधा रक्ष
णवान् तविषीषु बलेषु वावृधे प्रवृद्धो बभूव। धरुणेषु धारयतेर्णिच् उनन् प्रत्ययस्वरः सहस्रमूतिः सहस्रमूतयो यस्यासौ तु भावश्छांदसः
वावृधे संहितायामन्येषामपि दृश्यत इति दीर्घत्वं। नदीवृतं नदीर्वृणोतीति नदीवृत् क्विप् तुगागमः उब्जन् उब्ज आर्जवे विकरणस्वरः अर्णां
सि उदके नुट् च असुन्प्रत्ययः ततो नियोगेन नुडागमश्च नित्वादाद्युदात्तत्वं जर्हृषाणः हृष तुष्टौ यङ्लुगंताल्लटः शानच् अभ्यस्तानामादि
रित्याद्युदात्तत्वं। यद्वा यङ्लुगंतात् शानच् व्यत्ययेन बहुलं छंदसीति शपो लुक् छंदस्युभयथेति शानच आर्धधातुकत्वात् अतोलोपयलोपौ सार्वधातुकत्वा
त् अभ्यस्तस्याद्युदात्तत्वं अंधसा अंधनीयं अद इत्यस्य नुम् धश्च असुन्। धातोर्नुमागमो धकारांतादेशश्च नित्वादाद्युदात्तत्वं॥ ॥तृतीयामृच
माह॥ ॥स हि द्वरो द्वरिषु वव्र ऊधनि चंद्रबुध्नो मदवृद्धो मनीषिभिः॥ इंद्रं तमह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिरंधसः॥ पूर्वोक्तगुणविशि
ष्ट इंद्रः द्वरिषु आवरीतृषु शत्रुषु अतिशयेनावरीता खलु शत्रूणां जयशील इत्यर्थः यस्मात् ऊधनि उधन्वल वत्तंतरिक्षे वव्रः संभक्तः व्याप्य

भा॰ प॰ वर्ते तेऽत एव चेंद्रः वृधः सर्वासां प्रजानामाच्छादकत्वात अंतरिक्षस्य सर्वाच्छादकत्वात् मंदयद्भिः मादयद्भिः तैः सोमैः सोमाख्यैर्वर्धितः एवंभूतो वज्री इंद्रो
मंदिष्ठगाति मद्भिः नं प्रवृद्धदानं वातमिंद्रं मर्नीषिभिः मननशीलैः स्तोतृभिः प्राप्तैर्ऋत्विग्भिः सहस्पस्पस्य याधियाजाभनवृमैयाग्ययायुध्याभवनमास्था
११६ मिद्ध्यमातमइंद्रः अंधसोनस्यास्मद्यज्ञस्य तस्य पद्भिः पूरयिता। द्रुः द्रवर्त्येत दूरत्या वृणोतीति द्रुः पवास्य चेति स्वरणो तोदातः ततेद्रुरिपुअचद्रुशिति
वृतेर्दिप्रत्ययः वव्रः ऊरुः संभजं क्रिया यते संभजते इति वव्रः। घञर्थे कविधानं स्थागापापचाधिरुनियुध्यर्थमिति परिगणनस्योपलक्षणार्थत्वात्
कर्मणि कप्रत्ययः दुर्भार्वस्थां रसः इंधनिरंद्र धर्मीयतस्मिन्नत्कामित्कथः मममस्यक्च वने अधिकरधिस्वकस्यक्षणामनद्रुदातः छंदस्यपि द
श्यतेति दृढ्यिग्रहणात्। कथमनाढ्कस्याख्यनसदत्ता यद्वाडुधसामानदितिसमासविधीयमानोन सदता च छांदसत्वात् कृत्स्नाद्रपि भवति। चंद्र वृधः
चावआच्छादनदीमो वद्रुरिवासुमस्थापितं चीत्यादिनारकप्रत्ययस्वरेण तोदात्तत्वं बहुव्रीहौ पूर्वपदप्रकृतिस्वरेणतदवशिष्यते मदरस्य मदीस्वर्ममेव
नुपसर्गेइतिकरणे अप तस्य विप्रानदुदात्तनेधातुस्वरः स्तोतायत्मर्णीति पूर्वपदप्रकृतिस्वरत्वं। अकस्त्वस्यधर्षांसा चेच्छंदसि लुङ्लङ्लिटइति
वर्तमाने लुङ् आत्मनेपदं छन्यतस्यामितिव्रू रसन्देह अतो लोप इति चेत्याकारलोपः गुणः स्पपस्पया। अप इति कर्मनाम शोभनमपः स्वपसिमि
चेति यप्रत्ययः मंहिष्ठमिति यस्यास्त्रियाः पुंवदिति पुंवद्भावः स्वत्वं। बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरत्वम्। पत्रिः पृपालनपूरणयोः आदृग
महनजनइतिक्रिन्प्रत्ययः उदोष्ठ्यपूर्वस्येत्युत्वस्य बहुलंछंदसीति वचनाभावयणादेशः लिटः वड्वाद्विर्वचनेति स्थानिवद्भावे सतिद्विर्भावेरत्व
हलोदिर्घोषाः निस्वादाद्युदात्तत्वं॥ ॥चतुर्थीमृचमाह॥ आ यं पृणंति दिवि सद्मबर्हिषः समुद्रं न सुभ्वः स्वा अभिष्टयः॥ तं वृत्रहत्ये अनु तस्थुरू
तयः शुष्मा इंद्रमवाता अह्रुतप्सवः॥ सद्मसदनं स्थानं बर्हिषः आच्छादकस्थितायज्ञाये यासोमासोमाः दिविस्वर्गलोके अवस्थितं यमिंद्रं आपृ
णंतिआसमंतात्प्रयंति। तत्र दृष्टांतः सुभ्वः शोभनतीतिसुभ्वोनद्यः समुद्रं नयथा नद्यः समुद्रं पूरयंतितद्वदित्यर्थः॥ कीदृशो नद्यः स्वाः समुद्रस्य
स्वभूताः तथा चाम्नायते। समुद्राय वयुनाय सिंधूनांपतये नमइति अभिष्टयः आभिमुख्येन गमनवत्यः इंतयः अवितारो मरुतः वृत्रहत्ये
वृत्रहनननिमित्त भूते सतितमिंद्रं मनुतस्थुः अनुलक्ष्यावस्थिता बभूवुः कीदृशाः मरुतः शुष्माः शत्रूणां शोषयितारः अवाताः वाति प्रातिकूल्येन ग
च्छंतीति वाताः शत्रवः तद्रहिताः अह्रुतप्सवः अकुटिलरूपाः शोभनावयवा इत्यर्थः पृणाति पृपालनपूरणयोः क्र्यादिकः प्वादीनां ह्रस्वइति
ह्रस्वत्वं। श्नाभ्यस्तयोरात इत्याकारलोपः प्रत्ययस्वरः यद्वृत्तयोगादनिघातः सद्मबर्हिषः षद्लृविशरणगत्यवसादनेषु सीदंत्यस्मिन्निति स
द्म औणादिकोऽधिकरणे मनिन्प्रत्ययः नित्वादाद्युदात्तत्वं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेनतदेवशिष्यते। सुभ्वः भवतेः क्विप्चेतिक्विप्कृदु
त्तरपदप्रकृतिस्वरत्वं जसि ओः सुपीतियणादेशः स्वरितत्वं नभूसुधियोरितिनिषेधप्रासं छंदस्युभयथेति यणादेशः उदात्तस्वरितयोर्यणइत्य
नुदात्तस्य स्वरितत्वं अभिष्टयः इषु इच्छायां अस्मादुपसर्गाश्चाभिविधौमितिवचनात् अभिरंतोदात्तः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव शिष्यते
एमन्नादिषु चेति पररूपत्वम्॥ वृत्रहत्ये हनस्त चेतिहनेर्भावेक्यप् तकारांतादेशश्च प्रत्ययस्यपित्वादनुदात्तत्वे धातुस्वरः शिष्यते। अह्रुतप्सवः ह्व
कौटिल्ये अस्मान्निष्ठायां बहुलंछंदसीति ह्रु आदेशः प्साभक्षणइत्यस्मादौणादिकोउप्रत्ययः न ह्रुतप्सवः अव्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥ ११६
पंचमीमृचमाह॥ ॥अभिस्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिवप्रवणे सस्रुरूतयः॥ इंद्रो यद्वज्री धृषमाणो अंधसा भिनद्वलस्य परिधींरि
वत्रितः॥

वत्रितः॥

इंद्रः योमरुतः मदे सोमपानेन हर्षेतिअस्यंद्रस्य युध्यतो वृत्रेणसह युध्यमानस्य पुरतः स्ववृष्टिं स्वभूतवृष्टिसंततं वृत्रं अभिअभिमुख्येन सस्रुः गमुः र 231
घ्वीःवप्रवणेयथा गमनस्वभावा आपः निम्नदेशागच्छंतियत्तद्वत् अंधसासोमलक्षणेनान्नेनपीतेन धृषमाणः प्रगल्भः सन् वज्री वज्रवानिंद्रः वलस्य 1924
संवृण्वतः एतन्नामसुरं भिनत्यदारयत् अयथीत्यर्थः। तत्र दृष्टांतः। परिधीनिद्र्वाणां हविष्कर्पानि घर्षणाय अग्नेः सकाशात अफाणकदाद्वितः
त्रितः इतित्रितः पुरा जज्ञिरे। तथा च तैत्तिरीयैः समाम्नातं सोंगारेण्याभ्यः पातयत। ततएकतोजायत सद्वितीयमभ्यपातयत् ततोद्वितोजायतस
तृतीयमभ्यपातयत्ततस्त्रितोजायतेतिनित्रदक पानार्थं प्रवृत्तस्य कूपे पतितस्य प्रतिरोधायअसुरैः परिधयः परिधयकाः कूपस्याच्छादकत्व
पिताः तान्यथा सोभिनत् इतत्वकृतेव बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं युध्यतः युधसंप्रहारे देवादिकः व्यत्ययेनशप् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेध
तोनित्वाद्य च दात्तत्वंरघ्वीः रघिर्गत्यर्थः रंधिवंध्योर्नलोपश्चेति उप्रत्ययः वातोगुणवचनादितिङीपशासिवाछंदसीतिपूर्वसवर्णदीर्घत्वंङीपस्वरःशि
ष्यते। धृषमाणः ञिधृषाप्रागल्भ्ये प्रत्ययधातुः व्यत्ययेन शपः आत्मनेपदं च अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते भिनत्लङि बहु
लंछंदस्यमाङ्योगेपीत्यडभावः विकरणस्वरः यद्वृत्तयोगादनिघातः वलस्य वलसंवरणे वलतिसर्वमितिवलः यतिः पचाद्यच् त्रितायप्रहर्णं कर्तव्यमितिकर्म
णः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी परिधीन् परितोधीयंत इति परिधयः उपसर्गेघोःकिरिति दधातेः कर्मणि किप्रत्ययः आतोलोपइटि चेत्याकारलोपः कृदुत्तरप
दप्रकृतिस्वरत्वं॥ ॥इति प्रथमस्य चतुर्थे द्वादशो वर्गः॥ ॥षष्ठीमृचमाह॥ परीं घृणा चरति तित्विषे शवोऽपो वृत्वी रजसो बुध्नमाशयत्॥ वृत्रस्य यत्प्रवणे दु
र्गृभिश्वनो निजघंथ हन्वोरिंद्र तन्यतुं॥ यो वृत्रः अपो वृत्वी उदकान्यावृत्य रजसो बुध्नं अंतरिक्षस्योपरिप्रदेशं आशयत् आश्रित्यावर्तत तस्य वृत्रस्य प्रवणप्र
वर्षणवनती यंतरिक्षे वर्तमानस्य दुर्गृभिश्वनः दुर्ग्रहव्यापनस्य तस्याः हिव्यापनंन केनापिग्रहीतुंशक्यते। स इमांलोकान्वृणोत्तिनिश्चतेः एवंभूतस्य वृत्रस्य
हन्वोः मुखपार्श्वयोः हे इंद्र यत् तन्यतुं प्रहारं विस्फारयंतं यद्गुणाच्छकारिणंवज्रं तत्तौ यार्थोद्भृतीयात्तन्यतुनावज्रेणजघंथ तनतरांप्रहर्षेत् तदानींइएनंत्वां
इंद्रं घृणा ज्वलनलक्षणादिभिः परिचरति परितो व्याप्नोति तदीयं शवो बलं च तित्विषे प्रदिदीपे तितिवियत्विषदीप्तौ लिटि प्रत्ययस्वरः तिङ्परत्वान्निघाता
भावः वृत्वी वृञ् वरणे स्नात्वादयश्चेत्यादिग्रहणात् क्त्वाप्रत्ययस्य ईकारः रजसः रंजनरंजतत्तत्यमिन् गंधर्वाद्यप्सरंतिरजोंतरिक्षं असुनिरजकरजनरजःसूपसं
ख्यानमितिनलोपः नित्वादाद्युदात्तत्वं अशयत शीङ्स्वप्ने व्यत्ययेनपरस्मैपदं बहुलंछंदसीतिशपोलुगभावः दुर्गृभिश्वनः ग्रहउपादाने अश्व्याप्तौ दुर्गतोर्योव
र्दुः ग्राहोउपपदेसूर्योदरादित्वाद् भिमत्रकपस्सरात्सिद्धिः निजघंथ हननहिंसागत्योः लिटिथलित्वंदिनियमात्प्रासस्येटः उपदेशेत्वत इति शेषः अभ्यासा
द्रुतरस्य हकारस्य घत्वं लितीतिप्रत्ययात्पूर्वस्योदात्तत्वेतिङ्वोदात्तवतिगतेनिघातः यद्वृत्तयोगादनिघाताभावः तन्यतुं तनुविस्तारे अस्मादृतन्यंजीत्यादि
नायतुच यद्वा स्तनकाच्च हलचवना यतुच प्रत्ययसकारलोपः॥ ॥सप्तमीमृचमाह॥ ॥ह्रदं न हि त्वा न्यृषंत्यूर्मयो ब्रह्माणींद्र तव यानि वर्धना॥ त्वष्टा
चित्ते युज्यं वावृधे शवस्ततक्ष वज्रमभिभूत्योजसं॥ हे इंद्र यानि ब्रह्माणि स्तोत्ररूपाणि मंत्रजातानि तव वर्धना वर्धकानि ताम्यानि त्वां न्यृषंति नितरां
प्राप्नुवंति वर्धंति तत्र दृष्टांतः ऊर्मयः उदकानि ह्रदं न यथा जलाशयं प्राप्नुवंति तत्तद्वा त्वष्टा चित् त्वष्टापि ते तव युज्यं योगार्हं बलं च वावृधे प्रावर्धयत्
अपि च अभिभूत्योजसं शत्रूणामभिभवितृ ओजः सामर्थ्यं बलं न युक्तं वज्रं ततक्ष तनूकृतवान् तीक्ष्णीकृतवान् ऋषंति ऋषीगतौ तौदादिकः अदुपदेशाल्लसार्वधा

तुकानुदात्तत्वे विकरणस्वरः। हि चेति निघातप्रतिषेधः। कृणोतेः कृणितामन्नेतीत्यर्थः। अंतरेव तिमिनस्य यागुणसत्वकारस्य ऋकारादेशश्च प्रत्ययस्वरः। वर्धना। वृधेर्
भा॰ २॰ धातवर्धनं भावितवर्धनात् ण्यन्तात् भावे छंदसीति णिलोपः। ततस्तृतीयायाः करणाक्तिणलिङ्गस्वरणप्रत्ययान्तस्वरेणोदात्तत्वं। पादादित्वान्निघाताभावः।
११.१ अभिभूत्योजसं अभिभूत्यनेन त्यभिभूति नकरणे नाढ्याचक्रिनतीति गतः प्रकृतिस्वरत्वं अभिभूति ओजो यस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ७॥
अष्टमीमृचमाह॥ ॥त्वं वृत्रं उदभिः संभृतं तविंद्र वृत्रं मनुषे गातुयन्नपः॥ अधत्था बाह्वोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे॥ हे संभृतक्रतो
संपादितकर्मन् संपादितप्रज्ञ वा इंद्र मनुषे मनुष्याय गातुयन् गातुमार्गमिच्छन् वृत्रं लोकानामावरकमसुरं हरिभिरश्वैर्युक्तेन त्वं घ्नन् हतवानसि तदनं
तरं अपः उदकानि मावर्तयः इत्यध्याहारः। बाह्वोर्हस्तयोः आयसमयोमयं वज्रं अधत्थाः अधारयः। आकारः समुच्चयार्थः। सूर्यं चादिविद्यु
लोके दृशे द्रष्टुं सर्वेषां प्राणिनां दर्शनाय अधारयः स्थापितवान्। धन्नन्न हंतेर्लिटः घुसः विभाषागमहनविदविशामिति इडागमस्य विकल्पे नेरभा
वः गमहनेत्युपधालोपः। छायामपीति कयन्छंदस्यपूर्वस्यापि दीर्घप्रतिषेधः। क्यजन्तात् अदुपदेशात् सार्वधातुकानुदात्तत्वे कृत्स्वरः शि
ष्यते। बाह्वोः उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं॥ ॥नवमीमृचमाह॥ ॥बृहत्स्वश्चन्द्रममवद्यदुक्थ्य१मकृण्वत भियसा रोहणं दिवः॥ य
न्मानुषप्रधना इंद्रमूतयः स्वर्नृषाचो मरुतोऽमदन्ननु॥ बृहत्साम स्तोतारो यजमानाः भियसा भयेन यजमाना भियसा वृत्रभयेन यद्यदा उक
थ्यमुक्थार्हं स्तोत्रयोग्यं अकृण्वत कुर्वन् तदानीं बृहत्साम स्वश्चं इन्द्रं बलवंतं इंद्रेण रक्षकेन तत्सामयुक्तं अमवत् अमतिशयेन रक्षत्यनेनेत्यमो बलं
तद्युक्तं दिवः स्वर्गस्य रोहणं आरोहणहेतुभूतं एवंविधं स्तोत्रं कृत्वा इंद्रं अस्तावन्नित्यर्थः। यद्यदा मानुषप्रधनाः प्रकीर्णान्यस्मिन्धनानीति
वर्तते तेन प्रत्युत्पन्नप्रधानमिति संग्रामनाम। मनुष्यहितसंग्रामाः ऊतयः स्वः लोकस्य रक्षितारो मरुतः नृषाचः प्राणरूपेण नृन्सेवमाना भूता
इंद्रमपि तेनैव रूपेणान्वमदन् आनुपूर्व्येण हर्षं प्रापयन् तदानीमिंद्रः वृत्रवधं प्रति दृढको बभूवेति शेषः स्वश्चं इंद्रस्वोऽयं चंद्रं यस्य हस्ताग्रे
ग्रोनरपदमंत्र इति सुः श्वेतनकारः बहुव्रीहौ पूर्वपदस्वरत्वात् स्वरतेर्भियसा भीशब्दस्य तृतीयैकवचने छंदसि असुगागमः। तस्योदात्तत्वं च। र
पाचः पचसमवाये अयं सचनार्थ इति यास्कः। बहुश्चेत्यत्र बहाद्रस्य नुगतसमुच्चयार्थत्वात्। अस्मादपि क्विप्रत्ययः अमदन् मदी हर्षेणमदीह
र्षग्लेपनयोरिति घटादिषु पाठात् मित्वे सति मितां ह्रस्व इति ह्रस्वत्वं लङि छंदस्युभयथेति शप आर्धधातुकत्वात् णेरनिटीति णिलोपः॥ ९॥
दशमीमृचमाह॥ ॥द्यौश्चिदस्यामवाँ अहेः स्वनादयोयवीद्भियसा वज्र इंद्र ते॥ वृत्रस्य यद्बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः॥ अमवानम
लवान् द्यौः चित् द्युलोकोऽपि अस्य इदं वृत्रस्य स्वनात्तच्छब्दात् भियसा भयेन अयोयवीत् अत्यर्थं पृथक् भूत्वा आसीत् अकंपतेत्यर्थः। हे इंद्र ते तव सतस्या
भिषवादिभिः संस्कृतस्य सोमस्य पानेन मदे हर्षे जाते सति त्वदीयो वज्रः रोदसी द्यावापृथिव्यौ बद्बधानस्य बाधनशीलस्य वृत्रस्य शिरः यद्यदा व
शावलेनाभिनत् तदा लोकः भयं रहितेन निःश्वस्तोऽभवदिति शेषः॥ अयोयवीत् मिश्रणामिश्रणयोरिति अस्माद्यङ्लुङ्लुक् तात्लुङि यङोऽचिरत्यस्य प्रत्य
यस्येडागमः अडागम उदात्तः बद्बधानस्य बाधृ विलोडने। आदादिकः चानशि बहुलं छंदसीति श्लुः हलादिशेषाभावो धातोर्दीर्घस्वरश्च छांदसता ११७
न चिन इत्यंतोदात्तत्वं॥ ॥इति प्रथमस्य चतुर्थे त्रयोदशो वर्गः॥ ॥एकादशीमृचमाह॥ ॥यदिन्न्विंद्र पृथिवी दशभुजिरहानि विश्वा ततनंत कृष्ट
यः॥ अत्राह ते मघवन्विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत्॥ यदिन्नु यदा खलु पृथिवी दशभुजिः दशगुणिता भवेत्॥ यदि वा कृष्टयः प्रजाः

विश्वा सर्वाण्यहानि ततनंत विस्तारयेयुः हे मघवन् इंद्र अत्राह अत्रैव पर्वाणि च वर्तते। तदाकालवर्तकृष्टयस्तीयं सहो बलं व आधिकारणं बलं विश्रुतं विख्यातं
मिभंडाव सावदीयेन बलेन बर्हणा हत्वा यथा द्यामनु भुवत् अनुभवति यथा द्यौर्महती तथा तव तत्र बलं हिंसनमपि महदिति भावः। त
तनंत तनु विस्तारे स्वरितेत्कारो भवेत्पदान्त्र्येषु अर्थलिङ्क्रत्ययप्राप्तस्य प्रत्ययस्य छंदस्युभयथेति भावः। यद्वा बहुलं छंदसीति प्रत्ययस्य श्लोऽस्ति पुनरपि अस्य येनग
भावः। पित्त्वादनुदात्तत्वे तिङः स्वरः सार्वधातुकस्वरः। क्रियते छंदस्यमाङ्योगेऽपीत्यडभावः। यद्वृत्तयोगादनिघातः। विश्रुतं श्रु श्रवणे कर्मणि निष्ठागतिरनंत
र इति गतेः प्रकृतिस्वरत्वं बर्हणा बर्हवृद्धिपरिभाषणहिंसाच्छादनेषु अस्मात् ल्युडादिः। कृत्प्रत्ययः। युवोरनाकाविति विकारस्य पतंप्रत्ययस्वरः नि
वर्हयतीति विधकर्मसपतितं च भुवत्। भूसत्तायां लेट्यडागमः इतश्च लोप इति इकारलोपः। बहुलं छंदसीति शपो लुक् भूसुवोस्तिङीति गुणप्रति
षेधः उवङादेशः॥ ॥द्वादशीमृचमाह॥ ॥त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः॥ चकृषे भूमिं प्रतिमानमोजसोऽपः स्वः परिभूरे
ष्या दिवं॥ हे धृषन्मनः शत्रूणां धर्षकमनोयुक्तेंद्र अस्य अस्माभिः परिदृश्यमानस्य व्योमनः व्याप्तस्यांतरिक्षस्य रजसो लोकस्य पारे उपरि प्रदेशे
वर्तमानः स्वभूत्योजाः स्वभूतबलस्त्वं अवसे अस्मद्रक्षणार्थं भूमिं भूलोकं चकृषे कृतवानसि किं च। ओजसो बलवतो बलस्य प्रतिमानं प्रतिनिधिरभूः
तथा स्वः सुष्ठु अरणीयं गंतव्यं आपः इत्यंतरिक्षनाम अपांतरिक्षलोकं अपि च द्युलोकं च परिभूः परिगंता परि पूर्वो भवति परिग्रहणार्थः एष
प्राप्नोषि। अस्य उदिदमिति विभक्तेरुदात्तत्वं॥ व्योमनः अवतिर्गत्यर्थः अवरक्षणगतिकांतीत्यभिधानात् विरावणच्छेऽगतीति व्याप्नोतीति व्योप्राय
द्रुमिन्प्रत्ययः नाकेवो येण प्राणिनो वर्तीर क्षतीव्योम अन्येभ्योऽपि दृश्यंत इति मनिन्। ज्वरत्वरेत्यादिना पधायां वकारस्य ऊ गुणः दासीभारादित्वात् पूर्व
पदप्रकृतिस्वरत्वं यणादेश उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। स्वः सृ गतौ अस्य अन्येभ्योऽपि दृश्यंत इति विच् अव्ययानामपदति स
पा ऊत्त्यथवा ऋतः स्वरितत्वादितः स्वरितत्वं पतत भूनाम्न्यव्यक्ताः समरतेस्तीय छंदस्यभिविद्धानत्वान्न ऊतात् पुरा तं भुवः प्रतिमानमित्यपांनां सतीयात् तथैव स
त्यवतां स्यमुनं बृहस्पतिसवनं भुवः प्रतिमानं पृथिव्या इति॥ ॥त्रयोदशीमृचमाह॥ त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः॥ वि
श्वमाप्रा अंतरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान्॥ हे इंद्र त्वं पृथिव्याः प्रथितायाः विस्तीर्णाया भुवः प्रतिमानं प्रतिनिधिर्भवसि यथा भूर्लोको महा
नचिं तथा त्वमपीत्यर्थः। तथा ऋष्ववीरस्य वीराः यंतिविक्रांता भवंतीति वीरा देवाः ऋष्वा दर्शनीया वीरा यस्य स्वस्य तथोक्तः तस्य बृहतो वृद्धस्य
द्युलोकस्य पतिर्भूः पालयितासि। तथा अंतरिक्षं द्यावापृथिव्योर्मध्ये वर्तमानमाकाशं विश्वं सर्वमपि महित्वा महिम्ना सत्यमाप्राः निश्चित
मापूरितवानसि। अद्धा सत्यमेव त्वावान्त्वत्सदृशोऽन्यः कश्चिन्नकिर्नास्तीति यदेतत् अद्धा सत्यमेव भुवः भवतेर्लङि विभाष्यडागमः। उवङादेशः। पृथिव्याः
उदात्तयणो हल्पूर्वादिति विभक्तिरुदात्ता। बृहतः बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं। भूः छंदसि वर्तमाने लङि बहुलं छंदस्यमाङ्योगेऽपीत्यड
भावः अप्राः प्रा पूरणे आदादिकः लङ् यडागमः महित्वा महिम्ना सुपां सुलुगिति तृतीयायाः आदेशः आसर्वनाम्न इत्यात्वं प्रत्ययस्य पित्त्वादनुदात्तत्वे प्रातिपदि
कस्वरेणोदात्तत्वं। ॥ चतुर्दशीमृचमाह॥ ॥न यस्य द्यावापृथिवी अनु व्यचो न सिंधवो रजसो अंतमानशुः॥ नोत स्ववृष्टिं मदे अस्य युध्यत एको अ
न्यच्चकृषे विश्वमानुषक्॥ यस्येंद्रस्य व्याप्तं द्यावापृथिवी नान्यामशक्नुतां प्राप्तुमसमर्थे अभवतां तथा रजसोंतरिक्षलोकस्योपरि सिंधवः
स्यंदनशीला आपः यस्येंद्रस्य तेजसोंतमवसानं नानशुः न प्रापुः उत अपि च सोमपानेन मदे हर्षे स्ववृष्टिं स्वकीयवर्षणं निरोधयतः युध्य

भा०प्र०
११८
मानमात्यं द्रव्यं बलं व्याप्तं रक्षाद यानप्रायुः अतः हे इंद्र त्वं भन्यत्व व्यतिरिक्तं विश्वं सर्वं भूतजातं आनुषक् आनुपूर्व्येण चकृषे सकलमपि भूतजातं त्वद
धीनमभूदिति भावः द्यावापृथिवी द्यौश्च पृथिवी च द्यावापृथिवी द्यावादीनां आयुदात्तत्वं निपातितः पृथिवीशब्दः षिद्गौरादिभ्यश्चेति ङीषन्तो अन्तोदात्तः देव
ताद्वंद्वे च पूर्वपदप्रकृतिस्वरत्वं न पृथिवीरुद्रपूषमंथिष्विति पर्युदासात् नापरपदस्य उदात्तत्वात् इतिनिषेधाभावः अर्चतः अर्चतेर्लुगाधिकस्य मनमर्चतिकर्मणा
न तिङ्ताभावे सर्वत्र मारणाभावः आतृप्तः अश्नातेः व्यवयनपरलोपे अन्तआदित्यश्च व्यान्यस्यात् अश्नातेश्चेति तुडागमः ॥ ॥ पंचदशीमृचमाह ॥
आर्चन्नत्र मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा । वृत्रस्य यद्भृष्टिमता वधेन नि त्वमिंद्र प्रत्यानं जघंथ ॥ हे इंद्र त्वा मरुतः अत्र अस्मिन्संग्रामे आ
र्चन्नपूजयन् भगवान् इहि वीर यजस्व नन्द वचनैः प्रयन मास्मिन्नाजौ संग्रामे अस्मिन्नाजौ संग्रामे विश्वे देवासः सर्वे देवा नानागुणयुक्ता मरुतः त्वा
ममदन् अनुक्रमेण हर्षं प्रापयन् यद्यतोवृत्रस्य ननंतरं तपिमरं प्राप्ताः हे इंद्र त्वं यद्य भृष्टिमता भृज्जतिदीप्तिकर्मणः भृष्टिश्चिः तद्वता वधेन हनना
साधनेन वज्रेण अस्मिन्नं वज्रस्य भ्राम्यमाणस्य ममाम्नातं प्राणं प्रत्यप मासाश्रिः कर्तव्या श्रिभिर्वज्र इति तेन वज्रेण वृत्रस्यानं प्रति आननं
मुखं प्रतियद्धास्य हेतु प्राणं प्रतिनि जघंथ नितरां प्राहर्थाः आर्चन् अर्चेः मृतायां लोपादिकः अडागमउदात्तः सस्मिन्न तदाः ससादिति धीयता
तमेतं वत्य यनमम स्यामपि द्रष्टव्यं यडा सर्वस्मिन्नित्य वर्णलोपो द्रष्टव्यः देवासः आज्जसेरसुक् आनं आननं वर्णलोपश्छांदसः यद्वा अनः प्राण
न अन्यतेन नेत्यानं प्राणं करणं घञन्तं वा तदुपसंख्यातं जघंथ हनतेः सागम्याः थलि उपदेशे त्वतो इति प्रतिषेधः अभ्यासाद्भ्यासादुत्तर
स्य हकारस्य घत्वं लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं ॥ ॥ इति प्रथमस्य चतुर्थे चतुर्दशो वर्गः ॥ ॥ प्रथमामृचमाह ॥ ॥ न्यू३षु वाचं प्र महे भरामहे
गिर इंद्राय सदने विवस्वतः । नू चिद्धि रत्नं ससतामिवाविदन्न दुष्टुतिर्द्रविणोदेषु शस्यते ॥ महे महते इंद्राय सु वाचं शोभनां स्तुतिं नि भरामहे नि
तरां प्रयुंज्महे इडतिपदपूरणः यात्रिवस्वतः परिचरतो यजमानस्य सदने गृहे इंद्राय गिरः स्तुतयः क्रियंते हि यस्मात् इंद्रः नू चित् क्षिप्रमेव
रमणीयं ससतां स्वपतां अविदत् अविंदत् अतिते वर्तमानः ससतामिव यथा स्वपतां पुरुषाणां धनं चोराः क्षिप्रं लभंते तद्वत् अतोऽस्माकं धनं दातुं शक्त
इति भावः द्रविणोदेषु धनस्य दातृषु पुरुषेषु दुष्टुतिः समीचीना स्तुतिर्न शस्यते नाभिधीयते अतः सुवाचं प्रभरामहे इति पूर्वेण संबंधः नू षु
नस्य उदात्तस्वरितयोर्यण इति स्वरितत्वं यद्यपि सुः परत्वात् संहितायां कंपन उ ॐ मरीतिदीर्घत्वं सु त इति षत्वं महे महद्यां गायामित्यस्मात्
पृषतिवित्किपसाक्वाच इति विभक्तेरुदात्तत्वं यद्वा महतः शब्दस्यापि छांदसः पश्छांदसः ननु घत्याद्दिनादीर्घः ससतामिवृ ससस्वप्ने अस्माच्छत्रंता हंता दात
परस्याविभक्तावृतुरनुमइत्यनुदात्तत्वं इवेनविभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति समासः अविदत् विदॢ लाभे छंदसि लुङ्लङ्लिट इति वर्त
मानेप्रत्यये लृदित्वाद् द्वाद्यौ सुपि नः शः अडागमउदात्तः हि चेति निघातप्रतिषेधः द्रविणोदः पुषु द्रविणानि धनानि ददतीति द्रविणोदाः द्राता विस्यस्मा डुदा
ञ्भ्याम ननितीन नप्रत्ययांतो द्रविणशब्दः तस्मिन्कर्मण्युपपदे आतोनुपसर्गे क इति कः पूर्वपदस्यनुमागमश्छांदसः कृदुत्तरपदप्रकृतिस्वरत्वं ११८
शस्यते शंसु स्तुतौ कर्मणि यक् अनिदितामिति नलोपः ॥ ॥ द्वितीयामृचमाह ॥ ॥ दुरो अश्वस्य दुर इंद्र गोरसि दुरो यवस्य वसुन इनस्पतिः ॥ शिक्षानरः प्र
दिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥ हे इंद्र त्वं अश्वस्य दुरः दाता असि तथा गोः दुरः दाता असि तथा यवस्य दुरः दाता असि वसुनः वा

सीपतिः सर्वेषां पालयिता शिक्षानरः शिक्षतिर्दानकर्मा शिक्षायादानस्य नेता असि तथा यज्ञस्य यथादर्थान्युपानस्य दुरोदः द्युतिमिप्रदिवः पुराणः प्रगतानि दि
वि वसा यस्मिन् सत्यान्रः अकामकर्शनः कामान्वृकर्शयति नाशयतीति कामकर्शनः न कामकर्शनः अव्ययपूर्वपदप्रकृतिस्वरत्वं हविष्मतां यज 231
मानानां कामानभिमतफलप्रदानेन पूरयतीत्यर्थः सखिभ्यः समानख्यानेभ्यः ऋत्विग्भ्यः सखा समित्वस्यं तं प्रियः एवंभूताय इंद्रस्य प्रति इदं स्तोत्र 1924
लक्षणं वचः गृणीमसि ब्रूमहे दुरः दुदाञ् दाने मंत्रे वाक्यमिथे विचि चं व्यंकिभ्य उणादितिविधीयमानदुरत्न प्रत्ययो बहुलवचनादस्मादपि भवति अत
एवाकारलोपः शिक्षानरः शिक्षविद्योपादाने गुरोश्च हलः उकारप्रत्ययः नेतद्यापषष्ठीसमासः समासस्यांतोदात्तत्वं गृणीमसि गॄ शब्दे क्र्यादिः
वादीनां ह्रस्वः इति ह्रस्वत्वं इदंतो मसिरिति मसि इकारः ॥ ॥ तृतीयामृचमाह ॥ शचीव इंद्र पुरुकृद्द्युमत्तम तवेदिदमभितश्चेकिते वसु ॥ अतः संगृभ्या
भिभूत आ भर मा त्वायतो जरितुः काममूनयीः ॥ शचीवः शचीति प्रज्ञानाम हे इंद्र शचीवः प्रज्ञावन् पुरुकृत् प्रभूतस्य कर्म धारेः कर्तः द्युमत्तमः
अतिशयेन दीप्तिमन् अभितः सर्वत्र वर्तमानं वसु धनं यत् अस्ति तदिदं सर्वं तवैव स्वभूतमिति चेकिते सर्वं ज्ञायतेऽस्माभिर्ज्ञायते ॥ अतः कारणात धनं
संगृभ्य सम्यक् गृहीत्वा अभिभूते शत्रूणामभिभवने आ भर अस्मभ्यं हर हरेत्यर्थः । त्वायतः त्वामात्मन इच्छतो जरितुः स्तोतुः कामम् अभिलाषं
मा ऊनयीः परिहीनं मा कार्षीः पूरयेत्यर्थः शचीवः रयिमिति रत्वं पादिकं आमंत्रितायुदात्तत्वं उत्तरत्र पदस्मिन् सर्वानुदात्तत्वं चामंत्रितं पूर्वमविद्यमा
नवत्वं नामंत्रिते समानाधिकरण इति निषेधात् चेकिते कितज्ञाने अस्माद्यङंतात् कर्मणि लिट् आमंत्रितं इति निषेधात् आमप्रत्ययाभावे सति लिट् आर्ध
धातुकत्वात् यलोपयलोपौ संगृभ्य आ भर सकभय ग्रहज्यहार्भ्यश्छंदसीति भत्वं । त्वायतः त्वामात्मन इच्छति क्यच् आत्मनः क्यच् प्रत्ययोत्तरपदस्यो
श्चेति मपर्यंतस्य त्वादेशः छांदसमात्वं क्यजंतात् लटः शतृ तस्य अदुपदेशात् सार्वधातुकस्वरेणानुदात्तस्य एकादेशस्वरेणोदात्तत्वं । एकादेशस्वरों
तरंगः सिद्धो भवतीति वक्तव्यमिति वचनात् तस्यासिद्धत्वे सति शतुरनुम इति अजादिविभक्तेरुदात्तत्वं काममूनयीः ऊन परिहाणे चुरादिः तस्मात् व पंचकपातिन उ
त्वं तोदात्तत्वं प्राप्तं रुपादिषु पाठात आद्युदात्तत्वं ऊनयीः ऊन परिहाणे चुरादिः लुङि णिश्रि दुस्रुभ्य इति चङ् श्वसादेशो स्यनेनान यतिधनपती
त्यादिना प्रतिषेधः ह्ययंतक्षण नित्विचिरधि प्रतिषेधः ॥ ॥ चतुर्थीमृचमाह ॥ ॥ एभिर्द्युभिः सुमना एभिरिंदुभिर्निरुंधानो अमतिं गोभिरश्वि
ना ॥ इंद्रेण दस्युं दरयंत इंदुभिर्युतद्वेषसः समिषा रभेमहि ॥ हे इंद्र एभिर्दीप्तैर्द्युभिर्द्युस्थैरश्वैः पुरोडाशादिभिः एभिरिंदुभिः पुरो वर्तिभिस्त्वं सोमैः
सोमैः प्रीतस्त्वं अस्माकं मपतिं दारिद्र्यं गोभिस्तथा देनेः पशुरश्विनाश्वयुक्तेन धनेन च निरुंधानो निवर्तयन सुमनाः शोभनमना भव एभिर्दुभि
रस्माभिर्दत्तैः सोमैः प्रीतेन इंद्रेण दस्युं उपक्षयितारं शत्रुं दरयंतो हिंसंतः अतएव युतद्वेषसः पृथग्भूतशत्रुका भूत्वा वयं इंद्रेन नान्नेन संरभेम
हि संश्लेषमाभवेम संगच्छेमहीत्यर्थः सुमनाः शोभनं मनो यस्य सोमनसौ भलोमसौ इत्यत्र रप्रशब्द उदात्तत्वं निरुंधानः रुधिरावरणे स्वरितत्वाद
त्मनेपदं श्नसोरल्लोप इत्यकारलोपः चितइत्यंतोदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वं ॥ अमतिं मंतव्यमिति मेश्वर्यं न मतिः अमतिः अव्ययपूर्वप
दप्रकृतिस्वरत्वं नञो जरमरमित्रमृता इति बहुव्रीहिसमासप्रतिषेधः अश्विना अश्वाः अस्य संतीत्यश्विधनं मत्वर्थीय इनिः ॥ ॥ पंचमीमृचमाह ॥ समिंद्र राया
समिषा रभेमहि सं वाजेभिः पुरुश्चंद्रैरभिद्युभिः ॥ सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥ हे इंद्र राया धनेन वयं संरभेमहि सं
गच्छेमहि तथा इषा अन्नेन संरभेमहि तथा वाजेभिर्बलैः संरभेमहि कीदृशैः पुरुश्चंद्रैः पुरूणां बहूनामाह्लादकैः अभिद्युभिः अभि

नोदीप्यमानाः किं च दध्याथान मानया प्रमया वदीयया प्रज्ञया बुध्यामंरभ मदिकारश्चाविरशुष्मबार्धारविशेषेणास्त्रूणांक्षपणसमर्थं ऊर्ध्वं वलंयस्याः सा
भा॰प॰ नथोक्तागोअश्वयावतीसंभ्यादानार्थमनमम्मस्वतएवमाचायस्याः मातथोक्ताअश्वावत्या अश्वरूपतया। गायाइदिमित्यादिनाविभक्तेरुदात्तत्वं। प्रमत्या
३३० नादौ चनितीतिगतः प्रकृतिस्वरत्वं इतरयोः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वंसर्वत्रविभाषागोरितिगोअश्वयवन्यचप्रकृतिभावः अश्वावत्यामंत्रेसोमाश्वे
न्द्रियविश्वेतिमतुपोदीर्घत्वं॥ ॥इतिप्रथमस्यचतुर्थेपंचदशवर्गः॥ ॥षष्ठीमृचमाह॥ तेत्वामदाअमदन्तानिवृष्ण्यातेसोमासोवृत्रहत्येषुसत्पते॥
यत्कारवेदशवृत्राण्यप्रतिबर्हिष्मतेनिसहस्राणिबर्हयः॥ हे सत्पते सतांपालयितरिन्द्र वृत्रहत्येषु युद्धेषु ते सोमाः तव प्रीत्यर्थं ते मदाः मद
कारिणः अमदन् ततः ते त्वा अमदन् तर्पयामासुः प्रसिद्धाः सोमास्तर्पयामास। यत्तदा कारवे स्तोत्रे यजमानाय दश
सहस्राणि अप्रतिगतानि वृत्राण्यावारकाणि उपद्रवकारीणि शत्रुभिरप्रतिगतस्त्वं निबर्हयः न्यवधीः तदानीमितिपूर्वेण संबंधः
ष्म्यादिति बर्हिष्मते हलमिति निन्नलोपः बर्हयः बर्हयतहिंसाकर्मा निपातस्य लुङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः ......
एव स्वरः ......॥ ॥सप्तमीमृचमाह॥ युधायुधमुपघेदेषिधृष्णुयापुरापुरंसमिदंहंस्योजसा॥नम्यायदिं
द्रसख्यापरावतिनिबर्हयोनमुचिंनाममायिनं॥ हे इन्द्र धृष्णुया धर्षकः त्वं युधा युद्धेन संबंधं युद्धं युद्धं उपघेदेषि उपगच्छसि
... पुरा पुरं ओजसा बलेन समिदं
हंसि ... हे इन्द्र ... नम्यया सख्या ... परावति दूरदेशे
नमुचिं नाम अनया संज्ञया प्रसिद्धं मायिनं मायाविनं असुरं निबर्हयः नितरामहिंसीः ... युधायु
धसंप्रहारे ... अस्माद्विवाक्ये ......
... पुरा पूपालनपूरणयोः पूर
यति ... अस्मादिवाक्यपा लुकि
... नम्या ... संख्या ...
... नमुचिं ... औणादिकः किप्रत्ययः ...
प्रकृतिभावः ... पूर्वपदप्रकृतिस्वरत्वं ... मायिनं मायाशब्दस्य व्रीह्यादिभ्यो
ऽतमत्वर्थीयइनिः॥ ॥अष्टमीमृचमाह॥ ॥त्वंकरंजमुतपर्णयंवधीस्तेजिष्ठयातिथिग्वस्यवर्तनी॥त्वंशतावंगृदस्याभिनत्पुरोनानुदः
परिषूता ऋजिश्वना॥ हे इन्द्र त्वं करंजं एतन्नामकमसुरं उत अपि च पर्णयं एतन्नामानमसुरं च अतिथिग्वस्य एतन्नामकस्य राज्ञः प्रयोज
नाय तेजिष्ठया ... वर्तन्या ... तथा अनानुदः अनुपश्चात् ३३०
... ऋजिश्वना ... परिवृताः ...
... पुराणि नगराणि अभिनोः विभिदितवानसि वधीः ... तस्यादेत
त्वादिभावः ...... इतस्मात्
... वर्तनी वर्तते ... 237
... 1924
... इतः ... आतश्चोपसर्गे इति कप्रत्ययः ......
......॥ ॥नवमीमृचमाह॥त्वमेतांजनराज्ञोद्विर्दशाबंधुनासुश्रवसोपजग्मुषः॥षष्टिंसहस्रानवतिं
नवश्रुतोनिचक्रेणरथ्यादुष्पदावृणक्॥ हे इन्द्र श्रुतः विश्रुतः प्रख्यातस्त्वं द्विर्दश विंशतिसंख्याकान् अबंधुना बंधुरहितेन सहायरहि
तेन सुश्रवसा एतन्नाम्ना राज्ञा युद्धार्थमुपजग्मुषः उपगतवतः एतान् जनराज्ञः जनपदानामधिपतीन् ......
... नवतिं नव ... संख्याकान् अनुचरांश्च रथ्य
...
... ॥ ॥दशमीमृचमाह॥त्वमाविथसुश्रवसंतवोतिभिस्तवत्रामभिरिन्द्रतूर्वयाणं॥त्वमस्मैकुत्समतिथिग्वमायुंमहेराज्ञेयूनेअरंधना
यः॥ ...
...
...
... ॥एकादशीमृचमाह॥ ॥यउदृचीन्द्रदेवगोपाःसखायस्तेशिवतमा
असाम॥त्वांस्तोषामत्वयासुवीराद्राघीयआयुःप्रतरंदधानाः॥ हे इन्द्र ... देवगोपाः देवैः पालिताः ...
...
...
...
...
...

भा॰ न॰ तो दात्ततं। दधानाः दधातेः शानचि अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ ॥ इति प्रथमस्य चतुर्थे षोडशो वर्गः॥ ॥ मा न इत्येकादशर्चं षष्ठं सूक्तं सव्यस्यार्षमैन्द्रमेकादश
यः त्रिष्टुभः शिष्टाः समस्तजगत्यः सव्य ऋषिः इन्द्रो देवता तथा चानुक्रान्तं। मा नो त्यास्त्रिष्टुप्षष्ठ्यष्टमीनवमी चेति अतिरात्रे प्रथमे पर्याये ऽच्छावाकशस्त्रे इदं सूक्तं।
१२० तथा च सूत्रितं मानो अस्मिन्मघवन्निन्द्र पिब तुभ्यं सोमम् ऋतुनित्याज्यानि॥ ॥ तत्र प्रथमामृचमाह॥ मा नो अस्मिन्मघवन्पृत्स्वंहसि नहि ते अन्तः शवसः परीण
शे॥ अक्रन्दयो नद्यो३ रोरुवद्वना कथा न क्षोणीर्भियसा समारत॥ हे मघवन् धनवन् इन्द्र अस्मिन् परिदृश्यमाने अंहसि पापे पृत्सु एतन्नामकपापफलभूते
षु संग्रामेषु नो ऽस्मान्मा प्रक्षिप मा स्थापयेति शेषः। यस्मात्ते तव शवसो बलस्यान्तो ऽवसानं परीणसे परितो व्याप्तुं न हि शक्यते। तेन यत्त्वदीयं बलं अतिक्रमि
तुं न शक्नोतीत्यर्थः। तस्मात्त्वं अनतिक्रम्यबलो मा नो गाः रवत अत्यर्थं शब्दं कुर्वन् यानदीः वनानि सर्वं धिन्वन्ति दक्ष्यानि च। कथं दधयः शब्दयसि क्षोणीः क्षोण्यः
क्षोणीति पृथिवीनामसु पठितं। कान्दयो रोकाः भियसा भयेन कथा कथं न समारत न संगच्छन्ते सर्वदा भवत एव विभ्यतीति भा
वः। एतन्मघ इति पुमांसं एतत्सु पसंख्यानमिति पृतनाशब्दस्य पृत्सु आदेशः। परीणशे नशतिर्व्याप्तिकर्मा तुमर्थे सेसेनसे इति कसेन् प्रत्ययः। निपातस्य पूर्वपदस्य दीर्घत्वं। नदयः प्रथमार्थे प्रथमायाः नयतेरौणादिकः अत्र दीर्घव्यत्ययेन न दीर्घः। अक्रन्दयः
निपातस्य चेति पूर्वपदस्य दीर्घत्वं। नद्यः प्रथमार्थे प्रथमायाः च रनड्याः नद्यः लुगभावः ह्रस्वः। अतः अरादित्वं च तिवचनादौ पादादित्वात् निघाताभावः इ
च क्रन्दः ना भ्यस्तानामादिरिति नुमभावः अभ्यस्तानामादिरित्याद्युदात्तत्वं। कथा पाद्दतो चच्छंदसीति विभक्ता प्रकारवचने थाप्रत्ययः तस्य विभ
क्तिः संज्ञा वा क्रिमः कु इति कादेशः आरत ऋगतौ समीर्गृवच्छव्यात्मनेपदं छान्दसं वर्तमाने लङि अडादिकाद्युदात्तः उदात्तः स्वादयः अडागमो ऽस्वरः॥ ॥
द्वितीयामृचमाह॥ ॥ अर्चा शक्राय शाकिने शचीवते शृण्वन्तमिन्द्रं महयन्नभि ष्टुहि॥ यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृञ्जते॥ हे अध्व
र्यो शाकिने शक्तियुक्ताय शचीवते प्रज्ञायते शक्राय इन्द्रायार्चय परिचर धर्मं इन्द्र इति शृण्वन्तमस्मदीयाः स्तुतीः शृण्वन्तं समीचीनं शब्दं तात इति श्रुतं तमिन्द्रं महयन् पूज
यन् अभिष्टुहि आभिमुख्येन स्तुहि यो ऽयमिन्द्रः धृष्णुना शत्रूणां धर्षकेण शवसा बलेन उभे रोदसी द्यावापृथिव्यौ न्यृञ्जते नितरां प्रसाधयति ऋञ्जतिः
प्रसाधनकर्मेति यास्कः। अयमिन्द्रः वृषा सेचनसमर्थः वृषत्वा वृषत्वेन अनेन सेचनसमर्थानि वृषत्वा यत्नेन अनेनैव सेचनसामर्थ्येन वृषभो वर्षिता कामानां
यष्टृणां पृष्टुकानां अर्च शापः पिबा द्यनुदात्तत्वे धातुस्वरः द्व्यचो ऽतस्तिङ इति दीर्घत्वं शाकिने शाकिः अकः शाक्यः भावे घञ् तदस्यास्तीति इनि प्रत्ययः
ण कर्तव्यमिति संप्रदानत्वात् चतुर्थी अनुचितिलोन रदादित्वात् पादादित्वे उपसर्गात् नीलीतिमत्वं। एतेन वृषत्वा सप्तमीस्वरेणाकारः। न्यृञ्जते ऋ
ञ्जतिर्भर्जने इदित्वान्नुम् अपि प्रासव्यत्ययेन शपः॥ ॥ तृतीयामृचमाह॥ ॥ अर्चा दिवे बृहते शूष्यं वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः॥ बृ
हच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः॥ हे स्तोतः दिवे दीप्यमानाय बृहते महते इन्द्राय शूष्यं सुखं सुखस्य अनामतः नमा धृष्यं ना
शयितव्यं वा वचः अर्च उच्चारय यस्य इन्द्रस्य धृषतः शत्रून् धर्षयतः स्वक्षत्रं स्वभूतं बलं धृषन्मनः धृषत् धर्षणशीलं मनः सहितमस्ति १२०
बृहच्छ्रवाः प्रभूतयशाः असुरः शत्रूणां निरसिता बर्हणाः असुः प्राणो बलं वानेन इति गमनमर्थः। अथवा असवः प्राणास्तेन च वा
लय्यन्ते। प्राणा वा आपः इति श्रुतेः तान् ददातीति असुरः। बर्हणा शत्रून् निबर्हयिता हरिभ्यां अश्वाभ्यां पुरस्कृतः पूजितः वृष
भः कामानां वर्षिता रथो रहणशीलः। एवंभूतः स इन्द्रः साधारणः इति यत् सर्वं विधेयत्वेन विधिकल्प्यते। इतिथानानाय उपास्य वृषभेतता भावे

तित्वमिति इदितश्च गितत्वं धृषितः अधृषा प्रागल्भ्ये व्यत्ययेन शपः शतुरनुम इति विभक्तेरुदात्तत्वे। बृहच्छ्रवाय स्य बहुव्रीहौ पूर्वप
दप्रकृतिस्वरत्वं। असुरः असु क्षेपणे असेरुरन्निति उरन् प्रत्ययः निपातात् आद्युदात्तत्वं बर्हणा विभक्तेराकारः पुरः पूर्वाधरत्यादिना असि
प्रत्ययान्तो दात्तः॥ ॥ चतुर्थीमृचमाह॥ त्वं दिवो बृहतः सानु कोपयो ऽव त्मना धृषता शम्बरं भिनत्॥ यन्मायिनो व्रन्दिनो मन्दिना धृषच्छितां
गभस्तिमशनिं पृतन्यसि॥ हे इन्द्र त्वं बृहतो महतो दिवो द्युलोकस्य सानु समुच्छ्रितं उपरि देशं कोपयः अकम्पयः धृषता शत्रूणां ध
र्षयित्रा त्मना आत्मना स्वयमेव शम्बरं एतन्नामकमसुरं अवाभिनत् अवधीः यत् यदा व्रन्दिनः शत्रून् हन्तुं मदु भावं प्राप्तान् यत्नात् इदं समुदः अ
सुरसमूहात मायिनो मायाविनो असुरान् मन्दिना हृष्टेन धृषत धृषिता प्रागल्भ्यं प्राप्नुवता मनसा युक्तः त्वं शितां तीक्ष्णीकृतां गभस्तिं हस्ते
न गृहीतां यद्वा गभस्तिरिति रश्मिनामसु पठितं अशनिं वज्रं पृतन्यसि तान् असुरान् हन्तुं पृतनारूपेण छिन्नान् प्रतिप्रेरयसीत्यर्थः। तदानीं
बृहतो दिवः सानु कोपय इति पूर्वेणान्वयः। कोपयः कुप कोपे ण्यन्तात् लुङि बहुलं छन्दस्यमाङ्योगे ऽपीत्यडभावः त्मना मंत्रेष्वाङ्यादेरात्मन इत्या
कारलोपः धृषता कृपां मधुगिति तृतीयायाः क्रुचिन्तांशो ऽन्नकरणनिघ्नयांगा छारन्यतरस्यामीतीकारादेशः पृतन्यसि पृतनाशब्दात्कवचा
मनः क्यच् कव्यध्वर पृतनस्यैत्वतलोपः प्रत्ययस्वरः॥ ॥ पञ्चमीमृचमाह॥ ॥ नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद्व्रन्दिनो रोरुवद्वना॥
प्राचीनेन मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परि॥ हे इन्द्र त्वं रोरुवत् अत्यर्थं शब्दं कुर्वन् श्वसनस्य श्वसतीति श्वसनो वायुः
तस्य व्रन्दिनः स्वाकिरणेन राष्ट्रफलादीनां मृदुभावं प्रापयतः शुष्णस्य चित् इमानां शोषयितुरसुरस्यापि मूर्धनि उपरि प्रदेशे वनानि उदकानि यत्
स्मान्निवृणक्षि आवर्जयसि प्रापयसीत्यर्थः। वायुनामुच्यकिरणैश्च राज्ञा आपः सूर्यस्योपरि पुनरवस्थाप्यन्ते तेन तदवस्थापनमिन्द्रः करोतीति प्राच
यते प्राचीनेन प्रकर्षेण गंत्रा अपराङ्मुखेनेत्यर्थः बर्हणावता निबर्हयतीति बर्ह कर्मा तस्मात् बर्हणा शत्रूणां हिंसा तद्वता एवंभूतेन
मनसा युक्तः त्वं यद्यस्मात् अद्या चित् अद्यापि कृणवः धर्मकाले सूर्यस्योपरि भ्यो मानसेन अवस्थापयसि वर्षाकाले वर्षयतीति यस्मादेतत्
कुरुषे तस्मात्कारणात् त्वा त्वां परि उपरि को वर्तते न को ऽपीत्यर्थः अतस्त्वमेव सर्वाधिको भावः। वृणक्षि वृजी वर्जने रौधादिकः श्नम्पित्वा
देनुदात्तत्वे विकरणस्वरः यद्वृत्तयोगादनिघातः प्राचीनेन प्रपूर्वादञ्चतेः क्विन्नित्यादिनाक्विन् अनिदितामिति नलोपः विभाषाञ्चेरदि
क्स्त्रियामिति स्वार्थे खः स्वस्येनादेशः अचः उदात्तलोपे चाविति दीर्घत्वं कृणवः कृञ् हिंसायां करणे यो श्वड्रिस्तान्नुमन्लेटि सिप्यडागमः
धिन्विकृण्व्योरच्चेत्युप्रत्ययः वकारस्याकारादेशश्च तस्यातो लोप सति स्थानिवद्भावात्लघूपधगुणाभावः गुणावादेशौ आगमानुदात्त
त्वे विकरणस्वरः अत्र निरुक्तं व्रन्दीव्रन्दतेर्मृदूभावकर्मणः निवृणक्षि यच्छ्वसनस्य मूर्धनि शब्दकारिणः शुष्णस्यादित्यस्य च शोषयितू रोरुयमाणो
वनानीति वनानीति वा पदं समेघस्य धनानीति व्याख्येयं॥ ॥ इति प्रथमस्य चतुर्थे सप्तदशो वर्गः॥ ॥ षष्ठीमृचमाह॥ त्वमाविथ नर्यं तुर्वशं य
दुं त्वं तुर्वीतिं वय्यं शतक्रतो॥ त्वं रथमेतशं कृत्व्ये धने त्वं पुरो नवतिं दम्भयो नव॥ हे इन्द्र त्वं नर्यं नृभ्यो हितं तुर्वशं आविथ रक्षितवानसि तथा हे शतक्रतो बहुविधकर्म
न्त्वं वय्यं वयस्य पुत्रं तुर्वीतिनामानं राजानं आविथेत्येव अपि च त्वं रथं रंहणस्वभावमेतशं मेतत्संज्ञं तं कृत्व्ये धने तन्निमित्ते संग्रामे रक्षितवानिति वाक्यसति आविथे
ति शेषः यद्वा पूर्वोक्तानां राज्ञां रथं एतत्सङ्गं अश्वनामसु पठितं अश्वं च ररक्षिथेति यो सं तथा त्वं शम्बरस्य नवतिं च नव च नवनवतिसंख्याकाः पुरः पुराणि दम्भ

239
1924

भा० प्र० यः स्वनीनशः । नशेर्णिचि लुङि चङि नलोपश्छान्दसः । इण्णलोपौ इति निष्ठा नाशितवानित्यर्थः । गुणः । ... वर्णविकारः । रुपो दर्शनात् ॥ ॥
सप्तमीमृचमाह ॥ ॥ स घा राजा सत्पतिः शूशुवज्जनो रातहव्यः प्रति यः शासमिन्वति । उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः ॥
१२१ स घ सः खलु राजा राजमानः सत्पतिः सतां पालयिता यजमानः शूशुवत् आत्मानं वर्धयति यद्वा इंद्रं प्रति गन्तव्यं धनं हविष्कः सन् शासं इंद्र
स्य शासनं स्तोत्रं प्रति इन्वति व्याप्नोति । उक्था वा उक्थानि शस्त्राणि वा यः अभिगृणाति अभिमुखः स्तौति
रणाय ... अस्मै स्तोत्रे दानुः ... उपर ... इति मेघनाम ... दिवः । उपर उपलो मेघो भवति ...
... आपः ... सत्पतिः सतां पतिः सत्पतिः ...
... शूशुवत् ... वर्तमाने ... संप्रसारणं ...
... संप्रसारणं ...
... अभिगृणाति ...
... ॥ ॥ अष्टमीमृचमाह ॥ असमं क्षत्रमसमा मनीषा प्र सोमपा
अपसा संतु नेमे । ये त इंद्र ददुषो वर्धयंति महि क्षत्रं स्थविरं वृष्ण्यं च ॥ हे इंद्र ते क्षत्रं बलं असमं समानरहितं ... तथा मनीषा बु
द्धिश्च असमाना ... सोमपाः सोमस्य पात
... अपसा कर्मणा प्र संतु प्रवृद्धा भवंतु ... इंद्र ... स्थविरं ... वृष्ण्यं
च वर्धयंति ... सत्यमपि म
... संप्रसारणाभ्यां ...
... प्रत्ययस्वरः ... इत्यादि
... ॥ ॥ नवमीमृचमाह ॥ ॥ तुभ्येदेते बहुला अद्रिदुग्धाश्चमूषदश्चमसा इंद्रपानाः ॥ व्यश्नुहि तर्पया काम
मेषामथा मनो वसुदेयाय कृष्व ॥ हे इंद्र तुभ्येत् तुभ्यमेव चमसाः ... बहुलाः प्रभूताः अद्रिदुग्धाः अद्रिभिर्ग्रावभिरभिषुताः चमूषदः चमसेषु अवस्थिताः इंद्रपानाः इंद्रस्य पानेन ... व्यश्नुहि
... तर्पय ... अथानंतरं ... अस्मभ्यमभिमतधनप्रदानाय ... १२१
... अद्रिदुग्धाः ... चमूषदः चमू ...
... इत्यादिना ...
... ॥ ॥ दशमीमृचमाह ॥ ॥ अपामतिष्ठद्धरुणह्वरं तमोऽन्तर्वृत्रस्य जठरेषु पर्वतः ॥ अभी

मिंद्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते ॥ अपां ... उदकानां धरणे ... धारणं ... वचनः धाराभिर्धर्षकं
... अपांतरं ... वृत्रस्य जठरेषु ... पर्वतः मेघो ... अंतर्मध्ये पर्वतः पर्ववान् मेघः ... 241/1924
... ईं इमाः पूर्वोक्ताः ... नदीः ...
ते । वव्रिणा आवरकेण ... हिताः निहिताः विश्वाः व्यापनीः अनुष्ठाः अनुक्रमेण ... इंद्रः प्रवणेषु निम्नेषु प्रदेशे
षु अभिजिघ्नते अभिगमयति ... प्रत्ययस्वरः अ
नुष्ठाः ... उपसर्गात् ...
... ॥ ॥ एकादशीमृचमाह ॥ ॥ स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषाळिंद्र तव्यं ॥ रक्षा च नो
मघोनः पाहि सूरीन्राये च नः स्वपत्या इषे धाः ॥ हे इंद्र सः त्वं अस्मे अस्मासु ... अधिधाः अधिनिधेहि ...
... अधिधा ... हे इंद्रनोस्मा
न् मघोनाधनवतः ... स्वपत्ये शोभनपुत्रयुक्ताय ... प
... प्रार्थनायां ...
... अस्माकं ... जनाषाट् ...
... अतः ...
...
...
... संप्रसारणं ...
... स्वपत्ये शोभनान्यपत्यानि यस्य सा
... ॥ ॥ इति प्रथमस्य चतुर्थे
अष्टादशो वर्गः ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥ दिवश्चिदस्य वरिमा वि पप्रथ इंद्रं न मह्ना पृथिवी चन प्रति ॥ भीमस्तुविष्मांश्चर्षणिभ्य आतपः
शिशीते वज्रं तेजसे न वंसगः ॥ अस्येंद्रस्य वरिमा उरुत्वं प्रभावो दिवश्चित् ... विपप्रथे ... पृथिवी चन पृथिव्यपि च मह्ना म
हिम्ना ... प्रतिनिधिर्भवति ... भीमः शत्रूणां भयंकरः तुविष्मान् ... बलवा
न् चर्षणिभ्यो मनुष्येभ्यः ... आतपः ... वज्रं ...
...
... प्रत्ययस्वरः ...
... प्रतिप्रतिः प्रतिनिधिः ... कर्मप्रवचनीय ...
... प्रतिनिधिः ... भीमः बिभीः ... भीमादयोऽपादाने ...

द्वितियासः। आतपः तपतीति तपः पचाद्यच् थाथादिनोत्तरपदान्तोदात्तत्वं। क्रीडाते नृकरणव्यत्ययेनात्मनेपदं बहुलं छंदसीति विकरणस्य श्लुः
भा॰ य॰ बहुलं छंदसीति अभ्यासस्येत्वं। ई हल्यघोरितीत्वं अनजादौ च विभाषेति सार्वधातुकस्य व्यत्ययेनाद्युदात्तत्वं। वंसगः वनन संभक्तौ इत्यस्मान्नमेण्योगादि
१२२ कः सप्रत्ययः वंसं वननीयं वंसगः गमश्चापि दृश्यत इति गमेर्डप्रत्ययः क्रियासमासादित्वात् पूर्वपदप्रकृतिस्वरत्वं॥ ॥द्वितीयामृचमाह॥ ॥सो अर्णवो न
नद्यः समुद्रिय इति स इंद्रः समुद्रियः समुद्रवंत्यस्मादाप इति समुद्रमंतरिक्षं तत्र भवः समुद्रियः एवंभूतः सन् वरीमभिः स्वकीयैः संवरणीयैः यद्वा
उरुत्वैर्विश्रिता व्याप्तान चोनदीः उदकधारिणीर्वेणाः ता आपः अर्णवान समुद्र इव प्रतिगृभ्णाति स्वीकरोत्येव वर्षतीति भावः स चेंद्रः सोमस्य पीत
ये पानाय वृषायते वृषा इवाचरति हर्षयुक्तो वर्तत इत्यर्थः तथा स इंद्रो युध्मः योद्धा सनात् चिरादेव यद्वा सनात् सनातनः ओजसा बलेन तेन वृत्रवधा
दिरूपेण कर्मणा पनस्यते पनः स्तोत्रमिच्छति। अर्णवः अर्णसो लोपश्चेति मत्वर्थीयो वप्रत्ययः सलोपश्चेति प्रत्ययस्वरः नद्यः नद अव्यक्ते शब्दे
इत्यस्मात् नंदिग्रहिपचादिभ्यश्च इत्यच् टिड्ढाणञिति ङीप् यस्येति लोपः उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं जसि च
णादेशः उदात्तस्वरितयोर्यण इति स्वरितत्वं द्वितीयार्थे प्रथमा अनयाच्युत्या न घ उत्याउ व्यंजनं तथा च श्रूयते। अहावनदता हते तस्मादा नद्यो
नाम स्थ ता वो नामानि सिंधवः इति समुद्रियः समुद्राभ्राद्घ इति भवार्थे घप्रत्ययः घस्येयादेशः तस्यापि इयवङ्वनाद्युदात्तत्वं। गृभ्णाति हृग्रहोर्भ इ
ति भत्वं विश्रिताः श्रिञ् सेवायां कर्मणि निष्ठा गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। वरीमभिः वृञ् वरणे इत्यस्मादौणादिक इमनिन् प्रत्ययः नित्त्वादाद्युदात्तत्वं।
यद्वा उरुशब्दादिमनिच् ... प्रियस्थिर इत्यादिना वरादेशः आद्युदात्तत्वं सम वात। वृषायते कर्तुः क्यङ् सलोपश्चेत्याचारार्थे क्यङ् ङित्वादात्मनेपदं अकृत्सार्वधातुकयोरिति दीर्घः
युध्मः युध संप्रहारे इत्यस्मात् इषियुधीन्धिदसिश्याधूसूभ्यो मगिति मक्प्रत्ययः पनस्यते। पन स्तुतौ पननं पनः तदिच्छति पनस्यति व्यत्ययेनात्मनेपदं॥ ॥तृती
यामृचमाह॥ ॥त्वं तमिंद्र पर्वतं न भोजसे। हे इंद्र त्वं भोजसे भोजनाय पर्वतं पर्ववंतं मेघं न काषीः न हिंसितवान् भुंक्ते इंद्रो हविर्भक्षणार्थं मेघं वज्रेणा
हंति तथा महः महतः नृम्णस्य धनस्य धर्मणां धारयितॄणां कुबेरादीनां इरज्यसि ईशिषे इरज्यतिरैश्वर्यकर्मा स इंद्रो देवता वीर्येणातिशायीत इति प्र
चिकिते प्रकर्षेण सर्वाभिर्ज्ञाता बभूव सर्वाग्र उग्रूर्णोति इंद्रः विश्वस्मै सर्वस्मा उग्राय धारिरूपाय कर्मणे देवैः पुरोहितः पुरस्ताद्वस्थापितः धर्मणां धर्तॄणां धार
णा अन्येभ्योऽपि दृश्यंत इति कृते मनिन् नित्त्वादाद्युदात्तत्वं। इरज्यसि इरज्यत्यैश्वर्यकर्मा कंड्वादित्वाद्यक् वीर्येण उरसीरविक्रांतो चुरादिः
अचो यदिति यति णिलोपः॥ बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। विधानसामर्थ्यात् यतोऽनाव इत्याद्युदात्तताभावे तित्स्वरितत्वं तस्मिन् हि स
ति आद्युदात्तत्वं सुप्यदं सीत्यनेनैव सिद्धत्वात् पुनर्वीर्यग्रहणमनर्थकं स्यादित्युक्तं। देवता देव एव देवता देवात्तलिति स्वार्थे तल्प्रत्ययः लिती
ति प्रत्ययात्पूर्वस्याद्युदात्तत्वं चिकिते कित ज्ञाने अस्माद्धातोश्छांदसः कर्मणि लिट् अतोलोपयलोपौ पुरोहितः पुरस्शब्दस्यासिप्रत्ययांतस्य
तद्धितश्चासर्वविभक्तिरित्यव्ययत्वेन पुरोऽव्ययमिति गतिसंज्ञायां गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं॥ ॥चतुर्थीमृचमाह॥ ॥स इद्वने नम
स्युभिर्वचस्यते चारु जनेषु प्रब्रुवाण इंद्रियं॥ वृषा छंदुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति॥ ॥स इत् स एवेंद्रः अरण्ये नमस्युभिः १२२
नमस्कारोत्रणपूजयितृभिः ऋषिभिर्वचस्यते वचस्य इत्यर्थः यद्वा वचः स्तोत्रमात्मन इच्छति स चेंद्रः आत्मीयं युक्तं पुरुषं
द्रियं स्ववीर्यं पुरुषाणां यागे रक्षितुं स्यादयतीति भावः वृषा अभिमतवर्षयिता हविः प्रदातेत्यर्थः। मघवा धनवान् एवंभूतयजमानः क्षेमेण

इंद्रकृतेन रक्षणेन युक्तः सन् यत् यदा धेनां स्तुतिलक्षणां वाचं इन्वति प्रेरयति तदानीं छंदुर्भवतीति पूर्वेणान्वयः यद्वा मघवान् इंद्रः क्षेमकरेण मनसा
धेनां यजमानैः कृतां स्तुतिं यदा व्याप्नोति इन्वति व्याप्नोतिकर्मा तदिति योज्यं नमस्युभिः नमो वरिवश्चित्रङः क्यजिति पूजार्थे क्यच् छंदसीत्युः प्रत्ययः वचस्यतेर्व वचस्यति 243
वचनस्यातितं वचस्यं तं कुर्वंति मुनयः वचस्य यंति वचस्ययंते कर्मणि यकि अतोलोपयलोपौ यद्वा वचस्यतेर्व्यत्ययेनात्मनेपदं। प्रब्रुवाणः ब्रूञ् 1924
व्यक्तायां वाचि लटः शानच् अदादित्वाच्छपो लुक् शानचश्चित्त्वाद्गुणाभावे उवङ् चित्स्वरेणांतोदात्तः इंद्रियं इंद्रस्य लिंगमिंद्रियं लिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्रजु
ष्टमिंद्रदत्तमिति वेति लिंगार्थेषु इंद्रशब्दाद्घच् प्रत्ययो निपात्यते। आर्तो तासात तं उन्वतिरविष्याः सोऽप्यपः पित्त्वादनुदात्तत्वे धातुस्वरः यद्वृत्तयो
गादनिघातः॥ ॥पंचमीमृचमाह॥ ॥स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः॥ अधा चन श्रद्दधति त्विषीमत इंद्राय वज्रं नि
घनिघ्नते वधं॥ स इत् स एवेंद्रो युध्मः योद्धा महानि समिथानि महतः संग्रामान् मज्मना सर्वस्य शोधकेन ओजसा बलेन कृणोति करोति किमर्थं जनेभ्यः
स्तोतृजनार्थं यद्वा इत्थं जननसाधनं वज्रमायुधं मेघे निघनिघ्नते हंति अधाचन अनंतरमेव त्विषीमते दीप्तिमते इंद्राय सर्वे जनाः श्रद्दधाति श्रद्धि
त्यनाम इंद्रो बलवानिति यद् दृश्यते तत्सत्यमेवेति मन्वंते प्रतिपद्यंते महानि महांति शेश्छंदसि बहुलमिति लोपः छांदसः यद्वा महत्पूज्यं तदिति महानि प्रकृत्यादि
पत्त्यर्थकविधानमिति कः प्रत्ययः स्वरः समिथानि इण गतौ संपूर्वस्ति संगच्छंते तस्मिन् योद्धार इति समिथानि संग्रामाः समर्तिरण इति थक्प्रत्ययः कित्वाद्गुणा
भावः थाथादिनोत्तरपदांतोदात्तत्वं मज्मना टुमस्जो शुद्धौ मनिन्प्रत्ययः स्कोः संयोगाद्योरिति सकारस्य लोपः जकारः ततश्च जकारः प्रत्ययस्वरः अध
छांदसं धत्वं निपातस्य चेति संहितायां दीर्घः त्विषीमते त्विषीयत सर्वधातुभ्य इन्निति इन्प्रत्ययः नित्वादाद्युदात्तत्वं मतुपः पित्वादनुदात्तत्वे न देवशि
ष्यते। अन्येषामपि दृश्यत इति संहितायां दीर्घः निघनिघ्नते हंतेर्व्यत्ययेनात्मनेपदं बहुलं छंदसीति शपः श्लुः गमहनेत्यादिनोपधालोपः अ
भ्यासस्य घत्वं निगाममथ अमनोगंतीति चेतीति च शब्दः प्रकारार्थः इत्कृत्वाद्धत्वं वाततद्रष्टव्यं॥ ॥इति प्रथमस्य चतुर्थे एकोनविंशो वर्गः॥
॥ ॥षष्ठीमृचमाह॥ स हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधान ओजसा विनाशयन्॥ ज्योतींषि कृण्वन्नवृकाणि यज्यवेऽव सुक्रतुः सर्तवा अ
पः सृजत्॥ श्रवस्युः अन्नं यशो वा आत्मन इच्छन् कृत्रिमा कृत्रिमाणि क्रियया निर्वृत्तानि सदनानि असुरपुराणि ओजसा बलेन विनाशयन्। क्ष्मया भू
म्या समानं वृधानो वर्धनशीलः यद्वा क्ष्मया पृथिव्या विशेषणं अनेन भूतानामभिभविता बलेनेत्यर्थः ज्योतींषि सूर्यादीनि नक्षत्राणि अवृकाणि वृके
णावरकेण तेन रहितानि कृण्वन् कुर्वन् सुक्रतुः शोभनकर्मसंहितः एवंविधः स इंद्रो यज्यवे यष्टुं यजमानाय तदर्थं सर्तवे सरणाय अपः उदकानि
क्षणान्युदकानि अवासृजत् न गृहीतवानित्यर्थः कृत्रिमा कृञ् करणे इत्यतः क्त्रिरिति भावे क्त्रिप्रत्ययः क्त्रेर्मम्नित्यमिति निर्वृत्तार्थे मप् तस्य पित्वादनु
दात्तत्वे क्त्रिप्रत्ययस्वरः शिष्यते। शेः छंदसि बहुलमिति शेर्लोपः क्ष्मया क्षमूष् सहने। क्षमंते प्राणिजातकृतमुपद्रवमिति क्षमा षिद्भिदादिभ्यो
ऽङ् इत्यङ्प्रत्ययः ततष्टाप् व्यत्ययेन धातोरुपधालोपः छांदसं विभक्त्युदात्तत्वं। वृधानः अयं धातुरभिभवार्थः वृधु अभिभवने इति सूत्रात् अभिभवा
र्थत्वात् अस्मादौणादिकमानिच् व्यत्ययेन स्त्रीलिंगता मन इति ङीपो निषेधः रात्रेश्चाजसाविति ङीप् परिलोपः वृधानः ताच्छीलिकश्चान
श्च बहुलं छंदसीति शपो लुक् चित्वादंतोदात्तत्वं अवृकाणि वृञ् वरणे अस्मादिगुपधभूश्रुषिभ्यः किदिति किन्प्रत्ययः बहुव्रीहौ नञ्सुभ्यामित्यु
त्तरपदांतोदात्तत्वं। यज्यवे यजिमनिशुंधिदसिजनिभ्यो युजिति युप्रत्ययः ऋजादिरादिगुणत्वादाद्युदात्तत्वं। सुक्रतुः बहुव्रीहौ क्रत्वादयश्च

त्क नरपदाद्युदात्तत्वं। मर्तं वसु गतौ। असुन्वार्थे नंच कृनिति भावे त प्रत्ययः गुणः अंतश्च तं वयुगपदिति आद्यंतयोर्युगपत् उदात्तत्वं अपः उद्दिदमिति
भा०व० ज्ञासइद्गतंसत्तन। लिङि बहुलं छंदस्यमाङ्योगेपीत्यडभावः॥ ॥सप्तमीमृचमाह॥ ॥दानाय मनः सोमपावन्नस्तु तेर्वाञ्चा हरी वंदनश्रुदा कृधि॥ यमिष्ठा
१२३ सः सारथयो य इंद्र ते न त्वा केता आ दभ्नुवंति भूर्णयः॥ हे सोमपावन् सोमस्य पातरिंद्र ते त्वदीयं मनः दानाय अस्मदभिमतफलप्रदानायास्तु भवतु हे वं
दनश्रुत् वंदनानां श्रोतः हरी त्वदीयावश्वावर्वाञ्चा अस्मदभिमुखौ आ समंतादाभिमुख्येन कुरु हे इंद्र ते तव यस्य भूता ये सारथयः संति यमिष्ठासः
अतिशयेन यंतारः अश्वनियमने कुशला इत्यर्थः यस्मादेवं तस्मात् केताः प्रातिकूल्यज्ञातारः भूर्णयः स्वकीयायुधादीनां भर्तारः यद्वा भीतिः श्याः शत्रवः
त्वां नादभ्नुवंति न हिंसंति सोमपावन् अतो मनिन्निति वनिप् असंबुधाविति पर्युदासाद् घोभावः अर्वाञ्चा सुपां सुलुगिति विभक्त्याकारः वंदनश्र
त् वदि अभिवादनस्तुत्योः इदित्वान्नुम् भावे ल्युट् तयोश्चरितार्थश्रवणे क्विपि तुगागमः यमिष्ठासः यंता इष्ठन्स्य छंदसीति इष्ठन् प्रत्ययः तुरिष्ठेमेयःस्विति
तृलोपः निपातादाद्युदात्तत्वं आज्जसेरसुगिति असुक् केताः कित ज्ञाने केतति प्रतिकूलं जानंतीति केताः पचाद्यच् वृषादेराकृतिगणत्वादाद्युदात्तत्वं य
द्वा प्रतिकूलतया ज्ञायंत इति केताः कर्मणि घञ् मित्वादाद्युदात्तत्वं दभ्नुवंति दभु दंभे स्वादित्वाच्छ्नुः तस्याङित्वादनिदितामिति नलोपः संयोगपूर्वत्वेन हु
श्नुवोरिति यणादेशाभावे अचिश्नुधात्वित्यादिना उवङादेशः भूर्णयः भृञ् भरणे घृणिः पृश्निरित्यादौ अस्मान्नि प्रत्ययांतो निपात्यते अत उत्वं दीर्घश्च पठ॥
भृ भय इत्यस्मात् कृत्यल्युटो बहुलमिति कर्तरि क्तिनि इदाय्य एवं स्ययुतं ह्रस्वे चेति दीर्घः कृकारात् वादिभ्यः क्तिनिधावद्वर्तीति निषाव ङ्ग ङ्गावास्रवांनि
ताद्युदात्तत्वं॥ ॥अष्टमीमृचमाह॥ ॥अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे। आवृतासोवतासो न कर्तृभिस्तनूषु ते क्रतव
इंद्र भूरयः। हे इंद्र त्वं अप्रक्षितं प्रक्षयरहितं वसु धनं हस्तयोर्बिभर्षि स्तोतृभ्यो दातुं धारयसि तथा श्रुतः प्रख्यातो भवान् तन्वि आत्मीये शरीरे अषाळ्हं
शत्रुभिरनभिभूतं सहो बलं दधे धारयति त्वदीयास्तनवः कर्तृभिः स्वादकस्य वधं कुर्वद्भिः बलकृतैः कर्मभिरावृतासः आवृताः बलकृतानि सर्वाणि
कर्माण्यतस्य शरीरमाहात्म्यात् तिष्ठंतत इत्यर्थः अवतासो न अवत इति कूपनाम यथा कूपाः जलेनाभरणाय परितः प्राणिभिः रावियंते तद्वत् यस्मादेवं
स्मात् हे इंद्र तेन तव शरीरेषु क्रतवः कर्माणि भूरयो बहूनि विद्यंते अप्रक्षितं क्षि क्षये इत्यस्माद्भावे निष्ठा अण्यदर्थ इति पर्युदासाद्दीर्घाभावः अतएव क्षि
योदीर्घादिति निष्ठानत्वाभावः प्रकृष्टं क्षितं यस्य तत् प्रक्षितं न प्रक्षितं अप्रक्षितं अव्ययपूर्वपदप्रकृतिस्वरत्वं। बिभर्षि डुभृञ् धारणपोषणयोः ल
डिसिपि शपः श्लुः भृञामित्यादिभ्यासस्येत्वं अषाळ्हं षह अभिभवे इत्यस्मान्निष्ठायां तकारादौ प्रत्यये तीषसहेति इडविकल्पितत्वात् यस्य विभाषेती
ट्प्रतिषेधः ढत्वधत्वष्टुत्वढलोप पुमप्यहि ढ्लोपे पूर्वस्य दीर्घोण इति त्यान्न प्राप्तसाढ्यैसाढ्वासाढेति निगम इति निपातनाद्दीर्घत्वं यदुक्तं सादेति तत्र जं न मतादितितदुप
लक्षणार्थं द्रष्टव्यं। तन्वित्र सादिषु छंदसि वा वचनमिति अजघार्यादौत्वं वा भावे यणादेशः उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं उदात्तयणो
हल्पूर्वादित्युदात्तत्वं तु छांदसत्वान्न प्रवर्तते॥ ॥इति प्रथमस्य चतुर्थे विंशो वर्गः॥ ॥एष प्र पूर्वीरिति षडृचं पंचमं सूक्तं सव्यस्यार्षं ऐंद्रं जागतमित्युक्तं
अनुक्रांतं च॥ ॥तत्र प्रथमामृचमाह॥ ॥एष प्र पूर्वीरव तस्य चम्रिषोत्यो न योषामुदयंस्त भुर्वणिः॥ दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोग १२३
मृभ्वसं। भुर्वणिः अतएव इंद्रः तस्य यजमानस्य पूर्वीः प्रभूताश्चम्रिषः चमसेषु चमसेषु अवस्थिताः सोमलक्षणा इषः प्रावोदयंस्त प्रकर्षेण पानार्थमु
दरति तत्र दृष्टांतः अत्यो न योषां यथाश्वो वडवां शृष्टार्थमुपगच्छति। सचेंद्रो हिरण्ययं सुवर्णमयं हरिभ्यां युक्तं ऋभ्वसं उरुभासमानं रथमावृत्या

वस्थाप्य महे महते वृत्रवधादिरूपाय कर्मणे दक्षं प्रवृद्धमात्मानं सोमं पाययते पानं कारयते पूर्वीः। पृपालनपूरणयोः पृभिदिव्यधीत्यादिना उप्रत्ययः 245
उदोष्ठ्यपूर्वस्येत्युत्वं पुरत्वात् वोतो गुणवचनादिति ङीप् यणादेशः हलि चेति दीर्घत्वं प्रत्ययस्वरः चम्रिषः चमु अदने इत्यस्मात् कृषिचमितनिधनीत्या 1924
दिना ई प्रत्ययांतस्याथ पूर्व प्रत्ययः ते स्यो वर्तमाना उषश्चाम्रिषः वकारस्य रेफश्छांदसः कृदुत्तरपदप्रकृतिस्वरत्वं। अयंस्त छांदसे वर्तमाने लुङि व्यत्ययेना
त्मनेपदं। एकाच इतीट्प्रतिषेधः भुर्वणिः भुर्वतिरिति कर्मेति यास्कः धातुपाठे भर्व हिंसायामिति पठ्यते। अस्मादौणादिको अनि प्रत्ययः अकारस्य
उकारश्छांदसः पाययते पा पाने शाच्छासाह्वाव्यावेपां युगिति हेतुमति णिचि युगागमः णिचश्चेत्यात्मनेपदं हिरण्ययं ऋत्व्यवास्त्व्येत्यादिना हिरण्यशब्दादुत्त
रस्य मयटो मशब्दलोपो निपात्यते हरियोगं हरी योजने यस्मिन् हरिशब्द इन्प्रत्ययांत आद्युदात्तः। स एव बहुव्रीहिस्वरेणावशिष्यते। ऋभ्वसं उरुभा
समित्यस्य पृषोदरादित्वात् ऋभ्वसमादेशः॥ ॥द्वितीयामृचमाह॥ ॥तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः॥ पतिं दक्षस्य विदथ
स्य नू सहो गिरिं न वेना अधि रोह तेजसा॥ गूर्तयः स्तोतारः नेमन्निषः नमस्कारपूर्वं गच्छंतः यद्वा नीतहविष्काराः परीणसः परितो व्याप्नुवंतः एवंगुण
विशिष्टा यजमानाः तमिंद्रं स्तुतिभिरधिरोहंति स्तुवंत इत्यर्थः तत्र दृष्टांतः सनिष्यवः सनिं धनमात्मन इच्छंतो वाणिजः धनार्थं संचरणे संचारनिमि
त्ते भूते सति समुद्रं नयथा नावा समुद्रमधिरोहंति एवं स्तोतारपि स्वाभिमतधनलाभाय स्तुवंतीति भावः हे स्तोता त्वं च दक्षस्य विदथस्य यज्ञस्य पतिं
पालयितारं सहः सहस्यं बलवंतमिंद्रं तेजसा देवताप्रकाशनसमर्थेन स्तोत्रेणानुक्षिप्रं अधिरोहस्व स्तुहीति यावत् तत्र दृष्टांतः। वेनाः कांताः स्त्रियः गिरिं न यथा
पुष्पार्थं स्वाभिमतपुष्पाद्यर्थमधिरोहंति गूर्तयः गृ शब्दे। गृणंति स्तुवंतीति गूर्तयः क्तिच्क्तौ चेति कर्तरि क्तिच् बहुलं छंदसीत्युत्वं हलि चेति दीर्घः
नेमन्निषः णम प्रह्वत्वे इत्यस्मात् छांदसो मनिन् प्रत्ययः नेत्वं तकारस्य नकारादेशश्च नमत इष्यति प्राप्नुवंतीति नेमन्निषः इषु गतावित्यस्मात् क्विप् चेति क्विप् कृदुत्त
रपदप्रकृतिस्वरत्वम्। यद्वा णीञ् प्रापण इत्यस्मादौणादिको मन् प्रत्ययः बहुलवचनात् नकारस्येत्संज्ञाभावः नीताः प्रापिताः इषो येषां
पराविष्णुः छंदसि बहुलमिति उत्तरपदाद्युदात्तत्वं। परीणसः णस कौटिल्ये इत्ययं धातुर्गत्यर्थः धातूनामनेकार्थत्वात् परितो नसंति गच्छंती
ति परीणसः क्विप् चेति क्विप् नहिवृतीत्यादिना पूर्वपदस्य दीर्घत्वं। उपसर्गादसमासेपीति णत्वं व्यत्ययेनाद्युदात्तत्वं। यद्वा नस इति गतिकर्मा अ
स्मात् पूर्ववत् क्विप् शकारस्य सकारः सनिष्यवः षणु दाने इत्यस्मादौणादिकः सर्वधातुभ्य इति कर्मणि इन् प्रत्ययः सनिमात्मन इच्छंतीति क्यचि
सर्वप्रातिपदिकेभ्यो लालसयां क्यचः सुगागमोपि वक्तव्य इति सुक् क्याच्छंदसीत्युप्रत्ययः अचि तुन्वितसंहितायां दीर्घः सहः सह
उत्तरस्येर् मतुपः छांदसो लुक्॥ ॥तृतीयामृचमाह॥ ॥स तुर्वणिर्महाँ अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः॥ येन शुष्णं मायिनमाय
सो मदे दुध्र आभूषु रामयन्नि दामनि॥ स इंद्रः तुर्वणिः शत्रूणां हिंसिता क्षिप्रकारी वा तुर्वणि तूर्णवनिरिति यास्कः तूर्णं संभजन इति तस्यार्थः
महान् प्रवृद्धश्च भवति तस्येंद्रस्य शवो बलं पौंस्ये वीरैः पुरुषैः कर्तव्ये संग्रामे अरेणु अनवद्यं तुजा शत्रूणां हिंसकं सत् भ्राजते दीप्यते तत्र दृष्टां
तः गिरेः पर्वतस्य भृष्टिर्न शृंगमिव तत् यथा उन्नतं सत् दीप्यते तद्वत् आयसः अयोमयकवचयुक्त इंद्रः दुध्रः दुष्टानां शत्रूणां धर्ता अवस्था
पयिता एवंभूत इंद्रः मदे सोमपानेन हर्षे सति येन बलेन शुष्णं सर्वस्य शोषकं मायिनं मायाविनं आभुषु कारागृहे षुदामनि बंधके निगडे रमय
न्नि वासयत्। तद्बलमिति पूर्वेणान्वयः तुर्वणिः तुर्विः हिंसार्थः। अस्मादौणादिको नि प्रत्ययः अरेणु रेणुवदाच्छादकत्वाद्रेणुशब्देनाव द्यमु

यनेव हुश्रीहीन न पकभ्यामित्यन रपदांतोदात्तत्वं तु ज्ञानुज्ञहिमाभ्यां इगुपधलक्षणः कः म.पां मलुगिति विभक्तेराकारः बु दानप्रियं तव स्थापयतीति दुध्रः
आ·अ· प्रिय अवस्थापन इत्यस्मादंतर्भावितण्यर्थात्कल्विभुजादित्वात् प्रत्ययः यणादेशः रपरलोपः छांदसः रमयत अमंतत्वान्मित्वमिता ह्रस्व इति ह्रस्वत्वं
छांदसः संहितायां दीर्घः॥ ॥चतुर्थीमृचमाह॥ ॥ दधीयदि तविषीवाय तयदंइमिषनयुषसंबस्य यं॥ या अस्मुनादावसा बाधते न मद इयर्ति रेणु
१२४ गृहदर्हविषाणिः॥ यदेंद्रः धम्मना धर्मकेण अवस्थाबलेन नवस्तामारूपं नश्रादिमस रबाधते हिनास्ति पतये रक्षणायत्वाय धात्वा यास्लोभायहिंते न
मिंद्र देवीतविषी यातमानं बलं यदिय दासि पति समंवानि सततइति यास्कः सर्यः इव सवयथा उषा द्यवतां सवतन्त्रिपंतत्संबंधा भवती त्यर्थः तदानी
अर्हरिघृणिः गमतार हत्य ईरयः अववः तेषां यथात्यादनेन स्वनपिता अस्थापिता इंद्रः रणुर रघणाहिं सनेन्न रूत्य भृतं इयर्ति उन्नन गमयतित्याव
धात्ययाव धंतति त्यारतन्निप्रत्ययोत्तरपदयाश्चेतिमपर्यंतस्यत्वादेश अश्वादेसंदकारस्यातं सपां सलुगिति द्वितीयाया आकारः सिपत्ति सिबस
मवाये बहुलं छंदसीति शपः श्लुः बहुलं छंदसीत्यभ्यासस्य संइयर्ति कर्गता अदादित्वादिकः अस्माद्विन भर्तृविन ण्यर्थादुक्षापः द्विर्भावोर इंबह
लादिशेषः अर्तिपिपर्त्योश्चेत्यभ्यासस्य तं अभ्यासस्य सवर्णदीर्घादेशः अनुदात्तवति अभ्यासस्याघुदात्तत्वं पूर्वपदस्य वास्यांतर गतत्वं
तपदात् परत्वान्निघाताभावः रणुरीगति रयणयाः अस्माद्धणादिकानु प्रत्ययः अर्हरिघृणिः अर्तेरन्य भ्यापि दृश्यंत इति विच अगागछंतश्च
महर यश्व त्यईरयत तेषां स्वनयितास्यमुस्वन ध्वनइति अस्याण्यंता णादिको इनप्रत्ययः णेरनिदीतिणिलोपः घदादित्वान्मित्वमिता ह्रस्व इति
ह्रस्वत्वं दुत्तरपदप्रकृतिस्वरत्वं॥ ॥पंचमीमृचमाह॥ ॥वियत्तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा। स्वर्मीळ्हे यन्मद इंद्र ह
र्ष्याहन्वृत्रं निरपामौब्जो अर्णवं॥ यद्यदा तिरः रजोणाति राहितं धरणं सर्वस्य प्राणिजातस्य सारकं अच्युतं विनाशरहितं रजः उदकं दिवो द्युलो
कात आतास आतादति दिङ्नामानि तस्मिन्संग्रामे मदेन च सोमपानेन हर्षे सति हृष्यादित्यारत्नमाचरकं मम कर मह हन त्वम वधीः तदानीं अपां
पूर्णं अर्णवं मेघं निरौब्जः वर्षणाभिमुखं अधोमुखमाकार्षीः इत्यर्थः निरःवरकं रहत्वाहत्य जलेन भिन्नस्य सिंचितोता त्यर्थः अतिष्ठिपः ति
ष्ठते ण्यंताल्लुङि चङ्गरदेशः णिलोपः तिष्ठतेरित्य पधायाइत्वं चङ्गतिद्विर्वचनं इत्पूर्वाः खयइति थकारः शिष्यते च तेन तकारः अडागम उदात्तः
यद्वृत्तयोगादनिघातः बर्हणा सुपां सुलुगिति सोराकारः स्वर्मीळ्हेमिति समचनेन निघासेदइति दसंप्रसरणयोर्धो धइतिनकारस्य धत्वं तस्य ष्टुत्वेदार
लोप इति ढलोपः ढ्रलोपे पूर्वस्य दीर्घत्वं स्वरित्यनव्ययं स्वर्गमहितादिति स्वर्यते बहुव्रीहौ पूर्वपद प्रकृतिस्वरत्वं शिष्यते। अहन् हंतर्लङि मध्यम
एकवचन हल्ङ्याभ्य इति सोलोपः यद्वृत्तयोगादनिघातः औब्जः उब्ज आर्जवे लङ्याडागमश्चि॥ ॥षष्ठीमृचमाह॥ ॥त्वं दिवो धरुणं धिष
ओजसा पृथिव्या इंद्र सदनेषु माहिनः॥ त्वं सुतस्य मदे अरिणा अपो विवृत्रस्य समया पाष्यारुजः॥ हेंद्र माहितः प्रवृद्धस्त्वं दिवो द्युलोकात्पृथिव्याः सद
नेषु ओजसा बलेन धरणं सर्वस्य जगतो धारकं वृष्टिजलं धिषे दधिषे स्थापयसि यमात्वं सुतस्य सोमस्य पानेन मदे हर्षे सति अपो जलानि अरिणाः मेघा
न्निर्गमय रत्नस्यावरकस्य आवरकं वृत्रं च समया पाष्या शिलया पाष्याणोपा गोस्य राजः विदारितवानसि॥ धिषे दधातेश्छांदसो वर्तमाने लिट्
द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति वचनाद्द्विर्वचनाभावः क्रादिनियमादिडागम आतोलोप इटि चेत्याकारलोपः माहिनः महेरिनण्चेतिमह
पूजायामित्यस्मादौणादिक इनण प्रत्ययः अतउपधाया इति वृद्धिः अरिणाः रिगति रेषयोः क्र्यादिकः ल्हिसिपि धादीनां ह्रस्व इति ह्रस्वत्वं सम १२४

यापमसंयब्भ्यसमतीतिसमायचाथचचितइत्यंतोदात्तत्वं पाष्याषि पूर्संकृर्णनेइत्यस्मादौणादिक उनप्रत्ययः बहुलवचनादुपधाया आकारः रुदिकाराद
न्निनइतिडीप प्रत्ययस्वरेणांतोदात्तः तृतीयैकवचने यणादेश समिति उदात्तस्वरितयोर्यण इति स्वरितत्वं अरुजः रुजोभंगे तौदादिकः अस्य ङित्वाद्गुणाभावः 247
॥ ॥इति प्रथमस्य चतुर्थे एकविंशो वर्गः॥ ॥प्रमंहिष्ठायेति षडृचं सप्तमं सूक्तं सव्यस्यार्षं मैंद्रं जागतं तथा चानुक्रांतं प्रमंहिष्ठायेति षड्भक्तिनि च व 1924
त्यइंद्रं सत इंद्रां समनीयेमृक्तिं च सर्वाः ककुभः प्रमंहिष्ठायादत्तइति॥ ॥नवप्रथमामृचमाह॥ ॥प्रमंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे
मतिं भरे॥ अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतं॥ मंहिष्ठाय मंहतिर्दानकर्मेति यास्कः दातृतमाय बृहते गुणैर्महते बृहद्रये
महाधनाय सत्यशुष्माय अवितथबलाय तवसे अकारः मरुद्भ्य एवं गुणविशिष्टायेंद्राय मतिं मननीयां स्तुतिं प्रभरे प्रकर्षेण संपादयामि
यस्येंद्रस्य बलं दुर्धरं अन्यैर्धर्तुमशक्यं तदृष्टांतः प्रवणे निम्नप्रदेशे अपामिव जलं यथा जलानां वेगः केनाप्यवस्थापयितुं न शक्यते तद्वत् तथा
राधाद्धनं विश्वायु सर्वेषु व्याप्तं शवसे बलाय नृणां बलाय यतेंद्रेणापावृतं अपगतावरणं क्रियते तस्येंद्रस्याति पूर्वेण संबंधः मंहिष्ठायातिशयेन मंहिता
मंहिष्ठः तृः छंदसीति इष्ठन प्रत्ययः तुरिष्ठेमयःस्विति तृलोपः बृहद्रये बृहन्मतो रूपसंख्यानमिति विभक्तेरुदात्तत्वं उत्तरयोश्च बहुव्रीहौ स्वरः मति
मंत्रे वृषेष पत्यादिनाक्तिन् उदात्तत्वं अनुदात्तोपदेश इत्यादिनानुनासिकलोपः दुर्धरं धृञ् धारणे ईषदुःसुष्विति कर्मणि खल् विश्वायु विश्वस्मिन् आ
युगमनं यस्य तादृश्यायुन तेश्छंदसीण उत्कप्रत्ययः बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं अपावृतं कर्मणि निष्ठा गतिरनंतर इति गतेः प्र
कृतिस्वरत्वं॥ ॥द्वितीयामृचमाह॥ ॥अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः॥ यत्पर्वते न समशीत हर्यत इंद्रस्य वज्रः श्नथिता हिरण्ययः॥ अध अनंतरमेव हेइंद्र विश्वं सर्वमिदं जगत ते तव संबंधिने इष्टये या
गायाच सततमनुभवतु यद्वा इष्टये हविर्गाभिः स्तव प्रापयमाण्य इति हविष्मतो यजमानस्य सवनानि यज्ञजातानि निम्ना निम्नानि भूस्थलानि आप
इव तां संभजंतेति शेषः हर्यतः कांतुवधं प्रभजतइंद्रस्य हर्यतिः प्रभाकर्मेति यास्कः यद्वा हर्यतः शोभनहिरण्यो हिरण्मयः श्नथिता शत्रूणां हिंसन
शीलः वज्रः पर्वते पर्वतिश्लिष्टाज्ञ यत्तत्रवाय पूरणसमशीत संस्थाना भवतु किंतु जागरितः सन्न अवधीत्यर्थः॥ यदा इंद्रेण प्रेरितो वज्रः अप्रतिह
तः सन् वृत्रमवधीत् तदा प्रभृत्यवर्तयं सर्वयजमानाः प्रावर्तिषतीति भावः अधः छांदसं धत्वं अस्मन अस्तेर्लङि बहुलं छंदसीति शपो लुगभावः
इत्ययपक्षे तभावविभक्तिनिवचिस्वपीत्यादिना संप्रसारणं प्रथादिना पूर्वत्वं प्रत्ययेनांतोदात्तत्वं यद्वा रपगता वित्यस्माल्भावक्ति निमंत्रे वृषेसति तस्योदा
त्तत्वं निम्न च सवनाश्च अश्छंदसीति शलोपः समशीत शीङ् स्वप्ने लिङि संज्ञापूर्वकस्य विधेरनित्यत्वात शीङ्सार्वधातुकेति गुणाभावः हर्यतः ह
र्यं गति कांत्योः भृमृदृशी त्यादिना अतच प्रत्ययः श्नथिता श्नत क्रुथ क्नथ हिंसार्थाः ताच्छीलिकस्तृन प्रत्ययः निता दाद्युदात्तत्वं॥ ॥तृतीयामृचमाह॥
अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे॥ यस्य धाम श्रवसे नामेंद्रियं ज्योतिरकारि हरितो नायसे॥ ॥हेउषः उषोदेवते शुभ्रे
शोभनेत्वं भीमाय शत्रूणां भयंकराय पनीयसे अतिशयेन स्तोतव्याय अस्मा इंद्राय अध्वरे हिंसारहितेस्मिन यागे नमसा हविरभि नमः संप्रत्यर्थेन तथा च यास्कः अस्तु
पसामर्थ्यस्य संप्रत्यर्थे प्रयोगा इह च निधर्मीति संप्रति इदानीं नमसा नो हविर्लक्षणमन्नं समाभर सम्यक् संपादय धाम सर्वस्य धारकं नाम स्तो
तृ पुनमन शीलं प्रसिद्धं वा इंद्रियं इंद्रस्य परमैश्वर्यस्य लिंगं यस्येंद्रस्य एवं विधं ज्योतिः श्रवसे अन्नाय हविर्लक्षणान्न लाभार्थं अयसे हितलता
गमनाय अकारि क्रियते हरितोन यथा अश्वान सादिनः स्वाभिलाषित देशं गमयंति तद्वदिंद्रापि स्वाभिमत हविर्लाभाय स्वकीयं तेजो गमयती

भा०३०
१२८

तीति भावः। उषः पादादित्वान्निघाताभावः। भृभ्नेश्च भृभ्नेदो मे सत्यादिन वीत्यादिना रकः भरद्वरूथ इति भर्म इति भवं यथान्नि इति ह्यौ ह्यः पनीयसंपनितत्वात्यथाह्
हुत्वं चनान्तं मंध्यमन तस्मादाति शायनिक ईयस ईति ईलोपः। अकारस्य इमि इ इति हुइ इति वर्तमाने कं मंशिलि इ यङ्कृत योगादनिघातः। अग्र
गमः अद्युसे अयजनादित्वमाद्युदात्तत्वम्॥ ॥चतुर्थीमृचमाह॥ ॥इमंतं इत्तं पं पुर मुते यता रथ्य चगममिमं भूवसं। नहि व ध्यामि वर्णा
गिरः मघ वंत्रशोणीविमतिनो हर्यतं इवः॥ इदं इयं मम भूमा प्रभृत धनं अत एव पुरुष्टुत पुरुभिर्यजमानैः स्तुत यंच वाला मार मार्थयतया बलं च राम
मिन्द्राम यागवर्तमहतरं इमं च यंत वस्य भ ताहमिर्वणः गीर्भिः वननीयं स्तुत्यं सामतान्यः कश्चिदपिगिरः स्तुतीः नहि समघवन हिताग्रोत्यत रसंनोस्माकं त
तद्वचः क्षतिलक्षणं प्रतिगृह्यैकाम यस्य क्षोणीरिव यथा क्षोणी पृथिव्यात्मकीयानि भूतजातानि कामयते तमसि इदंतांमसीः द्रापः पिवाद्नुदात्तलं धातु
स्वरः यद्वृत्त योगादनिघातः मघव मघ संहितायां अव प्राम्यर्थः धातु नाम्नेन कार्थतात लत्यराम वहुलं छंदसीति विकरण स्यलुक् पा राद्वित्वान्निघा
ताभावः क्षोणीरिव इल्ढुरूयाम्य इतिमत्वाभावश्छांदसः॥ ॥पंचमीमृचमाह॥ ॥भूरितइंद्रवीर्य १ तव स्मस्यस्तोतुर्मघवन्कामम्मापृण॥ अनुतेद्यो
र्बृहतिवीर्यममइयंचते पृथिवीनेम ओजसा॥ हे इंद्र तव वीर्यं सामर्थ्यं भूरि बहु न केनापि अवच्छेत्तुं शक्यते तादृशस्यत व वयं स्मसि स्व भूताभवामः
हे मघवन अस्य स्तोतुः तां स्तवं तायजमानस्य कामम भिलाषं आपृण आपूरय बृहती यौर्महान् द्युलोकोपि तव वीर्यं अनुममे अन्वमंस्त इंद्रेण सह
वस्थानात इयं च इयमपि पृथिवी ततव ओजसव लायनमत्रपीच भूवत्वत्कार्ड़ीतामती अधृष्यवत्त इति भावः स्मसि असभुवि लडिच्श्च सारलोप
इत्यकार लोपः इदंतो मसिप्रणम्रीणातेः अव प्रीतिहतुभर्तया पूरणं लक्षणते तु दादित्वाच्छप्रत्ययः तस्य दित्वाद्गुणाभावः ममिमा इमाने शब्दे चडि
वादात्मनेपदं लिटि आतोलोप इति चात्याकार लोपः नमणमुप्रव्रजनिलिटि अत एकल्मध्य इत्य तावनाम्यमलोपाति इति इति निघातः॥ ॥षष्ठीम्
चमाह॥ ॥त्वंतमिंद्रपर्वतं महामुरुं वज्रेण वज्रिन्पर्वशश्चकर्तिथ॥ अवासृजोनिवृताः सर्तवा अपः सत्राविश्वंदधिषे केवलं सहः॥ हेवज्रिन्वज्रवन्निंद्र
त्वंतं प्रसिद्धं महां अयामतामहांतं उरं विस्तीर्णं पर्वतं पर्ववंतं मेघं वज्रेण स्वायुधेन पर्वशः पर्वणि पर्वणि चकर्तिथ अकलीचवत्वेतेन मेघेन
निवृताः आवृता आपः सर्तवे सरणाय गमनाय अवासृजः अवाङ्मुखम स्राक्षीः अत स्त्वमेव केवलं विश्वं व्याप्तं सहो बलं दधिषे धारयसि नान्यः क
श्चित्त्विति प्रवत्तनतमत्यामत्यमवम त्रवति मत्यनाममनाव्यतितनाममवाघातमहामहांतं नकार तकारयोपि लोश्छांदसः चकर्तिथकृती छेदने लिटि
थलि अभ्यासस्योरदत्व हलादिशेष चुत्वानि सर्तवे सृ गत्यर्थं तत्वकं निति भावतवेप्रत्ययः सृजत्तं इत्यव्ययत्वे अभ्यादाभुप इति सुपोलुक् अंतश्च
तवे युगपदिति आद्यंतयोर्युगपदुदात्तत्वं दधिषे दध धारणे लिटि क्रादिनियमादि॥ ॥इति प्रथमस्य चतुर्थे द्वाविंशो वर्गः॥ ॥एकादशानुवाके समममसूक्ता
नि। तत्रमूर्वायिति नवर्चं प्रथमं सूक्तं गोतमस्यार्षमाग्नेयं आग्नेयं पंचपदाः पंक्तिश्छंदः प्रथमाग्नेः तथाचानुक्रांतं ॥ इत्याग्निरार्ता
ति प्रातरनुवाकस्याग्नेयक्रतौ आश्विनशस्त्रे च त्रागतत्वसि आश्विनः पंचवर्षः सत्रितं च मग्नेप्रथमा अग्निर्होतानिषसाद यजीयानिति सूत्रितं
तत्र प्रथमामृचमाह॥ ॥नृचिन्मद्दाता अमृतानितुंदितहोता यह्वा अभवद्विवस्वतः॥ विसाधिष्ठेभिः पथिभी रजोमम आ देवतात हविषाविवासति॥ सहोजाः सहसा बलेन जातः अग्निर्हि बलेन मथ्यमानाद्रण्याः सकाशाज्जायते अमृतो मरणरहितः एवंभूतोग्निर्नृचितक्षिप्रमेव नितुं हतनि
नगांव्यथ यति इयमन्नमत्स्याग्नेः प्रथमतासावात यद्वा निगां धातितुं हतिर्गत्यर्थः सोग्नोधातुः यद्वा होता देवानामाह्वाता होमनिष्पादकोवा

अयमग्निः विवस्वतः परिचरतो यजमानस्य देवान्प्रति हविर्दत्नाय दूतोभवत्। हविर्वहने नियुक्तो भवति तदानीं साधिष्ठेभिः समीचीनैः पथिभिर्मार्गै
गमनशीलैः तरिक्षलोकं विममे निर्ममे पूर्वं विद्यमानमप्यंतरिक्षं असत्कल्पम भूत इदानीं तस्य तेजसा प्रकाशमानं सत उत्पन्नमिवदृश्यते किं चदेवताते
ति यज्ञनाम देवतातेर्यज्ञे हविषा चरुपुरोडाशादिलक्षणेन देवानाविवासति परिचरति अमृतः मृतं मरणमस्य नास्तीति बहुव्रीहौ नञ्सुभ्यामि
त्युत्तरपदान्तोदात्तत्वं नुदंते नुदव्यथनेस्वरितेत्वादात्मनेपदं नकारोपजनश्छांदसः साधिष्ठेभिः बाढशब्दाद्दातिशायनिक इष्ठनि
अंतिकबाढयोर्नेदसाधौ इति साधादेशः बहुलं छंदसीति भिस ऐस भावः नित्वादाद्युदात्तत्वं देवताता सर्वदेवतातिल् इति स्वार्थिकस्तातिल्प्र
त्ययः तन च तस्मिन्वंधीयत्तो लक्ष्यते। यद्वा देवान् हविषा अविवासतीति याज्ञे सुपां सुलुगिति विभक्तेर्डादेशः लित्स्वरेण प्रत्ययात्पूर्वस्योदा
त्तत्वं॥ ॥द्वितीयामृचमाह॥ ॥आस्वमन्न युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति॥ अत्यो न पृष्ठं प्रुषितस्य रोचते दिवोन सानु स्तनयन्न
चिक्रदत्॥ अजरो जरारहितोयमग्निः स्वं स्वकीयं अन्नमदनीयं तृणगुल्मादिकं युवमानः स्वकीयज्वालया संमिश्रयन तदनंतरं तृष्वविष्यन भ
क्षयंश्च अविष्यन्नित्यनदतिकर्मसु पठितं एवं भूतन्नुषितस्य दग्धुमिच्छतः प्रदहतस्याग्नेः पृष्ठमुपर्यवस्थितं ज्वालाजालं अत्योन रोचते यथा
सततगमनशीलोश्वः संबंधिमानुषमुपस्थितमथ स्तनयन गर्जयन्निव अचिक्रदत गंभीरं शब्दमात्मानमुच्चीकरतु युवमानः युमिश्रणाव्यक्षणा
त्मनेपदं शपि प्राप्ते व्यत्ययेनात्मनेपदं तस्य बहुलं छंदसीति लुगभावः अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्यैव शिष्यते। अजरः ब
हुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं अचिक्रदत् क्रदि क्लदि आह्वाने रोदने च॥ अमाण्यंताल्लुङि चङ्ञाग मानुशासनस्या
नित्यत्वानुमभावः द्विर्भावहलादिशेषसन्वद्भावेत्वानि॥ ॥तृतीयामृचमाह॥ ॥क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळ
मर्त्यः॥ रथो न विक्ष्वृंजसान आयुषु व्यानुषग्वार्या देव ऋण्वति॥ क्राणा हविर्वहनं कुर्वाणो रुद्रेभिरुद्रैः वसुभिश्च पुरोहितः पुरस्कृतो
होता देवानामाह्वाता निषत्तः हविर्स्वीकरणायदेवयजने निषण्णः रयिषाट् रयीणां धनानां अभिभविता अमर्त्यो मरणरहितः एवंभू
तो देवः द्योतमानोग्निर्विक्षु प्रजासु लौकिकजनेषु रथो न रथ इव आयुषु यजमानलक्षणेषु मनुष्येषु ऋंजसानः स्तूयमानः वार्याणि वा
र्याणि यानि हवींषि स्वयं प्रदानोपि कोणाकरोति इत्यानचि व बहुलं छंदसीति विकरणस्य लुक् शानचि वोदितलाद्गुणाभावे यणादेशः चितइत्यंतोदा
त्तत्वं कृपां सुलुगिति सोः पूर्वसवर्णदीर्घत्वं निषत्त षट्टु विसरणगत्यवसादनेषु अस्मात्कर्मणि निष्ठा सत्तनिषत्तेत्यादिना निष्ठानत्वाभावो
निपातितः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं रयिषाड् षह अभिभवे छंदसि सह इति ण्विः सहेः साडः सः इति षत्वं ऋंजसानः स्तुतिकर्म
असमानञ्जितसनु ऋं जेर्ऋंजिवृधिमंदिसहिभ्यः कृदिति कर्मण्यसानच्प्रत्ययः चित इत्यंतोदात्तत्वं आयुषु आयव इति मनुष्यनाम इण गता इ
त्यस्मात् छंदसीण इत्युण्प्रत्ययः वृध्यायादेशौ वार्याः ऋजसंभक्तौ अर्हलोर्ण्यत इति स्वरितप्राप्ते ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं यो
छंदसीति शेर्लोपः ऋण्वतिरविगतौ व्यत्ययेन संप्रसारणं इति शान्नुम्॥ ॥चतुर्थीमृचमाह॥ ॥विवातजूतो अतसेषु तिष्ठते वृथा जुहू
भिः सृण्या तुविष्वणिः॥ तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर॥ वातजूतो वायुना प्रेरितः तुविष्वणिः महास्वनः एवं
भूतोग्निः जुहूभिः स्वकीयाभिर्जिह्वाभिः सृण्या शरणशीलेन तेजः समूहेन च तस्थैकैः सनरथत्यनायासवचनः वृथा अना

249
1924

वातेन च भत्रसे पुरुत्रेत पुरुषु वृक्षेषु वर्तति विवेषयति पति हि अग्ने यद्यदा वनिनो वनसंबंधान् वृक्षान् । दग्धुं रथायसे रथ इवाचरसि हसीत्यर्थः । हरइति

भा॰ प्र॰ दीप्तिनाम । भत्रसा रावणि तुविष्वण् तव गमनमार्गः कृष्णं कृष्णवर्णो भवति वातनः । तु इति सौत्रो धातुः वातेनेतो वातनुतः सतीयावर्मणीति पूर्वपदप्रकृ

तिस्वरत्वं विधनेत समय एव विभ्रमद्धृष्णान परं तु हुभिः कुज्ञादरयोः कुयंत आविवितु वः कृवः श्रुव छांदसि नुकादीर्घः अवगृह्य तदिर्योद्वाविधा

१२६ ताविद्विंतो दातत्तं सत्यानाम् । गतो मरुतीत सुरणिः सर्वास्विदापिकृष्टि इति निप्रत्ययः नन्ने त्येमंमार्गः इण् गतौ निरस्मान कुरण आणादिको मनिनुनिया

दाधुदात्तत्वं ॥ ॥ पंचमीमृचमाह ॥ ॥ तपुर्जंभो वन आवातचोदितो यूथे न साह्वाँ अव वाति वंसगः ॥ अभिव्रजन्नक्षितं पाजसा रजः स्थातुश्चरथं भय

ते पतत्रिणः ॥ ॥ तपुर्जंभः तपुर्षि ज्वालारूपा तंभा आयुधानि यस्य तादृशो यस्य वातचोदितः वायुना प्रेरितः एवं भूतो अग्नि पृथ्वी ज्वालासमू

हे सति अक्षितं अक्षीणं रजः आर्द्रं रजांसि गमनमुद्गं । पाजसा तेजसा बलेन अभिव्रजन् अभिमुख्येन गच्छन् वन अरण्य सबलं सर्वमाभिभवन आभि

मुख्येन अवयाति मा प्रोति तत्र दृष्टांतः वंसगः वननीयगतिर्वृषः गोयूथं सर्वं मभिभवन् वर्तते तद्वत् यस्मादेवं तस्मात्पतत्रिणः पतनवतो

ग्नेः सकाशात् स्थातुः स्थावरं चरथं जंगमं च भायते बिभेति भयं प्राप्नोति । तत्रापि तिबासे प्रत्ययात् तोति पातिनः दीर्घः हिमानपादं इति स

हितायां नकारस्य रुत्वं । अतो रिति नित्यमिति सानुनासिक आकारः यतः हो वा छंदसि ब्राह्मं स्थातुः स्थावरं चरथं विभेति पश्वात् मरथमित्यर्थः च

रथं चरगत्यर्थः अस्मात् औणादिकोऽथप्रत्ययः भयते नि भी भये व्यत्ययेनात्मनेपदं बहुलं छंदसीति शपो लुक् भावः ॥ गुणाय वादेशौ ॥ इति प्रथम

स्य चतुर्थे त्रयोविंशो वर्गः ॥ ॥ षष्ठीमृचमाह ॥ दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः ॥ होतारमग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्या

य जन्मने ॥ हे अग्ने त्वां मानुषेषु मनुष्येषु मध्ये भृगवः एतत्संज्ञा महर्षयः दिव्याय जन्मने देवत्व प्राप्तये चारुं रयिं न धनमिव आदधुः

स्थापितवन्तः सर्वे मनुष्याः ... यजमानार्थं अकार्षुः कीदृशं होतारं देवानामाह्वातारं अतिथिं सततगामिनं वरेण्यं वरणीयं वरणीयं

देवेषु मतेन गंतारं वरेण्यं वरणीयं मित्रं न शेवं यथा सखा सुखकृत् भवति तद्वत् सुखकरमित्यर्थः दधुः डुधाञ् धारणपोषणयोः इति स्थाकारलो

पः युष्माद् अत्र नः पादमिति विसर्जनीयस्य षत्वं हृतं रयंतस्य षदुः सः क्रिश्चितिवत्तु बहुलं छंदसीति संप्रसारणं परपूर्वत्वं गुणावादेशौ सति

ति प्रत्ययात्पूर्वपदस्योदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वं ॥ ॥ सप्तमीमृचमाह ॥ होतारं सप्त जुह्वो यजिष्ठं यं वाघतो वृणते अध्वरेषु ॥ अग्निं वि

श्वेषामरतिं वसूनां सपर्यामि प्रयसा यामि रत्नं ॥ सप्तसप्त संख्याकाः जुह्वः होतारः वाघतः ऋत्विजः अध्वरेषु यागेषु यजिष्ठं यष्टृतमं होतारं देवा

नामाह्वातारं यमग्निं वृणते संभजंते । विश्वेषां सर्वेषां वसूनां धनानां अरतिं प्रापयितारं तमग्निं प्रयसा हविर्लक्षणेनान्नेन सपर्यामि परिचरामि रत्नं र

मणीयं कर्मफलं च यामि याचे । यामि इणतेरत्र संभजंतां यमिति प्रत्ययः स्वरः अरतिं ऋगतिप्रापणयोः अस्मादौणादिको वहिवस्यर्तिभ्यश्चिदिति प्रत्य

यः चितो ऽंतोदात्तत्वं सपर्यामि सपर्यति परिचरणकर्मा सपर इत्यामिति धातुत्वं इति अतो यक् प्रत्ययः णिज्यत पाढाद्विश्वादिषु धातोः भावः यामि या

चामी त्यस्य वर्णलोपश्छांदसः ॥ ॥ अष्टमीमृचमाह ॥ ॥ अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ ॥ अग्ने गृणंतमंहस उरुष्योर्जो न १२६

पात्पूर्भिरायसीभिः ॥ हे सहसः सूनो बलस्य पुत्र बलेन हि मथ्यमानो ऽग्निर्जायते तमिमत्रमहः अनुकूलदीप्तिमन् त्वं नो ऽस्माकं स्तोतृभ्यः उरु स्तोतॄणामिन्

मंत्रिणे अच्छिद्रा अछिद्राणि शर्माणि गृहाणि यच्छ देहि किंच हे ऊर्जो नपात् अन्नस्य पुत्र भूतेनान्नेन तव वर्धनात् त्वं पुत्रः

पं वि धाग्ने गृणंतं स्तोतारं त्वं आयसीभिः आयसीभिः पूर्भिः पालनैः अंहसः पापात् उरुष्य रक्ष उरुष्यतिरक्षाकर्मेति यास्कः अच्छि

द्रा हे शर्मातिर्द्रोर्लोपः सहसो सहसः परमपि छंदसीति पर स्य षष्ठ्यंतस्य पूर्वामंत्रितांगवद्भाव सति पदद्वयं समुदायस्य पमिकं सर्वानुदात्तत्वं

शर्म सुपां सुलुगिति विभक्तेर्लुक् ऊर्जो नपात् न पातयतीति नपात् नञ्भ्राडिति नञः प्रकृतिभावः मंत्रामंत्रिता इति षष्ठ्यंतस्य परांगवद्भावे सति पा

दादित्वान् पानाभावे पाष्ठिकमामंत्रिताद्युदात्तत्वं पूर्भिः पृ पालनपूरणयोरित्यस्मात् संपदादि लक्षणो भावे क्विप् उदोष्ठ्यपूर्वस्येति उत्वं सावेकाचस्तृतीयादिर्वि भ

क्तेरुदात्तत्वं ॥ ॥ नवमीमृचमाह ॥ ॥ भवा वरूथं गृणते विभावो भवा मघवन्मघवद्भ्यः शर्म ॥ उरुष्याग्ने अंहसो गृणंतं प्रातर्मक्षू धियावसुर्जग

म्यात् ॥ हे विभवः विशिष्टप्रकाश अग्ने गृणते त्वां स्तुवते यजमानाय वरूथमिति गृहनाम वरूथं अनिष्टनिवारकं गृहं भव हे मघवन् धनवन् अग्ने मघव

द्भ्यो हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यः शर्म सुखं यथा भवति तथा भव । हे अग्ने गृणंतं स्तुवंतं अंहसः पापकारिणः शत्रोः उरुष्य रक्ष धियावसुः

कर्मणा वसु धनं यस्य सो ऽग्निः प्रातः इदानीमेव परे द्युरपि मक्षू शीघ्रं जगम्यात् आगच्छतु वरूथं वृञ् वरणे वृञ् ऊथन्निति कथन् प्रत्ययः नितोद्युदात्तत्वं

गृणते शतुरनुम इति विभक्तेरुदात्तत्वं विभावः विशिष्टा भाः आभा यस्मिन् इति विचतद्यस्यार्तीति मतुपमादुपधायाइति मतुपो वत्वं मतुवसोरुरिति

नकारस्य रुत्वं मघवद्भ्यः मघवाबहुलमिति मघवन्नाद्यस्य तृ आदेशः मघमिति धननाम तदस्यास्तीति मतुप् मस्मत्वात् अलोऽत्यस्येत्यं तस्य भवति

मक्षी कतितुनुघमक्षितिदीर्घः धियावसुः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । पूर्वपदस्य च सावेकाचइति विभक्तेरुदात्तत्वं लुगभावश्छांदसः ज

गम्यात् गम्लृ गतौ लिङि बहुलं छंदसीति शपः श्लुः ॥ ॥ इति प्रथमस्य चतुर्थे चतुर्विंशो वर्गः ॥ ॥ वयाइति नवर्चं द्वितीयं सूक्तं नोधस आर्षं त्रैष्टु

भं वैश्वानरः गुणकोग्निर्देवता तथा चानुक्रांतं वया उन नवैश्वानरीयमिति सूक्तविनियोगो लिंगादवगंतव्यः ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥

वया इदग्ने अग्नयस्ते अन्ये त्वे विश्वे अमृता मादयंते ॥ वैश्वानर नाभिरसि क्षितीनां स्थूणेव जनाँ उपमिद्ययंथ ॥ वयाः शाखा वयतेर्वातायना भवं

तीति यास्कः हे अग्ने ये ऽन्ये अग्नयः संति ते सर्वे ऽपि तव वया इत् शाखा एव तत्तस्तो ऽन्ये न संतीति भावः किं च त्वे त्वयि सति विश्वे सर्वे अमृता अमरणधर्मा

णो देवा मादयंते हृष्यंति तेन हि तत्र पतिरकोणतर्तुं इविर्तुं शक्यते हे वैश्वानर विश्वेषां नराणां स्वरूपेण संबंधिन् अग्ने क्षितीनां मनुष्याणां

भिः संनद्धासि अवस्थापकोभवसि अतस्त्वं उपमित उपस्थायति सन् यद्वा उपमित्य तदृष्टांत विशेषणं जनाननयंथ अधारयः तत्र दृष्टांतः

। उपमित उपनिखाता स्थूणव यद्वा आधारणार्थं निखातः स्तंभो यथा गृहं परिवृढं धारयति तद्वदेवैश्वानर विश्वे च ते नराः नरसंज्ञायामिति पू

र्वपदस्य दीर्घः तत्संबंधी वैश्वानरः तस्येदमित्यण् नाभिनद्धो भ इत्यत्र द्वितीयप्रत्ययो भकारस्थांतादेशः क्षिताश्च कृदंतत्वं अतितास्य ओर्लोपः

ति सन्नोपः क्षितौ नांक्षिनिवासगत्योः अस्मात्क्तिन् संज्ञायामिति क्तिच् अंतोदात्तः क्षितिशब्दादुत्तरस्य नामो नामन्यतरस्यामिति उदात्तत्वं

उपमितं दुमिञ् प्रक्षेपणे अस्मादुपपूर्वात् कृत्वे च नाकर्मणि क्विप् तुगागमः यंयथ यमु उपरमे लिटि थलि क्रादिनियमात् इट् प्राप्ते उपदेशेत्वत इ

ति प्रतिषेधः विभक्तत्वं हत्यावि भारतेमूर्धा दिवो नाभिरग्निः पृथिव्या इति वैकल्पिको नुरूपस्तृचः विषुवान् दिवाकीर्त्य इति सर्वं दृष्ट्वा तं मूर्धा

नं दिवो अरतिं पृथिव्याम् मूर्धा दिवो नाभिरग्निः पृथिव्या इति वति ॥ ॥ द्वितीयामृचमाह ॥ मूर्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोद

स्योः ॥ तं त्वा देवासो ऽजनयंत देवं वैश्वानर ज्योतिरिदार्याय ॥ अयमग्निः दिवो द्युलोकस्य मूर्धा शिरोवत्प्रधानभूतो भवति पृथिव्या भूम

257/1924

श्वनाभिः संनाहकः स्तम्भक इत्यर्थः ॥ अथानंतरं रोदस्योर्द्यावापृथिव्योः अयं अरतिः अधिपतिः अभवत् हे वैश्वानर त्वा हशं देवं दानादिगुणयुक्तं त्वा
भा॰ वृ॰ त्वां देवासः सर्वे देवाः आर्याय विदुषे मनवे यजमानाय ज्योतिरुव मव अजनयंत उपपादयन् मूर्तिमग्निं धीन इति मूर्धा श्वन इत्यादौ निपात
१२० नाद्रूपसिद्धिः पृथिवीजायः स्विङ्गारादिभ्यश्चेति ङीप् वृत्तत्ययोनोदात्तः अजनयंत तत्तनी त्यत कुमार ज्ञो मंता श्वेतिमित्वान्मितां ह्रस्वमिति ह्रस्वत्वं ॥
तृतीयामृचमाह ॥ ॥ आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेग्ना वसूनि ॥ या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा ॥ अग्नौ वैश्वानरे म्नौ
वसूनि धानान्याद्धिरे आहितानि स्थापितानि बभूवुः तत्र दृष्टांतः ध्रुवासो निश्चलाः रश्मयः किरणाः सूर्ये न यथा सूर्ये आधीयंते तद्वत् अतस्त्वं पर्वता
दिषु यानि धनानि विद्यंते तस्य धनजातस्य राजासि अधिपतिर्भवसि अग्नावास्थापां सलुगिति विभक्तेर्लुक् दृताः धाराशब्दादस्मिन्सुत्कमिति ङीपो लोपः आ
धीषु उपदाहे उषः पाकः भावेग्निलादा युद्धन्तं उप आम धीयन इत्याप धमः कर्मण्यधिकरणे च नाकृत्प्रत्ययः दासीभारादिषु पठितत्वात्पूर्व
पदप्रकृतिस्वरत्वं समसीव दुद्भवचनं आप धेश्वविभक्तौ प्रथमायामिति दीर्घः अस्मदुदित्त्वमिति विभक्तेरुदात्तत्वं ॥ ॥ चतुर्थीमृचमाह ॥ ॥ बृह
ती इव सूनवे रोदसी द्यावापृथिव्यौ सूनवे पुत्राय वैश्वानराय वृहती इव प्रभूते अभूतां वैश्वानरस्य द्यावापृथिव्योः पुत्रत्वं मातापितरौ स्यातामभवगम्य
ते ऽभापित रामस्वयंनजायताग्निर्द्यावापृथिवी भूरितरमीति महतां वैश्वानरस्याव स्थानाय द्यावापृथिव्यावितिस्मृतत्वात्तेनार्थे नक्तं चायं होता दक्षः
समर्थो पूर्वद्रव ह्रविधाः यद्वा सर्ह र्नागिरस्कृतिं वैश्वानराय अन्य प्रयुक्तिं अघः कौ दृशाय सर्वत शोभनगमनयुक्ताय सत्यशुष्माय अवितथ
बलाय मलमायातिशयेन सर्वयान वहंतः मनुष्यान यथा मनुष्याय यथा लौकिका वंदी दातारं प्रभुं बहुविधा यास्तुत्या स्तौति तद्वन्मनुष्यः मन्त्रो
जीताव जनीजातीना स्य मानाय मनुष्य ज्ञ्यात यतुपगामश्चातिस्वरितत्वं यतोनाव इति आ धुदात्तत्वं न भवति तत्र धान्यित्यनुवर्तते मकृद्वन
अतेभो वविच्च ततामतुपमादुपधाया इति वत्वम् ॥ ॥ पंचमीमृचमाह ॥ ॥ दिवश्चित्ते बृहतो जातवेदो वैश्वानर प्ररिरिचे महित्वं ॥ राजा कृ
ष्टीनामसि मानुषीणां युधा देवेभ्यो वरिवश्चकर्थ ॥ ॥ हे जातवेदः जातानां वेदितः वैश्वानर अग्ने तव महित्वं माहात्म्यं बृहतो महतः दिवश्चि
त् द्युलोकादपि प्ररिरिचे प्रवृद्धं । किंच त्वं मानुषीणां मनोर्जातानां कृष्टीनां प्रजानां राजासि अधिपतिर्भवसि तथा वरिवः असुरैरपहृतं धनं युद्धे
न देवेभ्यश्चकर्थ देवाधीनमकार्षीः वैश्वानर यादादिता दार्षमिकनिवाताभावः रिरिचे रिचिर् विरेचने अत्रोपसर्गवशादुपरीत आधिक्ये वर्त
ते कृष्टीनां नामन्यतरस्यामिति नाम उदात्तत्वं । मानुषीणां मनुष्यशब्दो मनोर्जातावित्यञ्प्रत्ययांतः जातिलक्षणे ङीप् प्राप्ते तदपवादो युधा युध संप्रहारे इ
त्यस्मात्संपदादिलक्षणो भावे क्विप् वरिव इति धननाम तद्विषये स्यत्या धुदात्तत्वं ॥ ॥ षष्ठीमृचमाह ॥ ॥ प्र नू महित्वं वृषभस्य वोचं यं पूरवो
वृत्रहणं सचंते ॥ वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शंबरं भेत् ॥ अत्र वैश्वानरशब्देन मध्यमस्थानस्थो वैद्युतोग्निरभिधीयते इ
ति मनुष्यनाम पूरवो मनुष्याः वृत्रहणं आवरकस्य मेघस्य हंतारं यं वैश्वानरं सचंते सेवंते तस्य वृषभस्य अपां वर्षितुर्वैश्वानर
स्य महित्वं माहात्म्यं नु क्षिप्रं प्रवोचं प्रब्रवीमि किं तदित्यत आह अयं वैश्वानरोग्निर्दस्युं कर्मणां उपक्षयितारं राक्षसादिकं जघन्वान् १२०
तथा काष्ठा अपो वृष्ट्युदकानि अधूनोत् अधोमुखान्यपातयत् शंबरं तन्निरोधकारिणं मेघं अवभेत् अवाभिनत् । वोचं छंदसि लुङ्लङ्लि
ट इति वर्तमाने लुङ् अस्यतिवक्तिख्यातिभ्योङ् इति च्लेरङादेशः वच उम् इत्युमागमः गुणः छंदस्यमाङ्योगेपीत्यडभावः जघन्वान् हंतेः लिटः क्व

सुः अभ्यासाच्चेत्यभ्यासस्य हकारस्य घत्वं विभाषा गमहनेति विकल्पनादिडभावः भेत् भेदिर् विदारणे लङि बहुलं छंदसीति विकरणस्य
लुक् हल्ङ्याब्भ्य इति तकारस्य लोपः ॥ पूर्ववदडभावः अत्र निरुक्तं प्रब्रवीमि । तन्महत्त्वं महाभाग्यं वृषभस्य वर्षितुरपां यं पूरवः पूरयितव्या 253/1924
मनुष्या वृत्रहणं मेघहनं सचंते सेवंते वर्षकामा दस्युर्दस्यतेः क्षयार्थादुपदस्यंत्यस्मिन्रसा उपदासयति कर्माणि तमग्निर्वैश्वानरो
घ्नन्नवाधूनोदपः काष्ठा अभिनच्छंबरं मेघमिति अत्र दर्शितं तनीयं कालो वैश्वानरस्य इति तत्र केचिदाहुः मध्यमस्थानस्थो वायुरिंद्रो वा वै
श्वानरः इति पूर्वे चाहुः प्रातःसवनादीनि त्रीणि सवनानि लोकत्रयात्मकानि तत्र तृतीयसवनं प्राप्य जमानः स्वर्गं प्राप्य पतति पृथिव्याः
प्रच्युतो भवेत्तत्प्रच्युतिपरिहाराय अग्निमारुतं शस्त्रं होता स्वर्गाद्भूमिं प्रत्यवरोहेति तथाम्नातं तदुच्यते इति शाखायनस्तात्रियत्वेनप्रा
रंभमुक्त्वा कस्यान संबंधिना वैश्वानरीयेण सूक्तेन शस्त्रं प्रारंभते । ततो मध्यमस्थानसंबंधिनं रुद्रं मरुतश्च पातित दूवत्यसूक्तपावनावरो
हति तत्र पृथिवीस्थानमग्निं वैश्वानरः सूर्योनस्यात तदानीमवरोहानोपपद्यते । तदेतद्यमप्यनुपपन्नं अयमग्निर्वा वैश्वानरः पुत्रः पिते
लोकः उद्धृत्तानवेदोवहमस्कृता इति यहविश्वसंवनराज्ञानमग्नियतादीप्रीणयंतीति तत्संबंधाद्वैश्वानरः यद्वा सर्वान्प्राणिनः प्रति कृतो
गच्छत इति वैश्वानरो मध्यमो न मोन्ज गतावित्यस्मात्पचाद्यच्लुगभावः छांदसः ताभ्यामुत्पन्नत्वादयमग्निर्वैश्वानरः ये पुनोग्निर्द्दं मध्य
मस्तकाशाज्जायते अशनिपतनानंतरं अयमेव पार्थिवोग्निः संपाद्यते । आदित्यसकाशादपि धर्मकाले सूर्यकांतादिमणिषु अग्नेरुत्पत्तिः
प्रसिद्धा तस्मान्नामनिर्वचनेनानुरोधेन अयमेवाग्निर्वैश्वानर इति एतदुपपन्नं अस्यापि वर्षकर्मणा स्तुतिः संभवति अग्नौ प्रस्तुतिः सम्य
गादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मरणात् प्रत्यवरोहोपि न कर्तव्यः तृतीयसवनस्य भक्तस्वर्गत्वात् एतः
त्सर्वं यास्केन वैश्वानरः कस्मादित्यादिना बहुधा प्रपंचितं अत्र यदनुक्तं तत्सर्वं तत्रैवानुसंधेयं ॥ ॥ सप्तमीमृचमाह ॥ ॥ वैश्वानरो
महिम्ना विश्वकृष्टिर्भरद्वाजेषु यजतो विभावा ॥ शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान् ॥ ॥ वैश्वानरो योग्निर्महि
म्ना महत्त्वेन विश्वकृष्टिरिति मनुष्यनाम विश्वे सर्वे मनुष्याः यस्य स्वभूताः स तथोक्तः भरद्वाजेषु पुपुक्षिस्कृ रहविर्लक्षणान्नवत्सु यागो
पुषद्वाजसंज्ञेषु ऋषिषु यजतो यष्टव्यः विभावा विशेषेण प्रकाशयिता सूनृतवान् सूनृता प्रियसत्या वाक् तद्युक्तः एवंभूतोग्निः शा
तवनेये शतसंख्याकान् क्रतून् वनति संभजत इति शातवनिः तस्य पुत्रः शातवनेयः तस्मिन्पुरुणीथे बहूनां नेतरि एतत्संज्ञके राजनि
च शतिनीभिर्बह्वीभिः स्तुतिभिः जरते स्तूयते क्षरद्वाजेषु भरंति पोषयंति भोक्तृनिति भरंतः तादृशा वाजा येषु बहुव्रीहौ पूर्वपद
प्रकृतिस्वरत्वे प्राप्ते मरद्बृधद्बितात्पूर्वपदं तोदात्तत्वं यजतः भृमृदृशियजिपर्वपच्यमितमिनमिहर्येभ्योतजिति यजतेरतच्प्रत्य
यः विभावा भादीप्तौ आतो मनिन्क्वनिब्वनिपश्चेति वनिप् तस्यापि त्वादनुदात्तत्वे धातुस्वरः शिष्यते शातवनेये इन सार्वधातुभ्य इति इन्प्रत्ययः
शातनिशब्दः इति श्वानि अत इतीदकं तिन इत्यंतो दात्तत्वं शतिनीभिः शतशब्दान्मत्वर्थीय इति इन्नेभ्य इति ङीप पुरुणीथे पूर्वपदत्सं
ज्ञायामग इति णत्वं रज्जते व्यत्ययेन कर्मणि कर्तृप्रत्ययः ॥ ॥ इति प्रथमस्य चतुर्थे पंचविंशो वर्गः ॥ ॥ वह्निमिति पंचर्चं तृतीयं स
क्तं नोधस आर्षं त्रैष्टुभमाग्नेयं अनुक्रांतं च वह्निं पंच्चेति ॥ ॥ तत्र प्रथमामृचमाह ॥ वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्यो अर्थं ॥

द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा॥ ॥वह्निं हविषां वोढारं यशसं यशस्विनं विदथस्य यज्ञस्य केतुं प्रज्ञापकं सुप्राव्यं सुष्ठु प्र-
भा॰ अ॰ कर्षेण रक्षितारं दूतं देवैर्हविर्वहनलक्षणे दूत्ये नियुक्तं सद्यो अर्थं हविर्विषु रक्षितं सद्यस्तदानीमेव हविर्भिः सह देवान् गंतारं यद्वा सद्यो अर्थं अर-
णं गमनं यस्य तं द्विजन्मानं द्यावाधाराद्वा रयिमिव धनमिव प्रशस्तं प्रख्यातं एवंभूतमग्निं मातरिश्वा वायुः भृगवे एतन्नामकाय महर्षये रातिं
१२८ भरन्मित्रमिव महरत् अकरोदित्यर्थः रातिनामसंभाव्यन्यत्र रातिर्मित्रमिति कपर्दिनोक्तं रातिः पुत्र इत्येके एतदर्थानि पादे कं मंथानं रंब भवति
रातिं भृगुणा मुक्तिलं कविं कं तुमिति वह्निं वहतेश्चिप्रत्ययः मातरिश्वा विदिति वहतेर्निप्रत्ययः निदृ धावा धाप्रत्ययः उदात्तत्वं। यशःसंयशःशब्दादुत्तर-
स्य विनो लुक् व्यत्ययेनांतोदात्तत्वं यद्वा अर्श आदिभ्यो अच्प्रत्ययः पूर्ववत् सप्राप्त्यंस पूर्वकर्षेण अवतिरस्तीति सप्रावीः उपसर्गद्वयोपसर्गात्
वतेः अवि हतं तं तथ्य इति ईकारप्रत्ययः वाच्छंद सीत्यभिपूर्वं डस्य विकल्पात्सति यज्ञादेशः उदात्तस्वरितयोर्यणइति स्वरितत्वं सद्यो अर्थं उपि
कृपि गातिभ्यः कविति वर्तेरिथन प्रत्ययः सद्यसार्थो गंता सद्यो अर्थः अव्ययपूर्वपदप्रकृतिस्वरत्वं यदि तु अयनत्र प्रतिपादननामितितत्व
मित्यव्ययग्रहणं नत्रिनयं तं होने तर्हि वहुव्री हौ स्वरो भविष्यति मातरिश्वा सर्वनिर्माणहेतुत्वान्माता नारिक्षं श्वसितिरेव गतिकर्मा मातरि अं
तरिक्षे श्वसिति गच्छतीति मातरिश्वा श्वन्नुक्षन्निल्यादौ निपातनात्रूपसिद्धिः मातर्येतरिक्षे आशु असति गच्छतीति मातरिश्वा असतेर्डी॥
प्रत्यय्यात्मादौणादिको डुप्रत्ययः पत्त्वयाश्विनोक्तं॥ ॥द्वितीयामृचमाह॥ ॥अस्य शासुरुभयासः सचंते हविष्मंत उशिजो ये च मर्ताः॥ दिवश्चि-
त्पूर्वो न्यसादि होता पृच्छ्यो विश्पतिर्विक्षु वेधाः॥ ॥शासुः शासितुरस्याग्नेः उभयासः उभयेपि देवाः मनुष्याश्च यद्वा स्तोतारो यज्व-
यजमानाश्च इममग्निं शासितारं सर्वं ते देवा उशिजः कामयमानाः हविष्मंतः हविषा युक्ताः ये च मर्ताः मरणधर्माणो यजमानाः यद्वा उशिज
इति मेधाविनाम उशिजो मेधाविनः स्तोतारः हविष्मंतो हविर्युक्ताः यजमानाः किंचायं होता होमनिष्पादकोग्निः दिवश्चित् आदित्यादपि
पूर्वः प्रथमः वर्तमानो भूत्वा अग्निहोत्रहोमार्थं विक्षु यजमानेषु न्यसादि अध्वर्युणा अन्याय नतेन्य धाविशाप्यतेर्हा दृशो होता आपृच्छः
आपृच्छ्यः पूज्य इत्यर्थः विश्पतिः विशां प्रजानां पालयिता वेधाः विधाता अभिमतफलस्य कर्ता शासुः शंसेशासुनुशिष्टी लवोंसो उसि
शासादिभ्यः संज्ञायां वा निदावित्तिवत् उतन माभावः पक्षक वचनेन कारलोपश्चां दसः भिलाषाद्यो पुदात्तपंडउशिजः वशः किदितिवशेरिजि प्रत्ययः
ग्रहिज्यादिना संप्रसारणं मर्ताः मृङ् प्राणत्यागे असिहसिमृग्रीण्वामीत्यादिना तन्प्रत्ययः निवादाद्यादात्तत्वं आपृच्छः पृच्छ ज्ञीप्सायां आङ्पूर्वोदस्मात्
इमनि पत्येनत्यादौ क्यप्रत्ययान्निपातितः ग्रहिज्यादिना संप्रसारणं क्यपः पित्वादनुदात्तत्वे धातुस्वरः शिष्यते विश्पतिः पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्व-
रत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदांतोदात्तत्वं॥ ॥तृतीयामृचमाह॥ ॥तं नव्यसी हृद आ जायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः॥ यमृत्वि-
जो वृजने मानुषासः प्रयस्वंत आयवो जीजनंत॥ नव्यसी नवतरा सुकीर्तिः शोभना कीर्तिः स्तुतिः अस्मत् अस्माकं स्तुतिः हृदः हृदयादुत्थिता प्राणात्मका जायमान-
मुत्पद्यमानं आग्निर्हिवायोः सपत्नेवायुश्च प्राण एव प्राणः सवायुरिति श्रुत्यां प्रोक्तात्तत् धुजिह्वं मादयितव्यां लोके एवंभूतं तमग्निमश्याः आभिमुख्ये- १२८
न प्राप्नोतु यं ऋत्विजः वृजने संग्रामे प्रभवसति आयवो मनुष्याः यमाग्निं जीजनंत यज्ञार्थमुत्पादयन्कीदृशा मनुष्याः ऋत्विजः अतो काले यष्टारः मानुषासः
मत्याद्विनाहृदयं गम्यहृदादेशः जायमानं जनी प्रादुर्भावे श्यनिर्ता करणं सस्य जनाजेति ता देशाः अदुपदेशाल्लसार्वधातुकानुदात्तत्वे श्यनो नित्वा-

दाद्युदात्तत्वं अस्मत् सुपां सुलुगिति विभक्तेर्लुक् अश्याः अश्नोतेर्लिङि बहुलं छंदसीति विकरणस्य लुक् व्यत्ययेन परस्मैपदं मध्यम पुरुषश्च स्वरे प्राप्ते 255
व्यत्ययेनाद्युदात्तत्वं॥ ॥चतुर्थीमृचमाह॥ ॥उशिक् पावको वसुर्मानुषेषु वरेण्यो होतांधायि विक्षु॥ दमूना गृहपतिर्दम आ अग्निर्भुवद्र- 1924
यिपती रयीणां॥ ॥उशिक् कामयमानः पावकः शोधकः वसुः निवासयिता वरेण्यो वरणशील एवंभूतो होताग्निः विक्षु यजमानेषु प्रविष्टेषु मानुषेषु
यजमानेषु अधायि प्राप्यते सर्वाग्निर्दमूनाः रक्षसां दमनकरण मनसा मुक्तो गृहपतिः गृहाणां पालयिता यजमानेषु दमे यज्ञगृहे रयिपतिः धनाधि-
पतिः अभुवत् आसमंतात् भवति न केवलमेकस्य अपितु सर्वेषामित्याह रयीणामिति यद्वा रयीणामध्येद्वयसंयुक्तं तस्य पतिरित्यर्थः॥ अ-
धायि धेट् इसि तुडुङलुङ लिङ इति वर्तमाने कर्मणि लुङि चिण् आदेशः आतो युक् चिण्कृतोरिति युगागमः दमपतिरस्यसाङ्किमिति दमूनाः
दम उपशाम दमेनूनसिपिति आ णादिकः ऊनसि प्रत्ययः यास्कस्तु दमूना मनो दानमनावापि वा दमउति गृहनाम तन्मनास्यादिति। दमआ
अग्निः आङो नुनासिकश्छंदसीति आकारस्यसानुनासिकत्वं प्रकृतिभावश्च भुवत् लेः स्यड् आगमः इतश्चेनीकारलोपः रयिपतिः छंदसि वहुलमि-
ति उत्तरपदाद्युदात्तत्वं रयीणां नामन्यतरस्यामिति नाम उदात्तत्वं॥ ॥पंचमीमृचमाह॥ ॥तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमा-
सः॥ आशुं न वाजंभरं मर्जयंतः प्रातर्मक्षू धियावसुर्जगम्यात्॥ गोतमासो गोतमगोत्राः स्पत्न्यावयं नोधसः स्तोतुरकत्वेप्यात्मनि पूजार्थं बहुव-
चनं हे अग्ने रयीणां धनानां पतिं रक्षितारं तादृशं त्वां मतिभिर्मननीयैः स्तोत्रैः प्रशंसामः प्रकर्षेण स्तुमः किं कुर्वंतः वाजंभरं वाजस्य हविर्लक्ष-
णान्नस्य भर्तारं त्वां मर्जयंतो मार्जयंतः तत्र दृष्टांतः आशुं न अश्वमिव यथा अश्वमारोहंतः पुरुषाः तस्य वाहनप्रदेशं हस्तेन मृजंति तद्वत्
वमप्यग्ने हविर्वहने प्रवेशं निमृजतु इत्यर्थः॥ तथा चाग्निसंमार्जनप्रकरणे वाजसनेयिभिराम्नातं अथ मध्ये तृष्णीमग्निः संमार्ष्टि यथा
मुक्तः प्राहिवहेति ब्रजंदेवमेत दग्निं युक्तोपक्षिपति प्रहिदे वेभ्यो हव्यं वहेति॥ धियावसुः कर्मणा बुध्या वा प्राप्तधनः सोग्निः प्रातःकालम
क्षू शीघ्रं जगम्यात् आगच्छतु मतिभिः संमार्ष्टि यथा मुक्तां मनस्थान इत्यस्माकर्मणि क्तिन् मंत्रे वृषेत्यादिना तस्योदात्तत्वं वाजंभरं अग्ने रेषा वेदि
की संज्ञा पूर्वं कल्पविधिरनित्यत्वात् मृजेर्वृद्धिरिति वृद्ध्याभावः अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिच स्वरः शिष्यते। जगम्यात् लिङि व-
हुलं छंदसीति शपः श्लुः॥ ॥इति प्रथमस्य चतुर्थे षड्विंशो वर्गः॥ ॥अस्मा इदु प्र तवसे इति षोडशर्चं चतुर्थं सूक्तं नोधस आर्षं ऐंद्रं त्रिष्टु-
भं अनुक्रांतं च अस्मा इदु प्र तवसे षोनइति तावैंद्रीन सक्तिश्चा स्लणं च भविततएते प्रातःसवनेषु हस्तोत्रियान् ग्रावस्तु माध्यंदिने
हीनसत्कानि शंसंतीति॥ ॥तत्र प्रथमामृचमाह॥ ॥अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय॥ ऋचीषमायाध्रिगव ओहमिंद्राय ब्रह्मा-
णि राततमा॥ इदु इति निपातद्वयं पदपूरणे अथापि पदपूरणाः कमीमिद्विति यास्कः यद्वा अव धारणार्थः तवसे प्रवृद्धाय तुराय त्वरमाणाय
यद्वा तुर्वि हिंसायां शत्रूणां हिंसित्रे माहिनाय गुणैर्महते ऋचीषमाय ऋचा सम या दृश्या स्तुतिः क्रियते तत्समायेत्यर्थः अध्रिगवे अधृतगमनाय
अप्रतिगमनायेत्यर्थः तथा च यास्कः अधृतगमनकर्मवानि द्राप्यधिगुरुच्यते इति एवंभूतायास्मा इंद्राय स्तोमं स्तोत्रं प्रहर्मि प्रहरामि
करोमीत्यर्थः॥ तत्र दृष्टांतः प्रयो न प्रय इत्यन्नमौ नाम यथा बुभुक्षिताय पुरुषाय कश्चिद्दत्तं प्रहरति तादृशं स्तोमं ओहं वहनीयं प्राप-
णीयं वा भंत्या तादृशमित्यर्थः॥ न केवलं स्तोमं किंतर्हि ब्रह्माणि हविर्लक्षणान्यन्नानि कीदृशानि राततमा। पूर्वैर्यजमानै रतिशये

भा॰ऋ॰ नदतानि उ इंकत्या इति पाचपरिवत्तमेति विभावः तुरा यतु स्वरणे उ गुपधलक्षणः कः। यद्वा तुर्वि हिंसार्थः तुर्वतीति तुरः स्वरः पचाद्यचि कां
दलोपः हर्मि हृञ् हरणे बहुलं छंदसीति शपो लुक्। माहिनाय महते पूज्याय वा महिल्यस्मात् महेरिनण्यन उनण् प्रत्ययः उपधायाः ह्रस्वत्वं क्
३२॰ चीषमाय ऋचीषमः ऋचा सम इति यास्कः तृतीया तत्कृतेति समासः तृतीयापूर्वपदप्रकृतिस्वरत्वं पृषोदरादित्वादीकारोपजनः कृपो माहि
त्वात्यत्वं अस्मिन् पक्षे तृतीयापूर्वपदप्रकृतिस्वरत्वं मतिङ्पदुदात्तेन भवितव्यं तथा च न दृश्यते तस्मात् स्वरश्चिंतनीयः यद्वा हिंसोदासा
दिउपग्यः अध्रिगवे अधृतोऽन्यैर्ननिवारिता गौर्गमनं यस्य तथोक्तः गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं। पृषोदरादित्वात् धृतशब्दस्य
स्याध्रिभावः ओहं वहतेः कर्मणि घञ् छांदसं। प्रसारणं यद्वा तुह्निर् तुहिर् अर्दने इत्यस्मात् दोहतेः पूर्ववत् घञ् अत्रागतमागदन उत्यस्मा
न्निष्ठांतादातिशायनिके तमप् गोः छंदसीति ङेर्लोपः॥ ॥द्वितीयामृचमाह॥ ॥अस्मा इदु प्रय इव प्रयांसि भराम्यांगूषमास्येन मं
हिष्ठ बाधे सुवृक्तिं॥ इंद्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयंत॥ अस्मा इदु अस्मा एवेंद्राय प्रय इव प्रयस्त्वन्नं नाम प्रय इव अन्नमिव प्र
यंसि प्रयच्छामि तदेव स्पष्टीक्रियते बाधे शत्रूणां बाधनाय समर्थं सुवृक्तिं सुष्ठु आवर्जकं आंगूषं स्तोत्ररूपं मघोषं भरामि संपादयामि
अन्येऽप्यपि स्तोतारः प्रत्नाय पुराणाय पत्ये स्वामिने इंद्राय हृदा हृदयेन मनसा तदंतर्वर्तिनांतःकरणेन मनीषया तज्जन्येन ज्ञानेन
च धियः स्तुतीः कर्माणि वा मार्जयंति संस्कुर्वंति प्रयांसि यमेर्नुपमि उत्यस्मात् लटि पुरुषव्यत्ययः बहुलं छंदसीति शपो लुक् आंगूषं आंगू
षः स्तोम आघोष इति यास्कः आङ्पूर्वात् घुषेः घञि पृषोदरादित्वात् उत्वं आदेशः आङो ङकारस्य लोपाभावश्च थाथादिनोत्त
रपदांतोदात्तत्वं बाधे बाधृ लोडने इत्यस्मात् तुमर्थे च भावे कनिति भावे केन प्रत्ययः एकत्वादव्ययत्वेन सुपो लुक् मनीषा सुपां सुलु
गिति तृतीयाया डादेशः पत्ये पतिः समास एव घिसंज्ञायाः समासेष्वविषयत्वात् घेर्ङितीति गुणाभावे यणादेशः॥ ॥तृतीयामृचमा
ह॥ ॥अस्मा इदु त्यमुपमं स्वर्षां भराम्यांगूषमास्येन॥ मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै॥ ॥अस्मा इदु अस्मा ए
वेंद्राय त्यं तं प्रसिद्धं उपमं उपमानहेतुभूतं स्वर्षां सुष्ठु अरणीयस्य दातारं मंहिष्ठं विपश्चितमिंद्रं वर्धयितुं वर्धयितुं सुवृक्तिभिः सुष्ठु आ
वर्जकैः समर्थैरित्यर्थः मतीनां मंतॄणां संबंधिभिः अच्छोक्तिभिः आभिमुख्येन वचोभिः मतिष्मतिशायेन प्रवृद्धं एवं लक्षणमांगूषं आघोषं आ
स्येन मुखेन भरामि करोमीत्यर्थः उपमं उपमीयतेऽनेनेत्युपमः घञर्थे कविधानमिति करणे कप्रत्ययः अतो लोप इति वेत्याकारलोपः
स्वर्षां सुपूर्वात् ऋतेर्विजंतः स्वर्शब्दः षण दाने जनसनखनां सञ्झलोरिति विड्वनोरनुनासिकस्यात् इत्यात्वं सनोतेरन इति षत्वं भरामि
पादादित्वान्निघाताभावः अच्छोक्तिभिः अच्छ उक्तयो यासां ता बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं मतीनां नामन्यतरस्यामिति नाम उदा
त्तत्वं वर्धध्यै वृधु वृद्धावित्यस्मादंतर्भावितण्यर्थात् तुमर्थे सेसेनेति कध्यै प्रत्ययः कित्वाद्गुणाभावः द्विर्भावश्छांदसः यद्वा यङ
लुगंतादस्मिन् प्रत्यये अगमानुशासनस्यानित्यत्वात् गत्वाभावः अन्येषामपि दृश्यत इति संहितायां अभ्यासस्य दीर्घत्वं ३२९
प्रत्ययाद्युदात्तत्वं॥ ॥चतुर्थीमृचमाह॥ ॥अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय॥ गिरश्च गिर्वाहसे सुवृक्तींद्रा
य विश्वमिन्वं मेधिराय॥ ॥अस्मा एवेंद्राय स्तोमं स्तोत्रं सं हिनोमि प्रेरयामि तत्र दृष्टांतः वाजिना यसिनमा ॥ नं भवति

मिनाति भूतानीति यास्कः तेन रथं न मिन मन्त्रं यस्य स तथोक्तः तस्मै रथस्वामिने तष्टेव तष्टा तक्षकः रथस्य निर्माता रथं न यथा रथं प्रेरयति तद्व
त् इदन्यत्स्तपूरणं तथा गिरश्च गीर्भिः स्तुतिरूपाभिर्वाग्भिः वहनीयाय गिरश्च स्तुतिलक्षणा वाचः सुवृक्ति शोभनमार्जनं यथा भवति तथा
प्रेरयामि तथा मेधिराय मेधाविने इंद्राय विश्वमिन्वं विश्वव्यापकं विश्वव्याप्तं वा हविश्च संहिनोमीति गतार्थं ॥ 257/1924
लक्षणं तनूकरणे ताद्वौ तिकत्स्न उदितात् पक्षे इड्भावः स्कोः संयोगाद्योरिति ककारलोपः नित्वादाद्युदात्तत्वं॥ तत्सिनाय सिनशब्दः पिञ् बं
धने अस्मादिति इणषिञ्जीदीङुष्यविभ्यो नगिति नक्प्रत्ययांतः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं चेति वचनात् कारकपूर्वस्यापि भवति पूर्वप
दप्रकृतिस्वरत्वं वाणि इति अनुवर्तते यथा ऋधिः इति चतिदीर्घाभावः छांदसः विश्वमिन्वं इति व्याप्तौ विश्वमिन्वतीति विश्वमिन्वं पचा
द्यच् लुगभावश्छांदसः यद्वा बहुलं प्रत्ययांत हवचनात् तस्मादपि धातोर्दृश्यः मेधिराय मेधा अस्यास्तीति मेधिरः मेधारथ्याभ्यामिरन्नसो
पकत्यादिनि मत्वर्थीय इरन् नित्वादाद्युदात्तत्वं॥ ॥पंचमीमृचमाह॥ ॥अस्मा इदु सप्तिमिव श्रवस्येंद्रायार्कं जुह्वा समंजे॥ वीरं दानौकसं
वंदध्यै पुरां गूर्तश्रवसं दर्माणं॥ ॥अस्मा एवेंद्राय अर्कं स्तुतिरूपं मंत्रं श्रवस्या श्रवस्यया अन्नेच्छया जुह्वा जुहूसाधनेन वागिंद्रियेण समंजे
समक्तं करोमि दीपयामीत्यर्थः तत्र दृष्टांतः सप्तिमिव यथाऽन्नमाभाय गंतुकामः पुमान् अश्वं रथेन कीलयति तद्वत् एवं कृत्वा वीरं शत्रुहिंसे
तुं शक्तं तं तत्र कामिह दानौकसं दानानामाके तन्निकेतनं यस्य संपन्नस्यासौ पुरां असुरपुराणां दर्माणं विदारयितारं एवं गुणविशिष्टमिंद्रं वंदध्यै वंदि
तुं अस्मा ... धातोर्भवति प्रत्ययस्य पित्वादनुदात्तस्वरः इव न समासः श्रवस्या श्रवस्य श्रवस्यच्छन्द आत्मनः क्यच् क्यजंताद्धातोर्भावे अ
प्रत्ययादित्वाकारप्रत्ययः ततष्टाप् सुपां सुलुगिति तृतीयाया डादेशः उदात्तनिवृत्तिस्वरेणास्योदात्तत्वं। अर्कं ऋच स्तुतौ ऋच्यते स्तूयतेऽनेनेत्यर्कोमंत्रः
पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः चजोः कुघिण्ण्यतोरिति कुत्वं लघूपधगुणः प्रत्ययस्वरः जुह्वा ह्वेञ् स्पर्धायां शब्दे च हु लं छंदसीति सं प्रसारणं यद्वा हु
धातोराक्किप्रधानादिर्वृत्तौ च स्वरेणांतोदात्तत्वं। तृतीयैकवचने स्वरितयोर्यण इति स्वरितत्वं उदात्त यणो हल्पूर्वादिति अस्य विभक्त्युदात्तत्वस्यनोङ्
धात्वोरिति प्रतिषेधः अंजे अञ्जू व्यक्तिम्रक्षणकांतिगतिषु व्यत्ययेनात्मनेपदं वंदध्यै वदि अभिवादनस्तुत्योः तुमर्थे सेसेनेति कध्यै प्रत्ययः ग
र्तश्रवसं गूर्ते उद्यते श्रवसी यस्य प्रतिषेधः अंजे अञ्जू कः वितीतीङ प्रतिषेधः बहुलं छंदसीत्युत्वं। हलि चेति दीर्घः नसत्तनिषत्तेत्यादौ निपातना
त्ययेन प्रत्ययाद्युदात्तत्वं यद्वा॥ ओणादिको मनिन् प्रत्ययाद्युदात्तत्वं॥ ॥इति प्रथमस्य चतुर्थे सप्तविंशो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥अस्मा इदु
त्वष्टा तक्षद्वज्रं स्वपस्तमं स्वर्यं रणाय॥ वृत्रस्य चिद्विदद्येन मर्म तुजन्नीशानस्तुजता कियेधाः॥ ॥त्वष्टा विश्वकर्मा अस्मा इदु अस्मा एवेंद्रा
य वज्रं तक्षत् कृतवान् युद्धार्थं तक्षन् तक्षणमकरोत् कीदृशं वज्रं स्वपस्तमं अतिशयेन शोभनकर्माणां स्वर्यं सुष्ठु प्रेरयितुं यद्वा स्तुत्यं तु
यन वज्रेण विहित प्रहारार्थं इत्यर्थः स्वपस्तमः शोभनं अपः कर्म यस्यासौ अतिशयेन स्वपस्तमः तमपः पित्वादनुदात्तत्वं सार्वमनस्वी आलो

मोपसर्गा इत्य पदा पुदात्तत्वं स्वर्यस्वर्यं ततस्तस्य अर्जनं विरतविहुलाभत्वं दित्वात् यतदं ऽगः। बहुलं छंदस्यमाङ्योगेपीत्यड्भावः। यद्वृत्तयोगादनिघातः।
भा०४० तुतुजान तुतुजिर्हिंसार्थः अपिप्रायस्य लिटः कानच्। अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः। ईशानः ईश ऐश्वर्ये। अनादित्वाच्छ पोलुक्॥
अनुदात्तत्वात्सार्वधातुकानुदात्तत्वे धातुस्वरः। तुजं तायतुं रनुम इति विभक्तः रदात्तत्वं क्विप् धाः क्विपद्वा इतिवाक्यसमाणाधाइतिवति अन्यायमभि
१३५ प्रायः क्वियतत्वं परिमाणमित्यस्य बल्यतादृशं बकं दृधाति धारयतीति कममाणधाः उभयत्रापि पदादित्वात् पूर्वपदस्य क्वियभावः धा
तोर्वि च॥ ॥सप्तमीमृचमाह॥ ॥अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवांचार्वन्ना॥ मुषायद्विष्णुः पचतं सहीयान्विध्यद्वराहं तिरो अद्रिमस्ता॥
इदु इत्येतन्निपातद्वयं पदपूरणं यद्वा अवधारणार्थं मातुः निर्मातुः प्रकर्षेण मातुः कृत्स्नस्य जगतो निर्मातुः प्रहर्तास्य प्रजापतेः अस्य सवनेषु प्रातःसव
नादिषु सवनेषु पपिवान् पीतवान् अस्मै यस्मात् तदानीमेव पानं तस्मात् इत्यर्थः तथा चार्वा चारुणि शोभनानि धानाकरं
भादिहविर्लक्षणान्यन्नानि भक्षितवानिति शेषः किंच विष्णुः सर्वस्य जगतो व्यापकः पचतं परिपक्वं असुराणां धनं यद्दर्शितमनुपाय्य दपाहरत्
सहीयान् अतिशयितबलः शत्रूणामभिभविता अद्रिमस्ता अद्रेर्वज्रस्य क्षेपकः एवंभूतः इंद्रः तिरः सत इति प्राप्तस्यतियास्कः तिरः प्राप्तः सन् वरा
हं मेघं विध्यत् अताडयत् यद्वा विष्णुः सत्यादिगुणात्मकायतः यज्ञाद्दर्भ्या निष्कास्य विभुरूपं तस्यामाता सविष्णुः पचतं परिपक्वं असुरध
नं यततन्मुषायत् अचूचुरत् तदनंतरं इंद्रः क्षायसप्तानां दुर्गरूपाणां समाना अन्यापरस्तादासीत्। अद्रिमस्तासहीयानिंद्रः दुर्गरूपाणां स
मानामन्या परस्तादासीत्। अद्रिमस्तासहीयानिंद्रः दुर्गाण्यतीत्य तिरः प्राप्तः सन् वराहं उदकं एतद्विवर्णयंत्रं विध्यन् तथातनीयकं वराहं
यंनाम मायाः समानां गिरीणां परस्ताद्वितं वषमसुराणां विभर्तितं तद्धि यद्दि दुर्गं दवासीति सदर्भ पुंजील मुहृत्यस समगिरानभितानम हृति
ति वा मह इः महतः अच्छस्या पश्चाद्दसः यद्वा महद्धत्यत्र पितु विच्छं पर्णं मह इत्यत्र पितु मन्यर्थः पपिवान् पियतेर्लिटः क्वसुः वस्वेका
दृशामितीडभावः अन्नस्य पचुयात् दुतरं भाविनीति याङ्क्ष्यतत्र पचतं भस्म दुहीत्यादिना पचतेरतच् प्रत्ययः चित्वादंतोदात्तत्वं
विध्यत् व्यधताडने ग्रहिज्यादिना तस्यन् तस्य ङित्वात् ग्रहिज्यादिना संप्रसारणं श्यनो नित्वाद्धातुस्वरः प्रत्ययस्वरं पादादित्वान्निघाताभावः वरा
हं वरमुदकं माह्यं ममाय वर आहारमाह्वतीति वराहः मन्यपामिना दुराहिता इह इत्यवातः । श्रावनिरतः । वराहमेघो भवतीतिवराहरो वरमा
हारमाहार्षीरिति च ब्राह्मणमिति यस्तु पश्चात् वरतः दशवराहः गतिश्च इति समासान्तः इत्येव प्रत्ययः चित्वादंतोदात्तत्वं। अस्ता। असु क्षेपः
ण इत्यस्मात् साधुकारिणि तृन् उदुभावश्चाद्दसः नलोकाव्ययनिष्ठाखलर्थतृनामिति षष्ठीप्रतिषेधः॥ ॥अष्टमीमृचमाह॥ ॥अस्मा इदु ग्नाश्चिद्देवपत्नी
रिंद्रायार्कमहिहत्य ऊवुः॥ परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि ष्टः॥ ॥अस्मा एवेंद्राय अहिहत्ये अहेर्वृत्रस्य हनने निमि
त्तभूते सति ग्नाश्चित् गमनस्वभावा अपि स्थिताः देवपत्नीः तद्देवानां पालयित्र्यो गायत्र्यादिदेवता अर्कमर्चनं साधनं स्तोत्रं ऊवुः अस
१३० न्यत चकुरित्यर्थः स चेंद्रः उर्वी विस्तीर्णे द्यावापृथिवी द्यावापृथिव्यौ परि जभ्रे अस्य तेन सा पर्याप्ताग अतिवक्रामन्यर्थः ऊवुः वेञ्‌ तंतुसं
ताने लिटि वचिस्वपियजादीनां किति इति संप्रसारणं कित्वमात्मनो यकारस्य लिटि वयाय उ इति प्रतिषेधात् वकारस्य संप्रसारणं परपूर्व
त्वं द्विर्वचनादि श्वायुवायति यकारस्य वकारः हरः॥ ॥ अभि हृञ् हरणे लिटि जित्वात् रभिप्रायआत्मनेपदं इरयदोर्भ इति भत्वं उर्वी

उरुशब्दाद्वोतो गुणवचनादिति ङीष्॥ वा छंदसीति पूर्वसवर्णदीर्घत्वं॥ ॥नवमीमृचमाह॥ ॥अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यंतरि
क्षात्॥ स्वराळिंद्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय॥ अस्येदेव इति पदपूरणः। अस्यैवेंद्रस्य महित्वं माहात्म्यं प्र रिरिचे अतिरिच्यते
अधिकं भवतीत्यर्थः अत्रोपसर्गधात्वर्थस्यानिपातवृत्तिमाचष्टे अथास्य प्रसारणं स्थानमिति कुतः सकाशात् प्ररिरिचे इत्यत आह दिवो द्युलोका 2 59
त्पृथिव्याः भूलोकात् अंतरिक्षात् द्यावापृथिव्योर्मध्ये वर्तमानात् अंतरिक्षलोकाच्च परि उपरीत्यर्थः त्रीनलोकानतीत्य उपरि प्ररिरिचे इत्यर्थः 1924
दमे दममिति अर्थाविषये स्वराट् स्वेन तेजसा राजमानः विश्वगूर्तः सर्वस्मिन् कार्ये उद्गूर्णः समर्थः यद्वा विश्वं सर्वमायुधं गूर्तं उद्यतं यस्य स तथो
क्तः स्वरिः शोभनशत्रुकः शोभनयाश्चो हंतव्यसतिहंवावीर्यं वत म इतिगम्यते यथा। अर्कवारिं दिव्यं ग्रास मिंद्रमिति अकुत्सितारमिति स्वार्थः अ
मत्रः सुखादिपुगमन कुशलः मात्रया रहितपारहितो अमत्रो महानुभवत्यभ्यमितो वेति यास्कः एवंभूत इंद्रो रणाय रणं युध्यं आ ववक्षे आववक्षे
दीमावित्यस्मात सत्वादूर्ध्वमिति क्विप् वरश्चादिषु तेज उद्गतं दमे दम उपशम इत्यस्मात् कर्मणि घञ् निनोदात्तोप इत्यस्य मांतस्य नामरितिवृद्धिप्रतिषेधः
घञोञित्वादाद्युदात्तत्वं विश्वगूर्तः गूरी उद्यमने गिरतेर्वा निष्ठायां अकः किलीतीट्प्रतिषेधः बहुलं छंदसीत्यस्यं दलिचेति दीर्घः यद्वा गुरी उद्यमने अस्मात्
निष्ठानसत्त्वनिषत्तेत्यादौ निपातनान्निट्रानत्वाभावः तस्य रूपयज्ञे समरुद्धादिवात्पूर्वपदांतोदात्तत्वं बहुव्रीहीपक्षे तु बहुव्रीहौ विश्वं संज्ञायामि
ति अन्यसंज्ञायामपि पूर्वपदांतोदात्तत्वं अमत्रः। अम गत्यादिषु अभिभियाज्ञिवधीत्यादिना औणादिकोऽत्रन्प्रत्ययः नित्वादाद्युदात्तत्वं ववक्षे
वहेर्लिटि सिवहुलं छंदसीति शपः श्लुः ढत्वषत्वकत्वानि लोपः स्त आत्मनेपदं दृष्टितित लोपः रणाय क्रियार्थग्रहणं कर्तव्यमिति कर्मणः संप्र
दानत्वात्‌ चतुर्थी यद्वा गत्यर्थकर्मणीति चतुर्थी॥ ॥दशमीमृचमाह॥ ॥अस्येदेव शवसा शुषंतं वि वृश्चद्वज्रेण वृत्रमिंद्रः॥ गा न व्राणा
अवनीरमुंचदभि श्रवो दावने सचेताः॥ ॥अस्यैवेंद्रस्य शवसा बलेन शुषंतं शोषयंतं वृत्रं इंद्रो वज्रेण वि वृश्चत् व्यच्छिनत् तथा गा न॥ चोरैरपह
ताः गाव इव व्राणाः वृत्रेणावृताः अवनीः रक्षणहेतुभूताः अपः अमुंचत् अवसृजत् तथा दावने हविर्दात्रे यजमानाय सचेताः तेन यजमा
नेन समानचित्तः सन् श्रवः कर्मफलभूतमन्नं अभि अभिमुख्येन ददातीति शेषः शुषंतं शुष शोषणे श्यान्नि प्राप्ते व्यत्ययेन शपः अदुप
देशात् लसार्वधातुकानुदात्तत्वे विकरणस्वर एव शिष्यते। व्राणाः वृञ् वरणे कर्मणि लटः शानच् बहुलं छंदसीति यकालुक् शानचोऽ
त्वादुणाभावः यणादेशः अवनीः अवतेः करणे अर्तिसृधृधम्यश्यवितॄभ्योऽनिरित्यादिना अनिप्रत्ययः प्रत्ययाद्युदात्तत्वं॥ दावने अतामनि
नितिवनिप् चतुर्थ्येकवचने अल्लोपश्छंदसः॥ ॥इति प्रथमस्य चतुर्थे अष्टाविंशो वर्गः॥ ॥तत्रैकादशीमृचमाह॥ ॥अस्येदु त्वेषसा
रंत सिंधवः परि यद्वज्रेण सीमयच्छत्॥ ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः॥ ॥अस्यैवेंद्रस्य त्वेषसा दीप्तेन बलेन
सिंधवः समुद्राः यद्वा गंगाद्याः स्यंदनशीलाः रंत स्वस्वस्थाने रमंते यस्मात् अयमिंद्रो वज्रेण सीम् एनान् सिंधून् वज्रेण पर्ययच्छत् परितो
नियमितवान् अपि च ईशानकृत् ऐश्वर्यस्य बंधन आत्मन ऐश्वर्यवंतं कुर्वन्निंद्रो हविर्दत्तवते यजमानाय कामं दशस्यन् प्रयच्छन् तुर्वणिः
तूर्णसंभजनः तुर्वणिस्तुर्णवनिरिति यास्कः यद्वा तुर्विता शत्रूणां हिंसिता एवंभूत इंद्रः तुर्वीतये एतत्संज्ञाय ऋषये निमग्नाय ऋषये गा

भा॰घ॰ धम बध्नन योग्यं धिष्ण्यप्रदेशकृः अकार्षीरत रतमुकी इयां छांदसलुङ् बहुलं छंदसीति इाघोलुक् धातारंत्वलोपश्छांदसः अय चनस्यमउपरमे
इपुममस्यमाछइतिछांदसः कानेलुङि मंत्रेघसह्वरणशेत्यादिना च्लेर्लुक् गुणः हल्ङ्याब्भ्य इति तलोपः॥ बहुलं छंदस्यमाङ्योगेपीत्यडभावः॥
३३१ द्वादशीमृचमाह॥ ॥ अस्माइदुप्रभरातूतुजानोरत्रायवज्रमीशानः कियेधाः॥ गोर्नपर्वविरदातिरश्चेष्यंनर्णांस्यपांचरध्यै॥ तूतुजानः
इतिक्षिप्रनाम तू तुजान त्वरमाणःयइंद्रःशत्रून् हिंसन् ईशानः सर्वस्यस्वामी कियेधाः कियतः अनवधृतपरिमाणस्य बलस्य धातायइंद्रः क्रममा
णंअत्रु बलं दधात्यनवस्थापयतीति कियेधाः हे इंद्र एवंभूतस्त्वं अस्मै वृत्राय वज्रं प्रभर उमंरसंयवज्रेणप्रहरेत्यर्थः॥ प्रहृत्य च अर्णांसिउदका
लानि इष्यन् तस्माद्वृत्रात् गमयंस्त्वं अपां चरध्यै तासामपां चरणाय भूप्रदेशं प्रति गमनाय तस्य वृत्रस्य मेघरूपस्य पर्वपर्वाणि अव
यवसंधीन् तिरश्चा तिर्यगवास्थितेन वज्रेण विरद विलिख छिंधीत्यर्थः तत्र दृष्टांतः गोर्न यथा मांसस्य कर्तारो लौकिकाः पुरुषाः पशोर
वयवानिति स्ततो विभजंतितद्वत् अत्र निरुक्तं अस्मै प्रहर तूर्णं त्वरमाणो वृत्राय वज्रमीशानः कियेधाः कियद्धा इति वी क्रममाण इतिवा
गोरिव पर्वाणि विरद मेघस्येष्यन्नर्णांस्यपां चरणायेति भरहग्रहोर्भ इति भत्वं छांदसत्वात् तिङ् इति सांहितिको दीर्घः॥ तूतुजानः तुजहिंसायां
कानच् तुजादीनां दीर्घोभ्यासस्येत्यभ्यासस्य दीर्घत्वं छंदस्युभयथेति कानचः सार्वधातुकत्वे सति अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ कियेधाः
तुजतां कियेधा इत्यत्रोक्तं इद रद विलेखने तिङ्ङतिङ इति निघातः तिरश्चा तिरोंचतीति तिर्यङ् ऋत्विगित्यादिना क्विन् अनिदितामिति नलो
पः तृतीये करवचनेन संज्ञायामच इत्यकारलोपः श्चुत्वेन तिरसकारस्याकारः उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं इष्यन् इष गतौ वि
त्यस्माद्भावेर्णि तण्यर्थाच्छ तरिदिवादिभ्यः श्यन् तस्य नित्वादाद्युदात्तत्वं चरध्यै तुमर्थे सेसेनिति चरतेरध्यैप्रत्ययः॥ ॥ त्रयोदशीमृचमा
ह॥ ॥ अस्येदुप्रब्रूहि पूर्व्याणि तुरस्यकर्माणि नव्य उक्थैः॥ युधे यदिष्णान आयुधान्यृघायमाणो निरिणाति शत्रून्॥ उक्थैः शस्त्रैर्न
व्यः स्तुत्योयइंद्रः अस्येदु अस्यैव तुरस्य युधार्थं त्वरमाणस्यंइंद्रस्य पूर्व्याणि पुराणानि कर्माणि एतत्कृतानि बलकर्माणि हे स्तोतः प्रब्रूहि
प्रशंसाय च यदा युधे युधाय च नाआयुधानि वज्रादीनि इष्णानः आभीक्ष्णेन प्रेरयन् शत्रून् ऋघायमाणः हिंसन् इंद्रो निरिणाति अ
भिमुखं गच्छति तदानीं प्रब्रूहीति पूर्वेण संबंधः पूर्व्यमिति पुराणनाम पूर्व्यं अन्हायेति पुराणनामसुपाठात् तुरस्य तुरत्वरणे इगु
पधलक्षणः कः नव्यः णुस्तुतौ अचोयदिति यत् गुणः धातोस्तन्निमित्तस्यैवेत्यवादेशः इष्णानः इष आभीक्ष्ण्ये क्र्यादिकः व्यत्ययेन
नात्मनेपदं शानच् विश्वितादुंदात्तत्वं ऋघायमाणः॥ न हिंसाराधसोः ऋलभ ऋघायमाणमित्यत्रयुक्त्यादितं निरिणाति रीगतिरेषण
योः क्र्यादिभ्यः श्ना प्वादीनां ह्रस्व इति ह्रस्वत्वं तिपः पित्वादनुदात्तत्वं तुदात्तत्वे विकरणस्वरः शिष्यते तिङो वा सानवती तिङ्गतिर्नि
घातः यद्वृत्तयोगात् तिङ्ङतिङ इति निघाताभावः॥ ॥ चतुर्दशीमृचमाह॥ अस्येदुभियागिरयश्चदृळ्हाद्यावाचभूमाजनुषस्तुजेते॥ उपोवेनस्य
जोगुवान ओणिं सद्योभुवद्वीर्याय नोधाः॥ अस्येदुभिया अस्यैवेंद्रस्य पापभीत्या अस्य भयेन गिरयः पर्वता अपि दृळ्हाः निश्चलाः सम्यग्देशोवितिष्ठ
तेजानुकंपते इत्यर्थः॥ किंच वेनस्य कांतस्यास्य ओणिं दुःखस्यापनयकं रक्षणं उपोजोगुवानः अनेकैः स्तोत्रैः पुनः पुनरुपशब्दयन् उपस्तुवन्
नित्यर्थः एवंभूतो नोधा ऋषिः सद्यस्तदानीमेव वीर्याय वीर्यवानभवत् द्यावा च भूमा च द्यावाभूमौ च्छांदसः दिवो द्यावा दिवश्चस्य द्यावा ३३१

देशः सर्वां सुदुगिति विभक्तेर्लुक् देवता इंद्र इत्यलक्षणपदप्रकृतिस्वरत्वं पदद्वयप्रकृतिस्वरत्वं सांप्रदायिको जनुषः जनीप्रादुर्भावे जनेरुसिरित्यौणा
दिक उसिप्रत्ययः जोगुवानः गुङ् अव्यक्ते शब्दे यस्मात् यङ्लुगंतात् व्यत्ययेन शानच् अभ्यस्तानामादिरित्याद्युदात्तत्वं भुवत् भवतेर्लुङि छांदसी
गुणप्रतिषेधः नोधाः नोधा ऋषिर्भवति नवनं दधातीति यास्कः तस्माद्धाञः असुन् नवशब्दस्य नोभावश्च॥ ॥ पंचदशीमृचमाह॥ ॥ अस्मा
इदुत्यदनुदाय्येषामेकोयद्वव्नेभूरेरीशानः॥ प्रैतशंसूर्येपस्पृधानंसौवश्व्येसुष्विमावदिंद्रः॥ ॥ एकः एक एव शत्रून् जेतुं समर्थः भूरेः बहुविधस्य
धनस्य ईशानः स्वामी य इंद्रः स्तोत्रं वव्ने याचे एषां स्तोतॄणां संबंधि यद्धनं विभक्तिव्यत्ययः यत् पत प्रतिइंद्रस्तोत्रमस्माइंद्रायानुदायि अकारि सर्वं
उत्तरार्धस्य इयमाख्यायिका स्वश्वो नाम कश्चिद्राजा स च पुत्रकामः सूर्यमुपासांचक्रे तस्य स्वसूर्य एव पुत्रो बभूव ततो संहयत द्वा नामो महर्षः सुर्इंजातमिति
तदेतदिहोच्यते। अयमिंद्रः सौवश्व्ये स्वश्वपुत्रे सूर्ये पस्पृधानं स्पर्धमानं सुष्विं सोमानामभिसोतारं एतशं एतशं संज्ञमृषिं प्रावत् प्ररक्षत् दायि बहुलं
छंदस्यमाङ्योगेपीत्यडभावः वव्ने वनुयाचने लुटि स्यसये नोपधालोपः पस्पृधानं स्पर्धसंघर्षे अस्माल्लिटः कानच् द्विर्वचने शर्पूर्वाः खयः इति हलादिः शेषः
सुष्विं सूञ् अभिषवे उपसर्गेश्छंदसीति अस्मात् क्विन् प्रत्ययः लिङ्वद्भावाद्धिर्भावः यणादेशः उवङादेशाम्यवश्छांदसः॥ ॥ षोडशीमृचमाह॥ ॥ एवाते हा
रियोजनासुवृक्तींद्र ब्रह्माणि गोतमासो अक्रन्॥ ऐषुविश्वपेशसं धियं धाः प्रातर्मक्षूधियावसुर्जगम्यात्॥ हर्योरश्वयोर्योजनं यस्मिन् रथे तत्र योजनं त
स्य स्वामित्वेन संबंधि हारियोजनेंद्र गोतमगोत्रोत्पन्ना ऋषयः सुवृक्ति सुष्ठु आवर्जकानि अभिमुखीकरणकुशलानि ब्रह्माणि स्तुतिरूपाणि मंत्रजातानि
ते तव एवाक्रन् अकुर्वत एषु स्तोतृषु विश्वपेशसं बहुविधरूपयुक्तं धियं धाः धियात्मा भ्यतात् धीः धनमुच्यते धेहि स्थापय प्रातः इदानीमिव परेद्युरपि
प्रातःकाले धियावसुः बुध्या कर्मणा वा प्राप्तधन इंद्रः मक्षु शीघ्रं जगम्यात् अस्मद्रक्षणार्थमागच्छतु एवेति निपातस्येति संहितायां दीर्घः सुवृक्ति सुपां
सुलुगिति शप्ता लुक् अक्रन् करोतेर्लुङि मंत्रे घसह्वरेत्यादिना च्लेर्लुक् अंतादेशः तस्य ङित्वात् गुणाभावे यणादेशः इतश्चेति कारलोपे संयोगांत
लोपे चाडागमः॥ ॥ छंदसि लुङ्लङ्लिट इति लोट्यर्थे लुङ् गातिस्थेति सिचो लुक् बहुलं छंदस्यमाङ्योगेपीत्यडभावः॥ ॥ इति प्रथमस्य चतुर्थे
एकोनत्रिंशो वर्गः॥ ॥३॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥ इति श्रीमद्राजाधिराज
परमेश्वर वैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्यधुरंधुरेण सायणाचार्येण विरचिते वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके
चतुर्थोध्यायः॥ श्रीकृष्णार्पणमस्तु॥ ७॥ श्रीगणेशाय नमः॥ ऋग्वेदात्मकविष्णुविश्वेशाभ्यां नमः॥ ॐ यस्य निःश्वसितं वेदा यो वेदेभ्यो
खिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ १॥ ॐ पंचमाध्याय आरभ्यते॥ प्रथममंडले एकादशानुवाके चत्वारि सूक्तानि गतानि प्रम
महइत्येतत् त्रयोदशर्चं पंचमं सूक्तं॥ तत्रानुक्रम्यते॥ प्रमंहिष्ठाय त्रयोदश इति अनिरुक्ता संख्या विंशतिरित्युक्तत्वात् समाने तके के त्रयोदश के के भवति॥
ऋषिश्चान्यस्मादिति परिभाषयानुनोधा ऋषिः॥ अनादेशपरिभाषया त्रिष्टुप्छंदः॥ इंद्रो देवता सामान्यविनियोगः॥ विनियोगलिंगाल्लु
लिंगादवगंतव्यः॥ ॥ तत्र प्रथमामृचमाह॥ ॥ प्रमंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसेमतिंभरे॥ ... अंगिरस्वत्॥ ... स्तुवतः ...
... विश्रुताय॥ ... अवसानाय ... इति बलनाम ... बलं शत्रून् हंति यथा शत्रूणां हंतेत्यर्थः॥ गिर्वाहसे गीर्भिः स्तुतिलक्षणैर्व
चोभिः संभजनीयाय गिर्वणो देवो भवति गीर्भिरेनं वनयंतीति यास्कः॥ एवंभूतायेंद्राय शूष मिति सुखनाम शूषं सुखस्य हेतुभूतं ओ

261
1924

भा॰ प्र॰ वृषभः सोमः अघोष इति यास्कः। आंगूषं स्तोत्रं अंगिरस्वत् अंगिरस इव प्र मन्महे वयं स्तोतारः प्रकर्षेण च गच्छामः अवगत्य च स्तुतिभिः सम्यगावर्त
३३२ केः स्तुत्याभिमुखीकरणसमर्थैः स्तोत्रैः स्तुवंते स्तोत्रं स्तुवंते कुर्वते ऋषयो येन इंद्रियवृषभियः अर्चनीयो भवति। यद्वा कर्मणि कर्तृप्रत्ययः कर्षिणात्स
यमानाय इत्यर्थः। नरः सर्वं यानेत्रे यद्वा नरः यजमानविश्रुताय येष्वस्य तयाविशेषेण प्रख्याताय एवंभूताय तस्मै अर्कं मंत्ररूपं स्तोत्रं अर्को मंत्रो भव
ति यदेनेनार्चंतीति यास्कः। अर्चाम पूजयाम उच्चारयाम इत्यर्थः। मन्महे मनु अवबोधने तनादित्वादुप्रत्ययः। लोपश्चास्यान्यतरस्यां म्वोरिति म
कारादौ प्रत्यये उकारलोपः शवसानाय शव इत्याचरतिः शवस्यते। अस्माल्लटः शानच् बहुलं छंदसीति शपो लुक्त्वान च छंदस्युभयथेत्यार्धधा
तुकत्वात् अतो लोपयोलोपौ चित्वान्निसंतोदात्तत्वं। ननु कथं शानादि चातास्यनुदात्तेद्धितिशानूचानुदात्तेन भवितव्यं। एवं तर्हि ताछीलिकश्चानश
स्य सार्वधातुकत्वापित्सार्वधातुकत्वाभावात्स्वर एवाशिष्यते। आंगूषं आङ्पूर्वात् घुषः पचाद्यच् योउत्यस्य गूष आदेशः पृषोदरादित्वा
त् आङो ङकारस्यानुनासिकाभावश्छांदसः। चित्स्वरेणोत्तरपदांतोदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं। धान्यि वाथादिनोत्तरपदांतोदात्तत्वं गिर्वणसस्था
ने संपदादिलक्षणाभावे क्विप् अत इडागारिति लिंगाभिर्वन्यते संभज्यत इति गिर्वणः औणादिकर्मण्युपसंख्यातस्य संज्ञापूर्वकस्यविधेरनित्यत्वात्
दे सम्पदादिलक्षणाभावे क्विप् अत इडागातारिति लिंगाभिर्वन्यते संभज्यत इति स्वरत्वं। अंगिरस्वत्। तेन तुल्यमिति वतिः न भांगिरस
चेति दीर्घभावः गातिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात् पूर्वपरप्रकृतिस्वरत्वं। अंगिरस्वत्। तेन तुल्यमिति वतिः न भांगिरस
नुपां वत्स्वपसंख्यानमिति भसंज्ञायां रुत्वाद्यभावः प्रत्ययः स्वरः। स्तुत्यानिभिर्वर्जीवर्जनं भावनिकुतिरन्येनाद्वप्राति यथः शोभनमावर्तनं यानस्ये
स्तुभ्यामित्युत्तरपदांतोदात्तत्वं। ननु किंतं स्योत्तरपदस्यायदात्तत्वं स्वच छंदसीतिवचनादुत्तरपदान्तनं प्राप्नोति एवं तर्हि तस्पुरुषोस्तुत्यो
नमावर्तितो भवत्याभिरिति स्तुरुक्रयः स्तोत्राणि करणोनिः न ता दो चानिनीतिगतेः प्रकृतिस्वरत्वेषामम मनन्तिनिन्त्यादिना कारकादुत्तरस्यति
नो विहितमुत्तरपदांतोदात्तत्वं अकारकादपिव्यत्ययेन भवति स्तुवते ऋानुरनुम इत्ल्लिनि भक्तेर दात्तत्वं। कृमियायएकान्ताने यमपदाभिष्ट
तो स्कूकुशोच्चादि कारार्थमयदस्वाद्विसर्वनामस्थानेति पदसंज्ञा याकुत्वत स्तिव्यत्ययेने त्वंयदाक न स्तातु स्यस्माडावमकुबहुलवचनान कुलंज
स्त्वं नकुगमं स्तुतिमर्ह तीतिअम्भियः अर्हीर्थिय अयिचिन इत्यंतोदात्तं आर्चाम अर्चपूजायां भौवादिकः शपः पित्वादनुदात्तत्वं तिङश्चकसार्वधात
नु स्वरेण धातुस्वरः शिष्यते। अर्कं अर्चते नेनेत्यर्थं पूर्वसंज्ञायां यः प्रायेणेति घः प्रत्ययः चजोः कुधिण्यतोरिति कुत्वं। नरे नर शब्द चतुर्थ्येक
वचने गुणश्छांदसः। विश्रुताय श्रु श्रवणे कर्मणि निष्ठा गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥ ॥द्वितीयामृचमाह॥ ॥प्रनाम हे महिनेमा
भरध्वमांगूष्यं शवसानाय साम॥ येना नः पूर्वे पितरः पदज्ञा अर्चंतो अंगिरसो गा अविंदन्॥ हे ऋत्विजो वो यूयं महे महते शवसानाय बलमिच्छ
चरते अधिवलायेत्यर्थः। इंद्रायेत्यर्थः। इतरवाक्ययच्छ्व्थक्तनेस्तभच्याभ्यासार एवंभूताय तस्मा इंद्राय महि महत्प्रभूतं नमः स्तोत्रं प्र भरध्वं प्रकर्षेण सं
पादयत। किं तत् स्तोत्रमित्यत आह। आंगूष्यं साम आघोषयास्यिरथं नरादिसाम सान्निष्याद्यमित्यर्थः। अभिवाञ्छत्यादिषु केषु यज्ञांतस्य ३३२
सामत्वात् ख्याता च्यावकं गीतिषु सामाख्येति। येन ईडेन नो अस्माकं पितरः पितृवत् ज्ञातारः पूर्वे पूर्वपुरुषाः अंगिरसः पणिनाम्ना सुरेणापहृतानां
गवां पदज्ञाः मार्गज्ञाः संतः अतएवार्चंत स्तंपूजयंतो गाः अविंदन्। अलभंत प्रथमार्थे द्वितीया पदज्ञाः पदनिशानंतीति आतानुपसर्गे क

इति कः। आतो लोप इटि चेत्याकारलोप अविंदन् विदॢ लाभे अंगुवादीनामितिनुमागमः॥ ॥तृतीयामृचमाह॥ ॥इंद्रस्यांगिरसां चेष्टौ विदत्सरमा त 263
नयाय धासिं॥ बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशंत नरः॥ ॥अन्वय माख्यानं। सरमा नाम देवशुनी पणिभिर्गोर्षपहृतासु तद्गवेषणाय ता 1924
सरमामिंद्रः प्राहैषीत् यथा लोकव्याधाः ॥ निर्गतमृगान्वेषणाय श्वानं विसृजंति तद्वत्। सा च सरमेभ्य मवोचत हे असुर यायाद्दीशर्वेन ग्रामं वं
धिष्ठी गायां यद्धि यच्छमिनर्हि गमिष्यामीति स तथेत्यब्रवीत्। तथा नगाद्यायचक्तं। अन्नादिनीतत्र त्रां करोमि यानो गा अन्वविंदत इति तां गत्वा
गानां स्थानमज्ञासीत् ज्ञात्वा चास्मैन्यवदयत् तेन स्थानि वदिता मृगोपुनममं रं हत्वा ता गाः स इंद्रो लभतेति। अयमर्थोस्यां प्रतिपाद्यते। इंद्रस्यां
गिरसां ऋषीणां च इष्टौ प्रेषणमतिसरमा देवशुनी तनयाय स्व पुत्राय धासिमंनं विदत्। धासिरित्यंन नाम धासिः इरते न नाम सृपात्। गोपु
नि वदिता सृ बृहस्पतिः बृहतां देवानामधिपतिरिंद्रः अद्रिं अतारं असुरं भिनद्दधीत। तेनापहृतागाः विदल्लभत तेनरानेतारो देवा उस्रियाभिर्गोभिः
सह इस्त्रियति गोनाम। संवावशंत सृशं हर्षशब्दमकुर्वन्। यद्वा गोभिः साधनभूताभिः तदीयक्षीरादिकमकामयंतसमगच्छंतेत्यर्थः। इंद्रो। इस्ति गतावि
त्यस्माद्धातोर्निर्मंत्रे तद्यत्नि न इदात्तत्वं विदत् विदॢ लाभे लुङि ऌदित्वादङ् बहुलं छंदस्यमाङ्योगेपीत्यडभावः। अड् एवस्वरः शिष्यते पादादित्वान्निघाता
भावः। सरमा। सरणादिति यास्कः। अर्ने राणादिकोम प्रत्ययः धासिं धेट् पाने धीयते पीयत इति धासिः औणादिकः सिप्रत्ययः यद्वा धाते: पोषणा
र्थात्सिप्रत्ययः बृहस्पतिः तत बृहतः करपत्याश्चारदेवतयोः सुद्तलोपश्चेति सुडागमः तलोपश्च बृहस्पतेः आद्युदात्तः। तस्य चोक्तिश्चिदुदात्तत्वं वर्णयंती
ति तपतिवाच्योद्ध इति प्रत्ययांत आद्युदात्तः अनद् भवनस्यादिपति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं। उस्रियाभिः निवसत्यस्यां क्षीरादिकमिति उस्रा
गाः वस निवासे इत्यस्मात् स्फायितंचयादिना अधिकरणेकृद्वचि स्वपित्यादिना संप्रसारणं। उस्राशब्दात् स्वार्थे घ यादरादित्वेन घप्रत्यय इति नि
घं दं भाव्यं घस्य इयादेशः प्रत्ययः स्वरः। वावशंत वाशृ शब्दे अस्माद्यङ् तालिङ्यां तादेशे तस्य छंदस्युभयथेत्यार्धधातुकत्वादतोलोपयलोपौ
अभ्यस्तानामादिरित्याद्युदात्तत्वं। यद्वा वशकांताविस्मात् यङि न वश इति संप्रसारणे प्रतिषिद्धे पूर्ववत्प्रक्रिया॥ ॥चतुर्थीमृचमाह॥ ॥स सुष्टुभा स स्तु
भा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो नवग्वैः॥ सरण्युभिः फलिगमिंद्र शक्र वलं रवेण दरयो दशग्वैः॥ अंगिरसो द्विविधाः सत्रयागमनुतिष्ठंतो येन च
भिर्मासैः समाप्य गतास्ते नवग्वान वग्वा न वनीगंत यइति यास्को व्याचरत्योयेतु दशभिर्मासैः समाप्य जग्मुस्ते दशग्वास्ताद्दशैरभ्यवि धोर्विप्रो
र्मेधाविभिः सरण्युभिः सरणशीलैर्भोगंतिमिच्छद्भिः सप्तसप्तसंख्याकैः सप्त इत्य मेधातिथि प्रभृतयोंगिरसो दृश्यंत एवंभूतैरंगिरोभिः सु
ष्टुभा शोभनस्तोमयुक्तेन स्वरेण उदात्तादिस्वरोपेतेन। यद्वा संस्तूयमध्यमादिस्वरेण युक्तेन स्तुभा स्तोत्रेण स्वर्यः। स्तुत्या प्राप्य यद्वा शब्दनीयः स्तु
त्य इत्यर्थः। हे शक्र मन्विंद्र एवंभूतः स त्वं स बलं अद्रिं आदरणीयं वज्रेण छेत्तव्यमित्यर्थः। फलिगं फलं प्रति विवंतदस्मिन्नस्तीति फलिस्यच्छमुस्तु
तद्वत्त्वाधारत्वेनातिफलिगः। यद्वा श्रीत्यादिफलं तदस्मिन्सति भवतीति फलिः फलितं करोतीति फलिगः एवंभूतं बलं मेघं रवेण आत्मीय
नशब्देन यः अभावयः त्वदीयशब्दः श्रवणमात्रेण मेघो विभेतीत्यर्थः। अद्रिः पर्वतः अद्यतेस्मिन् पदकादिकमिति फलिगा मेघः फलिगः उप
लइति नामसु पाठात्। वलोः सुरः दैत्यो वलगाः पर्यपश्यन्निय। दाव सरप्रयुक्तत्वात्। एतेत्र यापित्वदीयशब्दस्वरमात्रेण आभिभयुरित्यर्थः
स इत्येकः पदपूरणः सुष्टुभा शोभमतिः स्तुतिकर्मासं पदादिलक्षणाभावे क्विप् शोभनस्तुप् स्तोमो यस्येन सप्तभ्यामित्युत्तरपदांतोदात्तत्वम्।

उपसर्गात्सुनोतीति षत्वं। सुभा करण भूतस्यापि सोमस्य सुखायो रेकतृत्वात्। सोभति सोतीति क्विप् चेति कर्तरि क्विप्। सावेकाचस्तृतीयादिर्विभक्तेर् उदात्तं। ससा। सुपां सुलुगिति विभक्तेर् लुक्। स्वर्यः सुखो रोपताप योः। कृत्यो ण्यदिति ण्यत्। यच्चभावः। छांदसः। तित्स्वरितमिति स्वरितत्वं। नवग्वैः नवग्वाः। उपपदे गमेर् भावाद्विपि गमः क्विपिति अनुनासिकलोपे ईवगमादीनामिति वक्तव्यमिति पूर्वाकारांतस्योकारादेशः। नवभिर्गमनं येषां तेन नवग्वाः। अकारोपजनश्छांदसः। यद्वा गमेर् भावे उप्रत्ययः पूर्ववत् स्वबहुव्रीहिः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। सरण्युभिः उद्गंतः सरण्यवः स्यवि भंगस्ते पश्चांदसः। क्याछंदसीत्युः पलिकं पत्युद्दसंगाछी तितिपलिगः। ग्रन्यथापि दृश्यत इति गमेर्डः। बलं रणोतीति वलः पचाद्यच् रापिकानादिलात्कुलं दरयः। दृविदारण इत्यस्मात् तृभयस्य धातोः। नायादृभय इति घटादिषु पाठान्मित्वमित्यनुस्व इति ह्रस्वत्वं॥ ॥पंचमीमृचमाह॥ ॥गृणानो अंगिरोभिर् दस्म विवरुषसा सूर्येण गोभिरंधः॥ वि भूम्या अप्रथय इंद्र सानु दिवो रज उपरमस्तभायः॥ ॥हे दस्म दर्शनीयेन्द्र गृणानो मुपशियते वं दत्तं अंगिरोभिर् अंगिरोभिः गृणानः स्तूयमानः सन् उपसा सूर्येण च सह गोभिः किरणैः अंधः अंधकारं विवः अवृणोः अनाशय इत्यर्थः। तथा हे इंद्र त्वं भूम्याः पृथिव्याः सानु समुच्छ्रितप्रदेशं व्यप्रथयः विस्तारणा विस्तीर्णमकारोः विषमामिमां समीकृतवानित्यर्थः। गृणानः कर्मणि शानचि नियत्प्राप्ते व्यत्ययेन शानच्। नांदेशान्ताः [illegible] ताः सानु दिवो रज उपरमस्तभायः। ई पुयुध्धिय्। धीत्याच्छिनामकु। वः रुवरणो। कुडिडिपिमंत्र घसेत्यादिना च्लेर् लुक्। गुणे हलुयाभ्य इति सलोपः। बहुलं छंदसि अमाङ्योगेपीत्यडभावः। अथः नमोप्यं धदुच्यते नामधेयानं भवतीत्यास्कः। रजः उकारजांस्युनंत इति उक्तत्वाद् रजः। अन्तरिक्षवचनः। सुपां सुलुगिति षष्ठ्या लुक्। अस्तभायः स्तंभु स्तुंभु इत्यादिना श्नाप्रत्ययः। छंदसि शायजपीति श्नाप्रत्ययस्य शायजादेशः। अनिदितामिति नलोपः। अडागमः॥ ॥इति प्रथमस्य पंचमे प्रथमो वर्गः॥ ॥प्रवर्ग्ये अभिप्लवे तदुप्रयक्षतमित्यषा अथान्तरमित्यन्नचमत्वितं॥ तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः॥ उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्यश्चतस्रः॥ ॥ तामेतां सप्तमीमृचमाह॥ ॥ तदुप्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः॥ उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्यश्चतस्रः॥ दस्मस्य दर्शनीयस्यास्येंद्रस्य तदुत्त स्वत्कर्म प्रयक्षतमं अतिशयेन पूज्यं दंसः इति कर्मनामसु पठितं। कर्म चारुतमं अतिशयेन शोभनं विनियुक्तमित्याह अयमिंद्रः उपह्वरे उपह्वरे गंतव्य पृथिव्याः संबंधिनी समीपदेशे उपराः उपलाः [illegible] मध्वर्णसः मधुरोदकाः चतस्रः नद्यः प्रधानभूता गंगादिनदी अपिन्वत। असिंचत इति यत् तत्कर्म दस्यनकर्तुमशक्यत्वात् पूज्यमित्यर्थः। प्रयक्षतमं यश पूजायां यक्षत इति यक्षः अतिशयेन यक्षो यक्षतमः पुनः प्रादिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वं। सेदृ दृसिदंस नदर्शनयोः चुरादिरात्मनेपदी दस्यतेः कर्तव्यात तयाद्दृश्यत इति दंसः कर्म औणादिकः कुर्मण्यसुन्। उपह्वरे। ह्वृ कौटिल्ये कौटिल्यलक्षणगतिवाचिना [illegible] गतिवाचिना वगतिमात्रं लक्ष्यते। उपह्वरं तिगच्छत्यस्मिन्नाघ इति उपह्वरे। भूप्रदेशे पुंसि संज्ञायां घः प्रायेणेत्यधिकरणे घः प्रत्ययः गुणः कृदुत्तरपदप्रकृतिस्वरत्वं। अपिन्वत पिवि सेचने। भौवादिकः श्वतस्त्रि चतुराद्युदात्तमिति चतस्र इत्यनुनुरुद्यस्य चतस्रादेशः आद्युदात्तं निपातितः पूर्वसवर्णदीर्घं प्राप्ते अचि र इति रफादेशः चतुरन्तात्स्याद्युदात्तत्वात् स्थानिवद्भावेन चतस्रादेशस्याद्युदात्तत्वापि सिद्धे पुनराद्युदात्तनिपातन सामर्थ्यात्तियणादेशस्यापूर्वविधौ स्थानिवद्भावाच्चतुरः अमीत्यंतोदात्तत्वं स्याभावः। न च न पदान्तेति स्थानिवद्भावप्रतिषेधः। स्वर दीर्घ यलोपेषु लोपाजादेश एव न स्थानिवत् अन्यत्र स्थानिवदेवेति नियमात्॥ ॥सप्तमीमृचमाह॥ द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः॥ भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः॥ ॥अयास्यः यासः प्रयत्नः तत्साध्यो यास्यः न यास्यः अयास्यः गुरुरूपः प्रयत्नैः साधयितुमशक्य इत्यर्थः। कथं साध्यत इत्याह। स्तवमानेभिः स्तोत्रं कुर्वद्भिः पुरुषैः अर्कैः स्तुतिरूपैर्मंत्रैः स्तूयमानः सन्निंद्रः सुसाध्यो भवति। यद्वा अयास्यः पंचवृत्तिर्मुख्यः प्राणः स हि आस्यान्मुखादयते गच्छतीति। तदुपासकोप्यंगिरा उपचारादयास्य इत्युच्यते तथा च छांदोगा आम्नातं तं ह अयास्य उद्गीथमुपासांचक्रे। एतमु एवायास्यं मन्यंते आसाद्दयतेति। अथवा अयमास्यमुखे वर्तत इत्ययास्यः। तथा च वाजसनेयकं। तं हाचुः क्वनु सोभूद्यो न इत्थमसक्तेत्ययमास्यं तं इति सोयास्य इति पूर्ववदुपासकोप्ययास्यः। तेन ऋषिणा स्तवमानेभिः गुणनिष्ठगुणाभिधानलक्षणां स्तुतिं कुर्वद्भिः अर्कैः मंत्रैः करणभूतैः स्तूयमानः सन् सनजा सनता इति निपातानित्यर्थः। नित्यजातं सर्वदा विद्यमानस्वभावमित्यर्थः। प्रथमभावविकारवाचिना द्वितीयो भाविकारः सत्ता लक्ष्यते यथा औदयिकर्स्तु अस्यार्थेन संबंध इति ओमानिकामिति नित्यं कर्म। इति हि नद्रष्टव्यं। सनीळे समानं नीळमाकान्निवासस्थानं ययोस्ते सलग्ने इत्यर्थः। एवंविधे द्यावापृथिव्यौ द्विता द्विधा विवव्रे विवृत अकारान्तं भेदेनास्थापयदित्यर्थः। मने मननीयपरमे उत्कृष्टे व्योमन् विविधरक्षणेन भासितैर्माला भगो न सूर्य इव सुदंसाः शोभनकर्मेंद्रः रोदसी द्यावापृथिव्यावधारयद् स्थापयत्। यद्वा मेना इति स्त्रीनाम। तथा च यास्कः मेना ग्ना इति स्त्रीणां मेना मानयंत्येना इति स्त्रीरूपमापन्नः सन्निंद्रो अधुव्यदित्यर्थः। द्विता द्वि धेत्यस्य धकारस्य तकारश्छांदसः। सनजा सनतनी प्रादुर्भावे अस्मात् जनेर् अन्येष्वपि दृश्यत इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वाड्डः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। सुपां सुलुगिति विभक्तेराकारः। अयास्यः यस प्रयत्ने यासः प्रयत्नः तत्र भावो यास्यः भवे छंदसीति यत् न यास्यः अयास्यः। यत्तादिभ्यः कृन्मिति बहुलमिति तत्पदाद्युदात्तत्वं। निर्वचनं तु प्रोदरादित्वात् अभिमत रूपसंसिद्धिः। सनसमस्येत्यनेन स्यसमः पांकसु लुगिति [illegible] आदेशः इति प्रसंगत्वं। यद्वा मन्यत इति मेना। पचाद्यच्। ताभिमन्याय्यर्थं। तव्यमित्यत्रैव तत्र व्याप्य इ द्विवचनमिति प्रगृह्यत्वं। मन्दसानः दमसा इति कर्मवाचीं असुन्प्रत्ययांत आद्युदात्तः बहुव्रीहौ आद्युदात्तं द्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वं॥ ॥अष्टमीमृचमाह॥ ॥सनाद्दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः॥ कृष्णेभिरक्ताोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या॥ विरूपे शुक्लकृष्णत्वाद्विषमरूपे पुनर्भुवा पुनः पुनः प्रतिदिवसं जायमाने युवती तरुण्यौ रात्र्युषसौ सर्वदैकरूप्यात् एवंभूते रात्र्युषसौ दिवं द्युलोकं भूमिं च सनात् चिरकालादारभ्य स्वेभिरेवैः स्वकीयैर्गमनैः परिचरतः पर्यावर्तते अयमेवार्थः। स्पष्टीक्रियते॥ अक्ता रात्रिः कृष्णेभिः अंधकाररूपैर्वर्णैरुपलक्षिता उषाः च रुशद्भिः दीप्यमानैर्वपुर्भिः शरीरभूतैः तेजोभिरुपलक्षिता अन्यान्या परस्परं व्यतिहारेण आचरतः आवर्तते इंद्र एतत्सर्वं त्वयैव कार्यते तदधीनत्वात् सर्वासां देवतानामित्यर्थः। भूमभ्रस्यां सुपांसुलुगिति द्वितीयाया डादेशः छांदसो ह्रस्वः। एवैः इण गतौ इण्शीङ्भ्यां वन्निति भावे वन्प्रत्ययः नित्त्वादाद्युदात्तत्वं। अक्तानक्तानिशानीनामसु [illegible] छांदसः अन्यान्या कर्मव्यतिहारे सर्वनाम्नो द्विर्भवति इति वक्तव्यं समासवच्च बहुलमिति द्विर्भावेन स्य परमाम्रेडितमित्याम्रेडितसंज्ञायामनुदात्तं चेत्याम्रेडितस्यानुदात्तत्वं॥ ॥नवमीमृचमाह॥ ॥सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः॥ आमासु चिद्दधिषे पक्वमन्तः पयः कृष्णासु रुशद्रोहिणीषु॥ स्वपस्यमानः स्वपः शोभनकर्मतदिवाचरन् अत एव सामर्थ्यवान् बलस्य सूनुः पुत्रः अतिबलवानित्यर्थः। सुदंसाः शोभनयागादिकर्मयुक्त एवंभूत इंद्रः स्तुवतां यजमानानां सख्यं सनेमि पुराणं दाधार धारयति पोषयतीत्यर्थः। सनेमीति पुराणनाम प्रत्नपाः समममिति पाठात् किं च आमासु चित् आर्द्रासु अपरिपक्वासु गोषु च अंतर्मध्ये पक्वं परिपक्वं

265
1924

भा०प्र० योदधिपेधारयतितथारुक्मासः रुक्मवर्णमः रोहिणीषु लोहितवर्णासु गोषु तद्विपरीतं शुक्लं दीप्यमानं श्वेतवर्णं पयो दधिपयस्यं सख्युर्भावः सख्यं
सख्युर्य इति यः प्रत्ययः स्वरः दाधार धृञ् धारणे तुजादित्वादभ्यासस्य दीर्घत्वं पयं पयोव इति निपातस्य चेति रोहिणीषु रुशत्पयः अनिप्रादुर्भा
१३४ वर हरश्चात्रानीतप्रत्ययांतो रोहितशब्दः आद्युदात्तो वर्णादनुदात्तात्तोपधात्तो नइति ङीप् तत्संनियोगेन तकारस्य नकारादेशश्च ङीपः पित्वाद
नुदात्तत्वं प्रातिपदिकस्वर एवशिष्यते॥ ॥द्वादशीमृचमाह॥ ॥सनात्सनीळा अवनीरवाता व्रता रक्षंते अमृताः सहोभिः॥ पुरु सहस्रा जनयो न प
त्नीर्दुवस्यंति स्वसारो अह्रयाणं॥ सनात् चिरकालादारभ्य सनीळाः समाननिवासस्थानाः अवाताः वातं गमनं तद्रहिताः एकरूपाश्च स्थानात् अवनय
इत्यंगुलिनामसु पाठः अवनाद्रक्षकाः पुरु पुरूणि बहूनि सहस्रा असंख्यातानि व्रता व्रतानि इदं इदं कर्म रक्षंते कर्माणि अमृताः पुनः पुनः करणेपि आल
स्यरहिताः सत्यः सहोभिर्बलैर्यैर्बलै रक्षंत पालयंति। अपि च स्वसारः स्वयमेव सरंत्यो गुल्यः पत्नीः पालयित्र्यः अह्रयाणं लज्जारहितं प्रग
ल्भमित्यर्थः। यद्वा अहृतयानं प्रजानां गमनं मित्रं जनयोन जन यइति देवानां पत्न्य इत्यंत देवानां पत्नीर्जनय इति श्रुतेः। ता इव दुवस्यंति परिचरं
ति अंततिकं धनं इंद्रेण यंतीत्यर्थः। अवनीः अवन यंगुल्याभवंत्यवंतिकर्माणी याति याः स्वः। सुपां सुलुगिति जसः पूर्वसवर्णदीर्घत्वं अवा
ताः वा गतिगंधनयोः असिहसिम्यादिना भावे तन्प्रत्ययः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। व्रताशब्दो व्रतमिति शेर्लोपः। दुव
स्यंति। दुवस्यतिः परिचरणकर्मा कंड्वादिः अतोयकुगव स्वरः शिष्यते। पादादित्वान्निघाताभावः। अह्रयाणं ह्रीलज्जायां बहुलं छंदसीति श्रार
भावः। अथ्य यनतहानन्नुगुणाभावश्छांदसः। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं यद्वा बहुलं छंदसीतिद्वापलुकि छंदस्यभयतेति शानच् आर्ध
धातुकत्वनङित्वाभावगुणावादेशौ पूर्ववत्समासस्वरौ। यास्कस्त्वेवं व्याख्यात। अह्रयाणा ह्रीतया इति॥ ॥ इतिप्रथमस्यपंचमद्वितीयोवर्गः॥ ॥
एकादशीमृचमाह॥ ॥सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दस्म दद्रुः॥ पतिं न पत्नीरुशतीरुशंतं स्पृशंति त्वा शवसावन्मनीषाः॥ हेदस्म दर्शनी
यंद्र अर्कैः शस्त्ररूपैर्मंत्रैः नमसा नमस्कारेण च यस्त्वं नव्यः स्तुत्यो भवसि। सनायुवः सनातनं अग्निष्टोमादि नित्यं कर्म आत्मन इच्छंतः वसूयवो व
सुधनमात्मन इच्छंतो धनकामा मतयो मेधाविनस्त्वां दद्रुः बहुना प्रयासेन तग्मुः हे शवसावन् बलवन्निंद्र तेषु प्रयुक्ता मनीषाः स्तुतयः त्वां स्पृशंति
प्राप्नुवंति तत्र दृष्टांतः उशतीः उशत्यः कामयमानाः पत्नीः पत्न्यः उशंतं कामयमानं पतिं न यथा पतिं भर्तारं स्पृशंति तद्वत्। सनायुवः सनेत्यनद्रव्यं
नित्यत्वमाचष्टे तेन च तद्वानलक्ष्यते। सना सनातनमात्मनः कर्म इच्छंतीति सनायुवः क्याच्छंदसीति उप्रत्ययः न सिच र्णव्यत्ययेनोत्वं। मतयः म
नतानमन्यत इति मतयः स्तोतारः क्तिच्क्तौ च संज्ञायामिति क्तिच् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः क्तिचोंतोदात्तत्वं। दद्रुः द्रु कुत्सायां ग
तौ च। घस्ति। अतो लोप इति चेत्याकारलोपः। उशतीः वश कांतौ। शतृ। अदादित्वाच्छपो लुक् ग्रहिज्यादिना संप्रसारणं उगितश्चेति ङीप
शतुरनुम इति नद्या उदात्तत्वं वा च्छंदसीति पूर्वसवर्णदीर्घः शवसावन्मतुपि आकारापजनश्छांदसः॥ ॥यद्वामत्वर्थीयः आवनिप॥ ॥
द्वादशीमृचमाह॥ ॥सनादेव तव रायो गभस्तौ न क्षीयंते नोप दस्यंति दस्म॥ द्युमाँ असि क्रतुमाँ इंद्र धीरः शिक्षा शचीवस्तव नः शचीभिः॥ हे १३४
दस्म दर्शनीयेंद्र गभस्तिरिति बाहुनाम तव गभस्तौ हस्ते सनादेव चिरकालादारभ्य स्थितानि रायो धनानि न क्षीयंते न विनश्यंति नोपदस्यंति च स्तो
भ्यो दत्तमपि न उपक्षयं गतानि नश्यंति। उपक्षयं न प्राप्नु अपितु वर्धंते हे इंद्र धीरो बुद्धिमान् धृष्टो वा त्वं द्युमान् दीप्तिमान् असि तथा क्रतुमान् कर्मवान् रक्षण

हेतुभूत कर्मयुक्तोसि हे शचीवः कर्मवन्निंद्र तव शचीभिः तदीयैः कर्मभिः नोस्मभ्यं धनं शिक्ष देहि। शिक्षतिर्दानकर्मा शीयतेसौ अहिंसायां अ 267/1924
स्मात्कर्मकर्त्तरि कर्मवद्भावात् धात्वात्मनेपदेवत्ताद्रण्यमाश्रयमपि यथा स्यादिति कर्तृ वद्भावात् धात्वात्मनेपदे तद्रण्यमाश्रयमपि यथा स्यादिति कर्त्तृ
वद्भावादेव कर्त्तृयक् पुरात्त्वं चादिलोपे विभाषेति निघातप्रतिषेधः। शचीवः शची अस्यास्तीति शचीवान् छंदसीर इति मतुपो वत्वं संबुद्धौ सस
वोरुरिति नकारस्य रुत्वं॥ ॥त्रयोदशीमृचमाह॥ ॥सनायते गोतम इंद्र नव्यमतक्षद्ब्रह्म हरियोजनाय॥ हरी अश्वौ रथे योजयतीति हरियोजनः सुनी
थाय नः शविष्ठ नव्यं भूयात्प्रातर्मक्षू धियावसुर्जगम्यात्॥ हे इंद्र तुभ्यं गोतमः गोतमस्य ऋषेः पुत्रो नोधा ऋषिः नव्यं नवं ब्रह्म स्तोत्रं अतक्षत् अकरोत् सनायते शत्रूणां अतो
भिरनेन स्तोत्रेण त्वतः सन धियावसुर्धिया कर्मणा वा प्राप्तवसुरिंद्रः प्रातः कालमक्षू शीघ्रं जगम्यात् आगच्छतु। सनायते सनेति निपातो नित्य नान्द समाना
र्थः तस्मात् आचारार्थे क्यच् प्रत्ययः मक्षू शीघ्र व्याप्तेति प्रापणे उत्यस्मादौणादिकः थक् प्रत्ययः थादित्स्वरः॥ ॥ इतिप्रथमस्यपंचमेतृतीयोवर्गः॥ ॥
त्वं महाँ इतिनवर्चं पंचमं सूक्तं। नोधस आर्षं त्रैष्टुभमैंद्रं अनुक्रम्यते च त्वं नव वतिसमृद्धेति दशरात्रवाद्भुती छंदोम मरुत्वतीयशास्त्रे एतत्सूक्तं वि
धातिनाग्निं नर इति वेद इति सूत्रितं। नांमत्वेकीर्तितं महाँ इंद्रो यइति॥ ॥ तत्रप्रथमामृचमाह॥ ॥त्वं महाँ इंद्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे
धाः॥ यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळ्हासः किरणा नैजन्॥ हे इंद्र त्वं महान् गुणैः सर्वाधिको भवसि यो ह यः खलु त्वं अमे अमे अमरत्वे भये
सति जज्ञानः तदानीमेव प्रादुर्भूतः सन् शुष्मैः शत्रूणां शोषकैः आत्मीयैर्बलैर्द्यावापृथिवी पृथिव्यौ धाः अधारयः तादृशाद्भयादमुंच इत्यर्थः।
किंचाय द्ध ते यस्य खलु तव संबंधिन्या भिया भीत्या विश्वा विश्वानि व्याप्तानि अभ्वा निभूतजाताति गिरयश्चिदपि दृळ्हासः दृढाः अभ्वामहा
महांतः। अन्यान्यपि महांति यानि संति तानि सर्वाणि दृळ्हाः दृढा अपि एजन्। अकंपिषत तत्र दृष्टांतः किरणाः न यथा सूर्यरश्मयः इतस्ततोन
भसि कंपंते तद्वत्॥ जज्ञानः जनी प्रादुर्भावे लिटः कानच् गमहनत्यादिना उपधालोपः ज्ञाजनोर्जा अभावाद्विभाषा छिन्नेति द्वित्वेतोदात्तत्वं। धाः धारणपो
षणयोः अम मन्त्रस्य मध्यपातान इत्यस्य पाठश्छांदसः। यततः पांसुलुगिति घष्यातुकु अभ्वा आस मंता भवंति सद्भावं प्राप्नुवंतीति अभ्वा
महांतः आङ्पूर्वाद्भुवतेरौणादिको ड्वुन्प्रत्ययः उपसर्गस्य ह्रस्वत्वं नयद्वान आर्पूर्वाद्वतेः प्राप्त्यर्थाज्जनिभुवादिरिति क्वन्प्रत्ययः महांतादि
ष्टामेन शब्देन। दृळ्हाः दृह वृद्धौ निष्ठा अनिट् किरणाः कीर्यंते विक्षिप्यंत इति किरणाः कॄ विक्षेपे कृपृवृजिमंदिनिधाञ्भ्यः क्युरिति क्यु
प्रत्ययः। योरनादेशः प्रत्ययाद्युदात्तत्वं। कृतइत्वातोरिति ऋत इत्वं रपरत्वं एजन् एजृ कंपने लङि अडागमः सर्वादिशः॥ नव्युद्धिन्य॥ ॥द्वितीयामृचमाह॥ ॥
आ यद्धरी इंद्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात्॥ येनाविहर्यतक्रतो अमित्रान्पुर इष्णासि पुरुहूत पूर्वीः॥ हे इंद्र त्वं यद्यदा विव्रता विविध
कर्माणौ हरी स्वकीयावश्वौ आवेः आगमयसि रथे योजयसीत्यर्थः तदानीं ते तव बाह्वोर्हस्तयोः जरिता स्तोता वज्रं आधात् स्तोत्रेण स्था
पयति स्तोत्रास्य हेतु प्रयत्नमंतरेण वज्रं बाह्वोस्त्वदृश्यत इत्यर्थः। हे अविहर्यतक्रतो प्रेप्सितकर्मन्निंद्र अमित्रान् येन वज्रेण इष्णासि अभिगच्छ
सि। हे पुरुहूत पुरुभिर्बहुभिर्यजमानैराहूतस्त्वं पूर्वीर्बह्वीः पुरः असुरपुराणी हंतुमभिगच्छतसीत्यर्थः। विव्रता व्रतमिति कर्मनाम विविधं
व्रतं ययोस्तौ सुपां सुलुगिति पूर्वसवर्णदीर्घत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वेः वीगतिप्रजनकांत्यसनखादनेषु। अंतर्भावितण्यर्थो
छांदसत्वाद्धिर्मिपि अदादित्वाच्छपो लुक् बहुलं छंदस्यमाङ्योगेपीत्यडभावः। धातुस्थातेश्छांदसत्वं लुगिणाति इष्णातिसि वालुका पूर्वपदंभावः
। अविहर्यतक्रतो हर्यतिः प्रेप्साकर्मेति यास्कः हर्यगतिकांत्योः कांतिरभिप्रायः। विहर्यतो अपिलषितः। अविहर्यं तो भिलषित इत्यर्थः। तादृ

भा०प्र०
३३५

नः कुत्समयस्य तथोक्तः अभिवान। न संति मित्राण्यमित्राणि वृत्रादीनि यस्मात् स तथा इति इनर पदाख्या तनत्वं। इत्यस्मादिरुप आभीक्ष्ण्य
अत्र गत्यर्थः श्याद्विभ्यः आमिषः पिवादनुदात्तत्वं तस्य वः स्वरः शिष्यते। यद्वृत्त योगान्निघातः॥ ॥तृतीयामृचमाह॥ ॥त्वं सत्यई इन्द्र धृष्णु
रेतान् त्वमृभुक्षा नर्यस्त्वं षाट्॥ त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन्॥ हे इन्द्र त्वं सत्यः सत्यभवः सर्वोत्कृष्ट इत्यर्थः। एतान् शत्रू
न् अभिगतः सन धृष्णुः तेषां धर्षयिता तिरस्कर्ता। किं च त्वम् ऋभुक्षाः ऋभूणां मधिपतिः तेषु रततिवासो वा। यद्वा हे अंतामिनत। महत्त्वप्ररथो
मिनर्यो नृभ्यो हितः तथा त्वं षाट् शत्रूणामभिभविता हंतेत्यर्थः। किं च वृजने इत्यादीनि त्रीणि संग्रामनामानि अत्र पूर्वेर्णि इति पणोयते नवर्तते युक्त
संग्रामे हिवि तः पुरः यातः श्रेनाहिंस्यते पृक्ष संपर्कनीये वा यो यथा युध्यासत्य एवं विध अणोसंग्रामेषु भते दामिम तिपुनेन रणाय कुत्साय सचा त्वं सह
हायाभूत्वा शुष्णं आयपिकारं एतन्नामकं असुरं अवधीः। ऋभुक्षाः ऋभु इति मधाविनाम उरु विभ्वीर्ण भाति। यद्वा क्षीतेनवृन्नन् भाति। ऋ
वतीति वा ऋभुः इरउरु शब्दस्य गत्यर्थ पद भाव भवतें वा मगत्यात् प्रवृत्ति इत्यत्ययः पूर्वपदस्य ऋभावो निपात्यते। क्षयति निवसत्यर्थेषु मान्वेषा
मीष्टे इत्यर्थः ऋभुक्षाः। यद्वा क्षिति निवासगत्योः न पुनिवसतीति यतस्त इति विधीयमान इति प्रत्ययो व हुलवचनात् स्मादपि भवति दिलोपश्चासो प
धिमत्वः ऋभुक्षामाद्रिलयां त्वं प्रत्ययस्वरः। षाट् षह अभिभवे छंदसि सहः इति पिकत्वाद्रपिण्विः पत्वं छांदसं संग्राम तेषोढृइपि रपिसन् ढत्वसीति द्रा
मान स्यादिषु सर्वनामस्थानेतिपदसंतायांपित्रिव ढत्विडत्यत्वं ऋत्वनुउभ्यामनुविति मतुप इत्यतत्वं॥ ॥चतुर्थीमृचमाह॥ ॥त्वं ह त्यदिन्द्र चोदीः
सखा वृत्रं यद्वज्रिन्वृषकर्मन्नुभ्नाः। यद्ध शूर वृषमणः पराचैर्वि दस्यूंर्योनावकृतो वृथाषाट्॥ ॥ हे इन्द्र त्वं खलु सख्या कुत्सस्य सहायः सन् प्रत
न प्रमिश्रं धनं अपलक्षणं यशो वा चोदीः प्रेरितवान् अकार्षीरित्यर्थः। हे वृषकर्मन् वृष्युत्सेचनं वृषकर्मा पतनं तन्निन् हे वज्रिन् इन्द्र वृत्रं धन
स्यावरीतारं कुत्सस्य शत्रुं यत् यदा उभ्नाः अहिंसी अपि च यश्च शत्रूणां प्रक्षितृन् पराचैः पराग मनैः व्यवहृत परांमुखान् यथा भवंति तथा
मणः कामाभिवर्षकमनस्कं इन्द्र यथा षाट्। आनयासेन शत्रूणामभिभविता त्वं यद्ध यदा खलु योनौ वीरान्मिश्रणीये संग्रामे दस्यून् कुत्सस्योप
क्षयितृन् अन्यान् शत्रून् पराचैः पराग मनैः व्यवहृत पराङ्मुखा यथा भवंति तथा व्यक्षिन्नत दाकृ। तः सर्वे यत्तः प्राप्नोतीत्यर्थः। चोदीः चुद प्रे
रणे लुङि णेरनिटीति णिचि प्रतिषेधः। उभ्नाः उभ उंभ हिंसायां क्र्यादिः लङि सिपि सत्पोपथाश्चाद्रसः बहुलं छंदस्यमाङ्योगे पीत्यडभावः॥
पराचैरित्येतत् अर्थे॥ नीचैरयोगितचि चिति। भ इ भाम्भरमिश्रः पराचैः पराचैरनिति निरतं। इस्यून दीर्घादटि समानपादे इति नकारस्य रुत्वं
अत्रानुनासिकः पूर्वस्य तु वेति तुकारस्य सानुनासिकता अरतः कृती छ इनलङि सिपि तुदादित्वात् शप्रत्ययः। आगमानुशासनस्यानित्यत्वा
त् नुमभावः दीर्घनामि तिनुमागमस्याभावः। उस्याङितात् गुणाभावः॥ ॥पंचमीमृचमाह॥ ॥त्वं ह त्यदिन्द्रारिषण्यन्दृळ्हस्य चिन्मर्तानामजुष्टौ।
व्यस्मदा काष्ठा अर्वते वर्घनेव वज्रिञ्छ्नथिह्यमित्रान्॥ ॥हे इन्द्र त्वं खलु मर्तानां दृळ्हस्य कस्य चिदपि अरिषण्यन् दृळ्हस्य मनिष्ठन् एवं स्वभावो भ
वसि इदं च तव नानुनाग्रहीनवात। तथापि मर्तानां स्तोतॄणामस्माकं शत्रुभिर्जुष्टौ अप्रीतौ सत्यां अस्मदर्वते अस्मदीयायाश्वाय गंतुं काष्ठाः ३३५
दिशाः आसमंतात् विवः विवृताः कुरु॥ यथा सर्वाः काष्ठा अस्मदीयाः अश्वाः प्रतिरोधमंतरेण गच्छंति। तथा कुर्वित्यर्थः। किं च त्वमन्यान
मित्रान् हे वज्रिन् वज्रवन् इन्द्र घनेन हननेन कुठारेण पर्वतेन वज्रेण श्नथिहि श्नथ हिंसायामित्यर्थः। यद्वा मर्तानां मनुष्याणां मध्ये यस्मिन् कस्मिं

श्चिन नवासीतोसत्यां तस्य शत्रोः इन्द्रस्यापि अरिषण्यन्नरेषणं हिंसनमनिच्छन् वर्तसे यस्मिन्कुत्सः प्रीतिरस्ति तस्य शत्रुवधं च कृषे। अतस 269/1924
वत्रियाणां अस्माभिर्व्यापृतं वृत्तान्। त्यन्मकर्पां कृत्तु गतिरिष्याल्लुक्। अरिषण्यन् रिष शब्दात् क्यचि दुवस्यादृविणस्यरिषणतीति पणः आचेनि
पात्यते। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं। अस्मत् पूर्वपत्त्वाल्लुक्। अर्वते अर्वणस्त्रसावनञ इति नकारस्य तकारादेशः व
निपक्तोपत्वादनुदात्तोपदिशे यातुस्वरः घनेव भर्तो घन इति कठिन गम्यमाने हंते रप्प्रत्ययो तनि पात्यते। श्नथ श्नथ हिंसार्थः
ण्यंतादृढि बहुलं छंदसीति शपो लुक्॥ ॥इति प्रथमस्य पंचमे चतुर्थो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥त्वां ह त्यदिन्द्रार्णसातौ स्वर्मीळ्हे नर आ
जा हवंते। तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत्॥ ॥हे इन्द्र अर्णसाता अर्णानां गतृणां युद्ध प्रवृत्तानां पुरुषाणां सातिर्लाभो य
स्मिन् स्वर्मीळ्हे मीळ्हमिति धननाम स्वः अरणीयं धनं यस्मिन् एवंभूते आजा आजौ संग्रामे त्यत्तं त्वां प्रसिद्धं वा नरो युयुत्सवः पुरुषाः सहायार्थं
हवंते आह्वयंति। यद्वा अर्णस्य उदकस्य सातिर्लाभो यस्मिन् इत्यादि युद्धे तस्मिन्नित्यर्थः। वृत्रनिरोधके नरवृत्रेण सह वर्षणार्थं तव युद्धं तव स्तो
तारः त्वां प्रार्थयंतीति भावः यस्मादेवं तस्मात् हे स्वधावः हे अन्नवत् बलवन्वा इन्द्र समर्थे संग्रामे तव मंत्रेधिनी इयमूतिः त्वदीयमिदं रक्षणं आ
अस्मदभिमुख्येन भूत भवतु वाजेषु संग्रामेषु पोर्डतिः अतसाय्या याच्यभिः प्राप्तव्या भवतीत्यतसः यांसकुगतिरिति त्याययालुक्। अर्णसातौ
जगतो। बहुवचनादेणा दिकोतप्रत्ययः षणसाने इत्यस्मादुपात्तिनिजनसनखनामित्यनुनासिकस्यात्वं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं यद्वा उदक
नुदवत्यंते रसन्प्रत्ययान्तुडागमश्च। पीवापयमानदीनां छंदसि लोपो वक्तव्य इति सलोपः। निता दा सुदात्तत्वं पूर्वपद छंदवबहुव्रीहिस्वरः॥ स्वर्मीळ्हे स्व
रन्तात्यायत्रस्वरमास्नाविति स्वरितः। बहुव्रीहि स्वरणमप्यवहिष्यते। आजा मृष्पौमकुगतिसमम्याडादेशः स्वधावः मतुवसोररिति मतुपार त्वं। अ
तसाय्या अत सातत्यगमने औणादिकः साय्यप्रत्ययः तस्याडागमश्च आगमानुदात्तत्वे प्रत्यय घकारत्वं। भूत छंदसि लुङ् लङ् लिट इति प्रार्थना
यां लुङि बहुलं छंदस्यमाङ्योगेपीत्यडभावः॥ ॥सप्तमीमृचमाह॥ ॥त्वं ह त्यदिन्द्र सप्त युध्यन्पुरो वज्रिन्पुरुकुत्साय दर्दः। बर्हिर्न यत्सुदासे
यथा वर्ग्हो राजन्वरिवः पूरवे कः॥ ॥हे वज्रिन् वज्रवन्निन्द्र पुरुकुत्साय एतत्संज्ञाय नृपाय युध्यन् तदीयशत्रुभिः सह युद्धं कुर्वाणः त्वमेव त्यत्ताः
सप्त पुरः नदीयानि सप्तसंख्याकानि नगराणि दर्दः व्यदारयः अभैत्सीरित्यर्थः अपि च स्त्रीसएतत्संज्ञायराज्ञेअहोः एतत्संज्ञस्यासुरस्य
संबंधि युद्धं न मलितं तथा अनायासेन बर्हिर्न बर्हिरिव वर्कं अचृणक् आछिन्न इत्यर्थः। तदनंतरं पूरवे तां हविषा पूरयते तस्मै सुदासे हे रा
जन् स्वामिन्निन्द्र वरिवो धनं कः अकार्षीः त्यतसर्वा सकुगतिविभक्तेर्लुक् दर्दः दृविदारणे अस्मा यङ्लुङ् ता लुङि सिपि अदादित्वाच्छपि व
नाभ्यस्तोपात्तृहल्ड्याभ्य इति सलोपः। बहुलं छंदस्यमाङ्योगेपीत्यडागमः सुदासे शोभनं दानानि सुदाः असुन सुदाः कल्याणदान
इति यास्कः। वक् वृजी वर्जने लङ् सिपि बहुलं छंदसीति विकरणस्य लुक् लघूपधगुणपूर्ववत् सलोपः। अडभावश्च। चोः कुरिति कुत्वं कः
डुकृञ् करणे लुङि सिपि मंत्रे घसेति च्लेर्लुक् पूर्ववत् सलोपाडभावौ॥ ॥अष्टमीमृचमाह॥ ॥त्वं त्यां न इन्द्र देव चित्रामिषमापो न पीपयः
परिज्मन्॥ यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै॥ ॥हे देव द्योतमान इन्द्र त्वं नोऽस्माकं चित्रं चायनीयां तामिषमन्नं परिज्मन् परि
तो व्याप्ताया भूमौ पीपयः प्रवर्धय यथा सर्वाभिः अंनेन परिपूर्णा भवंति तथा कुर्वित्यर्थः। तत्र दृष्टांतः। आपो न यथा अपो वृष्टयुदकानि भू

भा॰प॰
१३६

स्यावर्षणेन प्रवर्धयसि तदुक्तं यद्यप्यस्मा अवर्तमानानस्मान् यथा अपः पाययसि एवं न दुग्धि यामिष मपि पाययेति भावः। इरेरं इरयया उपात्तं आत्मा
नं ईवं अस्मभ्यं प्रतियंसि प्रयच्छसि। न च इदृशांतः विश्वधः विश्वतः सर्वतः क्षीरं धेयं क्षितं उर्जं इष्टं मिव यथाम्मभ्यं बहुलमुदकं प्रयच्छसि
तद्वत्। प्राणधारणरूपं ईवनमपि प्रयच्छसीति भावः। आपः उग्निग्रामेष्वत्र यं अनं तस। आ मन्नित्यादिना दीर्घः। पीपयः स्फायी वृद्धौ
ण्यन्तात् लुङि संलुङि पयः पितिव्यत्ययेन पी भावः। निश्चिद्दृम्भ्य इति ह्रस्वः। णिलोपादीनि। पीडः पान इत्यस्मात् लुङि चङि। चङिपूर्व
वत्। बहुलं छन्दस्यमाङ्योगेपीत्यडभावः॥ परिज्मन् ज्मतिगतिकर्मा अजगतिक्षेपणयोः आभ्यां परिपूर्वाभ्यां श्वन्नुक्षन्नित्यादौ
कनिन्प्रत्ययांतो निपातितः। सपांसलुगिति सप्तम्या लुक्। यंसि। यम उपरमे बहुलं छन्दसीति शपो लुक्। मनं आज्ञन्यत्रापि दृश्यत इति इश्वत
त्यात्मन आकारलोपः संज्ञापूर्वकस्य विधेरनित्यत्वादुपधादीर्घाभावः। विश्वधा विश्वत्राधानिमित्ते आकारलोपे रूपम् एवं च रथा इत्यादिरिलानक्षरं धेश्वरं
संचलनं नुमर्थम सनेनति अर्थन प्रत्ययः॥ निलादाय उदात्तत्वं॥ ॥ नवमीमृचमाह॥ ॥ अकारि त इंद्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्यां॥
सुपेशसं वाजमाभरा नः प्रातर्मक्षू धियावसुर्जगम्यात्॥ हे इंद्र त्वं गोतमेभिः गोतमगोत्रैः ऋषिभिः अकारि स्तोत्रं कृतमित्यर्थः। एत
देव स्पष्टीकरोति। ब्रह्माणि मंत्ररूपाणि स्तोत्राणि नमसा नमस्कारेण सह हरिभ्याम् अश्वाभ्यां युक्ताभिमुख्येन उक्तानि। यद्वा मर्यादायामाकारः यथा
शास्त्रं प्रयुक्तानि। सत्वं सुपेशसं सुरूपं शोभनरूपं बहुविधरूपयुक्तं वाजम् अन्नम् अस्मभ्यं आभर आहर। ईदृशोऽयं धियावसुर्धिया बुध्या कर्मणा वा प्राप्तधन
इंद्रः प्रातः काले अस्मत् इष्टपूरणार्थं जगम्यात् आगच्छतु। जगम्यादिति यङ्लुगन्तालिङि बहुलमिति शपो लोपः। सुपेशसं। सु उपसर्गोऽवयवे अस्य वसुर्ब्रह्मोद्दा आय
दीर्घश्छन्दसीत्य उत्तरपदाद्युदात्तत्वं। भरहृग्रहोर्भ इति भत्वं। धियावसुः। धियेति संहितायां दीर्घः॥ ॥ इति प्रथमस्य पंचमे पंचमो वर्गः॥ ॥
तं ऋष्णम गधीवनि पंच दश वसुमन्नं आत्मनं माधसं अत्यं मारुतं अस्यार्षिं त्रिष्टुप छंदः त्रयोदशी गत्यः। तथा चानुक्रांतं। तृष्णमपंचोनामारुतं त्रिष्टु
बंतमिति। चतुर्विंशतिकः इत्यग्निमारुतं वृहन्मारुतं निविद्धानीयं सन्निर्वैश्च पृश्न्य स्येत्याद्ये सूक्तमाद्यमर्ध यतानव धंत इत्याग्निमारुतमिति अभिप्लविके
पंचमे हन्यग्न्यत्ते दाग्निमारुतमारुतानिविद्धानं सन्निर्वेचा पृश्न्यस्य तृष्णमाद्याधीयत इति सूत्रितं उत्तरु त्वाग्निमारुतमिति॥ ॥तत्र प्रथमामृचमाह॥
तृष्णमश्चा यमश्वमायवश्च सनाधश्च सुत्रि ग्रभग मसर स्नुः। अपानधीमागमन सा मतुस्यामिरः समं तविद्युथवामभवः॥ अत्र पृर्वार्धं नस्त
तानाधाः प्रवर्धने हनाधः तृष्णमकामानां वर्षणेन सस्वायशोभन पतायवाधसपुण्यपलादीनां कुर्वीयायासनि दिपुण्याधि कल्यानि वा यां तेषां वि
धायमरद्रः विभक्ति व्यत्ययः मरुतामितगतिरग्र्याध्या यसमन्नाय सनाधकं सप्रुष्वा वर्तेक सुप्रिय उचितानामं प्रभरग्रे स्वयं सतीतिवा
वत सत्यो भिगृति ता नाधा हाधीग धीमान सूक्ष्मस्य शोभना गुलियुतः करतान्ताह सिद्धिर्य र्थः। एवं भूता इमं मरुत्सामिरः स्तुतिलक्षणा वाचः समंत
सम्यक्त्यक्ताः करोमि। यामिर्गाभिर्गद्यपुष्यपुआ भुवः। आङ् मर्यादायां यथा शास्त्रं प्रयुक्ता भवंती इत्याभुवः देवताभिमुखीकरणाय समर्थाः
यज्ञ योग्याः स्तोत्रमंतः पूर्वं कंमर तगणं स्तोमीति भावः॥ अपान यथा पर्जन्यो युगपदेव इदुर्वृष्टि करोत्यवदुपात्तं प्राणिवर्षति तद्वत् तत्र सूयवसेचन
कानि पुरुषिलाक्षित्याह्निनाकृनिन प्रत्ययः वित्वाद्गुणाभावः। तवद्रांत इति वनिताद्यपदात्तत्वं। चतुर्थ्यर्थे वचनं अतुष्पोनुदात्ताकारलोपः ग्रावीयश्च
धृष्णम हिन ऊर्ध्वं तमनं यतनं यहेवता हिकृतिमति ऊर्ध्वामर तमघः कृगणघजन्निला दायधदान तं। सूमस्वायशोभनाम रवायरप्यन ज्ञमन्याणि
ति ग्रामश्चत्ययेन पूर्वपदप्रकृतिस्वरत्वं। नाधः पादादित्वान्निघातो भाषिक मामंत्रितायुदात्तत्वं॥ मरुत्त्वाः इत्यत्र वा हस्वः भवदुंद्रसतिं यत त्य १३६

तेनाववृत्या युदात्तत्वं। ततः सुत्रां दनवद्रहतीं हा आघयदात्तं स्वच्छंदसीति इन्नरपदाद्युदात्तत्वं प्रकृतिस्वरत्वं॥ ॥द्वितीयामृचमाह॥ ॥ ये ज्ञत्रिरेः 271
दिवकृवास उक्षणो रुद्रस्य मर्या असुरा अरेपसः॥ पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः॥ ये मरुतो दिवो न रिसाज्ञतिस्मा 1924
दुर्वभूवः वीरं दशा कृबासः दर्शनीयाः उक्षणः सेक्तारः युवान इत्यर्थः। रुद्रस्य मर्याः मर्यशब्दो मनुष्यवाची इह मरुतां मर्त्यवासंभवात् पुत्रा
इत्यस्मिन्नर्थे पर्यवस्यति। मरुतां रुद्रपुत्रत्वं च मंत्रांतरे स्पष्टमाम्नातम् मरुतामत्र मतिर्ति असुराः शत्रूणां निरसितारः अरेपसः रेप इति पाप
नाम पापरहिताः पावकासः सर्वेषां शोधकाः सूर्या इव शुचयो दीप्तिमान सत्वानो न यथा परमेश्वरस्य भूतगणाः अतिकायिन बलपराक्रमाः तद्वद्
गा इत्यर्थः। सत्वान इति भूतगण उच्यंते। अथा यः अस्य सत्वान इत्यादौ तथा दर्शनात्। द्रप्सिनः द्रप्सः उदकविंदुभिर्युक्ताः मरुतः सत्त्वांस्ते
ती निश्चत्तः घोरवर्पसः वर्प इति रूपनाम घोरवराः शत्रूणां भयंकररूपाः इत्यर्थः। यद्वा सत्वानो न घोरवर्पसः यथा भूतगणा भयंकररूपा तद्वद्
ते मरुतामित्यर्थः। कृवासः कृबासः कृपा गतिगत्यर्थो बुध्यर्थाः इति अवज्ञानार्थः। सर्वनिघृष्वेत्यादौ वप्रत्ययांतो निपातितः। आज्जसेरसुक उक्ष
णः वाय पूर्वस्यानिगमइत्युपधादीर्घाभावः। अरेपसः बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। सत्वानः षद्लृविशरणगत्यवसादनेषु प्रईर
सर्वधातुभ्यः इति विधीयमानः क्वनिप्प्रत्ययो बहुलवचनात् कर्तर्यपि भवति प्रत्ययस्य पित्वाद्अनुदात्तत्वे धातुस्वर एव शिष्यते॥ ॥ तृतीयामृचमा
ह॥ ॥ युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव॥ दृळ्हा चिद्विश्वा भुवनानि पार्थिवा प्र च्यावयंति दिव्यानि मज्मना॥ ॥युवानस्तर
णाः रुद्राः रुद्रपुत्राः अजराः जरारहिताः अभोग्घनः ये देवान हविर्भिर्न भोजयंति तेषां हंतारः अध्रिगावः अधृतगमनाः परैरनिवारितागतयः
पर्वताइव दृढांगाः एवं भूता मरुतः ववक्षुः वोढारं स्तोतारं अभिमतं प्रापयितुमिच्छंति अपि च दृढानि स्थिराणि अपि विश्वा सर्वाणि भुवनानि सद्भावं प्राप्तानि पार्थिवा पृथिव्यां भवा
नि दिव्यानि दिविभवानि च वस्तूनि इत्यर्थः चिन्त दृढान्यपि मज्मनेति बलनाम स्वेन शोधकेन बलेन प्रच्यावयंति प्रचालयंति। अभोग्घनः। भोजयंतीति
भोजाः न भोजाः अभोजाः तेषां हंतारः बहुलं छंदसीति हंतेः क्विप् सज्ञायामन्यतरस्यामिति हकारस्य घत्वं इन्हन्पूषार्यम्णां शाविति नियमाद्दीर्घा
भावः। ववक्षुः वक्ष्प्रापणे। अस्मादिच्छायां सनि एकाच उपदेशे इति इट्प्रतिषेधः द्विर्भावः अत्व कत्व षत्वानि सन्यत इतित्वाभावः। छांदसः लिट् उसि अमंत्रित
इति निषेधात् आम्प्रत्ययाभावः अतो लोप उसकारलोपः प्रत्ययस्वरः पादादित्वान्निघाताभावः॥ ॥चतुर्थीमृचमाह॥ ॥ चित्रैरंजिभिर्वपुषे व्यंज
ते वक्षःसु रुक्माँ अधि येतिरे शुभे॥ अंसेष्वेषां नि मिमृक्षुरृष्टयः साकं जज्ञिरे स्वधया दिवो नरः॥ वपुरिति रूपनाम। वपुषे रूपाय शोभार्थं मरु
तः चित्रैः नानाविधैः अंजिभिः रूपाभिव्यंजनसमर्थैराभरणैः शरीराणि व्यंजते व्यक्तं कुर्वंति अलंकुर्वंतीत्यर्थः। वक्षःसु भुजांतरेषु रुक्मान्
रोचमानान् हारान् अधि येतिरे उपचक्रिरे शुभे शोभनार्थं अपि च एषां मरुतां अंसेषु ऋष्टय आयुधानि नि मिमृक्षुः नितरां स्थितानि
भवंति। यतिरिया ती प्रयत्नो अतः एकहल्मध्य इत्येत्वाभ्यासलोपौ। श्भ्रभर्दी सम्पदादिलक्षणो भावे क्विप् सार्वकाव इति चतुर्थ्या
उदात्तत्वं मिमृक्षुः मृज शुद्धौ अस्मात् निर्दिवान् अभावः हलंताच्चेति सनः कित्वात् गुणाभावः द्विर्वचनादि सन्यत इतीत्वं। लिट् उसि अकारलोपः जज्ञि
रे जनी प्रादुर्भावे लिटि गमहनेत्यादिना उपधालोपः॥ ॥ पंचमीमृचमाह॥ ॥ ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिरक्रत॥
दुहंत्यूधर्दिव्यानि धूतयो भूमिं पिन्वंति पयसा परिज्रयः॥ ॥ईशानकृतः ईशानं धनाधिपं कुर्वाणाः धुनयः मेघादीनां कंपयितारः रि

आदक्षसः शिशवांदिसकानां अनारः यद्वा शिशवो नाहिंसता अमितानां निरसितारः एवंभूता मरुतः तविषीभिर्बलैर्वातान् पूर्वोक्तान् वातादीन् वि
भा॰ प॰ धूनतः विधूनयंतः अमानान्यद्रितस्थानानकर्तु कुर्वंति वाच परिज्रयः परितो गंतारो धृतयः कंपितारो मरुतो दिव्यानि दिवि भवानि दुध्रकृतः दुःखेनानिभवितुः
३३० न्याणि दृढतराणि कुर्वंति तत्करणादिनं कुर्वंतीत्यर्थः । नद्वजेतर्भ्रमिमपश्यमामघानिर्भ्राततो नाद्रकृतानेकेन पिन्वंतीति सिंचंतीति शासः इरिंद्रादिसा
यो उपधनात्पीवतः कः शिशितिहिंसं तीतिरिशाः शत्रवः तान्दं तीतिरिशादसः अत्र कृत्स्नान्यद्रा सुदानतं कृदुत्तरपदप्रकृतिस्वरत्वं । यद्वा रि
शान्ता नशावंतान भक्षयणं इत्यस्मात् क्विप् व्यत्ययेन पूर्वपदस्यापभादिर्षः ॥ अंतो दानतं च पृ तत्कारणं दंभकार्य सावर्त मानो कुरुमंत्रे घसेति
लुक् ॥ कृधः मवां मकुगितिविभक्तेर्लुक् ॥ ॥ इति प्रथमस्य पंचमे षष्ठो वर्गः ॥ ॥ षष्ठीमृचमाह ॥ ॥ मरुत्वतीयशास्त्रपिन्वंत्यप इत्येषाधाय्या
सूत्रितं च ॥ अग्निर्नेतान् सामकृतुभिः पिन्वंत्यप इति धाय्या इति । तामेतां सप्तमीं षष्ठीमृचमाह ॥ पिन्वंत्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वा
भुवः । अत्यं न मिहे वि नयंति वाजिनमुत्सं दुहंति स्तनयंतमक्षितं ॥ सुदानवः शोभनदानाः पयः क्षीरवत् सारवतीरपः पिन्वंति सिंचंति आभु
वंतीत्याभुवः बुध्या घनवृद्धिविदथया भुवः ५ कृतिनः तविदथेषु यज्ञेषु घृतवत्यथाघृतं सिंचंति एवं मरुतो वृष्टिं कुर्वंतीति भावः ॥ तत्र हेतुमाह ॥
अत्यं न यथा अश्वं सादिनो विनयंति युध्यार्थं विशेषयंति एवं मरुतो वाजिनं वेगवंतं मेघं मिहे वर्षणाय विनयंति स्वाधीनं कुर्वंतीति भावः । विनीयंत
तस्तनयंतमर्जंतं अक्षितं अक्षीणं उत्सं उत्सवंत्यस्मादाप इति उत्सो मेघः तं दुहंति निर्गतां कुर्वंतीत्यर्थः । दानवः नुप्रत्ययांतो दानुशब्द आद्युदात्तः ॥
बहुव्रीहौ बहावाद्युदात्तं । धनुर्वृ सुपीत्यत्नरपदादुदात्तत्वं । मिह मिहे सेचने संपदादिलक्षणो भावे क्विप् सावेकाचस्तृतीयादिर्विभक्तिरुदात्ता । स्तनयंतं स्तन
शब्दे चुरादिः देतेः अदंतो कापस्पसर्थानिवद्भावाद्वृध्यायभावः ॥ ॥ सप्तमीमृचमाह ॥ ॥ महिषासो मायिनश्चित्रभानवो गिरयो न स्वतव
सो रघुष्यदः । मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वं ॥ महिष इति महन्नाम महिषासो महांतः मायिनः प्रज्ञानवंतः माया
विनः प्रज्ञाः चित्रभानवः शोभनदीप्तयः गिरयो न स्वतवसः पर्वता इव स्वकीयेन बलेन युक्ताः रघुष्यदः शीघ्रगमनाः हे मरुतः एवंगुणविशि
ष्टाः यूयं हस्तिवंतो मृगा इव गजा इव वनानि वनानि वृक्षजातानि खादथ भक्षयथा प्रभंजयथा तस्मात् आरुणीषु अरुणासु वडवासु नि
वीवतो न्यपुध्वं संयोजितवंतः तस्माद्वनाभिर्वा प्रबलानतनतं युक्ताः भवंतः सर्वं भंजंत इत्यर्थः । रघुष्यदः स्यंदु प्रस्रवणे
रघु शीघ्रं स्यंदंते गच्छंतीति रघुष्यदः क्विप् चेति अनिदितामिति नलोपः । वालमूलल्लघ्वलं गुलीनां वा लो रत्वमापद्यत इति वचनात् लत्वं
कृत्यः कृदुत्तरपदप्रकृतिस्वरत्वं । खादथ खाद भक्षणे । अयुग्ध्वं युजिर् योगे लुङि झलो झलीति सिचो लोपः छांदसत्वात् धिः च कारलोपः
चोः कुरिति कुत्वं अडागम उदात्तः । यद्वृत्तयोगादनिघातः ॥ ॥ अष्टमीमृचमाह ॥ ॥ सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो विश्ववे
दसः । क्षपो जिन्वंतः पृषतीभिरृष्टिभिः समित्सबाधः शवसाहिमन्यवः ॥ प्रचेतसः प्रकृष्टज्ञाना मरुतः सिंहा इव नानदति भृशं शब्दं कुर्वंति
यथा सिंहा गिरिगह्वरेषु गंभीरं गर्जं कुर्वंति एवं मत्सख्या गतेषु गंभीरः शब्द इत्यर्थ इति भावः तथा सुपिशः शोभनावयवाः शोभनालं
३३० काराः वा तत्र दृष्टांतः पिशा इव पिशा इति रुरुनामः यथा रुरवः स्वशरीरगतैः श्वेतबिंदुभिः अलंकृताः तद्वत् विश्ववेदसः सर्वज्ञाः क्षपः शत्रू ३३०
णां क्षपयितारः जिन्वंतः प्रीणयंतः शवसा बलेन अहिमन्यवः आहननशीलमन्युयुक्ताः यद्वा पयः का पोआ यतनस्यहन
नसमर्था इत्यर्थः । यद्वा मनने ज्ञाने मन्युः अहीनज्ञानाः इत्यर्थ इत्यर्थः । एवंभूता मरुतः पृषतीभिः पृषत्य इति मरुतां वाहनस्या

श्वाः पृषत्यः श्वेतबिंदुचिह्निताः मृग्य इत्यर्थः तादृशिका नानावर्णा मेघमाला इति नैरुक्ताः ताभिः ऋष्टिभिरायुधैश्च सहिताः संतः सबाधः शत्रुभिः बा 273/1924
धितान् यजमानान् समितः समानमेव युगपदेव रक्षितुं गच्छंतीति शेषः । नानदति शब्दे अस्माद्यङ्लुगंतात् ... पिशा इव पिशा अवयव उपु
पधलक्षणः कः सुपिशः शोभनानि पिशा अवयवा इत्यस्मात् क्विप् चेति क्विप् । पृषतीभिः पृषु सेचने वर्तमाने पृषन्बृहन्महज्जगच्छत्वच्चेति शा
तृ यद्वा वा दुगितश्चेति ङीप् अतएव शतुरनुम इति नद्या उदात्तत्वं प्राप्तं यद्वा महतामुपसंख्यानमिति नियमात् तस्याभावः ॥ ॥ नवमीमृचमाह ॥
रोदसी आ वदता गणश्रियो नृषाचः शूराः शवसाहिमन्यवः । आ वंधुरेष्वमतिर्न दर्शता विद्युन्न तस्थौ मरुतो रथेषु वः ॥ हे गणश्रियः गणशः
श्रयमाणाः सप्तगणरूपेणावस्थिताः नृषाचः नृन् यजमानान् हविः स्वीकरणाय सचमानाः शूराः शौर्योपेताः एवंभूता हे मरुतः शवसा
बलेन अहिमन्यवः आहननस्वभावकोपयुक्ताः संतः रोदसी द्यावापृथिव्यौ आ वदत आसमंताच्छब्दयंत युष्मदागमने सति भवदीयशब्देन
द्यावापृथिव्यौ पूरणानि कुरुतेति भावः । किंच हे मरुतः वो युष्माकं तेजः बंधुरेषु बंधकाष्ठनिर्मितं सारथेः स्थानं वंधुरमित्युच्यते । तद्युक्तेषु
रथेषु आतस्थौ अतिष्ठति अवस्थितं सत् सर्वैर्दृश्यते तत्र दृष्टांतः द्वयमुच्यते ॥ अमतिर्न अमतिरिति नामयथा निर्मलं रूपं सर्वैर्दृश्यते दर्श
ता विद्युन्न यथा वा दर्शनीया विद्युत् मेघस्थं सर्वैर्दृश्यते एवं रथेष्ववस्थितानां युष्माकं ज्योतिरपि सर्वैर्दृश्यत इत्यर्थः । वदत ... चित्तुनु घेत्यादि
दीर्घः । नृषाचः षच समवाये । सत्सूद्विषेत्यादिना क्विप् । ... । अमतिः अम गत्यादिषु । अमेरतिः औणादिकोऽति प्रत्ययः । प्रत्ययाद्युदात्तत्वं । दर्शनाभ्रमदृशीत्यादि
ना अतच् प्रत्ययः चित्वात् अंतोदात्तत्वं ॥ ॥ दशमीमृचमाह ॥ ॥ विश्ववेदसो रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः ॥ अस्ता
र इषुं दधिरे गभस्त्योरनंतशुष्मा वृषखादयो नरः ॥ ॥ विश्ववेदसः सर्वज्ञाः रयिभिर्धनैः समोकसः समाननिवासाः समवेताः धनाधि
पतय इत्यर्थः । तविषीभिः बलैः संमिश्लासः संमिश्राः संयुक्ता इत्यर्थः । विरप्शिनः महांतः महत्त्वमानाः अस्तारः शत्रूणां निरसितारः अ
नंतशुष्माः अनवच्छिन्नबलाः वृषखादयः वृषा इंद्रः खादिरायुधस्थानीयो येषां ते तथोक्ताः । यद्वा वर्षणसमर्थः खादिः खादयः प्रे यो येषां
ते नरो नेतारः एवंभूता मरुतः गभस्त्योरिति बहुनाम गभस्त्योः बाह्वोः इषुं दधिरे शत्रूणां निरसनाय धनुर्बाणादिकमायुधं धारयंतिस्म ॥
कसः उच समवाये अस् निवहूल वचनात् कुत्वमिति कथं के इत्यन्ये । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । संमिश्लासः कपिलकादित्वाल्लु
त्वं । विरप्शिनः यद्वा विविधरपणं विरप्शं तद्वान् मत्वर्थीयः तमरतां हि विविधं शब्दं कुर्वंत इति प्रत्ययस्वरः । अस्तारः ताच्छीलिकस्तृन् इउभावः
छांदसः नित्वादाद्युदात्तत्वं । अनंतशुष्माः नास्त्यंतो यस्य अनंतः नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । अनंतशुष्मो बलं येषां बहुव्रीहौ पूर्वप
दप्रकृतिस्वरत्वं । वृषखादयः । खादृ भक्षणे औणादिक इन्प्रत्ययः वृषन् शब्दः कनिन्प्रत्ययांतः आद्युदात्तः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ।
॥ ॥ इति प्रथमस्य पंचमे सप्तमो वर्गः ॥ ॥ एकादशीमृचमाह ॥ हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नंत आपथ्यो न पर्वतान् ॥
मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः ॥ मरुतः हिरण्ययेभिः सुवर्णमयैः यद्वा हितरमणीयैः पविभिः रथानां च
क्रैः पर्वतान् पर्ववतो मेघान् यद्वा गिरीन् उज्जिघ्नंते ऊर्ध्वं गमयंति स्थानात् प्रच्यावयंतीत्यर्थः । तत्र दृष्टांतः । पथ्यो न यथा पथि
गच्छन् पथ्यः मार्गे आस्थितं वृक्षादिकं चूर्णीकृतोर्ध्वं नयति । यद्वा यथा संयुक्ता गजाः । मार्गास्थितं वृक्षादिकं भग्नं कुर्वंति किं च हे मरुतः

भा॰ त्र॰ तः पयोवृधः पयसा रसस्योदकस्य वा वर्धयितारः। यद्वा एभिः पयसा वर्धमानाः पृश्निर्वै पयसो मरुतो जाता इति श्रूयते। मखाः मख इति य
ज्ञनाम तद्वन्तः अयासः देवयजनदेशं प्रति गन्तारः। स्वसृतः आत्मनैव प्रति स्वयमेव सरन्तो गच्छन्तः। ध्रुवच्युतः ध्रुवाणां निश्चलानां पर्वता
१३८ दीनामपि च्यावयितारः दुध्रकृतः दुध्रं दुःखेनान्यैर्धारयितारं आत्मानं कुर्वाणाः यद्वा दुर्धरं अन्यैर्धर्तुमशक्यं आत्मानं कुर्वाणाः भ्राजदृष्
यः दीप्यमानायुधाः उञ्जिघ्नं तेहं तथ्यस्य यन्नात्मन पदबहुलं छन्दसीति आपः श्लुः बहुलं छन्दसीत्यभ्यासस्येत्वं गमहनेत्यादिना उपधालो
पः हो हन्तेरिति घत्वं। प्रत्ययेनानात्मनः। पथ्यः भवच्छन्दसीयत्नेनस्विधितइतिछिलोपः प्रत्ययस्वनान्तस्वरितत्वं। यद्वा छन्दसीवनिपाविति मत्वर्थी
य उकारः। इत्याद्युत्तरस्वरितत्वमूर्णा इति विभक्तेः स्वरितत्वं। अयासः अयपयगतौ अयं तइत्यस्याः पचाद्यच् आज्जसेरसुक्। दुध्रकृतः॥
अत्र दुःशब्देन दुःखाल्पार्थं तथ धृञ् धारणे इत्यस्मात् धारयतीति दुधः मूलविभुजादित्वात् कप्रत्ययः। यद्वा ईषदुःखार्थीति दुःशब्द उपपदे क
र्मणि खलु गुणाभावे श्यांदसः। तं कुर्वन्तीति दुध्रकृतः करोतेः क्विप् च लिङ्कि परेकृत्पश्यांदसः॥ ॥द्वादशीमृचमाह॥ ॥घृषुं पाव
कं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि। रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये॥ घृषुं शत्रूणां बलस्य कर्ष
कं विनाशयितारं पावकं सर्वेषां शोधकं वनिनं वननमिन्द्रकं नामद्रकं वृष्टिप्रदमित्यर्थः। विचर्षणिं विशेषेण सर्वस्य द्रष्टारं रुद्रस्य
रुद्रदेवस्य सूनुं पुत्रभूतं एवंविधं मरुतां समूहं। हवसा आह्वानसाधनेन स्तोत्रेण गृणीमसि शब्दयामस्तुम इत्यर्थः। हे ऋत्विग्यजमा
नाः यूयमपि श्रिये ऐश्वर्याय धनार्थं मारुतं गणं मरुतां संघं सश्चत प्राप्नुत कीदृशं रजस्तुरं पार्थिवस्य पांसोः प्रेरयितारं प्रकरमित्यर्थः। तव
सं प्रवृद्धं ऋजीषिणं तृतीयसवने हि मरुतस्तृप्यन्ते तत्र च ऋजीषमभिपुण्वन्तीति ऋजीषसंबंधः श्रुतं अत एव तद्वन्तं वृषणं कामानां वर्षितारं हव
सा केशोसि प्रत्ययेन बहुलं छन्दसीति संप्रसारणं गृणीमसि एजाद्यर्थे ईदन्तो मसि इति नांतस्य इति स्वत्वं। रजस्तुरं रजांसि तूर्णातीति रज
सः तुर त्वरणे क्विप् वा निवृक्तिपरुषेण वा सपूर्वस्य निगमइति दीर्घाभावः। सश्चत सश्चरयस्वजगतविज्ञत्रसश्चिमध्यकइति धातुर गत्युक
गतिकर्मसु षत्वसतीतिपवित्वं। श्रिये सावेकाचइतिविभक्तेरुदात्तत्वं॥ ॥त्रयोदशीमृचमाह॥ ॥ प्रनूस मर्तः शवसा जना अति तस्थौ व ऊती मरुतो
यमावत। अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति॥ हे मरुतो यो युष्माकं ऊती ऊत्या रक्षणेन यं पुरुषं आवत अरक्षत अपि च स पुरुषः
अर्वद्भिः अश्वैः साधनभूतैर्वाजं अन्नं नृभिः स्वकीयैर्मनुष्यैर्धनानि च भरते संपादयति। तथा आपृच्छ्यं आपृच्छ्यं शोभनं क्रतुं अग्निष्टोमादिकं
आक्षेति आप्नोति पुपुष्यति प्रजया पशुभिः पुष्टो भवति ऊती ऊत्या सुपां सुलुगिति पूर्वसवर्णदीर्घत्वं नृभिः नृचान्यतरस्यामिति विभक्तेरुदात्तत्व प्रतिषेधः
।आपृच्छ्यं इतिनिपातस्वाद्यो आङ्पूर्वस्य प्रच्छतेः क्यप्रत्ययान्तो निपात्यते। ग्रहिज्यादिना संप्रसारणं प्रत्ययस्य पित्वात् अनुदात्तत्वे धातुस्वरः श्रूय
ते। कृदुत्तरपदप्रकृतिस्वरत्वं। क्षेति क्षि निवासगत्योः बहुलं छन्दसीति विकरणस्य लुक् पुष्यति पुष पुष्टौ दिवादित्वात् श्यन् तिङः परत्वाद्भावाभा
वः॥ ॥चतुर्दशीमृचमाह॥ ॥चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन। धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हि १३८
माः॥ हे मरुतः मघवत्सु हविर्लक्षणधनयुक्तेषु यजमानेषु पुत्रं धत्तन स्थापयतेति यावत। कीदृशं पुत्रं चर्कृत्यं पुत्रकार्येषु पुनःपुनः पुरस्कर्तव्यं स
र्वकर्मकुशलमित्यर्थः। पृत्सु संग्रामेषु दुष्टरं दुस्तरं तरितुमशक्यं अजय्यमित्यर्थः। द्युमंतं दीप्तिमंतं शुष्मं शत्रूणां शोषकं बलवंतं धनवंतं धनस्पृतं

धनानां स्पृहयितारं धनैः प्रीतं वा उक्थ्यं उक्थैः स्तोत्रैः प्रशस्यमित्यर्थः। विश्वचर्षणिं विशेषेण द्रष्टारं सर्वज्ञं एवंविधं तोकं पुत्रं तनयं पौत्रं च शतं हिमाः धनेमाः 275
हेमंतर्तुपलक्षितान् शतसंवत्सरान्। संवत्सरान् जीवंतः संतः पुष्येम पोषयेम। अत्र हिम शब्देन तद्युक्तत्वं मंतव्यं योभिधीयते तथा च ब्राह्मण एवाम्ना 1924
म्नायते। शतं हिमा इत्याह। शतं त्वा हेमन्तानिन्धिषीयेति वा वेत्याहेति। चर्कृत्यं प्रतिपदं प्रपदं पतया इत्युपगन्तव्यमित्यर्थः इति न्यायेन करोतेर्यङ्लुगन्तादि
आचार्याः स्यादिति क्यप तुगागमः। प्रत्ययस्य पित्वादनुदात्तत्वे धातुस्वरः शिष्यते। धनस्पृतं धनेन पूरयितारं यद्वा स्पृहयितारं धना नामुपसंख्यानमिति स्पृहनात्
धनस्य प्रादेशः दुस्तरं दुष्टरं न पूर्वनतरणयोः ईषदुःसुष्विति खल्प्रत्ययः आदेशायुषि तिग णत्वात्यत्वं खित्स्वरेण प्रत्ययस्य पूर्वस्यादात्तत्वं धत्तन पतन ननथ
नाश्च तितस्य नादेशः। शुष्मं शुष शोषणे अस्मात् तस्य पशोर्वा यागस्य नृषितिमिति पायाद्यसंज्ञिनं च शब्दोवा हृद्यो मरुतः शुष्मानां नृषितं मरुतां वीर
वंतमिति॥ ॥तामन्तां सं पंचदशीमृचमाह॥ ॥नूष्ठिरं मरुतो वीरवंतमृतीषाहं रयिमस्मासु धत्त। सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसु
र्जगम्यात्॥ हे मरुतः स्थिरं स्थानं वीरवंतं वीरैः पुत्रैः युक्तं तथा ऋतीषाहं ऋतीषाहं शत्रूणां मभिभवितारं एवंविधं रयिं पुत्रलक्षणं
धनं अस्मासु धत्त स्थापयत सहस्रिणं शतिनं एतत्संख्याकधनवंतं शूशुवांसं प्रवृद्धं अपि चास्माकं रक्षणाय धियावसुः ध्याकर्मणा वा प्राप्त
धनो मरुद्गणः प्रातःकाले जगम्यात् आगच्छतु। नूष्ठिरं नू चिदिति नु धातिदीर्घः। पूर्वपदादिति षत्वं ऋतीषाहं सहेर्गतौ कृत इति च पदे अभिपदे छंद
सि सह इति ण्वि प्रत्ययः अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं सुषामादित्वात् षत्वं शूशुवांसं टुओश्वि गतिवृद्ध्योः लिटः क्वसुः विभाषा श्वेरि
ति संप्रसारणं द्विर्वचनं तुजादित्वादभ्यासस्य दीर्घत्वं वस्वेकाजाद्घसामिति नियमादिडभावः प्रत्ययः स्वरः॥ ॥इति प्रथमस्य पंचमे षष्ठो वर्गः॥
॥ ॥इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमे मंडले एकादशोऽनुवाकः॥ ॥द्वादशेऽनुवाके नव सूक्तानि तत्र पश्वे
त्यादीनि षट् सूक्तानि द्विपदानि तेष्वध्ययन समये द्वे द्वे ऋचौ चतुःपादामेकैकामृचं कृत्वा समाम्नायते अयुक्संख्या सता यान्यतिरिच्यते। सात
थैवाम्नायते प्रायणार्थापि द्वयोरेकत्वप्रयोगेतुताः पृथक्पृथक् शंसनीयाः सत्यतादिपश्वानतायुमिति द्विपदमितितत्र पश्वेति दशर्चं प्रथम
सूक्तं अत्रानुक्रम्यते पश्वाद्दश पराशरः शाक्त्यो द्विपदं त्वादिति। द्विपदा विराट् छंदः विंशतिका द्विपदा विराजइति नद्युक्तेष्वग्निर्देवता परमाग्नेयमै
त्रादिति परिभाषितं। पश्वा न तायुमित्यारभ्य इत्याष्टीयतः प्राक्सूक्तं शतं तत्सर्वमाग्नेयमिति तस्यार्थः द्विपदं तदित्यत्रत्वादिदमादीनि षट् सू
क्तानि तुह्यादिपरिभाषया द्विपदानि दशमे हनि वैश्वदेवशस्त्रे वैश्वदेवसूक्तात्पूर्वं द्विपदं सूक्तं शंसनीयं सूत्रमुदाहृतं॥ ॥तत्र प्रथमामृचमाह॥
पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तं॥ सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन्विश्वे यजत्राः॥ धीराः मेधाविनो देवाः सजोषाः समानप्रीतयः
संतः हे अग्ने त्वां पदैर्मार्गैः पादचिह्नैर्वा अनु ग्मन् अन्वगमन्। कीदृशं पश्वा अपहृतेन पशुना सह वर्तमानं तायुं न तायुरिति स्तेननामयथा स्ते
नः परकीयं पश्वादिधनमपहृत्य बुः प्रदेशे गिरिगव्हरे वर्तते तद्वत् गुहा चतंतं अप्सु पायां गुहायां गच्छंतं वर्तमानं च तत्तिरोहितं अंतर्धानं गच्छेत्तथाग्निरि
पि देवात्साम्नाथ संवत्सरमप्सु तिरोहितत्वान मोयुजानं हविर्लक्षणमन्नं आत्मना युंजानं नमो वहन्तं देवेभ्यः प्रतं हविर्वहंतं यजत्राः यजनीयाः
विश्वे सर्वे देवाः त्वां उपसीदन् समीपं प्राप्नुवन् इदृशः क्त्वार्थः। पश्वा तृतीये कस्य जसादिषु छंदसि वा वचनं इत्यान चिच्छ छंदसीति विकल्प

भा० प्र० णस्य नुक् समतोयाः नुषी प्रीतिसेवनयोः समं जुषंत इति सजोषसः समानस्य छंदसीति सभावः कृदुत्तरपदप्रकृतिस्वरत्वं सपां सुलुगिति जसः सुत्वम्
गमं गुहि मंत्रे घसेति च्लेर्लुक् गमहनेत्यादिनोपधालोपः बहुलं छंदस्यमाङ्योगेपीत्यडभावः यत्रत्राः अभिनसी त्यादिना कन् प्रत्ययः नित्त्वादाद्यु
३३० दात्तत्वं ॥ ॥द्वितीयामृचमाह ॥ ॥ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिर्द्यौर्न भूम वर्धंतीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातं ॥ ऋतस्य
वार्थः स्यदीक्रियं देवाः ऋतस्य गतस्य पलायितस्याग्नेर्व्रतानि कर्माणि गमनस्थानशयनादिरूपाणि अनुगुः अन्वगमन् अनंतरं परि
ष्टिः परितः सर्वतोन्वेषणं भुवद्भुवनं भूमभूमिरपि अग्नेरस्य द्युभिर्द्यौर्न स्वर्गइव अभूत् इंद्रादयः सर्वे देवाः अग्नेरन्वेषणाय भूलोकं
प्राप्ता इत्यर्थः अपः अप्देवताः ईं एनं उदके प्रविष्टमग्निं वर्धंति वर्धयंति यथा देवान् पश्यंति तथा अंशरहितस्य र्भः क्षीदृशं पिन्वा स्तोत्रेण
सुशिश्विंसम्यग्वर्धितं कृतस्य योनौ निमित्तभूतस्य यज्ञस्य कारणभूते अब्गर्भस्थाने मध्ये सुजातं सुष्ठु प्रादुर्भूतं ॥ एवमग्नेः वृत्त
मानमग्निं देवाभ्यामत्यः प्रादोचनंतरं नरं देवाः तमवाप्नुवन् इति भावः तथा च तैत्तिरीयकं सन्निलायत सोपः प्राविशत्तं देवताः प्रैषमैच्छन्
मत्स्यः प्राब्रवीत इति व्रताशब्दं स्त्रमिव हूलमिति शलोपः गुः इण गतो इणो गा लुङीति गादेशः गातिस्थेति सिचो लुक् भात इति झेर्जुस् उत्स्य प
रलोपः इति परूपत्वं परिष्टिः इषु इच्छायामिति क्तिन् तिसेनीड़ प्रतिषेधः बाहुल्यादिवात्परूपत्वं तादौ च निति कृत्यतौ प्रकृतिस्वरत्वं सुपां सुलुगिति
सोर्लुक् देशः हस्वश्च्छंदसः वर्धंति वृध्यृ भयवर्धते आपः आर्धधातुके तारनिरीतिणिलोपः आपः पित्वादनुदात्तत्वं तिङः श्वल सार्वधातुकस्वरे
णधातुस्वरः शिष्यते पचायन स्कं तां ओणादिको भावे प्रत्ययः सुशिश्विं टुओश्वि गतिवृद्ध्योः आदृगमहनजन इत्यत्र उपसर्गोषसी
ति उकारस्य लं छांदसो यणादेशः सः प्रज्ञायामिति साः कर्मप्रवचनीययुक्ते द्वितीयामिति प्राप्तिसमासः अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ ॥
तृतीयामृचमाह ॥ ॥पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शंभु ॥ अत्यो नाज्मन्सर्गप्रतक्तः सिंधुर्न क्षोदः क ईं वराते ॥ रण्वा रमणी
या सर्वेषां हव्यावृष्टिर्न अभिमतफलानामभिवर्धयितेव अग्निः सर्वेषां रमणीयः त्वदिकामुष्मिकः सकलस्य भहारस्याप्यधीनत्वात यद्वा पुष्टि
रिव रण्वा गंतव्यः द्रष्टव्यः स्तुत्यो वा यथा पुष्टिः प्राप्यते तद्वदग्निर्यजमानैर्हविर्भिः प्राप्यत इति भावः पृथ्वी विस्तीर्णा क्षितिर्न भूमिरिव अग्नि
रपि विस्तीर्णः सर्वं पुष्टं तयुतोरूपेण व्याप्तत्वात् गिरिर्न पर्वत इव भुज्म सर्वेषां भोजयिता यथा गिरौ गवि समानादि कमाहृत्य सर्वे भुंजते
तद्वदग्नावपि पचंतः सर्वे भुंजते यद्वा अग्नौ ह्याहुतिं हुत्वा यजमानाः स्वर्गफलं भुंजते अथवा गिरिर्यथा दुर्भिक्षे सर्वान् प्राणिनो भुक्तिस्थ
कीय फलमूलादानेन पालयति तद्वदयमपि पापानुष्ठातॄन् प्रमुंचति नत्याचाक्ष्यायते अग्निर्मानस्मादेनसः प्रमुंचत्विति शंभुं भूसुखं
करं क्षोदो न उदकमिव यथोदकं सुखं करोति तद्वदग्निः सर्वेषां सुखकारीत्यर्थः अज्मन् संग्रामनामैतत् अज्मनि संग्रामे अत्यो न सततगाम
नशीलोऽत्य इव सर्गप्रतक्तः सर्गेण प्रसर्गेण प्रगमितः यथा सादिना प्रेषितोत्य इदंतस्य समीपमाशु गच्छति तद्वदग्निरपि स्तोतृभिः ३३०
प्रेषितः सन् शत्रून् हंतुं शीघ्रं गच्छतीति भावः अपि च सिंधुर्न क्षोदः स्यंदनशील उदकमिव अयमपि शीघ्रगामी यथा निम्नप्रदेशाभिमुखः
सोतःप्रवाहो दुर्निवारः तद्वदूर्ध्वाभिमुखोग्निरपीत्यर्थः अतः साध्यस्मादेवं तस्मात् ईं एनं अग्निं को वरात् कोवारयते न कोपि वारयि

तुं शक्नोतीत्यर्थः रण्वा रवि गत्यर्थः रण्वते प्राप्यत इति रण्वः कृत्यल्युटो बहुलमिति बहुलवचनात् कर्मणि पचाद्यच् भुज्म भुज पालनाभ्यवहारयोः 277
इषुवधितिविधीयमानो मकु बहुलवचनादस्मादपि भवति सुपां सुलुगिति सोर्लुक् अज्मन् अज गतिक्षेपणयोः मनिन् क्त्वादावार्धधातुके विकल्प 1924
इष्यत इति वचनात् विभावाभावः सुपां सुलुगिति सप्तम्या लुक् सर्गप्रतक्तः सृजविसर्गे इत्यस्माद्भावे घञ् सर्गशब्दः आद्युदात्तः तंचु गतौ अ
स्माद्रन्त भावे क्तप्रत्यया लुङि दांतो द्वारा इत्यडागमः व्यत्ययेन लोप वैतोन्यत्रेत्यत्वस्य विकल्पितत्वाद्भावः ॥ ॥चतुर्थ्यमृचमाह ॥ ॥जामिः
सिंधूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति ॥ यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥ सिंधूनां स्यंदनशीलानामपां अयमग्निर्जा
मीनां स्वस्वस्रूणां भ्रातेव यथा भ्राता भगिनीनां हितकरो भवति तद्वत् तादृशोग्निः वनानि महांत्यरण्यान्यतिभक्षयति दहतीत्यर्थः तत्र नि
दर्शनं राजा इभ्यान् भियं यंतीति नेरकृत्यस्त्या इभ्याः शत्रवः तान्यथा समूलं हिनस्ति तद्वत् यद्वा इभ्याः धनिनः तान्यथा धनमपहरन् दरिद्रयति
आसा अग्निर्वनानि पृथिव्या भूमेः संबंधिनि रोमाणि ओषधिरूपाणि दाति छिनत्ति भस्मीकरोति इत्यर्थः प्रकारेणाविधमाति घृतिदग्धं प्रवर्ततेत तृणाग्निर्दहे
भूमानुद्भावश्चांदसः अस्मात् लुङि गातिस्थेति सिचो दाति साघ्वुत्वन् अदादित्वाच्छपो लुक् ॥ ॥पंचमीमृचमाह ॥ श्वसित्यप्सु हंसो न सीदन्क्रत्वा चेति
ष्ठो विशामुषर्भुत् ॥ सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः ॥ अयमग्निर्देवेभ्यः पलायितः सन् अप्सु उदकेषु श्वसिति प्राणितिविगूढो
भवति अत्र दृष्टांतः हंसो न सीदन् उदकमध्ये उपविश्य यथा हंसः कीवं दनौत्रैभिः कृत्वा जुह्वन् आत्मीयेन प्रकाशेन विशां प्रजानां चेतिष्ठः
सामान्यवेधाः सोमान इव विधाता स्रष्टा सोमो यथा सकलमोषधिरूपं भाग्यजातं स्रजति सोमो वा ओषधीनां राजेति श्रुतेः स कल्पभोज्यजातं
ति भानेर वभानूरूपेणावस्थानात् तथाच तैत्तिरीयके अग्निरन्नादोन्नपतिरिति वाजसनेयके मोपि कृभोग्ययोरनिषामात्मकत्वमाम्नातं
मानां यो मिः शयानः पश्विव तनून्नूतः संकुचितकमाचो भूत्वा ततः प्रादुर्भूतः सन् विभुः प्रभूतः प्रपन्नः यद्वा शिश्वा शिशुना गर्भस्थेन वत्सेन
श्वसिति श्वसप्राणने अदादिभ्यश्च पालुक् रुदादिभ्यः सार्वधातुके ईडागमः तिपपित्वादनुदात्तत्वे धातुस्वरः शिष्यते कृत्वा उक्तसादिषु इंद्रसि वा
कारस्य रकारादेशः शिश्वा गतनं करणे औणादिः इत्यातः गाः किरान्व इति इप्रत्ययः सत्वबाधित्वात् अत एव निवादाद्युदात्तत्वे तदिद्वा दाद्युदात्तो
पदस्त्वेति आकारलोपः प्रथमपक्षे सुपां सुलुगिति सोराकारः द्वितीये तु पूर्ववत् आभावाभावः दूरेभाः तत्पुरुषे कृतिबहुलमिति बहुव्रीहौ वा पि
बहुलवचनात् कृबहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ॥इति प्रथमस्य पंचमे नवमो वर्गः ॥ ॥०॥ रयिरिति दृशर्चं द्वितीयं सूक्तं इदं पदं अध्ययन

भा॰ प्र॰ नः पंचचद्वितीयं स॒कं पराशरस्यार्षं आग्नेयं अनुवाकं तं चरथीतिविनियोगो लैंगिकः॥ ॥तत्र प्रथमामृचमाह॥ ॥रयिर्न चित्रा सूरो न संदृगायु
र्न प्राणो अस्यो न सूनुः। तक्वा न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा॥ अयमग्निः रयिर्न धनमिव चित्रा चायनीयः चित्ररूपो वा सूरो न सूर्य
१४० इव संदृक् संद्रष्टा सर्वेषां दर्शयिता आयुर्न प्राणः आयुर्मुख्यं संचरन् प्राणः श्वसन वायुरिव प्रियतमः यद्वा यथा प्राणवायुः आयुर्जीवनं म
नुष्याणां स्थापयति तथा चाम्नायते यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुरिति एवमग्निरपि अन्नरूपेणायुषो वस्थापयिता तामिल्यान सूनुः नित्यो
ध्रुवः पुत्र इव प्रियकारी तथा रसः पुत्रः पितुर्हितं माचरति तद्वयमपि हितस्य स्वर्गस्य प्रापयिता तथा चाम्नायते पुत्रः पित्रे लोककृज्जातवेदइति।
तक्वा न गतिमानश्व इव भूर्णिर्भर्ता यथा अश्वपृष्ठारूढं पुरुषं वहति भर्ता धारयति तद्वदयमपीत्यर्थः। पयो न धेनुः पय इव प्रीणयिता शुचिः
दीप्तः विभावा विशिष्टप्रकाशयुक्तः एवंगुणविशिष्टोग्निः वना वनान्यरण्यानि सिषक्ति दाग्धुं समवैति सेवते वा चित्रा सत्यांगुलितिसोः पूर्व
सवर्णदीर्घत्वं नित्यं नेध्रुव इवेतिल्यपप्रत्ययस्यापित्वाद्दं तते उपसर्गस्वर एवशिष्यते। तक्वा तकहसने गतिकर्मकः पतितत्वात्तत्रगत्यर्थः तकति
गच्छतीति तक्वा अन्येभ्योपि दृश्यन्त इति वनिप् भूर्णिः घृणिः पृश्निरित्यादौ भरतेर्निप्रत्ययांतो निपातितः॥ ॥द्वितीयामृचमाह॥ दाधार क्षेममोको
न रण्वो यवो न पक्वो जेता जनानां॥ ऋषिर्न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो दधाति॥ अयमग्निः क्षेमं लब्धस्य धनस्य रक्षणं दाधार धारयति
स्तोतृभ्यो दत्तस्य धनस्य रक्षणं कर्तुं शक्नोतीति भावः। ओको न निवासस्थानं गृहमिव रण्वो रमणीयः यद्वा गृहं यथा सर्वैः प्राप्यत इत्यर्थः। यवो न य
व पक्वः यथा पक्वो यव इव भोगार्थोभ्यो भवति तद्वदग्निरपि पाकादिकार्यहेतुतया उपभोग्ययोग्य इत्यर्थः। जनानां जेता शत्रुजनानामध्ये भविता
ऋषिर्न मंत्रद्रष्टा ऋषिरिव स्तुभ्वा देवानां स्तोता विक्षु यजमानलक्षणासु मनुष्येषु प्रशस्तः प्रख्यातः वाजीन अश्व इव प्रीतो हर्षयुक्तः यथाश्वो हर्ष
युक्तो युद्धामुखे संगच्छति तद्वदयमपि देवानां हविर्वहने हर्षयुक्तो भवतीत्यर्थः। एवंभूतोग्निः वयोन्नं दधाति दधातु अस्मभ्यं ददात्वित्यर्थः।
वय इत्यन्ननामसु पठितं रण्वः रमु क्रीडायां। क्षेम क्षि निवासगत्योः। दाधार तुजादीनामित्यभ्यासस्य दीर्घत्वं क्षेमं क्षियतिनिवसत्यनेनेति क्षेमः आर्तिस्तुसुहुसृ
मनतिभ्यः हस्व चकार रण्वः रविगत्यर्थः। अस्मात्कर्मणिक्तप्रत्ययः इडभावश्च। जेता जनं आयुदात्तः जनानां यतश्च निर्धारणमिति
निर्धारणे षष्ठीन यं कर्मणि षष्ठी तिनलोकाव्ययनिष्ठाखलर्थतृनामिति प्रतिषेधात्। स्तुभ्वा स्तोभतिः स्तुतिकर्मा अन्येभ्योपि दृश्यन्त इति क्विप्॥ ॥
तृतीयामृचमाह॥ ॥दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै। चित्रो यदभ्राट् छ्वेतो न विक्षु रथो न रुक्मी त्वेषः समत्सु॥ दुरोकशो
चिः दुष्प्रापतेजाः क्रतुर्न नित्यः क्रतुः कर्माणि कर्ता मनुष्य इव ध्रुवः यथा सकर्मा स्वकर्मस्वप्रमत्तः सन् जागर्ति तद्वदयमप्यग्निः कर्मस्वप्रमत्तः
जागर्ति इत्यर्थः। योनौ गृहे वर्तमाना जायेव योषिदिव अग्निहोत्रादिगृहे वर्तमानो वह्निर्विश्वस्मै सर्वस्मै यजमानाय अरं अलंभूषणं भवति यथा
जाया यागृहमलंकृतं भवति तद्वदग्निनाप्यनुष्ठानगृहमलंकृतं सत दृश्यत इत्यर्थः। चित्रश्चायनीयो विचित्रदीप्तिर्वा यद्यदायमग्निः अभ्राट् भ्रा
जते तदानीं श्वेतो न शुक्लवर्ण आदित्य इव भवति यद्वा दिवा यथा सूर्य इवाग्निः प्रकाशको भवति। विक्षु प्रजासु रथो न रथ इव रुक्मी स्वर्ण
वद्रोचमानो दीप्तियुक्तः समत्सु संग्रामेषु त्वेषः दीप्तः एवंभूतोग्निर्यष्टव्य अभ्राट् यदि वर्णात्वयः दुरोकशोचिः उच्चदोकमवायेदुष्टुदुः स्थापितिरु
पार्थस्वरुव उरुकवचनात् कुर्त्तिस्वरेण प्रत्ययात् पूर्वस्योदात्तत्वं दुरो। कशोचिनं जायस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं अरं वारम् ... १४०

न्यादिना लंकारस्यापेकादेशः अभ्राट् भ्राजदीप्तौ लङि व्यत्ययेन परस्मैपदं बहुलं छंदसीति शपो लुक् व्रश्चादिषत्वे जश्त्वं अडागम उदात्तः यद्वृत्तयोगादनि
घातः। समत्सु समनंमाद्यंत्यत्रेति समदः संग्रामाः ओणादिकोधिकरणे क्विप् समानस्य छंदसीति सभावः यद्वा सम्यगतिभक्षयतीति वीरानिति समतं सं 279
पूर्वादते क्विपवेति क्विप॥ ॥चतुर्थीमृचमाह॥ ॥सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका॥ यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनी 1924
नां॥ सृष्टा प्रेरिता सेनेव स्वामिना सह वर्तमाना वीरसंहतिरिव अयमग्निः शत्रूणां भयं दधाति विदधाति करोतीत्यर्थः। यद्वा सृष्टा सेनेव अमं बलं दधा
ति सा यथा बलवती तद्वदग्निरपि बलवानित्यर्थः। निरस्तुर्नाल्वेतरमुष्यते दिद्युदिति ज्वलनाम नेन चात्रेषुर्लक्ष्यते त्वेषप्रतीका दीप्तमुखा अस्तुर्न
दिद्युत् क्षेप्तुः संबंधिनी इषुरिव सा यथा भाययते तद्वदग्निरपि शत्रुमारीन भीषयत इत्यर्थः। अत्र निरुक्तं सेनेव सृष्टा भयं वा बलं वा दधात्यस्तुरिव दिद्यु
त्वेषप्रतीका यादि। यद्वा द्वावनित्यौ भूः कामनिति यमो अग्निरुच्यते यद्वा इंद्राग्न्योर्युगपदुत्पन्नत्वाद ग्नेर्यमत्वं अस्मिन्नर्थे यास्केन मंत्रश्चायमेवप्रद
र्शितः यमो ह जात इंद्रेण सह संगतः यमाविहेहमातरेत्यपि निगमो भवतीति यो जातः इत्पन्नः भूतसंघः यच्च जनित्वं जनितव्य उत्पत्स्यमानं भू
तजातं तदुभयमपि यमो ह अग्निरेव सर्वेषां भावानां आहुतिद्वाराग्न्यधीनत्वात् कनीनां कन्यकानां जारयिता यतो विवाहसमये अग्नौ लाजा
दिद्रव्येण होमे सति तासां कन्यात्वं निवर्तते। अतो जारयितोच्यते तथा जनीनां जायानां कृतविवाहानां पतिर्भर्ता तथा चाम्नायते अनुपजातपु
रुषसंभोगकालसोमः प्रथमो विविदे गंधर्वो विविद उत्तरः तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजा इति आगमोक्ताविवाहसमये अग्नये प्रदत्तो अग्नि
श्च मनुष्याय भर्त्रे धनपुत्रैः सहितामिमां प्रायच्छदिति इममर्थं काचिदृक् स्पष्टं ब्रूते। सोमो ददद्गंधर्वाय गंधर्वो दददग्नये। रयिं च पुत्रांश्चादा द
ग्निर्मह्यमथो इमामिति यास्कस्त्वाह जनीनां पतिर्पि निगमो भवति यद्वा जनीनां पालयिता यतोयमनुष्ठितैर्यागैः फलं प्रयच्छति
सेनेव इनेव सह वर्तत इति सेना वा पमर्तव्याति सभावः बहुव्रीहिस्वरः जनित्वं जनी प्रादुर्भावे कृत्यर्थे तवैकेनितकर्मणि त्वन प्रत्यय इडागमः
नित्वादाद्युदात्तत्वं जारः आरयतीजारः दारजारौ कर्तरि णिलुक् चेति पात्यते कनीनां कन्यानामित्यत्र षष्ठ्येकवचने बहुलं छंदसीति बहुलग्रहणा
त्संप्रसारणं परपूर्वत्वं जनीनां जायंते अस्यामिति जनयः स्त्रियः इनसर्वधातुभ्य इतीन प्रत्ययः नित्वादाद्युदात्तत्वं॥ ॥पंचमीमृचमाह॥ तं वश्चरा
था वयं वसत्यास्तं न गावो नक्षंत इद्धं॥ सिंधुर्न क्षोदः प्रनीचीरैनोन्नवंत गावः स्वर्दृशीके॥ ॥वइतिव्यत्ययेन बहुवचनं हे अग्ने तं त्वां चरथां चरती
ति चरथः पशवः तत्प्रभवेः हव्यादिभिः साध्या आहुतिरपि चरथेत्युच्यते उपचारात् कार्यकारणशब्दः चराथा चरथयापश्वाभ्यहव्या
दिसाधनया आहुत्या वसत्यां वसतिनिवसंत्यस्यां रात्रौ स्वाहितवसतिः पूर्वं वत्सलसाध्याहुत्यालिख्यते वसत्या पुरोडाशाद्या हुत्या च वयं इद्धं प्रदी
समग्निं नक्षं व्यानुयाम प्रापयामयः तत्र दृष्टांतः। अस्तं न गावः अस्तमिति गृहनामसु पठितं गावो गृहं यथा प्रविंतिति तद्वत् अत्र यास्कः तं वश्चराथा
चरंत्या पश्वाहुत्या वसत्या च निवसंत्यौ च स्याहुत्या संयत्या गाव आप्नुवंति तथाप्नुयामेति अयमाग्निः सिंधुर्न क्षोदः स्यंदनशीलमुदकमिव नीः
चीर्निरतरा सैवनीः इत्यस्य गतिरामुदकस्य तीव्रांलाः प्रैनोत्प्रेरयति यथा जलप्रवाहो निम्नदेशं प्रगच्छति तद्वत् अग्नेर्ज्वाला दूरयं प्रतिगच्छती
ति भावः स्वर्न भसि वर्तमान दृशीके दर्शनीये तस्मिन्नाग्नौ गावो गमनस्वभावाः रश्मयः नवंत संगच्छंते नवतिर्गतिकर्मा चरेणादिको थ प्रत्ययः
दीर्घश्छांदसः सप्तांसत्पुगितिविभक्तेराकारः वसत्या वहिवस्यर्तिभ्यश्चिदिति अति प्रत्ययः उदात्त इति विभक्तेरुदात्तत्वं अस्तं अस्यते स्मिन्सर्व

मिति अस्मिन् पक्षे अमीमयीमीत्यादिनानुनी तु अनीड् प्रतिषेधः नित्वादाद्युदात्तत्वं । न शंसेन क्षतिर्व्यापिनस्य गतो व्ययेनात्मनेपदं नीचीः निष्प्रार्दं वर्तते श्रोप
भा·प्र· मिति अस्मिन्पक्षे अमीमयीमीत्यादिना तु नीतु अनीड् प्रतिषेधः नित्वादाद्युदात्तत्वं । न शंसेन क्षतिर्व्यापिनस्य गतो व्ययेनात्मनेपदं नीचीः निष्प्रार्दं वर्तते श्रोप
१४१ संख्यानमिति इष्प्रत्यय उत्पाकारलोपे चावितिदीर्घत्वं न्यर्दान्तिगतः प्रकृतिस्वरत्वं णान्तरणगतो अंतर्भावितण्यर्थाच्छं दसिलुङ् लङ् लिट इति वर्तमाने
संख्यानमितिइष्प्रत्यय उत्पाकारलोपे चावितिदीर्घत्वं न्यर्दान्तिगतः प्रकृतिस्वरत्वं नान्तरणगतो अंतर्भावितण्यर्थाच्छंदसि लुङ्लङ्लिट इति वर्तमाने
न्दि व्यत्ययेनश्च अडागमाभावश्छन्दसि इडागम प्रक्षण अनिडादिभ्यां चनिद्धितप्रत्ययः नित्वादाद्युदात्तत्वं ॥ ॥ इतिप्रथमस्य पंचमे दशमो वर्गः ॥
वने षु जा इति द्वयदंशर्चं अध्ययनतः पंचर्चं तृतीयसूक्तं पराशरस्यार्षं आग्नेयं च नेष्टित्यनुक्रांतं विनियोगो लैंगिकः ॥ तत्र प्रथमामृचमाह ॥ ॥ वनेषु जा
युर्मर्तेषु मित्रो वृणीते श्रुष्टिं राजेव जुर्यं ॥ क्षेमो न साधुः क्रतुर्न भद्रो भुवत्स्वाधीर्होता हव्यवाट् ॥ वनेषु जायुः अरण्येषु जायमानः मर्तेषु मनुष्येषु मित्रः
सखा साप्यमाग्निः श्रुष्टिं आशु अप्रतुलकर्माणि यजमानानि श्रेयस्करमाना क्षिप्रेण कर्मणा मनुष्यानित्यर्थः । तथा च यास्कः श्रुष्टीति क्षिप्रनाम अपि
तिष्ठ वभं यजमानं वृणीते संभजते अननमनं हविः स्वीकरोतीति भावः ॥ तत्र दृष्टांतः राजेव जुर्यं जरा रहितं वृद्धं गांसर्वकार्ये युक्तमित्यर्थः ।
वंभं तं पुरं यथा राजा वृणीते तद्वत् क्षेमो न रक्षक इव साधुः साधयिता क्रतुर्न क्रतुः कर्मणां कर्तासइव भद्रो भजनीयः कल्याणो वा होता देवानामा
ता हव्यवाट् हव्यवाहनानामदयानामग्निः तथा चाम्नायते । अयावा अग्निर्या हव्यवाहनो देवानां कव्यवाहनः पितॄणां स रक्षा असुराणामिति
ता हव्यवाट् हव्यवाहनानां मदयानामग्निः तथाचाम्नायते । अयं वा अग्निर्या हव्यवाहनः पितॄणां स रक्षा असुराणामिति
यं भूताग्निः स्वाधीः शोभनध्यानो भुवत भवतु जायुः जिजयरुषा पालीत्यण अनुयंजूषवयाहानो भाव्यनव् धारूता यामाकारस्य लयेन
इकारः जुर्यं जरानामस्यास्तीति बहुव्रीहीनअ मत्वर्थीयः पदांतोदान्तत्वं भुवत । भवतेर्लेट्य डागमः बहुलं छंदसीति विकरणस्य लुक् भूसवोस्ति
ङ्गीति गुणप्रतिषेधः ॥ ॥ द्वितीयामृचमाह ॥ ॥ हस्ते दधानो नृम्णा विश्वान्यमे देवान्धाद् गुहा निषीदन् ॥ विदंतीमत्र नरो धियंधा हृदा यत्तष्टान्मंत्रां अशं
सन् ॥ विश्वानि सर्वाणि नृम्णानि धनानि हविर्लक्षणानि धनानि हस्ते स्वकीये बाहौ दधानो धारयन् अयमग्निर्गुहा गुहायां अप्रमत्त अश्वत्थादौ वसन्
तत्र देशनिषीदन्निगूढो वर्तमानः सन् अमे भयं देवा धात अस्थापयत अग्निहविर्भिः सह पलायितः सतिम वदेतो अभैषुरित्यर्थः नरो नेतारः धि
यंधाः कर्मणां बुद्धीनां वा धारयितारो देवा अत्रास्मिन् काले ईं एनमग्निं विदंति जानंति यदायदा हृदा बालिना बुध्यानस्थानं निर्मितान् अग्निस्तुति
[उ]तिकः तत्पुरुषे तिकृतिबहुलमिति॥ प्रपरान मंत्रान् अशंसन् अस्तुवन् अयाचन्नित्यर्थः निषीदन् गतिरनंतर इति प्रतारितिय तीव इतिविदज्ञाने अदा
दित्वाच्छपो लुक् प्रत्ययस्वरः धियंधाः अतोनोपसर्गे क इति कः तत्पुरुषे कृति बहुलमिति बहुलवचनात् द्वितीयाया अलुक् । तष्टानतक्ष
तनूकरणे निष्ठायास्याविभाषेतीड् प्रतिषेधः स्कोः संयोगाद्योरिति ककारलोपः ॥ ॥ तृतीयामृचमाह ॥ ॥ अजो न क्षां दाधार पृथिवीं
तस्तंभ द्यां मंत्रेभिः सत्यैः ॥ प्रिया पदानि पश्वो निपाहि विश्वायुरग्ने गुहा गुहं गाः ॥ अजो न अजन्मा गच्छतीति जन्मरहित इत्यर्थः स इव क्षे
तिपृथिवीनाम क्षां भूमिं दाधार अयमग्निः प्रकाशकत्वेन धारयति पृथिवीत्यंतरिक्षनाम पृथिवी अंतरिक्षं च धारयतीत्येवं द्यां द्युलोकं सत्यैः
रवितथाः मंत्रेभिः मंत्रैः तस्तंभ स्तंभाति यथा अधो न पतति उपर्येव तिष्ठति तथा करोतीत्यर्थः । मंत्रैर्दिवो धारणं तैत्तिरीयैः समाम्नातं देवा १४१
वा आदित्यस्य सुवर्गस्य लोकस्य पराचोतिपाताद्बिभयुः तं छंदोभिर दृंहन् धृत्या इति यद्वा सर्वमंत्रैः स्तूयमानोग्निः धार तस्मै भवतीति प्र
वा आदित्यस्य सुवर्गस्य लोकस्य पराचोतिपाताद्बिभयुः तं छंदोभिरदृंहन् धृत्या इति यद्वा सत्यैः मंत्रैः स्तूयमानोऽग्निः धार तस्तंभेतिहेप्र
न्विश्वायुः विश्वं सर्वमायुरन्नं यस्य स त्वं पश्वः पशोः प्रियाणि प्रियाणि पदानि शोभनतृणादकापतानिग्रानानि पाहि नीनरो वा लयमाधीरित्यर्थः
न्विश्वायुः विश्वं सर्वमायुरन्नं यस्य स त्वं पश्वः पशोः प्रियाप्रियाणि पदानि शोभनतृणादका पतानि स्थानानि पाहि नी नरो वा लयमाधीरित्यर्थः
तद्धि कृत्वा विवासा मीतिचतत आह गुहा गुहाया अपिगूहं गुहं गां संचार योग्यं स्थानं गाः गच्छ तत्र वनिवासयत्यर्थः पश्वः जसादिषु छंदसि वावच

नमिति घर्षि नीतिगुणाभावश्च णाच्छाः इच्छानयणइति विभक्तेरुदात्तत्वं । गुहामयां सुपां सुलुगिति पंचम्या अजादेशः चित्वादंतोदात्तत्वं । गुहं व्यत्ययेन स्व 281
तं गाः छांदसमालुङ् इणो गालुङीति गादेशः ॥ ॥ चतुर्थीमृचमाह ॥ ॥ य ईं चिकेत गुहा भवंतमा यः ससाद धारामृतस्य ॥ विये चृतंत्यृत आसपंत 1924
मादिद्वसूनि प्रववाचास्मै ॥ यः पुमान् ईं एनं गुहा भवंतं गुहायां संतं अग्निं चिकेत जानाति यश्च ऋतस्य सत्यस्य यज्ञस्य वा धारां धारयितारमेनमग्निं
आससाद असीदति उपास इत्यर्थः ये च ऋतं ऋतान्निसत्यानि यज्ञान्वा सपंतः ममवयंतः स्पृशंतो वा पुरवाः एवमग्निं विचृतंति अग्निमुद्दिश्य स्तुती
प्रग्रथंति कुर्वंतीत्यर्थः । आदित् स्वयनंतरमेव अस्मै सर्वस्मै लोकाय तेनामनः संनिधनानि प्रववाच प्रकथयति चिकेत कित ज्ञाने लिडि णलि छंदसि परःसंत
ति चवरहिताच्च यनघाः तो धुकः कमावं धातुकत्वे विकरणस्वरः शिष्यत एवाच निङि रुडागवचि लिडि अभ्यासस्याभपपाम् इति अभ्यासस्य संप्रसारणं सं
प्रसारणाच्चेति पररूपत्वस्य वाछंदसीति विकल्प्याभाव चनाद्देशः ॥ ॥ पंचमीमृचमाह ॥ ॥ वि यो वीरुत्सु रोधन्महित्वोत प्रजा उत प्रसूष्वंतः ॥ चित्ति
रपां दमे विश्वायुः सद्मेव धीराः संमाय चक्रुः ॥ यो अग्निः वीरुत्सु ओषधीषु महित्वा यानि महत्वायानि संततानि निरुंधत विरुणद्धि विशेषेण आ
वृणोति तानि वशं आपयति उतापि च प्रजाः प्रकर्षेण जाताः पुष्पफलादि लक्षणाः प्रसू षु उत्पत्तिस्थानीयासु मातृस्थानीयो स्वापधीषु अंतर्मध्ये विरुण
द्धि स्वबुद्धितीयाउतशब्दः पदपूरणः तथा चित्तिश्चेतयिता ज्ञापयिता अपां दमे तत्स्थाने मध्ये भवतु इदं विश्वायुः सर्वान्नोयोग्निः वर्ततइति शेषः तम
ग्निं धीराः मधाविनः समाय संमानेन पूजनेन स्तोत्रस्तुतिभिः स्तुतिरित्यर्थः । चक्रुः कर्माणि कुर्वंति तत्र दृष्टांतः स एव यथा सद्मेव प्रथमतः संप
त्यपश्चात् तत्र कर्माण्याचरति तद्वत् वीरुत्सु पूर्वा इहत व्रतः क्विप् पंचादिषु वीरुध इति पठितत्वादुपसर्गस्य दीर्घो धकारः श्वोता दशाः उ कञ्चवीरुध
ओषधयो भवंति रोधन्रुधिर आवरणे लेट्य डागमः इतश्च लोप इति कारलोपः ॥ संमाय माङ्माने शब्दे च समासेन ञ्पूर्वे क्त्वो ल्यप नल्यतीति
प्रतिषेधः ॥ ॥ इति प्रथमस्य पंचमे एकादशो वर्गः ॥ ॥ श्रीणन्निति द्विपदं दशर्चं चतुर्थं सूक्तं । तत्राध्ययनतः पंचर्चं कल्प्यो घाः पूर्ववत् विनि
योगो लैंगिकः ॥ ॥ तत्र प्रथमामृचमाह ॥ श्रीणन्नुप स्थाद्दिवं भुरण्युः स्थातुश्चरथमक्तून्व्यूर्णोत् ॥ परि यदेषामेको विश्वेषां भुवद्देवो देवानां म
हित्वा ॥ भुरण्युः हविषां भर्ता धारयिता पयः प्रभृतिना श्रयणद्रव्येण सोममभिषवे तेहे विभिः श्रीणन् मिश्रयन् दिवमुपस्थाद् उपतिष्ठति प्राप्नोतीत्यर्थः
। स्थातुः स्थावरं चरथं जंगमं तद्भयात्मकं जगत् क्तून् सर्वारात्रीश्च व्यूर्णोत् स्वतेजसा विज्ञानेन आच्छादयति हा विवर्धनं कुर्वन् सर्वमपि जगत् स्वभासा
प्रकाशयति स्मेति भावः । विश्वेषां सर्वेषां देवानां दानादिगुणयुक्तानामिंद्रादीनां मध्ये देवो घोतमानः एक एवायमग्निः एषां पूर्वकानां स्थावराणा
नां महित्वा महत्त्वात् माहात्म्यान्निय मात्पीरि भुवत परितो व्याप्नोति न दृश्यते मिति पूर्वेणान्वयः श्रीणन् श्रीञ् पाके आच्छादने तेन र्णा तेर्विभाष्यति
वद्वैकल्प्यः ॥ ॥ द्वितीयामृचमाह ॥ ॥ आदित्ते विश्वे क्रतुं जुषंत शुष्काद्यद्देव जीवो जनिष्ठाः ॥ भजंत विश्वे देवत्वं नाम ऋतं सपंतो अमृतमेवैः ॥
हे देव द्योतमान ते जीवो जीवन प्रज्वलन शुष्कात् निरसात् रणि रूपात्काष्ठात् यद्यदा जनिष्ठाः प्रादुर्भवसि मंथनेन आच्छाद आदित् अनंतरमे
व विश्वे सर्वे यजमानाः ते तुभ्यं क्रतुं कर्म जुषंत सेवंते अनुतिष्ठंति तथानुष्ठाय च विश्वे सर्वे नाम नामकं ऋतं अवितथं देवत्वं देवतात्वं भजंत भजं
त प्राप्नुवंति किं कुर्वंतः अमृतं अमरणं स्थानं एवैः गंतृभिः स्तोत्रैः सपंतः समवयंतः प्राप्नुवंत इत्यर्थः । जुषंत त्यादीनि त्रीण्याख्यातानि लुङ्
लङ् लिङ् इति वर्तमानार्थानि एवैः यंति स्थानं व्याप्नुवंति गच्छंतीति एवा निलोत्राणि इणशीभ्यां वन् ॥ ॥ तृतीयामृचमाह ॥ ॥ ऋतस्य
प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः ॥ यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकित्वान्रयिं दयस्व ॥ ॥ ऋतस्य देवयजनं प्राप्तस्य

भा०त्र० नेः प्रैषाः प्रकर्षेणेष्यमाणाः सन्तः तथा क्रियंते तथा धीतिः धीयते सोमः पीयते यस्मिन्निति धीतिर्यागः सोपि त्वत्स्य देव यजनदेशं प्राप्य स्यादित्यर्थः किं
यंते अतः सोग्निर्विश्वा यावच्चं सर्वमायुः ननं वस्य स तथा विधो भवति अपि चास्मै विश्वे सर्वे यजमानाः अपांसि दर्शपूर्णमासादीनि कर्माणि चक्रुः कु
१४२ र्वंति हि अस्मै तुभ्यं यो दाशात् चरुपुरोडाशादीनि हवींषि ददाति यो वा वांपि अन्याय जमानः ते चिकित्वान् त्वदीयं कर्म कर्तुं जानन् त्वं रयिं धनं
यच्छ दिहि राशात ... ययाचितो ... सात ... तु ... दृह ...
(१) अविचार्य तं यजमानायचिकित्वान् जानन् मनुचानं ज्ञानं रयिं धनं देहि दाशात दाशृ दाने ... श्चाः ... क्वावसुः ... दृश्यर्थे
सत सनिमीमाधुरभल्भ ... अंकारस्य उकारदेशः अन्त्यस्याभ्यासस्य लोपः स्कोः संयोगाद्योरिति सकारलोपः पूर्ववत् इडागमः चिकित्वान् कित ज्ञाने लिटः क्वसुः इयस्वद्य दानगतिरक्षणहिंसादानेषु ॥ ॥चतुर्थीमृचमाह॥ ॥होता निषत्तो मनोरपत्ये स चिन्न्वासां
पतीरयीणां॥ इच्छंत रेतो मिथस्तनूषु सं जानत स्वैर्दक्षैरमूराः॥ ॥ हे अग्ने त्वं मनोरपत्ये यजमानरूपायां प्रजायां होता देवानामाह्वाता सन्
निषत्तः निषण्णः भवसि हि प्रजाः इति हि ब्राह्मणं स चित् स एव त्वं आसां प्रजानां रयीणां गवादीनां धनानां पतिः स्वामी अत आसां प्रजानां
नृषु आत्मीयपुत्रादिरूपमिथः संसृष्टस्वरूपेण विपरिणतं रेतोवीर्यं इच्छंत ऐच्छन् तदनुग्रहेण पुत्रलाभं लभंते यावत् पु
त्राश्च ताः प्रजाः अमूराः अमूढाः मत्याः स्वैः स्वकीयैः दक्षैः समर्थैः पुत्रैः सह संतानतनस्य संगतं चिरकालं जीवंतीत्यर्थः यद्वा दक्षश
ब्दः प्राणवाची प्राणो वै दक्षः अपानः क्रतुरिति श्रुतेः स्वैर्दक्षैः स्वकीयैः प्राणैः अमूराः संगताः त्वयैव सर्वं जानंति इच्छंति जयोना मनपरंजा
न ... मूढ ... नन्तु ... अन्तरे इत्यादि कारलोपः अमूराः मूराः अमूरा ... मूढो ... ममूर ...
नन्तः ... मरु ... ... पत्याकारस्य ... छेदः
लोपः अर्थः मता अर्थः न मूराः अमूराः अथवा अम गत्यादिषु अम्मादिणादिकः ऊरन् प्रत्ययः॥ ॥पंचमीमृचमाह॥ ॥पितुर्न पुत्राः क्रतुं जुषं
त श्रोषन्त्ये अस्य शासं तुरासः॥ वि राय और्णोद्दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः॥ ॥अस्याग्नेः शासं शासनं तुरासः त्वरमाणाः
संतो यजमानाः श्रोषन् शृण्वंति तिसर्वतेन अनुशिष्टं क्रतुं कर्म जुषंत सेवंते। तत्र दृष्टांतः पितुर्न पुत्राः यथा पुत्राः पुरवह्वलं जयकाः पुत्राः
ऽरक्षकाः तन्नयाः पितुराज्ञां कुर्वंति तद्वत् पश्चात् पुरवायत पुनिपरणः यं नरकं तत्रस्त्रायत इति वा यास्कः पुरुक्षुः क्षु इत्यन्ननाम बहुन्नः
सोग्निः एषां यजमानानां दुरो द्वाराणि यज्ञस्य द्वारभूतानि रायो धनानि वि और्णोत् विवृणोति प्रकाशयति ददाति यावत् अपि च दमूनाः दमे यज्ञ
मनो यस्य सोग्निः नाकं स्वर्गं दुःखसंपर्कतिनाकोः नाकं ... स्तृभिः इतिनक्षत्रनाम स्तृभिर्नक्षत्रैः पिपेश अवयवीचकार नक्षत्रयुक्तमक
रोदित्यर्थः श्रोषन् श्रु श्रवणे लेट् आडागमः सिब्बहुलं लेटीति सिप् बहुलं छंदसीति विकरणस्य लुक् इतश्च लोप इतीकारलोपः संयोगांतस्य लो
पिपेशविश्वभिः अवयवं॥ ॥इति प्रथमस्य पंचमे द्वादशो वर्गः॥ ॥शुक्रः इति दशर्चं पंचमं सूक्तं पराशरस्यार्षं अग्नेयं शु
क्र इत्यनुक्रांतं विनियोगो लैंगिकः॥ ॥तत्र प्रथमामृचमाह॥ ॥शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः॥ परि प्रजातः क्रत्वा १४२
बभूथ भुवो देवानां पिता पुत्रः सन्॥ शुक्रः शुभ्रवर्णोयमग्निः उषो न जारः उषसो जरयिता सूर्य इव शुशुक्वान् शोचयिता सर्वस्य प्रका
शयिता भवति तथा समीची संगते द्यावापृथिव्यौ दिवो न ज्योतिः द्योतमानस्य सूर्यस्य ज्योतिरिव प्रपा स्वतेजसा पूरयिता हे अत स्त्वं प्रजा

तः प्रादुर्भूतः सन् क्रत्वा कर्मणा यज्ञाख्येन प्रज्ञया वा प्रकारेण सर्वं जगत्परि बभूथ परितो व्याप्नोषि दीव्यंतीति देवाः कविजः तेषां पुत्रः 283
सन् पुत्रवन्नेता रक्षायतः सन् भुवः पिता भुवः पालयिता भवसि यद्वा देवानामिंद्रादीनां मध्ये पुत्रः सन् पुत्र इव हूतो भवसि पिता हविर्भिः पालयि 1924
ता भवसि शुशुक्वान् शुच दीप्तौ लिटः क्वसुः व्यत्ययेन कृत्वं पप्रा पालनपूरणयोरित्यस्माद्धातोः गमहनजनेति इति किदित्यस्य यः सृपां सुलुगिति
सोर्डादेशः समीची समं चरंतौ अंचतेः ऋत्विगित्यादिना क्विन् समः समीतिसम्यादेशः अंचतेश्चेति वक्तव्यमिति ङीप् अच इत्याकारलोपः चौ च
तिदीर्घत्वं इडादेश इति स्वरेण ङीप उदात्तत्वं थामि इत्येवं समसितिपूर्वसवर्णदीर्घत्वं पदनिर्मिति ईडौ इति पदविभागः क्रियतेइति तिङ्कत्विगिति विधीयमान
मीत्वं सम इत्यस्यापि ... वृत्यव्यवभतोवभथेति निपातनादिङ्भावः॥ ॥द्वितीयामृचमाह॥ ॥वेधा अदृप्तो अग्निर्विजानन्नूधर्न गोनां स्वाद्मा
पितूनां॥ जने न शेव आहूर्यः सन्मध्ये निषत्तो रण्वो दुरोणे॥ ॥वेधाः मधाविनाम ... विधाता सर्वस्य कर्ता अदृप्तः दर्परहितः विजानन् कर्त
व्याकर्तव्यविभागं जानन् अग्निः गोनां गवामूधर्न गामूधस्तन इव पयस आश्रयभूतं स्थानमिव पितूनामन्नानां स्वाद्मा सुस्वादयिता रस्यिता यथा गोरूधः
प्रदानेन सर्वाण्यन्नानि स्वादूनि करोति तद्वदग्निरपि सम्यक् पाकेन सर्वाण्यन्नानि स्वादूनि करोतीत्यर्थः॥ अपि च एवंभूतोग्निः जने न शेवः जनपदे
लोक सुखकरः पुरुष इव मध्ये यज्ञमध्ये आहूर्यः आह्वातव्यः सन् दुरोणे यज्ञगृहे निषत्तो निषण्णः रण्वो रमयिता स्तोता भवति गोनां गोः पादांत इति
अपदांतेपि नुट् स्वाद्म आस्वदनं अंतर्भावितण्यर्थो वा त अन्येभ्योपि दृश्यंत इति मनिन् सपां सुलुगिति सोर्लुक् पितूनां नामन्यतरस्यामिति
नाम उदात्तत्वं आहूर्यः आङ्पूर्वात् ह्वयतेः रुचाय इति यत् बहुलं छंदसीति संप्रसारणं हल इति दीर्घः रेफोपजनश्छांदसः यतो नाव इ
त्याद्युदात्तत्वं॥ ॥तृतीयामृचमाह॥ ॥पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत्॥ विशो यदह्वे नृभिः सनीळा अग्निर्देवत्वा विश्वान्य
श्याः॥ पुत्रो न पुत्र इव जातः प्रादुर्भूतोग्निः दुरोणे गृहे रण्वो रमयिता भवति वाजी न अश्व इव प्रीतो हर्षयुक्तः सन् विशः संग्रामे शत्रुभूताः प्रजाः वितारीत्
विशेषेण तरति अतिक्रामति अपि च नृभिः ऋत्विग्लक्षणैर्मनुष्यैः सहिताः सनीळाः समाननिवासस्थानाः विशो देवीः प्रजाः यद्यदा अह्वे
आह्वयामि तदानीमयमग्निर्विश्वानि सर्वाणि देवत्वानि अश्याः अश्नुते प्राप्नोति स्वयमेव तत्तद्देवतारूपो भवतीत्यर्थः तथा च मंत्रांतरं मान्त्रास्य
त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः इत्यादि अश्याः अशू व्याप्तौ लिङि व्यत्ययेन परस्मैपदं बहुलं छंदसीति विक
रणस्य लुक्॥ ॥चतुर्थीमृचमाह॥ ॥नकिष्ट एता व्रता मिनंति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ॥ तत्तु ते दंसो यदहन्त्समानैर्नृभिर्यद्युक्तो विवे रपां
सि॥ हे अग्ने ते तव एता एतानि व्रतानि दृश्यमानानि दर्शपूर्णमासादीनि कर्माणि न किर्मिनंति न हिंसंति राक्षसादयो बाधका नहि संति य
स्मात् त्वं एभ्यः कर्मकृत्वर्तमानेभ्यो नृभ्यो यजमानेभ्यः श्रुष्टिं श्रु आशु अश्नुते व्याप्नोतीति श्रुष्टि फलं यज्ञफलरूपं सुखं चक
र्थ हन्ता अनिमितिर्दिन व्रतानां बाधकानाप ... तत् अतो युगपत्स्येतेन व्रतानां हिंसकाः संतीति हे अग्ने तव दीयं तत्तु दंसः तदेव कर्म यद्य
द्रक्षसादि अहन् हंसि नाशयसि तदानीं समानैः समगणरूपैर्मरुद्भिः नृभिः नृभिर्मरुद्भिः युक्तः त्वं रपांसि बाधकानि राक्षसादीनि यद्य
स्मात् विवेः गमयसि फलं प्रापयसि तस्मात्तव व्रतानि न हिंसंतीति योऽयं मिनंति। मीञ् हिंसायां क्र्यादिकः प्वादीनां ह्रस्व इति ह्रस्वत्वं
विवेः वी गत्यादिषु लिपि अडागमः ... छांदसः बहुलं छंदसीति शपः श्लुः॥ ॥पंचमीमृचमाह॥ ॥

र्थानग्नांगविभावोस्मः संतानरूपश्चिकेतस्मै॥ अनाय दंनादुरो व्यृण्वन्नवंत विश्वे स्वर्दृशीके॥ उषां न जारः उषसो जारयिता आदित्य इव विभावाग्नि
भा॰ प॰ इव काशयुक्तः उस्त्रानि वासयिता संतानरूपः सर्वैः प्राणिभिर्वगंतव्यरूपः देवतां पुत्रवत् प्रत्यक्षेण भवतीत्यर्थः॥ एवंभूतोग्निरस्मै यजमानाय चिकेत
१४३ जानातु अभिमतफलं ददात्वित्यर्थः यद्वा विभक्तिव्यत्ययः यस्य अस्मै इदं स्तुतिरूपं स्तोत्रं चिकेत जानातु तथा शमयः तेना आत्मनैव स्वयमेव वहंतो द्वा
नजानातु अभिमतफलं ददात्वित्यर्थः यद्वा विभक्तिव्यत्ययः यस्य अस्मै इदं स्तुतिरूपं स्तोत्रं चिकेत जानातु तथा शमयः तेना आत्मनैव स्वयमेव वहंतो द्वारं
वर्ये हन्तं कुर्वंतो दुरो यज्ञस्य गृहद्वाराणि व्यृण्वन् विवृणवन् गमयंतीत्यनुवर्तनीयेत्यर्थः॥ नदनं नंदृशीके दर्शनीये स्वर्न भांति विश्वं सर्वं तेजः शमयोनवंति
गच्छंति गोतिकर्माणं दानं व्याप्नुवंतीत्यर्थः॥ दुरः वसति वा सम्प्रसारणं वा ... ग्रहिज्यादिनां संप्रसारणं विकेतनविवितानं नो होत्यादिकुलेश्य
गगमः बहुलं छंदसीति यवनमिति चनाम्यस्यार्थाणि तिलिङ्गपथगुणप्रतिषेधाभावः अभ्यस्तादित्याद्युदात्तत्वं। कृण्वन् इति विभि
विगत्यर्थः इदित्वान्नुम्। वर्णादा तुड् व्यत्ययेन संप्रसारणं यद्वा कृयागतो तनोत्यादिः॥ ॥ इति प्रथमस्य पंचमे त्रयोदशो वर्गः॥ ॥ वनेमेति द्वैप
दीं एकादशर्चं अध्ययनतः पञ्चर्चं पश्चस्तं कृष्यायाः पूर्ववत् अनुक्रान्तं वनेमैकादशेति विनियोगो लैङ्गिकः॥ ॥ तत्र प्रथमामृचमाह॥ वनेम
पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः॥ आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म॥ पूर्वीः प्रभूताः अन्नानि वनेम संभजेमहि
अग्निप्रसादादन्नानि ददात्वित्यर्थः॥ मनीषा मनीषया बुद्ध्या अर्यो गंतव्यः प्राप्तव्यः यद्वा मनीषया अर्यः स्वामी सुशोकः शोभनदीप्तिः एवंभू
तोग्निः विश्वानि सर्वाणि कर्माणि अश्याः अश्नुयाद्व्याप्नोतीति किं कुर्वन् दैव्यानि देवेषु भवानि व्रतानि कर्माणि चिकित्वान् असमंताज्जानन् तथा
मनुष्यस्य जनस्य मनुष्यजातस्य जन्मोत्पत्तिरूपं कर्म चिकित्वान् आभिमुख्येन जानन् यावारस्थित्या संबंधिनीयानि कर्माणि तानि सर्वाण्यगच्छ
अवगत्य व्याप्नोतीत्यर्थः। वनेम वन षण संभक्तौ आशिषि लिङ्याध्ययनत्वात् आत्मनेपदं च अदुपदेशात् सार्वधातुकानुदात्तत्वे विकरणस्वरः
क्रियते पूर्वीः पुरुषच्छाशावगुणवचनादिति ङीप् वृत्तिचेति दीर्घः॥ मनीषा उपा अपात् इत्यादिनात्यस्य निभावः॥ सुशोकः शुचदीप्तौ भावे घञ् च
जः कुद्धिण्यादिति कुत्वं शोभनः शोको यस्य आद्युदात्तत्वं द्वयन् छंदसीत्यक्षरपदाक्षदात्तत्वं अश्याः दैवताविशन्यश्याद्युदात्तत्वं चिकित्वान्निता
नलिट् वसुः॥ ॥ द्वितीयामृचमाह॥ ॥ गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथां॥ अद्रौ चिदस्मा अंतर्दुरोणे विशां न विश्वो अमृ
तः स्वाधीः॥ यो अग्निरपां गर्भो गर्भवद्वर्तते वर्तते अपां नपादित्यतः यश्च वनानां अरण्यानां गर्भः दावाग्निरूपेण तन्मध्ये वर्तते यश्च स्थातां स्था
वराणां काष्ठादीनां गर्भो गर्भवदंतर्वर्तते यश्च चरथां च गाणां जंगमानां गर्भो जाठररूपेण देहमध्ये वर्तते एवंभूताय अस्मै अग्नये दुरोणे दुस्तर्यदुस्त
र्ये गृहे अद्रौ चित् पर्वतेपि अंतर्मध्ये हविः प्रयच्छंतीति शेषः। सोयं अमृतः अमरणधर्माग्निः स्वाधीः शोभनकर्मयुक्तः शोभनध्यानो
वा अस्माकं भवतीति शेषः तत्र दृष्टांतः विश्वः निवेशयिता सनाव स्थापयिता राजा विशां प्रजानामिति विधीयमानो थ प्रत्ययो बहुलवच
नाच्चरतेरपि द्रष्टव्यः आगमानुशासनस्यानित्यत्वात् नुडभावे सवर्णदीर्घः विश्वः विशः प्रवेशने॥ अस्मात् अंतर्भावितण्यर्थाद्वि प्रुषी १४३
त्यादिना वन्प्रत्ययः नित्वादाद्युदात्तत्वं॥ ॥ तृतीयामृचमाह॥ ॥ स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः॥ एता चिकि
त्वो भूमा नि पाहि देवानां जन्म मर्तांश्च विद्वान्॥ ॥ स ह्यग्निः क्षपावान् क्षपेति रात्रिनाम अग्नेयी वै रात्रिरिति श्रुतेः रात्रेरग्नि
संबंधोयाग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति हूयमानत्वात् यद्वा राक्षसादीनां क्षियणेन नाशनेन युक्तः एवंभूतोग्निः स्तोत्रे यजमानाय

रयीणां धनानि दाशत् प्रयच्छति यो यजमानः अस्मा अग्नये सूक्तैः यथा शास्त्रं प्रयुक्तैर्मंत्रैः अरं अलं पर्याप्तं स्तोत्रं करोति तस्मा इत्यर्थः॥ हे
चिकित्वः चिकित्वन् नयानीति यास्कः॥ हे चेतनावन् सर्वज्ञाग्ने त्वं देवानामिन्द्रादीनां जन्म जन्मादीन् मर्तान् मनुष्यांश्च विद्वान् जनानुक्तानेतानि
भूम भूम्युपलक्षितानि भूतानि पाहि नितरां पालय यस्त्वं देवमनुष्यादीन् सर्वान् जानासि अतएव मुच्यसेत्यर्थः। रयीणां क्रियाग्रहणं कर्तव्यमि
ति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे पष्ठी दाशत् दाशृ दाने लेट्यडागमः अरं वा सूक्तैत्यादिना लत्वविकल्पः मंत्रैः सुयमानाकः इक्कलत्वपदांतो
इति दानत्वं चिकित्वन् मतुवसोरु संबुद्धौ छंदसीति रुत्वं भूम सुपां सुलुगिति भूमिशब्दाद्वितीयस्याद्वितीयाडादेशः परकाले ह्रस्वश्छांदसः॥ ॥ चतुर्थी
मृचमाह॥ ॥ वर्धान्यं पूर्वीः क्षपो विरूपाः स्थातुश्च रथमृतप्रवीतं॥ अराधि होता स्वर्निषत्तः कृण्वन्विश्वान्यपांसि सत्या॥ पूर्वीः बह्व्य उषसः क्ष
पा निशाश्च विरूपाः शुक्लकृष्णतया विविधरूपाः सत्यः यमग्निं वर्धानवर्धयंति तथा स्थातुः स्थावरं वृक्षादिकं रथं रममाणं जंगमं मनुष्यादिकं च
ऋतप्रवीतं सत्येन यज्ञेन वा प्रवर्धितं यमग्निं वर्धयति सोग्निः स्वः सदु अरणीये देवयजने निषिन्नो निषण्ण उपविष्टः सन् होता देवाना
माह्वाता अराधि संसिद्धो भूत् यद्वा ऋत्विग्भिराराधि आराधित इत्यर्थः। किं कुर्वन् विश्वानि सर्वाणि सत्या सत्यानि यजमानेषु भावानि यद्वा सत्य
फलानि अपांसि कर्माणि कृण्वन् वर्धान वृध वृद्धौ ण्यंतात् लुङ्याडागमः छंदस्युभयथेति शप आर्धधातुकत्वादतश्च लोपः संयोगांतलोपः ऋतप्रवी
तं प्रवीतं संवरणे अस्मात् कर्मणि निष्ठा वचिस्वपि यजादीनां संप्रसारणं हृद्ग्रहणेन वति कारकपूर्वस्य प्रहणात् तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं
अराधि राध साध संसिद्धौ कर्मणि लुङ्ि व्यत्ययेन च्लेश्चिण्॥ ॥ पंचमीमृचमाह॥ ॥ गोषु प्रशस्तिं वनेषु धिषे भरंत विश्वे बलिं स्वर्णः॥ वि त्वा नरः
पुरुत्रा सपर्यन् पितुर्न जिव्रेर्वि वेदो भरंत॥ हे अग्ने त्वं वनेषु वननीयेषु गोषु प्रशंसनीयेषु प्रशस्तिं धिषे दधिषे स्थापयसि अस्माकं प्रशस्ता इत्याग
वाक्षिप्र वा भवंतीत्यर्थः॥ विश्वे सर्वे जनाः नोस्मभ्यं स्वः सदु अरणीयं बलिं उपायनरूपं धनं भरंत आहरंतु हे अग्ने त्वा त्वां नरो मनुष्याः पुर
त्रा बहुषु देवयजनेषु काशाध्वनं हरंति तद्वत् धियछंदसा वर्तमाने लिङ्धिर्वचनप्रकरणे छंदसीति वक्तव्यमिति द्विर्वचनाभावः भरंत हृञः
हरणे कस्कादि सोपसर्गार्थो द्रष्टव्यः छांदसो लुङ् हृग्रहोर्भ इति भत्वं पुरुत्रा देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्यर्थे त्राप्रत्ययः जिव्रेः
जृ वयोहानौ जृ शृस्तृजागृभ्यः क्विन् बत इत्यातो लोप इति तिसृशुगाद्यो व्युत्पन्नानि प्रातिपदिकानीति विक्रियो रित्येव मादी युटा चोनि भवती
त्युक्तत्वात् हलि चेति दीर्घाभावः रेफवकारयोर्विपर्ययः इत्वं च वर्णागमो वर्णविपर्ययश्चेति नित्वादाद्युदात्तत्वं वेद इति धननामविद्यतेलभ्य
त इति वेदः विद्लृ लाभे कर्मण्युपसंमते हि प्रयोगस्यायुक्तसंख्याम पात्यादितिव्यनेमात थेच पवितव्यत्यकं उत्तराज्ञादहन्नीद्विपदा॥ ॥ तामेतां ष
ष्ठीमृचमाह॥ ॥ साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु॥ अयमग्निः साधुर्न साधक इव गृध्नुः गृहीता यथा साधकः सा
ध्यफलमाभृशं ग्रहाति तद्वदग्निरपि सर्वं स्वीकरोतीत्यर्थः। तथायमग्निः अस्तेव शूरः यथा इषूणां क्षेप्ता धनुषः शत्रून् प्रेरयति तद्वदग्नि
रपि दहन् सर्वं प्राणिजातं प्रेरयति तथा यातेव भीमः याता यातां हिंसकः भीमः सर्वेषां भयंकरो भवति तद्वदग्निरपि दृष्टिमात्रेण सर्वेषां भ
यमुत्पादयति अत एवंविधोग्निः समत्सु संग्रामेषु त्वेषः दीप्तः सन् अस्माकं सहायो भवत्वित्यर्थः। गृध्नुः अभिकांक्षायां त्रसिगृधिधृषि
क्षिपः क्नुः शूरः शूर विक्रांतौ अंतर्भावितण्यर्थादस्मात् स्फायितंचीत्यादिना रक्॥ ॥ इति प्रथमस्य पंचमे चतुर्दशो वर्गः॥ ॥१॥

भा॰ प्र॰ उपप्रेति दर्शयितुं समर्थं सूक्तं अत्रानुक्रम्यते उप प्र षडिति ॥ ऋषिश्चान्यस्मादिति परिभाषया पराशर ऋषिः अनादेशे परिभाषया
त्रिष्टुप् परमाग्नेयमेशे इति परिभाषितत्वादग्निर्देवता प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छन्दसीदं माद्यानि त्रीणि सूक्तानि अथैतस्यादि
१४४ ति खंडे तथैव सूत्रितं उपप्रजिन्वन्निति त्रीणि काल उपेति सूक्ते इति आश्विनशस्त्रेपि प्रातरनुवाकगते दशरात्रिदमादीनि त्रीणि सूक्तानि तथै
व सूत्र्यते एतयाग्नेयं गायत्रमुपसंतनुयात्प्रातरनुवाकन्यायेति ॥ ॥तत्र प्रथमामृचमाह॥ ॥उप प्र जिन्वन्नुशतीरुशंतं पतिं न नि
त्यं जनयः सनीळाः॥ स्वसारः श्यावीमरुषीमजुष्रंचित्रमुच्छंतीमुषसं न गावः॥ उशंतं काममानमग्निं जनयो जायाः नित्यं असाधा
रणं पतिं न भर्तारमिव उपप्रजिन्वन् उपेत्य हविः प्रदानादिकर्मणा प्रीणयंति प्रीणयित्वा च चित्रं चायनीयं पूजनीयं तमग्निं अंगुलि
रूपं धनेनाजुषन् असेवंत नचेद्दृष्टांतः। श्यावीं श्यावकर्णां रात्रिसंबंधात्कृष्णां ततः उच्छंतीं सूर्यकिरणसंबंधात्कृष्णां ततः तमो वर्ज
यंतीं अतएवारुषीं आरोचमानां यद्वा अरुषीमरुणवर्णां उषसं न उषोदेवतां गावो रश्मयो यथा सेवंते तद्वत्तथा रश्मय उषसा नित्यसंब
धाः एवं सर्वेषु अग्निपरिचरणानां गुरुत्वानित्यसंबंधा इति तात्पर्यार्थः। जिन्वन् जीविः प्रीणनार्थः इदितो नुम्धातोः इत्यागमः उशतीः वष्टे
ईसीति पूर्वसवर्णदीर्घत्वं छांदसत्वादुतिन धातु उशंतं वश कांतौ अस्मात् शतृप्रत्ययः तस्मात् सर्व्यते कृत्तिति कृनं लूपदस्वसादेर्नडीपनिपाद्य
घृतान्तं अरुषी अरपामिति रुपनाम ऋग्नीकृतनिभ्यामुपचुष्टेदीसीपनिपातितिमनत्वर्थेउप उकारः व्यत्ययेनापूर्वान्तत्वं अजुषन् जुषी
प्रीतिसेवनयोः तौदादिकः लङि व्यत्ययेन परस्मैपदं रियन्युक्तावद्बहुलं छंदसीत्यतादरस्यारडागमः॥ ॥द्वितीयामृचमाह॥ ॥वीळु चि
द्दृळ्हा पितरो न उक्थैरद्रिं रुजन्नंगिरसो रवेण॥ चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः॥ ॥नोस्माकं पितरोंगिरसः एतत्सं
ताभ्यप्यबद्धेः द्वारिभ्रिअग्निम्लतावीळु चिद्दृळ्हा वीळ्विति बलनाम बलवंतं दृढागमपि अद्रिं अतारपणिनामानमसुरं रवेण स्तुतिरूपम
न्त्रेणैव रुजन् भंजंतं स्तोत्रैः नमस्कारं हतवानित्यर्थः। किंच बृहतो महतो दिवो घुलोकस्य गातुं मार्गं अस्मे अस्माकं चक्रुः कृतवंतः आव
रकस्यासुरस्य अग्निना हतत्वात मार्गं कृत्वा चस्व म स्तु अरणीयं असुर राहित्येन न प्राप्यं अहरिव संविविदुः अज्ञानवस्तुवेत्ता तथा
केतुं अहः केतुमादित्यं पथि मारमाहिर्यं उस्राः पणिना पहृता गाश्च विविदुरिति नुपंगः वीळु मत्वांगुलिमित्यभिभक्तेर्नुक् दृळ्हा दृह वृद्धौ वलयार
तिनि पातः सर्वांगोत्पत्तिरादेशः रुजन् रुजो भंगे तौदादिकः बहुलं छंदस्यमाङ्योगेपीत्यडभावः विविदुः विद्लृ लाभे इति वार्तिकेयुसि
कचं॥ ॥तृतीयामृचमाह॥ ॥दधन्नृतं धनयन्नस्य धीतिमादिदर्यो दिधिष्वो विभृत्राः॥ अतृष्यंतीरपसो यंत्यच्छा देवाञ्जन्म प्रयसा वर्धयंतीः॥
ऋतं देवयजनदेशं नाम ममग्निं अंगिरसामहर्षयः दधन् गार्हपत्यादिरूपेण धारयन् धारयित्वा चास्याग्नेर्धीतिं कर्माग्निहोत्रादिलक्षणं धनयन्
मकुर्वन् यथापुरस्तात्धनं संपादयंति तद्वदग्निं द्रव्यवंतं कृतवंत इत्यर्थः अदिति अंगिरसामनुष्ठानानंतरं मे व अर्याः धनस्य स्वामिन्यः दिधि
ष्वः तेन धनेन दिधिष्वः अग्नीनां धारणं कुर्वंत्यः कृताग्न्याधानाद्युत्पर्यः विभृत्राः अहितानग्नीनृग्निहोत्रादिकर्मणि विहरंत्यः अतृष्यंतीर्ति तृष
यां तरहस्मा रहिताः अनपराः अपसः अपसा कर्मणा युक्ताः एवंभूतायजमानलक्षणाः प्रजाः प्रयसा हविर्लक्षणेनान्नेन देवानिंद्रादीन् जन्म जाता
न मनुष्यांश्च वर्धयंतीः वर्धयंत्यः सत्यः न नमग्निं अच्छ अभिमुख्येन यंति प्राप्नुवंति परिचरंतीति यावत् दधन् धारणे लङि व्यत्ययेन परस्मैपदं १४४

बहुलं छंदस्यमाङ्योगेपीत्यडभावः धनयन् धनशब्दात् तत्करोतीति णिच् उप प्रातिपदिकस्येनीष्ठवद्भावात् टिलोपः लङि पूर्ववत् अर्यः स्वामिवैश
ययोरिति निपातितः लिंगवचनव्यत्ययो अर्यः स्वाम्याख्यावंत्यंतादात्तत्वं दिधिष्वः दुधाञ् धारणपोषणयोः घोंतकर्मणीत्याभ्यां द्वन्द्वभू
तं वृकपेलूककं धृदिधिषूः इतिकृत्प्रत्ययांतानि निपातितः प्रत्ययस्वरः उदात्तस्वरितयोर्यण इति स्वरः स्वरितत्वं विभृत्राः भृञ् भरणे विपूर्वा
दस्मादौणादिकः क्रन्प्रत्ययः हृश्य हार्भ इति भत्वं अतृष्यंतीः ञितृषा पिपासायां दीर्घं ईसीति पूर्वसवर्णदीर्घस्य विकल्पितत्वात्पूर्वसवर्ण
दीर्घः अव्ययपूर्वपदप्रकृतिस्वरत्वं। अपसः अपस् शब्दात् उसंतस्य मत्वर्थीयस्य विनो बहुलं छंदसीति बहुवचनाल्लुक्विनंतस्यान्ति
गत्वेन न विपयस्यानिसं तस्येति नविषयलाभलाभात्प्रातिपदिकस्वरेणांतोदात्तत्वं जन्म जायंत इति जन्मानो मनुष्याः अन्येभ्योपि दृश्यंत इति मनि
न् सर्वांगलुगिति सुलोपः॥ ॥चतुर्थीमृचमाह॥ मथीद्यदीं विभृतो मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत्॥ आदीं राज्ञे न सहीयसे सचा सन्ना दूत्यं
भृगवाणो विवाय॥ ॥मातरिश्वाख्यानरूपनिस्वरूपेणावस्थिता मुख्यः प्राणः ईमेनमाग्निं यदा मथीत अमथात् अग्नेर्मथनस्य व्यानवा
युसाध्यत्वं अथयः प्राणापानयोः संधिस व्यान इत्युपक्रम्य छंदोगैराम्नातं अतोयान्यन्यानि वीर्यवंति कर्माणि यथाग्नेर्मंथनमाग्नेः सरणं द
दस्य धनुष आयमानमप्राणापानाद्विपंचवृत्तिरूपेण विहृतो विभज्य स्थितः तदपि प्राणसंवादे तैरेयाम्नातं तानवरिष्ठः प्राण उवाच मामोह
मापद्यथाहमेवैतत् पंचधात्मानं प्रविभज्यैतद्वाणमवष्टभ्य विधारयामीति मंथनेनोत्संनायमग्निः इयेनः श्वेतवर्णो भूत्वा गृहेगृहे सर्वे
ष्मिन् यजमानगृहे यद्वा श्येनः प्रादुर्भूतो भूतयद्वारश्ससांजन्योजेना अभिभविता भूत् तथा च निर्णीयते बाकाः संयताआसनत्ते वाविश्य
ताग्निप्रविशन् तस्मादाहुरग्निः सर्वा देवताइति तेग्निमेव वरूथं कृत्वा सुरानभ्यभवन्निति ऐतरेयीणाख्यामनंति ते देवाः प्रति बुध्याग्निं पु
रस्ताप्रातः सवने पर्यौहंस्तेग्निनेव पुरस्तात्प्रातः सवने स्तरक्षांस्यपाघ्नतेति। आत् अनंतरं प्रादुर्भावानंतरं ईमेनमग्निं भृगवाणो
भृगुऋषिः सइवाचरन् यजमानो दूत्यं दूतस्य कर्म आविवाय आ समंतात्प्राप यामास तत्र दृष्टांतः सचासन्न सखाभक्तभ्योरा
ज्ञासहीयसे अभिभवित्रे प्रबलाय राज्ञे न यथा राजत्तस्यपुरः पं दूतकर्म प्रापयिता तद्वत् मथीत मंथाविलोडने लुङि छंदसि क्ष्मणंति वृद्धिप्रति
षेधः जेन्यः जनीप्रादुर्भावे अस्मादौणादिकः एन्यप्रत्ययः खिल्लोपश्चेति भट्टभास्करमिश्रः यद्वा जिजये इत्यस्माल्लत्वाद्युदामिति वचनात्
कर्तर्यं चाद्यतियतेत्स्वरितत्वं वत्सेनाचरत्याच्छालत्वं तु भनित्यमितिवीरवार्यो चेत्यत्र ज्ञापितं भृगवाणः भृगुरिवाचरन् सर्व
प्रातिपदिकेभ्यः क्विप्वक्तव्य इति वचनात् क्विप्तदंता लुडाच्यत्ययेन शानच् अदुपदेशात्सार्वधातुकानुदात्तत्वे प्रत्ययांतधातो
रंतोदात्तत्वे प्राप्ते रूपादेरष्टुतिगणत्वात् ...त्वं विवाय वीगत्यादिषु अस्मादंतर्भावितण्यर्थाल्लिट्॥ ॥पंचमीमृचमाह॥ ॥
महे यत्पित्र ईं रसं दिवे करव त्सरत्पृशन्यश्चिकित्वान्॥ सृजदस्ता धृषता दिद्युमस्मै स्वायां देवो दुहितरि त्विषिं धात्॥ महे ... पृथिव्याः सारभूतं हविः ... तेमा
नः कः ... सृजद्भिरभिनिर्वृत्य ... अनंतरं ... लुङ्यासलायत अ
स्मा ... पशी ... धृषता ... दीप्यमानं बाणं सृजत विसृजत दे
वो दीप्यमानः उषःकाले प्राग्मग्निं स्वायां स्वकीयायां दुहितरि तत्समनंतरभाविन्यामुषसि त्विषिं स्वकीयां दीप्तिं धात् स्थापयति उषः

भा· प्र· कालेहि सूर्यकिरणाः प्रादुर्भवंतीति स्वकीयं प्रकाशमेकीकरोति तथा चैतन्निरीयकं उषं तं वा वादित्यमग्निरनुसमारोहतीति स्याभ्रूः सप्ता
नरिहिवा इंदिशा इति अन उ य सिद्धौ निरिनिरूधातोः क्यचनेकः करोतेर्नुदि मंत्रे घसत्यादिना उङ् सरघ च्लेः अस्तो लेड्यडागमः इत्वश्चेतीकारले
२४५. पः प्रशस्तः स्पृश संस्पर्शने स्पृश संस्पृशतीति विधीयमानः स्युप्रत्ययो बहुलं वचनादस्मादपि भवति स्पृशनं स्पर्शः तत्र साधुरिति यत् सलो
पश्छांदसः रिक्वरितमितिस्वरितत्वं दिप्सदिति दभेर्नाम अंत्यलोपश्छांदसः धातुश्चाद्रेसो वर्तमाने लुङ्॥ ॥ इति प्रथमस्य पंचमे पंचदशो
वर्गः॥ ॥ षष्ठीमृचमाह॥ ॥ स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो अनु द्यून्॥ वर्धो अग्ने वयो अस्य द्विबर्हा यासद्राया सरथं यं
जुनासि॥ ॥ हे अग्ने तुभ्यं त्वदर्थं स्वे स्वकीये यज्ञगृहे यो यजमानः एक आकारो मर्यादायां यथाशास्त्रं आ विभाति आ समंतात् समिदादिभिः कार्यैः प्र
ज्वलयति अनु द्यून् अनुदिवसं उशतः कामयमानाय तुभ्यं नमो वा दाशात् हविर्लक्षणमन्नं वा दद्यात् अस्य यजमानस्य हे अग्ने द्विबर्हाः द्वयोः स्थानयो
र्मध्यमस्थानयोः वर्धितस्त्वं वयोऽन्नं वर्धय धनं च समृद्धं कुरु यं यजमानं रथेन सहितं युयुक्षुं युद्धं प्रति यसि प्रेरयसि स पुरुषः राया धनेन यासत् संगच्छते
तुभ्यं क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी दाशृ दाने लेट्यडागमः उशतः वश कांतौ शतरि ग्रहिज्यादिना संप्रसारणं चतुर्थ्यर्थे षष्ठी॥ अनु
द्यून् द्युरित्यहर्नाम लक्षणे अनोः कर्मप्रवचनीयत्वं कर्मप्रवचनीययुक्ते द्वितीया॥ वर्ध वर्ध वृधु वृद्धौ ण्यंतात् लोटि ह्यस्य भवतेः शपि आर्धधातुकत्वा
त् णेरनिटीति णिलोपः द्विबर्हाः द्विबर्हः शब्दः स्त्रीनपुंसकयोः यासत् यातेर्लेट्यडागमः॥ ॥ सप्तमीमृचमाह॥ ॥ अग्निं विश्वा अभि पृक्षः सचंते समुद्रं न स्रवतः सप्त यह्वीः॥
न जामिभिर्वि चिकिते वयो नो विदा देवेषु प्रमतिं चिकित्वान्॥ विश्वाः पृक्षः सर्वाणि पुरोडाशादीन्यन्नानि अग्निमभि गच्छंतीत्यर्थः ॥ सचंते
आभिमुख्येन समवयंति प्राप्नुवंतीत्यर्थः यह्वीः महत्यः स्रवतः स्रवंत्यो नद्यः समुद्रमिव अत्र प्राप्नुवंतीति शेषः सप्त सप्तसंख्याकाः इमं मे गंगे
यमुने सरस्वतीत्यादिमंत्रोक्ता गंगादयः सप्त नद्यः प्रधानत्वेन समाम्नाताः महत्यः जामिभिः ज्ञातिभिः अस्माकं तत्तदर्थं नो वयं अन्नं न वि चिकिते
न ज्ञायते अस्मद्बंधवो न लभंते तस्मात् हे अग्ने वयं अन्नं तृप्तं न ज्ञायते न लभ्यत इति भावः अतो हे अग्ने त्वं देवेषु चिकित्वान् इदं वयः धनपतयः ते प्रमतिं
प्रकर्षेण मननीयं धनं चिकित्वान् अवगच्छन् विदाः अस्मभ्यं लभस्व यज्ञार्थं प्रमतिप्रकृष्टं ज्ञानं देवेषु विदाः वेदय लभ्यतां पयसः पृक्षः अन्नं नाम तत्र
पीसंपर्क इत्यस्माद्गणादिकः क्विप् धातोः क्विप् च इति क्विप् सचस्यापि तानुनुदात्तेत्वात् तासः सतिशिष्टस्वरबलीयस्त्वात् अन्यत्र तासः
सार्वधातुकत्वात् लसार्वधातुकानुदात्तत्वे प्राप्ते व्यत्ययेनाद्युदात्तत्वं यह्वीः पिष्
टादिभ्यश्चेति शत्रादि पुपविततत्वात् स्य चारुतिगणत्वात् आपिशीषसर्वं दर्शनमिति पूर्वसवर्णदीर्घः चिकिते चिकित ज्ञाने वर्तमाने वर्णमाला लिटि
दाःविद्लृ लाभे अंतर्भावित ण्यर्थात् लेट्याडागमः॥ तुदादित्वाच्छः आगमानुशासनस्यानित्यत्वान्नुमभावः विकरणस्वरः ङिद्यतो वायद्वा विद्
तानां थल्यत इष्टियः यनत्रा॥ ॥ अष्टमीमृचमाह॥ ॥ आ यदिषे नृपतिं तेज आनट् शुचि रेतो निषिक्तं द्यौरभीके॥ अग्निः शर्धमनवद्यं
युवानं स्वाध्यं जनयत्सूदयच्च॥ ॥ अस्य यत्तेजः नृपतिं नृणां पालकं यजमानं आनट् आ समंतात् व्याप्नोति किमर्थं इषे अ
न्नार्थं ततः द्यौः अभिगतं द्युस्थानं यत् शुचि निषिक्तं रेतः तत् अभीके अभ्यक्ते अभिगते अभिप्राप्ते गर्भस्थाने निषिक्तं नितरां सिक्तं
अग्निः वक्ष्यमाणगुणविशिष्टं पुत्रं रूपेण जनयन् तनतु शर्धं बलवंतं अनवद्यं अवद्यरहितं युवानं तरुणं जरारहितमित्यर्थः॥ स्वाध्यं शोभ
नकर्माणं शोभनप्रज्ञं वा उत्पन्नं पुत्रं सूदयच्च वाजादिकर्मसु प्रेरयतु च यद्वा रेतःशब्देन रेतःस्थानीयं सोमं शुचिः निर्मलं रेतः अस्माद्विनाशयस्थानीयानापाय २४५

अग्नेर्यत्तेजः आनट् व्याप्नोति रश्मियुक्तेन भोमाग्नेः संयोगे सतिसंस्थासूपस्थापने अन्यत्र दिशतेजः नृपतिं नृणां रक्षकं उक्षितं रेतः तादृशेन तेजसा युक्तो
को धौर्दीप्तिमान् अभीके अभिगते कालएव शर्धादिगुणविशिष्टं पुत्रं जनयत् सूदयच्च प्रेरयति च शब्दे इति विभक्तेरुदात्तत्वं नृपतिं पराद्विश्छंदसि
बहुलमिति उत्तरपदांतोदात्तत्वं आनट् अशू व्याप्तौ लङि व्यत्ययेन परस्मैपदं नशो आडुडागमः व्रश्चादिषु तद्धलादि विकंपि षूक्षरणे क
र्मणिनिष्ठागतिरनंतरइति गतेः प्रकृतिस्वरत्वं उपसर्गात्सुनोतीति षत्वं अभीके अभिपूर्वात् अंचतेः पचाद्यचि पृषोदरादित्वात् रूपसिद्धिः
यद्वा इतणतावित्यस्मादौणादिकः कक्प्रत्ययः उभयथापि दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वं स्वाध्यं एरनेकाच इति यणादेशः उदा
त्तस्वरितयोर्यण इति स्वरितत्वं॥ जनयत् जनेर्ण्यंतात् लेड्यडागमः सूदयत् षूद क्षरणे पूर्ववल्लेड्यडागमः॥ ॥ नवमीमृचमाह॥ ॥ मनो
न योऽध्वनः सद्य एत्येकः सत्रा सूरो वस्व ईशे॥ राजाना मित्रावरुणा सुपाणी गोषु प्रियममृतं रक्षमाणा॥ ॥ यः सूर्यः एकः एकाकी असहाय
सन् अध्वनो दिव्यान् मार्गान् सद्यः एति आगच्छति असहायत्वं च श्रूयते सूर्य एकाकी चरतीत्याह असौ वा आदित्य एकाकी चरतीति शीघ्रं गमनं च स्म
र्यते योजनानां सहस्रे द्वे द्वे शते द्वे च योजने। एकेन निमिषार्धेन क्रममाण नमोऽस्तु ते इति शीघ्रगमने दृष्टांतः॥ मनो न मनो यथा शीघ्रं गच्छति तद्वत् सूर्य
ः वस्वो धनस्य सत्रा सहैव युगपदेव ईशे ईष्टे यो हि शीघ्रं गच्छति स बहुदेशे वर्तमानानि धनानि प्राप्नोति तथा राजाना राजानौ सुपाणी शोभनबाहू
मित्रावरुणा मित्रावरुणौ अस्मदीयासु गोषु प्रियं सर्वेषां प्रीतिकरं अमृतं अमृतत्वहेतुत्वादमृतं पयो रक्षमाणा रक्षंतौ वर्तेते हे अग्ने तद्रूपेण
त्वमेवैवं वर्तस इति भावः॥ वस्वः लिंगव्यत्ययः ससादिषु छंदसि वा वचनमिति घेर्ङितीति गुणाभावे यणादेशः ईशे ईश ऐश्वर्ये लोपस्त आत्म
नेपदेष्विति लोपः मित्रावरुणा देवताद्वंद्वे चेति पूर्वपदस्यानङ् देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं॥ ॥ दशमीमृचमाह॥ ॥ मा नो अग्ने सख्या
पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन्॥ नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि॥ ॥ हे अग्ने पित्र्याणि पितरं वसिष्ठमुपक्रम्या
गतानि सख्या सखित्वानि मा प्र मर्षिष्ठाः मा विनाशय अत्र मर्षतिरुपसर्गवशाद्विनाशार्थः अरतिः यतस्त्वं कविः क्रांतदर्शी सन् अभि अभिमुख्ये
न विदुः सर्वं विश्वान् नभो न रूपं यथा तारिक्षं रूपवंतः सूर्यरश्मयः आच्छादयंति तद्वदाच्छादयंति जरिमा जरिमा मिनाति मां स जरा हिनस्ति
अभिशस्तिः हिंसा हेतोस्तस्याः अभिशस्तेः पुरा अधीहि मां बुध्यस्व सा यथा न प्राप्नोति तथा कुरु अमृतत्वं प्रयच्छति यावत् सख्युः सख्युर्भा
वः सख्यं सख्युर्य इति यः पित्र्याणि पितृभ्य आगतानि पितुर्यच्चेति यत्प्रत्ययः॥ रीङृत इति रीङादेशः यस्येति चेति इकारलोपः॥ यतो नावइ
त्याद्युदात्तत्वं मर्षिष्ठाः मृष तितिक्षायां प्रार्थनायां छांदसो लुङ् न माङ्योग इत्यडभावः विदुः विद ज्ञाने बहुलमन्यत्रापि इति कुसिप्रत्ययः अत एव बहुल
वचनाद्गुणाभावः छंदसि वा प्रम्रेडितयोरिति विसर्जनीयस्य षत्वं जरा मज्जरयतेर्योहानो औणादिको भावे इमनिच्प्रत्ययः मिनाति मीञ् हिंसा
यां प्वादीनां ह्रस्व इति ह्रस्वत्वं अभिशस्तेः अभिशस्यते हिंस्यते अनया अभिशस्तिः करणे क्तिन् तादौ च निति कृत्यतौ इति गतेः प्रकृतिस्वरत्वं अधीहि इक् स्मर
णे कोदि अनुदात्तोपदेशेत्यादिना लुक् हेरपितत्वेन ङित्त्वाद्गुणाभावः॥ ॥ प्रथमस्य पंचमे षोडशो वर्गः॥ ॥ नि काव्येति दशर्चं सप्तमं सूक्तं पराशरस्यार्षं आग्नेयं
त्रैष्टुभं अनुक्रांतं च निकाव्येति प्रातरनुवाके आश्विने शस्त्रे चास्य विनियोगः॥ ॥ तत्र प्रथमामृचमाह॥ नि काव्या वेधसः शश्वतस्कर्हस्ते
दधानो नर्या पुरूणि॥ अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा॥ ॥ शश्वतः शाश्वतस्य नित्यस्य वेधसो विधातुर्ब्रह्मणः

भा॰ प्र॰ संबंधीनि काव्यानि रूपाणि स्तोत्राणि अयमग्निर्निकनियमेन स्वात्मीयं कुरुते। किं कुर्वन्। नर्याणि नृभ्यो हितानि धनानि पुरूणि बहूनि धनानि
हस्ते दधानः हस्ते धारयन्। ईदृग्भूतमग्निमत्र समवेताः सर्वे जनाः स्तुवंतीति भावः। स्तोतृभ्यो धनेषु दत्तेष्वपि अग्नेर्धनं न क्षीयत इत्याह। अग्निरिति
१४६ अयमग्निः रयीणां रयिपतिर्भुवत् धनानां मध्ये यानि धनान्युत्कृष्टानि तेषां स्वामी भवति। किं कुर्वन्। विश्वा विश्वानि अमृतानि हिरण्यनामैतत् अ
मृतं वै हिरण्यमिति श्रुतेः सर्वाणि हिरण्यानि स्तोतृभ्यः सत्रा सह एव चक्राणः कुर्वन् युगपत्प्रयच्छन्नित्यर्थः। कः करोतेश्छांदसो लुङ् मंत्रे घसेति च्ले
र्लुक् हल्ङ्याब्भ्य इति तकारलोपः। नर्याणि नृभ्यो हितार्थे गवादिलक्षणो यत्प्रत्ययः यद्वा नृभ्यः साधुरिति यत्। चक्राणाः करोतेर्लिटः कानच्
बहुलं छंदसीति विकरणस्य श्लुः। नन्वेवं सति अभ्यस्तानामादिरित्याद्युदात्तत्वं प्राप्नोति एवं तर्हि लिटः कानच् तस्यार्धधातुकत्वेन अभ्यस्त
दाभावात् तदभावे चित्स्वर एव शिष्यते॥ ॥द्वितीयामृचमाह॥ ॥अस्मे वत्सं परि षंतं न विंदन्निच्छंतो विश्वे अमृता अमूराः॥ श्रमयुवः पदव्यो
धियंधास्तस्थुः पदे परमे चार्वग्नेः॥ ॥अस्मे अस्माकं वत्सं वत्सवद्रक्ष्यं प्रियं यद्वा वत्सः पुत्रः पश्चादुत्पन्नत्वात् तद्वदग्निरप्यस्माकं पुत्रः तथा चा
म्नायते। ममैव सन् नह्यस्याग्ने पुत्रः पित्रे लोककृज्जातवेद इति। परिषंतं परितः सर्वतः वर्तमानं देवेभ्यो निर्गत्य अश्वत्थवेण्वादिषु निलीनं संत
मित्यर्थः एवंविधमग्निमिच्छंतो विश्वे अमृताः सर्वे मरणधर्मरहिता देवाः अमूराः अमूढाः मरुतश्च अविंदन् तमग्निमालभंत अलभमानाश्च ते श्रमयुवः ह
व्यवाहनस्याभावेन हविषाभावात् तज्जन्येन श्रमेण कृशेनैकीभूता तस्याग्नेरन्वेषणा। पदव्यः पादैर्गच्छंतः धियंधा अग्नेरन्वेषणादिलक्ष
णानां कर्मणां धारयितारः एवंविधाः संतः चारु चारुणि शोभने अग्नेः परमे उत्तमे अंतपदे यत्र ह्यग्निर्निलीनो वर्तते तत्र इत्यर्थः। तस्मिन् देशे स्थितवंतः
बहुविधेन प्रायासेन आग्निं दृष्टवंत इत्यर्थः। परिषंतं उपसर्गात्प्रादुर्भ्यामस्तिर्यच्पर इति षत्वम्। श्रमयुवः यु मिश्रणामिश्रणयोः श्रमं यवंत इति श्रमयुवः क्वि
प्वचिप्रच्छ्यादिना विधाय भावो दीर्घः अस्मात् धाप धातोर्भवतेः न चाहितात् बहुल पदव्यः वीगत्यादिषु पादैर्नावयंति गच्छंतीति पदव्यः क्विप्
चेति क्विप् धियंधाः अत्रानुपसर्गे क इति कः तस्युरपशब्दादि हलमिव हलवचनात् द्वितीया अप्यलुक् तस्थुः पादादित्वान्निघातः चारु सुपां सु
लुगिति सप्तम्या लुक्॥ ॥तृतीयामृचमाह॥ ॥तिस्रो यदग्ने शरदस्त्वामिच्छुचिं घृतेन शुचयः सपर्यान्॥ नामानि चिद्दधिरे यज्ञियान्यसूद
यंत तन्वः सुजाताः॥ शुचयः शोधयितारो दीप्ता वा मरुतः हे अग्ने शुचिं शुद्धं दीप्यमानं वा त्वामित देवेभ्यो निर्गतं त्वामिच्छ तिस्रः
शरदः शरद्धिं सायंनीयं तस्या मोषधय इति शरत्संवत्सरः भृदृभ्रसादिरिति अद्रिप्रत्ययः उभयत्र कालाध्वनोरत्यंतसंयोग इति द्वितीया
पर्याप्तसपर्यान् पूजयन् कण्ड्वादिभ्यो यगागमः इतश्च लोप इति इकारलोपः यातिया नियता लिङ्भ्यां घरवयाविप्र हार्थे प्रत्ययः॥ ॥चतुर्थी
मृचमाह॥ ॥आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः॥ विदन्मर्तो नेमधिता चिकित्वानग्निं पदे परमे तस्थिवांसं॥ बृहती
महत्यौ रोदसी द्यावापृथिव्यौ आवेविदानाः अत्यर्थं तापयंतः कुत्राग्निर्वर्तत इति परस्परं वदंतो द्यावापृथिव्योर्मध्ये वर्तमाना इत्यर्थः
यद्वा महत्यौ द्यावापृथिव्योर्मध्ये आवेविदानाः अग्निमुपलभमाना एवंभूता यज्ञिया यज्ञार्हा देवाः रुद्रियाः रुद्रपुत्राः रुद्रोग्निः देवानामसु १४६
रैः सह युद्धं समवर्तत देवैः स्थापितं धनमपहृत्य गतवंतमग्निं देवा अगत्य अग्नेः सकाशाद्बलेन तद्धनमगृह्णन् तदानीं सोग्निः अरोदीत्
तस्माद्रुद्र इत्यायते तथा च तैत्तिरीयकं देवासुराः संयत्ता आसन् ते देवा विजयमुपयंतोऽग्नौ वामं वसु संन्यदधत इदमु नो भविष्यति यदि नो जेष्यंतीति तदग्निर्न्यकामयत तेनापाक्रामत् तद्देवा विजित्यावरुरुत्समाना अन्वायन् तदस्य सहसादित्सन्त सोऽरोदीत्

दीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वमिति। नेमधिता नेमधितिः सर्वदेवाः एकार्थः इंद्रेण कृत्यपरोर्धइति मा वन तथा च तैत्तिरीयकं यन्मे सर्वाम र्धमिंद्रः प्रति तस्मादि 289
द्रो देवतानां भूयिष्ठभाक्तम इति तेनेंद्रेण सहिता मर्तो मरुद्गणः परमे उत्तमे अंत्यपदे स्थाने अश्वत्थादौ तस्थिवांसं तस्थिवंतं तमग्निं चिकित्वान् 1924
जानन् अविदत् अलभत वेविदानाः विदर्तानार्थाद्भार्थाद्वा यंङः सार्वधातुकः सानच् बहुलं छंदसीति शपः श्लुः भयथेति ज्ञानं चार्ध
धातुकत्वाद्दत्तात् लोपः अभ्यस्तानामादिरित्याद्युदात्तत्वं विदत् विद्लृ लाभे लुङि लृदित्वाच्चुरङ् इंडः नेमधिता दधातेः कर्मणि निष्ठा साधिते नेमु
धितेन नेमधितानि धिभावो निपात्यते तृतीयायाः सुपां सुलुगिति आकारः तस्थिवांसं तिष्ठतेर्लिटः क्व
सुः वस्वेकाजाद्घसामिति इडागमः प्रभिन्न संजानाना इत्येषा अथानरमितिरिंद्रस्य त्रिनं संजानाना उपसीदन्नभिज्ञ्वादनाभिर्विवस्वतइ
ति॥ ॥तामेतां पंचमीमृचमाह॥ ॥संजानाना उप सीदन्नभिज्ञु पत्नीवंतो नमस्यं नमस्यन्॥ रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि
रक्षमाणाः॥ हे अग्ने त्वां संजानानाः सम्यग्जानंतो देवाः उपसीदन् उपसीदंति प्राप्नुवंति उपपूर्वः सदिः प्राप्त्यर्थः पत्नीवंतः सपत्नीकाः संतः नम
स्यं नमस्कारार्हं अभिज्ञु आभिमुख्येनावस्थितजानु युक्तं त्वां नमस्यन् पूजयित्वा च सख्युर्मित्रस्य तव निमिषि दर्शननिमित्तभूते सति रक्षमा
णाः त्वया परिरक्ष्यमाणाः सखा सख्यायो देवाः स्वास्तन्वः स्वकीयानि शरीराणि रिरिक्वांसः अनशनादिरूपेण दीक्षानियमेन रिक्तीकुर्वंतः
प्रापयंतः कृण्वत यागानकुर्वन् देवा वै सत्रमासत इति श्रुतेः नमस्यन् नमोवरिवश्चित्रङः इति पूजार्थे क्यच् लङि बहुलं छंदस्यमाङ्योगेपी
त्यडभावः रिरिक्वांसः रिचिर् विरेचने लिटः क्वसुः निमिषि मिषस्य धातोः अत्रापसर्गवशाद्दर्शनार्थः संपदादिलक्षणो भावे क्विप् रक्षमा
णाः कर्मणि लटः शानच् यक् प्राप्तं व्यत्ययेन शप्॥ ॥इति प्रथमस्य पंचमे सप्तदशो वर्गः॥ ॥षष्ठीमृचमाह॥ त्रिः सप्त यद्गुह्यानि त्वे इत्पदा
विदन्निहिता यज्ञियासः॥ तेभी रक्षंते अमृतं सजोषाः पशूंश्च स्थातॄंचरथं च पाहि॥ त्रिः सप्त एकविंशतिसंख्याकानि गुह्यानि रहस्यानि वेदैकसं
मधिगम्यानि यत् यानि पदानि पदानि पद्यंते गम्यते स्वर्ग एभिरिति व्युत्पत्त्या पदशब्देनात्र संस्था उच्यंते ता एकविंशतिसंख्याकाः औपास
नहोमवैश्वदेवादयः सप्त पाकयज्ञाः आग्नेयाधेयादर्शपूर्णमासाः सप्त हविर्यज्ञाः अग्निष्टोमात्यग्निष्टोमादयः सप्त सोमयज्ञाः एवमेक
विंशतिसंख्याकानि यज्ञलक्षणानि पदानि हे अग्ने त्वे इत् त्वय्येव निहितानि स्थापितानि तेषां सर्वेषां त्वत्प्रधानत्वात् त्वाग्निमंतरेण यागा अनुष्ठा
तुं न शक्यंते यज्ञियासः यज्ञार्हाः अर्थित्वसामर्थ्यविद्यादिभिरधिकारहेतुभिर्युक्ताः तथा चोक्तं अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तः कर्म
ण्यधिकारीति एवंविधलक्षणा येता यजमानाः तानि विदन् अलभंत लब्ध्वा च तेभिर्यज्ञलक्षणैः पदैः अमृतं अमरणधर्माणं त्वां रक्षंते पा
लयंति यजंतीत्यर्थः सजोषाः सहजयमानैः समानप्रीतिः स त्वं पशून् गवाश्वादिपशूंश्च स्थातॄन् व्रीह्यादिस्थावराणि च रथं पशुव्यतिरिक्तं अन्य
प्राणिजातमस्मिंस्तं च पाहि रक्ष रक्षते पृषिरिक्षते पुत्रदीयायागाः कर्तुं शक्यंते नान्यथा अतस्त्वमेव मुच्यत इत्यर्थः यत् सुपां सुलुगिति विभ
क्तेर्लुक् गुह्यानि गुहायां भवानि भवे छंदसीति यत् यतोनावः इत्याद्युदात्तत्वं सुपां सुलुगिति सप्तम्याः शेआदेशः अविदन् विद्लृ लाभे लुङि लृदि
त्वादङ् पशून् स्थातॄन् उभयत्र उभयत्र छंदस्युभयथा भावान्नकारस्य रुत्वाभावः॥ ॥सप्तमीमृचमाह॥ ॥विद्वाँ अग्ने वयुनानि क्षिती
नां व्यानुषक् छुरुधो जीवसे धाः॥ अंतर्विद्वाँ अध्वनो देवयानानतंद्रो दूतो अभवो हविर्वाट्॥ ॥हे अग्ने वयुनानि ज्ञानानि मे तत् इहतु

ज्ञानस्य वर्तते सर्वाणि ज्ञानव्यानि विद्वान् ज्ञानं स्वेष्वितिनीनां यजमानलक्षणानां प्रज्ञानां तीर्थमित्रीवितुं स्मर धः सुद्रपस्य शोकस्यरो धयित्रीरियोऽग्ना
भा॰ प॰ नि आनुषक् अनुषक्तं सततं यथा भवति तथा विधाः विधाहिवृतिरित्यर्थः ॥ एवं यजमानं नन्नमम स्थानं कृत्वा आनंतरं हविर्वोढे तेदेवेभ्यः प्रतेहवि वोढन
१४० दूता भवः देवानां दूता भवसि वर्ही दृशस्त्वं अंतरिक्षानं द्यावापृथिव्यामध्यज्ञनानाकि ज्ञनान अध्वनो मार्गानकी दृशान् देव यानान् देवाः येमाधियो
तिगच्छंति तान् ज्ञानं चित्यर्थः अतंद्रः पुनः पुन हविर्वहनेपि अनलसः वयुनानि अज गतिक्षेपणयोः अजीयमित्रीक्रंष्यश्चातिकमेण्युन्प्रत्ययः
अजर्यं घञ पोरितिर्वा भावः क्षितीनां श्रीर्यतिनिवसंतीति क्रूरधः क्षिप चतिक्षुप्र प्रवंधदस्यात्यल्पापः पृषोदरादित्वात् ॥ ॥ अष्टमीमृचमाह ॥
स्वाध्यादिव आसमयदीरापादुराल्यनताभतानन ॥ विदद्व्यसरमादृढमूर्वं येनानुकं मानुषीभोजतेविट् ॥ ॥ स्वाध्यः शोभनकर्मयुक्ताः यद्दीघ
क्र्याः महत्यः सप्तगंगाद्याः समनयः दिव्युल्का कान आगत्य भूस्यात्र इवेतीनिद्रापः हे अग्ने देवा विधानधः त्वया रक्षिताः अग्नेर्वा हामसति
हितनत्रप्रः मृर्योरश्चिं कृतानिर्मिन र्थस्मृतिः पूर्वदामुदादृता अनायपि द्रुणा आमिरेतनदी कृतानीत्य अर्ततथाकृतताः कृतंयतंता नतोगिरसः
गयायरुनाम्नाकरणापहतस्यधनस्य दुराद्वारा णिगमनमार्गान अज्ञानन त्वया तातवंतः त्वमाध्यन यागेन प्रीतइंद्राग्ना माल्वषणायसरमां
नामदेवशुनी प्रषितवानमार्चसरमा गवांस्थानमवगत्येंद्रस्यन्ययदयत वंइंद्रश्चतानंगिरसोगाः प्रापयत अत एन तस्य वैलमसरवनवान अविभ्यः
सकाशाहृव्यंगाविभेदृढं दृढं बहुप्रदमित्यर्थः ॥ पवविभ्रंपयात्सगणंउर्वे अनंसरमा देवशुनीविदनलभनतकुमित्यनस्यदंपूरणंयेननुदेवहित्य
नमानुषीविड् मानोः संवंधिनी प्रज्ञा भोजन इदानीं भुञ्जत द्व्यमविपरं परया अग्निरेव कृतति स्वाध्यः स आदृवातं धीगुत्या तज्ज्ञसिरन
काचउतिस्पर्णा दयाः यद्धीः वांछदसीति पूर्वसवर्णदीर्घं तेंगाध्यं सर्वत्र गोरजादिप्रत्ययप्रसंगे यदूज्यमिति भयार्थं यत ईयंदुवदाहेसार्थः उ
वंतिशधं हिनस्तीप्त्रूयं मनंपचा यस्त भाजतेभुञ्जपाल्नाभ्यवहारयोः ध्यमित्रामेव्यत्ययेन उप ॥ ॥ नवमीमृचमाह ॥ ॥ आवेविश्वासुपत्यानि
तस्थुः कृण्वानासोमृतत्वाय गातुं ॥ मान्हा महद्भिः पृथिवीवितस्थमाता पुत्रैरदितिर्धायसेवेः ॥ ये आदित्याः अमृतत्वाय अमरणत्वमिश्र यगातुं मार्गं उपा
यं कृण्वानासः कुर्वाणास्तं विश्वाविश्वानि सर्वाणि स्वपत्यानि शोभनापत्यहेतुभूतानि चतुर्दशरात्रषड्त्रिंशद्रात्रादीनि अयनादीनि कर्माण्यात स्थुः
आतिष्ठितवंतः कृतवंत इत्यर्थः तथा चं तत्तिरीयकं आदित्या अकामयंत सुवर्गलोकमियामेति एतं षट्त्रिंशद्रात्रमपश्यंत माहरंतेनायजंतेति
चमहद्भिः अनुभाननमहानुभवैः तैः पुत्रैः सहिता माता जननयित्री अदितिरदीना पृथिवी धायसे समर्थस्य जगतो धारणाय मन्हा स्वकीयेन महत्वेन
वितस्थेविशिष्य वर्तिष्ठति हे अग्ने यतस्त्वयः आदित्यैरनुष्ठितेन यागेषु चरणु गणशादिनि हवींषि भक्षयः अतस्तस्य वैतातमित्यर्थः कृण्वाना
सः कृविहिंसाकरणयोश्च व्यत्ययेनात्मनेपदं धिन्विकृण्व्योरच्चेति उप्रत्ययः तसंनियोगेन अकारांतादेशश्चनस्याल्लोपसति इधातेर्भावे क्सनत्यिट्
नुष्नतायुकृवित्व रतामिति युकः वैः गतिनकर्ता नकाल्यमनस्वादन पुलिङ्गः सिपि अडादित्वाच्छयातुकृबहुलं छंदस्यमाङ् योगेपीत्यङ्भावः धायस
इत्यस्य वामातरगतस्वादस्यति पाताभावः ॥ ॥ दशमीमृचमाह ॥ ॥ अधिश्रियंनिद्धुश्चारुमस्मिन्दिवोयदक्षीअमृताअकृण्वन ॥ अधक्षरंतिसिं
धवोनसृष्टाः प्रनीचीरग्ने अरुषीरजानन ॥ ॥ अस्मिन्नग्नौ चारुं शोभनां श्रियं पारिवनादिरूपां यज्ञसंपदं अधिनिदधुः यजमानाः स्थापितवंतः वि
निधाय एवयपदा अशीयतस्य आत्मभागत्वत च क्षषी अकृण्वन कुर्वंति चक्षुषी चान्तेयतस्य यदा चाभागावितिश्रुतेः तदा नीदिवः द्युलो १४०

काद अमृताः अमरणधर्माणो देवाः यागसमये आत इत्यस्य यत्य आ गच्छंतीति शेषः अथानंतरभागानंतरं सप्ताअग्ने स्यंदनाः सिंधवोनद्यो घृतं गच्छंतो 291
नद्यइव नितीः निनरां सर्वामदिशः गच्छंतीरप्रीतगत्वमानाः य द्रानिर्मलरूपाः हे अग्ने एवं भूतास्त्वदीया ज्वाला इत्यना मिधवानद्यो घृतं गच्छंतोन 1924
द्यइव शरंति सचलंति सर्वामदिशः गच्छंतीत्यर्थः आगता देवाश्च प्रज्ञानन अस्माकं होमार्थं इतूभ्यो ज्वाला इत्यंना इति हृष्टाः संतः प्रकर्षेण जानंति
अशीपरत्वा नुमं वाधित्वाउंचद्विवचनमिति अक्षि गाव्यस्य ईकारांतादेशः सचोदात्तः ईत्वक्तेन सहृदुत परिभाषया पुनर्नुम्न भवति सवर्णदीर्घः
नदीः निपूर्वाद्दं चतः अनिगिल्यादिनाक्विन अनिदितामितिनलोपः अचं तस्थाप संख्यानमितिङीप अचइत्यकारलोपः कृत चावितिदीर्घत्वस्य
धीचंति गतः प्रकृतिस्वरं अरुषीः अरुषमितिनामकरूनिभ्यामुपाजत्यतरपवछंदसीवनिपावितिमत्वर्थ इयइकारलोपः ॥ ॥ इति प्रथमस्य पं
चमेअष्टादशोवर्गः ॥ ॥ रथिर्नेति दशर्चं नवमं सूक्तं पराशरस्यार्षं त्रैष्टुभमाग्नेयं अनुक्रांतं च रथिर्नेति प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः
॥ ॥ तत्र प्रथमामृचमाह ॥ रयिर्नयः पित्रवित्तोवयोधाः सुप्रणीतिश्चिकितुषोनशासुः ॥ स्योनशीरतिथिर्नप्रीणानो होतेवसद्मविधतोवितारीत ॥ ॥
पित्रवित्तः पित्रभक्काशाद्धारयिर्धनमिव योग्निर्वयोधाः अन्नस्यदाताय थापित्रं धनं विभ्रंभवत्याव क्रियमाणं सन् अनं प्रदं भवति तद्वदग्निर
पि सर्वेषु यज्ञेषु विभ्रं भणव्यवहूतः सन् अन्नप्रदो भवतीत्यर्थः चिकितुषोन विदुषो यज्ञशास्त्राभिज्ञस्य शासुः ज्ञासनमिव सुप्रणीतिः सुखेन प्रणतव्यः
यथा शास्त्रविज्ञानं सर्वेषु यज्ञेषु पुनः नसंदायनिर्णयाय नीयते तद्वद्ग्निरपि सर्वेषु यज्ञेषु प्रणीयते यश्च स्योनशीः सुखप्रदं गार्हपत्यायत
नादेशं यानः अतिथिर्न सुखासने उपवेशितोर्घपाद्यादिभिः सत्कृतोतिथिरिव प्रीणानो हविर्भिस्तर्पणीयः सोग्निर्विधतः परिचरतो यजमानस्य
सद्म गृहं वितारीत प्रवर्धयति ददातिवा तत्र दृष्टांतः ॥ होतेव होमकर्ताध्वर्युः ॥ तत्तत्कर्मकरणेन पालियजमानस्य गृहं वर्धयतिपित्रवित्तः विद्रूला
भेकर्मणिनिष्ठायस्याविभा यतोद्प्रतिषेधः विभाषा गमहनवितानामिति घसावस्य धातोरिडो विकल्पितत्वात् तत्रापिविद्रिस्माहत्यर्योरो द्वाह्रिकए
व विदिर्गृह्यत इत्युक्तं विनाभागत्यर्थास्तिनिष्ठानिवाभावानिपातितः वयोधाः दुधाञ्धारणपोषणयोः अतोमनिन्नितिविच् सुप्रणीतिः प्रणीय
त इति प्रणीतिः कर्मणि क्तिन् तादौचनितिगतेः प्रकृतिस्वरत्वं पुनः सुशब्देन समासे कृदुत्तरपदग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् कृदुत्तरपदस्वरत्वं चिकितु
षः कित ज्ञाने क्वसुः वसोः वचनचक्रमोः संप्रसारणमिति संप्रसारणमामिवसिषजीनां चतिषत्वं शासुः शासुनुशिष्टौ भृमृशीङ्त्यादिनाविधीयमानप्रत्ययोव
हुलवचनद्रमादपि इष्यः तत्र नित्यादिनित्यनुरतेराद्युदात्तत्वं स्योनशीः स्योनमितिसुखनाम स्योनेसुखकरे गार्हपत्यादिस्थाने शेत इति स्योनशीः
क्विप चेतिक्विप प्रीणानः प्रीञ्तर्पणे कर्मणि शानच्छान्दस्य येनम्भाविधनः विध विधानेविधतिः परिचरणकर्मेतिनिरुक्तः तुदादित्वाच्छ प्रत्ययः
शतुरनुम इतिविभक्तेरुदात्तत्वं ॥ ॥ द्वितीयामृचमाह ॥ देवोनयः सविता सत्यमन्मेति देवोन सविता द्योतमानः सर्वस्य प्रेरकः सूर्य इव योग्निः सत्यम
न्मा सत्यतानः यथार्थदर्शी सोग्निः क्रत्वा आत्मीयेन कर्मणा विश्वा रजिनानि विभक्ति व्यत्ययः सर्वेभ्यः संग्रामेभ्यः निपातितित रांपालयति वर्जयतीदं
यं नामिमिति रक्तनं संग्रामः अपिच पुरुप्रशस्तः पुरुभिर्यजमानैः स्तुतो अग्नि अमतिर्न रूपनामैतत् रूपमिव सत्यो वाधरहितः रूप्यत इति रूपं यथा
पृथिव्यादेः स्वरूपं आगमापायि पुनःशेषु सत्यमपि सर्वं नैकरूप्येण नित्यं भवति तद्वदग्निरपि इत्याच वेषु सर्वेषु कर्मसु स्वयमेक एव व्याप्य वर्तते सो
ग्निः शेवः सुखकरः तत्र दृष्टांतः आत्मेव परमात्मा यथा निरतिशयानंदरसरूपः आत्मा यथा सर्वान् सुखयति एतस्यैवानंदस्यान्यानि भूतानि

भा॰ अ॰ माता मुपसीदंति । एष सेवानं स्थातीति चकथ्य वणान तद्दुदमिः रपि स्वर्गादि फल हेतुत्वात् सत्ययति एवं भूतोग्निर्दिधिषाय्यो भूत् सर्वैर्यजमानैः
धारणीयो भवति पवित्याग्नि वीरहत्यालक्षणो दोषो भवति तथा चैत्तिरीयकं। वीरहवा एष देवानां योग्निमुद्वासयति। सत्यमन्मा मननीयानि अ
१४८ न्यथापि दृश्यंत इति मननीयं सत्यमवितथं मन्म यस्य बहुव्रीहौ स्वरः॥ दधि नाति दधी वसने न छंदसि तीयादिना आयुप्रत्ययः। पुरुप्रशस्तः तृतीया कर्म
णीति पूर्वपदप्रकृतिस्वरत्वं प्राप्ते परादीनां च इत्युत्तरपदांतोदात्तत्वं सत्याहुतिगणे इत्युक्तं। अमतिः अमगत्यादिषु अमेररतिः। दिधिषाय्यः दधातेर्द्
धिषाय्य इति धाय्यप्रत्ययांतो निपात्यते॥ ॥तृतीयामृचमाह॥ ॥देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा। पुरःसदः शर्मसदो
न वीरा अनवद्या पतिजुष्टेव नारी॥ ॥देवन द्योतमानः सूर्य इव योग्निर्विश्वधायाः सर्वस्य जगतो धारयिता सूर्यो हि स्वादिप्रदानेन सर्वं जगद्धत्ते एवमग्नि
रपि साधनेन कृत्स्नस्य जगतो धारयिता साग्निः उपक्षेति सर्वं पृथिवीं यः हितमित्रो न राजा हितमित्रो न राजा हितान्यनुकूलानि मि
त्राणि यस्य तादृशो राजा यथा सुखेन निवसति तद्वत् यथा सर्वजनमित्रो राजा एवमग्निरपि सर्वजनमित्र इत्यर्थः। नद्यग्निः कश्चित् दृष्टेय स्याग्नेः पुरः
सदः पुरस्तात्सीदंत उपविशंतः पुत्राः शर्मसदो न वीराः पितृगृहे वसमानाः पुत्रा इव यत्र तत्पिता पुत्रानिवाग्निः स्वस्य परिचारकान् रक्षतीत्यभि
प्रायः सोयमग्निः अतिशयेन शुद्धः कर्मयोग्यो भवति तत्र दृष्टांतः अनवद्या अनिंदितामिति जुष्टेन नारी स्वपतिना सेविता स्त्रीकृता याग्नि मायथाया
तिप्रत्येन शुद्धा सती कर्मयोग्या भवति एवमग्निरपि विश्वधायाः गतिकारकोपपदात्कृत् इति पूर्वपदप्रकृतिस्वरत्वं चेति वचनात कारकपूर्वात् दधातेर्वहि
हाधाञ्भ्यश्छंदसीत्यसुन् णित्वं च नुसंतानां युक् चणकृतारिति युक् मरद्धादिवायुपदांतोदात्तत्वं उपक्षेति क्षि निवासगत्योः बहुलं छंदसी
विकरणस्य लुक्। अनवद्या अवद्यपण्यवर्या इत्यादिना नञो स्वरः पदांतोदात्तत्वं पतिजुष्टवती यावृत्तं णीति पूर्वपदप्रकृतिस्वरत्वं नारी नरस्य धर्म्या इति
अपर्द्धस्यादिषु पाठात् ङीप् ङितोदात्तत्वं॥ ॥चतुर्थीमृचमाह॥ ॥तं त्वा नरो दम आ नित्यमिद्धं। हे अग्ने तं त्वा पूर्वोक्तगुणविशिष्टं त्वां नरो यज्ञस
स्य नेतारो यजमानाः ध्रुवासु क्षितिषु निश्चलासु वसतिषु गृहेषु भूमिषु निरुपद्रवपुयामास्वित्यर्थः दमे स्वकीये यज्ञगृहे नित्यमिद्धं अनवरतं समि
द्धं प्रज्वलितं हत्वा आसचंत अभिमुख्येन सेवंते किंच अस्मिन् अग्नौ द्युम्नं हविर्लक्षणमन्नं भूरि चरुपुरोडाशादिरूपेण बहुविधं अधिनिदधुः स्
थापितवंतः एवं गुणविशिष्टाग्निः स त्वं विश्वायुः उक्तप्रकारेण सर्वेषां भर्तारं यथाणं धनानां धरुणो धारयिता भव अस्मभ्यं दातुं धनानि धारय
तेत्यर्थः। सचंत षच समवाये छांदसो वर्तमाने लङ् बहुलं छंदस्यमाङ्योगेपीत्यडभावः। भद्र ह्मचानत्विर् इति संहितायां दीर्घः धरुणः धारणि
उकवेलन प्रत्ययः॥ ॥पंचमीमृचमाह॥ ॥वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो ददतो विश्वमायुः॥ सनेम वाजं समिथेष्वर्यो भागं देवेषु
श्रवसे दधानाः॥ ॥हे अग्ने मघवानो हविर्लक्षणेन धनेन युक्ताः यजमानाः पृक्षोन्नानि अश्युः व्यश्नुवंतु त्वयानुगृहीताः सर्वाण्यन्नानि लभंतामित्य
र्थः सूरयो विद्वांसः स्तोतारः ददतः यत्र तुभ्यं हवींषि ददतः प्रयच्छंतो वर्तंते ते सर्वं विश्वमायुः सर्वं जीवितं च व्यश्युः याभुवंतु वयं च समीथेषु युद्धे
षु अर्यः अरेः शत्रोः संबंधि वाजमन्नं सनेम लभेमहि तदनंतरं देवेषु तत्र मुख्यांभ्याद्दिषुभ्य श्रवसे यशसे तदर्थं भागं दधा
नाः स्थापयंतो भूयास्मेति शेषः अश्युः अश्नोतेर्व्यत्ययेन परस्मैपदं बहुलं छंदसीति विकरणस्य ददतः नाभ्यस्ताच्छतुरिति नुमागमः प्र १४८
तिषेधः अभ्यस्तानामादिरित्याद्युदात्तत्वं सनेम षण संभक्तौ व्यत्ययेन शपः अर्यः अरिशब्दात षष्ठ्येकवचने जसादिषु छंदसि वचनं

मिति घेर्ङितीति गुणाभावे यणादेशः अरिशब्दः अचइरिति प्रत्ययांतोदात्तः उदात्तयण इति विभक्तेरुदात्तत्वं मार्गकर्पालनइ इत्यंतोदात्तत्वं॥ ॥ 293/1924
इति प्रथमस्य पंचमे एकोनविंशो वर्गः॥ ॥षष्ठीमृचमाह॥ ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः पीपयंत द्युभक्ताः॥ परावतः सुमतिं भिक्षमा
णा वि सिंधवः समया सस्रुरद्रिं॥ ॥ऋतस्य हि कृतं देवयजनं दृश्यं प्राप्तमग्निमेव धेनवः अग्निहोत्रादि हविषां दोग्ध्र्यो गावः पीपयंत क्षीरादि
लक्षणं गव्यं अपाययन् का इत्यागावः वावशानाः अग्निं पुनः पुनः कामयमानाः स्मदूध्नीः स्मच्छब्दो नित्यशब्द समानार्थः नित्यमूधसा युक्ताः
सर्वदा पयसः प्रदात्र्य इत्यर्थः द्युभक्ताः दिवा प्रकाशेन संभक्ताः संश्लिष्टाः उत्पन्ना इत्यर्थः अपि च सिंधवः स्यंदनशीला नद्यः सुमतिं अस्याग्नेः
शोभनामनुग्रहात्मिकां बुद्धिं भिक्षमाणाः याचमानाः सत्यः अद्रिं समया अद्रेः पर्वतस्य समीपे परावतो दूरदेशाद्वि सस्रुः विशेषेण गच्छं
ति प्रवहंति अग्नये दातव्यानां हविषां निष्पत्तये प्रवहंतीत्यर्थः ऋतस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी वाव
शानाः वश कांतौ यङ् ताच्छीलिके चानश् ग्रहि इति संप्रसारण प्रतिषेधः बहुलं छंदसीति शपो लुक् छंदस्युभयथेति शानच आर्धधातुकत्वात्
अतोलोपयलोपौ अत एव सार्वधातुकानुदात्तत्वाभावे चित्स्वर एव शिष्यते। स्मदूध्नीः स्मत् नित्यानि ऊधांसि यासां ऊधसोनङ् इति नङादेशः
समासांतः संख्याव्ययादेर्ङीप् भसंज्ञायामल्लोपानवपूर्वपदप्रकृतिस्वरेण हुव्रीहि स्वर एव शिष्यते पीपयंत पा पाने अस्माद्धेतु
मतिणिच् शाच्छासाह्वा इति युक् णौ चङ्युपधाया ह्रस्वः दृशादिचङ् अन्यतरस्यामिति चङः पूर्वस्योदात्तत्वं हि च इति निघात प्रतिषेधः परावतः परागता
दूरं हि परागतं अस्मिन् धात्वर्थे गम्यमाने उपसर्गाच्छंदसि धात्वर्थे इति वतिः॥ ॥सप्तमीमृचमाह॥ ॥त्वे अग्ने सुमतिं भिक्षमाणा दिवि श्र
वो दधिरे यज्ञियासः॥ भवति नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णमरुणं च सं धुः॥ ॥हे अग्ने सुमतिं शोभनामनुग्रहात्मिकां बुद्धिं भि
क्षमाणा याचमानाः यज्ञियासो यज्ञार्हाः सर्वे देवाः दिवि द्योतमाने त्वयि श्रवो हविर्लक्षणमन्नं दधिरे अस्थापयन् अग्निर्वै देवानामन्ना
द इति श्रुतेः तदनंतरं तादृशे हविर्युक्ताय अनुष्ठानाय विरूपे विविधरूपे उषसा उषसः कालोपलक्षितमहः नक्ता च नक्तं च रात्रिं च चक्रुः अ
कुर्वन् एतदेव स्पष्टयति कृष्णवर्णं रात्र्याः भासमानं वर्णं अंधकारं अरुणमारोचनं श्वेतवर्णं तेजश्च संधुः सम्यक्स्थापितवंतः त्वे सुपांसु
लुगिति सप्तम्याः शे आदेशः नक्तेति नेवद्दितीयायाः आदेशः उषसा तेनैव विभक्ते राकारः धुः डुधाञ् धारणपोषणयोः लुङि गातिस्थेति सिचो लुक् अतड्
ति झेर्जुसादेशः बहुलं छंदस्यमाङ्योगेपीत्यडभावः॥ ॥अष्टमीमृचमाह॥ यान्राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च॥ छायेव विश्वं
भुवनं सिसक्ष्यापप्रिवान्रोदसी अंतरिक्षं॥ ॥यान्मर्तान् मनुष्यान्स्मान् राये धनाय सुषूदः अग्निहोत्रादिकर्मसु प्रेरयसि ते तादृशा वयं च मघ
वानो धनिनः स्याम भवेम रोदसी द्यावापृथिव्यौ अंतरिक्षं च आपप्रिवान् स्वतेजसा व्याप्तः सुदर्शनतो आपूरितवांस्त्वं च विश्वं भुवनं सर्वं जगत् सिसक्षि से
वसे अनुगृह्णासि सर्वं रक्षसीत्यर्थः तत्र दृष्टांतः छायेव यथा छत्राद्दिश्च्छाया आतपाद्दितान्नितं कुर्वंती आश्रयं रक्षति तद्वत् सुषूद इति विभक्तेरुदात्तत्वं
सुषूदः षूद क्षरणे लेटि अडागमः बहुलं छंदसीति शपः श्लुः अभ्यस्तानामादिरित्याद्युदात्तत्वं यद्वृत्तान्नित्यमिति निघातः प्रतिषेधः सिसक्षि षच सम
वाये बहुलं छंदसीति शपः श्लुः इत्यनुवृत्तौ बहुलं छंदसीत्यभ्यासस्येत्वं आपप्रिवान् प्रा पूरणे लिटः क्वसुः वस्वेकाजाद्घसामिति इडागमः अतोलो
प इटि च आकारलोपः द्विर्वचनेचीति स्थानिवद्भावात् द्विर्भावादि॥ ॥नवमीमृचमाह॥ ॥अर्वद्भिरग्ने अर्वतो नृभिर्नॄन्वीरैर्वीरान्वनुयामा त्वोताः॥

भा॰ अ॰ ईशानासः पितृवित्तस्य रायो विसूरयः शतहिमा नो अश्युः॥ ॥ हे अग्ने त्वोताः त्वया रक्षिता वयं अर्वद्भिः अस्मदीयैरश्वैः अर्वतः संबंधिनोऽश्वान्न
भिरस्मदीयैर्भटैः नॄन् शत्रुभटान् वीरैः वीर्यवद्भिः पुत्रैः वीरान् शत्रुपुत्रांश्च वनुयाम हिंसितवैरिणां मानं यजमानसंस्कारा भवतीति याचकः
२४० पितृवित्तस्य पित्रादिपरंपरया लब्धस्य रायो धनस्य ईशानाः स्वामिनः सूरयो विद्वांसः नोऽस्माकं पुत्राः शतहिमाः शतसंवत्सराणि जीवंतः संतः व्य
श्युः विशेषेण भुंजतां अस्मदीयानां पुत्राणां आरोग्यं दीर्घमायुश्च भवत्वित्यर्थः। त्वोताः त्वया ऊताः प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः। व
नुयाम वनतेर्यायाः कर्मणोऽतिप्रकृतिस्वरत्वं शतहिमाः अत्र हिमशब्देन हेमंत ऋतुरुच्यते तस्य च संवत्सरावयवत्वात् हिमा इत्युक्ता हेमंता वा संवत्सरानभिधीयंति
बावेन शतहिमाः शतं हेमंतान् वा यावंतः शतसंवत्सरान् जीवंत इत्यर्थः। अश्युः अशू व्याप्तौ बहुलं छंदसीति विकरणस्य लुक्॥ ॥ दशमीमृचमाह॥ ॥
एतानि अग्ने उचथानि वेधो जुष्टानि संतु मनसे हृदे च॥ शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः॥ ॥ हे वेधः मेधाविन् मेधाविन्नग्ने
एतानि उचथानि एतानीदानीमस्माभिः प्रयुक्तानि स्तोत्राणि तव मनसे मनस्कृताय हृदे हृदयाय च जुष्टानि संतु प्रियाणि भवंतु तव संबंधि
नः सुधुरः सुष्ठु निर्वाहकाः त्वत्प्रसादाद्धनं भवंति रायः धनानि यमं नियमयितुं शकेम। तादृशस्य धनस्य यमने नियमने शकेम समर्था भूयास्म किं कुर्वंतः देवभ
क्तं देवैः संभजनीयं श्रवो हविर्लक्षणमन्नं अधिदधानाः अग्नेरुपरि धारयंतः अग्नौ हविर्भिः होमं कुर्वंत इत्यर्थः। उचथानि वच परिभाषणे कृतिग
र्थ्यादिभ्य इति विधीयमानो थप्रत्ययः वक्ति वच्मि बहुलवचनादस्मादपि भवति वश्यादिना संप्रसारणं॥ ॥ जुष्टानि जुषेर्पि तच्छंदसि नित्यं मंत्रे जुष्टा जुष्टा
त्वंतं इत्युदात्तत्वं ... यातिः मधुरः धुर्वहिंसार्थः क्विप् राल्लोप इति वकारलोपः न पुत्रनादिति
समासांत प्रतिषेधः देवभक्तं देवभक्तं तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं॥ ॥ इति प्रथमस्य पंचमे विंशो वर्गः॥ ॥ त्रयोदशानुवाके एकादश सू
क्तानि तत्रोपप्रयंत इति नवर्चं प्रथमं सूक्तं तत्रानुक्रम्यते॥ ॥ तत्र प्रथमामृचमाह॥ उपप्रयंतो अध्वरं मंत्रं वोचेमाग्नये॥ आरे अस्मे च शृण्वते॥ अध्वरं हिंसा
रहितं यज्ञं अग्निष्टोमादिकं उपप्रयंतः उपेत्य प्रकर्षेण गच्छंतः प्राप्याविच्छेदेन सम्यगनुतिष्ठंत इत्यर्थः। तादृशा वयमग्नये अंगनादिगुणयुक्ताय देवा
य मंत्रं मननसाधनं स्तोत्ररूपं स्तोत्रं वोचेम वक्तुं भूयास्म यास्कस्तु वाक्येशायाग्नये आरे अस्मे च शृण्वते च शब्दो यथार्थे आरे दूरदेशेऽपि दूरस्य आरे
च दूरे विप्रकृष्टेऽपि अस्माकं स्तोत्राणि शृण्वते अस्मासु प्रीत्यतिशयेन सर्वं समानानि अग्नि अस्मदीयमस्तोत्रं शृणोतीति भावः। वोचेम ब्रूञो वचिः लिङ्या
शिष्यङ् वचउमित्युमागमः शृण्वते श्रुवः शृ चेति विभक्तेरुदात्तत्वं॥ ॥ द्वितीयामृचमाह॥ यः स्निहितीषु पूर्व्यः संजग्मानासु कृष्टिषु॥ अरक्षद्दाशुषे ग
यं॥ ॥ पूर्व्यः चिरंतनो यः स्निहितीषु वधकारिणीषु कृष्टिषु प्रजासु संजग्मानासु संगतासु सतीषु दाशुषे हविर्दत्तवते यजमानाय गयं धनं
अरक्षत् रक्षति तस्मिन्नग्नये मंत्रं वोचेमेति पूर्वेण संबंधः स्निहितीति पुष्णि हसेन्निषु रादिस्तिन् वर्ततीति वधकर्मस्तु पठितः स्नेहु नाशं स्यंते प्रजा अभिरिति स्नेहित
य इति कर्तर्यादिनिः कृदिकारादक्तिन इति ङीष् ... गदादीनि दीर्घ अनित्या २४९
दाघ्यतः ... संजग्मानासु संगताः ... लिटः कानच् गमहनेत्यादि नोपधालोपः। अरक्षत् छंदसि लुङ्लङ्लिटः इति वर्तमाने लङ्। अग्निर्मथने जा
तायां गयं ... प्रातरवर्थेयस्यामिति ... चित्। उद्भिनो नरा सुत ... यज्ञ ... जायत॥ शत्रुमनरस्य ... निद्रः
पुरन्दरस्य ... प्रथमो भानुः ... अग्निर् ... ॥ ॥ तामनातस्य तृतीयामृचमाह॥ ॥

उत ब्रुवंतु जंतव उदग्निर्वृत्रहाजनि॥ धनंजयो रणेरणे॥ अग्निरत्र अरण्योः सकाशात् उत्पन्नः इत्यनंतरं जंतवो जाताः सर्वे कुलजो ब्रुवंतु तमग्निं स्तुवंतु
वृत्रहा अग्निः वृत्रहा वृत्रहणां आवरकाणां शत्रूणां हंता रणेरणे सर्वेषु संग्रामेषु धनंजयः शत्रुधनानां जेता धनंजयः संज्ञायां भृतृवृजिधारिसहितपिदमः इति खच्अरुर्द्वि
षदजंतस्येति मुमागमः खच्स्वरेणांतोदात्तत्वं। रणेरणे रणशब्दार्थः। रणंति शब्दायंते अस्मिन्निति रणः संग्रामः वृत्रिरण्योरुप संख्यानमित्यपनित्यवीप्सयो
रिति द्विर्वचनं आम्रेडितानुदात्तत्वं॥ ॥ चतुर्थीमृचमाह॥ ॥ यस्य दूतो असि क्षये वेषि हव्यानि वीतये॥ दस्मत्कृणोष्यध्वरं॥ ॥ हे अग्ने यस्य यजमा
नस्य क्षये गृहे यजमानलक्षणे देवानां दूतस्त्वं असि भवसि। यस्य च हव्यानि चरुपुरोडाशादीनि हवींषि वीतये देवानां भक्षणाय वेषि गमयसि य
स्य चाध्वरं यज्ञं दस्मत् दस्म सर्वैर्दर्शनीयं कृणोषि करोषि। तमित्क हव्यामित्युत्तरयाः संबंधः वेषि वी गत्यादिषु अंतर्भावितण्यर्थात् लिङ् अदादित्वाच्छपो लु
क्, वादादित्वान्निघाताभावः। दस्मत् दसिदंसिनर्दर्शनयोः इषयुधीन्धिदसिश्याधूसूभ्यो मक् दस्मात् इत्यत्र मकारस्य वर्णव्यापत्या तकारः कृणोषि कृवि हिंसाकरणयो
श्च धिन्विकृण्व्योरच उः प्रत्ययः तत्संनियोगेन वकारस्याकारः तस्यातो लोपे सति स्थानिवद्भावाल्लघूपधगुणाभावः यस्य त्वनुषंगान्निघाताभावः॥ ॥
पंचमीमृचमाह॥ ॥ तमित्सुहव्यमंगिरः सुदेवं सहसो यहो॥ जना आहुः सुबर्हिषं॥ हे सहसो यहो बलस्य पुत्र अंगिरः अंगनादिगुणयुक्ताग्ने मानाः
पूर्वं मुक्ताः तमित् तमेव यजमानं सुहव्यं शोभनहविष्कं सुदेवं शोभनदेवतं सुबर्हिषं शोभनबर्हिषमिति यज्ञनामशोभनयज्ञं च जनाः सर्वे मनुष्याः आहुः कथयं
ति। सुहव्यं इत्यादिषु नञ्सुभ्यामिति उत्तरपदांतोदात्तत्वं सहसो यहो। सुबामंत्रित इति परांगवद्भावात् षष्ठ्यामंत्रितसमुदायस्य आमंत्रितस्याद्युदात्तत्वं।
॥ ॥ इति प्रथमस्य पंचमे एकविंशो वर्गः॥ षष्ठीमृचमाह॥ ॥ आ च वहासि ताँ इह देवाँ उप प्रशस्तये॥ हव्या सुश्चंद्र वीतये॥ हे सुश्चंद्र शोभनाह्लादनाग्ने
तान् देवान् इहास्मिन् कर्मणि उप अस्मत्समीपं प्रशस्तये स्तुतये आ वहासि च आवह प्रापय च आगतेभ्यस्तेभ्यो हव्यादि यानि चरुपुरोडाशादीनि हवींषि
वीतये भक्षणाय प्रापयेत्यर्थः। वहासि वह प्रापणे लेट्यडागमः। प्रशस्तये शंसु स्तुतौ भावे क्तिन् तितुत्रेतीट् प्रतिषेधः अनिदितामिति नलोपः। तादौ चे
ति गतेः प्रकृतिस्वरत्वं। सुश्चंद्र स्वाश्चंद्रोत्तरपदे मंत्रित इति सुट्॥ ॥ सप्तमीमृचमाह॥ ॥ न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन॥ यदग्ने यासि दूत्यं॥ हे
अग्ने यद्यदा दूत्यं देवानां दूतत्वं यासि प्राप्नोति कच्चन कदाचन तदानीं सर्वदापि यो गच्छतः तव रथस्य अश्व्यः अश्वैरुत्पादितः उपब्दिः शब्दो न शृ
ण्वे न श्रूयते। रथस्य शीघ्रगमनेन अस्माभिः शब्देनापलभ्यत इत्यर्थः योः यः गमनप्रापण इत्यस्मात् योद्वेयोणादिकः कुप्रत्ययः बहुलवचनात् दुर्भावा
भावः उपब्दिः दिसत्ततथा तु महस्य शब्दस्याख्यान पातंतेनिरीयाणां प्रातिशाख्यं सत्तान्नमुपब्दिमदिति शृण्वे श्रु श्रवणे कर्मणि लिट् श्रुवः शृ चेति श्र
त्ययेन श्नुः शृभावश्च लोपश्च आत्मनेपदेष्विति तलोपः हुश्नुवोः सार्वधातुके इति यणादेशः॥ ॥ अष्टमीमृचमाह॥ ॥ त्वोतो वाज्यह्रयोऽभि पूर्वस्मादपरः
॥ प्र दाश्वाँ अग्ने अस्थात्॥ यः पुरवः पूर्वस्मात् स्वस्मादधिकारादपरो निकृष्टो भवति। हे अग्ने स इदानीं दाश्वान् तुभ्यं हवींषि दाता च सन् त्वोतः त्वया कृता
रक्षितः वाजी अह्रयो लज्जारहितः एवंभूतः सन् अभि प्रास्थात् ऐश्वर्यमभिप्राप्य प्रतितिष्ठति सर्वोत्कृष्टो भवतीत्यर्थः। अह्रयः ह्रीलज्जायां ह्रियंते इति
ह्रयः। अव्ययपूर्वपदप्रकृतिस्वरत्वं दाश्वान् दाश्रृ दाने दाश्वान् साह्वानिति क्वसुप्रत्ययांतो निपातितः॥ ॥ नवमीमृचमाह॥ उत द्युमत्सुवीर्यं बृहद
ग्ने विवाससि॥ देवेभ्यो देव दाशुषे॥ उत अपि च हे देव द्योतमानाग्ने देवेभ्यो दाशुषे च पुरोडाशादीनि हवींषि दत्तवते तस्मै यजमानाय बृहद् द्योतमानं धनं
विवाससि गमयितुमिच्छसि प्रापयितुमीर्षसि यावत् द्युमत् द्योतमानं अतिशयेन दीप्तं सुवीर्यं शोभनवीर्योपेतं वीरवीर्योपेत्यत्र रपदाद्युदात्तत्वं विवाससि।

295
1924

ञागतिर्गंधनयोः सतिद्विर्भावे सत्यनर्शतीत्वं। शरऊपेव तुर्थ्येकवचनेवसोः संप्रसारणमिति संप्रसारणं॥ शासिवसिघसीनां चेति षत्वं॥ ॥इति प्रथमस्य पंच
भा॰ प्र॰ मद्वाविंशो वर्गः॥ ॥जुषस्वेति पंचर्चं द्वितीयं सूक्तं। अनुक्रांतं च। जुषस्व पंचेति। ऋष्याद्याः पूर्ववत्। प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तः सूक्तवि
१५० नियोगः॥ ॥तामेतां सूक्ते प्रथमामृचमाह॥ जुषस्व सप्रथस्तमं वचो देवप्सरस्तमं॥ हव्या जुह्वान आसनि॥ हे अग्ने सप्रथस्तमं अतिशयेन विस्तीर्णं व
चः स्तोत्रलक्षणमस्मदीयं वचनं जुषस्व सेवस्व कीदृशं देवप्सरस्तमं देवानां प्रीणयितृतमं किं कुर्वन् आसनि आस्ये हव्या हव्यानि स्तोत्रलक्षणानि हवींषि
जुह्वानः प्रक्षिपन् इमानि स्तोत्रलक्षणानि हवींषि यथा मा भूवन् तथा स्वेनास्येन मुखेन स्वीकुर्वित्यर्थः॥ देवप्सरस्तमंस्य प्रीतिबलयोः देवान्स्प्रुणो
तिप्रीणयतीति देवप्सरः॥ गतिकारयोरपि पूर्वपदप्रकृतिस्वरत्वं वत्यसन् पूर्वपदप्रकृतिस्वरत्वं च सकारपकारयोः स्थानविपर्ययः अतिशयेन देवप
सरस्तमः जुह्वानः जुहोतेर्व्यत्ययेन शानच् अभ्यस्तानामादिरित्याद्युदात्तत्वं आसनि पद्दन्नित्यादिना आस्यशब्दस्य असनादेशः॥ ॥द्वितीयामृचमाह॥
अथा ते अंगिरस्तमाग्ने वेधस्तम प्रियं॥ वोचेम ब्रह्म सानसि॥ ॥हे अंगिरस्तम अतिशयेनांगनादिगुणयुक्त। यद्वा अंगिरसां वरिष्ठ वेधस्तम मेधा इति
मेधाविनाम अतिशयेन मेधाविनाम अतिशयेन मेधाविन्नग्ने अथानंतरं ते तुभ्यं सानसि संभजनीयं प्रियं प्रीतिकरं ब्रह्म स्तोत्रं वोचेम वक्तारो भूयास्म
वोचेमलिङ्याशिष्यङ् वच उमागमः॥ सानसि वनषण संभक्तौ सानसिवर्णसिपर्णसि इत्यादावसिचप्रत्ययांतो निपात्यते॥ ॥तृतीयामृचमाह॥ कस्ते जा
मिर्जनानामग्ने को दाश्वध्वरः॥ को ह कस्मिन्नसि श्रितः॥ हे अग्ने जनानां मनुष्याणां मध्ये ते तव को जामिः को बंधुः त्वं सर्वगुणैरधिकोसि। तथानुरूपो बंधुः
नास्तीत्यर्थः। को ह त्वं कथंभूतस्त्वमीदृग्रूप इति सर्वैर्ज्ञातुमशक्य इत्यर्थः॥ कस्मिन् स्थाने श्रितः आश्रितोसि वर्तसे स्थानमपि न केनचिज्ज्ञायते अतस्त्वमस्माभिर्मा
सदृशैः कथमुपलब्धुं शक्यसे प्रशस्यते। दाश्वध्वरः दाश्वदाने उणादयो बहुलमिति बहुलवचनात् कर्मण्यण्प्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं यणा
देशे उदात्तस्वरितत्वं॥ ॥चतुर्थीमृचमाह॥ त्वं जामिर्जनानामग्ने मित्रो असि प्रियः॥ सखा सखिभ्य ईड्यः॥ ॥हे अग्ने त्वं उक्तप्रकारेणाचिंत्यरूपोपि अ
नुगृहीत् तथा सर्वेषां जनानां जामिर्बंधुरसि तथा प्रियः प्रीणयिता यजमानानां मित्रः प्रमीतेस्त्रायकोसि ईड्यः स्तुतिभिस्तुत्यः त्वं सखिभ्यः समानख्यानेभ्यः
ऋत्विग्भ्यः सखा सखिवत्प्रियोसि। जामिः जमु अदने जमंति सहैकस्मिन् पात्रे अदंतीति जामयो बंधवः। जनिघसिभ्यामिणीति विधीयमान इण्
बहुलवचनादस्मादपि द्रष्टव्यः। ईड्यः ईड स्तुतौ ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं॥ ॥पंचमीमृचमाह॥ ॥यजा नो मित्रावरुणा यजा देवाँ ऋतं
बृहत्॥ अग्ने यक्षि स्वं दमं॥ हे अग्ने नोस्मदर्थं मित्रावरुणा यज संतौ देवौ यज हविषा पूजय तथा देवानिंद्रादीन् पूजय यज्ञ तं सत्यं यथार्थफलं यज्ञं च तदर्थं यज
स्व बृहंतं प्रौढं स्वं स्वकीयं दमं यज्ञं यद्यक्षि यज्ञ संगच्छस्व त्वयि अंतर्विधमाने सति हि यज्ञ अग्रं ह पूज्यते॥ यजा नो वा यजा देवान्। इति संहितायां दीर्घत्वं देवान्दी
र्घादटि समानपादे इति संहितायां नकारस्य रुत्वं आतोटि नित्यमित्यनुनासिक अकारः यतलोपः यक्षि यजतेर्बहुलं छंदसीति शपो लुक्॥ ॥इति प्रथमस्य
पंचमे त्रयोविंशो वर्गः॥ ॥कात इति पंचर्चं तृतीयं सूक्तं। कात उपनुक्रांतं। राहूगणो गोतम ऋषिः त्रिष्टुप् छंदः अग्निर्देवता प्रातरनुवाकस्याग्नेयक्रतौ
त्रैष्टुभे छंदसी रमादिके इदं सूक्तं स विनियोगश्च॥ ॥तत्र प्रथमामृचमाह॥ का त उपेतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा॥ को वा यज्ञैः परि दक्षं त आ १५०
प केन वा ते मनसा दाशेम॥ ॥हे अग्ने ते तव मनसो वराय निवारणाय निवारणाय अस्मासु स्थापनाय का उपेतिर्भुवत् कीदृशमुपगमनं भवेत् केन का
प्यालिंगनोचितमुपगमनं वयं कर्तुं न शक्नुम इति भावः मनीषा स्तुतिः शंतमा अतिशयेन सुखकरी का कीदृशी भवेत् न तवोचिता स्तुतिरपि नास्तीत्यर्थः॥

को वा यजमानाः यज्ञैः तव संबंधिभिर्यागैः दक्षं दक्षं बलं वा पर्याप पर्याप्नोति न कोपीत्यर्थः॥ तवोचितान्यागाननुष्ठाय तैः फलं प्राप्नुतः इत्येतदपि 297
दुर्घटमेवेति भावः। उपगमनादिकं तावदास्तां सर्वस्य साधनभूतं मनः स्वात्मकं दुर्लभमित्याह केनेति हे अग्ने ते तुभ्यं केन मनसा कीदृशेन बुद्ध्या 1924
दाशेम हवींषि प्रयच्छाम तव उपगमनाद्यनुरूपं मनोस्माकं नास्तीत्यर्थः॥ उपेतिः इण् गतौ इतेर्गतिः क्तिन् प्रतिस्वरत्वं वराय वृञ् वरणे अस्मादंतर्भावितण्य
र्थात् ग्रहवृदृनिश्चिगमश्चेत्यप् तस्य पित्वादनुदात्तत्वे धातुस्वरः। भुवत् लेटि अडागमः बहुलं छंदसीति शपो लुक् भूसुवोस्तिङीति गुणप्रतिषेधः दक्षं द
क्ष वृद्धौ भावे करणे वा घञ् ञित्वादाद्युदात्तत्वं॥ ॥द्वितीयामृचमाह॥ ॥एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः॥ अवतां त्वा रोदसी विश्वमि
न्वे यजा महे सौमनसाय देवान्॥ हे अग्ने एहि आगच्छ इहास्मिन् यज्ञे होता देवानामाह्वाता सन् निषीद उपविश नोस्माकं पुरएता पुरतो गंता सु भव सु
ष्ठु भव यस्मात्त्वं अदब्धः रक्षसादिभिरहिंस्योसि तादृशं त्वां विश्वमिन्वे सर्वव्यापुर्वे रोदसी द्यावापृथिव्यौ तातामवतां रक्षतां आगत्योपविश्य
द्यावापृथिवीभ्यां रक्षितश्च सन् महे महते सौमनसाय सौमनस्याय देवान् दानादिगुणयुक्तानिंद्रादीन् यज हविर्भिः पूजय निषीद सदिर
प्रतेरिति षत्वं सौमनसाय सुमनसो भावः सौमनसं तस्मै इदमिति संबंधसामान्येन प्रत्ययः स चात्र भावलक्षणेन संबंधविशेषेण पर्यवस्यति य
द्वा हायनांतयुवादिभ्योणिति भावे अण् युवादिषु अस्य पाठो द्रष्टव्यः॥ ॥तृतीयामृचमाह॥ ॥प्र सु विश्वान् रक्षसो धक्ष्यग्ने भवा यज्ञानामभि
शस्तिपावा॥ अथा वह सोमपतिं हरिभ्यामातिथ्यमस्मै चकृमा सुदाव्ने॥ ॥हे अग्ने विश्वान् रक्षसो राक्षसान् प्र सु धक्षि प्रकर्षेण दह दग्ध्वा च य
ज्ञानां अस्माभिरनुष्ठेयानां नानायागानां अभिशस्तिर्हिंसायाः पाता रक्षिता भव अथानंतरं सोमपतिं सर्वेषां सोमानां पालकमिंद्रं हरिभ्यां आव
ह अस्मत्पक्षं प्रापय आगताय अस्मै सुदाव्ने शोभनस्य फलस्य दात्रे इंद्राय आतिथ्यं आतिथ्यर्हं सत्कारं चकृम कुर्मः धक्षि दह भस्मीकरणे बहु
लं छंदसीति शपो लुक् ढत्वभष्भावकत्वषत्वानि अभिशस्तिपावा शसु हिंसायां अस्मादभिपूर्वात् भावे क्तिन् अभिशस्तेः पातीत्यभिशस्तिपाः
पा रक्षणे आतो मनिन्क्वनिब्वनिपश्च सोमपतिं पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरत्वं। सुदाव्ने पूर्वपदं दातेर्वनिप् अल्लोपोन इत्यकारलोपः॥ ॥
चतुर्थीमृचमाह॥ ॥प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः॥ एवा होतः सत्यतर त्वमद्याग्ने मंद्रया जिह्वया यजस्व॥ वेषि होत्र
मुत पोत्रं यजत्र बोधि प्रयंतर्जनितर्वसूनां॥ प्रजावता यजमानेभ्यो दातव्यात्यादिफलोपेतेन वचसा स्तोत्रेण स्तुतः सन् यो वह्निः आसा आस्येन
नीयवाहलया वह्निर्देवेभ्यो हविषां वोढा मग्निं आ च हुवे आह्वयामि आहूतः सन् त्वं इहास्मिन् कर्मणि देवैरन्यैः सह निषत्सि निषीद च हे यज
त्र यजनीयाग्ने होत्रं क्रियमाणं कर्म उतापि च पोत्रं पोतुः कृतं कर्म च वेषि कामयस्व वसूनां धनानां प्रयंतः प्रकर्षेण नियंतः वसूनि अस्मदायत
नि कुर्वन् जनितः आहुतिद्वारा सर्वस्य जनयितरग्ने बोधि अस्मान् बोधय आसा पद्दन्नित्यादिना आस्यशब्दस्य आसन्नादेशः कर्मा सुपां सुलुगिति तृतीयाया
याड्यादेशः टिलोप उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं हुवे ह्वेञ् आलदेव बहुलं छंदसीति संप्रसारणं बहुलं छंदसीति शपो लुक् वचाद्यागे प्रथमेति निपा
त प्रतिषेधः बोधि बुध अवगमने अस्मात्ण्यंतात् छांदसः शपो लुक् सार्वधातुकत्वात् नेड्वशि कृतीति णिलोपः। हुझल्भ्यो हेर्धिः धातोरंत्यलो
पश्छांदसः हेरपित्वाभस्येवस्वरः शिष्यते॥५॥ यथा विप्रस्य मनुषो हविर्भिर्देवाँ अयजः कविभिः कविः सन्॥ एवा होतः सत्यतर त्वमद्याग्ने मंद्र
या जुह्वा यजस्व॥ हविःशांतदर्शे सन काविभिर्मेधाविभिः ऋत्विग्भ्यः सह विप्रस्य मेधाविनः मनुषो मनोर्यस्ते हविर्भिश्च रुपुरोडाशादिभिः हे

भा०२० अग्ने यथा देवान् यजः एवमेव होतः होमनिष्पादक सत्यतर अतिशयेन सत्यसाधो अग्ने त्वं अस्मिन् यज्ञे मंद्रया जुह्वा होमसाधनभूतया वाचा यजस्व देवान्
हविर्भिः पूजय मनुषः मनन् ज्ञानेन कृतं मन्यत्वा अपि मनेरुसिन् प्रत्ययः ॥ इति प्रथमस्य पंचमे चतुर्विंशो वर्गः ॥ ॥ चतुर्थं सूक्तं तत्र प्रथमामृचमाह ॥
१५३ कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ॥ यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान् ॥ अस्मा अग्नये कथा दाशेम कथं हविर्द-
दाम अग्नेरनुरूपं दातुं न शक्नुम इत्यर्थः । अथवा अस्मै भामिने तेजस्विने आग्नये देवजुष्टा सर्वैर्देवैः सेविता कीदृशी स्तुतिरपि का कीदृशी उच्यते ॥
तादृशीं स्तुतिमपि कर्तुं न शक्नुम इत्यर्थः ॥ अमृतो अमरणरहितः ऋतावा कृतवान् सत्यवान् यज्ञवान् वा होता देवानामाह्वाता होमनिष्पादको वा यजिष्ठ
अतिशयेन यष्टा एवंभूतो यो अग्निर्मर्त्येषु मरणधर्मसु मनुष्येषु वर्तमानः सन् देवान् इत्कृणोति हविर्भिर्युक्तान् करोति स्वयं वा तान् यजति तस्मा अग्नये कथा दाशेमेति
पूर्वेणान्वयः कथा छन्दसीति था प्रत्ययः भामिने भादीमो । अर्तिस्तुस्त्यादिना मन् प्रत्ययः ततो मत्वर्थ इनिः ऋतावा छन्दसीवनिपौ इति मत्व-
र्थीयो वनिप् अन्येषामपि दृश्यत इति दीर्घत्वं ॥ ॥ द्वितीयामृचमाह ॥ ॥ यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कृणुध्वं ॥ अग्निर्यद्वेर्मर्ताय दे-
वान्त्स चा बोधाति मनसा यजाति ॥ यो अग्निः अध्वरेषु यागेषु शंतमः अतिशयेन सुखकारी ऋतावा सत्यवान् यथार्थदर्शी इत्यर्थः होता देवानामा-
ह्वाता भवति । हे ऋत्विग्यजमानाः यूयं तमु तमेवाग्निं नमोभिः स्तोत्रैः आकृणुध्वं अभिमुखीकुरुत यद्यदायमग्निः मर्ताय मनुष्याय यजमानार्थं
देवान् वेति गच्छति तदानीं सोग्निर्यष्टव्यान् सर्वान् देवान् बोधाति जानाति तान् मनसा तान् यजाति च हविर्भिः पूजयति अतस्तमेवाग्निमाकृणु-
ध्वमिति योज्यं वेः वी गत्यादिषु छन्दसि लुङ्लङ्लिटः इति वर्तमाने लुङ् तिङां तिङो भवंतीति प्रथमपुरुषैकवचनस्य मध्यमपुरुषैकवचनादेशः बोधा-
ति बुध अवगमने लेट्याडागमः सिपः पित्वादनुदात्तत्वे धातुस्वरः शिष्यते । चवायोगे प्रथमेति निघातप्रतिषेधः मनसा मकारनकारयोः स्थानवि-
पर्ययः ॥ ॥ तृतीयामृचमाह ॥ ॥ स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः ॥ तं मेधेषु प्रथमं देवयन्तीर्विश उप ब्रुवते दस्ममारीः ॥ ॥ सह्य-
ग्निः क्रतुः कर्मणां कर्ता स एव मर्यो मारयिता विश्वस्योपसंहर्ता साधुः साधयिता उत्पादयिता मित्र इव अद्भुतस्य भूतस्य महतो धनस्य रथीः रंहा-
यिता प्रापयिता भूद्भवति । तत्र दृष्टान्तः । मित्रो न यथा सखा धनानि प्रापयति तद्वत् एवंभूतमग्निं मेधेषु यज्ञेषु देवयन्तीर्देवं यष्टुमात्मन इ-
च्छन्त्यो विशः प्रजाः प्रथमं मुख्यं उपब्रुवते स्तुतिभिः पत्युः प्रधानभूत इति कथयंति वर्ततेद्दृश्यादिदाः दस्मं दर्शनीयं तमग्निं आरीः आगच्छन्त्यः भजन्त इत्यर्थः म-
र्यः मृङ् प्राणत्यागे अस्मादन्तर्भावितण्यर्थात् छन्दसि निष्टर्क्येत्यादौ निपातनात् यत्प्रत्ययः मित्रवहत्यमिति वचनात् कर्तरि इष्टव्यः यतोनाव इत्याद्युदात्तत्वं
देवयन्तीः आत्मनः देवमिच्छन्तीति पूर्वसवर्णदीर्घत्वं अग्निः ऋगतौ जनिघसिभ्यामितिवत् क्रत्वग्रहणादस्मादपि इण्प्रत्ययः कृदिकारादक्तिन इति ङीष् वाछंदसीति
पूर्वसवर्णदीर्घत्वं प्रत्ययस्वरेणान्तोदात्तत्वं ॥ ॥ चतुर्थीमृचमाह ॥ ॥ स नो नृणां नृतमो रिशादा अग्निर्गिरोऽवसा वेतु धीतिं ॥ तना च ये मघवानः शविष्ठा
वाजप्रसूता इषयन्त मन्म ॥ नृणां यज्ञस्य नेतॄणां मध्ये नृतमो अतिशयेन नेता रिशादाः रिशतां हिंसकानां शत्रूणां अत्ता भक्षयिता यद्वा रिशतां हिंसतामसि-
तानि रसिता एवंविधः सोग्निः नो अस्माकं गिरः स्तुतीः अवसा हविर्लक्षणेनान्नेन युक्तां धीतिं कर्म च वेतु कामयतां अपि च यजमानाः तना धनेन तत् । धि
स्तुतेन धनेन मघवानो धनवन्तः शविष्ठाः अतिशयेन बलिनश्च संतः वाजप्रसूताः प्रसूतं प्रेरितं वाजो हविर्लक्षणमन्नं यैः ताहृशा भूत्वा मन्म अ-
ग्निमननरूपं स्तोत्रं इषयन्त एषयन्ति कर्तृभिः प्रेरयितुमिच्छन्ति तेषामपि स्तुतिं अग्निः कामयतामिति भावः नृणां नेतॄणां च भयवादीर्घोभावः ॥ १५३

नामभ्यन्तरस्यापि निनामत्वादात्त्वं । नात न्विलोपश्चायवत नृतीयैकवचनस्य सुपां सुलुगित्याकारः रिशादेरसृतिगणत्वादाद्युदात्तत्वं । शविष्ठाः शवइति ब- 299
लनाम अस्मात् यामेधाविभ्यो विनिः ततः अतिशायने इष्ठन् विन्मतोर्लुगिति विनो लुक् टेरिति टिलोपः इष्ठनो नित्त्वादाद्युदात्तत्वं इषयन्त इषु इच्छा-
यां अस्माण्यन्तात् छान्दसो लुङ् संज्ञापूर्वकस्य विधेरनित्यत्वात् लघूपधगुणाभावः अदुपदेशात् लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते ॥ ॥ पंचमी- 1924
मृचमाह ॥ ॥ एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः ॥ स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा चिकित्वान् ॥ ॥ ऋतवान् ऋतवान् य-
ज्ञवान् जातवेदाः जातधनः जातप्रज्ञो वा यमग्निः विप्रेभिर्मेधाविभिर्गोतमेभिः रेवमुक्तप्रकारेणास्तोष्ट स्तुतो भूत् ॥ स्तुतश्च सोग्निः एषु गोतमे-
षु द्युम्नं गोतमानां सोमं पीपयत् अपिबत् यद्वा तान् पानं पाययत् ततः सोग्निर्वाजं हविर्लक्षणमन्नं पीपयत् ऋत्विग्भ्यः सोमलक्षणं च पुरोडाशादिलक्षणं
हविश्च स्वीकृत्य सोग्निः आपं अस्माभिः कृतं स च नमा चिकित्वान् आसमन्तात् ज्ञानेन पुष्टिं याति पोषं प्राप्नोतु ॥ यद्वा अस्माकं धनानि पोषं प्रापय-
तु गोतमेभिः अयं ऋषिः पुरस्तुरस्यैतिविहितस्य आणो बहुषु लुक् गोतमांगिरोभ्यश्चेति बहुषु लुक् । अस्तोष्ट स्तौतेः कर्मणि लुङि चिणभावश्च-
न्दसः पीपयत् पा पाने ण्यंतात् लुङि च ङ्याङ्गिलोपः तुषी प्रीतिसेवनयोः भावे घञ् जित्वादाद्युदात्तत्वं ॥ ॥ इति प्रथमस्य पंचमे पंचविंशो वर्गः ॥ ॥१७॥
अभि त्वेति पंचर्चं पंचमं सूक्तं गोतमस्यार्षमाग्नेयं गायत्रं तथा चानुक्रान्तं । अभि त्वा गायत्रं त्विति विनियोगो लैङ्गिकः ॥ ॥ तत्र प्रथमामृचमाह ॥ अभि
त्वा गोतम गिरा जातवेदो विचर्षणे ॥ द्युम्नैरभि प्रणोनुमः ॥ हे जातवेदो जातानां वेदितः विचर्षणे विद्रष्टः सर्वस्य द्रष्टः एवंभूताग्ने त्वां गोतमस्य
अस्य सम्बन्धस्य द्रष्टा गोतमकृषिः कृपेरेव पिपृच्छार्थे वर्तनं गिरा स्तोत्रलक्षणया वाचा अभिमुख्येन पुनः पुनः स्तुमः नोनुमः णु स्तुतौ अस्मा-
द्यङ्लुगन्ताल्लुङ् उपसर्गादसमासेपीति णत्वं ॥ ॥ द्वितीयामृचमाह ॥ ॥ तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति ॥ रायस्कामो धनकामो गोतमो
यमग्निं गिरा स्तुत्या दुवस्यति परिचरति तमु तमेव त्वां द्युम्नैर्द्योतमानैः स्तोत्रैः अभिमुख्येन पुनः पुनः स्तुमः ॥ रायस्कामः रायो धनानि काम-
यत इति रायस्कामः कर्मण्यन् तत्पुरुषे कृति बहुलमिति बहुलवचनादलुक् इडिडित्याद्विना पूर्वपदस्य विभक्तेरलुक् । दासी भारादित्वात् पूर्वपदप्रकृ-
तिस्वरत्वं अतः कृकमिकंसकुंभपात्रेति विसर्जनीयस्य सत्वं दुवस्यति दुवस उपतापे परिचरणे च कण्ड्वादिः ॥ ॥ तृतीयामृचमाह ॥ ॥ तमु त्वा वाज-
सातममङ्गिरस्वद्धवामहे ॥ द्युम्नैरभि प्रणोनुमः ॥ हे अग्ने वाजसातमं वाजानामतिशयेन सनितारं दातारं तं त्वां अङ्गिरस्वत् हवामहे ॥ आह्वयामः त्रि-
संगतं वाजसातमं षणु दाने जनसनखनक्रमगमो विट् विड्वनोरनुनासिकस्यादित्यात्वं अतिशयेन वाजसाः वाजसातमः तमपः पित्वादनुदात्तत्वे कृदु-
त्तरपद प्रकृतिस्वर एव शिष्यते अङ्गिरस्वत् तेन तुल्यमिति वतिः न भाङ्गिरसमनु पांवस्य पसंख्यानमिति भत्वेपदत्वाभावात् रुत्वाद्यभावः ॥ ॥ चतुर्थीमृ-
चमाह ॥ ॥ तमु त्वा वृत्रहन्तमं यो दस्यूँरवधूनुषे ॥ द्युम्नैरभि प्रणोनुमः ॥ हे अग्ने दस्यून् उपक्षयितॄन् राक्षसादीन् यस्त्वमवधूनुषे अवचालयसि
स्थानात्प्रच्यावयसि वृत्रहन्तमं वृत्राणां पापानां । अतिशयेन हन्तारं तमु त्वां यावता केनापि नाशयति तमपो नुङ् दस्यूनदीर्घादटि समानपाद इति नकार-
स्य रुत्वं आतोनुनासिकः पूर्वस्य तु वेति इकारः सानुनासिकः ॥ ॥ पंचमीमृचमाह ॥ ॥ अवोचाम रहूगणा अग्नये मधुमद्वचः ॥ द्युम्नै० ॥ ऋषिः कृतं
स्तोत्रं अनयापवर्ग रहूगणाः रहूगणस्य पुत्रा वयं गोतमः अग्नये अङ्गनादिगुणाय तस्मै देवाय मधुमद्वचः माधुर्योपेतं वचनमवोचाम उक्त्वा-
वादिष्म ॥ तद्वचनरूपैर्द्युम्नैः द्योतमानैः स्तोत्रैः पुनः पुनरग्निं वयमभिप्रणोनुमः अभिमुख्येन प्रकर्षेण स्तुमः ॥ ॥ इति प्रथमस्य पंचमप

आ॰ ४॰ द्विंशो वर्गः॥ ॥हिरण्यकेश इति द्वादशर्चं षष्ठं सूक्तं राहूगणपुत्रगोतमस्यार्षं अत्रानुक्रान्तं हिरण्यकेशो द्वादशाद्यास्तिस्रस्त्रिष्टुभो ऽग्निदेवत्यं
२५२ आग्नेयं प्रातरनुवाके आग्नेये क्रतौ गायत्रे छन्दसि तृतीयाद्या विनियोगः हिरण्यकेशो रजसो विसार इति द्वे व्याहित्वत्कुना धामन्ते विश्वं भुवनम्
धिश्रितं वनि॥ ॥तत्र प्रथमामृचमाह॥ ॥हिरण्यकेशो रजसो विसारे ऽहिर्धुनिर्वात इव ध्रजीमान्॥ शुचिभ्राजा उषसो नवेदा यशस्वतीरपस्यु
वो न सत्याः॥ हिरण्यकेशः हिरण्मयकेशः ज्वालाः यस्य सः तथोक्तः स च रजसो विसारे उदकस्य विसरणे ज्ञाते अहिः आगन्ता हन्ता मेघानां धुनिः तेषां
कम्पयिता वात इव वायुरिव ध्रजीमान् शीघ्रगतियुक्तः एवंभूतो वैद्युतोऽग्निः रजसः उदकस्य विसारे विसरणे च निमित्तभूते सति शुचिभ्राजाः शोभनदी
प्तिः तस्मै प्राप्तकालं निर्गमयितुं जानाति उषसः उषोदेवताः नवेदाः न वेदन्तीति नवेदाः मेघादुदकस्य निःसारणं अग्निर्यथा जानाति उषसः तथा नेति
अर्थः अज्ञानेदत्तः। यशस्विनीः अनुयुक्ताः अन्नवत्यः अपस्युवः अपः कर्म आत्मन इच्छन्त्यः सत्याः अवितथा र्भाना एवंभूताः प्रजा इव अत्रोपमा
नताने न भवितः प्रजायते। ननु तासां ... नाधिनिंदानिंदनं अपितु सत्यं स्तोतृमिति यातः ध्रजीमान् प्रजयतेऽन सर्वधातुभ्य इति भावे इन् प्रत्य
यः तेन ... तदस्यास्तीति मतुप् ... प्रातिपदिकस्याग्रहणे तत्वं न वेदाः नञ्पूर्वाद्विदेः पचाद्यच् ... प्रकृतिभावः अप
स्युवः अपः ... आत्मनः क्यच् क्याच्छन्दसीत्युप्रत्ययः तन्वादीनां छन्दसि बहुलमुपसंख्यानमित्युवङ्॥ ॥द्वितीयामृचमाह॥ ॥आ ते सुपर्णा
अमिनन्तँ एवैः कृष्णो नोनाव वृषभो यदीदं॥ शिवाभिर्न स्मयमानाभिरागात्पतन्ति मिहः स्तनयन्त्यभ्राः॥ हे अग्ने ते तव सुपर्णाः शोभनपतनाः
... ज्वाला ... शिवाभिः ... स्मयमानाभिः हसन्तीभिः ... भ्राजमानाभिः
... आगात् ... मिहः ... अभ्राः ... भवन्ति। आ ते अमिनन्ति अ
... कृष्णो ... नोनाव ... वृषभो ... अमिनन्त ... आगन्तेरकारः ... प्रकृतिभावः अणाज्य
... मनाक् ... संहितायामपि द्रष्टव्यं॥ नान्ये चैत्र ... इति ... धातोः
प्रत्ययः स्मयमानाभिः ... पितादनुदात्तत्वे। ... धातुस्वरः शिष्यते। स्तनयन्ति ... दन्तः पतन्ति
स्तनयन्त्यभ्राः पादादित्वाद्... निघाताभावः॥ ॥तत्र तृतीयामृचमाह॥ ॥यदीमृतस्य पयसा पियानो नयन्नृतस्य पथिभी रजिष्ठैः॥ अर्यमा मि
त्रो वरुणः परिज्मा त्वचं पृञ्चन्त्युपरस्य योनौ॥ यदी यदायमग्निः ऋतस्य उदकस्य पयसा सारभूतेन रसेन पियानो वा ... अप्यायितं जगत्
तस्यादकस्य ... पथिभिः रजिष्ठैः ऋजुतमैः पथिभिर्मार्गैः स्थानेभ्यो ... नयन् ... प्रवर्तते। तदानीं अर्यमा मित्रो वरुणश्च परिज्मा परितो गन्ता
मरुद्गणश्च उपरस्य मेघस्य योनौ स्थाने ... त्वचं ... पृञ्चन्ति ... स्वर्ग ... तिया ... पि
यानः ... अनुदात्तत्वात् ... धातुस्वरः शिष्यते रजिष्ठैः ऋजुशब्दा
दिष्ठनि ... रजिष्ठ ... अग्नि
... मग्ने ... इति॥ ॥तत्र प्रथमां सप्तमप्रथमामृचमाह॥ ॥अग्ने वा २५३
जस्य गोमत ईशानः सहसो यहो॥ अस्मे धेहि जातवेदो महि श्रवः॥ हे सहसो यहो बलस्य पुत्राग्ने गोमतो बहुभिर्गोभिर्युक्तस्य वाजस्यान्नस्य
ईशानः ईश्वरस्त्वमसि अतो ऽस्मे अस्मासु हे जातवेदो जातधन जातानां वेदितर्वाग्ने महि महत् श्रवः अन्नं धेहि स्थापय सहसा ... उपग ... वान्

आमंत्रितस्य चेति षष्ठ्यामंत्रितसमुदायो निहन्यते कर्षां करु गितिस तस्याशे आदेशः॥ ॥पंचमीमृचमाह॥ स इधानो वसुष्कविरग्निरीळेन्यो गिरा॥ 30/
रेवदस्मभ्यं पुर्वणीक दीदिहि॥ ॥सोऽग्निः इधानो दीप्यमानः वसुः निवासयिता सर्वेषां कविः क्रान्तदर्शनो मेधावी वा स्तोत्ररूपया वाचा ईळेन्यः 192
स्तोतव्यो भवति हे पुर्वणीक अनीकं मुखं पुरुभिर्बहुभिर्ज्वालाभिरनीकवान्। याभिर्ज्वालाभिर्युक्ताग्ने अस्मभ्यं रेवत् धनयुक्तमन्नं यथा भवति तथा दी
दिहि दीप्यस्व इधानः इंधी दीप्तौ तालव्यादिः श्वानस्य बहुलं छन्दसीति शपो लुक् ईळेन्य ईड स्तुतौ। औणादिक एन्य प्रत्ययः रेवत् रयिमतो बहुलमिति
संप्रसारणं छन्दसीर इति मतुपो वत्वं रेशब्दाच्च मतुप उदात्तत्वं दीदिहि दीप्तिकर्मा॥ ॥षष्ठीमृचमाह॥ ॥क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः॥ स तिग्मजम्भ रक्षसो दह प्रति॥ हे राजन् राजनशील अग्ने क्षपः क्षपय राक्षसादीनस्मदीयैः पुरुषैः बाधस्व उत अपि च त्मना त्वत्कर्तृकेण आत्मना च तान् बाधस्वेति चेत उच्यते। वस्तोः सर्वाण्यहानि उत अपि च उषसः उषःकालोपलक्षिता रात्रीः अत्यन्तसंयोगे द्वि
तीया सर्वेष्वहःसु सर्वासु रात्रिषु चेत्यर्थः। हे तिग्मजम्भ तीक्ष्णमुखाग्ने रक्षसो राक्षसान् उक्तप्रकारेण क्षपय इत्यादिषु त्वमेव प्रति दह प्रत्येकं दहन
नाशकन्वि इत्यर्थः इत्यादि अस्वित्यर्थः॥ क्षपः क्षपयतिर्ण्यन्तो ऽत्र यथे छान्दसो लुङ् छन्दस्यभयथेति शप आर्धधातुकत्वान्न रणेरनिटीति णिलोपः उदा
त्तनिवृत्तिस्वरेण शप उदात्तत्वं। त्मना मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः रक्षसः रक्ष पालने रक्षितव्यमस्मादिति रक्षः भीमादयोऽपादाने असि प्रत्ययः
प्रत्ययाणिलोपः वर्णविपर्ययश्च अस्य च रक्षःशब्दस्यासि प्रत्ययान्तत्वात् प्रत्ययस्वर एव शिष्यते॥ ॥इति प्रथमस्य पंचमे
सप्तविंशो वर्गः॥ ॥प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छन्दसि अवा नो अग्न इत्याद्याः षडृचः सूत्रितं च अवा नो अग्न इति षट् आग्निमीळे इति द्वे इति आ
श्विनशस्त्रे चैताः शंसनीयाः प्रातरनुवाकवदतिदेशात्॥ ॥षडृकप्रथमां सूक्तसप्तमीं ऋचमाह॥ अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि॥ विश्वासु
धीषु वन्द्य॥ विश्वासु सर्वासु धीषु सर्वेषु कर्मसु वन्द्य स्तुत्य हे अग्ने गायत्रस्य गायत्रसाम्नः गायत्रीछन्दस्कस्य सूक्तस्य वा प्रभर्मणि प्रकर्षेण संपादने निमित्त
भूते सति नो ऽस्मान् ऊतिभिः त्वदीयैः पालनैः अव रक्ष अव घ्यचोऽतस्तिङ इति संहितायां दीर्घत्वं॥ ॥अष्टमीमृचमाह॥ ॥आ नो अग्ने रयिं भर सत्रासाहं वरे
ण्यं॥ विश्वासु पृत्सु दुष्टरं॥ हे अग्ने रयिं धनं नो ऽस्मभ्यमा भर प्रयच्छ कीदृशं सत्रासाहं सत्रा सह युगपदेव दारिद्र्यस्य नाशकं वरेण्यं सर्वैर्वरणीयं विश्वा
सु पृत्सु सर्वेषु संग्रामेषु दुष्टरं शत्रुभिस्तरीतुमशक्यं सत्रासाहं छन्दसि सह इति ण्विः वरेण्यं वृङ् एण्यः पत्यपूर्वादित्यु मांसप्तमुपसंख्यानमि
ति एत ताभ्यस्य वृद्धावः। सा चैकाच इति विभक्तेरुदात्तत्वं आयुः कामस्य प्रथमस्याज्यभागस्यानुवाक्या नो अग्ने इति सूत्रितं च॥ आयुष्कामेष्ट्यां
ज्ञीवातुमन्त्यात सुपरेष्ठादिति॥ ॥तामेतां सूक्ते नवमीमृचमाह॥ ॥आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसं॥ मार्डीकं धेहि जीवसे॥ ॥हे अग्ने
नो ऽस्माकं जीवसे जीवनाय सुचेतुना शोभनेन ज्ञानेन युक्तं रयिं धनं आ धेहि आस्थापय कीदृशं मार्डीकं मृडीकं सुखं तदनुभूतं विश्वायुपोषसं सा
र्वं सर्वस्मिन्नायुषि देहादेः पोषकं यावज्जीवमस्मदुपभोगपर्याप्तमित्यर्थः सुचेतुना चिती संज्ञाने औणादिक उ प्रत्ययः सुदुत्तरपदप्रकृतिस्वरत्वं
विश्वायुपोषं विश्वमायुर्यस्मिन् शरीरादौ तद्विश्वायु बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदान्तोदात्तत्वं। तत्पुष्णातीति विश्वायुपोषः कृतिकारकयोर
पि पूर्वपदप्रकृतिस्वरत्वं सकारकोपध्मानः दीर्घायुत्वाय वर्चस इति यथा॥ ॥दशमीमृचमाह॥ ॥प्र पूतास्तिग्मशोचिषे वाचो गोतमाग्नये॥
भरस्व सुम्नयुर्गिरः॥ ॥हे गोतम सुम्नयुः सुम्नं धनमात्मन इच्छंस्त्वं तिग्मशोचिषे तीक्ष्णज्वालायाग्नये पूताः शुद्धा वाचः अग्नेर्गुण

आ० प्र० नमस्यगभिरध्वतीः गिरः स्तुतीः प्रभरस्व प्रकर्षेण संपादय तिग्मशोचिषेति तन्निश्चाने युयुरचितिजां कृत्वं वेतिमकृ तिग्मशोचीं षियस्य बहुव्रीहौ
पूर्वपदप्रकृतिस्वरत्वं सम्नयुः सम्नशब्दात्क्यचि नछंदस्य पुत्रस्येतीत्वदीर्घयोः प्रतिषेधः क्याछंदसीत्युप्रत्ययः॥ ॥एकादशीमृचमाह॥ यो नो अ
१५३ ग्ने अभिदासत्यंति दूरे पदीष्ट सः॥ अस्माकमिद्वृधे भव॥ हे अग्ने नोस्मान् अंति अंतिके दूरे समीपे विप्रकृष्टे देशे वा स्थितः सन् यः शत्रुरभिदासति
उपक्षपयति स शत्रुः पदीष्ट पततु नश्यतु त्वं वास्मत्कृते अस्माकमेव वृधे वर्धनाय भव। अभिदासति। दसु उपक्षये अस्माण्यंतादुक्ति छंद
स्युभयथेति शप आर्धधातुकत्वात् णेरनिटीति णिलोपः अंतिकादित्यो बहुलमिति बहुलवचनात् अंतिकशब्दस्य ककारलोपः वृद्धेरद्वो संप्रसा
रिलक्षणाभावे इत्वसावकाशत्वादिति विभक्तेरुदात्तत्वं॥ ॥द्वादशीमृचमाह॥ ॥ सहस्राक्षो विचर्षणिरग्नीरक्षांसि सेधति॥ होता गृणीत उक्थ्यः॥
सहस्राक्षः असंख्यातज्वालाविचर्षणिः विशेषेण सर्वस्य द्रष्टायमग्निः रक्षांसि सेधति प्रतिषेधयतीति यद्वा निर्गमयतेति सचानिरुक्थ्यः उ
क्थैः शस्त्रैरस्माभिः स्तूयमानः सन् होता देवानामाह्वाता भूत्वा गृणीत तान् स्तौति सहस्राक्षः बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् समासांतः सक्थिर
ष्टत्वात्तस्यैव स्वरः शिष्यते॥ ॥इति प्रथमस्य पंचमे अष्टाविंशो वर्गः॥ ॥स इत्यष्टादशर्चं सप्तमं सूक्तं गोतमस्यार्षं ऐंद्रं पांक्तं तत्र इत्यनुक्रांत
च उक्तं हि यो द्वयोरेंद्रं पांक्तं तद्धि हि नाध्वप्रयोगात्तुह्यादि परिभाषया उदमुत्तरे च दु पंक्तिश्चंद स्व पक्ष पडहस्य पंचमेहनि मरुत्वतीये उदं सूक्तं स्त्रविनियं
उक्थादिशामउन्मदइतिपंक्तिरिति॥ ॥तामेतां सूक्ते प्रथमामृचमाह॥ ॥ इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनं॥ शविष्ठ वज्रिन्नोजसा पृथिव्या निः
शशा अहिमर्चन्ननु स्वराज्यं॥ हे शविष्ठ अतिशयेन बलवन् वज्रिन् वज्रवन्निंद्र इत्था हि इत्थमेवमनेन प्रकारेण सोमे इन्मदे सोमेन
त्वयि पीते सति ब्रह्मा ब्राह्मणः स्तोता वर्धनं त्वद्वृद्धिकरं स्तोत्रं चकार अनेन स्तोत्रेण हृष्टस्त्वं पृथिव्याः
सकाशादहिं आगत्य हंतारं वृत्रं निःशशाः निःशेषेण अशासीः आबाधस्वेति शासनं कृत्वा पृथिव्याः सकाशान्निरगमय इत्यर्थः॥ शशाः शासु अनुशि
ष्टौ लङि लुकि आसेव्यहुलं छंदसीति शपः श्लुः स्वराज्यं राज्ञो भावः कर्म वा राज्यं पत्यंत पुरोहितादिभ्यो यगिति यक् तत्र हि राजा इति पठ्यते॥ स्वस्य राज्यं
स्वराज्यं अकर्मधारये राज्ञ इत्युत्तरपदाद्युदात्तत्वं॥ ॥द्वितीयामृचमाह॥ ॥स त्वामदद्वृषा मदः सोमः श्येनाभृतः सुतः॥ येना वृत्रं निरद्भ्यो
जघंथ वज्रिन्नोजसार्चन्ननु स्वराज्यं॥ हे इंद्र त्वा त्वां स सोमः अमदत् अमदयत् हर्षं प्रापयत् कीदृशः सोमः वृषा सेचनस्वभावः मदः मदक
रः श्येनाभृतः श्येनरूपमापन्नया गायत्र्या द्युलोकात् आहृतः सुतः अभिषुतः हे वज्रिन् वज्रवन् येन सोमेन
न सोमेन ओजसा बलकरणेन अद्भ्यः अंतरिक्षस्य सकाशात् वृत्रं निर्जघंथ हतवानसि अन्यत्पूर्ववत् अमदत् अमदीहर्षे अस्माण्णिचि मदी हर्षग्लेप
नयोरिति घटादिषु पाठात् मित्त्वे सति मितां ह्रस्व इति ह्रस्वत्वं लङि छंदस्युभयथेति शप आर्धधातुकत्वात् णेरनिटीति णिलोपः अस्मा आप उक्तं तरि
क्ष नाम भयादीति पकारस्य तत्त्वं जघंथ क्रादिनियमात्प्राप्तस्येट उपदेशेत्वत इति प्रतिषेधः अभ्यासाच्चेति हकारस्य घत्वं लिति प्रत्यया
त्पूर्वस्योदात्तत्वं यद्वृत्तयोगादनिघातः॥ ॥तृतीयामृचमाह॥ ॥प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते॥ इंद्र नृम्णं हि ते शवो हनो वृत्रं जया अपो १५३
र्चं॥ हे इंद्र प्रेहि प्रकर्षेण अभीहि हि तस्मात् शत्रूनाभिमुख्येन प्राप्नुहि प्राप्य च धृष्णुहि तान् शत्रून् अभिभव ते तव वज्रो नियंसते शत्रुभिर्न निय
म्यते न प्रतियम्यते अप्रतिगतात्येत्यर्थः॥ अन्यंतमनामान्यं यंसते यमः कर्मणि लेटि सिब्बहुलमिति सिप् लेटोडाटाविति आगमः हनः लाड्ये

न्दोरसो लुङ् बहुलं छंदसीति शपो लुक् अभावः शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते पूर्वपदस्या समानवाक्यस्थितत्वान्निघाताभावः जया अपते 303
लेट्याडागमः पूर्ववत्स्वरः॥ ॥चतुर्थीमृचमाह॥ ॥निरिंद्र भूम्या अधि वृत्रं जघंथ निर्दिवः॥ सृजा मरुत्वतीरव जीवधन्या इमा अपोर्चन्॥ हे इं 1924
द्र भूम्या अधि भूलोकस्योपरि वृत्रं निर्जघंथ निःशेषेण हतवानसि। तथा दिवो द्युलोकात् निर्जघंथ हत्वा च इमा अपो वृष्ट्युदकानि अवसृज अधः क्षि
प्रूपः मरुत्वतीः मरुद्भिः संयुक्ताः जीवधन्याः जीवाः प्राणिनो धन्याः स्तुत्या याभिः ताः अन्यत्समानं॥ ॥पंचमीमृचमाह॥ ॥इंद्रो वृत्रस्य दोधतः
सानुं वज्रेण हीळितः अभिक्रम्याव जिघ्नते पः सर्माय चोदयन्॥ हीळितः क्रुद्धः इंद्रः अभिक्रम्य अभिमुख्येन गत्वा दोधतः कंपमानस्य वृत्रस्य
सानुं समुच्छ्रितं हनुप्रदेशं वज्रेण अव जिघ्नते प्रहरति किं कुर्वन् अपो वृष्ट्युदकानि सर्माय सरणाय निर्गमनाय चोदयन् प्रेरयन् दोधतः पत्रकंप
स्मान्निष्ठायां वर्णव्यापत्त्या ईकारः जिघ्नते हंतर्लिटि व्यत्ययेनात्मनेपदं बहुलं छंदसीति शपः श्लुः इति त्वनुदात्तौ बहुलं छंदसीत्यभ्यासस्येत्वं गमहनेत्या
दिनोपधालोपः सर्माय सृगतौ आर्तिस्तुसुहुस्रित्यादिना भावे मन् प्रत्ययः नित्वादाद्युदात्तत्वं॥ ॥इति प्रथमस्य पंचमे एकोनत्रिंशो वर्गः॥ ॥षष्ठीमृ
चमाह॥ ॥अधि सानौ नि जिघ्नते वज्रेण शतपर्वणा॥ मंदान इंद्रो अंधसः सखिभ्यो गातुमिच्छत्यर्चन्॥ इंद्रः शतपर्वणा शतधाराभिर्युक्तेन वज्रेण
सानावधि निजिघ्नते अधिसप्तम्यार्थानुवादी समुच्छ्रिते वृत्रस्य कपोलप्रदेशे हननं करोति किं च अंधसः सोमेन मंदानः स्तूयमानः सन् सखिभ्यः
समानाख्यानेभ्यः स्तोतृभ्यो धर्मानुस्यगातुं मार्गमुपायमिच्छति अन्यत्पूर्ववत् मंदनः मंदिस्तुतौ कर्मणि शानच् व्यत्ययेन छंदस्युभयथेति शान
च आर्धधातुकत्वात् तातोर्लोपयलोपौ अनुदात्तेतः परत्वात् शानचोलसार्वधातुकानुदात्तत्वे सति एकस्वो दात्तत्वं अनुदात्तेश्चेति स्वयमेवाक्ते
वे सति उदात्तनिवृत्तिस्वरेण शानच उदात्तत्वं प्राप्नोति एवं तर्हि शानच आर्धधातुकत्वादवलसार्वधातुकानुदात्तत्वाभावे चित्स्वर एव शिष्यते॥ ॥
सप्तमीमृचमाह॥ ॥इंद्र तुभ्यमिदद्रिवोनुत्तं वज्रिन्वीर्यं॥ यद्ध त्यं मायिनं मृगं तमु त्वं माययावधीरर्चन्॥ अद्रिरिति मेघनाम अद्रिवः वाहनरूपमेघयु
क्त हे वज्रिन् इंद्र तुभ्यमिति षष्ठ्यर्थे चतुर्थी तदेव वीर्यं सामर्थ्यं अनुत्तं शत्रुभिरितिरस्कृतं यद्ध यस्मात् खलु मायिनं मायाविनं त्यं प्रसिद्धं जयितारं
लोपे को द्वकारिकं णमित्यर्थः मृगं मृगरूपमापन्नं तं वृत्रं त्वम पि मायया निचा तिवधीः दृशः सबाहुः तस्याल्लोपे सति त्वानिवद्भावात्सिद्धिरप्य
भावः॥ ॥अष्टमीमृचमाह॥ ॥वि ते वज्रासो अस्थिरन्नवतिं नाव्या अनु॥ महत्त इंद्र वीर्यं बाह्वोस्ते बलं हितमर्चन्॥ हे इंद्र ते वज्रासो वज्राः वलसका
शान्निर्गतान्यायुधानि नाव्याः नावा तार्याः नवतिं नवतिसंख्याकाः नदीः अनु लक्षीकृत्य व्यस्थिरन् विविधमास्थिताः सर्वत्र व्याप्यमानं त्व
हंतुं वज्राः एकोपि अनेकधाभासीदित्यर्थः॥ अन्यत्पूर्ववत् अस्थिरन् तिष्ठतेर्लुङि समवप्रविभ्यः स्थ इत्यात्मनेपदं मंत्रे घसेति च्लेर्लुक् स्थाघ्वोरिच्चेतीत्वे
बाहोः उदात्तयण इति विभक्त्युदात्तत्वं॥ ॥नवमीमृचमाह॥ ॥सहस्रं साकमर्चत परि ष्टोभत विंशतिः॥ शतैनमन्वनोनवुरिंद्राय ब्रह्मोद्यतमर्चन्॥
सहस्रं सहस्रसंख्याका मनुष्याः साकमर्चत एनमिंद्रं युगपदेवा पूजयन् विंशतिः षोडशर्त्विजः यजमानः पत्नी च सदस्यः शमिता चेति विंशतिसंख्या
कास्ते वा यविंशतिः संख्यासा परिष्टोभत परितः सर्वतः स्तोतं तथा च शतसंख्याका ऋषयः एनमिंद्रमन्वनोनवुः पुनःपुनः अस्तुवन् अस्मा ए
वेंद्राय ब्रह्म हविर्लक्षणमन्नं उद्यतं दातुमूर्ध्वं कृतं अत एवं विधइंद्रः वृत्रमहन्नित्यर्थः अन्यत्पूर्ववत् परिष्टोभत स्तौतिकर्मा सकपसर्गात्सः

नोतिपत्वं। अत्रोनवुःणुस्तौ अस्माधर्ङ्-तालुङ्ः भिज्ञभ्यस्तादिति भ्यश्चेतिरपादेशः। उ घतेयम उपरमे उस्तूर्वादस्मात् र्मणिनिघानुदात्तोपदेशेषा
आ० १० हिनानुनासिकलोपः गतिरनंतरेतिगतिः प्रकृतिस्वरत्वं ॥ तृतीयामृचमाह ॥ ॥ इंद्रो वृत्रस्य निरहन् सहसा सहः ॥ महन्तरस्य पौंस्यं वृत्रं तघन्वां
१५४ असृजद्वैननुस्वराज्यं ॥ ॥ इंद्रः वृत्रस्यासुरस्य तविषीं बलं स्ववधेन बलेन निरहन् हंतवान् सहसा सहनेन अभिवसाधनेनायुधेन सहाभिभव
साधनं वज्रायुधं निरहन् अस्येंद्रस्य तत्पौंस्यं बलं महत् भतिप्रौढं यस्माद्यं वृत्रं तघन्वान् हंतवान् हत्वा च तन्निरुद्धा आपः असृजत् ततस्माद्वत्रा
न्निरगमयत् अन्यत्पूर्ववत् पौंस्यं पुंसामिव र्थं नेतुराद्यिः अबाध्यादिति यत् यतोनावउत्या घञ्चात् तं जघन्वाद् हंतेर्लिटः क्वसुः विभाषागमहनविदेशीष
विकल्पादिड्भावः अभ्यासाच्चेत्यभ्यासादुत्तरस्य हंतेर्हकारस्य घत्वं ॥ इति प्रथमस्य पंचमे त्रिंशो वर्गः ॥ ॥ इमे चित्तव मन्यवे वेपेते भियसा मही ॥ यदिंद्र वज्रि
न्नोजसा वृत्रं मरुत्वां ॥ मही महत्यौ इमे द्यावापृथिव्यावपि हे इंद्र तव मन्यवे त्वदीयकोपात् भियसा भीत्या वेपेते कंपेते हे वज्रिन् वज्रवन्निंद्र मरुत्वान् मर
न्नोजसा वृत्रं मरुत्वां ॥ ...द्भिर्युक्तस्त्वं तुजसा बलेन यद्यदा वृत्रमवधीः तदानीं द्यावापृथिव्यावपि भयेनाकंपेतामित्यर्थः ॥ वेपेते टुवेपृ कंपने भियसा भिञी भये न असुनादिकः कसि
प्रत्ययः ॥ ॥ द्वादशीमृचमाह ॥ न वेपसा न तन्यतेंद्रं वृत्रो विबीभयत् ॥ अभ्येनं वज्र आयसः सहस्रभृष्टिरायतार्चन् ॥ वृत्रः इंद्रं वेपसा स्वकीयेनावपनेनापि
भीयत भीतिं न अकरोत् तथा तन्यतुः भृष्टिः अनेकाभिः धाराभिर्युक्तो वज्रः एनं वृत्रं अभ्यायत हंतुमाभिमुख्येनागच्छत अन्यत्पूर्ववत् तन्यता। स्तनशब्दे
तन्यज्जीत्यादिना तनोतेर्विधीयमानोयच्च बहुलवचनादस्मादपि भवति अत एव मलोपश्च सर्वासां छंदसि वा तीयादाद्देशः उदात्तनिवृत्तिस्वरेणतस्योदा
त्तत्वं। भियत्निर्भी भये हेतुमति णिच् अत्रेन परस्मैपदं भयेन हतोर्वृत्राद्धेति हेतुभयाभावाद्वि भेतेर्हेतुभयं इत्वाभावः ॥ च्यतालुङि चुक्कषड्डिआ
यताअस्य पयगतो भीवादित्रानेपद्रि ॥ त्रयोदशीमृचमाह ॥ ॥ यद्वृत्रं तव चाशनिं वज्रेण समयोधयः ॥ अहिमिंद्र जिघांसतो दिवि ते बद्बधे शवो
॥ ॥ हे इंद्र यत् यदा वृत्रं तव चाशनिं इत्यर्थे तनस्य वामउशनिं बलं वज्रेण बलं विवृद्धं बद्बधे मनुष्यं तं ब्राह्मणमांसीतत्रिद्रं पूर्वं जिघांसः ॥ हंतेर्हकार्थे सनि अज
नगमां सनि ॥ नाभिरुपधादीर्घत्वं बद्बधे बंध बंधने कर्मणि लिटि व्यत्ययेनह्रस्वादेशो भावः ॥ ॥ चतुर्दशीमृचमाह ॥ ॥ अभिष्टने ते अद्रिवो यत्स्थाज
गच्च रेजते ॥ त्वष्टा चित्तव मन्यव इंद्र वेविज्यते भियार्चन्ननु ॥ हे अद्रिवो वज्रिन् इंद्र ते तव अभिष्टने सिंहनादे सति स्थाः स्थावरं जगत् जंगमं च यत् अस्ति तदुभयं
रेजते कंपते त्वष्टा चित्तव वज्रनिर्माता त्वष्टा च तव मन्यवे त्वदीयात् कोपात् भियाभीत्या वेविज्यते भृशं कंपते अन्यत्समानं स्थाः तिष्ठतेः क्विप् वा निक्विपु
वेविज्यते ओविजी भयचलनयोः अस्मात् क्रियासमभिहारे यङ्-सन यङोशितिभावे अदुपदेशात्सार्वधातुकानुदात्तत्वं यङः एव स्वरः शिष्यंते इंद्र
तस्य पादादौ वर्तमानस्यामंत्रितं पूर्वमित्यविद्यमानत्वे सति अस्य पादादित्वादयादादिष्वेति षष्ठ्या सांनिध्याभावः ॥ ॥ पंचदशीमृचमाह ॥ ॥
नहि नु यादधीमसींद्रं को वीर्या परः ॥ तस्मिन् नृम्णमुत क्रतुं देवा ओजांसि संदधुरर्चन् ॥ यातु यातं सर्वत्र व्याप्य वर्तमानमिंद्रं नहि नु धीमहि वर्णन सामर्थ्यं ग
च्छामः यतो वयम परङ्यत्वेनतत्कारांतमन्यथं वेद्ययमानयेपराद्विपरएनेति परः परस्ताद्दति दूरे मनुष्येभ्यो न वगास्थानेवियावीरणसामर्थ्येन वर्त १५४
मानमिंद्रं कामनुष्यो ज्ञातुं शक्नुयात्। न कोपीत्यर्थः ॥ कस्मादिति चेत् अत्राह तस्मिन्निति यस्मात् तस्मिन्निंद्रे देवाः नृम्णं धनं उत अपि च क्रतुं वीर्यकर्म ओजां
सि बलानि च संदधुः स्थापयांचक्रुः तस्मादित्यर्थः ॥ यातत्याप्रापणे अस्माल्लुटः सर्वासां लुगिति द्वितीयालुक् अधीमसि इण गतौ इदंतो मसि वीर्या सर्वासां
लुगिति तृतीयायाआकारः ॥ ॥ षोडशीमृचमाह ॥ ॥ यामथर्वा मनुष्पिता दध्यङ् धियमत्नत ॥ तस्मिन्ब्रह्माणि पूर्वथेंद्र उक्था समग्मतार्चन्ननु स्वराज्यं ॥ ॥

अथर्वा एतत्संज्ञक ऋषिः पिता सर्वासां प्रजानां पितृभूतो मनुश्च दध्यङ् अथर्वणः पुत्र एतत्संज्ञक ऋषिश्च यां धियं यत्कर्मा तत्नत अकुर्वंत तस्मिन् कर्मणि 305/1924
यानि ब्रह्माणि हविर्लक्षणान्यन्नानि उक्थानि शस्त्ररूपाणि स्तोत्राणि च यानि संति तानि सर्वाणि तस्मिन्निंद्रे समग्मत सम्यगगच्छंत। तत्र दृष्टांतः पूर्वथा पूर्वं
यामन्वेषां वसिष्ठादीनां यज्ञेषु यथा हवींषि स्तोत्राणि च यानि संति तानि सर्वाणि तस्मिन्निंद्रे समग्मत समगच्छंतेति इत्यर्थः इंद्रः स्वराज्यं स्वस्य राज्यं
अर्चयन्ननुपूजयन् वृत्रवधादिरूपेण कर्मणा स्वकीयमधिपतित्वं प्रकटयन्नित्यर्थः ॥ अत्नत तनु विस्तारे बहुलं छंदसीति विकरणस्य लुक् तनिपत्योश्छं
दसीति उपधालोपः पूर्वथा प्रत्नपूर्वविश्वेमात्थाल् छंदसीति पूर्वशब्दात्थाल् प्रत्ययः लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं उक्थाः शेश्छंदसि बहुल
मिति शेर्लोपः समग्मत समो गम्यृच्छिभ्यामित्यात्मनेपदं लुङि मंत्रे घसेति च्लेर्लुक् गमहनेत्यादिनोपधालोपः ॥ ॥ इति प्रथमस्य पंचमे एकत्रिंशो वर्गः ॥ ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्सं
हिताभाष्ये प्रथमाष्टके पंचमोध्यायः ॥ ॥ १ ॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥
१ ॥ श्रीगणेशाय नमः
॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं ज
गत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ ॥ १ ॥ इत्यत्र व्याख्याः पंचमोध्याय मध्यायो व्याकृतः पुरा धीमता सायणाचार्येण षष्ठोध्यायोनुवर्ण्यते
तत्र प्रथममंडले त्रयोदशानुवाकमध्ये सप्त सूक्तानि व्याकृतानि ॥ ॥ इंद्रो मदायेति नवर्चमष्टमं सूक्तं ॥ अत्रानुक्रम्यते ॥ इंद्रो नवेति ऋषिश्चान्यस्मा
द्दृष्टमिति परिभाषया राहूगणपुत्रस्य गोतमस्यार्षं इंद्रस्य सऋषिः प्रवेत्स पांक्तीसूक्तत्वात्तु ह्यादिपरिभाषया उद्दुतं च सप्तपांक्तं ॥ अना
देशपरिभाषयेंद्रो देवता प्रातस्य पंचमेहनि निष्केवल्यशस्त्र इदं सूक्तं। सूत्रितं च प्रेहं यच्च इंद्रो मदाय समोमदासइति निष्केवल्यमिति आरंभ
णीयेचातुर्विंशिकेहनि माध्यंदिने ब्राह्मणाच्छंसिनः शस्त्रे इंद्रो मदायेति आवपत् चो वैकल्पिकः स्तोत्रियः ॥ होत्रकाणामिति खंडे सूत्रितं इंद्रो मदा
य वावृधे मदे मदे हि नो ददिरेति ॥ महाव्रते निष्केवल्ये उत्तरपक्षे इंद्रो मदायेत्येकत्रिंशन्नीयतथैवपंचमारण्ये सूत्रितं ॥ इंद्रो मदाय वावृधे इति पंक्तिः
सूद्दो हा इति ॥ तामेतां सूक्तप्रथमामृचमाह ॥ ॥ इंद्रो मदाय वावृधे शवसे वृत्रहा नृभिः ॥ तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नो
विषत् ॥ ॥ वृत्रहा वृत्रस्यावरकस्य वृष्टिनिरोधकस्य मेघस्यासुरस्य वा हंता। यद्वा आवरकाणां शत्रूणां हंता इंद्रः मदाय हर्षार्थं शवसे बलाय
मे तत् बलार्थं च नृभिर्यजमानेस्त्विभिर्ऋत्विग्भिः वावृधे स्तोत्रेरुपाभिः स्तुतिभिः प्रवर्धितो बभूव ॥ स्तुत्या हि देवता प्रत्यबलाम्नतीप्रव
र्धितेति मितं ॥ तमेवेंद्रं महत्सु प्रभूतेषु आजिषु संग्रामेषु हवामहे अस्माकं रक्षणाय कथयामहे उत अपि च ॥ वर्द्धमेनं अर्भे अल्पसंग्रामे हवा
महे अस्माभिराहुतः स चेंद्रो वाजेषु संग्रामेषु पुनास्मान् प्राविषत् प्रावतु प्रकर्षेण रक्षतु वावृधे कर्मणि लिट् संहितायां अभ्यासस्य अन्येषाम
पि दृश्यत इति दीर्घत्वं। तुजादित्वाच्छिद् तुजादीनाम् इति च छंदस्युभयथेति दीर्घश्रूयते ॥ नृभिः सा वै काचेति प्राप्तस्य विभक्त्युदात्तत्वस्य नृच्चान्यतरस्य
मिति प्रतिषेधः हवामहे ह्वयतेर्लेट् हियङ बहुलं छंदसीति संप्रसारणं आपि गुणावादेशौ ॥ अविषत् अव रक्षणे लेट्यडाग
मः इतश्च लोप इतीकारलोपः सिब्बहुलं लेटीति सिप् तस्यार्धधातुकत्वादूद्लादिलक्षण इट् ॥ ॥ द्वितीयामृचमाह ॥ ॥ असि हि वीर

भा॰ अ॰ संन्धोभि भूरिदा असि दक्षिः॥ असिद्ध भस्यश्च हृ थोयजमानायद्यक्षस्पिसन्वं तं भूरि तिबम्॥ ॥ हर्वारद्यानुशंपणकुर्वानं द्रमे सन्मातिस्यन्ताहोभिवसित
मेकोपि सेनामदृशं भवतीत्यर्थः॥ द्विषस्मद्दर्थं तस्मात् भूरिप्रभूतशत्रूणां धनं परादद्दिः परस्तानाच्छत्रूणां परानुणं यथा भवति तथा आदानानि भ
१५५ वसिद्ध भस्यचित अन्यस्यपि तावक्रोनुः दृथो वर्धयनोसितथा यजमानाय यागं कुर्वतः सन्वनं सोमाभिषवं कुर्वतं पुरुषाय क्षिपणि अपक्षिपसि
ददासि द्विक्षातिर्दानकामा येस्मात तत्र वसु धनं भूरि बहुलं अक्षयं धनं विधनेन तस्मादृदासीति भावः परादृदिः दुदान दाने। आदृगमहनजन इति
प्रत्ययः लिङ्वद्भावात् द्विर्वचनं हृस्वत्वं अनोल्लोपश्च इटि चेत्यकारलोपः दृथः। दृधे रंतर्भावितण्यर्थादिगुपधलक्षणः कः मलतेन तुवनुम इत्वितत
नेरदात्तत्वं॥ ॥ तृतीयामृचमाह॥ ॥ यदुदीरत आजयो धृष्णवे धीयते धना॥ युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोस्मां इंद्र वसौ दधः॥ ॥
अत्रेदमाख्यानं रहूगणपुत्रो गोतमः कुरुसृंजयानां राज्ञां पुरोहित आसीत् तेषां राज्ञां परैः सह युद्धसमये तस्य कपिरनेनमके नतदकात्सा राज्ञां
राज्ञां पुरोहित आसीत् अयं प्रार्थया भासितस्यच तस्य पुरोहित त्वं वाज्ञं सनेत्रिभिरावाज्ञं गोतमो ये राहूगण इमं संपश्यत् अयमीपुरोहित आसी
दिति। यद्यदा आजयः संग्रामाः उदीरते उद्गच्छंति उत्पद्यंते। तदानीं धना धनं धृष्णवे धर्षकाय शत्रूणां जेतारं धनानि धीयते
ते। जयतो धनं भवतीत्यर्थः। हे इंद्र त्वं तादृशेषु युद्धेषु प्रवृत्तेषु मदच्युता शत्रूणां मदस्य गर्वस्य च्यावयितारौ हरी अश्वौ युक्ष्व रथे योजय
ये जयित्वा च कं कंचिद्राजानं परिचरणमकुर्वंतं हनः हन्याः कंचन त्वां परिचरंतं वसौ वसुनि धने दधः स्थापयसि अतो जयाय यथा सर्वेषां
स्थितासि तस्मात् हे इंद्र अस्मान् अस्मदीयान् राज्ञो वसौ धने दधः स्थापय उदीरते ईर गतौ अदादिकः अनुदात्तेत्वात् धातुकस्वरः
स्वरेण वक्ष्यते। यद्वृत्तयोगात् निघातः। धर्षणोपासकस्योति धनं युक्ष्वा युजिर् योगे भंतर्भावितण्यर्थो छादिष्वद्रूपं अर्थे निर्वर्तमानोप
कु। चोतस्तिङ इति संहितायां दीर्घत्वं। हनः हंतेर्लेटि सिप्यडागमः। हनश्च दध्यातिचार्थप्रतीतेश्चादिलोपे विभाषितप्रमायामिति
घातप्रतिषेधः। वसौ लिंगव्यत्ययः दधः दधधारणे लेटि व्यत्ययेन परस्मैपदं॥ ॥ चतुर्थीमृचमाह॥ ॥ क्रत्वा महाँ अनुष्वधं भीम आ वावृधे शवः
॥ श्रियऋष्व उपाकयोर्नि शिप्री हरिवान्दधे हस्तयोर्वज्रमायसं॥ ॥ क्रत्वा कर्मणा प्रज्ञया वा महान् सर्वाधिकः भीमः शत्रूणां भयंकरः इंद्रः अनु
ष्वधं स्वधामन्नं नाम सुधायां विभक्त्यर्थेव्ययीभावः। सोमलक्षणस्यान्नस्य पाने सतीत्यर्थः। शवः आत्मीयं बलं आ वावृधे अभिमुख्येन प्रवर्धयत
नेन संकृष्वाद दर्शनीयः। शिप्री शिप्रे हनू नासिके वा तद्युक्तः हरिवान् हरिनामकाश्वोपेत इंद्रः उपाकयोः अंतिकनामैतत् समीपवर्तिनोर्हस्तयोः श्रिये
आयसं अयोमयं वज्रं श्रिये संपदर्थं निदधे निधाति स्थापयाति सोमपानेन हृष्टः प्रबलः इंद्रः शत्रूणां हननाय हस्ते वज्रं धारयतीति स्वयं
र्थः। क्रत्वा उसाद्दिषु कंदसि वाद्वचन मिति ना भावस्य विकल्पितत्वात् भावः आयसं तस्य विकार इत्यण् प्रत्ययः॥ ॥ पंचमीमृचमाह॥ ॥ आ प
प्रौ पार्थिवं रजो बद्बधे रोचना दिवि॥ न त्वावाँ इंद्र कश्चन न जातो न जनिष्यतेति विश्वं ववक्षिथ॥ ॥ इंद्रः स्वतेजसा पार्थिवं पृथिव्यां संबंधि रजः
रजांसि लोकं च आ पप्रौ आपूरयति तथा दिवि द्युलोके रोचना रोचमानानि दीप्तानि नक्षत्राणि बद्बधे बध्नाति स्थापितवान्। अतो हे इंद्र त्वा
वान् त्वत्सदृशः कश्चन न जातो भूतो नास्ति न च जनिष्यते उत्पत्स्यमानोपि नास्ति। तादृशस्त्वं विश्वं सर्वं रक्षितुं जगत् अतिवव्ववक्षिथ अ १५५
तिशयेन वोढुमिच्छसि सर्वस्य जगतो निर्वाहको भवतीत्यर्थः। प्र प्रौ प्रा पूरणे लिटि आत औणल इत्यौकारः दधा पार्थिवं पृथिव्याम् भ

तित्यण् अन्यत्ययः सिद्धादाभावन्तं। रजः रजांसि गंधर्वा इत्यदितिर राजांतरिक्षं रागिश्रक्रनि रंजकस्तत्र रजः स उपसंख्यानमिति लोपः बद्बधे
बंध नेलिटि व्यत्ययेन हलादिशेषाभावः एकहल्मध्यगतत्वाभावादेत्वाभ्यासलोपाव पिनस्तः पादादित्वात् निघाताभावः। त्वावान् वतुप्रकरणे यु
ष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप् आसर्वनाम्न इत्यात्वं ववक्षिथ। वह प्रापणे अस्मात् इच्छासन् सन्यतइतीत्वस्य संवलित कः
दमिति विकल्पेन इडभावः सनंतात् लिटि अमंत्र इति निषेधात् इत्यग्रत्ययाभावः॥ ॥ इति प्रथमस्य पंचमे प्रथमो वर्गः॥ ॥ षष्ठीमृचमाह॥
यो अर्यो मर्तभोजनं पराददाति दाशुषे॥ इंद्रो अस्मभ्यं शिक्षतु वि भजा भूरि ते वसु भक्षीय तव राधसः॥ यः अर्यः स्वामी पालयिता य इंद्रो म
र्तभोजनं सर्वमनुष्यैरपभोग्यमन्नं दाशुषे च पुरोडाशादीनि ददते यजमानाय पराददाति प्रयच्छति स इंद्रो अस्मभ्यं शिक्षतु ददातु॥ हे इंद्र
अविशिष्ट पादद्वयं प्रत्यक्षकृतं। हे इंद्र अस्मभ्यं दातुं धनं विभज विभक्तं कुरु यतस्ते तव वसु धनं भूरि बहुलमिति संख्यातं अतस्तव राधसो धनस्य
कं देशं भक्षीय भजेय प्राप्नुयां। पराददाति। अभ्यस्तानामादिरित्याद्युदात्तत्वं। तिङ्चोदात्तवतीति गतेरनुदात्तत्वं दाशुषे दाश्वान्साह्वान्मीढ्वांश्च
इति निपात्यते चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं शासिवसिघसीनां चेति षत्वं भक्षीय भज सेवायां लिङि
स्य च्छंदस्युभयथेत्यार्धधातुकत्वात् भावः सलोपश्च एकाच इतीट् प्रतिषेधः आगमानुदात्तत्वे प्रत्ययस्वर एव शिष्यते। पूर्वपदस्था
समानवाक्यगतत्वाभ्रिघाताभावः। समानवाक्ये निघातः युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाः इति वचनात्॥ चातुर्विंशके हनि माध्यंदिने सवने ब्राह्मणा
च्छंसिनो मदेमदे हि नो ददिरिति विकल्पितोनुरूपस्तृचः॥ होत्रकाणामितिखंडे सूत्रितं मदेमदे हि नो ददिः सुरूपकृत्नुमूतय इति॥ ॥ सप्तमीमृचमाह॥
तेन सप्तमीमृचमाह॥ ॥ मदेमदे हि नो ददिर्यूथा गवामृजुक्रतुः॥ सं गृभाय पुरू शतोभयाहस्त्या वसु शिशीहि राय आ भर॥ मदेमदे सोमपानेन हर्षे
सति ऋजुक्रतुः ऋजुकर्मा स इंद्रो नोस्मभ्यं गवां यूथानि ददिर्हि ददाति यूथा नादातास्वनुहि इंद्र स त्वं पुरू पुरूणि प्रभूतानि शता शतसंख्यानि अपरि
मितानीत्यर्थः वसूनि धनानि उभयाहस्त्या उभाभ्यां हस्ताभ्यां संगृभाय अस्मभ्यं दातुं संगृहाण शिशीहि अस्मान् तीक्ष्णीकुरु निशितबु
द्धियुक्तान् कुर्वित्यर्थः। रायो धनानि हस्तयोः स्थितानि आभर आहर प्रयच्छ ददिः दुदाञ् दाने। आदृगमहनजन इति किप्रत्ययः यथा तोष्टेद
सि बहुलमिति श्लोर्वपः। गवां सावेकाचस्तृतीयादिर्विभक्तिरिति गोश्वन्साववर्णेति प्रतिप्रतिषेधः। गृभाय ग्रह उपादाने क्र्यादिः छंदसि शायजपीति
श्नः शायजादेशः हृग्रहोर्भ इति भत्वं। उभयाहस्त्या उभयहस्तशब्दादुदात्तस्य तृतीयाद्विवचनस्य सुपां सुलुगिति याजादेशः अन्येषामपि
पि दृश्यत इति पूर्वपदस्य दीर्घत्वं। समासांतोदात्तत्वं उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। वसुसुपां सुलुगिति विभक्तेर्लुक्॥ शिशीहि शो तनूकर
णे बहुलं छंदसीति विकरणस्य श्लुः। आदेच उपदेशेऽशितीत्यात्वं ई हल्यघोरितीत्वं। बहुलं छंदसीत्यभ्यासस्येत्वं। इह हलमग्रहोत्वं घातोरीत्वं पादादित्वादनिघात
भावः। रायः ऊडिदमिति विभक्तेरुदात्तत्वं॥ ॥ अष्टमीमृचमाह॥ ॥ मादयस्व सुते सचा शवसे शूर राधसे॥ विद्मा हि त्वा पुरूवसुमुप कामान्ससृ
ज्महेथा नो विताभव॥ हे शूर शौर्यवन्निंद्र सुते सोमे अभिषुते सति आगत्य सचास्माकं सखा सन् मादयस्व तेन सोमेन तृप्तो भव किमर्थं शव
से बलार्थं राधसे अस्माकं धनार्थं च त्वा त्वां पुरूवसुं बहुधनं विद्मा हि जानीमः खलु अतः तोऽस्मदीयान् कामानसार्थं गच्छामि उपससृ
ज्महे हि त्वा पाशास्त्वत्कौतुकः अथानंतरं नोस्माकं अविता अभिलषितफलप्रदानेन रक्षिता भव मादयस्व मदतृप्तियोगे चुरादिर्णिजत्ते

पदी। अत्र पदं रुशत्पुमार्थं धातुकानुदात्तत्वेनिणत्त्वस्वरः शिष्यते। समस्तमेतत्पदं विसर्गं बहुलं छंदसीति विकरणस्य लुक्प्रत्ययाद्युदात्तत्वं। अत्रापि
शब्दानुषंगेण छंदस्यनेकमपि साकांक्षमिति निघातप्रतिषेधः॥ ॥नवमीमृचमाह॥ ॥एते त इंद्र जंतवो विश्वं पुष्यंति वार्यं॥ अंतर्हि ख्यो जनानामर्यो
वेदो अदाशुषां तेषां नो वेद आभर॥ ॥हे इंद्र ते तव स्वभूता एते जंतवो यजमानलक्षणा जना विश्वं सर्वं वार्यं सर्वैः संभजनीयं हविः पुष्यंति वर्धयंति।
आरूढ्पांह विपामाद्राम् एषां जनानां अंतर्मध्ये विद्यमानं वेदो धनं अर्यः सर्वेषां स्वामी त्वं ख्यो हि पश्य सिद्धितानामित्यर्थः। ने पाम यज्ञमानानां वेदो
धनं नोस्मभ्यं आभर आहर प्रयच्छेति यावत्। अयजमानं पुविद्यमानं धनं यागानुपयुक्तत्वात् व्यर्थमेव भवेत्। अतस्तस्य सार्थकत्वाय नदीयं धनम
प हृत्य यजमानेभ्यः प्रयच्छेति तात्पर्यार्थः॥ ख्यः ख्या प्रकथने अयं दर्शनार्थोपि वर्तमाने छंदसि लुङि अस्यतिवक्तिख्यातिभ्यो अंगिति च्लेः अतो लोप इ
ति वृत्त्याकारलोपः बहुलं छंदस्यमाङ्योगेपीत्यड्भावः हि चेति निघातप्रतिषेधः॥ ॥इति प्रथमस्य पंचमे द्वितीयो वर्गः॥ ॥उपो षु शृणु इत्यष्टर्चं नव
मं सूक्तं गोतमस्यार्षं मे इंद्रं त्यासु गतीं त्रायाः पंक्तयः अनुक्रांतं च। उपो पुषड् जगत्यंतमिति सूक्तं विनियोगो लैंगिकः॥ षोडशिशस्त्रे अपामु
पं दृशमित्यादिकं इंद्र शो च विनियुक्तं तो अथ षोडशीति खंडे सूत्रितं। उपो षु शृणुही गिरः सुसंदृशं त्वा वयं मघवन्निबंकाई वपंक्तीति॥ ॥तत्र प्रथ
मामृचमाह॥ ॥उपो षु शृणुही गिरो मघवन्मातथा इव॥ यदा नः सूनृतावतः कर आदर्थयास इद्योजान्विंद्र ते हरी॥ ॥हे मघवन् धनवन्निंद्र गिरः
अस्मदीया स्तुतीरु पो उ पेव समीपे शृणु हि उपगत्य सम्यक् शृणु अनथा इव इतरे यथा विधर्म तथा दिपरीतो माभूः असमास पूर्वं यथा अनुग्रह बुद्धि
युक्ताः तथा विधः एव भावेत्यर्थः अपि च नोस्मान् सूनृतावतः प्रिय सत्यात्मिका भिर्वाक्सूनृता तया स्तुतिरूपया वाचा वायुक्तान् यदा कदा करोषि अ
त अनंतरं त्वमपि अर्थयासे इत् अर्थयसे एव तथा च स एव तादृश्ये अस्माभिः प्रयुक्तयाः स्तुतीः त्वमपीस्वी करोषीत्यर्थः। आ ते इंद्र इत्ते हरी तदीया
वश्वौ नुक्षिप्रं योजय रथे योजय शृणु हि उत श्च प्रत्ययाच्छंदसी वचनमिति र्वचनात् उत्वश्व प्रत्ययादिति हेर्लुग् भावः अनथा इवत थे वाचरति तथ
ति सर्वप्रातिपदिकेभ्य इत्येक इति क्विप् तथा तर प्रत्ययः न तथा इव अनथा इव अव्ययपूर्व पद प्रकृतिस्वरत्वात्। इकार करणे लुङि एकस्य इति च्लेः
सीति न गुरुण इत्यः नुनु अङः सतिशिष्टत्वात्तस्वरेणोदात्तत्वेन भावित्वं तदिति क्लिक्यंत्ययेन अप नुनु कृत्रं करण इति भूपादित्वं अने अनायप
यः कृ स्मात्त्रियते चतनें यस्मात् स्य धातोरत्र पाठो अनार्षः तथा हि कृञ् करणे तथा च यदाहनुर्न्यासकारहरदत्तौ। अत्रयेन ग्राहितैन समाद
स्य धातो भूवादिपाठो नास्तीति गम्यते वृत्तय परिपरस्तव करिष्येवमादिरूपाणि प्यर्थेन सृज इति भ्यश्शृं इति कृतोरे कृ विधान मनर्थकं समान अ
र्यत्वाद्धि अपि अन्यस्य स्पर्यमित्युक्तत्वदुभि रर्थभेदात् इ त इ प सिद्धेय कर्तव्यमङ् विधानमिति चेतन छंदसि लुङ् लङ् लिट इति लुङ्गदीनामकृत्रिया
नेनार्थ तेश भावादित्य नेन प्रकारेणास्मभिधातुरतो वयं धातुर्निराकृत अतो अस्य यत्न निमित्तं। अर्थयासे। अर्थ योजायां चुरादिराहित्वनेप
दीलेश्याद्यागमः योजय छिर्यास्ये व्यंता लोडिके रूपस्य योतिडाप आर्ध धातुकत्वाच्चेरनिटीति णिलोपः तत्तस्मिन्नति संहितायां दीर्घतं॥
॥ ॥द्वितीयामृचमाह॥ ॥अक्षन्नमीमदंत ह्यव प्रिया अधूषत॥ अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विंद्र ते हरी॥ ॥हे इंद्र त्वया दत्तम
न्नं अक्षन् यजमाना भुक्तवंतः भुक्त्वा च अमीमदंत हि इतरं तृप्ता आसन् प्रियाः स्वकीयाः तनूः अव अधूषत अकंपयंत तो अतिशयेन रसास्वादने
नवकुमन्यकुर्वंतः शरीराण्यकंपयंत तदनंतरं स्वभानवः स्वायत्तदीप्तयः विप्रा मेधाविनः स्तोतारः नविष्ठया नवतमया स्तुत्या अस्तोषत अस्तुवन्।

भ्यत्न पूर्वं वचनेभ्यः। अक्षन् अदेर्लुङि सनोर्घस्लृ इति घस्लादेशः मंत्रे घसेत्यादिना च्लेर्लुक् गमहनेत्यादिनोपधालोपः खरि चेति चर्त्वं शासिवसिघसी
नां चेति षत्वं। अडागम उदात्तः। अमीमदंत मदतृप्ति योगे णिजन्तात्मनेपदे लुङि चङि णिश्रिद्रुस्रुभ्य इति च्लेश्चङ् इत्यादि प्रतिषेधः। अधूषत धूञ् कंपने
धोपधात्वलक्षणाभावस्त्वत्र स्वरदीर्घ अधूषत धूञ् कंपने लुङि सिचि स्वरत्ययेन गुणाभावः यद्वा छंदस्युभयथेति सिचः सार्वधातुकत्वेन ङि
त्वात् क्ङिति चेति गुणप्रतिषेधः। अथवा धूञ् विधूनने तौदादिकः कुटादिकः अस्मात् गाङ्कुटादिभ्य इति सिचो ङित्वात् गुणाभावः। नच धूञ्कुटा
गाङ्कुटादिभ्य इति सिचोङित्वात् गुणाभावः। नविष्ठया नवशब्दात् अतिशयनार्थे इष्ठन् प्रत्ययः। टेः अवस्थानं स्वाभाविकं तस्मात्पूर्वस्य अ
कारस्य लोपः मतौ मयां सतु गतिबन्तया पूर्वसवर्णदीर्घत्वं मंत्रेषु पचेये मन्त्रति किं नु उदात्तत्वं। महापितृ यज्ञसंदर्शनमित्युपजात्वनो
अंसमंदृशं त्वेतियं न्यति॥ ॥तामेतां सूक्तं तृतीयामृचमाह॥ ॥सुसंदृशं त्वा वयं मघवन्वंदिषीमहि॥ प्र नूनं पूर्णवंधुरः स्तुतो याहि वशाँ अनु योजान्वि
द्रते हरी॥ ॥हे मघवन्निंद्र सुसंदृशं सुष्ठु अनुग्रहदृष्ट्या सर्वद्रष्टारं त्वां वयं वंदिषीमहि स्तवाम हि स्तुतिकर्तारो भूयास्मेत्याशास्यते। अस्माभिर्वा अभि
ष्टुत स्त्वं पूर्णवंधुरः स्तोतृभ्यो देयैर्धनैः पूरितेन रथेन युक्तः सन् वशान् कामयमानान् अस्मान् अन्यान्यजमानान् प्रति नूनं प्रयाहि अवश्यं प्रतिगच्छ योजेत्या
दि पूर्ववत्। वंदिषीमहि वदि अभिवादनस्तुत्योः आशीर्लिङ् आशिषिति तस्यार्धधातुकत्वेन लसार्वधातुकस्वराभावे प्रत्ययाद्युदात्तत्वं मघवन्
त्यस्यामंत्रितं पूर्वं मविद्यमानवत्वे सति पादादित्वान्निघाताभावः॥ ॥चतुर्थीमृचमाह॥ ॥स घा तं वृषणं रथमधि तिष्ठाति गोविदं॥ यः
पात्रं हारियोजनं पूर्णमिंद्र चिकेतति योजान्विंद्र ते हरी॥ ॥स घास घैवाविंद्रः वृषभं कामाभिवर्षिणं गोविदं गवां लंभयितारं तं रथं अधितिष्ठ
ति हे इंद्र रथं अधितिष्ठत आरूढो भवतु। हे इंद्र यो रथः हारियोजनं एतत्संज्ञकं धानाभिः श्रितं पूर्णं सोमेन पूर्णं पात्रं चिकेतति ज्ञापयति तं रथं
अधितिष्ठ पूर्वेणान्वयः। अधितिष्ठाय च तादृशीया अश्वौ क्षिप्रं योजय युक्तावितु नु घा तदीर्घः रथं अधितिष्ठति स्थासां कर्मत्वाधिकरणस्य कर्मसंज्ञा
तिष्ठाति च लेट्याडागमः चिकेतति कित ज्ञाने लेट्याडागमः। जुहोत्यादित्वात् श्लुः बहुलं छंदसीति विकरण्यमिति वचनात् नाभ्यस्तस्याचि पि
ति तिङ् लघूपधगुणप्रतिषेधो न भवति॥ ॥पंचमीमृचमाह॥ ॥युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो॥ तेन जायामुप प्रियां मंदानो
याह्यंधसो योजान्विंद्र ते हरी॥ ॥हे शतक्रतो बहुकर्मन्निंद्र तावदीय रथे दक्षिणः दक्षिणपार्श्वस्थो अश्वो युक्तोस्तु उत अपि च सव्यः वामपार्श्वस्थो
पि युक्तास्तु तेन रथेन अंधसः सोमलक्षणस्यान्नस्य पानेन मंदानो मत्तः सन् प्रियां प्रीणयित्रीं जायां सहिसा यत्र वर्तते तत्र गच्छेत्यर्थः। तदर्थं
हे इंद्र तदीयावश्वौ रथे क्षिप्रं योजय। अनयोर्ऋचा स्यावर्धात सोमस्येंद्रस्य स्वगृहं प्रति प्रस्थानं प्रतिपाद्यते मंदानः मदि स्तुति मोद मद स्वप्नकां
तिगतिषु लिटः कानच् बहुलं छंदसीति वक्तव्यमिति द्विर्वचनाभावः अंधसः अदभक्षणे अदेर्नुम् धश्चेत्यसुन् धातोर्नुमाग
मो धकारांतादेशश्च। अंतघृतः मन्त्रेषु योजनस्य युनज्मीत्येषा यात्यासृष्ट्रितं च। युनज्मि ते ब्रह्मणा केशिना हरी इति याज्यानुवाक्यं अंत्यमु
हृच्चेति॥ ॥तामेतां सूक्तं षष्ठीमृचमाह॥ ॥युनज्मि ते ब्रह्मणा केशिना हरी उप प्र याहि दधिषे गभस्त्योः॥ उत्वा सुतासो रभसा अमंदिषुः पूष
ण्वान्वज्रिन्त्समु पत्न्यामदः॥ ॥हे इंद्र केशिना केशयुक्तौ शिखावन्तौ ते हरी त्वदीयावश्वौ ब्रह्मणा स्तोत्ररूपेण युनज्मि रथे संयोजयामीति नेर
थेन उप प्रयाहि। वदृह मुपगच्छ गभस्त्योः बाह्वोर्नामैतत् बाह्वोः अश्वबंधकान् रश्मीन् दधिषे धारयस्व वा त्वां सुतासो यज्ञमिषुताः सोमाः

309
1924

रभसाः वेगवंतान्नीआःक्षिप्रामस्कारिण इत्यर्थः। इदमिंद्रिषुः उल्कुसम इयुक्तम कार्षुः हे वज्रिन अतस्त्वं इंगता पूषण्वान अत्र पूषणशब्दः पुंसो
वर्तते पुष्टिर्वै पूषा पुष्टिमेवावरुंधे इति श्रुतेः। सामपानजनितया पुष्ट्या युक्तः सन् इत्यस्य भार्यायाम इसमु अमरः संभृगवतसा भवक द्रि
नाकं शब्दात् मर्त्वार्थे इनिः। सुपां सुलुगिति विभक्तेराकारः रभसाः अर्थ आदित्वाद्व भसंदिशुः व्यत्ययेन परस्मैपदं। पूषण्वान पूषपूषे
श्चन्तुक्षन्नित्यादौ पूषन्निति निपात्यते। तत्रात्र भावसाधनं द्रष्टव्यं पूषा अस्यास्तीति पूषण्वान मादुपधायाश्चेति मतुपो वत्वं नलोपे भ
नो मुडिति नुडू ह्रस्वनुड्भ्यां मतुप इत्यमितुपउदात्तत्वं। अमरः मदी हर्षे छंदसि लुङ् लिङ इति प्रार्थनायां लुङ् इरयनि प्राप्ते व्यत्ययेन शपइति
प्रथमस्य षष्ठे तृतीयो वर्गः॥ ॥ अश्वावतीति षळृचं दशमं सूक्तं गोतमस्यार्षमैंद्रं जागतं तथा चानुक्रांतं॥ अश्वावति जागतमिति॥
अतिरात्रे तृतीयपर्याये ब्राह्मणाछंसिशस्त्र इदं सूक्तं सूत्रितं च॥ अश्वावति प्रोग्रांपीतिं वृष्ण इयर्मि सत्यामिति याज्यांति॥ ॥तत्र प्रथ
मामृचमाह॥ ॥ अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिंद्र मर्त्यस्तवोतिभिः॥ तमित्पृणक्षि वसुना भवीयसा सिंधुमापो यथाभितो
विचेतसः॥ ॥ हे इंद्र यो मर्त्यो मनुष्यः तव ऊतिभिः त्वदीयैः रक्षणैः सुप्रावीः सुष्टु प्ररक्षितो भवति। स मर्त्यः अश्वावति बहुभिरश्वैर्युक्ते प्र
देव वर्तमानः गोषु प्राप्तव्येषु प्रथमो गच्छति सर्वेभ्यो यजमानेभ्यः पूर्वमेव गोमान् भवतीत्यर्थः। तं तमित् तमेव पुरुषं भवीयसा बहुतरेण
भवित् तमेन वा ज्ञातम हस्त्यादि संख्या युक्तेन वसुना धनेन पृणक्षि संयुक्तं संपूर्णं करोषि तत्र दृष्टांतः। विचेतसः विज्ञिष्टज्ञानहेतुभूता आ
पो यथा अभितः सर्वासु दिक्षु सिंधुं समुद्रं पूरयंति तद्वत् अश्वावति मंत्रे सोमाश्वेतिमतौ दीर्घत्वं। सुप्रावीः अवितृस्तृतंत्रिभ्य ईरिति वचने
ईकार प्रत्ययः ऊतियूतीत्यादिना क्तिन उदात्तत्वं। पृणक्षि पृची संपर्के रुधादिभिः। भवीयसा बहुशब्दादीयसुनि बहोर्लोपो भू च बहो
रिति बहुशब्दस्य भूभावः ईयसुन ईकारलोपश्च अन्तुर्छांदसत्वादि कालोपेनाक्रियते भूभावश्च क्रियते। अथवा भविनृशब्दात् तुश्छं
दसीतीयसुन। तुरिष्ठेमेयःस्विति तृलोपः॥ अपोनप्त्रीये होतृचमसेदः पूर्यमाणे अपो न देवीरित्येषानुवत्त्या। सूत्रितं च॥ अपोन
देवीरुपयंतीति होत्रियमिति समाप्येति। ब्राह्मणे चा आपो देवीरुपयंति होत्रियमिति होतृचमसे समवनीयमानास्वन्वाहेति॥
तामेतां सूक्ते चतुर्थीमृचमाह॥ ॥आपो न देवीरुपयंति होत्रियमवः पश्यंति विततं यथा रजः॥ प्राचैर्देवासः प्रणयंति देवयुं ब्रह्मप्रियं जोषयंते च
राइव॥ होत्रियं होतुः स्वभूतं चमसं देवीर्दीप्यमानाः आपो न यथा आपः उपयंति उपगच्छंति तद्वत् पवित्वर्तमानादेवाः एतमेव चमसं भवः
अवस्तात्पश्यंति होतृचमसे अस्माकं सोमाभिषवायापः प्रसिक्ता इति तेषां दृष्टिरस्मिन् संलग्ना भूतेत्। ॥तत्र दृष्टांतः। विततं विस्तीर्णं रजो ज्योतिः
सूर्यसंबंधि यथा निरंतरमवस्थानपत्पतति तद्वत्। देवयुं देवान् कामयमानमेतं चमसं प्राचैः प्राचीनं यद्वा प्रांचैः प्रगमनैः उत्तरवेदिं विस्तीर्णे
ज्योतिः ... अभिमुखं होमकाले प्रणयंति होमार्थं प्रणीतं ब्रह्मप्रियं ब्रह्मणा सामलक्षणेनाभिप्रीतं संतं संप्रणितमित्यर्थः॥ जोषयंते सर्वे देव
स्तं चमसं सेवंते चराइव कन्यकाः यथा वराः मम एषा भविष्यति मम इयं भविष्यतीति तत् कन्यकां सेवंते एवं देवा अपि मम अयं सोमो मम अयं सोमइत्य १५७
स्य पार्श्वे वर्तंत इत्यर्थः। एवमपोनप्त्रीयविनियोगानुसारेण योजितं मंत्रस्यानुष्टुप्यार्थं प्रकाशते न यद्वात् रात्रि पर्याय स्याविनियोगाः तदा ते व्
याख्येयं। हे इंद्र देव्या अप्रो यथा निम्नदेशं उपगच्छति एवं देवास्त्वदीयं स्तोत्रं शुश्रूषमाणाः ज्योत्रिं तं होतृसंबंधि धिष्ण्यास्थानं उपगच्छति उपग

च्छंच अवस्तात्पश्यंति विततं ज्योतिरिव देवयुं देवानात्मन इच्छंतमेतं शंसितारं आगताः सर्वे देवाः प्राचीनं प्रणयंति अयतोधारयंति ब्रह्मप्रियं स्तोत्रप्रियं तोतं
संतं तं च यः कन्यका इव त्वयं तो होत्रियं होतृशब्दात् तस्येदमर्थे घस्प्रत्ययः। अवः पूर्वां धरावराणामसि पूरुधवश्वे पामित्यादि प्रेष्यंतांतः प्राचैः
इंद्रेन्देवेतिति वक्ष्यमाणे यद्वाप्र पूर्वादंचतेर्य ... सुकार्विधानं लास्त्वापाद्य विहानि युध्यर्थमिति परिगणस्योपलक्षणार्थत्वात् भावेकप्रत्ययः। अनि
दितामिति नलोपः स्रोपयंते जुषी प्रीतिसेवनयोः स्वाज्ञानः प्रयोज्यताद्धेतुमतिणिच्॥ ॥प्रचर्याभिप्रवे अधिद्रवोरित्येषाध्रुवकमितिखंडेस
त्रितं अधिद्रवोरदंधाउक्थ्यं वचः शक्कृतेअन्य यज्ञतंतं अन्यादितिहविर्धानप्रवर्तनं प्रैषां सूत्रितं च॥ यमइच यतमानस्यदंतमधिद्रवोरदधाउक्थ्यं
वच इत्यर्थं आरभेति॥ ॥तामेतां सूक्ते तृतीयामृचमाह॥ ॥अधिद्वयोरदधा उक्थ्यं वचो यतस्रुचा मिथुना या सपर्यतः॥ असंयत्तो व्रते ते क्षेति पुष्य
ति भद्रा शक्तिर्यजमानाय सुन्वते॥ ॥हे इंद्र द्वयोर्हविर्धानयोः उक्थं उक्थशस्त्रं ... योगं वचः युजे वामित्यादिमंत्ररूपं वचनं अध्वर्यवः निहितवानसि
ननु हविर्धानयोरीयोः वचांसि धीयंते उत्याशंक्य ब्राह्मणेनैवं व्याख्यातं। अधिद्वयोरदधाउक्थ्यं वच इति द्वयोर्ह्येतत्तृतीयं छदिरधिनिधीयत उक्थ्यं
य च इति यदाह यज्ञियं वै कर्मोक्थं वचो यज्ञमेवैतेन समर्धयतीति। तत्र यथा हविर्धानयोः द्वयोः छदिरधि ... वंसा भ्रमप्सु भ स्यारेव
इति नो मयज्ञसंबंधिशस्त्रं तदौग्यं वचनमधिपतिं यं कर्म तस्य यज्ञरूपयोर्हविर्धानयोरर्थं तत्संपादनायाधि निधाना यज्ञीयसमृद्धो भवति।
कीदृशयोर्हविर्धानयोः यतस्रुचा यताः संयताः स्रुचः स्रुक् चमसादिलक्षणादिलक्षणानि पात्राणि ययोः ते मिथुना युगलरूपेण वर्तमानया
या हविर्धानद्वयं सपर्यतः तयोरित्यर्थः। किंच हे इंद्र हविर्धानयुक्तो यजमानः असंयत्तः शत्रुभिः सह युद्धार्थमनभिगतः सन् तव व्रते त्वदीये क
र्मणि क्षेति निवसति पुष्यति च प्रजया पशुभिश्च पुष्टो भवति सुन्वते। त्वदीये योगे सोमाभिषवं कुर्वते यजमानस्य भद्रा कल्याणी शक्तिः
शक्तिः ... बलं भवति एतत्सर्वं हविर्धानयोः उक्थस्य वचसोभिधाने न लभ्यतइत्यर्थः। यतस्रुचा यम उपरमे निष्ठायामनुदात्तोपदेशेत्यादिना
अनुनासिकलोपः बहुव्रीहौ पूर्वपद प्रकृतिस्वरत्वं। इदमादिषु पदेषु सुपां सुलुगिति विभक्तेराकारः। सपर्यतः सपर पूजायां कंड्वादिभ्योयक्॥
अदुपदेशाल्लसार्वधातुकानुदात्तत्वे तस्यैव स्वरः शिष्यते। क्षेति क्षि निवासगत्योः बहुलं छंदसीति विकरणस्य लुक्। सुन्वते षुञ् अभिषवे चतुर्थी
बहुवचनं ... चतुर्थ्याः नुम्नम इति विभक्तेरुदात्तत्वं॥ ॥चतुर्थीमृचमाह॥ ॥आदंगिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया॥ सर्वं
पणेः समविंदंत भोजनमश्वावंतं गोमंतमापशुं नरः॥ ॥यदा पणिभिर्गावो पहृतास्तदानीं अंगिरा अंगिरसः प्रथमं पूर्वं अन्नतः वयोहि
विर्लक्षणमन्नं दधिरे इंद्रार्थं संपादितवंतः आत अनंतरं ता इदं शायं इंद्राय अंगिरसः इद्धाग्नयः प्रज्वलिताग्नियुक्ताः संतः सुकृत्यया शोभ
नकरणोपेतया शम्या कर्मणा शोभनेन याग नेंद्र मयज्ञन्नितिशेषः तेन तेयज्ञस्य नेतारोंगिरसः पणेः एतन्नाम्नो सुरस्य संबंधि सर्वं भोज
नं समविंदत समलभंत कीदृशं अश्ववंतं अश्वैर्युक्तं गोमंतं गोभिर्युक्तं। आकारः समुच्चये गवाश्वव्यतिरिक्तमन्यसर्वं जातं च ससंविंदत। अंगि
राः सुपां सुलुगिति ससः सुः। शम्या शमी तिकर्मनामशाम्यत्यनया क्रियया दोपजात मिति डार्मीकरणे घञ्नोदात्तोपदेशस्येति मान्तस्याचमारि
ति वृद्धिप्रतिषेधः। गौरादित्वात् ङीप्। व्यत्ययेनान्तोदात्तत्वं सुकृत्यया शोभनं कृत्यं करणं यस्याः सा तथोक्ता नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥
॥ ॥पंचमीमृचमाह॥ ॥यज्ञैरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि॥ आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजाम
हे॥

311
1924

भा॰ प्र॰
१५८

पणिभिरपहृतासु गोषु अथर्वा एतन्नामक ऋषिः यज्ञैः इंद्रदेवत्यैरनुष्ठितैर्यागैः पथः गोसंबंधिनो मार्गान् प्रथमस्तते सर्वेभ्य ऋषिभ्यः पूर्वमेवच
तवानित्यर्थः। ततस्तदनंतरं व्रतपाः व्रतानां कर्मणां पालयिता वेनः कांतः सूर्यः सूर्यरूप इंद्र आजनि गवां प्रदर्शनाय आविरभूत।
ततोऽथर्वणा ता गा आजत। आभिमुख्येन प्रापितवान्। तादृशस्येंद्रस्य काव्यः कवेः पुत्र उशना भृगुः सचा असकृन्निरसनाय सहायो भूत् यमस्य
भास्कराणां नियमार्थं जातं प्रादुर्भूतं अमृतं मरणरहितं तमिंद्रं यजामसे हविर्भिः प्रजायामः। पथः भस्य टेर्लोप इति टिलोपः उशनेति
छंदसि स्वरेण विभक्तेर् डादेशः। ततं तनु विस्तारे बहुलं छंदसीति विकरणस्य लुक् अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः। अजनि जनि
प्रादुर्भावे दीपजनबुधेत्यादिना कर्तरि लुङि च्लेश्चिण्। आजत। अज गतिक्षेपणयोः॥ ॥षष्ठीमृचमाह॥ ॥बर्हिर्वा यत्स्वपत्याय वृ
ज्यते अर्को वा श्लोकमाघोषते दिवि॥ ग्रावा यत्र वदति कारुरुक्थ्यस्तस्येदिंद्रो अभिपित्वेषु रण्यति॥ ॥स्वपत्याय शोभनापत्यजननहेतु
भूताय कर्मणि बर्हिर्वा यद्यदा वृज्यते छिद्यते अध्वर्युणा यागार्थमाक्रियते अर्को वा स्तोत्रनिष्पादको होता वा श्लोकं स्तुतिरूपं वाचं दि
वि द्योतमाने यज्ञे यदा आघोषते उच्चारयति तस्मिन्काले ग्रावा अभिषवार्थं प्रवृत्त उपलः यदि वदति शब्दं करोति। तत्र दृष्टांतः। कारुः
स्तुत्य उक्थ्यप्रमतेन उक्थ्यस्य शस्त्रस्य शंसिता कारुः स्तोता कारुः यथा अभिमतं शब्दं करोति तद्वत्। तस्य पूर्वोक्तस्य सर्वस्य अभिपित्वेषु
अभिप्राप्तिषु इंद्रो रण्यति रमते यद्वा पूर्वोक्तानां बर्हिरादीनां अभिप्राप्तिषु सतीषु इंद्रो रण्यति अस्मादीयो यागो भविष्यतीति शब्दं
करोति वृज्यते। वृजी वर्जने अदुपदेशात् सार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते निपातैर्यद्यदिहंतेति निघातप्रतिषेधः।
अघोषते घुषिर विशब्दने भौवादिकः अत्रापि यद्वृत्तस्य निपातस्यानुषंगान्निघाताभावः रण्यति रमु क्रीडायां व्यत्ययेन श्यन परस्मै
पदं च अंत्यविकारश्छांदसः यद्वा रण शब्दार्थः व्यत्ययेन श्यन॥ ॥इतिप्रथमस्य पंचचतुर्थो वर्गः॥ ॥असावीति विंशत्यृचमेकादशं सू
क्तं अत्रानुक्रम्यते॥ असावि विंशतिः षळनुष्टुभः द्विपदा पंक्ति गायत्र्यस्त्रिष्टुभास्तृचाः प्रगाथ इति। आद्याः षडनुष्टुभः। सप्तम्याद्यास्तिस्र
उष्णिहः। दशम्याद्यास्तिस्रः पंक्तयः त्रयोदश्याद्यास्तिस्रो गायत्र्यः षोडश्याद्यास्तिस्रस्त्रिष्टुभः। एकोनविंशी बृहती विंशी सतोबृहती
अनुवर्तनाद्गोतमऋषिः॥ अनादेशपरिभाषया इंद्रो देवता सूक्तविनियोगो लिंगादवगंतव्यः। अतिरात्रे षोडशिशस्त्रे आद्यास्तृचः
स्तोत्रियानुरूपाः सूत्रितं च। अथ षोडशस्य सोमाः इंद्र इंद्र इति स्तोत्रियानुरूपाविति आभिप्लविके पृष्ठ्ये तृतीयसवने छावाकस्य इमा
मंच बोपकल्पिके स्तोत्रियानुरूपा गृहाण्विति खंडे सूत्रितं॥ असावि सोम इंद्र ते इमम् इंद्र सुतं पिबेति॥ ॥तत्र प्रथमामृचमाह॥ ॥
असावि सोम इंद्र ते शविष्ठ धृष्णवा गहि॥ आ त्वा पृणक्त्विंद्रियं रजः सूर्यो न रश्मिभिः॥ ॥हे इंद्र ते त्वदर्थं सोमः असावि अभिषुतो भ
त। हे शविष्ठ अतिशयेन बलवन् आत एव धृष्णो शत्रूणां धर्षितः इंद्र आगहि इदं च यज्ञं देशमागच्छ आगतं च त्वां इंद्रियं सोमपानेन १५८
जनितं प्रभूतं सामर्थ्यं आपृणक्तु आपूरयतु। रजः लोकं रश्मिभिः किरणैः सूर्यो न यथा सूर्यः पूरयति तद्वत्। शविष्ठ बलवच्छ
ब्दादिष्ठनि विन्मतोर्लुक् टेरिति टिलोपः पादादित्वान्निघाताभावः गहि गमेर्लोटि बहुलं छंदसीति शपो लुक् अनुदात्तोपदेशेत्यादिनानु
नासिकलोपः। तस्यासिद्धत्वे हेर्भावादित्यसिद्धवत्त्वेन हेर्लुगभावः॥ ॥ ॥द्वितीयामृचमाह॥ इंद्रमिद्धरी वहतोऽप्रतिधृष्टशवसं॥ ऋषीणां च

स्तुतीरुप यज्ञं च मानुषाणां॥ ॥अप्रतिधृष्टशवसं केनाप्यप्रतिधर्षितबलं अहिंसितमित्यर्थः। इंद्रमित् इंद्रमेव ऋषीणां वसिष्ठादीनां मानुषाणां अन्येषां
मनुष्याणां स्तुतीर्यज्ञं च हरी अश्वौ उपवहतः समीपं प्रापयतः यत्र यत्र स्तुतिर्यत्र यत्र यज्ञस्तत्र सर्वत्रेंद्रमश्वौ प्रापयत इत्यर्थः। मानुषाणां मनोर्ज
ताविति मनुशब्दादत्र षुगागमश्च॥ ॥तृतीयामृचमाह॥ आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी॥ अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना॥ हे वृत्र
हन् शत्रूणां हंतरिंद्र रथमातिष्ठ आरोह यस्मात् हरी त्वदीयावश्वौ ब्रह्मणा स्तोत्रलक्षणेन मंत्रेण युक्ता रथे अस्माभिर्योजितौ तस्मात् रथमातिष्ठेति
मनः त्वदीयं मनश्च ग्रावा अभिषवार्थं प्रवृत्तः पाषाणः वग्नुना वग्नीयेनाभिषवशब्देन अर्वाचीनं अस्मदभिमुखं सुकृत्सु सुष्ठु करोतु। युक्ताः
सुपां सुलुगित्याकारः वग्नुना वदिगमेश्चेति नुप्रत्ययः गकारश्चांतादेशः॥ ॥चतुर्थीमृचमाह॥ ॥इममिंद्र सुतं पिब कीदृशं ज्येष्ठं अति
शयेन प्रशस्यं मदं मदकरं अमर्त्यं अमारकं सोमपानजन्यो मदो मरणांतरवन्मारको न भवतीत्यर्थः। तथा ऋतस्य यज्ञस्य संबंधिनि सदने गृहे व
र्तमानः शुक्रस्य दीप्तस्यास्य सोमस्य धाराः त्वामभ्यक्षरन् अभिमुखेन संचलंति त्वां प्राप्नुवंतीत्यर्थः। ज्येष्ठं प्रशस्यशब्दादिष्ठनि
ज्य चेति ज्यादेशः। अक्षरन् क्षर संचलने छांदसो लुङ्॥ ॥पंचमीमृचमाह॥ ॥इंद्राय नूनमर्चतोक्थानि च ब्रवीतन॥ सुता अमत्सुरिंदवो ज्येष्ठं न
मस्यता सहः॥ ॥हे ऋत्विजः इंद्राय नूनं क्षिप्रं अर्चत पूजनं कुरुत। एतदेव स्पष्टीक्रियते। उक्थानि अप्रगीतमंत्रसाध्यानि स्तोत्राणि च ब्रवीत
न। ब्रूत। सुताः अभिषुता इंदवः सोमाश्च अमत्सुः आगतमेनमिंद्रं मत्तं कुर्वंतु अनंतरं ज्येष्ठं प्रशस्यं मतमं सहः सहस्विनं बलवंतमिंद्रं नमस्य
त नमस्कुर्वंत। ब्रवीतन ब्रवीतेर्लोटि तप्तनप्तनथनाश्चेति तनबादेशः। अमत्सुः मदी हर्षे छांदसः प्रार्थनायां लुङ्। आगमानुशासनस्यानि
त्यत्वादिडभावः। नमस्यत नमोवरिवश्चित्रङः इति क्यच् सहः उगकाररेफाश्च वक्तव्या इति मतोर्यस्य लुक्॥ ॥इतिप्रथमस्य पंचपंचमो
वर्गः॥ ॥षष्ठीमृचमाह॥ ॥नकिष्ट्वद्रथीतरो हरी यदिंद्र यच्छसे॥ नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे॥ ॥हे इंद्र यद्यस्मात्त्वं हरी एतत्संज्ञावश्वौ
यच्छसे रथे योजयसि तस्मात्त्वत्तोऽन्यः कश्चिद्रथीतरः अतिशयेन रथवान् नकिर्नास्ति अन्येषामीदृगश्वयुक्तरथाभावात् त्वा त्वामनु मज्मना
बलेनापि नकिरनु बलेन सदृशोऽपि न विद्यते। स्वश्वः शोभनाश्वोऽन्यश्च त्वां नकिरानशे न प्राप इंद्रस्य बलाश्वयोरसाधारणत्वात्सदृशो बलवानश्ववा
न्लोके कश्चिदपि नास्तीत्यर्थः। नकिः नूने। युष्मतत्ततक्षुष्वंतः पादमिति षत्वं। रथीतरः अतिशयेन रथी तरपि ईद्रथिनः इतीकारांतादेशः। अनुयह
समर्यादसंहत्वं। यच्छसि यमो गंधन इत्यात्मनेपदं स्वश्वः बहुव्रीहौ आद्युदात्तं स्वांगं द्वयसीमुत्तरपदादात्तत्वं। आनशे अश्नोतेश्च इति अ
भ्यासादुत्तरस्य नुट्॥ आभिप्लविके एषु तृतीयसवने ब्राह्मणाच्छंसिनाय एक इद्विदयत इति। वैकल्पिकस्तोत्रियस्तृचः। एषु विहितिस्त्वं इति सूत्र
तं सस्वाथ आविश्वामलीयसे एक इद्विदयत इति महाव्रतेऽपि निष्केवल्ये आमिहत्वचा नीता वयं तदा विनियुक्तः तथैव पंचमारण्यके सूत्रितं॥
य एक इद्विदयत आयाक्षादिभिः सप्तमिति तच्च प्रथमा सप्तमीमृचमाह॥ ॥य एक इद्विदयते वसु मर्ताय दाशुषे॥ ईशानो अप्रतिष्कुत इं
द्रो अंग॥ ॥यइंद्रः एक इत् एक एव दाशुषे हविर्दत्तवते मर्ताय मनुष्याय यजमानाय वसु धनं विदयते विशेषेण ददाति। अंग इति क्षिप्रनाम
अप्रतिष्कुतः प्रतिकूलशब्दरहित इत्यर्थः एवंभूतः स इंद्रः क्षिप्रं ईशानः सर्वस्य जगतः स्वामी भवति विदयते दय दानगतिरक्षणहिंसादा
नेषु ऽयः पिल्वादनुदात्तेति ऽश्चेन सार्वधातुकस्वरेण धातुस्वर एव शिष्यते। यद्वृत्तयोगादनिघातः। अप्रतिष्कुतः कुशब्दे प्रतिकूलकाय

313
1924

तन्नाश्न तद्दति प्रतिष्कुतः पारस्करादेराकृतिगणत्वात् सुडनुषामादित्वात्षत्वं । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ ॥अष्टमीमृचमाह ॥ कदा म
र्तमराधसं पदा क्षुंपमिव स्फुरत् ॥ कदा नः शुश्रवद्गिर इंद्रो अंग ॥ ॥आराधस्त्वं हविर्लक्षणेन राधसा धनेन रहितं अयष्टारमित्यर्थः । एवंविधं
मर्तं मनुष्यं इंद्रः पदा पादेन क्षुंपमिव अहिछत्रकमिव कदा स्फुरत् स्फुरिष्यति । यथाहि अहिछत्रकं उत्काकारेण ... कश्चित्पादाघातेन हं
ति एवमिंद्रोपि कदास्मच्छत्रून् हनिष्यतीत्यर्थः स्फुरितिर्वधकर्मा स्फुरति स्फुलतीति वधकर्मसु पठितत्वात् । अस्माकं पदुः गिरः स्तुतिलक्षणा
वाचः इंद्रः कदा कस्मिन्काले अंग क्षिप्रं शुश्रवत् श्रोष्यतीति वितर्क्यते अंगेति निरुक्तं क्षिप्रमहि ... भवतीति तत्रोक्तं । कदा मर्तमराधसं
धसं पादेन क्षुंपमिवास्फुरिष्यति कदा नः शुश्रूषते गिर इंद्रो गां वाति क्षिप्रनामेति । पादः पादः ... पदन्नित्यादिना पादादेशः के उदिदंश
तिविभक्तेरुदात्तत्वं । क्षुंपमित्यत्र क्षुभ संचलने । अस्मात् कर्मणि घञि बहुलवचनात् नुमागमं वर्णव्यापत्त्या भकारस्य पकारः । स्फुरत
स्फुर संचलने । छंदसि लुङ्लङ्लिट इति लुङ् । थे लुङ् बहुलं छंदस्यमाङ्योगेपीत्यडभावः । शुश्रवत् श्रुश्रवणे लुङि ... बहुलं छंदसीति श
पः श्लुः ॥ ॥नवमीमृचमाह ॥ ॥ यश्चिद्धि त्वा बहुभ्य आ सुतावां आविवासति ॥ उग्रं तत्पत्यते शव इंद्रो अंग ॥ ॥ बहुभ्यो मनुष्येभ्यः सका
शात् यश्चिद् य एव खलु यजमानः सुतावान् अभिषुतसोमयुक्तः सन् हे इंद्र त्वा त्वामाविवासति परिचरति विवासतिः परिचरणकर्मा तस्मै यजमाना
य यदुग्रमुद्गूर्णं शवो बलं इंद्रः अंग क्षिप्रं पत्यते पातयति प्रापयति । ततस्तपांसि लुगागमश्च तुर्थ्यालुक् पत्यते पत्लृ गतौ । अस्मादंतर्भावितण्यर्था
द्व्यत्ययेन श्यन् । चातुर्विंशिके दशनिमाध्यंदिने सवने काकुभस्य स्वादोरित्था विषूवत इति पञ्चस्य पंचमहानिनि ... यजेत चानुरूपः स्तो
मवर्धमान इति खंडे सूत्रितं । स्वादोरित्था विषूवत उपनो हरिभिः सुतमिति ॥ ॥ तत्र प्रथमां सप्तदशीमृचमाह ॥ ॥ स्वादोः भ तस्य रसिरित्था वि
षूवतो मध्वः पिबंति गौर्यः । या इंद्रेण सयावरीर्वृष्णा मदंति शोभसे वस्वीरनु स्वराज्यं ॥ ॥स्वादोः स्वादुभूतस्य रसयुक्तस्य इत्था विषूवतः इत्थमनेन
प्रकारेण सर्वेषु यज्ञेषु व्याप्तियुक्तस्य मध्वो मधुररसस्य सोमस्य विशायाद् पणं तर्प्यामिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी एवंविधं सोमं गौर्यो
गौरवर्णा गावः पिबंति या गावः शोभसे शोभार्थं वृष्णा कामानामभिवर्षकेणेंद्रेण सयावरीः सह यांत्यो गच्छंत्यः सत्यो मदंति हृष्टा भवंति । इंद्रपीतस्य
सोमस्य शेषं पिबंतीत्यर्थः । वस्वीः पयः प्रदानेन निवासकारिण्यस्ता गावः स्वराज्यं स्वस्य स्वकीयस्येंद्रस्य यद्राज्यं राजत्वं तदनुलक्ष्य वर्तंत इति शेषः
विषुवतः विपूर्वात् ष्णोः अस्मादौणादिकः क्विप् प्रत्ययः ततो मतुप् ... ङ्यां मनुष्येति मतुप उदात्तत्वं । अन्येषामपि दृश्यत इति संहितायां दीर्घः ॥
व्यत्ययेन मतोर्वत्वं मध्वः जसादिषु छंदसि वा वचनमिति घेर्ङितीति गुणाभावे यणादेशः गौर्यः षिद्गौरादिभ्यश्चेति ङीष् । जसि यणादेशे उ
दात्तस्वरितयोर्यणः इति परस्यानुदात्तस्य स्वरितत्वं । सयावरीः या प्रापणे अतो मनिन्क्वनिब्वनिपश्च वनो र चेति ङीप् रश्चांतादेशः । मदंति मदी हर्षे श्यनि
व्यत्ययेन शप् वस्वीः वसति वासयतीति ... शृस्वृस्निहीत्यादिना वसेः उ प्रत्ययः धात्वादेरित्यनुवृत्तेः ... वोतो गुणवचनादिति ङीष् अगुणवचना
त् ङीप आद्युदात्तार्थं इति वचनात् वसुशब्दात् ङीपि यणादेशः जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं । स्वस्य राज्यं स्वराज्यं अकर्मधारयेण १५९
ड्यंमित्युत्तरपदाद्युदात्तत्वं ॥ ॥इति प्रथमस्य षष्ठे पंचमो वर्गः ॥ ॥एकादशीमृचमाह ॥ ता अस्य पृशनायुवः सोमं श्रीणंति पृश्नयः ॥ प्रि
या इंद्रस्य धेनवो वज्रं हिन्वंति सायकं वस्वीरनु स्वराज्यं ॥ ॥ताः पूर्वोक्ताः अस्येंद्रस्य पृशनायुवः स्पर्शनकामाः पृश्नयो नानावर्णा गावः

इंद्रेण पातव्यं सोमो पयसा श्रीणंति । श्रीः मिश्रीकुर्वंति । इंद्रस्य प्रियाः प्रीतिहेतुभूताश्च धेनवः सायकं शत्रूणामंतकारं वज्रमायुधं हिन्वंति हि
न्विप्रीणनार्थः । इदित्वान्नुम् सायकं षोंतकर्मणि एनुलिआल्यिषुगागमः ॥ ॥द्वादशीमृचमाह ॥ ता अस्य नमसा सहः सपर्यंति प्रचेतसः ॥ व्रता
न्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यं ॥ ॥प्रचेतसः प्रकृष्टज्ञानास्ता गावः अस्येंद्रस्य सहो बलं नमसा स्वकीयेन पयोरूपेणान्नेन
सपर्यंति परिचरंति पुरूणि बहूनि अस्येंद्रस्य व्रतानि शत्रुवधादिरूपाणि वीर्यकर्माणि सश्चिरे सेविरे ज्ञानव्य इत्यर्थः । किमर्थं पूर्वचित्तये युयु
त्सूनां शत्रूणां पूर्वमेव प्रज्ञापनाय अनेन युध्यमानाः यूयं सर्वे मरणं प्राप्ताः किमर्थं भवद्भिः प्राणास्त्यज्यंत इति तेषां बोधनायेत्यर्थः ।
अन्यत पूर्ववत् । सश्चिरे सश्च गतौ व्यत्ययेनात्मनेपदं पूर्वचित्तये चित्ती संज्ञाने क्तिन् मंत्रे वृषेष्यादिना पूर्वपदांतोदात्तत्वं । चातुर्विंशतिके हनि प्रा
तःसवने ब्राह्मणाच्छंसिनः शस्त्रे इंद्रो दधीचः इति षळृचः स्तोत्रियसंज्ञिकस्तृचः सूत्रितं च । आ तू न इंद्र वृत्रहन्निंद्रो दधीचो अस्थभिरिति ॥ ॥
तत्र प्रथमां सूक्ते त्रयोदशीमृचमाह ॥ ॥ इंद्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ॥ जघान नवतीर्नव ॥ अत्र शाट्यायनिन इतिहासमाचक्षते ।
अथर्वणस्य दधीचो जीवतः संतो दर्शनेन असुराः पराबभूवुः । अथ तस्मिन्स्वर्गते असुरैः पूर्णा पृथिव्यभवत् अथेंद्रस्तैरसुरैः सहयो
द्धुमशक्नुवंस्तमृषिमन्विच्छन् स्वर्गंगत इति हासमाचक्षते ॥ आथर्वणस्य दधीचो जीवतो दर्शनेन असुराः पराबभूवुः । अथ तस्मिन्स्वर्ग
ते असुरैः पूर्णा पृथिव्यभवत् । अथेंद्रस्तैरसुरैः सह योद्धुमशक्नुवंस्तमृषिमन्विच्छन् स्वर्गंगत इति शुश्राव अथ प्रपच्छ तत्रत्यान् नेह किम
स्य किंचित् परिशिष्टमंगमस्तीति तस्मै अवोचन् अस्त्येतदाश्वं शीर्षं येन शिरसा अश्विभ्यां मधुविद्यां प्राब्रवीत् । तन्न विद्म यत्राभवदि
ति पुनरिंद्रोऽब्रवीत् । तदन्विच्छतेति तद्धान्वेषिषुः तच्छर्यणावत्यनुविदाजह्रुः शर्यणावद्वै नाम कुरुक्षेत्रस्य जघनार्द्धे सरस्यंदते तस्य
शिरोस्थिभिरिंद्रोऽसुरान् जघानेति । अप्रतिष्कुतः परैरप्रतिशब्दितः प्रतिकूलशब्दरहितः प्रतिकूलशब्दरहितः इंद्रः अथर्वणस्य दधी
चः एतत्संज्ञकस्य ऋषेः अस्थभिः अस्थिभिः आश्वशिरःसंबंधिभिरस्थिभिः नवतीर्नव च संख्याकान् नवतीः दशोत्तरा शतसं
ख्याकाः तथाहि लोकत्रयवर्तिनो देवान् जेतुं आदावासुरी माया त्रिधा व्यपद्यत त्रिविधा अतीतानागतवर्तमानकालभेदेन तत्कालव
र्तिनो देवान् जेतुं पुनरपि प्रत्येकं त्रिगुणिता भवति । एवं नव संपद्यते पुनरपि उत्साहादिशक्तित्रयरूपेण त्रैगुण्ये सति सप्तविंशतिः
संपद्यते पुनः सात्विकादित्रिगुणत्रयभेदेन त्रैगुण्ये सति एकोत्तराशीतिः संपद्यते एवंविधानि मायारूपाणि आवरकान्यसुरजा
तानि जघान हतवान् दधीचः दधि अंचतीति दध्यङ् अंचतेः ऋत्विगित्यादिना क्विन् अनिदितामिति लोपः षष्ठ्येकवचने अच इत्यकार
लोपे चाविति दीर्घत्वं उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्वे प्राप्ते तदपवाद तयाच्चाविति पूर्वपदस्यांतोदात्तत्वं प्राप्तं अंचेः छंदस्यसर्व
नामस्थानमिति पुनर्विभक्त्युदात्तत्वविधानेन तद्बाध्यते ॥ अस्थभिः छंदस्यपि दृश्यत इति अनङादेशः अस्थिशब्दस्यानङादेशः सचो
दात्तः ॥ ॥चतुर्दशीमृचमाह ॥ ॥इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितं ॥ तद्विदच्छर्यणावति ॥ ॥पर्वतेषु पर्वतसमेषु गिरिषु अपश्रितं अ
पगत्य स्थितं । अश्वस्य संबंधि यच्छिरः इच्छन्निंद्रो वर्तते शर्यणावति एतत्संज्ञे सरसि तच्छिरो विदत् अज्ञासीत् तदीयैरस्थिभि
र्वृत्राणि जघानेति पूर्वस्य । मंत्रविसंबंधः इच्छन् इषु इच्छायां तुदादित्वात् शप्रत्ययः विदत् विद्लृ लाभे लुङि व्यत्ययेन च्लेरङादेशः । शर्यणावति

315/1924

गार्यमाणानामदेवाः तेषामहरहर्भवंसरः गार्यणाचितमध्वादिषु गार्यणानाम् अस्य पागतमध्वादिभ्यश्चेति चातुरर्थिको मतुप् संज्ञायामिति मतु
भा·प्र· पो वत्वं मतो बहुचोनजिरादीनामिति दीर्घः। अपीच्यम् अपिगतमन्तर्हितं अपपूर्वमेवे भेकमासंसर्या चंद्रमसीभ्यां इत्थिभ्यां यत्स्वं तत्र पूर्वपदस्य चा
३६० चंद्रमसीष्वि। अत्राह गोरिति निस्थां प्रधानस्यानुवादस्य॥ अति मूर्तिनेति खंडे स्वरितं। अत्राह गोरमन्वत नाम त्वष्टुरपीच्यं॥ इत्था चंद्रमसो गृ
हे॥ ॥अत्राह अस्मिन्नेव गोर्गन्तुश्चंद्रमसो गृहे मंडले नपुंसके मस्यादीमस्य संबंधि अपीच्यं अन्तर्हितं त्वष्टुः त्वक्षणशीलस्य आदित्यरश्म
यः इत्था इत्थमनेन प्रकारेण अमन्वत अजानन् इदमुक्तं भवति चंद्रबिंबे सूर्यकिरणाः प्रतिफलिताः प्रतिफलिताः किरणाः सूर्ययादृशीं सं
ज्ञां लभंते तादृशीं चंद्रेपि वर्तमाना लभंते इत्यर्थः एतदुक्तं भवति। यद्वात्रापि अन्तर्हितं नाम त्वष्टुरश्मिं चंद्रमंडले प्रविश्य अहनीव नक्तं मोतिना
यं सर्वं प्रकाशयति। इदृशमाभूतं तत्सायुक्तः सूर्य एवेंद्रश्चंद्रमादित्येषु इंद्रस्यापि परिगणितत्वात्। अतोऽत्रोक्ता प्रकाशकत्वाद् इंद्रो वेति इन्द्रस्तुतेः
प्रतीयमानत्वादिंद्र इव तत्प्रत्ययः इदपपत्तं भवति इंद्रभूतस्य तेजस आश्रयत्वेन चंद्रमसः प्राधान्यविवक्षया चांद्रमस्यामिषो विनियोगोप्युपपद्यते।
अत्र निरुक्तं। अथाप्यस्यैको रश्मिश्चंद्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्व इत्यपि
निगमो भवति सोपि गौरुच्यते। अत्राह गोरमन्वतेति अत्राह गोरमन्वतेति। अत्राह गोः सममंसतादित्यरश्मयः स्वनामापीच्यमपगमपचि
तमपिहितमंतर्हितं वेति। अमन्वत मनु अवबोधने अपीच्यं अपपूर्वादंचतेरपपूर्वाद्यश्चेति निपातनात् अत एव अभिनत ऋ प्रसिद्धिः यद्वा अपि
पूर्वाद्विचतेः क्विनित्यादिना क्विन। अनिदितामिति नलोपः। अपगतेनिर्गते भव अपीच्यं भवति अपीच्यं भव चंद्रमसीति यत अचइत्याकारलोपे
चाविति दीर्घत्वं तित्स्वरितः अपीच्याः प्रकाश इति भट्टभास्करमिश्रः। इत्था इदमस्थाप्रत्ययः थाहेतौ च छंदसीति प्रकारवचने थाप्रत्ययः यद्वा इदंशब्दा
दिनानुवर्तते। तदानीमिदमस्थमुतितिथमुप्रत्ययः अस्यया दाशपदर्तिसकृत्कं बाधित्वा सर्वाकल्पितिडा देशः चंद्रमसः चंद्रमा आह्लादनं मिमीते
निर्मिमीत इति चंद्रमाः चंद्र मो डि दित्यनि प्रत्ययः। दासीभारादिषु पठितत्वात् पूर्वपदप्रकृतिस्वरत्वं। पूर्वपदं चस्फायितं चीत्यादिनारक्प्र
यांतमतोदात्तं च॥ ॥इति प्रथमस्य षष्ठे सप्तमो वर्गः॥ ॥ सर्वेषु एतास्वामिमान्यस्य यद्विषेः कृत्स्नं भवति इंद्र चायाज्ञानुवाक्या सूत्रितं चकार्या
दश मंको अद्य युङ्क्ते धुरि गा ऋतस्येति इति॥ ॥तत्र प्रथमामृचमाह॥ को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायू
न्॥ आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात्॥ ॥अद्यास्मिन्कर्मणि ऋतस्य गच्छत इंद्रसंबंधिनो रथस्य धुरि अश्वबहनप्रदे
शे गाः गतिमतोऽश्वान् को अद्य युङ्क्ते को नाम नियोक्तुं शक्नोतिन कोपीत्यर्थः। कीदृशीनश्वान् शिमीवतः वीर्यकर्मोपेतान् भामिनः तेजसा युक्तान् दुर्हृ
णायून् परैर्दुःसहेन क्रोधेन युक्तान् हृणीयतिः क्रुध्यतिकर्मा आसन्निषून् येषामास्ये आस्यमुखप्रदेशे शत्रूणां प्रहरणार्थमिषवो बाणा बद्धा
स्तान् हृत्स्वसः हृत्सु शत्रूणां हृदयेषु अस्यति स्वकीयं पादं क्षिपंतीति हृत्स्वसः सुखस्य भावयितॄन् स्वकीयानामस्य प्रदानित्यर्थः। यो यजमान एषा
मीदृशानामश्वानां भृत्यां भरणाक्रियां रथस्य वाहनक्रियां ऋणधत् समर्धयति स्तौतीति यावत् स यजमानो जीवात् भवेत् यद्वा क इति प्रजापतिरु
च्यते को ह वै नाम प्रजापतिरिति श्रुतेः ऋतस्य यज्ञस्य धुरि निर्वाहे गाः वेदरूपान्वाग्विशेषान् अद्य इदानीं युङ्क्ते संप्रयोजति कोदृशान्वेदान्वे
दाध्ययननित्यत्वात्। आसंनिषून् आसन्या सरयुरेषणं गमनमुच्चारणं येषां तान् हृत्स्वसः मनो हृदये पुरोदीप्यमानान् संप्रकाशमानानित्यर्थः॥ ३६०

मयोभुवः सुखस्य भावयितॄन् यो यजमानः एषां वेदानां भृत्यां भरणक्रियां ऋणधत् ऋध्नोति समर्धयति स जीवात् सजीवेत् अन्ये 317/1924
जीवन्मृता इत्यर्थः। दुर्हृणायून् हृणीङ् लज्जायां कण्ड्वादित्वाद्यक् बहुलं छंदसीति उण्प्रत्ययः अतो लोपे सति वर्णव्यत्ययेनाकारः मृगय्वादित्वाद्वा प्रत्ययः आस
न्निषून् पद्दन्नित्यादिना आस्यशब्दस्यासन्नादेशः इषु गताविति धातोः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। हृत्स्वसः असु क्षेपणे। असुगति
दीप्त्यादानेषु क्विप् चेति क्विप् तस्य सर्वापहारीलोपः दिवहुलमित्युक्तेः कृदुत्तरपदप्रकृतिस्वरत्वं मयोभून् व्यत्ययेन ह्रस्वत्वं। यद्वा भुवमिति धात्वादिभ्य उपसंख्यानमिति डुप्र
त्ययः। भृत्यां भृञ् भरणे संज्ञायां समजनिषदेति क्यप् उदात्त इत्यनुवृत्तेः प्रत्ययस्योदात्तत्वं। ऋणधत् ऋधु वृद्धौ लेटि व्यत्ययेन श्नम् लेटोडाटाविति अडागमः
इतश्च लोपः इतीकारलोपः। जीवात् जीव प्राणधारणे पूर्ववत् लेटि आडागमः॥ ॥सप्तदशीमृचमाह॥ क ईषते तुज्यते को बिभाय को मंसते संतमिंद्रं को अंति।
कस्तोकाय क इभायोत रायेधि ब्रवत्तन्वे को जनाय॥ ॥अनुग्रहीतरि इंद्रे आगते सति क ईषते त्राणार्थं गच्छति मनुको निर्गच्छति। न कोपीत्यर्थः। क उत्क्यते कोः
हिंस्यते शत्रुभिर्हिंस्योपि कश्चिन्नास्तीत्यर्थः। को यजमानो बिभाय बिभेति इंद्रे रक्षके सति भयमपि नो स्पृशते। दूरे तस्य शत्रुरता हिंसा अंतिके समीपे संतं
अस्माकं रक्षकत्वेन वर्तमानमिंद्रं कः पुरुषो मंसते जानाति वयमेव जानीमो नान्य इत्यर्थः एकः कश्चरः युद्धे सहायार्थमिंद्र आगते सति को यजमानः तोकाय पु
त्राय अधिब्रवत्। हे इंद्रास्मदीयं पुत्रं रक्षेत्येवंरूपं अधिवचनं पक्षपातेन वचनं श्लाघ्यायाधिब्रूयादित्येवंरूपमधिवचनं को यजमानः कुर्यात् स्वयमे
व रक्षतीति भावः इभाय गजाय को अधिब्रवत् उत अपि च राये ज्ञातुभिरुपक्रियमाणाय धनाय अधिब्रवत् अपह्रियमाणमस्मदीयं धनं रक्षेत्यधिव
चनमपि को यजमानः कुर्यात्। न कोपीत्यर्थः। अपि च तन्वे स्वकीयाय शरीराय जनाय परिजनाय च कोधिब्रवत् स्वशरीररक्षार्थं परिजनरक्षार्थं चेंद्रस्या
धिवचनं नापेक्षितं सत्यात्प्रीतिर्इंद्रः स्वयमेव रक्षतीत्यर्थः। यदा तु कशब्दाभिधेयस्य प्रजापतेः संबंधिनि कर्मणि विनियोगानुसारेण कदाचनेत्यस्या
मृचि विषमाइंद्राग्नाहविषपरतयानीयतत इत। ईषते ईषगतिहिंसादर्शनेषु भौवादिक आत्मनेपदी। तुज्यते तुज हिंसायां कर्मणि यक् अदुप
देशात् सार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते। अतिङ इति पर्युदासान्निघाताभावः समंते लेटोडाटाविति अडागमः। तन्वे तनुशब्दाच्चतुर्थ्येकवचने
जसादिषु छंदसि वावचनामिति घेर्ङितीति गुणाभावे यणादेशः। उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं॥ ॥अष्टादशीमृचमाह॥ को अग्नि
मीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः॥ कस्मै देवा आवहानाशु होम को मंसते वीतिहोत्रः सुदेवः॥ ॥को यजमानोग्निमीट्टे इंद्रार्थं हवि
निरूप्य अग्निं स्तौति इंद्राय हविर्निर्वापो विसस्य वक्तुं न शक्यते इंद्रस्य दुर्विज्ञानत्वात्। को वा इंद्रयागार्थं अग्निं स्रुचा जुहूपभृद्भ्यां ऋतुभिः वसं
तादिकालैः उपलक्षितेन हविषा यजाते यज्ञेनाय द्रावकतवः प्रयाजदेवता ऋतवो वै प्रजा इति श्रुतेः। ताभिश्च ऋतुभिः प्रकृतौ चानुष्ठीयते यानि ध्रु
वे ऋतुभिः सह अग्निं आज्यभागदेवता घृतेन हविषाय जतेन को पीत्यर्थः। कस्मै यजमानाय इहाग्नावाच्यं प्रदर्शयन्ति आशु क्षिप्रं देवा आवा
हयन आवहंति प्रयच्छंति न कस्मा अपीत्यर्थः। इंद्र एव धनस्य दाता नान्ये देवा इति इंद्रस्तूयते। वीतिहोत्रः प्राप्तयज्ञः सुदेवः शोभनदेवताकः
को यजमानो मंसते इंद्रमस्य ऋज्ञाना तिन को पीत्यर्थः। बहुविधेन स्तोत्रेणाग्निरकालोपासनेन चेंद्रः प्रत्यक्षो भवति॥ नान्येन प्रकारेणेति तात्प
र्यार्थः। ईट्टे इट्ट स्तुतौ अदादित्वाच्छपो लुक्। स्रुचा सावेकाच इति विभक्तेरुदात्तत्वं। यजाते यजतेर्लेटि आडागमः। वैतोन्यत्रेत्येकारः बहानू बहतेर्लेटि
इयाडागमः। इतश्च लोप इतीकारलोपः सयामान स्यति तकारलोपः होम ह्वयते स्तुतात स्यात मनिन्निति मनिन् स्वरत्युनरत्नो बहुलं छंदसीति

संप्रसारणं च ह्वानामन सामान्नित्यादौ होमन शब्दो मनिन् प्रत्ययांतो निपात्यते मसंते मनन्तानेः डः यडागमः सिबहुलं लेटीति सिप् पावितं होत्रं वीयत्या
दिषु अस्मात्कर्मणि मंत्रे वृषेषत्यादिनाक्तिन न सचो दात होत्रं होमः हुयामाश्रुभिसिभ्यस्त्रन्निति त्रन् प्रत्ययः। वीतिः प्राप्तो होमो येन बहुव्रीहौ पू
र्वपद प्रकृतिस्वरत्वं। सदेवः न नसभ्यामित्युत्तरपदांतोदात्तत्वं॥ ॥एकोनविंशीमृचमाह॥ ॥त्वमंग प्रशंसिषो देवः शविष्ठ मर्त्यं॥ न त्वदन्योम
घवन्नस्ति मर्डितेंद्र ब्रवीमि ते वचः॥ ॥अंगेत्यभिमुखीकरणे अंग शविष्ठ हे बलवत्तमेंद्र देवो द्योतमानस्त्वं मर्त्यं मरणधर्माणं त्वां स्तुवंतं पु
रुषं प्रशंसिषः सम्यगनेन स्तुतमिति प्रशंस हे मघवन् धनवन्निंद्र त्वदन्यस्त्वत्तोऽन्यः कश्चित मर्डिता सुखयिता नास्ति अतः कारणात् ते तुभ्यं
इदं स्तुतिलक्षणं वचो ब्रवीमि। उच्चारयामि। प्रशंसिषः शंसु स्तुतौ लेटि सिप्य डागमः सिब्बहुलं लेटीति विकरणश्च सिप्। तस्यार्धधातुकत्वादिडा
गमः॥ ॥शविष्ठ अतिशयेन बलवान् बलिन् शब्दात् विन्मतोर्लुगिति विनो लुक् टेरिति टिलोपः मर्डिता मृड सुखने तृच् इडागमः॥ ॥विंशीमृचमाह॥ ॥माते रा
धांसि मा त ऊतयो वसोऽस्मान्कदाचना दभन् विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ॥ ॥हे वसो निवासयितः इंद्र ते तव संबंधि
नि राधांसि धनानि भूतानि अस्मान् कदाचन [दभन् विश्वा च नः] कदाचिदपि मा दभन् मा विनाशयंतु। तथा ऊतयो गंतारः मरुतो धूतयस्त्य
द्वर्णलोपः धूतयः कंपयितारः ते त्वदीया मरुतश्च मा दभन् मा विनाशयंतु। हे मानुष मनुष्यहितेंद्र चर्षणिभ्यः अस्मदभ्यो मनुष्येभ्यः वि
श्वा विश्वानि सर्वाणि वसूनि धनानि च आ उपमिमीहि सर्वत्र आहृत्य अस्मभ्यमपि कुरु सर्वत्र वर्तमानं धनमस्मभ्यं प्रयच्छेत्यर्थः कदाकि
ह्यपात् सर्वे कान्यकिंयदेतः काले दानि दाप्रत्ययः किमः क इति कादेशः प्रत्ययस्वरेणाद्युदात्तत्वं। दभन् दंभु दंभने लोडर्थे छांदसे लङि बहु
लं छंदसीति विकरणस्य लुक् नासड्योगेपीत्यडभावः मिमीहि माङ् माने जुहोत्यादिकः व्यत्ययेन परस्मैपदं ... हौ ... भृञामित् इत्यभ्या
सस्येत्वं हिङित्वात् घुमास्थेतीत्वं॥ ॥इति प्रथमस्य षष्ठे समो वर्गः॥ ॥इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्सं
हितायाः प्रथममंडले त्रयोदशोऽनुवाकः॥ ॥चतुर्दशेऽनुवाके सूक्तानि तत्र प्र य इति द्वादशर्चं प्रथमं सूक्तं गोतमस्यार्षं पंचमीद्वाद
श्यौ त्रिष्टुभौ शिष्टा जगत्यः मरुतो देवता तथा चानुक्रांतं प्रये द्वादश मारुतं पंचम्यन्त्ये त्रिष्टुभाविति इदं च प्रयोगानि चत्वारि सूक्तानि मा
रुद्रेवत्यानि। अभिप्लवषडहस्य चतुर्थेऽहनि आग्निमारुते एतत्सूक्तं मारुतनिविद्धानीयं सूत्रितं च। प्र ये शुंभंते जनस्य गोप इत्याग्नि
मारुतमिति॥ ॥तत्र प्रथमामृचमाह॥ ॥प्र ये शुंभंते जनयो न सप्तयो यामन् रुद्रस्य सूनवः सुदंससः॥ रोदसी हि मरुतश्चक्रिरे वृधे मदंति
वीरा विदथेषु घृष्वयः॥ ये मरुतः यामन् यामनि गमननिमित्तभूते सति प्रशुंभंते प्रकर्षेण स्वकीयान्यंगान्यलंकुर्वते जनयो जाया
इव यथा योषितः स्वकीयान्यंगान्यलंकुर्वंति तद्वत् कीदृशा मारुतः सप्तयः सर्पणशीलाः रुद्रस्य सूनवः शोदयति सर्वमंतकाल इति
रुद्रः परमेश्वरस्तस्य पुत्राः सुदंससः शोभनकर्माणः एतद्देवोपपादयति हि यस्मात् मारुता रोदसी द्यावापृथिव्यौ वृधे वृद्धिं प्रथा
नादिना वर्धनाय चक्रिरे कृतवंतः अतः सुदंसस इत्यर्थः वीराः विशेषेण शत्रुक्षेपणशीलाः घृष्वयः घर्षणशीलाः मरुतः सर्वदा
हृष्यंति यादृशे भंजकार इत्यर्थः एवंभूतास्ते मरुतो विदथेषु विदथ इति यज्ञनाम एषु यज्ञेषु मदंति सोमपानेन हृष्यं १६१
ति शुंभंते शुभ शुंभ शोभार्थौ तौदादिकः जनयः जायंत आसु अपत्यानीति जनयो जायाः इन् सर्वधातुभ्य इति इन् प्रत्ययः यामन् या प्रा
पणे कृत्यल्युटो बहुलमिति वचनात् ... मनिन् ... सुपां सुलुगिति सप्तम्या लुक् सुदंससः दंस इति कर्मनाम शोभनं दं

सो येषां सोमेन सीअसोमोपसीत्युत्तरपदाद्युदात्तत्वं चक्रिरे हि चेति निपातप्रतिषेधः रथेरं धुररोसंपदादिलक्षणो भावे क्विप्। सावेकाच इति विभ
क्तेरुदात्तत्वं मदंति मदि हर्षे श्यान्यत्ययेन शप् पादादित्वान्निघाताभावः। विदथेषु विद ज्ञाने रुदिविदिभ्यां ङिदिति अथ प्रत्ययः। घृष्वयः घृषु संघर्षे
कृविघृष्वीत्यादिना विन् प्रत्ययांतो निपात्यते॥ ॥द्वितीयामृचमाह॥ ॥उतक्षितासो महिमानमाशत दिवि रुद्रासो अधि चक्रिरे सदः॥ अर्चंतो अर्कं
जनयंत इंद्रियमधि श्रियो दधिरे पृश्निमातरः॥ ये पूर्वोक्तगुणविशिष्टास्ते मरुतः उक्षितासो देवैरभिषिक्ताः संतो महिमानं महत्त्वं आशत अनुवन् रुद्रा
सो रुद्रस्य पुत्राः उपचाराज्जन्ये जनकशब्दः ते रुद्रपुत्रा मरुतः दिमानं महित्वं आशत अभुवन् रुद्रासो रुद्रस्य पुत्राः। विद्योतमाने नभसि दिवः सदनं
स्थानं अधि चक्रिरे अधिकं सर्वोत्कृष्टं कृतवंतः अर्कमर्चनीयमिंद्रं अर्चंतः पूजयंतः इंद्रियं इंद्रस्य लिंगं वीर्यं जनयंतः प्रहरभगवो जहि वीरयस्वेत्येवं
रूपेण वा स्येनोत्पादयंतः पृश्निमारुतः पृश्निर्नानारूपायाः भूमेः पुत्रा मारुताः श्रियः ऐश्वर्याणि अधिदधिरे आधिक्येनाधारयन्। उक्षितासः उक्ष सेच
ने कर्मणि निष्ठा आज्जसेरसुक् महिमानं महत्त्व ... पृथ्वादिलक्षण इमनिच् टेरिति टिलोपः आशत अशू व्याप्तौ लुङि बहुलं छंदसीति विकरणस्य लुक्
इंद्रियमिंद्रलिंगमिंद्रसृष्टमिति पंच प्रत्ययांतो निपात्यते॥ पृश्निमातरः प्राश्नुते सर्वाणि रूपाणीति पृश्निर्भूमिः श्रूयते च इयं वै पृश्निः घृणिपृ
श्निः घृणिपृश्निरित्यादिना निपातनादभिमतरूपसिद्धिः पृश्निर्माता येषां ते तथोक्ताः ऋतः छंदसीति समासांतस्य कप्प्रतिषेधः॥ ॥तृतीयामृ
चमाह॥ ॥गोमातरो यच्छुभयंते अंजिभिस्तनूषु शुभ्रा दधिरे विरुक्मतः॥ बाधंते विश्वमभिमातिनमप वर्त्मान्येषामनुरीयते घृतं॥ ॥गोमातरः गो
रूपा भूमिर्माता येषां ते मरुतः अंजिभिः रूपाभिव्यंजकैराभरणैर्यद्यदा शुभयंते स्वकीयान्यंगानि शोभयुक्तानि कुर्वंति तदा शुभ्रा दीप्ता मारुतः
तनुषु स्वकीयेषु शरीरेषु विरुक्मतो विशेषेण रोचमानं अलंकारान् दधिरे धारयंति अपि च विश्वं सर्वं अभिमातिनं शत्रुं अपबाधंते हिंसंति एषां मारुतां च
वर्त्मानि मार्गाननुसृत्य घृतं क्षरणशीलमुदकं रीयते स्रवति यत्र मरुतो गच्छंति तत्र वृष्ट्युदकमपि तदनुसारेण तत्र गच्छतीत्यर्थः। शुभयंते संज्ञापूर्वकस्य वि
धेरनित्यत्वात् लघूपधगुणाभावः अंजिभिः अंजू व्यक्तिम्रक्षणकांतिगतिषु [illegible] सिध्वनिभ्यश्चेति प्र
त्ययः शुभ्राः शुभ दीप्तौ स्फायितंचीत्यादिना रक्॥ विरुक्मतः विशिष्टा रुक् विरुक् तद्वंतः विरुक्मतः मतुपि अयस्मयादित्वेन पदत्वात् कुत्वं भत्वाज्जश्त्वा
भावः रीयते री स्रवणे दैवादिकः॥ ॥चतुर्थीमृचमाह॥ ॥वि ये भ्राजंते सुमखास ऋष्टिभिः प्रच्यावयंतो अच्युता चिदोजसा॥ मनोजुवो यन्मरुतो रथेष्वा
वृषव्रातासः पृषतीरयुग्ध्वम्॥ ॥सुमखासः शोभनयज्ञा ये मरुतः ऋष्टिभिरायुधैर्विभ्राजंते विशेषेण दीप्यंते मरुतः॥ अच्युता चित् च्यावयितुमशक्यानि
दृढानि पर्वतादीन्यपि ओजसा स्वकीयेन बलेन प्रच्यावयंतः प्रकर्षेण च्यावयितारः प्रेरयितारो भवंति उत्तरार्धः प्रत्यक्षकृतः हे मरुतः मनोजुवः मनोवेगग
तयः वृषव्रातासः वर्ष्टुरुदकसेचनसमर्थसप्तसंघात्मका यूयं रथेषु पृषतीः पृषत् इत्यतिमरुतां वाहनानां संज्ञा पृषत्यो मरुतामित्युक्तत्वात्। एतद्भिः श्वेतबिंदुभि
र्युक्ता मृगीः यद्यदा अयुग्ध्वं आभिमुख्येन नियुक्ता अकुरुत तदानीं पर्वतादिकं प्रच्यावयत इत्यर्थः। सुमखासः सर्वे विधयश्छंदसि विकल्प्यंत इति नञ्सुभ्यामि
त्युत्तरपदस्य प्रकृत्यभावे बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अच्युता शेश्छंदसि बहुलमिति शेर्लोपः मनोजुवः जुरिति सौत्रो धातुर्गत्यर्थः क्विब्वचीत्यादिना
क्विप् दीर्घो [illegible] अयुग्ध्वं युजिर् योगे लुङि धि चेति सकारलोपः॥ ॥पंचमीमृचमाह॥ ॥प्र यद्रथेषु पृषतीरयुग्ध्वं वाजे अद्रिं मरुतो रंहयंतः॥ उतारु
षस्य वि ष्यंति धाराश्चर्मेवोदभिर्व्युंदंति भूम॥ ॥हे मरुतः पृषतीः यद्यदा रथेषु प्रायुग्ध्वं प्रायुंजत ... कुर्वंतः वाजे अन्ने निमित्तभूते सति अद्रिं मे

319/1924

भा०प्र०

१६२

धं रहयंतः वर्षणार्थं प्रेरयंतः इततदानीं अरुषस्य आरोचमानस्य सूर्यस्येव पतागंर्वा सकारश्च तपसूदक धारा भवंती भविष्यंतीति विमुचंतिविमुना सा
श्वधाराः उदभिरदकैरेव संवपरिमितमध्यं चमर्य यथा अपयश्नेन कुपत एवं सम सर्वां भूमिं सुदंतीति विशेषणेन अदांकुर्वंतिरं हयंतः रहितगतौ विष्यं
तिषोतक मणिं दृषादिक ओतः रखनीत्याकार लोपः उपसर्गात्समानानितिष सं हद भिप्रद निस्यादिना उदक शब्दस्योद न्यादेशः व्यदंतिउंदीक्लेदने भुम
सर्पासतुणितिभूमाशब्दादुत्तरस्या सोराशेः छांदसंहस्वत्वं ततीयसवने अवाव दंतितियातुः प्रथितयाज्याः साशितं च। आवोवहंतु सप्तयोरघुष्य दोम
वनः सहुवाअहिगतनंति॥ ॥तामेतां पंचमीसूचमाह॥ ॥आवोवहंतु सप्तयोरघुष्यदानः प्रजिगात बाहुभिः॥ सीदता बर्हिरुरुवःसदस्कृतं मादयध्वंमरुतो
मध्वोः अंधसः॥ हेमरुतो वो युष्मान सप्तयः सर्पणशीला अश्वा आवहंतु अस्माद्यज्ञं प्रापयंतु कीदृशाः सप्तयः रघुष्यदः लघुशीघ्रंस्पंदमानाः वेगे
नगच्छंत इत्यर्थः रघुशीघ्रपतंतो गच्छंतो यूयं च बाहुभिः स्वकीयैर्हस्तैः अस्माभ्यं दातव्यं धनमाहृत्य प्रजिगात प्रकर्षेण गच्छत हे मरुतो वो युष्माकं सदःसद
नं वेदिलक्षणस्थानं उरुविस्तीर्णं कृतं तत्र यदास्तीर्णं बर्हिस्तदासीदत तस्मिन् बर्हिष्युपविशत उपविश्य च मध्वो मधुरस्य अंधसः सोमलक्षण
स्यान्नपानेन मादयध्वं तृप्ता भवत रघुष्यदः रघुष्यदत्इति रघुस्यदः स्यंदूप्रस्रवणे क्विप् चेति क्विप् अनिदितामिति नलोपः रुदुत्तरपदप्रकृतिस्वरत्वं रघुपता
नः पतूगतौ अन्येभ्योपिदृश्यंत इति विनिप्रजिगात गामादेशः लोटो छांदसत्वादिकः जिगाते गतिकर्मसु पाठात् अत्र गत्यर्थस्याध्यस्य बहुवचनेन तस्य त
नथनाश्चेति तादेशः तस्य पित्वेन ङित्वाभावादीहल्यघोरिति ईत्वाभावः॥ सदःअनः रुरुमीतीविसर्जनीयस्य सत्वं। मादयध्वं मरुतःसिपाशेचुरादित्वा
नेपदी॥ ॥इति प्रथमस्य पंचमो वर्गः॥ ॥सप्तमीमृचमाह॥ ॥तेऽवर्धंत स्वतवसो महित्वना नाकं तस्थुरुरु चक्रिरे सदः॥ विष्णुर्यद्धावद्वृषणं म
दच्युतं वयो न सीदन्नधि बर्हिषि प्रिये॥ ॥तेमरुतः अवर्धंत वृद्धिंगताः कीदृशाः स्वतवसः स्वाश्रयबलाः नन्यस्य कस्यचित बलमपेक्ष्यंते वृद्धिप्रा
प्य च महित्वनाः महिम्ना महत्वेन नाकं स्वर्गमातस्थु आतस्थिवंतः सदः सद्मन भोलक्षणं स्थानं स्वकीयनिवासाय उरुविस्तीर्णं चक्रिरे यत्र येभ्यो मरुद
ध्याः यदर्थं वृषणं कामाभिवर्षकं मदच्युतमदस्य हर्षस्य आसेक्तारं यज्ञं विष्णुरेव गत्य रक्षति। ते मरुतः वयो न पक्षिण इव यथा शीघ्रमागच्छन्ति एवं शी
घ्रमागत्य बर्हिष्यधि अस्मदीये न यज्ञे प्रिये प्रीतिकरे सीनसीदंतु उपविशंतु तेऽवर्धंतु स्वशितो बानुदात्ते पदादावित्येकादेशस्य स्वरितत्वं॥ महित्वना
भावप्रत्ययादुत्तरस्य ङेच्यलुक्येन आभावः उदात्तत्वं च। यद्वा सर्पासतुणिति अजादेशः नकारोपजननश्च। तस्थुना कमातस्थुश्च सदश्च विस्तीर्णं चक्रिरे इतिवा
र्थमपि तत्स्थानिलोपविभाषेति प्रथमाद्यावलि द्रुविभक्तिनिघातप्रतिषेधः। यतस्तपांसतुणिति चतुर्थ्या लुक्। आवन छांदसो वर्तमाने लङ् आनुकर्णबाध
पूर्वस्य निगम इति उपधादीर्घाभावः मदच्युतमदं च्यावनतीति मदच्युत। च्युतिर आसेचने क्विप् चेति क्विप् सीदन लिङर्थे लङ् घडागमः॥ ॥अष्टमीमृच
माह॥ ॥शूरा इवेद्युयुधयो न जग्मयः श्रवस्यवो न पृतनासु येतिरे॥ भयंते विश्वा भुवना मरुद्भ्यो राजान इव त्वेषसंदृशो नरः॥ ॥इहित्यैतत्समुच्चयो
शूरा इवेतशूरा यथा युयुत्सवः पुरतायुधयः शत्रुभिर्युध्यमानाः पुरस्ताद् इव जग्मयः शीघ्रं गच्छंतो मरुतः श्रवस्यवोन्नमात्मन इच्छन्तः पुरुषा
इव पृतनासु संग्रामेषु येतिरे प्रयतंते ते वृत्रादिभिर्युद्धं व्याप्रियंते तादृशेभ्यो मरुद्भ्यो विश्वा भुवनानि सर्वाणि भूतानि भयंते बिभ्यति येन रोराजान इव तेजता
नामरुतः तत्तनउबुगततमानान पततयइवत्वेषसंदृशः दीप्तसंदर्शनाः उग्ररूपत याद्वृष्टमशक्या भवंतीत्यर्थः॥ युयुधयः युध संप्रहारे आदृ
गमहनजनइत्य औत्सर्गिक इहलीतिवचनात् क्रित्यत्ययः लिङ्वद्भावात् द्विर्भावादिकं धाङुणाभावः निघातप्रत्ययत्वं जग्मयः तेनैवसूत्रेणकिनप्र

१६२

त्ययगमहनेत्यादिना उपधालोपः। छांदसत्वात्धि भावादिश्च वस्यच्च श्रवइतिश्रवस्यतिक्याच्छंदसीत्यत्ययः येतिरे यतीप्रयत्ने छंदसिलुङ्लिङितिवर्तमा 32/1924
नेलिट् अपथंतेऽभिभी भये व्यत्ययेनपरस्मैपदं। त्वेषसंदृशः त्विषदीप्तौ पचाद्यच् संदृशिरूपेक्षणे संपूर्वादस्मात्संपदादिलक्षणोभावे क्विप् बहुव्री
हौपूर्वपदप्रकृतिस्वरत्वं॥ ॥नवमीमृचमाह॥ ॥त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत्॥ धत्त इंद्रो नर्यपांसि कर्तवेऽहन्वृत्रं निरपामौ
ब्जदर्णवं॥ ॥स्वपाः शोभनकर्मा त्वष्टा विश्वनिर्माता यद्वज्रं अवर्तयत् इंद्रं प्रत्यगमयत् दत्तवानित्यर्थः। कीदृशं सुकृतं सम्यक्निष्पादितं हिरण्ययं सुवर्ण
मयं सहस्रभृष्टिं अनेकाभिर्धाराभिर्युक्तं तद्वज्रं इंद्रो धत्ते धारयति किमर्थं नरि अत्र नर सवनं वधानं नृशब्देन संग्रामोऽभिधीयते संग्रामे अपांसि शत्रु
हननादिलक्षणानि कर्माणि कर्तवे कर्तुं कर्तुं एवं वज्रं धृत्वानेन वज्रेण वृत्रं स्वस्य शत्रुकं अर्णवं सोदकेन युक्तं मेघं अहन् अवधीत् अपां तेन नि
रुद्धा अपश्च निरोजात् निःशेषेण अधो मुखं न पातयत् प्रवृत्ता अकारोदित्यर्थः॥ सुकृतं। सुपूर्वात् करोतेः कर्मणि। निष्ठागतिरनंतर इतिगतेः प्र
कृतिस्वरत्वं हिरण्ययं हिरण्यशब्दादुत्तरस्य मयटोऽकारस्य लोपः ऋत्व्यवास्त्व्यवास्त्वेत्यादौ निपात्यते। स्वपाः सोमनसी अलोमोषसीत्युत्तर
पदाद्युदात्तत्वं। कर्तवेतुमर्थे सेसेनिति कृ तत्तवेन प्रत्ययः अपांक्रियाय दर्णं कर्तव्यमितिकर्मणः संप्रदानत्वं तेनाच्चतुर्थ्यर्थे षष्ठ्याद्द्दमितिविभक्तेर
दात्तत्वं उब्जतउब्ज आर्जवे अर्णवं अर्णसो लोपश्चेतिमत्वर्थीयो वः सलोपश्च॥ ॥दशमीमृचमाह॥ ॥ऊर्ध्वं नुनुद्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि
पर्वतं धमंतो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे॥ ॥अत्र यमाख्यायिकागोतमऋषिः पिपासया पीडितः सन् मरुत उदकं ययाचे तदनंतरं
मरुतो दूरस्थं कूपमुद्धृत्य यत्र सगोतमस्तिष्ठति तत्रस्थाय दर्शनीतात् ऋषिसमीपे कूपमवस्थाप्यत त्यार्थे आसवं चरुस्थान स्निन्नापि कूपमुत्सिच्यत मर्पितं
नादकं तेन तर्पयां चक्रुः अयमर्थोऽनयोरुत्तरयाः प्रतिपाद्यते ते मरुतः अवतं अवस्नातो भवती पवतः कूपः कूपनाम सच अवतः अवट इति पठितं त
स्रुभिः उपरियथा भवति तथा आजसा स्वकीयेन बलेन नुनुद्रे प्रेरितवंतः उद्धातवंत इत्यर्थः एवं कूपमुध्धाय अपेराश्रमं प्रति नयंतो मरुतः मार्गमध्ये दृहा
णं मयइदुगतिनिरोधकं पर्वतं चित पर्वतं तं निरन्ध्यमपि बिभिदुः विशेषेण बभंजुः सुदानवः शोभनदाना सोमरुतः वाणं शतसंख्याकाभिस्तंत्रिभि
र्युक्तं वीणाविशेषं धमंतो वादयतः सोमस्य मदे सोमपानेन हर्षेसति रण्यानि रमणीयानि धनानि चक्रिरे स्तोतृभ्यः कुर्वंति नुनुद्रे णुद प्रेरणे लि
ट इरयोरे इति रे आदेशः दादृहाणं दृह दृहि वृद्धौ लिटः कानच् धमंतः ध्माशब्दाग्निसंयोगयोः पाघ्रेत्यादिना धमादेशः वाणं अणरणबणशब्दार्थः॥
कर्मणि घञ् कर्षात्वत इत्यंतोदात्तत्वं। रण्यानि रण्यते भं वा सिरण्योरूपसंख्याभिस्तंत्रिभिर्युक्तं विणाविशेषणं धमंतो वादयंतः सोमस्य मदे सोमपा
नेन हर्षे सति रण्यानि रमणीयानि धनानि चक्रिरे स्तोतृभ्यः कुर्वंति नुनुद्रे णुद प्रेरणे लिट इरयोरेति रे आदेशः दादृहाणं दृह दृहि वृद्धौ लिटः का
नच् धमतः ध्माशब्दाग्निसंयोगयोः पाघ्रेत्यादिना धमादेशः वाणं अणरणबणशब्दार्थः। कर्मणि घञ् कर्षात्वत इत्यंतोदात्तत्वं रण्यानि रण्यते
भावे वेत्तिरण्यो रूपसंख्यानामित्यपत ततो भवेऽर्थे छंदसीति यत् यतोनाव इत्याद्युदात्तत्वं॥ ॥एकादशीमृचमाह॥ ॥जिह्मं नुनुद्रेऽवतं तया दिशासिंच
न्नुत्सं गोतमाय तृष्णजे॥ आगच्छंतीमवसा चित्रभानवः कामं विप्रस्य तर्पयंत धामभिः॥ ॥मरुतः अवतं उक्तं कूपं यस्यां दिशि ऋषिर्वसति तया दि
शा तिर्यक् बक्रं तिर्यं चं नुनुद्रे प्रेरितवंतः। एवं कूपं नात्वा कृण्याश्रमे वस्थाप्यत तस्मिन् तृषितायगोतमाय कृपयेतदर्थं उत्सं जलप्रवाहं कूपादुद्धृत्य

सिंचन् आहावे अवनयन् एवं कृत्वा इमेनं स्तोतारमृषिं चित्रभानवः विचित्रदीप्तयस्ते मरुतः अवसा ईदृशेन रक्षणेन सह आगच्छंति तत्समीपं प्राप्नुवंति प्राप्य
भा॰ प्र॰ च विप्रस्य मेधाविनो गोतमस्य काममभिलाषं धामभिः आयुषो धारकैरुदकैः तर्पयंत अतर्पयन् तृप्यान गोश्वं स्तावः वर्णाति सावेका च इति प्राप्तस्य क्ति चरादा
१६३ तस्य प्रतिषेधः इटश्चाभावे का च रनि विभक्तेरुदात्तत्वं। तृष्णजे। ञितृषा पिपासायां स्वपितृषोर्नजिङ् प्रत्ययः धाकुदात्तत्वं। पदकारस्य शाकल्यस्य तु मतमभि
प्रत्ययः अन्येषामपि दृश्यत इति दृशिग्रहणात् केवलादपि जनेर्ई प्रत्ययः कृष्णजेत् उभावात स्यमतयो कप्रापोः संज्ञा छंदसो बहुलमिति हृस्वत्वं कृदुत्तरपद
र्वपदप्रकृतिस्वरत्वं। धामभिः दधातेः मनिन्मनिन्निति मनिन्। मारुतो पशोऽयं वचोमेति हवि धोत्याद्या प्रदानानामिति खंडे सूचितं। अरादवेदयमोरं अह
बयावः शार्दूर्मानायत्रुंतीति इति॥ ॥ तामेतां सूक्ते द्वादशीमृचमाह॥ ॥ या वः शर्म शशमानाय संति त्रिधातूनि दाशुषे यच्छताधि। अस्मभ्यं ता
नि मरुतो वि यंत रयिं नो धत्त वृषणः सुवीरं॥ ॥ हे मरुतः वो युष्माकं संबंधीनि यानि शर्माणि सुखानि गृहाणि वा। त्रिधातूनि पृथिव्या
दिषु त्रिषु स्थानेष्ववस्थितानि। शशमानाय युष्मान् स्तुतिभिर्भजमानाय दातुं संपादितानि पूर्वोक्तलक्षणानि शर्माणि यानि संति यानि च संनियानि सं
तियानि च दाशुषे हविर्दत्तवते यजमानाय अधियच्छति अधिकं प्रयच्छत तथा। हे मरुतः तानि सर्वाणि शर्माणि अस्मभ्यं वियंत विशेषेण प्रयच्छत
किं च हे वृषणः कामानां वर्षितारो मरुतः नोऽस्मभ्यं सुवीरं शोभनैर्वीरैः पुत्राभिः युक्तं रयिं धनं धत्त दत्त शर्म छंदसि यदुलमिति त्रिलोपः शश
मं सुपां सुलुगिति जसो लुक्। शशमानाय शश प्लुतगतौ ताच्छीलिकश्चानश्। यच्छत छांदसे लङि बहुलं छंदस्यमाङ्योगेपीत्यडभावः। यंत
यमेर्लोटि बहुलं छंदसीति विकरणस्य लुक्। तप्तनप्तनथनाश्चेति तस्य तबादेशः। अतः तस्य पित्त्वेन ङित्वाभावात् अनुदात्तोपदेशेत्यादिनानु
नासिकलोपो न भवति। वृषणं वा सपूर्वस्येति निगमे इत्युपधादीर्घाभावः। सुवीरं बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं॥ ॥ इति प्रथमस्य ष
ष्ठे दशमो वर्गः॥ ॥ ९॥ मरुतो यस्येति दशर्चं द्वितीयं सूक्तं गौतमस्यार्षं गायत्रं मरुद्देवताकं अनुक्रम्यते च मरुतो दश गायत्रमिति। सूक्तेन तीये
छंदोमे आग्निमारुते शस्त्रे एतत्सूक्तं तृतीयासवनेत्यागम्य महति खंडे सूत्रितं मरुतो यस्य हि प्राग्न ये वाचमित्याग्निमारुतमिति। द्वामारुत्याम थाम
स्य हविषो मारुतो यस्येत्येषानुवाक्या सूत्रितं च। ऐंद्रामारुती भेदक मा मरुतो यस्य हि क्षय इति एषा वेवरुण घासेषु मारुत्या अभिक्षाया अ
नुवाक्या सूत्रितं॥ ॥ मरुतो प्रथमामृचमाह॥ ॥ मरुतो यस्य हि क्षये पाथा दिवो विमहसः॥ स सुगोपातमो जनः॥ ॥ हे विमहसो विशिष्टप्रकाश
मरुतः दिवोऽतरिक्षलोकादागत्य यस्य हि यस्य खलु यजमानस्य क्षये यज्ञगृहे पाथ सोमं पिबथ स जनो जातो यजमानः सुगोपातमः शोभनैः पालकैः
अत्यंतं रक्षितो भवति। पाथ पा पाने लटि बहुलं छंदसीति शपो लुक्। यद्वृत्तयोगादनिघातः। विमहसः विशिष्टमहस्तेजो येषां ते तथोक्ताः। सुगोपा
तमः शोभनो गोपाः रक्षको यस्य स सुगोपाः अतिशयेन सुगोपाः सुगोपातमः। तमपः पित्त्वादनुदात्तत्वे सति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतो
दात्तत्वमेवशिष्यते॥ ॥ द्वितीयामृचमाह॥ ॥ यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनां॥ मरुतः शृणुता हवं॥ ॥ हे यज्ञवाहसः यज्ञवोढारो मरुतो १६३
यूयं यज्ञैर्वा वा शब्दः समुच्चये यज्ञैश्च यजमानस्य मतीनां स्तुतीनां संबंधिनो विप्रस्य वा अयजमानस्य मेधाविनश्च हवमाह्वानं शृणुत य
त उत यजमानस्य यागरहितस्य स्तोतुश्चाह्वानं अवश्यं भवद्भिः श्रोतव्यं यतो भवंतो यज्ञस्य वोढारः स्तुतिप्रियाश्चेति भावः। यज्ञवाहसः ग
तिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात् वहिहाधाञ्भ्यश्छंदसीति कारकपूर्वाद्वहतेरसुन् णिदित्यनुवृत्तेरुपधावृद्धिः। मतीनां

मनस्थाने अस्मात्करणे क्तिन्। नामन्यतरस्यामिति नाम उदात्तत्वं। शृणुत श्रुवः शृ चेति श्नुः सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात् 323
इ स्वरः शिष्यते। मरुत इत्यस्यामंत्रितं पदमविद्यमानवदिति अविद्यमानवत्त्वे अपदादपरत्वात् निघाताभावः। हवं भावेनुपसर्गस्येति ह्वयतेर
प् संप्रसारणं चेति॥ ॥ तृतीयामृचमाह॥ ॥ उत वा यस्य वाजिनोऽनु विप्रमतक्षत॥ स गंता गोमति व्रजे॥ ॥ उत वा अपि च यस्य यजमानस्य 1924
वाजिनो हविर्लक्षणान्नोपेता ऋत्विजो विप्रं मेधाविनं मरुद्गणं अन्वतक्षत हविः प्रदानादिना तीक्ष्णीकुर्वंति स यजमानः गोमति बहुभिर्गो
भिर्युक्ते व्रजे गोष्ठे गंता गमनशीलो भवति॥ अतक्षत तक्षू त्वक्षू तनूकरणे छांदसो लङ् व्यत्ययेन मध्यमः। गंता गमेस्ताच्छीलिकस्तृ
न्॥ ॥ चतुर्थीमृचमाह॥ ॥ अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु॥ उक्थं मदश्च शस्यते॥ ॥ दिविष्टिषु यजनीयं दिवसेषु बर्हि
षि यज्ञे वीरस्य शत्रुक्षपणकुशलस्य अस्य मरुद्गणस्य यागाय सोमः सुतः ऋत्विग्भिरभिषुतो भवति उक्थं मरुद्देवताकं शस्त्रं मदश्च म
दि धातुना युक्तं मरुतो देवाः सोमस्य मत्सन्नित्यादिका मारुती निविच्च अस्य मरुद्गणस्य हर्षाय शस्यते होत्रा पठ्यते। अस्य ऊडिदमि
ति विभक्तेरुदात्तत्वं दिविष्टिषु इष्यतेः एषणा निगमनानि दिवो द्योतमानस्य सूर्यस्य इष्टयो येषु दिवसेषु ते तथोक्ताः बहुव्रीहौ पूर्वपदप्रकृ
तिस्वरत्वं॥ ॥ पंचमीमृचमाह॥ ॥ अस्य श्रोषंत्वा भुवो विश्वा यश्चर्षणीरभि॥ सूरं चित्सस्रुषीरिषः॥ ॥ अस्य यजमानस्य स्तुतं मरुतः आभिमुख्ये
न श्रोषंतु शृण्वंतु। ये मरुद्गणाः विश्वाः चर्षणीः सर्वान् शत्रुभूतान् मनुष्यान् अभिभुवः अभिभवंति। तादृग्गणाका मरुतः शृण्वंत्वित्यर्थः। स
रं चित् सूरं प्रेरयितारं यजमानमपि इषो मरुद्भिः प्रत्तान्यन्नानि सस्रुषीः प्राप्तानि भवंतु। श्रोषंतु श्रु श्रवणे सिब्बहुलं लेटि इति च बहुलं छंदसीति श
पो लुक्। भुसतोस्ति ङितिगुणप्रतिषेधः। सूरं षू प्रेरणे सुसूधाञ्गृधिभ्यः क्रन्निति क्रन् प्रत्ययः। सस्रुषीः सृगतौ अस्माल्लिटः क्वसुः उगितश्चेति ङीप्
भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं शासिवसिघसीनां चेति षत्वं। जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं॥ ॥ इति प्रथमस्य षष्ठे एकादशो
वर्गः॥ ॥ षष्ठीमृचमाह॥ ॥ पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयं॥ अवोभिश्चर्षणीनां॥ ॥ हे मरुतः पूर्वीभिः बह्वीभिः शरद्भिः संवत्सरैः चर्ष
णीनां सर्वद्रष्टॄणां सर्वेषां भवतां संबंधिभिरवोभिः रक्षणैर्युक्ताः संतो वयं ददाशिम युष्मभ्यं हवींषि दत्तवंतः हि यस्मादेवं यस्मादेवं तस्मा
दिदानीमप्यस्मदीयं हविः स्वीकरणायागच्छतेत्यर्थः। पूर्वीभिः पुरुशब्दोतो गुणवचनादिति ङीष् यणादेशौ हलि चेति दीर्घत्वं। ददाशिम दाशृ दाने
लिटि इडागमः हि चेति निघातप्रतिषेधः चर्षणीनादि ङीष् यणादेशौ हलि चेति दीर्घत्वं। ददाशिम दाशृ दाने लिटि इडागमः हि चेति निघातप्र
तिषेधः। चर्षणीनां नामन्यतरस्यामिति नाम उदात्तत्वं॥ ॥ सप्तमीमृचमाह॥ ॥ सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः॥ यस्य प्रयांसि पर्ष
थ॥ ॥ हे प्रयज्यवः प्रकर्षेण यष्टव्या मरुतः स मर्त्यो मनुष्यो यजमानः सुभगः सुशोभनधनो भवतु। यस्य यजमानस्य प्रयांसि हविर्लक्षणा
न्यन्नानि पर्षथ आत्मानि सिंचथ स्वीकुरुतेत्यर्थः। सुभगः भग इति धननाम शोभनो भगो यस्य स तथा दयश्चेत्युत्तरपदाद्युदात्तत्वं॥ पर्षथ पृ
षु सेचने भ्वादिकः। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः॥ ॥ अष्टमीमृचमाह॥ ॥ शशमानस्य वा नरः स्वेदस्य सत्यशवसः॥ विदा कामस्य
वेनतः॥ ॥ हे सत्यशवसः अवितथबलाः नरो नेतारो मरुतः शशमानस्य युष्मान् स्तुतिभिः संभजमानस्य स्वेदस्य स्तावकमंत्रोच्चारणजनि
तेन श्रमेण स्विद्यमानगात्रस्य वेनतः वेनतिः कांतिकर्मा कामयमानस्य वा शब्दः समुच्चये एवंभूतस्य स्तोतुश्च कामस्य काममभिलाषं

भा॰प्र॰ विरप्शंभयन प्रयच्छतेत्यर्थः॥ शशमानस्य शशप्लुतगतौ ताच्छील्ये चानश्। स्वरस्य अभिद्रवणात् प्रप्लवणे अंतर्भावितण्यर्थात् कर्मणि अभिजातराप
दात्तत्वं। विदाविदूत्वाभे लोहिम ध्यमपुरुषे बहुवचनस्य स्थस्य येन सादेशः। बहुलं छंदसीति विकरणस्य लुक्। स्पस्या देशः लोपस्त आमने पदेस्थितिन लो
पः प्रत्ययात् दात्तत्वं। पादादित्वान्निघाताभावः। छांदोनत्विदुः इति संहितायां दीर्घः। कामस्य वृषादिषु पाठात् आद्युदात्तत्वं। क्रियाग्रहणं कर्तव्यमिति कर्म
१६४ णः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी॥ ॥नवमीमृचमाह॥ ॥ यूयं तत्सत्यशवस आविष्कर्त महित्वना विध्यता विद्युता रक्षः॥ हे सत्यशवसः सत्यबलाः
अन्यैरप्रध्यस्य बला मरुतो यूयं तत् अवधारितपुरसिद्धं युष्मदीयं माहात्म्यं आविःकर्त आविष्कुरुत प्रकाशयत नविद्युता विद्योतमानेन सहितेन महि
त्वेन तेन महात्म्येन रक्षः अस्माकं मुपद्रवकारिणं राक्षसादिकं विध्यत ताडयत नाशयतेत्यर्थः॥ कर्त करोतेर्लोटि बहुलं छंदसीति विकरणस्य लुक्
तमनन मनथनाश्चेति तबादेशः गुणः॥ इदुपधस्य चाप्रत्ययस्येत्याविः शब्दवीसर्जनीयस्य षत्वं। महित्वनाभाव प्रत्ययाद्युदात्तत्वं। आदुक्त्यल्ययेन ना
भावः। उदात्तत्वं च। यद्वा सुपां सुलुगिति तृतीयाया आजादेशः। नकारो पत्नी स्यावि ध्यत व्यध ताडने रव्यनि ग्रहिज्यादिना संप्रसारणं तस्य स्य
सार्वधातुकम पिदितिङित्वे सतिक्ङिति तु गुण प्रतिषेधः इति संहितायां दीर्घः॥ ॥ दशमीमृचमाह॥ ॥ गूहता गुह्यं तमो वियात विश्वमत्रिणं ज्योतिष्क
र्ता यदुश्मसि॥ ॥हे मरुतः गुह्यं गुहायां स्थितं सर्वत्र व्याप्य वर्तमानं तमोंधकारं गूहत संवृणुत यथास्माभिर्न दृश्यते तथा अदर्शनं प्रापयत वि
नाशयत विनाशयतेत्यर्थः। विश्वं सर्वं अत्रिणं अत्तारं राक्षसादिकं वियात विविधं यापयत अस्मात् काशान्निर्गमयत। ज्योतिः सूर्यादिकं यद्वयमुश्मसि
कामयामहे तत् कर्म कुरुत। यद्वा गुह्यं गुहायां शरीरगुणांतर्गतगुहायां हृदये भयं तमो भावरूपाज्ञानं गूहत विनाशयत अत्रिणं पुरुषार्थस्यात्तारं
कामक्रोधादिकं सर्वं विनिर्गमयत। यत् ज्योतिः परतत्त्व साक्षात्काररूपं ज्ञानं कामयामहे प्राणापानादिपंचवृत्तिरूपा हे मरुतः तत् कर्त कुरुत गुहत गु
हू संवरणे शपि ऊदुपधाया गोहः इति ऊत्त्वं उपधायाः कारः स्यात्। यात प्रापणे। अस्मात् अंतर्भावितण्यर्थात् लोट्। अत्रिणं अदेरत्रिन्निति वतिरि
तिप्रत्ययः। उश्मसि। वश कांतौ इदंतो मसि। अदादित्वात् शपो लुक्। ग्रहिज्यादिना संप्रसारणं॥ ॥ इति प्रथमस्य षष्ठे द्वादशो वर्गः॥ ॥प्रत्वक्षस इ
ति षडृचं तृतीयं सूक्तं गोतमस्यार्षं। त्रागतं सारतं तथा चानुक्रांतं॥ प्रत्वक्षसः षड् गोतमो जगतीम् अग्निष्टोमे आग्निमारुते शस्त्रे इदं सूक्तं मारुतं निविद्धा
न अथययथं तमिति खंडे सूत्रितं प्रत्वक्षसः प्रतवसो यज्ञायज्ञा वो अग्नय इति॥ ॥ तत्र प्रथमामृचमाह॥ ॥प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता
अविथुरा ऋजीषिणः॥ जुष्टतमासो नृतमासो अंजिभिर्व्यानज्रे के चिदुस्रा इव स्तृभिः॥ ॥प्रत्वक्षसः शत्रूणां प्रकर्षेण तनूकर्तारः। तक्षू तनूकरणे इत्य
र्थः। प्रतवसः प्रवृद्धबला पेता अतएव विरप्शिनः विविधं शब्दयन्तः यद्वा बहुनामैतत्। महांतो विविधैः शब्दैः प्रशस्यंते अत
एवानानताः आनतिरहिताः सर्वैरप्रह्वा इत्यर्थः। अविथुराः अवियुक्ताः समगणरूपेण संधीभूता इत्यर्थः। ऋजीषिणः तृतीयसवने ऋजीषस्या
भिषवात् तत्र च मरुत्स्तुयंते इति तेषां ऋजीषित्वं। यद्वा ऋजीषेणः पार्जयिता रसानां जुष्टतमासः अतिशयेन यजमानैः सेवितानृतमासः अतिश
येन मेघानां नेतारः एवंभूता मरुतः स्तुभिः नक्षत्रैरस्यादृश्वेः अंजिभिः रूपाभिर्व्यानज्रे केचिद्वर्णानि व्यानज्रे नभसि व्यक्ता दृश्यते तत्र दृष्टांतः केचि १६४
चिदुस्रा इव यथा कचन सूर्यरश्मयो यथा नभसि दीप्यन्ते तद्वत् प्रत्वक्षसः। प्रकर्षेण त्वक्षते तनूकुर्वंतीति प्रत्वक्षसः। तक्ष त्वक्ष तनूकरणे
तिकार कथार पिपूर्वपद प्रकृतिस्वरत्वं अत्यसत्न पूर्वपद प्रकृतिस्वरत्वं च॥ प्रतवसः तव इति बलनाम प्रकृष्टं तवो येषां ते बहुव्रीहौ पूर्वपदप्रकृ

तिस्वरत्वं। विरप्शिनः। रप लप व्यक्तायां वाचि विरपणं रप्शः औणादिकः शक्प्रत्ययः तद्वतो विरप्शिनः अनानताः। अनानता अनानताः प्रह्वी 325/1924
भूताः न आनता अनानताः अव्ययपूर्वपद प्रकृतिस्वरत्वं अविथुराः व्यथ भयचलनयोः अस्य थः संप्रसारणं धः किच्च कुरच् प्रत्ययः अत्र तु बहुलवच
नात् पत्वं नञ्क्रियते पूर्वपदं सामस्वरो जुष्टतमासः नित्यं मंत्रे इति तुः शब्दः आद्युदात्तः नृत आतिशयेन नृ तमप् मसः पिबादनुदात्ते सर्व स्वरः
शिष्यते। अनज्रे अंजू व्यक्ति म्रक्षण कांति गतिषु कर्मणि छंदसि लुङ् लङ् लिटः इति वर्तमाने लिट् अत आदेरिति अभ्यासस्य आत्वं तस्मान्नुड् द्विहल
इति नुट् व्यत्ययेन उपधालोपः इरयोरे तृभिः स्तृञ् आच्छादने क्विप् आगमानुशासनस्यानित्यत्वात् तुगमो भावः॥ ॥ द्वितीयामृचमाह॥ ॥
उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चित्पथा। श्चोतंति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते॥ ॥हे मरुतः उपह्वरेषु उपह
र्तव्येषु अस्माकं सन्निकृष्टेषु नभसः प्रदेशेषु यद्यदा ययिं गतिमंतं मेघं अचिध्वं वर्षणसामर्थ्ये पुनोपचित कुरुथ। किं कुर्वंतः वय इव पक्षिण
इव केन चित्पथा केन चिदाकाशमार्गेण शीघ्रं गच्छंतः नभसि शीघ्रं वर्षणार्थं प्रवर्तमाने मरुद्भिः मेघा उपचीयंत इत्यर्थः। तदानीं कोशाः मेघ
नामैतत् वो युष्माकं रथेषु अश्वा मेघाः श्चोतंति जलं मुंचति यस्मादेवं तस्मात् हे मरुतो यूयं अर्चते युष्मान् हविर्भिः पूजयते सयजमानाय
मधुवर्णं मधुसदृशरूपं स्वच्छं घृतं उदकं आसमंतात्। उक्षत सिंचत अस्मदभिलषितां वृष्टिं कुरुतेत्यर्थः। उपह्वरेषु ह्वृ कौटिल्ये उपह्वरं
ति कौटिल्ये नतिर्यक् गच्छंताविति पस्तरानेभः प्रदेशः पुंसि संज्ञायां घः प्रायेणेधिकरणे वः। अचिध्वं चिनोतेर्वर्तमाने लङ् बहुलं छंदसीति वि
करणस्य लुक्। ययिं यात्रा प्रापणे आदृगमहनजन इति किः प्रत्ययः। यथा अडिभस्य टेर्लोप इति टिलोपः। उदात्त निवृत्तिस्वरेण विभक्तेर
दात्तत्वं। श्चोतंति श्चुतिर क्षरणे संयोगांतस्य लोपः उक्षता उक्ष सेचने लोटि तस्य तबादेशः पित्वे सति ङित्वाभावे घेत्यादिना संहितिकादीर्घः॥ ॥
तृतीयामृचमाह॥ ॥ प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युंजते शुभे। ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयंत धूतयः
॥ ॥यद्यदा खलु एते मरुतः शुभे शोभनाय यक्ष्मुदकाय युज्यते। मेघान् सन्नीकुर्वंति तदानीं अज्मेषु मेघानामुत्क्षेपकेषु एषां मरुतां संबं
धिषु यामेषु मेघानां नियमनेषु सत्सु भूमिः पृथिवी प्ररेजते प्रकर्षेण कंपते तोयहाय हा खलु मरुतः स्वकीयान् रथान् युंजते एषां यामेषु गच्छंति॥
तदानीं एषां रथानां संबंधिषु यामेषु मेघानां पर्वतादेरक्षेपके षुगमनेषु सत्सु भूमिर्भीत्या कंपते तत्र दृष्टांतः विथुरेव यथा भर्ता वियुक्ता
जाया राज्ञो प्रवासिषु सत्सु निरालंबा सती कंपते तद्वत् ते तादृशाः क्रीळयः विहारशीलाः धुनयः चलनस्वभावाः भ्राजदृष्टयः दीप्यमा
नायुधाः एवंभूता मरुतः धूतयः पर्वतादीनि मानधूवंतः स्वतः स्वकीयं महित्वं स्वकीयं महिमानं स्वयमेव पनयंत व्यवहारैरेति प्रकटयं
तीत्यर्थः। अज्मेषु। अज गति क्षेपणयोः अर्तिस्तु सुवित्यादिना विधीयमानो मन् नु इत्युलवचनादस्मादपि इष्यते। वलोदावाधे धातु के
विकल्प इष्य इति वचना द्वेत्वे घञपोरिति विभाषाभावः। नित्वादाद्युदात्तत्वं। रेजते रेज कंपने भ्यसते रेजते इति भयवेपनयोरिति या
॰१६ स्कः। यामेषु। यम उपरमे भावे घञ्। कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वं। यद्वा या प्रापणे इत्यस्मादर्तिस्तु सुवित्या
दिना मन् प्रत्ययः। शुभे शुभ दीप्तौ संपदादिलक्षणः भावे क्विप् सावेकाच इति विभक्तेरुदात्तत्वं। एन युंजते एनेत्यत्र हरे सुस धूप निविडी
त्याय अस्मात् दसो लङ् व्यत्ययेन नेदसत्वं॥ ॥ चतुर्थीमृचमाह॥ ॥ स हि स्वसृत्पृषदश्वो युवा गणो या ईशानस्तविषीभिरावृतः॥

असि सत्य ऋणयावानेद्योस्याधियः प्राविताथा वृषागणाः॥ ॥महि सत्त्वतु मरुद्भ्यः अथा अस्य सर्वस्य जगतः ईशानः ईश्वरः अलिकमव
भा० म० तिर्धीद्रुह्मः सत्यस्य यमेव सरननस्यः ऋषिस्य मरुद्भ्यः स्प्रेरकोतिपय इष्यः पृषत्यः श्वेतबिंदुविता मरुत्योश्वरानीयायस्य मनथोकः युवानि
त्यतरणः तविषीभिरन्येषामसाधारणैर्बलैः आवृतः परिवेष्टितः सत्यः सत्कर्माद्भिः ऋणयावरत्नोतणाद्यणस्यापगमयिताव द्रुतस्य धनस्य दातेत्य
१६५ र्थः। अनेद्य प्रशस्यनामैतत् सर्वैरनिंदितः। वृषाज्ञस्यानावर्षिता एवं भूतो मरुद्भ्यः अस्याधियः अस्मदीयस्यास्य कर्मणः अथानंतरं प्राविताभिप्र
वर्धेणरक्षिता भव आधा। सर्वा सत्तुगिति षष्ठ्यायाआदेशः। हलत्तोपइती इमइदूपस्यलोपः ईशानः ईशऐश्वर्यइत्यस्मानादीलिकश्वानः। तस्यत्त
सार्वधातुकत्वाभावेनचिक्त्वेरणादात्त्वं। अथवाईशानः इत्यत्रईषाअक्षरादित्वात्प्रकृतिभावः असि पुरुषव्यत्ययः ऋणयावयाप्रापणे इत्यस्मादंत
भावितण्यर्थादतो मनिन्क्विन्विनिपः। अनेद्यः णिदिकुत्सायां न्नहलो ण्यदिति ण्यत्। अगमानुशासनस्यानित्यत्वानुमभवेत्तुपधगुणः नञ
समासेन्यय पूर्वपदप्रकृतिस्वरत्वं॥ ॥पंचमीमृचमाह॥ ॥पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्रजिगाति चक्षसा॥ यदीमिंद्रं शम्य
ऋक्वाण आशतादिन्नामानि यज्ञियानि दधिरे॥ ॥प्रत्नस्य चिरंतनस्य पितुः अस्माकं जनकस्य राहूगणस्य सकाशात् यज्जन्म तेन वयं शमसि श्रूमः
वक्ष्यमाणं अस्माकं एतान् पिता उपदिष्टवान् अतोब्रवीम इत्यर्थः। कोसौ वृत्तांत इति चेत् उच्यते सोमस्य यज्ञे अभिषुतस्य सोमद्रव्यस्य चक्षसा प्रका
शमानया जिह्वा इत्यादि सहितान् जिह्वा स्तुतिरूपवाक् प्रजिगाति मरुतः प्रकर्षेण प्रहरण भागरोला हविरिनयस्त्वेत्येवं रूपया स्तुत्या युक्ताः सन्तः आश
त प्राप्नुवन पर्यत्याह्मः आदित्यं एवमिंद्रं प्राप्यनं तर मेव यज्ञियानि यज्ञार्हाणि इंद्रवान्यादि इंद्रेत्येनमादीनि नामानि इंद्रसकाशाल्लुब्धा दधिरे धा
रयंतः तस्मादेवायज्ञे सोमान्हूतिः क्रतिश्च क्रियते। शमीशमीतिकर्मनाम सप्तम्येकवचने छांदसई कारलोपः। ऋक्वाणः ऋच स्तोताः संपदा
दिलक्षणो भावेक्विप छंदसीवनिपाविति मत्वर्थीयो वनिप अंत्यविकारः छांदसः यद्वा अयस्मायादिषु वचिदुर्भयं भवतीत्यत्र वातसम
त्वभावः ऋक्वनेत्यादि विवपदत्वानुर्लभत्वात्स्थाभावः आशतरूढिश्च दुरूक्तं छंदसीतिविकरणस्य लुक्। यज्ञियानि यज्ञविग्भ्यां घखजाविति अ
र्हार्थेघः॥ ॥षष्ठीमृचमाह॥ ॥श्रियसे कं भानुभिः संमिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः॥ ते वाशीमंत इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धा
म्नः॥ ॥ते पूर्वोक्ता मरुतः भानुभिर्भानुशीलैर्दीप्यमानैः सूर्यरश्मिभिः सह कं सुखं उदकं श्रियसे श्रयितुं प्राणिभिः सेवितुं संमिमिक्षिरे सम्यक् मेदुमिच्छंति
पृथिवीं उदकेन सम्यक् सेक्तुमिच्छंति एवं विधिनुत्वा ते मरुतः ऋक्वभिः स्तुतिमद्भिर्ऋत्विग्भिः सह सुखादयः शोभनस्य हविषो भक्षयितारो भवंति।
वाशीतिवाङ्नाम शोभनवास्तुतिलक्षणयावाचोपेताः इष्मिणो गतिमंतः अभीरवो भयरहितास्ते मरुतः प्रियस्य सर्वाभिमतस्य मारुतस्य म
रुत्संबंधिनो धाम्नः स्थानस्य सर्वाभिमतमरुत्संबंधि विद्रिः संस्थानं विदेलब्धवंतः। श्रियसे तुमर्थे से सेनितिक सन् प्रत्ययः मिमिक्षिरे मिह सेचने अ
स्मादिच्छासनंतत्लिटि अमंत्र इति निषेधादाम भावः। व्यत्ययेनात्मनेपदं सुखादयः खाद भक्षणे णादि कुप्रत्ययः शोभनः खादिः भक्षणं ३६६
येषां ते अस्त्यभिरुत्तरपदांतोदात्तत्वं इष्मिणः इषिगतौ इषियुधीत्यादिना मक्तलोमत्वर्थीय इनिः विद्रे विद्लृलाभे लिटि द्विर्वचनप्रकरणे छंदसि
वेति वक्तव्यमिति द्विर्वचनाभावः इयोरदतिरेभावः॥ ॥इति प्रथमस्य पष्ठेनवमो वर्गः॥ ॥आ विद्युन्मद्भिरिति षडृचं चतुर्थं सूक्तं। अत्रानुक्रम्यते।
आ विद्युन्मद्भिर्घोलेप्रस्तारपंक्तिः पंचमी विराड्रूपाति पूर्ववदृषिदेवते आद्या पंचमी च द्वे प्रस्तारपंक्ती आद्यो पादौ ज्ञागतौ ततो गायत्रावितिथत्स्याना

यस्याः सा प्रस्तारपंक्तिरुक्तं च। प्रस्तारपंक्तिः परत इति अस्यायमर्थः आगतौ गायत्रौ चेदनुवर्तते। यदि पुरतः पुरस्ताद्द्वौ जागतौ पादौ स्यातां अंत्यौ गा 327
यत्रौ सा प्रस्तारपंक्तिरिति। एतत्पदिन्येवा पंचमी विराड्रूपा आदितस्त्रयः पादाः एकादशकाः अंत्याष्टकः सा विराड्रूपेत्युच्यते विनियोगोलैंगिकः॥ ॥ 1924
तत्र प्रथमामृचमाह॥ ॥आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः॥ आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः॥ ॥हे मरुतः
मितं मंतरिक्षं प्राप्य वर्तंतीति मरुतः यद्वा अमितं भ्रमं ईडाव्य कारिणः अथवा मितं रवानिर्मितं मेघं प्राप्य विद्युदात्मना रोचमानाः अ
थवा महत्यंतरिक्षे द्रवंतीति मरुतः ये मध्यस्थाने देवगणाः समाम्नाताः ते सर्वे मरुतः आम्नायंते तथा चाहुः सर्वा स्वामिमध्यमस्थाना पुमान्वायुश्च
सर्वगः गणाश्च सर्वे मरुत इति वृथानुशासनमिति पौराणिकास्त्वाचक्षते मारीचात्कश्यपात्सप्तगणा। सप्त कांश्चांने पंचाशत्संख्याका मारुतोजन्तिरे इ
ति पूर्वं भूता हे मरुतः रथेभिः आत्मीयैः रथैः आयात अस्मदीयं यज्ञमागच्छत कीदृशैः रथैः विद्युन्मद्भिः विद्योतनं विद्युत् विशिष्टदीप्तियुक्तैः स्वर्कैः स्वं
चनैः शोभनगमनयुक्तैः यद्वा शोभनमर्को अर्चनं स्तुतिर्येषामस्ति तादृशैः अथवा शोभनदीप्तियुक्तैः ऋष्टिमद्भिः ऋष्टयः शक्तिरूपाण्यायुधानि तद्भिः
अश्वपर्णैः अश्वानां पतनं गमनं येषामस्ति तादृशैः यद्वा रंभणशीला मेघा रथ्याः तेः सह संतरिक्षे वर्षणार्थमागच्छत कीदृशैः विद्युता ताडितानं
इदृः स्वर्कैः शोभनमानैः। ऋष्टिमद्भिः अर्षणगमनं तद्भावना रयुक्तैः अश्वपर्णैः अश्वं व्याप्तं पर्णं पतनं गमनं येषां अंतरिक्षं प्राप्य वर्तमाने
रित्यर्थः। हे सुमायाः मायेति कर्मणो ज्ञानस्य च नामधेयं शोभनकर्माणः शोभनप्रज्ञा वा मरुतः वर्षिष्ठया प्रवृद्धया इषा अस्मभ्यं दातव्येनान्नेन
सह नोस्मान् प्रति वयो न पक्षिण इव शीघ्रं आपतत आगच्छतेत्यर्थः। अत्र निरुक्तं। अथातो मध्यस्थाना देवगणास्तेषां मरुतः प्रथमागामिनो भवंति मरु
तो मितराविणो वा मितरोचिनो वा महद्द्रवंतीति वेति। विद्युन्मद्भिर्मरुतः स्वर्कैः स्वंचनैरिति वा स्वर्चिभिरिति वा रथैर्यात न ऋष्टिमद्भिरश्वपर्णैरश्वपत
नैर्वर्षिष्ठेन च नो न्नेन वय इवापतत समुत्याः कल्याणकर्मणो वा कल्याणप्रज्ञा वेति विद्युन्मद्भिः यवादेराकृतिगणत्वेन विद्युच्छब्दस्य यवादिपाठात्मा
वादयवादिभ्यश्चेत्यत्रानुवर्तनेन नि इति मतुपो वत्वं न प्रवर्तते। ऋष्टिमद्भिः ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। अश्वपर्णैः अश्रूव्याप्तौ। अश्नु
वीत्यादिना क्वन प्रत्ययः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वर्षिष्ठया वृद्धशब्दात् आतिशायनिके इष्ठनि प्रियस्थिरेत्यादिना वर्षादेशः पप्तत पप
तृगतौ लुङि स्थानत्वं तूरज्ञादेशः पतः पुमितिपुमागमाः॥ ॥द्वितीयामृचमाह॥ ॥तेरुणेभिर्वरमा पिशंगैः शुभे कं यांति रथतूर्भिरश्वैः॥ रुक्
मो न चित्रः स्वधितीवान्पव्या रथस्य जंघनंत भूम॥ ॥ते पूर्वोक्ता मरुतः अरुणेभिररुणवर्णैः पिशंगैः पिंगलवर्णैः उभयवर्णोपेतैः रथतूर्भिः
रथस्य प्रेरयितृभिः अश्वैः वरं देवानां वरीतारं कं उत्कृष्टितारं एवं तं यजमानं अपांति आगच्छंति किमर्थं शुभे तस्य शोभां कर्तुं अथवा स्फुभे उ
दकाय उदकार्थमित्यर्थः तेषां मरुतां गणः रुक्मो न रोचमानं सुवर्णमिव चित्रः अतिशयेन दर्शनीयः स्वधितीवान् स्वधितिरिति वज्रनाम शत्रूणां
संहारकेनायुधेनोपेतः एवंविधिगुणोपेताः मरुतः रथस्य पव्या चक्रधारणया भूम भूमिं जंघनंत अत्यर्थं घ्नंतिस्तोतृरक्षणार्थमागतानां ते
षां मरुतां भारमसहमाना भूमिरितिपीडिता वभूवेत्यर्थः। वरं वियंते देवाः अनेनेति वरः ग्रहवृद्निश्चिगमश्चेति करणे अप। कं केर्गैरादृष्टेका
यतीति कः बहुलवचनात् कप्रत्ययः रथतूर्भिः तुरत्वरणे रथं तुरतित्वरायुक्तं कुर्वंतीति रथतुरः क्विप् चेति क्विप् भिस्सिहलिवतिदीर्घत्वं। पव्या

भा॰ प्र॰ पवीरथनेमिर्भवतीति यास्कः। पूङ् पवने अस्मादच इति प्रत्ययः। इत्ययण इति विभक्तेरुदात्तत्वं अंत्यनेत दंतेर्यङ् नदुतं मानो छांदसो लुक् छंदस्य
भयथेति ग्राप आर्धधातुकत्वाद्दतो लोपे। भृमभृमित्राद्याद्युत्तरस्यामः सर्वांसलुगिति ग्रादेशः। छांदसात्र स्वत्वं॥ ॥तृतीयामृचमाह॥ ॥श्रिये
२६६ कं वो अधितनूषु वाशीर्मेधा वनानकृणवंत ऊर्ध्वा। युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयंते अद्रिं॥ ॥हे मरुतो वो युष्माकं तनूषु श
रीरेषु अंसप्रदेशेषु वाशीः शत्रूणामाक्रोशयित्री मारयित्री आयुधश्रिये कं श्रियार्थं वर्तंत इति शेषः। कमित्येतत्पादपूरणं अथापि पदपूरणाः इ
मीमिद्विति। ता इत्थामरुतः वनानि उच्छ्रितान्वृक्षसदृशान् मेधा मेधान् यज्ञान् ऊर्ध्वान् एकाहाहीनसत्ररूपेणोच्छ्रितान् कृणवंत यजमा
नैः कारयंति हे सुजाताः शोभनजननयुक्ता मरुतः युष्मभ्यं युष्मदर्थं कं सुखकरं अद्रिं सोमाभिषवप्रवणं ग्रावाणं तुविद्युम्नासः प्रभूतध
नाय जमानाः धनयंते धनं कुर्वंति युष्माकं यागाय ग्रावभिरभिषुण्वंतीत्यर्थः। वाशीः शत्रूणां भयोत्पादनेन आक्रोशं ग्रावकरणं वाशः तत
श्च इति ईकारः। व्यत्ययेनाद्युदात्तत्वं मेधासःपांसुलुगिति असोऽसेदेशः। वनानि शब्दं शब्दरूपं हुलमिति लोपः कृण्वंत
कृवि हिंसाकरणयोश्च लङि व्यत्ययेनात्मनेपदं धिन्विकृण्व्योरचेत्युप्रत्ययः पुनरपि व्यत्ययेनांतादेशः। छंदस्यभयथेत्यार्धधातुकत्वेन सस्यादि लाकुण
अवादेशः। ऊर्ध्वा पूर्ववदुपदेशः। धनयंते धनशब्दात्तत्करोतीति णिच्॥ ॥चतुर्थीमृचमाह॥ ॥अहानि गृध्राः पर्यावआगुरिमां धियं वार्कार्यां
च देवीं। ब्रह्म कृण्वंतो गोतमासो अर्कैरूर्ध्वं नुनुद्र उत्सधिं पिबध्यै॥ ॥कृष्ठिर्न गोतमेः स्तुतामरुतः तेभ्यो गोतमेभ्यो देशांतरे वर्तमानं कूपमु
त्सायानीयप्रदनुः एतद्दृष्ट्वा कश्चिद्धविर्भृते हे गोतमाः गृध्राः अभिकांक्षायुक्तान् वो युष्मान् आ अहानि शोभनोदकोपेतानि दिनानि पर्यागुः
पर्यागतानि परितः आभिमुख्येन प्राप्तानि प्राप्य च वार्कार्यां वार्भिरुदकैर्निःपाद्यां धियं ज्योतिष्टोमादिलक्षणं कर्म च देवीं द्योतमानं अकृ
र्वन् येषु ह सः सब्रह्म ब्रह्म हविर्लक्षणमन्नं अर्कैः मंत्रसाध्यस्तोत्रैः सह कृण्वंतो मरुद्भ्यः कुर्वंतो गोतमासो गोतमा ऋषयः उत्सधिं उत्सो
ऽत्र प्रवाहोऽस्मिन्धीयत इत्युत्सधिः कूपः तं पिबध्यै पानाय पानार्थं ऊर्ध्वं नुनुद्रे ऊर्ध्वं वर्तमानं कूप उत्थानवंतः एतदीयस्तोत्रैः स्तुता मरुतः
कूपमुत्थानवंतः इति यत्तदर्थे तदीयस्तोत्रेवकारितस्मिन्ये ते प्रपचर्यंते गृध्रा गृधु अभिकांक्षायां सत्यामगृधिभ्यः क्रन्निति क्रन्प्रत्ययः
सर्वांसलुक् पोभवंतीति ग्रान्तोऽजसनित्वादाद्युदात्तत्वं। अगुः एतेर्लुङि इणो गालुङीति गादेशः॥ आत इति सर्जुस वार्कार्यां दुकृञ् कर
णे कुहलोर्ण्यत् वार्भिः कार्या वार्कार्या त्रिचुकादित्वादुत्तरस्य पदांतोदात्तत्वं नुनुद्रे णुद प्रेरणे इरयो रे इति रे आदेशः उत्सधि कर्मधिकर
णे चेति कि धातोरधिकरणे कि प्रत्ययः पिबध्यै पापाने तुमर्थे सेसेनिति अध्यैन प्रत्ययः पात्रेत्यादिना पिबादेशः॥ ॥पंचमीमृचमाह॥॥
एतत्त्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः। पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतो वराहून्॥ ॥हे मरुतः एतद्योजनं युष्मत्तेनं देवलति यो
यजनमेतत्सकामाध्यं स्तोत्रं त्यत्तत्प्रसिद्धिं अन्यदुक्तस्तोत्रमिव अचेति भवेर्यत्तर्ययतद्युष्मदर्थेन यदेनं सकरूपं स्तोत्रं त्यत्तकृषिः स ३६६
स्वर्ह उच्चारितवान् स्वतुल्यं कुर्वन्हिरण्यचक्रान् हिरण्मयचक्ररथारूढान् हितरमणीयकर्मयुक्तान्वा अयोदंष्ट्रान् दृढ़तातिदंष्ट्राचक्रधारा आया
मयी भिश्चक्रधाराभिर्युक्तान् यं यद्दशनसाधनाः अयसो दंष्ट्रा अयोमया दंष्ट्रा येषां तान्विधावतो विविधमितस्ततः प्रवर्तमानवराहान्वरात्या
त्नस्य ग्राहा हंतृनुयद्वा उत्कृष्टस्य च वस्य दकस्याहंतं अथवा उत्कृष्टानां देवानामाहातृन् वरस्या हविषो भक्षयितृन्वा एवंभूतान्मरुतः पश्य

न सम्यक् जानन् गोतमो यत् स्तोत्रं कृतवान् तदेतत्सर्वोत्कृष्टं सदस्माभिः सर्वैरुपलभ्यत इत्यर्थः। अत्र निरुक्तं अथाप्येते माध्यमका देवगणा वराहव
उच्यंते। पश्यन्हिरण्यचक्रानिति। अचेति चिती संज्ञाने छांदसो वर्तमाने कर्मणि लुङ् स्वसःस्वृ शब्दोपतापयोः लिटि द्वितिपि वहुलं छंदसीति इत्पः
श्रुः गुणो हलङ्या वयद्दितलोपः धातुस्वरेणांतोदात्तत्वं वराहून्वर आहोपपदाद्रू पूर्वा हरतेर्वा कृत्तरेनेवंत्रिहोतेरदनार्थाद्वाहु इत्येतस्य
निष्पत्तिरिति स्कंदस्वामी। अस्य चरपोदृशास्त्रिवादभिमतसिद्धिः॥ ॥षष्ठीमृचमाह॥ ॥एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वा
णी। अस्तोभयद्वृथासामनु स्वधां गभस्त्योः॥ ॥हे मरुतः स्या से यास्मदीया स्तुतिर्वो युष्माकमनुभर्त्री युष्माननुहरंती युष्मद्गुणसदृश
प्रति ष्टोभति प्रत्येकं स्तौति स्तोभति स्तुतिकर्मा स्तवा घातोन वाणीनाद्यः संप्रत्यर्थे तदुक्तं यास्केन आभिर्गिर्भिरस्य पमार्यस्य संप्र
त्यर्थे प्रयोग इति। इदानीमृत्विक्संबंधिनी वागपि वृथा अनायासेन आसां अभिर्गिर्भिर स्तोभयत अस्तौत इदानीमित्युक्तेकं देत्याह गभ
स्त्योरस्मदीययोर्बाह्वोः स्वधांअंनं नाम तत यदा वहुविधमन्नं मरुतः स्थापयंति तामनुलक्ष्येत्यर्थः अनुभर्त्री हृञ् हरणे तृच् ऋन्नेभ्य इति ङी
प्यार स्मदीययोर्बाह्वोः ... [illegible] ... पउदात्तत्वं णो हलपूर्वादिति मघाउदात्तत्वं॥ ॥इति प्रथमस्य षष्ठे चतुर्दशो वर्गः॥ ॥आ नो भद्रा इति दशर्चं पंचमं सूक्तं गोतमस्यार्षं वैश्वदेवं आ
दितः पंच सप्तमी च जगत्यः षष्ठी स्वस्तिन इंद्र इत्येषा विराट्स्थाना नवकौ वैराजस्त्रिष्टुभश्चैकलक्षणयोगात् अवश्यादित्तिस्त्रिष्टुभः तथा चानु
क्रांतं आ नो दश वैश्वदेवं तु पंचस्याद्याः सप्तमी जगत्यः षष्ठी विराट्स्थानेति। अग्निष्टोमे वैश्वदेवशस्त्रे इत माद्यं सूक्तं वैश्वदेवनिविद्धानीयं सा
क्रांतं आ नो दश वैश्वदेवं तु पंचम्याद्याः ... तु प्रकृतौ विकृतौ च वैश्वदेवशस्त्रस्य परिधानीया तथा च सूत्रितं। आ नो भद्राः क्रतवो यंतु विश्वत इति नवैश्वदेवमिति अदितिर्द्यौरदितिरंतरिक्ष
मिति परिदध्यात सर्वत्र वैश्वदेव इति आश्वलायन भवति। सदैव पंचजनीयया परिदध्यादितिम हाव्रते निष्केवल्ये एतत्सूक्तं। तथा पंचमारण्यके
सूत्र्यते आ नो भद्रेपंचतस्य तस्य स्थान इति॥ ॥तत्र प्रथमामृचमाह॥ ॥आ नो भद्राः क्रतवो यंतु विश्वतोऽदब्धासो अपरीतास उद्भिदः। देवा नो यथा
थासदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे॥ ॥नोऽस्मान् क्रतवो ऽग्निष्टोमादयो महायज्ञा विश्वतः सर्वस्मादपि दिग्भागात् आ यंतु कीदृशाः क्रतवः भ
द्राः समीचीनफलसाधनत्वेन कल्याणाः भजनाया वा अदब्धासः असुरैरहिंताः अपरीतासः शत्रुभिरपरिगताः अप्रतिरुद्धा इत्यर्थः उद्भिदः श
त्रूणामुद्भेत्तारः ईदृशाः क्रतवः अस्मांस्तथाग च्छंतु अप्रायुवाः अप्रगच्छंतः स्वकीयं रक्षितव्यं अपरित्यजंतः अत एव दिवेदिवे प्रतिदिनं संरक्षितारोर
क्षां कुर्वंतः एवं गुणविशिष्टा यास्सर्वे देवा नोऽस्माकं सदमित् सदैव वृधे वर्धनाय असन् भवंतु अदब्धासः दंभु दंभे दंभो हिंसानिष्ठायायस्य
विभाषितो इति प्रतिषेधः। नञ्समासेऽव्ययपूर्वपदे प्रकृतिस्वरत्वं अपरीतासः इण् गतौ पूर्ववत् कर्मणि निष्ठा उभयत्रासेरसुक्। उद्भेत्तृ।
संपदादिलक्षणो भावे क्विप् सावेकाच इति विभक्तेरुदात्तत्वं। असन् असभुवि लेट्याडागमः। बहुलं छंदसीति शपो लुक् अभावः। नस्यादि लातश्च
सोरत्तोपः इत्यकारलोभावाः। अप्रायुवः इण् गतौ अस्मात् प्रपूर्वान् छंदसीण इति उण्प्रत्ययः नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं आसक्तसा
द्विपुछंदसि वा वचनमिति गुणस्य विकल्पितत्वादभावे तन्वादित्वादुवङ्॥ ॥द्वितीयामृचमाह॥ ॥देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो
निवर्ततां। देवानां सख्यमुपसेदिमा वयं देवान आयुः प्रतिरंतु जीवसे॥ ॥भद्रा कल्याणी भजनीया वा देवानां सुमतिः शोभना मतिरनुग्र

3-29
1924

द्दाति काबु खिरस्माकमस्तिति शेषः कीदृशांक्रतूयतां क्रतुं अर्जं वयुक्तं सम्यगनुष्ठातारं यजमानं आत्मान उक्षतां यथा देवानां रातिर्दानं नोस्मान अभिमु
आ०७० ख्येन नितावर्ततां तदभिमतफलप्रदानमपि अस्माकं भवत्वित्यर्थः वयं च तेषां देवानां सख्यं सखित्वं सख्युः कर्म वा उपसेदिम प्राप्नुवाम तादृशा दे
वा नोस्माकमायुर्जीवसे प्रतिरंतु वर्धयंतु भद्राः कल्याणेनमस्य च क्षत्रं द्रायेत्याद्वारकृतत्वं यां तानि पातितः क्रतु यताः क्रतुमात्मन इच्छति क्रतूयतिस्य
१६७ आत्मनः क्यच न च इंनालुदः उत ऊ तु रनुम इत्या आदि भक्तेः रदान त्वं रातिः रादाने मंत्रे वृषेति क्तिन उदात्तत्वं सख्यं सख्युर्य इति भावे यः मंथिवाय प्रत्ययः से
दिम उ ति षद्लृ विशरणगत्यवसादनेषु छंदसि लुङ्लङ्लिट इति प्रार्थनायां लिट सत्त्वस्याभिमितिकत्वेनालिटि परत आदेशादिताभावात अतएव हल्मध्ये उ
त्वेनाभ्यासलोपा अस्य यामपि द्रश्यन उक्षितायां दीर्घत्वं प्रतिरंतु प्रपूर्वस्तिरतिर्वर्धनार्थः तथा च यास्कोप्याच ख्यातादिवानामस्य्मुपसीदिम वयं सखा
न आयुः प्रवर्धयंतु चिरंजीवनायेति॥ ॥तृतीयामृचमाह॥ ॥तान्पूर्वयानिविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधं॥ अर्यमणं वरुणं सोममश्वि
ना सरस्वती नः सुभगा मयस्करत्॥ ॥तान विश्वान्देवान पूर्वया पूर्वकालीनया नित्यया निवेदा वेदात्मिका या वाचा निविदिति वाङ्नामसु पठितानि
विद्। विश्वेदेवाः सोमस्य मत्सन्नित्यादिकया विश्वदेव्यानिविदा वयं हूमहे आह्वयामः देवानिति यत्सामान्येनोक्तं तदेव विविच्य ते भगं भजनी
यं द्वादशानामादित्यानामन्यतमं मित्रं प्रमीतेस्त्रायकं अहरभिमानिनं देवं मित्रं वा अहरिति श्रुतेः अदितिं अखंडनीयां मदीनां देवमाता
रं दक्षं सर्वस्य जगतो निर्माणे समर्थं प्रजापतिं यद्वा प्राणरूपेण सर्वेषु प्राणिषु व्याप्यावर्तमानं हिरण्यगर्भं प्राणो वै दक्ष इति श्रुतेः। अस्रि
धं सोपनरहितं सर्वदा यक्ररूपेण वर्तमानं मरुद्गणं अर्यमणं अरीन संदेहादीन मृगान यच्छति नियच्छतीत्यर्थः स सूर्यः असौ वा आदित्योर्य
मेति श्रुतेः तं वरुणं वृणोति पापकृतः स्वकीयैः पाशैरावृणोतीति शत्रुं भिमानी देवो वरुणः श्रूयते च वारुणी रात्रिरिति सोमं इधा आत्मनं वि
भज्य पृथिव्यां लतारूपेणादिवि च चंद्रात्मना देवतारूपेण वर्तमानं अश्विना अश्ववंतौ यद्वा सर्वं व्याप्नुवंतौ तत्र यथा च यास्कः। अश्विनौ यद्व्यश्नु
वाते सर्वं रसेनान्यो ज्योतिषान्योश्चैरश्विनावित्योर्णवाभस्तत्कावश्विनौ द्यावापृथिव्यावित्येके होत्रावित्येके सूर्याचंद्रमसावित्येके राजानौ पु
ण्यकृतावित्यैतिहासिका इति एवंभूतान सर्वान्देवान अस्माद्रक्षणार्थमह्वयाम इति पूर्वत्र संबंधः अस्माभिराहूता सुभगा शोभनधनोपेता
सरस्वती नोस्मभ्यं मयः सुखं करत करोतु हूमहे ह्वेञो लिटि कत्यनु ऋत्वो बहुलं छंदसीति संप्रसारणं परपूर्वत्वे हल इति दीर्घत्वं। बहुलं छंदसी
ति शपो लुक अस्रिधं स्त्रिधु शोषणे संपदादि लक्षणो भावे क्विप् बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। मयस्करत्। कृञो लेटि अडागमः
बहुलं छंदसीति विकरणस्य लुक् अतः कृकमीति विसर्जनीयस्य सत्वं॥ ॥चतुर्थीमृचमाह॥ ॥तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पि
ता द्यौः॥ तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवं॥ ॥वातो वायुः तद्भेषजमौषधं नोस्मान वातु प्रापयतु तद्भेषजं मयोभु
मयसः सुखस्य भावयितृ माता सर्वेषां पृथिवी जननी भूमिरपि तद्भेषजं अस्मान प्रापयतु पिता वृष्टिप्रदानेन सर्वेषां रक्षिता द्यौर्लोकोपि तद्भेष १६७
जमस्मान प्रापयतु सोमसुतः सोमाभिषवं कुर्वंतः मयोभुवः मयसो योगफलस्य सुखस्य भावितारो ग्रावाणः अभिषवसाधनाः पाषा
णाश्च तद्भेषजमस्मान प्रापयंतु हे धिष्ण्या धिषणा बुद्धिः तदर्हावश्विनौ युवां तद्भेषजं शृणुतं आकर्णयतं तद्भेषजमस्मभ्यं दित्सु प्रा
प्यतेत द्भेषजं देवानां भिषजौ युवां अस्माकमनुकूलं यथा भवति तथा जानीतमित्यर्थः मयोभु इत्यत्र पुंसक प्रातिपदिकस्येति हस्वत्वं॥ वातु

331/1924

वा गतिगंधनयोः अंतर्भावितण्यर्थात प्रार्थनायां लोटः सोमसुतः सोमे सुञ इति भूते क्विप् धिष्ण्या धिषणात्राम्यादर्हार्थे छंदसि चेति यः वर्णलो
पः छांदसः सुपां सुलुगिति आकारः॥ ॥पंचमीमृचमाह॥ ॥तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम्॥ पूषा नो यथा वेदसाम
सद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ ॥पूर्वार्धेनेंद्रस्य ते अपरार्धेन पूषा ईशानमैश्वर्यवंतं अतएव जगतो जंगमस्य प्राणिजातस्य तस्थुषः स्थावर
स्य च पतिं स्वामिनं धियंजिन्वं धीभिः कर्मभिः प्रीणयितव्यमेवंभूतमिंद्रं अवसे रक्षणाय वयं हूमहे आह्वयाम पूषा नोस्माकं वेदसां धनानां वृ
धे वर्धनाय रक्षिताय था असत येन प्रकारेण भवति तेनैव प्रकारेण अदब्धः केनाप्यहिंसितः पूषा स्वस्तये अस्माकमविनाशाय पायुः रक्षि
ता भवंतु तस्थुषः तिष्ठतेर्लिटः क्वसुः षष्ठ्येकवचने वसोः संप्रसारणमिति संप्रसारणं शासिवसिघसीनां चेति षत्वं षष्ठ्याः पतिपुत्रेति विसर्जनीय
स्य सत्वं धियंजिन्वं जिवि प्रीणनार्थः कृत्यल्युटो बहुलमिति बहुलवचनात खच् खचि एकाचोम् प्रत्ययवच्चेत्यडागमः असत् अस भुवि लेटि अडाग
मः बहुलं छंदसीति शपो लुगभावः पायुः पा रक्षणे कृवापाजीत्युण् ॥ स्वस्तये सु पूर्वादस्तेर्भावे क्तिन् छंदस्युभयथेति तस्य सार्वधातुकत्वाद
स्तेर्भूरिति भूभावरहितत्वाद्वर्जं॥ ॥इति प्रथमस्य षष्ठे पंचदशो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः॥
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ ॥वृद्धश्रवाः वृद्धं प्रभूतं श्रवः श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य तादृश इंद्रो नो
स्माकं स्वस्ति अविनाशं नानाम स्वस्ति अविनाशं दधातु विद धातु विद धातु विश्ववेदाः विश्वानि वेत्तीति विश्ववेदाः यद्वा विश्वानि सर्वाणि वेदां
सि ज्ञानानि धनानि वा यस्य तादृशः पूषा पोषको देवः नोस्माकं स्वस्ति विधातु अरिष्टनेमिः नेमिरित्यायुधमा अरिष्टो अहिंसितो नेमिर्यस्याय
द्वा रथचक्रधारा नेमिः यत्संबंधिनो रथस्य नेमिर्न हिंस्यते सोरिष्टनेमिः एवंभूतस्तार्क्ष्यः तृक्षस्य पुत्रो गरुत्मान नोस्माकं स्वस्ति अविनाशं विदधा
तु तथा बृहस्पति बृहतां देवानां पालयिता नोस्माकं स्वस्ति अविनाशं विदधातु वृद्धश्रवाः बहुव्रीहौ पूर्वपद प्रकृतिस्वरत्वं॥ विश्ववेदा विद ज्ञाने
विद्लृ लाभे आभ्यामसुन प्रत्ययांतो वेदस्शब्दः बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। तार्क्ष्यः। तृक्षस्यापत्यं गर्गादिभ्यो यञ् ञित्यादिर्नि
त्यमित्याद्युदात्तत्वं। अरिष्टनेमिः। वरिष्टा अव्यया पूर्वपद प्रकृतिस्वरत्वं। अरिष्टनेमिर्यस्य स तथोक्तः बृहस्पतिः तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्चेति सुडागमे वने
स्पत्यादिषु चेति पूर्वोत्तरपदयोर्युगपत प्रकृतिस्वरत्वं॥ ॥सप्तमीमृचमाह॥ ॥पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः॥ अ
ग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह॥ ॥पृषदश्वाः पृषद्भिः श्वेतबिंदुभिर्युक्ता अश्वा येषां ते तथोक्ताः पृश्निमातरः पृ
श्निर्नानावर्णा गौर्माता येषां शुभं शोभनं यातीति गच्छंतीति शुभंयावानः शोभनं गंतार इत्यर्थः विदथेषु यज्ञेषु जग्मयो गंतारः अग्निजिह्वाः अग्ने
र्जिह्वायां वर्तमानाः सर्वेहि देवा हविः स्वीकरणाय अग्नेर्जिह्वायां वर्तंते ता स्वाता ह्यध्वमा। मनवः सर्वस्य मंतारः सूरचक्षसः सूर्यस्य प्रकाशरूप
चक्षसः प्रकाशो येषां ते एवंभूता मरुतः मरुत्संज्ञका विश्वे देवाः सर्वे देवा नोस्मान इहास्मिन्काले अवसा रक्षणेन सह आगमन् आगच्छंतु शुभंयावा
नः यात्रा प्रापण अतोमनिनिति वनिप् तापुरस्य रुति बहुलवचनाद्धितो यायालुक गमन गमेः प्रार्थनायां लेट्यडागमः इतश्चलोप इतीकारलो
पः बहुलं छंदसीति शपो लुक् अस्ति सोम्यचरस्तृतीया सवनं तेनचरणा देवता इत्याज्ञो षतस्मिन बहुव्रीहि तमवनीय तस्मिन यपदकतारस्य
कीया का याद्दृश्या सायादिन र्यत दनीभद्रमित्येका पठितव्या तं सामद्रुतिस्वं इंतथे च सत्रितं गायामीमन तद्रूयमस्मस्य धारयाम सिभद्रं

कर्णेभिः शृणुयाद्देवा इति चेतिमहानाम्नीभवतामत्राभिरिति॥ ॥तामेतां सूक्तेऽष्टमीमृचमाह॥ ॥भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमा
आ०प्र० क्षभिर्यजत्राः॥स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥ ॥हे देवा यागादिगुणयुक्ताः सर्वे देवाः कर्णेभिः स्मदीयैः श्रोत्रैः भद्रं भज
३६८ नीयं कल्याणवचनं शृणुयाम युष्मत्प्रसादात् श्रोतुं समर्थाः स्याम अस्माकं बाधिर्यं कदाचिदपि माभूत् तदेव यजत्राः यागेषु चरुपुरोडाशादिभिः यष्टव्या
देवाः अक्षभिरक्षिभिरात्मीयैश्चक्षुर्भिः भद्रं शोभनं वस्तु पश्येम द्रष्टुं समर्थाः स्याम। अस्माकं दृष्टिप्रतिघातोऽपि माभूत् तथा स्थिरैर्दृढैरंगैः हस्त
पादादिभिरवयवैस्तनूभिः शरीरैश्च युक्ता वयं तुष्टुवांसः युष्मान् स्तुवंतः यदायुः पोडशाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा देवहितं
देवेन प्रजापतिना स्थापितं व्यशेम व्याप्नुयाम कर्णेभिः बहुलं छंदसीति भिस ऐसभावः॥ अक्षभिः छंदस्यपि दृश्यत इत्यनङ्। सचोदात्तः यजत्राः
अभिनक्षीत्यादिना यजेरत्रन् प्रत्ययः तुष्टुवांसः एञ्स्तुतौ लिटः क्वसुः शर्पूर्वाः खय इति तकारः शिष्यते अशेम अशू व्याप्तौ लिङ्याशिष्य
ङ्व्यत्ययेन विकरणव्यत्ययेन शप् देवहितं तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं॥ ॥नवमीमृचमाह॥
शतमिन्नु शरदो अंति देवा यत्रा नश्चक्रा जरसं तनूनां॥ पुत्रासो यत्र पितरो भवंति मा नो मध्या रीरिषतायुर्गंतोः॥ ॥हे देवा अंति अंतिके
मनुष्याणां समीपे आयुष्ट्वेन भवद्भिः कल्पिताः शरदः संवत्सराः शतमिन्नु शतं खलु यस्मादिदं मनुष्याणां शतसंवत्सरा आयुरिति यु
ष्माभिः परिकल्पितं तस्मात् नोऽस्माकं मा युर्गंतोः कृत्स्नस्यायुषो गमनात् पूर्वं मध्या मध्ये मा रीरिषत मा हिंसीष्ट कीदृशा नो अस्माकं रक्षितारो भवंति
इदृग्दृशपञ्चानित्यर्थः। अंति अंतिक शब्दस्य कादिलोपो बहुलमिति ककारलोपः यत्र ऋचि तुनुघमक्षुतङ्कुत्रोति संहितायां दी
र्घः चक्र लिटि मध्यम बहुवचनस्य किल्लाद्गुणाभावे यणादेशः यचो तस्तिङ इति संहितायां दीर्घत्वं॥ जरसं जरायाजरसन्यतरस्यामिति
जरसादेशः। मध्या मध्यम् लुगिति सप्तम्याडादेशः रीरिषत रिष हिंसायां अस्माण्यंतलिङि च्लिः मध्यमबहुवचने चङ्णि को णो पधायाह्रस्वः
द्विर्वचन हलादिशेषसन्वद्भावे त्वदीर्घः छंदसः परकालीनोदस्यगंतोः भावलक्षणे स्थेणितिग्मे तोसुन् प्रत्ययः अदितिरिति एषा अदितिदेवताकेयं
शो। इविषो व्याख्यातमृत्विजं च अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः विश्वे देवाः अदितिः पंचजना अदितिर्जातमदितिर्जनित्वम्॥ ॥
दशमीमृचमाह॥ ॥अदितिरदीना अखंडनीया वा पृथिवी देवमाता वा सैवाद्यौरंतरिक्षं अंतरा द्यावापृथिव्योमध्ये वर्त
मानं व्योम सैव माता निर्मात्री जगतां जननी सैव पिता उत्पादकः तपश्च स पुत्रः मातापित्रोर्जातः पुत्रोऽपि सैव विश्वे देवाः सर्वेऽपि देवाः अदिति
रेव पंचजनाः निषादपंचमाश्चत्वारो वर्णाः यद्वा गंधर्वाः पितरो देवा असुरा रक्षांसीति निरुक्तं यास्केन गंधर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वा
रो वर्णा निषादः पंचम इत्यौपमन्यव इति श्रुतिब्राह्मणे च समाम्नातं सर्वे पांचाः एतस्य च जननाः मुख्या देवमनुष्याणां गंधर्वाप्सरसां सर्पाणां च पितृणां तत्र
गंधर्वाप्सरसामेकत्वात् पंचजनत्वं एवंविधाः पंचजना अप्यदितिरेव जनित्वं जनाधिकरणं तदप्यदितिरेव॥ एवं सकलजगदात्मनादितिः
स्तूयते। उक्तं च यास्केन इत्यदितिर्विभूतिमाचष्ट इति अदितिः दो अवखंडने अस्मात् कर्मणि क्तिन् निः द्यतिस्यतिमास्थामितीत्वं। यास्कपक्षे तु दीङ्
३६८ क्षय इति धातुः तस्मात् क्तिनि व्यत्ययेन ह्रस्वत्वं। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं। स पिता निर्दिश्यमानयोरेकतामापादयति सर्वनामानि
र्पयायेण तल्लिंगतानुपपद्यत इत्यदृश्यलिंगतया पुलिंगत्वं जनित्वं। जनेरौणादिक इत्वन् प्रत्ययः॥ ॥इति प्रथमस्य षष्ठे षोडशो वर्गः॥ ॥

ऋजुनीती इति नवर्चं षष्ठं सूक्तं गोतमस्यार्षं आनुष्टुभं। ऋजुनीती नव गायत्रमंत्यानुष्टुबिति पूर्वं भावैश्वदेवं नित्यं तस्मादनुक्तापि परिभाषया इदमपि सू
क्तं बहुदेवताकं सूक्तविनियोगो लैंगिकः॥ चातुर्विंशिके दिवस प्रातःसवने मैत्रावरुणस्य ऋजुनीती नव इत्येषारंभणीया चतुर्विंश इति खंडे सूत्रितं ऋजुनी
333 / 1924 तीनो वरुण इंद्रं वो विश्वतस्परीति अहर्गणे षडहे तीयाद्विष्प्य हस्ते ष्वेषा रंभणीयास्त्रं संनीयाः स्त्रितं च॥ आरंभणीयाः पर्यासान् कद्वेलोहरहः शस्या
नीति होत्रकाद्युक्ता यादि द्वेवेति तामेतां सूक्ते प्रथमामृचमाह॥ ॥ऋजुनीती नो वरुणो मित्रो नयतु विद्वान्। अर्यमा देवैः सजोषाः॥ ॥अहरभिमानी
देवो मित्रः वरुणो रात्र्यभिमानी मित्रश्च वरुणश्च विद्वान् नेतव्यमुत्तमं स्थानं जानन् नोऽस्मान् ऋजुनीती ऋजुनीत्या ऋजुनयनेन कौटिल्यरहितेन गम
नेन नयतु अभिमतं फलं प्रापयतु। तथा देवैरन्यैरिंद्रादिभिः सजोषाः समानप्रीतिरर्यमा अहोरात्रयोर्विभागकर्ता सूर्यश्च अस्मान् सुगमनेनाभि
मतं स्थानं प्रापयतु ऋजुनीती सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घत्वं॥ ॥द्वितीयामृचमाह॥ ॥ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः॥ व्रता
रक्षंते विश्वहा॥ ॥ते हि पूर्वोक्ता मित्रादयः वस्वो वसुनो धनस्य वसवानाः वासकाः आच्छादयितारः सर्वं जगत्तेन आच्छादयंतीत्यर्थः। अतस्ते मित्रादयः
अप्रमूराः अप्रमुग्धाः अमूढाः प्राज्ञाः संतो महोभिरात्मीयैस्तेजोभिर्विश्वाहा सर्वाण्यहान्यत्यंतसंयोगे द्वितीया सर्वदापि व्रतानि जगन्निर्वाह
रूपाणि स्वकीयानि कर्माणि रक्षंते पालयंति वस्वः आगमानुशासनस्यानित्यत्वान्नुमभावे जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणस्य विकल्प
नात् भावे यणादेशः॥ वसवानाः वस आच्छादने अस्मात् भावितण्यर्थात् लुटः शानच् बहुलं छंदसीति शपो लुगभावः वर्णव्यापत्त्या मकारस्य वकारः
अप्रमूराः मूर्छा मोहसमुच्छ्राययोः अस्मात् संपदादिलक्षणे भावे क्विप् राल्लोप इति छकारलोपः प्रकृष्टाः प्रमूः ततो मत्वर्थीयो रः रो रीति रेफलोपः
न प्रमूराः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। रक्षंते रक्ष पालने व्यत्ययेन तङ्॥ ॥तृतीयामृचमाह॥ ॥ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः॥ बाधमाना
अप द्विषः॥ अमृताः अमरणधर्माणस्ते विश्वे देवाः मर्त्येभ्यः मरणधर्मभ्योऽस्मभ्यं मनुष्येभ्यः शर्म अमृतलक्षणं सुखं यंसन् यच्छंतु प्रयच्छंतु किं
कुर्वंतः द्विषो मदीयान् पापलक्षणान् शत्रून् अपबाधमानाः विनाशं प्रापयंतः यंसन् यम उपरमे लेट्यडागमः सिब्बहुलं लेटीति सिप् अमृताः मृतं मरणं
येषां नास्ति ते अमृताः नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं॥ ॥चतुर्थीमृचमाह॥ ॥वि नः पथः सुविताय चियंत्विंद्रो मरुतः॥ पूषा भगो वंद्यासः॥
॥वंद्यासः सर्वैर्वंदनीयाः स्तोतव्याः नमस्कर्तव्या वा इंद्रादयो देवाः नोऽस्माकं पथः मार्गान् वि चियंतु विचिन्वंतु अशोभनेभ्यो मार्गेभ्यः सकाशात् पृ
थक् कुर्वंतु किमर्थं सुविताय प्रसुताय सस्याय स्वर्गादिफलाय। पथः शसि भस्य टेर्लोप इति टिलोपः। उदात्तनिवृत्तिस्वरेणशसः उदात्तत्वं सुविताय इण्
गतावित्यस्मात् कर्मणि निष्ठा तन्वादीनां छंदसि बहुलमुपसंख्यानमित्युवङ् गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते सूपमानात् क्त इत्युत्तरपदां
तोदात्तत्वं। चियंतु चिञ् चयने बहुलं छंदसीति विकरणस्य लुक् इयङ् पादादित्वान्निघाताभावः। वंद्यासः वदि अभिवादनस्तुत्योः ऋहलोर्ण्यत्। ई
डवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं आज्जसेरसुक् अन्यो यांमिंसंति चत्वा यांरिति को छानि तत्र चतुर्थे अछावाक तिरिक्तो के उत नो धियइत्येषा अ
नुरूपः ऋतुच स्यत्वे कल्पिकी तृतीयाः स्त्रितं च॥ ॥पंचमीमृचमाह॥ ॥उत नो धियो गोअग्राः इति चानुरूपस्योत्तमा इति॥ तामेतां सूक्ते पंचमी
मृचमाह॥ उत नो धियो गोअग्राः पूषन् विष्णवेवयावः॥ कर्ता नः स्वस्तिमतः॥ ॥हे पूषन् पोषक देव हे विष्णो व्यापनशील देव हे एवयावः एवै
र्गंतृभिरश्वैर्याति गच्छतीत्येवयावा मरुद्गणः हे मरुद्गण ते सर्वे यूयं नोऽस्माकं धियः अन्योऽन्यलक्षणानि कर्माणि गोअग्रा पश्वग्राणि पशुप्रमुखा

निअलकाशाद्धद्वेः पश्चभिर्युक्तानिकृतंकुरुतअत्योर्यामकर्मणश्चपश्चप्राप्तिहेतुत्वमाम्नायतेयस्मात्पशवः पश्चेषश्च इरनसएतेनयजेतइति। उत
भा०अ० अपिचनोस्मानस्वस्तिमतः अविनाशिनःकुरुतएवयाधःइणगतौइणउ्गीइभ्यावन्निति वन्प्रत्ययः अस्मिन्नुपपदेयाप्राणइत्यस्माद्धतोमानिन्नि
तिवनिप्संबुद्धौचवनउपसंख्यानमितिनकारस्यरुत्वं॥ ॥इतिप्रथमस्यषष्ठेसप्तदशोवर्गः॥ ॥कृतिगाघ्यर्थमाहुतंमधुपर्कं मधुवाताइतित्
३६९ चेनकृतिगाचिंप्रतिगृह्णीतावेक्षेतत्याचसूत्रितंमधुवाताइतितृचेनावेक्षेतेति॥ ॥तत्रप्रथमामृचमाह॥ ॥मधुवाताऋतायतेमधुक्षरंति
सिंधवः माध्वीर्नः संत्वोषधीः॥ ॥ऋतायतेऋतंयज्ञमात्मनइच्छतेयजमानायवाताःवायवःमधुमाधुर्योपेतंकर्मफलंक्षरंति।एवंनोस्मभ्यंतुप
धीफलपाकांतत्त्वेषधयःताश्चमाध्वीःमाधुर्योपेताःसंतुभवंतुमधुअस्मादुभरस्यमतुब्धैयस्यलुगकारेकारेकाश्चकत्वाइतिलुक्ऋतायतेऋ
तमात्मनइच्छतिक्यच्आत्मनःक्यचनछंदस्यपुत्रस्यनीत्वदीर्घयोर्निषेधःअन्येषामपिसंहितायांदीर्घत्वं।क्यजंतात्उदःप्रात्ययातुरनुमइतिविभक्तेः
रुदात्तत्वं।माध्वीःमधोरञ्चेतिमत्वर्थीयोऽञ्प्रत्ययःऋज्यबाल्पेत्यादौअत्रियणईशोनिपात्यतेवाछंदसीतिपूर्वसवर्णदीर्घत्वंनुपाधीःनुषःपा
कआश्रधीयतइत्योषधयःकर्मण्यधिकरणेचेतिकिप्रत्ययःरुदिकाराद्गतिःन इतिदीषन्तसिपूर्ववत्पूर्वसवर्णदीर्घः दासीभारादिषुपठितत्वा
तपूर्वपदप्रकृतिस्वरत्वं।नचघञंतमाधुदात्तं॥ ॥सप्तमीमृचमाह॥ मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः॥मधुद्यौरस्तुनःपिता॥ ॥नक्तंरात्रि
र्नोस्माकंमधुमतीमाधुर्योपेताफलप्रदाभवतु।उतअपिचउषसःउषःकालोपलक्षितान्यहानिचमधुमंतिभवंतुपार्थिवंरजःपृथिव्याःसंबंधी
लोकःअस्माकंमधुमतमाधुर्यविशिष्टफलयुक्ताभवतुपिताद्युःपिताद्यौःसर्वेषांपालयिताद्यौर्द्युलोकोपिमधुमधुयुक्तोभवतुपा
र्थिवंपृथिव्याआतितिप्राग्दीव्यतीयोऽञ्प्रत्ययःरजःरजंत्यत्रेतिलोकवाचीलोकारजांस्युच्यंतइतियास्कःरजत्यस्मिन्ज्ञनाइतिरजःअसुनि
रजनरजःसुपसंख्यानमितिरंजेर्नलोपः॥ ॥अष्टमीमृचमाह॥ ॥मधुमान्नोवनस्पतिर्मधुमाँअस्तुसूर्यः॥माध्वीर्गावोभवंतुनः॥ ॥नोस्माकंव
नस्पतिःवनानांपालइतावृक्षाभिमानीदेवःमधुमान्माधुर्योपेतफलवानस्तु।तादृशंफलंअस्मभ्यंप्रयच्छत्वित्यर्थःसूर्यःसर्वस्यप्रेरकःसवि
तात्वमधुमानस्तुगावःअग्निहोत्राद्यर्थाधेनवश्चनोस्माकंमाध्वीःमाधुर्योपेतेनपयसायुक्ताभवंतुवनस्पतिःवनानांपतिर्वनस्पतिःपारस्कर
दित्वात्सुडवनस्पत्यादिषुयुगपदितिपूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं॥ ॥नवमीमृचमाह॥ ॥शंनोमित्रःशंव
रुणःशंनोभवत्वर्यमा॥शंनइंद्रोबृहस्पतिःशंनोविष्णुरुरुक्रमः॥ ॥अहरभिमानीमित्रोदेवोनोस्माकंशंसुखकरोभवतु।यद्वाअस्मदीयाः
नामुपद्रवणांत्रामयिताभवतु।रात्र्यभिमानीवरुणश्चशंसुखकरोभवतु।अर्यमाअहोरात्रयोःस्थापयितासूर्यश्चनोस्माकंशंसुखंकरोभ
वतु।बृहस्पतिरुतांदेवानांपालयितेंद्रश्चनोस्माकंशंसुखंकरोभवतु।उरुक्रमःउरुविस्तीर्णक्रमातियावोविक्षपतीत्यत्वरुत्वमःबिस्पुर्हिवामन
बतारपृथिव्यादीनलोकान्पदत्रयरूपेणअक्रांतवान्अतउरुक्रमोविष्णुश्चनोस्माकंशंसुखकरःउपद्रवाणांशमुइ।ताभवतुउरुक्रमःक्रमुपा
दविक्षेपोपाचाचकचयद्वाउरुत्वक्रामनीत्यउरुक्रमःकर्मण्यणोदात्तापदेशस्येतिवृद्धिप्रतिषेधः॥ प्रथमस्यषष्ठेष्टादशोवर्गः॥ ॥त्वंसोमेति ३६९
त्रयोविंशत्यृचंसप्तमंसूक्तंगोतमस्यार्षंसोमदेवताकंपंचम्याद्याःषोडश्यंताद्वादशगायत्र्यःसप्तदशीउष्णिक्शिष्टास्त्रिष्टुभःतथा
चानुक्रांतं।त्वंसोमत्र्यधिकासौम्यंपंचम्यादिगायत्र्योद्वादशोष्णिकचेतिसूक्तविनियोगोलैंगिकः।एकादशोनस्य प शोर्वपापश्चाःत्वंसोमेति

ह्रूयाद्गनुवाक्येसूत्रितंच।त्वंसोमप्रचिकितोमनीषेतिद्वेइति।महापितृयज्ञेएवंकव्यस्यहविषोद्वेअनुवाक्येतत्रसोमस्यपितृमतस्त्वंसो 335
मीमत्येषाप्रथमानुवाक्यादक्षिणाग्नेरग्निमितिखंडेसूत्रितं।त्वंसोमप्रचिकितोमनीषासोमोधेनुमिति।एषैवप्रयणीयेष्टौसोमस्यानु 1924
वाक्यातथाह्यप्रायणीयेष्टिरितिखंडेसूत्रितं॥ ॥प्रथमामृचमाह॥ ॥त्वंसोमप्रचिकितोमनीषात्वंरजिष्ठमनुनेषिपंथां॥तवप्रणी
तीपितरोनइंद्रदेवेषुरत्नमभजंतधीराः॥ ॥हेसोमत्वंमनीषामनीषयाअस्मदीययाबुध्याप्रचिकितःप्रकर्षेणज्ञातोसिवयंत्वास्तुति
भिरज्ञासिष्मेत्यर्थः।अतस्त्वंरजिष्ठंऋजुतमंअकुटिलंपंथापंथानंकर्मफलप्राप्तिहेतुभूतंमार्गंअनुनेषिअस्माननुक्रमेणप्रापय
सिकिंचहेइंदोद्रवनशीलसर्वंजगदंदयितःसोमततवप्रणीतीप्रणीत्यावत्कर्तृकेनप्रकृष्टेनयेनेनधीराःधीमतःप्रतसंतोनो
स्माकंपितरोदेवेषुइंद्रादिषुरत्नंरमणीयंधनंभजंतअसेवंतप्राप्नुवन्अतोस्मानपिताहृशंधनंप्रापयेत्यर्थः।प्रचिकितःकितज्ञानेअस्मा
त्कर्मणिनिष्ठायांछांदसंद्विर्वचनंयद्वायंयुगंतानिष्ठासंज्ञापूर्वकस्यविधेरनित्यत्वागुणोयङ्लुकोरित्यभ्यासस्यगुणाभावःयद्वाछंदस्युभ
यथेतिनिष्ठायाःसार्वधातुकसंज्ञायांश्नापजुहोत्यादित्वात्स्लुःश्लाविति द्विर्वचनंगतिरनंतरइतिगतेःप्रकृतिस्वरत्वं।मनीषासुपांसु
लुगितितृतीयायाआदेशः।रजिष्ठंऋजुशब्दादिष्ठनिविभाषर्जोश्छंदसीतिरत्वंटेरितिटिलोपः।नेषिनयतेर्लटिबहुलंछंदसीतिशपोलुक्
पंथांपथिमथ्यृभुक्षामात्वित्यसावपिप्यत्ययेनात्वंपथिमथोःसर्वनामस्थानइत्याद्युदात्तत्वंप्रणीतीतादौचेतिगतेःप्रकृतिस्वरत्वं।सुपां
सुलुगितितृतीयायाःपूर्वसवर्णदीर्घत्वं॥अग्निष्टोमेमरुत्वतीयेत्वंसोमक्रतुभिरित्येषाधाय्यासूत्रितंच।अग्निर्नेतात्वंसोमक्रतुभिः
पितंत्यवइति॥ ॥तामेतांसूक्तेद्वितीयामृचमाह॥ ॥त्वंसोमक्रतुभिःसुक्रतुर्भूस्त्वंदक्षैःसुदक्षोविश्ववेदाः॥त्वंवृषावृषत्वेभिर्महित्वाद्युम्नेभि
र्द्युम्न्यभवोनृचक्षाः॥ ॥हेसोमत्वंक्रतुभिःत्वत्संबंधिभिरग्निष्टोमादिकर्मभिरात्मीयैर्लकर्मभिर्वासुक्रतुःशोभनकर्माशोभनप्रज्ञोवाभूःअभवसित
थाविश्ववेदाःसर्वधनस्त्वंदक्षैरात्मीयैर्बलैःसुदक्षःशोभनबलोभवसितथात्वंवृषत्वेभिःकामाभिवर्षणैःमहित्वामहत्त्वेनमाहात्म्येन
चवृषाकामानांवर्षितामहांश्चभवसितथात्वंनृचक्षाःनृणांयज्ञस्यनेतृणांयजमानानांअभिमतफलस्यदर्शयितासन्द्युम्नेःतेद्दंनेर्दविलक्षणे
र्धनैःद्युम्न्यभावःप्रभूतान्नोभवसिसुक्रतुःबहुव्रीहौक्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं।सुदक्षःदक्षवृद्धौदक्ष्यतेअनेनेतिदक्षोबलंकरणेघञ्
जित्वात्पद्युदात्तत्वं।सुशब्देनबहुव्रीहौपाद्युदात्तत्वंप्राप्तेच्छंदसीत्युत्तरपदाद्युदात्तत्वंविश्ववेदाः।विश्वानिवेदांसियस्यासौबहुव्रीहौविश्वंसंज्ञाया
मितिपूर्वपदांतोदात्तत्वं।वृषत्वेभिःवृषाभवःवृषत्वंबहुलंछंदसीतिभिसऐसभावःमहित्वामहेरौणादिकइणप्रत्ययःभावप्रत्ययः।भावप्र
त्ययांतात्सुपांसुलुगितिविभक्तेराकारः॥ ॥तृतीयामृचमाह॥ ॥राज्ञोनुतेवरुणस्यव्रतानिबृहद्गभीरंतवसोमधाम॥शुचिष्टमसिप्रियो
नमित्रोदक्षाय्योअर्यमेवासिसोम॥ ॥हेसोमराजःब्राह्मणानांस्वामिनःसोमोस्माकंब्राह्मणानांराजेतिश्रुतेर्वरुणस्ययागार्थमाहृतःक्रीतो
वरुणोभवतिसोमोवरुणःवरुणोसिधृतव्रतःइतिमंत्रलिंगात्क्रीतस्यतेतवसंबंधीनिव्रतानिसर्वाण्यग्निष्टोमादीनिकर्माणिअतःसर्वेषुयागे
षुतमेवकारणभूतोभवसीत्यर्थःअतस्तवधामत्वदीयंतेजःबृहत्विस्तीर्णंगंभीरंगांभीर्योपेतंचयद्वानुइत्येतदुपमार्थेतदुक्तंयास्केनाअथाप्यु
पमार्थेभवतिवृक्षस्यनुतेपुरुहूतवयाइतिराज्ञोराजमानस्यवरुणस्यनुवरुणस्येवसेसोमतेतवव्रतानिकर्माणिलोकहितकारणीनिश्रंसमानेहे

सोमं ऋत्विजः सर्वे पांत्रेणाध कसितत्र दृष्टांतः मित्रो न मित्रः यथा सर्वेषामनुकूलः अहरभिमानी मित्रो देवः शोध इति भवति तद्वत् थात्वं अर्यमेव अस्माभि
भा॰ प्र॰ र्दृश्यमानः सूर्य इव दक्षाय्योसि सर्वेषां वर्धकोसि यथा अहनि सूर्यः प्रकाशेन सर्वं वर्धयति। एवं निक्षिप्र सन् मयसि सोमकिरणैराप्यायमानस नक्षत्रादयो
१७० मा के समर्वेतग हद्धुतं। भुवि द्वं युष्मन्तत्क्षः घतः पाशमितिनिद्विस द्वी नीययग्य स तरं दक्षाय्यं दक्ष इ धो ऋ दक्षिस्पृहियहिभ्य अपत्य उत्पाप्यत्ययः अप्रय
णेरो सोम्यस्य से संयाभुवो यातेधा मानिवियाः पृथिव्यामिति। एषं वक्र दृष्टिनस्य सोम्यस्य पशोर्वपायां याज्यासु त्रितं च। यातेधामानिदिवियाः पृथि
व्याम यात्र्स्संसनक्षपृतनासु प्र मिति। प्रायणीये स्वाध्यये वसोम्यस्य याज्यासू त्रितं च। तं सोम प्रचिकितो मनीषा याते धामानि दिवियाः पृथिव्यामिति॥ ॥
तामेतांसक्तेनचतुर्थीमृचमाह॥ ॥ यातेधामानिदिविया पृथिव्यां यापर्वतेष्वोषधीष्वप्सु। तेभिर्नो विश्वैः सुमना अहेळन्राजन्त्सोम प्रति हव्या गृभाय॥ ॥
हे मतंब हिवि धुलोके यानि धामानि तेजांसि वर्तंते तत्र पृथिव्यां भूमौ यानि वर्तंते तेन या पर्वतेषु पर्वत उन्नतप्रदेशे च ये पुयानि वर्तंते। तथा ओषधी
षधीषु अप्सु च यानि वर्तंते तेभिस्तैर्विश्वैः सर्वैस्तेजोभिर्युक्तः सुमनाः शोभमानाः अहेळन् अक्रुध्यन् हे राजन् सोम राजान सोम एवं भूत स्वं हव्या
भिः प्रतानि हवींषि प्रति गृभाय प्रतिगृहाण या तेजों छंदसि वहुलमिति डेर्लोपः पृथिव्यां उदात्तयणो इति विभक्तेरुदात्तत्वं तु ओषधीषु तु ओषधेश्च विभक्तावप्र
थमायामिति दीर्घः। अप्सु ऊडिदमित्यादिना विभक्तेरुदात्तत्वं सुमनाः सोमनं सी अस्य मा घसील्वेतर पदा धुदात्तत्वं गृभाय ह्वग्रहोर्भश्छंदसि
यत्र याति हौ आय प्रत्ययस्य आयस्ताद्देशः। पौर्णमासे ऽग्नीषोमास्योसभागस्य त्वं सोमेत्येषानुवाक्या सूत्रितं च। अग्निर्वृत्राणिजंघनदिति पूर्वस्या भा
गस्य त्वं सोमासि सत्पतिरित्युत्तरस्येति। एवं यत्र यत्र आग्नीषोमाज्यभागौ तत्र सर्वत्रास्या विनियोगः। प्रातःकालीनामुपसदि प्रस्थानस्य सोम्यस्यैषा
नुवाक्या अपराह्णिक्यामुपसदि सैव याज्या सूत्रितं च। त्वं सोमासि सत्पतिर्गयस्फानो अमीवहेति विपर्यासो याज्यानुवाक्यानामिति च॥ ॥ तामेतां
सक्तेपंचमीमृचमाह॥ ॥ त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा। त्वं भद्रो असि क्रतुः॥ ॥ हे सोम त्वं सत्पतिरसि सतां कर्मसु वर्तमानानां ब्राह्मणानामधिपति
र्भवसि तस्मात् सोमराजानो ब्राह्मणाः इति श्रुतेय इति तः स्वानाह्य पतयः पालकः। अस्य सोमस्य तादृशो भवसितस्मात्तथा चाम्नायते स्वानभ्राड्यांहेत
थाअमुष्मिन्लोके सोम मरक्षन्निति। उत अपि च राजा राजमानस्त्वं वृत्रहा वृत्रस्यासुरस्य शत्रोर्वा हंतासि भद्रः शोभनः क्रतुः यज्ञमग्निष्टोमादियागः त्व
मेव तद्रूपो भवसि तत्माध्यत्वाद्यागानां सत्पतिं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। तत्पुरुषे पश्चेत्तु पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं॥ ॥ इति प्रथमस्य
षष्ठे एकोनविंशो वर्गः॥ ॥ साग्निचित्ये क्रतौ अग्नीषोमीयस्य पशुपुरोडाश मनु अष्टौ देवस्वां हवींषि निरूप्यंते तत्र सोमस्य वनस्पतेर्हविषः त्वं च सोम
येषानुवाक्या अथाग्नीषोमीये णेति खंडे सूत्रितं। त्वं च सोम न वशो ब्रह्माऽऽदेवानां पदवीः कवीनामिति॥ ॥ तामेतां षष्ठीमृचमाह॥ ॥ त्वं च सोम नो वशो
जीवातुं न मरामहे॥ प्रियस्तोत्रो वनस्पतिः॥ ॥ हे सोम नो अस्माकं स्तोत्र णां जीवातुं जीवनोपायं त्वं च वष्टि इच्छः कामयसे अतश्चानीमयं न मरामहे न प्रियामहे
जीवातुं न मरामहे प्रियस्तोत्रः प्रियाणि स्तोत्राणि यस्य सः तथोक्तः बहुभिः स्तोतव्यं इत्यर्थः वनस्पतिः वनानां पालयिता वनस्पतिः पाल्यानां पतिः पालयिता सि सोमो वा लतृ स्य १७०
धीनाराजति कृतः इत्यः वशः वशकांतौ लोकडिदिसिप्य डागमः आग मानुदात्तश्चेधातुस्वरः शिष्यते। त्वं च ति च वशब्दः च्वार्थ निपातानामित्सं वैदर्थं तस्याग
निपातिस्य धादिहं तेन तिनि घातप्रतिषेधः। जीवातुं जीव प्राणधारणे जीवे रातुमरामहे मृङ् प्राणत्यागे व्यत्ययेन शप। आयुष्कामेष्ट्यां द्वितीयस्याज्यभा
गस्य त्वं सोम महे भगमित्येषानुवाक्या अथ काम्या इति खंडे सूत्रितं॥ आनो अग्ने सुचेतुना त्वं सोम महे भगमिति॥ ॥ तामेतां सूक्ते सप्तमीमृचमाह॥ ॥

337
1924

त्वं सोम महे भगं त्वं यून ऋतायते। दक्षं दधासि जीवसे॥ हे सोम त्वं महे महते धनाय ऋतायते ऋतं यज्ञमात्मान इच्छते पुरुषाय जीवसे जीवितुं दक्षं उपभोगस
मर्थं भगं धनं दधासि विदधासि करोषि तथा त्वं यूने तरुणाय च ऋतायते जीवितुं धनं करोषि महे महते अत्र छंदसि लोपः छांदसः वृ हन्मतोरुपसंख्यानमिति
विभक्तेरुदात्तत्वं यूने श्वयुवमघोनामतद्धिते इति संप्रसारणं ऋतायते ऋतमात्मन इच्छतिः सुप आत्मनः क्यच्। न छंदस्य पुत्रस्येति ईत्वदीर्घयोर्निषेधः॥
अन्येषामपि दृश्यत इति संहितिकोदीर्घः। क्यजंतात्लटः शतृ। शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं जीवसे जीव प्राणधारणे तुमर्थे से सेनित्यसेन
प्रत्ययः तस्य यस्यां द्वितीयस्याज्यभागस्य त्वं नः सोमेत्येषानुवाक्या सूत्रितं च। रक्षस्यस्यां रक्षितं वंताव्घरसाणो अलं सः। त्वं न सोम विश्वत इति॥ ..
॥ तामेतां षष्ठीमृचमाह॥ ॥ त्वं नः सोम विश्वतो रक्षा राजन्नघायतः। न रिष्येत्त्वावतः सखा॥ ॥ हे सोम राजन् राजान दीप्तत्वं अघायतः अघपापं त
द्दुनुकं दुःखं अस्माकं कर्तुमिच्छतः विश्वतः सर्वस्मादपि पुरुषात् नोस्मान् रक्ष पालय त्वावतः त्वत्सदृशस्य सखा सख्यं प्राप्तः पुरुषः न रिष्येत न हिंसितस्य
न किंचिदुपद्रवं प्राप्नोति विनश्यतीति अघायतः अघं पापं परस्येच्छतीत्यघायन् छंदसि परेच्छायामपीति क्यच् अश्वाघस्यात् इत्यात्त्वं रिष्ये
त रिष रिषहिंसायां त्वावतः वतुप्प्रकरणे युष्मादस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप्प्रत्ययोनरपदयोश्चेति मपर्यंतस्य त्वादेशः आ
सर्वनाम्न इत्यात्वं॥ ॥ सोमप्रवहणे सोमयास्त्विति द्वे अनुवक्तव्ये सूत्रितं च सोमयास्ते मयोभुव इति तिस्र इति आग्नेयणे सौम्यस्य सोमयास्त इत्ये
षानुवाक्या सूत्रितं च सोमयास्ते मयोभुव यायाते धामानि दिविया पृथिव्या इति। अश्वमेधे पिपोस्यामिष्टौ द्वितीयस्याज्यभागस्यैषानुवाक्या सूत्रि
तं च। त्वमग्ने सप्रथा असि सोमयास्ते मयोभुव इति सद्वंताविति॥ ॥ तामेतां सूक्ते नवमीमृचमाह॥ ॥ सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे
॥ ताभिर्नोऽविता भव॥ ॥ हे सोम ते तव संबंधिन्यः दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय याः ऊतयः मयोभुवः सुखस्य भावयित्र्यः सन्ति ताभिरूतिभिर
क्षाः सविर्वं घनेन भीरक्षाभिर्नोस्माकं अविता रक्षिता भव मयोभुवः अस्यति विशेषणत्वेन स्त्रीलिंगत्वे भुवश्चेति ङीप्प्राप्नोति तद्धातोगुणवच
नादित्यस्मादुत्तर इति तत्प्रकरणस्यानुवर्तमानात्न भवति॥ ॥ दशमीमृचमाह॥ ॥ इमं यज्ञमिदं वचो जुजुषाण उपागहि। सोम त्वं नो वृधे भव॥
॥ ॥ हे सोम त्वमिममस्माभिः क्रियमाणं यज्ञं इदं च वचः इदानीं क्रियमाणं स्तुतिलक्षणं वचनं जुजुषाणः सेवमानः सन् उपागहि उपगच्छ प्राप्नुहि
न वं ज्ञाक लक्षणं स हं प्राप्नुहि प्राप्य च नोस्माकं वृधे यज्ञस्य वर्धनाय भव जुजुषाणः जुषी प्रीतिसेवनयोः छंदसि लिट् लिटः कानच् वा इति व्यत्ययेनोदात्तत्वं उ
पागहि गमेर्लोटि बहुलं छंदसीति शपो लुक् अनुदात्तोपदेशेत्यादिना मकारलोपः असिद्धवदत्राभादित्यस्यासिद्धत्वाद्धेर्लुगभावः गतिर्गता
विति पक्षे स्य गतेर्निघातः॥ ॥ इति प्रथमस्य षष्ठे विंशो वर्गः॥ ॥ दर्शयागे सौम्यस्याज्यभागस्य सोम गीर्भिरित्येषानुवाक्या सूत्रितं च। अग्निः प्रत्नेन
मन्मना सोम गीर्भिष्ट्वा वयमिति अन्यत्रापि यत्र चरुः धूनां तावाज्यभागौ तत्र द्वितीयाज्यभागानुवाक्या॥ तामेतां सूक्ते एकादशीमृचमाह॥ ॥
सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः॥ सुमृळीको न आविश॥ ॥ हे सोम त्वा त्वां वचोविदः स्तुतिलक्षणानां वचसां वेदितारो वयमनुष्ठातारो
गीर्भिः स्तुतिलक्षणैर्वचोभिर्वर्धयामः प्रवृद्धं कुर्मः। त्वं च नोस्माकं सुमृळीकः शोभनं सुखं कुर्वन् सन् आविश आगच्छ सुमृळीकः मृड सुखने मृडः
कीकन् कन्तावितिभावे निर्विलान प्रत्ययः शोभनं मृडीकं यस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं संतिपवमानेष्टयाः तत्र तृतीया
स्यामिष्टावुत्तरस्याज्यभागस्य गयस्फानो इत्येषानुवाक्या सूत्रितं च पुष्टिमंतावग्निना रयिमश्नवद्गयस्फानो अमीवहेति। एषैव प्रातःकालीनाप

भा॰ प्र॰ १७१

सदिसोम्ययागस्य याज्या। मायंकाली नायाज्ञानुवाक्या सूत्रितं च। अथापसदिति खंडे त्वं सोमासि सत्पतिर्गयस्फानो अमीवहा इति॥ ॥तामेतां
द्वादशीमृचमाह॥ ॥गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः॥ सुमित्रः सोम नो भव॥ ॥गयस्फानः गय इति धननाम धनस्य वर्धयिता
अमीवहा अमीवानां रोगाणां हंता वसुवित् वसूनां धनस्य लंभयिता प्रापयिता पुष्टिवर्धनः पुष्टेः संपदो वर्धयिता सुमित्रः शोभना
नि मित्राणि सखायो यस्य स त्वं हे सोम त्वं नोस्माकं मेवगुणविशिष्टो भव गयस्फानः स्फायीवृद्धौ अंतर्भावितण्यर्थात् ल्युट् व्यत्ययेन ल्यो
पः इदमादिषु चतुर्षु पदेषु कृदुत्तरपदप्रकृतिस्वरत्वं॥ सुमित्रः नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥ ॥त्रयोदशीमृचमाह॥ ॥सोम रारंधि
नो हृदि गावो न यवसेष्वा॥ मर्यइव स्व ओक्ये॥ ॥हे सोम त्वं नोस्माकं हृदि हृदये रारंधि रमस्व तत्र निरंतरं निर्वृतिं कुरु इत्युच्यते। गावो न यथा गावः यवसे
षु शोभनतृणेषु अभिमुख्येन रमंते मर्यइव यथा वा मर्त्यो मरणधर्मा मनुष्यः स्वे स्वकीये ओक्ये गृहे पुत्रादिभिः सह रमते तद्वदस्मा
भिर्दत्तेन हविषा तृप्तः सन् अस्मास्वेवावतिष्ठस्व नान्यत्र गच्छेति निरंतरं इयत्यर्थः रारंधि रमुक्रीडायां व्यत्ययेन परस्मैपदं बहुलं छंद
सीति शपः श्लुः छंदस्युभयथेति हेरार्धधातुकत्वेन ङित्वाभावादनुनासिकलोपाभावः संधिपीत्याति
हेरपित्वात् स्थितः स्वरः शिष्यते छांदसमभ्यासस्य दीर्घत्वं॥ आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्यामंत्रितस्याविद्यमानत्वात् पदाद
परत्वेन न निघातः॥ मर्यइव इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च॥ ओक्ये उचसमवाये उच्यते
समवयंते प्राप्यत इत्योक्यं गृहं हलश्चेति घञ् चजोः कु घिण्यतोरिति कुत्वं तत्स्वरितं॥ ॥चतुर्दशीमृचमाह॥ ॥यः सोम सख्ये तव रारणद्देव
मर्त्यः॥ तं दक्षः सचते कविः॥ ॥हे देव द्योतमान सोम तव सख्ये त्वदीये सखित्वनिमित्ते भूते सति यो मर्त्यो मरणधर्मा यजमानः रारणत्
रणति एतत्स्वरूपेण स्तोत्रेण त्वां स्तौतीति तं यजमानं कविः क्रांतदर्शी दक्षः सर्वकार्यसमर्थः त्वं सचते सेवसे अनुगृह्णासीत्यर्थः रारण
त् रणशब्दार्थः लेट्यडागमः। बहुलं छंदसीति शपः श्लुः इतश्च लोप इतीकारलोपः छंदस्युभयथेत्यार्धधातुकत्वात् अभ्यासस्य दीर्घत्वं
र्धधातुके विधीयमानाभ्यस्तानामादिरुदात्तत्वस्याभावे धातुस्वरः शिष्यते॥ स च तेषु न समवायेपुरुषव्यत्ययः॥ ॥पंचदशीमृचमाह॥
उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः॥ सखा सुशेव एधि नः॥ ॥हे सोम त्वं नोस्मान् अभिशस्तेः अभिशंसनात् अभिशापरू
पान्निंदनात् उरुष्य रक्ष उरुष्यती रक्षाकर्मेति यास्कः अस्मत्कृतात्पापाच्च नि पाहि नितरां पालय एवमस्मदीयं पापं परिहृत्य सखा
अस्माभिः ज्ञातव्येन शोभनेन सुखेन युक्तः सन् सुखप्रधिहितकारी भव अभिशस्तेः कृति अस्माद्भावेक्तिन् तादौ चनिति कृति प्रकृ
तिस्वरत्वं। एधि असभुवि छांदसमिति लोपिति तस्य ङित्वात् अस्यारल्लोप इत्यकारलोपः घ्वसोरेद्धावभ्यासलोपश्चेति सकारस्यैत्वं तस्या
सिद्धत्वात् हुझल्भ्यो हेर्धिरिति तस्य धित्वं निघातः मंत्रितं च। आप्यायस्व समेतु ते संते पयांसि समु यंतु वाजा इति तृचस्माप्यायनेष्वे
षा विनियुक्ता सूत्रितं च॥ ॥षोडशीमृचमाह॥ ॥आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं॥ भवा वाजस्य संगथे॥ ॥हे सोम त्वमा १७२
प्यायस्व वर्धयस्व ततस्ते रश्मिरूपत्वं वीर्यं सामर्थ्यं विश्वतः सर्वतः समेतु संगच्छतां तया संयुक्तो भव तु एवंभूतस्त्वं वाजस्यान्नस्य
संगथे संगमने भव अस्माकमन्नप्रदो भवेत्यर्थः॥ वृष्ण्यं वृषसेचने कनिन्वृषण्याहिनाकनिन् वृष्णि भवं वृष्ण्यं भवे छंदसीति य

त् अल्लोपोन इत्यकारलोपः यत्राभावं कर्णणोरिति कर्मणि प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते। यतोनाव इत्याद्युदात्तत्वं॥ भव द्व्यचोतस्तिङ इति संहि
तायां दीर्घत्वं। संगथे पातृतुदिवचिरिचिसिचिभ्यस्थगित्यादिना विधीयमानस्थक्प्रत्ययो बाहुलकवचनात् गमेरपि भवति तथा यदिनोत्तरपदांतोदात्तत्वं॥ ॥सप्तदशीमृ
चमाह॥ ॥आ प्यायस्व मदिंतम सोम विश्वेभिरंशुभिः॥ भवा नः सुश्रवस्तमः सखा वृधे॥ ॥हे मदिंतम ममदितृतम हर्षयितृतम सोम अतिशयेन मदिम
दिंतमः नाद्घस्येति तमपो नुडागमः सुश्रवस्तमः श्रव इत्यन्ननाम श्रवत इति यास्कः शोभनं श्रवो यस्य स तथोक्तः अतिशयेन सुश्रवः सुश्रवस्तमः
मयः पितादस्नुदात्तत्वे सोमेन सौ अलोमोपसौ इत्यत्र पदाद्युदात्तत्वं मेवशिष्यते॥ ॥पत्नीसंयाजेषु सौम्यस्य संते पयांसीति याज्या। सूत्रितं
च संते पयांसि समु यंतु वाजा इह त्वष्टारमग्रियमिति। चमसाप्यायने प्येषा सूत्रितं च संते पयांसि समु यंतु वाजा इति चमसानाप्योपायातिनि॥
तामेतां सप्तदशीमृचमाह॥ ॥सं ते पयांसि समु यंतु वाजाः सं वृष्ण्यान्यभिमातिषाहः॥ आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धि
ष्व॥ ॥हे सोम अभिमातिषाहः अभिमातीनां शत्रूणां हंतुस्ते तव एवंभूतस्य ते पयांसि श्रयणार्थानि क्षीराणि संयंतु संगच्छतां तथा वाजा अन्नानि
लक्षणानि अन्नानि च त्वां संगच्छतां वृष्ण्यानि वीर्याणि च संगच्छतां हे सोम त्वं अमृताय अस्माकममृतत्वाय अमरणाय आप्यायमानः सन्
आसमंताद्वर्धमानः सन् दिवि द्युलोके स्वर्गे उत्तमानि उत्कृष्टतमानि श्रवांस्यन्नानि अस्माभिर्भोक्तव्यानि हविर्लक्षणानि चाधिष्व
धारयतेः क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी अभिमातिषाहः षहअभिभवे छंदसि सह इति ण्वि प्रत्ययः सुषा
मादित्वात् षत्वं॥ अमृताय नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं॥ उत्तमानि उद्धब्दात्तमपि साधनक्रियावचनादातिशायिकस्तमप् उत्तमशश्वत
मौ सर्वत्र तु छांदसमाद्युदात्तत्वं॥ धिष्व धिधारणे धिष्वेति धिभावो निपात्यते॥ ॥सोमप्रवरणे या ते धामानीत्येषा सूत्रितं च॥ या ते धामानि हविषा यजंतीमा धियं शिक्षमाणस्य देवेति निहिते परिदध्यादिति एकादशिनस्य सौम्यस्य पशोर्हविषा
यजंतितानविश्वापरिभूरस्तु एवं वयाज्याप्रदानानामितिखंडे सूत्रितं। अथाव्यूहेयुत्स्यूतनामकप्रियानधामानिहविषायजंतीति॥ ॥
तामेतां सप्तदशीमृचमाह॥ ॥या ते धामानि हविषा यजंति ता ते विश्वा परिभूरस्तु यज्ञं॥ गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्या
न्॥ ॥हे सोम ते तव दीप्तानि धामानि स्थानानि ते ता शाखितान्येतानि इह हविषा च पुरोडाशादिना यजंति यजमानाः पूजयंति ता ते विश्वा तव दीप्तानि तानि सर्वाणि
धनानि यज्ञं अस्मदीयं अध्वरं परिभूरस्तु परितो भवतु परितः प्राप्तानि संतु यद्वा तव दीप्तानि तेषां सर्वेषां धनानां अस्मदीयो यजमानः परिभूः
संप्रति परिग्रहीता यानेन सोम त्वं तु भवतु परिभूर्वा भवतु परिग्रहार्थः ता इति धामानि रूपेतिस्वं दुर्यान् प्राचीनवंशादिलक्षणान् अस्मदीयान् ए
ह वै दुर्या इति श्रुतेः प्र चर प्रकर्षेण गच्छ कीदृशस्त्वं गयस्फानः गयस्य गृहस्य धनस्य वा वर्धयिता प्रतरणः प्रकर्षेण दुरितात्तारयिता सुवीरः शोभ
नवीरः पुत्रः अवीरहा वीर्यां जायंत इति वीराः पुत्राः तेषां हंता परिभूः प्राप्नोति अस्मात् क्विप् चेति क्विप् व्यत्ययो बहुलमिति लिंगवचनव्यत्ययोः
अलुक् व्यत्ययेन वचन गयस्फानः गय इति गृहस्य च धनस्य च नाम धेयं तस्य स्फायिता वर्धयिता रल्युट् च बहुलमिति कर्तरि ल्युट् छंदसो
यलोपः अवीरहा वीराणां हंता वीरहा न वीरहा अवीरहा॥ ॥महापितृयज्ञे सोमस्य पितृमतो याग सोमो धेनुमित्येषा ह्विर्ता यानुवाक्या तत
चसैकैकस्य द्वे याज्या अनुवाक्ये समुच्चयेनेति हितत्थैव दक्षिणाग्नेरिति खंडे सूत्रितं। सोमो धेनुं सोमो अर्वंतमाशुं त्वं सोम पितृभिः संविदा

339
1924

नइति। तामेतां सप्तविंशीमृचमाह॥ ॥सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति॥ सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै॥ ॥
भा॰व॰ यो यजमानः ददाशत सोमाय हविर्लक्षणान्यन्नानि ददाति तस्मै यजमानाय सोमो धेनुं सवत्सां गां दोग्ध्रीं ददाति तथा अर्वन्तं आशुं शीघ्रगामिनं
अश्वं ददाति प्रयच्छति। तथा वीरं पुत्रमस्मै यजमानाय ददाति। कीदृशं पुत्रं कर्मण्यं लौकिकवैदिककर्मसु कुशलं सदन्यं सदनं गृहं तदर्हं गृहकार्यकुशलमि
१७२ त्यर्थः॥ विदथ्यं विदथेषु देवानितिनिरुक्तयज्ञाः तदर्हं दर्शपूर्णमासादियागानुष्ठानपरमित्यर्थः॥ सभेयं सभायां साधु सकलशास्त्राभिज्ञमित्यर्थः॥
पितृश्रवणं पिता श्रूयते आख्यायते येन पुत्रेण तादृशं कर्मण्यं कर्मसु साधुः कर्मण्यः तत्र साधुरिति यत् यच्चाभावकर्मणोरिति प्रकृतिभावः॥ ति
त्स्वरितमिति स्वरितत्वं। एवमुत्तरत्रापि प्रत्ययः॥ सभेयं ढश्छन्दसीति तत्र साधुरित्यर्थे ढप्रत्ययः॥ ददाशत् दाशृ दाने लेट्यडागमः॥ बहुलं छन्दसीति
शपः श्लुः॥ ॥इति प्रथमस्य षष्ठे द्वाविंशो वर्गः॥ ॥एकादशस्य सोमस्य पशोः पुरोडाशस्य अषाळ्हं युत्सु इत्येषा याज्या प्रसन्नानामिति खंडे सूत्रि
तं अषाळ्हं युत्सु पृतनासु पप्रिं यतो धामानि हविषा यजंतीति॥ ॥तामेतां त्रयोविंशीमृचमाह॥ अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृ
जनस्य गोपां। भरेषुजां सुक्षितिं सुश्रवसं जयंतं त्वामनु मदेम सोम॥ ॥युत्सु युद्धेषु अषाळ्हं शत्रुभिः अनभिभवनीयं तथा पृतनासु सेना
सु पप्रिं यस्य पूरयितारं स्वर्षां स्वर्गस्य सनितारं अप्सां अपां वृष्टिलक्षणानामुदकानां दातारं यद्वा अप्सां अप्सातं कर्मसु करणीयं सर्वे
षामनुग्राहकमित्यर्थः॥ वृजनस्य गोपां वृजंति अनेनेति वृजनं बलं तस्य गोपां गोपयितारं रक्षितारं भरेषुजां भ्रियंते एषु हवीं
षीति भरा यागाः तेषु प्रादुर्भवितुं सुक्षितिं शोभनं बलं निवासस्थानं सुश्रवसं शोभनयशस्कं जयंतं शत्रूनभिभवंतं हे सोम ईदृग्
भूतं त्वां अनु लक्ष्यीकृत्य मदेम हर्षयुक्ता भवेम। अषाळ्हं षह अभिभवे साढ्यै साढ्वा साढेति निगम इति निपातनात् सहिवहोरोदवर्णस्ये
त्योत्वाभावः सहेः साढः स इति षत्वं। पप्रिं प्रा पालनपूरणयोः। आदृगमहनजन इति किन्प्रत्ययः। स्वर्षां स्वर्गमनोन्निति स्वर्षाः
षणु दाने जनसनखनक्रमगमो विट् विड्वनोरनुनासिकस्यादित्यात्वं अप्सां। अपउदकं पप्सातसनोतेः पूर्ववद्विड्प्रत्ययः प्सा भक्षणे प्साति
भक्षयतीति प्साः क्विप् न विद्यते प्सा अस्य इति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं॥ भरेषुजां जनी प्रादुर्भावे पूर्ववद्विट् अलुक्
त्वं च मेमेसमद्रीहर्षव्यत्ययेन आप॥ ॥द्वाविंशीमृचमाह॥ ॥त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः॥ त्वमा ततन्थोर्वन्त
रिक्षं त्वं ज्योतिषा वि तमो ववर्थ॥ ॥हे सोम त्वं इमाः भूम्यां वर्तमानाः विश्वाः सर्वाः ओषधीः अजनयः उत्पादितवानसि तथा त्वं अपः
तासामोषधीनां कारणभूतानि उदकान्यजनयः तथा त्वं गाः सर्वान् पशूंश्च उदपादयः उरु विस्तीर्णमंतरिक्षं त्वमाततन्थ विस्तारि
तवानसि त्वमेवांतरिक्षे यत्तमः अस्मद्दृष्टिनिरोधकमंधकारं तत् ज्योतिषा आत्मीयेन प्रकाशेन विववर्थ विवृतं विश्लिष्टं
तवानसि ततन्थ तनु विस्तारे ववर्थ वृञ् वरणे उभयत्र थलि इडभावः बभूथाततन्थजगृभ्मववर्थेति निगम इति निपात्यते॥ ॥त्रयोवि १७२
शीमृचमाह॥ ॥देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य॥ मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ॥
हे देव द्योतमान सहसावन् सोम देवेन मनसा द्योतमानाय त्वदीयाय बुद्ध्या रायो भागं धनस्यांशं अस्मानभिलक्ष्य युध्य प्रयच्छ

द्वा नोऽस्मान् रायो धनस्य भागं भक्तारं। अपहर्तारं शत्रुं अभियुध्य अभिमुख्येन संप्रहर त्वा त्वां कश्चिदपि शत्रुः मा आतनत् कुं
तो न आततं मा कार्षीत् मा हिंसीदित्यर्थः। उभयेभ्यः उभयपक्षेषु युध्यमानानां शत्रूणां वीर्यस्य बलस्य त्वमीशिषे ईश्वरो भवसि स त्वं गवि
ष्टौ संग्रामे प्रचिकित्स अस्मदीयमुपद्रवं परिहर रायः ऊडिदमिति विभक्तेरुदात्तत्वं भागं भजतेः कर्मणि घञ् रलत्वं भाव हलश्
ति बहुलवचनात् कर्तरि कारके तनत् तनोतेर्लुङि तम्॥ सहसावन् सहशब्दात् मतुपि छन्दसि अकारोपजनः युध्य युध संप्रहारे व्यत्य
येन परस्मैपदं तनत् तनु विस्तारे व्यत्ययेन शपनामाङ्प्रत्ययः ईशिषे ईश ऐश्वर्ये इडागमः चिकित्स कित ज्ञाने गुप्तिज्किद्भ्यः
सन् गविष्टौ गवां याणानां इष्टयः एषणानि यस्मिन्निति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥इति प्रथमस्य षष्ठे त्रयोविंशो
वर्गः॥ ॥एता उत्या इति अष्टादशर्चं अष्टमं सूक्तं गोतमस्यार्षं आदितस्तिस्रो जगत्यः अंत्यास्तिस्र उष्णिहः द्वितीया अंत्यास्त्रिष्टु
भः उषा देवता अश्विना वर्तिरित्यंत्यास्तिस्रोऽश्विदेवत्याः तथा चानुक्रांतं एता उत्याः सूनाष्टौ उषस्यं चतुर्जगत्यादि त्रिष्टुभि गतं त्वं चान्त्यं अश्विन इति स
त्वविनियोगो लैंगिकः प्रातरनुवाके उषस्ये क्रतौ जागते छंदसीति अश्विनशस्त्रे च एता उत्या इति तच्च तस्मादिनियुक्ताः सूत्रितं च एता उत्या इति
च तस्यां जगतमिति॥ ॥तत्र प्रथमामृचमाह॥ ॥एता उत्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमंजते। निष्कृण्वाना आयुधानीव
धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः॥ ॥उ इत्येतत् पूरणं त्याः ताः एताः एता उषसः प्रभातकालाभिमानिन्यो देवताः केतुं अंधकारा
वृतस्य सर्वजगतः प्रज्ञापकं प्रकाशं अक्रत कृतवत्यः यस्मादेवं तस्मादुषसो रजसो अंतरिक्षलोकस्य पूर्वे अर्धे प्राचीनदिग्भागे भानुं प्रकाशं प्र
ज्ञेन यत्ना कुर्वंति धृष्णवो धर्षणशीलाः योधाः आयुधानीव यथा असिप्रभृतीन्यायुधानि संस्कुर्वंति एवं निष्कृण्वानाः स्वभासा जगत्
संस्कुर्वाणाः गावो गमनस्वभावाः अरुषीः आरोचमानाः सूर्यस्य प्रकाशस्य निर्मात्र्यः जगज्जनन्यो वा उषसः प्रतियंति प्रतिदिवसं गच्छंति॥
प वं विधा उभामानरक्षणमित्यर्थः अत्र निरुक्तं अतस्ता उषसः केतुमकृत प्रज्ञानमेकेस्याः एव प्रजनार्थे बहुवचनस्यात्पूर्वार्धे अंतरिक्षलोकस्य सम
ज्ञते भानुना निष्कृण्वाना आयुधानीव धृष्णवः निरित्येषसमित्येतस्य स्थाने धृष्णवो निष्कृतं आरोचमाना निर्णीतं त्स्यति निगमो भवति प्रतियंतिगा
मिनो गमनादरुषीरोचनान्मातरो भासो निर्मात्र्य इति। अक्रत करोतेर्लुङि मंत्रे घसेति लुक् निष्कृण्वानाः कृवि हिंसाकरणयोश्च अस्मात् ताच्छी
लिकश्चानश् धात्वन्वर्थे ण्याय स्वार्थिकप्रत्ययः उदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य सत्वं कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥द्वितीयामृचमाह
॥ ॥उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत॥ अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः॥ ॥अरुणा
आरोचमाना भानवः आपस्य दीप्तयः वृथा अनायासेन स्वयमेवोदपप्तन् उद्गमनं तदनंतरमुषसश्च स्वायुजः सुखेन रथे आयो
जितुं शक्याः अरुषीः शुक्लवर्णाः गाः पूर्वमुक्ता तान् रश्मीन् ईदृशीः स्ववाहनभूताश्च तुष्यदीर्गाः एव वा अयुक्षत रथे अयोजयन् उ
कृपुः उषःकाले आलोहितमिव प्राणिनां ज्ञानयुक्ता भवंति तदनंतरमरुषीः आरोचमाना स्ता उषसः रुशंतं शुक्लवर्णं नाम रोचतेर्ज्वलि
तिकर्मणः इति यास्कः शुक्लवर्णं भानुं सूर्यमशिश्रयुः असेवंत तेन सह एकीभवंतीत्यर्थः॥ अपप्तन् पत्लृ गतौ लुङि दिता च्लेरङ्
दिशा पतः पुमिति धातोः पुमागमः। अक्रन् मंत्रे घसेत्यादिना च्लेर्लुक् पूर्वथा प्रत्नपूर्वविश्वेमात्थाल् छंदसीति वार्थे थाल्प्रत्ययः।

341
1924

भाजि श्रयुः श्रिञ् सेवायां बहुलं छंदसीति शपः श्लुः सिज्भ्यस्तविदिभ्यश्चेति झेर्जुस् जुसि चेति गुणः॥ ॥तृतीयामृचमाह॥ ॥अर्चंति नारी
भा॰ ऋ॰ १ रपसो न विष्टिभिः समानेन योजनेनापरावतः॥ इषं वहंतीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते॥ ॥नारीः नेत्र्यः उषसः विष्टिभिः निविकाश
१.९३ कैः स्वकीयैस्तेजोभिः समानेन योजनेनैकेनैव उद्योगेन आपरावतः आदूरदेशात् आ पश्चिमदिग्भागात् अर्चंति नभः प्रदेशं पूजयंति स्व
स्वतेजसा युगपदेव व्याप्नुवंतीत्यर्थः। तत्र दृष्टांतः। अपसो न युद्धकर्मणोपेताः पुरुषा यथा स्वकीयैरायुधैर्धारीमुखेन सर्वं देशं व्याप्नुवंति त
द्वत्। किं कुर्वंत्यः। सुकृते शोभनस्य कर्मणः कर्त्रे सुन्वते सोमाभिषवं कुर्वते सुदानवे कल्याणीर्दक्षिणा ऋत्विग्भ्यो ददते यजमानाय विश्वेदह सर्वा
ण्येव इषमन्नं वहंतीः वहंत्यः प्रयच्छंत्य इत्यर्थः। नारीः। नॄ नये। ऋदोरप्। नरस्य स्त्री नारी। शार्ङ्गरवादिषु पाठान्ङीन्। जसि वाछंदसीति पूर्वसव
र्णदीर्घत्वं। अपसः। अपसशब्दादर्शआदिभ्योऽजित्यच् सुपां सुलुगिति जसः सुः। व्यत्ययेन प्रत्ययात् पूर्वस्योदात्तत्वं। विष्टिभिः विश प्रवेशने
विशंतीति विष्टयः किरणाः क्तिच्क्तौ च संज्ञायामिति क्तिच् विभ्यामः सुपां सुलुगित्यडादेशः॥ ॥चतुर्थीमृचमाह॥ ॥अधि पेशांसि वपते नृतूरिवापो
र्णुते वक्ष उस्रेव बर्जहं। ज्योतिर्विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्युषा आवर्तमः॥ उषाः पेशांसि गात्राश्लिष्टानि रूपवर्णानि तमांसि
अधि आधिक्येन वपते छिनत्ति। तत्र दृष्टांतः। नृतूरिव नृतूर्वर्तिका गात्रविक्षेपकारी नापितः स यथा केशान् छिनत्ति एवमुषा अ
प्यंधकारं समूलं निरस्यति छिनत्तीत्यर्थः। यद्वा नृतूरिव नृत्यंती योषिदिव पेशांसि रूपनामैतत् सर्वैर्दर्शनीयरूपाणि उषाः अधिवपते स्वा
त्मनि अधिकं धारयंतीत्येवं प्रथमतोंधकारं स्वकिरणैर्निरस्य वक्षः स्वकीयमुरः प्रदेशं अपोर्णुते तमसा अनाच्छादितं करोति स्वयमावि
र्भवतीत्यर्थः। बर्जहं पयस उत्पत्तिस्थानं दोहनसमये उस्रा गौर्यथा आविः करोति तद्वत्। किं कुर्वती। गावो न व्रजं यथा गावः स्वकीयं गोष्ठं स्वयमे
व शीघ्रं व्याप्नुवंति एवं स्वयमेव प्राचीं दिशं प्राप्य विश्वस्मै लोकाय ज्योतिः कृण्वती प्रकाशं कुर्वती एवमुक्तेन प्रकारेण उषास्तमोंधकारं व्यावः
विवृतमपश्लिष्टमकरोत्। नृतूः नितुर्वी हिंसार्थः क्विप् चेति क्विप् उपद्रुतिरल्लोपः वीरुपधाया इति दीर्घत्वं यद्वा नृती गात्रविनामे नृतिग
ध्योः कूरिति कूप्रत्ययः। बर्जहं वृजी वर्जने संभक्तो वृणक्ति संभजते गामिति वः पयः चितज्ञ्ञा आग्नावया गोरवर्जप्रकारेण वा तद्युनी खिलगर्भधन
धेउतच्छाति भ्य उपसंख्यानमित्यण् संज्ञापूर्वपदादिपि कृत्यल्युटो बहुलमिति बहुलवचनात् खचा तस्य सार्वधातुकत्वेन कर्तरि श
पि लुग् हल्यादिलात् श्लुर्द्विर्वचनादि वयोरभेद इति वत्वं स्थितानां समानादिलात् पूर्वपदप्रकृतिस्वरत्वं॥ आवः वृञ् वरणे लुङि मंत्रे घसेति च्लेर्लुक् गुणे हल्ङ्या
ब्भ्य इति लोपः छंदस्यपि दृश्यत इति अडागमः प्रातरनुवाके उषस्ये क्रतौ प्रत्यर्चिरित्येषा अनुवक्तव्या आश्विनशस्त्रे च तथा च सूत्रितं प्रत्यर्ची
रित्येषान्या अवादि विज्ञा इति खंडे त्रिष्टुभमिति। अथ पंचमीमृचमाह॥ ॥प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णम
भ्वं। स्वरुं न पेशो विदथेष्वंजंचित्रं दिवो दुहिता भानुमश्रेत्॥ ॥अस्या उषसः रुशत् दीप्यमानं अर्चिस्तेजः प्रत्यदर्शि सर्वैः प्रत्येकं प्रथमतो दृश्यते
ति पश्चात् सर्वासु दिक्षु वितिष्ठते विविधं व्याप्नोतीत्यर्थः। सर्वा दिशो व्याप्य च अभ्वं महत् अभिगतमतिशयेन विपुलं कृष्णं कृष्णवर्णमंधकारं बाध १.९३
ते अपसारयति विदथेषु यज्ञेषु स्वरुं न स्वरुर्नाम यूपशकलः तेन युक्तं यूपं यथा आज्येन अध्वर्यवो अंजन् अंजंति तद्वत् भासिरूपं स्वकीयं पेशः रूपं उषा
अनक्ति संश्लिष्टं करोति तदनंतरं चित्रं चायनीयं भानुं सूर्यं दिवो दुहिता द्युलोकात् उत्पन्ना उषा अश्रेत् असेवत विविधं तेषां समवप्रविश्य

रुः उत्पन्नेन पदं। अश्रेत् श्रिञ् सेवायां लङि बहुलं छंदसीति शपो लुक्॥ ॥इति प्रथमस्य षष्ठे चतुर्विंशो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥अतारिष्म तम
सस्पारमस्योषा उच्छंती वयुना कृणोति। श्रिये छंदो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः॥ ॥अस्य नैशस्य तमसोंधकारस्य पारं समाप्तिं
प्रदेशं अतारिष्म उत्तीर्णा अभूम अनंतरं उच्छंती नैशं तमो वर्जयंती उषाः वयुना वयुनानि सर्वेषां प्राणिनां ज्ञानानि कृणोति निर्मिमीते श्रिये संपद
र्थं छंदो न स्मयते यथा उपच्छंदयिता वशीकरणे समर्थः पुरुषः आधसमीपं प्राप्य प्रीत्यर्थं स्मयते हसते एवं विभाती विशिष्टप्रकाशरूपत्वेन शो
भमाना सती सौमनसाय सर्वेषां सौमनस्याय अजीगः अंधकारं भक्षितवती अतारिष्म प्लवनतरणयोः लुङि सिचि वृद्धिः तमसः षष्ठ्याः पति
पुत्रेति विसर्जनीयस्य संहितायां सत्वं। स्मयते ष्मिङ् ईषद्धसने भौवादिकः। अजीगः गॄ निगरणे लङि बहुलं छंदसीति शपः श्लुः बहुलं छंदसीत्यभ्या
सस्येत्वं तुजादित्वाद्दीर्घः॥ ॥सप्तमीमृचमाह॥ ॥भास्वती नेत्री सूनृतानां दिव स्तवे दुहिता गोतमेभिः। प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्रां उप
मासि वाजान्॥ ॥भास्वती तेजस्वती सूनृतेति वाङ्नाम सूनृतानां प्रियसत्यात्मिकानां नेत्री प्रणेत्री उषःसिद्धा तां यां मनुष्यप्रमुखाः प्राणिनः स्व
स्वव्यापाराय उत्तिष्ठंतः शब्दं कुर्वंति एवंभूता दिवो दुहिता द्युलोकात् सकाशात् उत्पन्ना उषाः गोतमेभिः ऋषिभिः स्तवे स्तूयते हे उषः अस्माभिः स्तुता
त्वं वाजान् अन्नानि उपमासि प्रयच्छसि। कीदृशान् वाजान्। प्रजावतः प्रभाभिः पुत्रपौत्रादिभिः युक्तान् नृवतः दाससलक्षणैर्नृभिः उपेतान् अ
श्वबुध्यान् अश्वबुध्याः विद्यमानतेन बोध्याः ये वाजाः तेषु तान् यद्वा अश्वबुध्यान् वर्णव्याप्तव्याय कारः अश्वमूलान् अश्वैर्हि राजानो धना
न्यन्नानि लभंते अतो धनानामश्वमूलत्वं गोअग्रान् गावः अग्रे प्रमुखे येषां तादृशान् भास्वती भा दीप्तौ असुन् तदंतान्मतुप् मादुपधाया इति मतुपो
वत्वं उगितश्चेति ङीप्। नेत्री नयतेः तृच् ऋन्नेभ्यो ङीप् उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वं स्तवे स्तौतेः कर्मणि लङि बहुलं छंदसीति बहुलग्रहणात्
यकोपि लुक् लोपस्त आत्मनेपदेष्विति तलोपः छंदस्युभयथेत्येकारस्यार्धधातुकत्वेन ङित्वाभावात् गुणावादेशौ व्यत्ययेन परस्मैपदं चेति
तलोपः छंदस्युभयथेति मतुप् पूर्वत्वं ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं मास मामान आदिरिति॥ ॥अष्टमीमृचमाह॥ ॥उषस्तमश्यां यशसं
सुवीरं दासप्रवर्गं रयिमश्वबुध्यं। सुदंससा श्रवसा या विभासि वाजप्रसूता सुभगे बृहंतं॥ ॥हे उषः उषोदेवते रयिं धनमश्यां प्राप्नुयां कीदृ
शं यशसं यशस्करं कीर्त्यायुक्तं सर्वैः प्रशस्यमित्यर्थः। सुवीरं शोभनैर्वीरैः पुत्रादिभिर्युक्तं दासप्रवर्गं प्रकृष्टो वर्गः संघः प्रवर्गः दा
सानां कर्मकराणां प्रवर्गो यस्मिन् तं अनेकभृत्यरूपेतमित्यर्थः अश्वबुध्यं अश्वा बुध्या बोधयितारो येन धनेन तादृशं हे सुभगे शोभ
नधने उषः सुदंससा शोभनेन कर्मणा युक्तेन श्रवसा यशसा स्तोत्रेण प्रीता त्वं वाजप्रसूता अस्मभ्यं दत्तान्ना सती बृहंतं प्रौढं यायारयिं
विभासि विशेषेण प्रकाशयसि। तमश्यामिति पूर्वेण संबंधः। अश्यां अश्नोतेर्व्यत्ययेन परस्मैपदं बहुलं छंदसीति विकरणस्य
लुक्। यशसं अर्शआदित्वात् मत्वर्थीयो अच् व्यत्ययेन प्रत्ययात् पूर्वस्योदात्तत्वं। दासप्रवर्गं दासयत्कर्मकरिणः इति दासाः
भृत्याः दसु उपक्षये अस्माण्णयंतात् पचाद्यच् चित्वादंतोदात्तत्वं। तद्बहुव्रीहौ स्वरेण विध्यते। सुदंससा सोर्मनसी इति बहुव्री
ह्यादुत्तरपदाद्युदात्तत्वं यासां सुपां सुलुगित्याडादेशः॥ ॥नवमीमृचमाह॥ ॥विश्वानि देवी भुवनाभिचक्ष्या प्रतीची चक्षुरु
र्विया वि भाति। विश्वं जीवं चरसे बोधयंती विश्वस्य वाचमविदन्मनायोः॥ ॥देवी द्योतमाना उषाः विश्वानि सर्वाणि भुवनानि भूत

343/1924

ज्ञातानि अभिचक्ष्य अभिप्रकाशयंती कृत्वा अनंतरं प्रतीची प्रत्यङ्मुखी सती चक्षुः प्रकाशेन तेजसा उर्विया उर्वी विस्तीर्णा सती वि
भा०अ० भाति प्रकाशते अपि च विश्वं जीवं सर्वं प्राणिजातं चरसे चरणाय स्वस्वव्यापारेषु प्रवर्तमानाय बोधयंती निद्राणाः सकाशात् उत्था
पयंती उषाः विश्वस्य सर्वस्य मनायोः मनसा युक्तस्य वाग्व्यवहारसमर्थस्य प्राणिजातस्य वाचं स्तुतिलक्षणां वचमविदत् अलभत एव
१७४ मुषा परसः सृजन्ताव तीति संतापपश्चाभवति अभिचक्ष्य चक्षि ङुव्यकारादेशाभावश्छान्दसः। अयं प्रकाशनार्थो पि सुप्तासेन अपूर्वे उत्तिते
प्रत्ययस्य ल्यबादेशः प्रतीची प्रतिपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। अंचतेश्चोपसंख्यानमिति ङीप्
। अचः इत्यकारलोपः चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेणाङीप उदात्तत्वं। उर्वीया उर्वीशब्दात् उत्तरस्य सोः इयादियाजीकारण वा पुर्व
स्यादिवनमितीयादेशः। अदेशस्यास्थान स्यलोपेन भवति। मनायोः मन आत्मान इच्छति मनस्यति क्यच् आमनः क्यच्यन्यन्न
स्य वर्णव्यापत्त्या सकार आकारः। यद्वा कृतुः क्यच्च सल्लोप श्चेति क्यच्छ सलोपश्च अकृत्सार्वधातुकयोरिति दीर्घः॥ ॥ पुनः पुनः मित्यमाह
॥ पुनःपुनर्जायमाना पुराणी समानं वर्णमभि शुंभमाना। श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयन्त्यायुः॥ ॥ पुनःपुनर्जायमा
ना प्रतिदिवसं सर्वदा स्यात्पूर्वं प्रादुर्भवंती पुराणी चिरंतनी नित्येत्यर्थः। यस्मात् समानं वर्णं एकरूपं अभि प्राप्य शुंभमाना अविशेषा
नाविभिन्ने यद्यपि दिवसं पर्यायेण स्वरूपेण वस्त्वानाशित्यत्वमित्यर्थः एवं गुणविशिष्टा देवी देवनशीला उषाः मर्तस्य मरणधर्मस्य प्राणिजात
स्यायुः जीवनं जरयंती वर्तते नवसीः पूषः श्वतीनां सहितसर्वेषामायुर्हीयते। यथा पुनः पुनर्जायमाने एकं अनः सर्वायुर्जरयति। तत्र दृष्टांतः कृत्नुः
कृतिनं श्वीकाच्च श्वीव्याधस्त्रीव सा यथा विजः चलतः पक्षिणः आमिनाना प्रशाद्विच्छेदनेन हिंसंती तेषामायुर्जरयति तद्वत्। पुराणी पुरस्थमव
अव्ययात् सायं चिरं प्राह्णे इत्यादिना भावार्थे घप्रत्ययः। पुराणप्रोक्तेषु ब्राह्मणकल्पेष्विति निपातनान्नुड्भावः। यस्मादेवं तस्मात् जीवन्यथ
नांतोदात्तत्वं शुंभमाना शुभ दीप्तौ। पिता दनुदात्तत्वं शानचो लसार्वधातुकस्वरेण धातुस्वरः। श्वघ्नीव श्वघ्नी हंति पानि
बहुलं छंदसीति वचनात् क्विप्। प्रातिपदिकेभ्यः उपपदे हंतेः क्विप् कृन्नेभ्यो ङीप् इति ङीप् अल्लोपोनः इत्यकारलोपः हो हंतेरिति घत्वं उदात्तनिवृत्तिस्व
रेण ङीप उदात्तत्वं कृत्नुः कृती छेदने औणादिकः क्नुप्रत्ययः विजः ओविजी भयचलनयोः विजंति चलंतीति विजः पक्षिणः आमिनाना मीङ् हिं
सायां क्रैयादिकः प्वादीनां ह्रस्वः इति ह्रस्वत्वं शानचश्चित्त्वादंतोदात्तत्वं॥ ॥ इति प्रथमस्य पंचमे पंचविंशो वर्गः॥ ॥ एकादशीमृचमाह॥ व्यूर्ण्वती दि
वो अंताँ अबोध्यप स्वसारं सनुतर्युयोति। प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति॥ ॥ दिवः नभसः अंतान् प्रांतान् व्यूर्ण्वती विवृ
तान् तमसा वियुक्तान् तमसा वियुक्तान् कुर्वती उषाः अबोधि सर्वैः प्राणिभिः ज्ञायते ज्ञाता भवति। तदनंतरं स्वसारं उषसः प्रादुर्भावसमानसम्भवस्वसृस्थानीय
रंतीं निशां सनुतः अंतर्हितनामैतत् अंतर्हितप्रदेशे अपयुयोति अपगमयति पृथक्करोति मनुष्याणां संबंधीनि युगानि कृतत्रेतादीनि
प्रमिनती गमनागमनाभ्यां प्रकर्षेण हिंसंती जारस्य रात्रेर्जरयितुः सूर्यस्य योषा जाया उषाः चक्षसा आत्मीयेन प्रकाशेन विभाति विशेषेण
काशते व्यूर्ण्वती ऊर्णुञ् आच्छादने विपूर्वादस्मात् लटः शतृ उगितश्चेति ङीप् शतुरनुम इति स्वरेण व्याप्तेनुप्रकृतिस्वरमिश्रण यो बहुलं छंद
सीति शपः श्लुः मनुष्या सर्वासां सुपां सुलुगिति षष्ठ्या डादेशः युगानि युज्यते करणे कर्मणि वा घञ् जत्ते कुधि ण्यतामिति कुत्वं। उच्छादिषु पाठादंतोदात्त
१७४
पकरणे चयुगशब्दपाठात् लघूपधगुणाभावः उञ्छादीनां चेत्यंतोदात्तत्वं जारस्य दृ जाशो कृ नंगिनिलु कृ चेति घञ् जंतोनिपात्यते॥ ॥ द्वादशीमृचमा
ह॥ ॥ पशून्न चित्रा सुभगा प्रथाना सिन्धुर्न क्षोद उर्विया व्यश्वैत्। अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना॥ सुभगा शोभनधना
चित्रा चायनीया पूजनीया वा उषाः पशून्न यथा पशून् गोपालः कोरण्ये विस्तारयति। तथा प्रथाना तेजांसि विस्तारयंती उर्विया उर्वी महती एवं
सा व्यश्वैत् सर्वं जगत् व्याप्नोत्। तत्र दृष्टांतः। सिंधुर्न क्षोदः यथा स्यंदनशीलमुदकं निम्नदेशे अचिरात् व्याप्नोति तद्वत् सैषा उषाः सूर्यस्य रश्मिभिः कि
रणैः सह दृशानादृश्यमाना सती चेति प्रज्ञायते किं कुर्वती दैव्यानि देवसंबंधीनि व्रतानि दर्शपूर्णमासादीनि कर्माणि अमीनती अहिंसती अनुष्ठा
नेयजमानान् प्रवर्तयंतीत्यर्थः। उषसः प्रादुर्भावानंतरं हि अग्निहोत्रादीनि सर्वाणि कर्माण्यनुष्ठीयंते नराश्चैनसा यमस्विदेवावा अनुष्ठेति
श्रुतेः प्रथाना प्रथ प्रख्याने अस्मादंतर्भावितण्यर्थात् औणादिकश्चानश् बहुलं छंदसीति शपो लुक्। सिंधुः स्यंदेः प्रस्रवणे स्यंदेः संप्रसारणं धश्च
तद्प्रत्ययः निहितं निदानं घञ्। व्यश्वैत् पुनः श्विगतिवृद्ध्योः लुङि अङ् चङोर्विकल्पितत्वान्नुः सिच् आगमानुशासनस्यानित्यत्वाद्वृद्ध्य
सिचि वृद्धिः अमिनती दिवादि प्रतिषेधाभावः बहुलं छंदसीति प्रागमाभवः श्नसोरल्लोपः इति नलोपः नेतिवानि
कर्मणि लुट् बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः दृशाना दृशिर्कर्मणि लटः शानच् बहुलं छंदसीति विकरणस्य लुक्। प्रातरनुवाकाश्विनशस्त्रे त्रि
ष्टुभं छंदसि उषस्तच्चित्रमिति तिस्रो विनियुक्ताः आश्विनशस्त्रे च अथोषस्य उति खंडे सूत्रितं उषस्तच्चित्रमाभरेति तिस्रः औष्णिहमिति तत्र प्रथमा
मृचमाह॥ ॥ उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति। येन तोकं च तनयं च धामहे॥ ॥ हे वाजिनीवति वाजो हविर्लक्षणमन्नं पूजा
क्रिया वाजिनीत्याचक्षते तद्युक्ते उषः उषोदेवते अस्मभ्यं चित्रं चायनीयं तद्धनं आभर आहर प्रयच्छ येन धनेन तोकं पुत्रं तनयं च पौत्रं च धामहे धा
महे धारयामः। अत्र निरुक्तं उषस्तच्चित्रं चायनीयं धनमाहरास्मभ्यमन्नवति येन पुत्रांश्च पौत्रांश्च दधीमहीति। धामहे दधातेर्लिङि बहुलं छंदसीति
शपो लुक् व्यत्ययेन आत्मनेपदं। यद्वा कृधि आदृतमस्यपि च ल्यट् आगमः प्रत्ययश्चेपि इडागमश्च अतः प्रत्ययस्वरापितादनुदात्तत्वे धातुस्वरः शि
ष्यते। आस्मिन्पक्षे एत एदिति एत्वाभावो व्यत्ययेन। इत्यः यकृत्तयोगादिघातः॥ ॥ चतुर्दशीमृचमाह॥ ॥ उषो अद्येह गोमत्यश्वावति विभा
वरि रेवदस्मे व्युच्छ सूनृतावति॥ हे गोमतीति अस्मभ्यं दत्तैर्गोभिर्युक्ते तथा अश्वावति अश्वैर्युक्ते विभावरि विशिष्टप्रकाशोपेते सूनृताव
ति प्रियसत्यात्मिका वाक् सूनृता तादृश्या वाचा युक्ते एवं भूते हे उषः उषोदेवते अद्य इदानीं प्रभातसमये इह अस्मिन्देशे अस्मे अस्माकं रेवत् धन
युक्तं कर्म यथा भवति तथा व्युच्छ विवासय तमोनिवारय। अश्वावति मंत्रे सोमाश्वेंद्रियेति मतौ दीर्घत्वं पादादित्वात् आमंत्रितस्याष्टमिकनिघाताभा
वः रेवत् रयिर्मतौ बहुलमिति संप्रसारणं छंदसीरिति मतुपो वत्वं रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यमिति मतुप उदात्तत्वं व्युच्छ उछी विवासने
॥ ॥ पंचदशीमृचमाह॥ ॥ युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः॥ अथा नो विश्वा सौभगान्या वह॥ हे वाजिनीवति हविर्लक्षणान्नवति
उषः उषोदेवते अरुणान् अरुणवर्णान् अश्वान् युक्ष्व योजय अद्य अस्मिन्काले युक्ष्वा हि योजय हि शब्दः अवधारणे अथानंतरं अस्माक
विश्वा सर्वाणि सौभाग्यानि सौभाग्यानि अस्मभ्यमावह आनय अश्वान् दीर्घादटि समानपादे इति संहितायां नकारस्य रुत्वं अत्रानु
नित्यमिति सानुनासिक आकारः। सौभगानि सुभगानि भगानि अत्र इकः काशादिषु पाठात् कर्मणोरथयो प्राणभृज्जातिवयोवचनोद्गात्रादिभ्य

ध्नित्ययः इडागमश्च। तेपूर्वपदस्यचेत्युभयपदस्य धौप्राप्तायांसर्वविधीनांछंदसिविकल्पितत्वादत्रोत्तरपदस्यैव भवतीत्युक्तं॥ ॥इतिप्रथम
भा॰प्र॰ स्यषष्ठेषड्विंशोवर्गः॥ ॥प्रातरनुवाकस्याश्विने क्रतौ औष्णिहछंदसि अश्विनावर्तिरित्यंतं यच्चः आश्विनशस्त्रेचेत थाचसूत्रितं। अश्विना
वर्तिरस्मदागोमद्दस्राहिरण्यवदिति सूत्रेणाधिकृतमिति॥ ॥तत्रप्रथमांसक्तोषोडशीमृचमाह॥ ॥अश्विनावर्तिरस्मदागोमद्दस्राहिरण्यवत्॥ अर्वा
१७७ ग्रथंसमनसानियच्छतम्॥ ॥उषःसाहचर्याद्धुत्थिताव् अश्विनाविदमादिकेनतृचेन स्तूयते। हे अश्विना अश्वयुक्तौ व्यपने उलौ वा देवौ
दस्राशत्रूणामुपक्षपयितारौ अस्मदस्माकं वर्तिः वर्तनहेतुभूतं गृहं आसमंतात गोमंतं बहुभिर्गोभिर्युक्तं हिरण्यवत् हितरमणीय
धनयुक्तं च यथाभवति तथा समानसा समानमनस्कौ संतौ युवां युवयोरीयं रथं अर्वाक् अर्वाचीनमस्मदीयगृहमभिमुखं नयच्छतम्
वर्तयतं अश्विनास्पयां सुपांसुलुगित्याकारः वर्तिः वर्ततस्मिन्निति वर्तिर्गृहं तुण्यादिकः तिप्रत्ययः अस्मान्त्सुपांसुलुगिति षष्ठ्यालुक् समा
नसासमानं मनोययोस्तौ समानस्य छंदसीति सभावः॥ ॥सप्तदशीमृचमाह॥ ॥याविच्छाश्लोकमादिवोज्योतिर्जनाय चक्रथुः॥ आ
नऊर्जं वहतमश्विनायुवं॥ ॥हे अश्विनौ युवां दिवो द्युलोकात् श्लोकं उपश्लोकनीयं प्रशंसनीयं ज्योतिस्तेजः उषा उत्थं भतमस्माभिर
नुभूयमानेन प्रकारेण च कथंः इत्थं तौ कथाचिन्मृतेन सूर्याचंद्रमसावश्विनावुच्यते तदुक्तं यास्केन। तत्कावश्विनौ द्यावापृथिव्यावित्येके सूर्या
चंद्रमसावित्येक इति। तथाच प्रकाशकत्वं तयोरुपपन्नं तौ युवं युवां नास्मभ्यं ऊर्जं बलप्रदमन्नं आवहं अनयतं प्रयच्छतं श्लोके। श्लोक
संघाते अयं कृत्यर्थोपिकर्मणि घञ् उदाद्यत्तत्वं॥ ॥अष्टादशीमृचमाह॥ एहदेवामयोभुवा दस्राहिरण्यवर्तनी॥ उषर्बुधो
वहंतुसोमपीतये॥ ॥उषर्बुधः उषसि प्रबुद्धा अश्वाः इहास्मिन्यज्ञे सोमपीतये सोमपानाय दस्रा शत्रूणामुपक्षपयितारावश्विनौ
आवहंतु। अनामंतुकीदृशौ देवानां भि यज्ञावितिश्रुतेः हिरण्यवर्तनी वर्ततनेनेतिस्रुत्सरथवर्तनिः स्पंदनरथः उच्यते सुवर्णमयो
वर्तनिर्ययोस्तौ देवत्यादिषु सुपांसुलुगित्याकारः सोमपीतये पापानो भावेक्तिनि घुमास्थेतीत्वं। सोमस्यपीतिर्दासी भाराद्वित्वा
त्पूर्वपदप्रकृतिस्वरत्वं॥ ॥इतिप्रथमस्यसप्तविंशोवर्गः॥ ॥अग्नीषोमाविति द्वादशर्चं नवमंसूक्तं गोतमस्यार्षं आदितस्त्रिस्रोनु
ष्टुभः। नवम्याद्यास्तिस्रोगायत्र्यः। अष्टमीजगती त्रिष्टुभोवशिष्टाः पंचत्रिष्टुभः अग्नीषोमदेवता तथाचानुक्रांतं॥ अग्नीषोमा
द्वादशाग्नीषोमीयमाद्यास्तिस्रोनुष्टुभः पूर्वाद्यास्तिस्रोगायत्र्योष्टमीजगतीवेति। अग्नीषोमीयस्य पशोर्वपापुरोडाशहविषां
आदितस्तिस्र ऋचः क्रमेणानुवाक्याः सूत्रितं च। अग्नीषोमाविमं सुमे युवमेतानि दिविरोचनानीतिसूत्रावितिततत्रप्रथमामृ
चमाह॥ ॥अग्नीषोमाविमं सुमेशृणुतं वृषणाहवं॥ प्रतिसूक्तानिहर्यतं भवतंदाशुषेमयः॥ ॥वृषणावर्षणौ कामानां
वर्षितारौ हे अग्नीषोमौ इमामिदानीं प्रयुज्यमानं ममदीयं हवमाह्वानं सुशृणुतं सम्यक् गच्छतं सूक्तानि शोभनानि उक्तानि ल
क्षणानि अस्माभिः कृतानि वचांसि प्रतिहर्यतं प्रत्येकं कामयतं यातं तदनंतरं दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय
मयः सुखस्य दातारौ भवतं अग्नीषोमौ अग्नेश्वसोमश्चेइद्वद्ग्नेः सोमवरुणयोरितीत्वं। अग्नेस्तुत्स्तोमसोमाइतिष
त्वं देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरेप्राप्ते आमंत्रितस्यचेत्याष्टमिकत्वं। वृषणा सुपांसुलुगित्याकारः वोर्षपूर्वस्येति विकल्प १७७
नादुपधायादीर्घाभावः हवं भावेनुपसर्गस्येतिस्यतेरप् संप्रसारणं च सूक्तानि सुपूर्वाद्वचः कर्मणिनिष्ठा स्रपमानाक

इत्युत्तरपदांतोदात्तत्वं। हर्यतं हर्यगतिकांत्योर्भौवादिकः यद्वापौर्णमास्यामग्नीषोमावुपांशुयाजस्यदेवतातदानीमग्नीषो
मायोअच्छेतिस्यानुवाक्या सूत्रितं च। उक्ता देवताइतिखंडेअग्नीषोमायोअद्य धामान्यन्यंदिवोमातरिश्वाजभारेति॥ ॥तामेतां
द्वितीयामृचमाह॥ अग्नीषोमायोअद्यवामिदंवचः सपर्यति। तस्मैधत्तं सुवीर्यं गवांपोषंस्वश्व्यं॥ हे अग्नीषोमौ यो यजमानः
अद्यास्मिन्कर्मणि वां युवाभ्यां युष्मदर्थं इदं स्तुतिलक्षणं वचो वाक्यं सपर्यति पूजितं करोति तस्मै यजमानाय गवां पश्वादीनां पो
षमभिवृद्धिं धत्तं प्रयच्छतं कीदृशं पोषं सुवीर्यं शोभनेन वीर्येण सामर्थ्येनोपेतं स्वश्व्यं शोभनेरश्वैर्युक्तं गवां सौवेकाचइतिप्रा
प्तस्य विभक्त्युदात्तत्वस्य न गोश्वसावर्णेति प्रतिषेधः॥ ॥तृतीयामृचमाह॥ ॥अग्नीषोमायआहुतिंयोवांदाशाद्धविष्कृतिं।
सुप्रजयासुवीर्यं विश्वमायुर्व्यश्नवत्॥ अग्नीषोमौ यो यजमानः आहुतिं आज्याहुतीं वां युवाभ्यां दाशात् दद्यात्। अथवा हविः
कृतं हविषा चरुपुरोडाशादिना कृतमाहुतिं यो यजमानो दद्यात्॥ स यजमानः प्रजया पुत्रपौत्रादिना युक्तं वीर्यं शोभनवीर्ययु
क्तं विश्वं सर्वमायुर्जीवनं व्यश्नवत्। व्याप्नोति आहुतिं जुहोतेः क्तिनि तादौ च निति गतेः प्रकृतिस्वरत्वं दाशात् दाशृदाने लेट्याडागमः
यद्वृत्तयोगान्निघातः हविष्कृतिं हविषः कृतिंकरणं यस्य माहुतेः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। नित्यंसमासेनुत्तरपदस्थस्येति
विसर्जनीयस्यषत्वं। अश्नवत्। अश्नोतिर्व्यत्ययेन परस्मैपदं लेट्याडागमः॥ ॥चतुर्थीमृचमाह॥ ॥अग्नीषोमाचेतितद्वीर्यंवा
यदमुष्णीतमवसंपणिंगाः॥ अवातिरतंबृसयस्यशेषोविंदतंज्योतिरेकंबहुभ्यः॥ ॥हे अग्नीषोमौ वां युवयोः तद्वक्ष्यमाणं
वीर्यं सामर्थ्यं चेति। अस्माभिर्ज्ञातमभूत् यद्येन वीर्येण गा अवसं गोरूपमन्नं पणिं पणिनामकादसुरात् अमुष्णीतं अपाहर्त
तथा बृसयस्य त्वष्टुरपत्यस्य वृत्रस्य शेषं अपत्यं अवातिरतं अवधिष्टं शेषः अपत्यं शेषउत्पन्नलनामसु दृश्यते प्रयत इतिया
स्कः। तद्वृत्रसकाशात् दुसंबंधं वृत्रं अवातिरतं अवधिष्टं अवतिरतिर्वधकर्मा प्राणापानरूपयोर्युवयोः वृत्रेणावस्थानात् समरणं प्राप्तः तथाचात
यतेतस्माज्जज्ञभ्यमानादग्नीषोमौनिरक्रामतां प्राणापानौ वाएनं तद्दजिता मितिनतारत्रवधानं नरं ज्योतिर्द्योतमानं सूर्यं एकं न भमि छेगतं बहु
भ्यो जनेभ्यः बहुनामर्थाय अविंदतं अलभेथां एतत्सर्वं येन वीर्येण क्रियते तदस्माभिर्ज्ञातमित्यर्थः चेति चितीसंज्ञाने लुङ्चिणभावकर्मणोः
रितिच्लेश्चिणादेशः चिणोलुङ्तिचरस्य लुक् अमुष्णीतं मुषस्तेयक्रैयादिकः अवसं अवतेरौणादिको असच्प्रत्ययः। सुपांसुलुगिति द्विती
यायाः सुः एकं इणगतौ इण भीकापाशल्यमर्चिभ्यः कन्निति कन्प्रत्ययः नित्वादाद्युदात्तत्वं। अग्नीषोमीयस्य पशोर्वपापुरोडाशादि
हविषां युवमेतानीत्याद्यास्तिस्र ऋचः क्रमेण याज्याः सूत्रंतु पूर्वमेवोदाहृतं पौर्णमासयागे अग्नीषोमीयस्य पुरोडाशस्य युवमेतानीत्येषा
याज्या उक्ता देवता इति खंडे सूत्रितं। युवमेतानि दिविरोचनान्यग्निश्च सोम सक्रतू अधत्तमिति॥ ॥तामेतां सूक्ते पंचमीमृचमाह॥ ॥युवमेतानि
दिविरोचनान्यग्निश्चसोमसक्रतू अधत्तं॥ युवंसिंधूँरभिशस्तेरवद्यादग्नीषोमावमुंचतंगृभीतान्॥ ॥हे सोम त्वमग्निश्च सक्रतू समानक
र्माणौ संतौ युवं युवां रोचनानि दीप्यमानानि एतानि अस्माभिर्निरीक्ष्यमाणानि तारादीनि ज्योतींषि दिवि द्युलोके अधत्तं अधारयतं उन

347/1924

भा॰प्र॰ गर्भस्थयमाख्यायिका इंद्रो वृत्रं हत्वा ब्रह्महत्यया भीतः सन् पृथिव्यां वृक्षेषु स्त्रीषु च स्वकृतां ब्रह्महत्यां व्यहन्यमासीत्तासामपांशुधिरग्नीषोमाभ्यां ग्र
स्तेति ब्रह्महत्यारोगेन पापेन गृभीतान् आक्रांतान् सिंधून् नदीविशेषान् हे अग्नीषोमौ युवां अभिशस्तेः अभिशस्यमानात् अभितः प्रकटिता
१७६ द्वद्यात् तस्मात् पापात् अमुंचतं मुक्तवंतौ यद्वा वृत्रद इंद्रेण हतः सन् नदीषु पापात् तो मृतेन वृत्रशरीरेण नद्यः सर्वा दुष्टा बभूवुः तथा च तैत्तिरीयके
इंद्रो वृत्रमहन् सो ऽपो ऽभ्यम्रियत तासां यन्मेध्यं यज्ञियं सदेवमासीत् तदपोदक्रामदिति तेन रोगेण गृहीता नदीः तस्माद्रोगात् अग्नीषोमौ मुक्तवंतौ
तौ च नानिरुत्वदीर्घौ अनुदात्तेतश्च हलादेरिति यच्प्रतिं सिंधून् नदीर्घादटि समानपाद इति नकारस्य रुत्वं अत्रानुनासिकादित्यनुनासिकः गृभीतान् हृग्र
होर्भ इति भत्वं अग्नीषोमीयस्योपांशुयाजस्य अन्यं दिव इत्येषा याज्या अग्नीषोमायोः अघ्वाम्निष्टवस्य सूत्र मुदाहृतं॥ ॥तामेतां पंचमीमृच
माह॥ ॥आन्यं दिवो मातरिश्वा जभारमथ्नादन्यं परि श्येनो अद्रेः। अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकं॥ ॥हे अग्नीषो
मौ युवयोर्मध्ये अन्यमेकमग्निं मातरिश्वा वायुर्दिवो द्युलोकादाजभार आहृतवान् यजमानाय आजहार तथा च मंथनं रंहिता न्यानं रयिमिव प्रदा
स्यं रातिं भरद्भृगवो मातरिश्वेति श्येनः शंसनीयगतिमान् पक्षी पक्ष्याकारगायत्री अन्यं सोमं अद्रेः पर्वतस्योपरि स्थितात् स्वर्गात् अमथ्ना
त् बलादाहृतवती एवं महानुभावौ युवां ब्रह्मणा स्तवेन मंत्ररूपेण स्तोत्रेण हविर्लक्षणेनान्नेन का वावृधानौ वर्धमानौ युवां यज्ञाय अन्येषां देवा
नां यागाय उरु विस्तीर्णं लोकं स्थानं चक्रथुः कृतवंतौ उरुलोकत्वस्य पूरणं आज्यभागदेवतयोरग्नीषोमयोरंतरा यद्यप्युत्तरत्र तन्मध्ये अन्यदेव
तानि सर्वाणि हवींषि हूयंते तन्मध्यमस्थानमग्नीषोमकृतं तथा चाम्नायः अग्निरित्यंकं गत्वा वौषट्कृते तानां यदग्नीषोमावंतरा देवता इज्यदेवता
नां विधृत्या इति वृत्ते धोरधादेशः कर्मत्वं दश समभ्यासस्य दीर्घत्वं सुपां सुलुगिति आकारः॥ ॥ इति प्रथमस्य षष्ठे त्रिंशो वर्गः॥ ॥ सप्तमीमृच
माह॥ ॥अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथां। सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः॥ ॥हे अग्नीषोमौ
प्रस्थितस्य हामार्थमाहवनीयसमीपं प्राप्तस्य हविषः इदं हविः वीतं भक्षयतं तदनंतरं च हर्यतं अस्मान् कामयेथां हे वृषणा कामानां वर्षितारौ जु
षेथां अस्मदीयं परिचरणं सेवेथां तदनंतरं सुशर्माणा शोभनसुखौ स्ववसा सुष्ठु शोभनरक्षणौ च भूतं अस्माकं भवतं अथानंतरं हविर्द
वते यजमानाय शंसनीयानां रोगाणां शमनं योः पृथक्कर्तव्यानां भयानां यावनं पृथक्करणं च धत्तं कुरुतं शंयोः शमनं च रोगाणां यावनं
च भयानामिति हविषः क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी वीतं वी गतिप्रजनकांत्यसनखादनेषु तस्मात् अदादि
त्वाच्छपो लुक् वीतं च हर्यतं चेति चार्थप्रतीतेः श्वात्वारिकोऽपे विभक्ते इति प्रथमायामिति इति विभक्तेर्निघात प्रतिषेधः हर्यतं पादादित्वाभावेऽपि ति
ङ्ङतिङ इति निघाताभावः जुषेथां प्रपंचयाम्रेडितस्यामंत्रितं पूर्वमविद्यमानवदिति अविद्यमानत्वे सति तिङ्ङतिङ इति निघाताभावः सुशर्माणास्ववसा
उभयत्र बहुव्रीहौ सो मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं भूतं लोडि बहुलं छंदसीति शपो लुक्॥ ॥अष्टमीमृचमाह॥ ॥ यो अग्नी
षोमा हविषा सपर्याद्देवद्रीचा मनसा यो घृतेन। तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतं॥ यो यजमानः अग्नीषोमौ देवद्रीचा १७६
देवानां चेतादेवतापरायणेन श्रद्धायुक्तेन मनसांतःकरणेन पुनः सन् हविषा चरु पुरोडाशादिना सपर्यात् सपर्यति परिचरति यश्च यजमा
नो घृतेनाज्येन अग्नीषोमौ परिचरति तस्य यजमानस्य व्रतं कर्म रक्षतं अहंसः पापात् तं च यजमानं पातं रक्षतं विशे यागेषु प्रविशते

तस्मै जनाय यजमानाय महि महत् प्रभूतं शर्म सुखं यच्छतं दत्तं अग्नीषोमौ देवताइंद्रे उभयपदप्रकृतिस्वरत्वं सपर्यात् सपर पूजायां कं 349/1924
ड्वादिः छस्थानगमः देवद्रीचा देवानांचतीति देवद्यूइ अंच तेऋत्विगित्यादिना क्विन् अनिदितामिति लोपः विष्वग्देवयोश्चटेरद्र्यंचतावप्रत्यय इ
ति देवशब्दस्य टेरद्र्यादेशः तत्रीयैकवचने अच इत्यकारलोपे चाविति दीर्घत्वं कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते अद्रिसध्र्योरंतोदात्तनिपातनं
त्वरनिरत्यर्थमिति वचनात् अद्र्यादेशांतोदात्तो निपातितः विशे सावेकाच इति विभक्तेरुदात्तत्वं पौर्णमासे यागे अग्नीषोमीयस्य यागस्य अग्नि
षोमित्येषानुवाक्या तथा च सूत्रितं उक्तदेवता इति खंडे सूत्रितं अग्नीषोमा सवेदसा युवमेतानीति॥ ॥तामेतां नवमीमृचमाह॥ ॥
अग्नीषोमा सवेदसा सहूती वनतं गिरः। सं देवत्रा बभूवथुः॥ ॥हे अग्नीषोमौ युवां सवेदसा समानेन एकेन वेदसा हविर्लक्षणेन धनेन युक्तौ
सहूती समानाह्वानौ च संतौ गिरः अस्मदीयाः स्तुतीः वनतं संभजेथां देवत्रा देवेषु सर्वेषु युवां संबभूवथुः संतौ भूतौ संभाविती प्रशस्तौ स्तु
तानौ वा एतौ देवतानां यदग्नीषोमाविति श्रुतेः सवेदसा समानवेदौ ययोः समानस्य छंदसीति सभावः वनतं वन षण संभक्तौ देवत्रा देवमनु
ष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्यर्थे त्राप्रत्ययः॥ ॥दशमीमृचमाह॥ ॥अग्नीषोमावनेन वां यो वां घृतेन दाशति। तस्मै दीदयतं बृहत्॥ ॥
हे अग्नीषोमौ वां युवयोः संबंधी यो यजमानः अनेन घृतेन उत्पन्नाशिभिः संस्कृतेनाज्येन युक्तं हविः वां युवाभ्यां दाशति प्रयच्छति तस्मै यजमा
नाय बृहत् प्रभूतं धनं दीदयतं दीदीपिकर्मा॥ ॥एकादशीमृचमाह॥ ॥अग्नीषोमाविमानि नो युवं हव्या जुजोषतं। आ यातमुप नः सचा
॥ ॥हे अग्नीषोमौ युवां नोऽस्मदीयानीमानि हव्यानि हवींषि जुजोषतं सेवेतां तदर्थं नोऽस्मान् सचा सह युवामुपायतं उपागच्छतं। जुजोषतं जु
षी प्रीतिसेवनयोः लेटि व्यत्ययेन परस्मैपदं अडागमः बहुलं छंदसीति श्लुः ततो व्यत्ययेनैव बहुलं छंदसीति विकरणस्य बहुलं छंदसीति श्लुः ततो व्यत्ययेनैव बहुलं छंदसीति चर्त्वमिति द
र्घानाभ्यस्तस्याचि पिति सार्वधातुके इति लघूपधगुणप्रतिषेधाभावः॥ ॥द्वादशीमृचमाह॥ ॥अग्नीषोमा पिपृतमर्वतो न आ प्यायंतामुस्रिया हव्यसू
दः। अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमंतं॥ हे अग्नीषोमौ नोऽस्माकं अर्वतोऽश्वान् पिपृतं पालयतं हव्यसूदः क्षीरादिहवि
षां उत्पादयित्र्य उस्रियाः अस्मदीया गावश्च आप्यायंतां आप्यायिताः प्रवृद्धाः संतु मघवत्सु हविर्लक्षण धनयुक्तेषु अस्मे अस्मासु बलानि
धत्तं स्थापयतं। यथा नोऽस्माकमध्वरं यागं श्रुष्टिमंतं धनयुक्तं कृणुतं कुरुतं पिपृतं पृ पालनपूरणयोः इत्यस्य जुहोत्यादित्वात् शपः श्लुः अर्ति
पिपर्त्योश्चेत्यभ्यासस्येत्वं। हव्यसूदः हव्यं सूदंति क्षरंतीति हव्यसूदः षूद क्षरणे क्विप् अस्मे सुपां सुलुगिति सप्तम्याः शे आदे
शः श्रुष्टिमंतं श्रुष्टीति धननाम अशू व्याप्तौ अश्नुते व्याप्यत इति श्रुष्टिः पृषोदरादिः छंदसीर इति मतुपो वत्वाभावः उदात्तत्वं॥ ॥इति प्रथमस्य षष्ठे
एकत्रिंशो वर्गः॥ ॥७॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथममंडले चतुर्दशोऽनुवाकः॥ ॥पंचदशेऽनु
वाके द्वादश सूक्तानि तत्र इमं स्तोममिति षोडशर्चं प्रथमं सूक्तं। आंगिरसस्य कुत्सस्यार्षं पंचदशी षोडश्यौ त्रिष्टुभौ शिष्टा जगत्यः॥ अग्निर्देवता पूर्वा
र्द्धा भवतु सत्वतारश्च इति त्र्यः पादा देवत्याः तं नो मित्रो वरुण इत्यर्धर्चो लिंगात् मित्रावरुणादिषड्देवत्यः अथवा तस्याप्यग्निरेव देवता मि
त्रावरुणादयः स्तुति पातभत्येना प्रधानाः एतत्सर्वमनुक्रांतं इमं षाड्ढ्या कुत्स अग्नेयं तु द्विस्त्रिष्टुबंतं प्रवोदेवोत्त्यः पादा देवास्तन्नो मित्रार्धर्चो
लिंगोक्तदेवताय द्वेवस्या वामत्तमिति। प्रातरनुवाकस्याग्नेये क्रतौ जागते छंदस्येतत्सूक्तं आश्विनशस्त्रे च तथा च सूत्रितं इमं स्तोममर्हते संज्ञाः

ए चतुर्विति। अभिप्लवके षष्ठेहन्याग्निमारुते नत्रकं जातवेदस्य निविद्धानं सूत्रितं च तयज्ञवच इमं स्तोममित्याग्निमारुतमिति तृतीयसवन
भा०प्र० इमं स्तोममित्येषाग्नीध्रः प्रस्थितयाज्या सूत्रितं च इमं स्तोममर्हते इति तार्तीयसवने वच्च इति॥ ॥तामेतां सूक्ते प्रथमामृचमाह॥ ॥
इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया। भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव॥ ॥अर्हते प्रूज्याय
१७७ जातवेदसे जातानां भूतानां ज्ञात्रे। वेदित्रे जाते प्रज्ञाय जातधनाय वाग्नये मनीषया निश्चितया बुध्या इमं स्तोत्रं स्तुतिरूपं स्तोमं रथं
मिव यथा यक्षार्थं संस्करोति तथा संमहेम सम्यक् पूजितं कुर्मः अस्याग्नेः संसदि सं भजने नोस्माकं प्रमतिः प्रकृष्टा बुद्धिः भद्रा हि कल्
याणी समर्था खलु अतस्तया बुध्या स्तुम इत्यर्थः। हे अग्ने तव सख्येन अस्माकं त्वया सह सखित्वे सति वयं मा रिषाम हिंसिता न भवा
म अस्मान्रक्षेत्यर्थः॥ अर्हते अर्ह पूजायां अर्हः प्रशंसायामिति लटः शत्रा। रेफः न्यापः प्रिवादनुदात्तत्वं शतुर्आद्युपदेशत्वात् सार्व
धातुकस्वरो वद्रोपेणाद्युदात्तत्वं॥ ॥द्वितीयामृचमाह॥ ॥यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यं। स तूताव नैनमश्नो
त्यंहतिरग्ने सख्ये मा रिषामा वयं तव॥ यस्मै यजमानाय हे अग्ने त्वं आयजसे देवानामभिमुख्येन यजसि स यजमानः साधति स्वा
भिलषितं साधयति प्राप्नोतीत्यर्थः। किंच स यजमानः अनर्वा शत्रुभिरप्राप्तः सन् क्षेति निवसति तथा सुवीर्यं शोभनवीर्योपेतं ध
नं दधते धारयति प्राप्नोतीत्यर्थः॥ स तूताव स यजमानः तूताव वर्धते। एनं यजमानं अंहतिः आर्तिः दारिद्र्यं नाश्नोति न प्राप्नोतीत्यर्थः। अन्य
त्पूर्ववत् साधति षिधु संराध्यो णिचि सिध्यतेरपारलौकिके इत्यात्वं। छंदस्युभयथेति शप आर्धधातुकत्वाण्णेरनिटीति णिलोपः क्षेति
क्षि निवासगत्योः बहुलं छंदसीति विकरणस्य लुक्। दधते दध धारणे भौवादिकः तूताव तु इति सौत्रो धातुर्वृद्ध्यर्थः सोऽत्राधातुः अस्माल्लिटि छंदसो लि
ट् तुजादित्वादभ्यासस्य दीर्घत्वं अश्नोति व्याप्तौ व्यत्ययेन परस्मैपदं अंहतिः हंतेरंहच्चेत्यति प्रत्ययः चित्वादित्यनुवृत्तेरंतोदात्तत्वं॥ ॥तृतीयामृच
माह॥ ॥शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदंत्याहुतं। त्वमादित्याँ आ वह तान्ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव॥ ॥हे अ
ग्ने त्वां समिधं सम्यग्दीप्तं कर्तुं शकेम समर्था भूयास्म त्वं धियः अस्मदीयानि दर्शपूर्णमासादीनि कर्माणि साधय निष्पादय यतस्त्वयि
सर्वे यागा निष्पाद्यंते यस्मात् त्वे त्वय्यग्नावाहुतिभिः प्रक्षिप्तं चरुपुरोडाशादिकं हविः देवा अदंति भक्षयंति तस्मात्त्वं साधयेत्यर्थः
। अपि च त्वं आदित्यान् अदितेः पुत्रान्पूर्ववत् शकेम शक्लृ शक्तौ लिङ्याशिष्याङ् अदुपदेशात् सार्वधातुकानुदात्तत्वे अडएव
स्वरः शिष्यते समिधं इंधी दीप्तौ अस्मात्संपदादिलक्षणः कर्मणि क्विप् त्वे सुपां सुलुगिति सप्तम्येकवचनस्य आदेशः युष्मदस्मदोः
र्ङसि वशेऽशौ इति तुः दंतामसिअदादिखादन्वोलुक् च्यत्विस्वत्यादिना संप्रसारणं॥ ॥चतुर्थीमृचमाह॥ ॥भराम इध्मं कृणवामा हवींषि ते चि
तयंतः पर्वणापर्वणा वयं। जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव॥ ॥हे अग्ने त्वद्यागार्थं इध्मं इंधनसाध
नं काष्ठं ॥ भराम संपादयाम तदनंतरं ते तुभ्यं हवींषि चरुपुरोडाशादिलक्षणान्यन्नानि वयं कृणवाम १७७
करवाम किं कुर्वंतः पर्वणा प्रतिपक्षमावृत्ताभ्यां पूर्णमासाभ्यां चितयंतः त्वां प्रज्ञापयंतः स त्वं जीवातवे चिरजीवनाय चिरकालं स्था
नाय धियः कर्माणि अग्निहोत्रादीनि प्रतरं प्रकृष्टतरं साधय निष्पादय अन्यत्समानं चितयंतः चिती संज्ञाने संज्ञापूर्वकस्य विधेरनित्य

त्वात् लघूपधगुणाभावः पर्वणापर्वणा नित्यवीप्सयोरिति वीप्सायां द्विर्भावः तस्य परमाम्रेडितमिति परस्याम्रेडितसंज्ञायां अनुदात्तं चेत्यनु 351
दात्तत्वं। प्रतरं तरप्प्रत्ययांतात् प्रशब्दात् क्रियाप्रकर्षे वर्तमानादमु च च्छंदसीत्यमु प्रत्ययः॥ ॥पंचमीमृचमाह॥ विशां गोपा अस्य चरंति जंतवो 1924
द्विपच्च यदुत चतुष्पदक्तुभिः। चित्रः प्रकेत उषसो महाँ अस्यग्ने सख्ये मा रिषामा वयं तव॥ ॥अस्याग्नेर्ज्वलतो जातारश्मयो विशां स
र्वेषां प्राणिनां गोपाः गोपायितारो रक्षकाः संतः चरंति उद्गच्छंति तदनंतरं च यच्च द्विपत् द्विपात् मनुष्यादिकमस्ति उत अपि च चतुष्पात्
गवादिकं यदस्ति तदुभयं अक्तुभिः अंजकैरस्य रश्मिभिः अनुमाप्तिःस्वम भूत हे अग्ने चित्रो विचित्रदीप्तियुक्तः प्रकेतः रात्रावंधकार
वृतानां सर्वेषां प्रज्ञापयिता पदार्थानां ज्ञापयिता उषसः उषा दवतायाः अपि महान् गुणैरधिकोऽसि भवसि उपाकाले सर्वस्य मार्गप्रकाशयति
अग्निरस्तु सर्वस्यां रात्रौ प्रकाशयतीति तस्य गुणाधिक्यं गोपाः गुपू रक्षणे गुपू धूपविच्छी त्याय प्रत्ययः अस्मात्क्विप् अतो लोपः वरप्रकृलोपा
द्विलिङ्गो पावल्लीयानिति पूर्वं वलि लोपः न चातो लोपस्य स्थानिवत्त्वं न पदांतेत्यादिना यलोपे प्रतितं निषेधात्। द्वौ पादाव स्येति बहुव्री
हौ संख्यासु पूर्वस्येति पादस्यांत्यलोपः समासांत अयस्य पाद्दिवनपादः पदिति पद्भावः एकदेशविकृतस्य नन्यत्वात् द्विपि
भ्यां पदान्पूर्वस्येति उत्तरपदांतोदात्तत्वं च तुष्पत् पूर्ववत् समासांताः पद्भावाश्च उदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य षत्व
न संख्यायाः इति चतुरं शब्द आद्युदात्तः स एव बहुव्रीहि स्वरेण शिष्यते॥ ॥इति प्रथमस्य षट्त्रिंशो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥
त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः। विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव॥ ॥हे अग्ने त्वमध्व
र्युः अध्वरस्य यागस्य नेता देवान् प्रति प्रेरयिता यद्वा यागे अध्वर्यवस्य कर्ता भवसि अध्वर्यो मनुष्ये जाठररूपेण वाल्मीकि याधिष्ठातृत्वेन
वा वस्थाय यागनिष्पादकोसि उत अपि च पूर्व्यः मुख्यो होता देवानामाह्वाता पूर्ववत् होताध्वर्यवस्थाय होत्रस्य कर्मणः कर्ता वासि मानुषो
होता अमुख्यः नद्यपेक्षया अस्य मुख्यत्वं तथा प्रशास्ता प्रकर्षेण शास्ता सर्वेषां शिक्षकोसि यद्वा होतर्यज पोतर्यजेत्यादिना प्रेषणशा
स्ति तिसं आचरणः प्रशास्ता पूर्ववत् नस्मिन्नवस्थाय यागनिष्पादकोसि। पोता यत्तस्य पवयिता शोधयिता सि यद्वा पोतृनामकस्त्विजः प्र
वसाधिष्ठाय यागनिष्पादकोसि यद्वा सर्वेषु तथा जनुषा जन्मना स्वाभाव्येन पुरोहितः पुरस्तात् यागभूमिं निस्त्वर्गो दोहितः अनुकूलाचरणासि
यद्वा सर्वेषु कर्मसु पूर्वस्यां दिश्याहवनीयस्थापितोसि अथवा पुरोहितो ब्रह्मा देवपुरोहितस्य बृहस्पतेः प्रतिनिधित्वात् तथा च मंत्रांतरं
बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणामिति अतस्तस्मिन् ब्रह्मणि पूर्ववदवस्थायेत्रूपः सन् विश्वा सर्वाणि आर्त्विज्या ऋत्विजः कर्माण्या
ध्वर्यवादीनि। विद्वान् जानन् त्वं हे धीर प्राज्ञाग्ने पुष्यस्यनूनाधिकभावराहित्येन संपूर्णानि करोषि अन्यत्समानं जनुषा जनेरुसिः पु
रोहितः दधातेः कर्मणि निष्ठा प्रवाधि रेत्यादिना असिप्रत्ययांतः पुरस् शब्दो तो दृतः तनद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञायां पुरोव्य
यमिति गतित्वात् गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं॥ आर्त्विज्या ऋत्विजः कर्माणि ब्राह्मणादित्वात्ष्यञ् जित्वादाद्युदात्तत्वं॥ ॥सप्तमीमृचमाह॥ ॥यो
विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे। रात्र्याश्चिदंधो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव॥ ॥हे अग्ने य
स्त्वं सुप्रतीकः शोभनांगाः सन् विश्वतः सर्वस्मादपि सदृङ्ङसि अन्यूनः सदृशो भवसि त्वं ॥दूरे चित्सन् दूरेपि वर्तमानः सन् तळिदिव

भा॰ २॰ अंतिकनामैतत् अंतिके वर्तमान इव अतिरोचसे अतिशयेन दीप्यसे॥ तद् उक्तं यास्केन दूरेपि सन्नंतिकइव संदृश्यस इति॥ रात्र्याश्चित् रात्रेर
पि रात्रेः संबंधिनं मंधकारम् अपिहे देव त्वं अतिपश्यसि। अतिरोचसे इत्यस्य अतिपश्यसीति वा। रात्र्याः अनुपसर्जनत्वात् सुप्रतीकः शोभनप्रती
कांगं यस्य स कत्वात् स्वश्रेयत्व नरपदात् प्रकृतिस्वरत्वं॥ सदृङ् समानान्ययोश्चेति वक्तव्यापि समानोपपदात् दृशेः क्विन् दृग्दृशवतुष्विति समान
स्य सभावः दृक् स्वववस्वतवसां छंदसीति नुम् संयोगांतलोपः क्विन्प्रत्ययस्य कुरिति कुत्वं कृदुत्तरपदप्रकृतिस्वरत्वं। रात्र्याश्चिदित्यत्र चिदिति द्विती
या॥ ॥अष्टमीमृचमाह॥ ॥पूर्वो देवा भवतु सुन्वतो रथोऽस्माकं शंसो अभ्यस्तु दूढ्यः॥ तदाजानीत पृणुतावचो ग्ने सख्ये मारि
षामा वयं तव॥ ॥हे देवाः अस्यावयं भूताः सर्वे देवाः सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य रथः पूर्वः अन्येषाम् यजमानानां रथे
भ्यो मुख्यो भवति अपि चास्माकं शंसः शंसनीयं अभिशापरूपं दूढ्यः दुर्धियः न्याय बुद्धीन् अस्मदनिष्टाचरणपरान् शत्रून् अभ्यस्तु
अभिभवतु तान् बाधतां तदिदं वाक्यं हे देवाः आजानीत आभिमुख्येनावगच्छत उत अपि च तदुक्तं अस्मदीयं वचनं तदर्थाचरणेन पुष्यत प्र
वर्धयत तद्देवास्सर्वात्मनाग्ने सख्य इत्यादि पूर्ववत्॥ सुन्वतः शतुरनुम इति विभक्तेर् उदात्तत्वं शंसः शंस्यते कीर्त्यत इति शंसो अभिशापः कर्म
णि घञ् ञित्यादिर् नित्यं इत्याद्युदात्तत्वं दूढ्यः दुष्टं ध्यायंतीति दुर्धियः ध्यै चिंतायाम् इत्यस्मात् क्विप् चेति क्विप् दृशिग्रहणानुवृत्तेस्तस्य च विधेयं
तरोपसंग्रहार्थत्वात् संप्रसारणं पृषोदरादित्वात् धातोः पूर्वस्य दुरो रेफस्य डत्वं उत्तरपदादेः णत्वं च॥ ॥नवमीमृचमाह॥ ॥वधैर् दुः
शंसाँ अप दूढ्यो जहि दूरे वा ये अंति वा के चिद् अत्रिणः॥ अथा यज्ञाय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव॥ ॥हे अग्ने त्वं वधैः ह
नन साधनैरायुधैः दुःशंसान् दुःखेन कीर्तनीयान् दूढ्यः दुर्धियः पाप बुद्धीन् अपजहि विध्वंसय के चिन् ये के च न दूरे विप्रकृष्टदेशे
वा अंतिके समीपदेशे वा वर्तमानाः अत्रिणः गरास्तत्सादयोविघं तत्तान् दुर्धियोपजहीत्यर्थः॥ अथानंतरं यज्ञाय यज्ञं पतये गृणते
स्तोत्रे यजमानाय सुगं शोभनं मार्गं कृधि कुरु अन्यत् पूर्ववत् वधैः हनश्च वध इति इति हंतेः करणे अप् च धातोर्वधादेशश्च स चादंतोंतो
दात्तः तस्यातो लोपे सति उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वं॥ दुःशंसान् दुर्उपपदे शंसु स्तुताविति कर्मणि खल् लितीति प्रत्ययात् पूर्वस्यो
दात्तत्वं जहि हंतेर् लोटि हि हंतेर्ज इति जादेशः तस्यासिद्धवदत्राभादिति इत्यसिद्धत्वात् हेर्लुगभावः॥ अंति अंतिकस्य का दिलोपश्चेति कलोप
कलोपः। अत्रिणः अदेरत्रिन्निश्चेति त्रिन्निप्रत्ययः। इकारेण कारोपश्लिष्टार्थः॥ गृणते शतुरनुम इति विभक्तेर् उदात्तत्वं सुगं सुदुरोरधिकरण इति
गमेर्डः कृधि कृञ् श्रुणुपृकृवृभ्यश्छंदसीति हेर्धिः बहुलं छंदसीति विकरणस्य लुक्॥ ॥दशमीमृचमाह॥ ॥यद् अयुक्था अरुषा रोहिता रथे वातजू
ता वृषभस्येव ते रवः॥ आद् इन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव॥ ॥हे अग्ने यदा च मा नौ रोहित वर्णौ रोहितदिति अग्नेरश्वः
स्यास्याख्या रोहितोऽग्नेरिति दर्शनात्। रोहितेन नाम्निर्देवतां ग मयति तिमंत्र वर्णाच्च एतौ वेदाश्वाविति तत्र्याख्यातं वायोर्लं अश्वा वगइव व
गो येषां तोऽद्दशावश्वौ रथे यदा अयुक्थाः अयोजयः तदानीं वनानि दहन् स्तनवरवः शब्दो वृषभस्येव दृप्तस्य महोक्षस्येव गंभीरो भव
ति आदनंतरं वनिनो वनसंबंधिनो वृक्षान् धूमकेतुः प्रज्ञापको यस्य तादृशेन रश्मिना इन्वसि व्याप्नोषि अन्यत् पूर्ववत् अयुक्थाः युजिर् योगे लुङि ११८
अल्लोपश्चेति सकारलोपः अरुषा सुपां सुलुगिति आकारः रवः रवशब्दः अर्त्तेरिति भावे अप् इन्वसि इन्वतिर्व्याप्तिकर्मा भ्वादिक इ

दित्वान्नुम्॥ ॥इति प्रथमस्य षष्ठे एकत्रिंशो वर्गः॥ ॥एकादशीमृचमाह॥ ॥अध स्वनाद् उत बिभ्युः पतत्रिणो द्रप्सा यत् ते यवसादो व्यस्थिरन्॥ सु 353
गं तत् ते तावकेभ्यो रथेभ्यो ग्ने सख्ये मा रिषामा वयं तव॥ ॥हे अग्ने अध दग्धुं वनं प्रवेशानंतरं स्वनात् त्वदीयात् प्रबलाद् गंभीरशब्दात् उत अपि बिभ्युर्भयार्थः 1924
पतत्रिणः पक्षिणोपि बिभ्युः बिभ्यति इति भयं प्राप्नुवंति उत्पतनेन वनदेशांतरं गंतुं समर्थाः पक्षिणोपि यदा भयं प्राप्नुवंतीत्यर्थः॥ ताद्दशस्य
तेतव द्रप्साः द्रप्सवत् स्वाला कृष्णाः यवसादः यवसानां अरण्ये वर्तमानां तृणानामत्तारः संतो यदा व्यस्थिरन् विविध मवतिष्ठंते तत्तदानीं तव
सर्वमरण्यं सुगं सुखेन गंतुं शक्यं अतः तावकेभ्यः त्वदीयेभ्यो रथेभ्यः सुगं भवति पूर्वं प्ररूढैस्तृणगुल्मादिभिः तृणादिषु सत्सु त्वदीयरथस्य प्र
तिबंधः मंतरेण पश्चात् गमनं नास्तीति भावः अध स्वनात् बिभ्युः अभिभयेच्छांदसो लिटि उरुरत्वे कावच इतियणा व्यस्थिरन् समवप्रविभ्यः स्थ इति
तिष्ठतेरात्मनेपदं लुङि च्लेः सिच् अस्थिरन् स्थाघ्वोरिच्चेति इत्वं ह्रस्वादंगादिति सलोपः तावकेभ्यः तवकममकावेकवचन इति युष्मदस्तवकादेश
॥ ॥द्वादशीमृचमाह॥ ॥अयं मित्रस्य वरुणस्य धायसे वयातां मरुतां हेळो अद्भुतः॥ मृळा सु नो भूत्व् एषां मनः पुनर् अग्ने सख्ये मा रिषामा
वयं तव॥ ॥अयमग्नेः स्तोता मित्रस्य अहरभिमानिनो देवस्य वरुणस्य रात्र्यभिमानिनश्च संबंधि धायसे धारणाय अवयातां अवस्थापनाय भवतु
मित्रावरुणाय विमग्नेः स्तोतारं धारयतामित्यर्थः अवयतां अवस्तात् गच्छतां कृत्स्ना धरस्तादंतरिक्षे वर्तमानानां मरुतां एतत्संज्ञानां देवा
नां हेळः क्रोधः अद्भुतः महान् भवति अद्भुतउत्पतन महत्वात् स्मात् क्रोधाद्धिमग्नेः स्तोतारं मित्रावरुणौ रक्षतामिति शेषः अपि च नोस्मान् हे
अग्ने सुमृळ सुखय एषां मरुतां मनश्च पुनर्भूतु पुनरपि प्रसन्नं भवतु अन्यत् समानं धामसे धाञ् धाञ् असुः छंदसीति भावेऽसु
न् णित् स्मृनुयतो अंतो युक्छिन्ब्रूरोरिति युक् अवयतां याप्रापणे अस्माद् अवपूर्वत् लटः शतुरनुम इति विभक्तेर् उदात्तत्वं। मृळ मृड सुखने छंदस्युभयथे
ति आर्धधातुकत्वात् णेरनिटीति णिलोपः द्व्यचोतस्तिङ इति संहितायां दीर्घत्वं भूतु बहुलं छंदसीति शपो लुक्॥ ॥त्रयोदशीमृचमाह॥ ॥देवो
देवानाम् असि मित्रो अद्भुतो वसुर् वसूनाम् असि चारुर् अध्वरे॥ शर्मन् स्याम तव सप्रथस्तमे ग्ने सख्ये मा रिषामा वयं तव॥ ॥हे अग्ने देवो द्योतमानस्त्वं दे
वानां सर्वेषां अद्भुतो महान् मित्रोसि मित्रोदः सखा भवसि तथा चारुः शोभनस्त्वं धसाध्वरयागे तेन धनेन युक्तः स्याम भवेमसु द्रविणं शोभनानि
द्रविणानि धनानि यस्य दुर्गतो दृष्टिश्यामिन नृद्रविणः शासयांतस्कारीय तनः छांदसः दाशुः दाशृदाने लेट्यडागमः बहुलं छंदसी
ति शपः लुः अभ्यस्तानामादिरित्याद्युदात्तत्वं। सर्वतातासर्वदेवतातिलितिस्वार्थे तातिल्प्रत्ययः यास्कपक्षे तु सर्वास्तु न यो येषु यागेष्विव
दुर्विहो पूर्वपद प्रकृतिस्वरत्वं॥ वर्णव्यायत्या आत्वं। उभयत्रापि सुपां सुलुगिति सम्म्याडादेशाः चुद्रप्रेरणे लेट्यडागमः॥ ॥षोडशीमृ
चमाह॥ ॥स त्वम् अग्ने सौभगत्वस्य विद्वान् अस्माकम् आयुः प्र तिरेह देव॥ तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः॥ हे देव दा
नादिगुणयुक्ताग्ने सः पूर्वोक्तगुणविशिष्टस्त्वं सौभगत्वस्य सुभगत्वं सौभाग्यं विद्वान् जानन् इहास्मिन् कर्मणि अस्माकमायुः प्रतिर प्र
वर्धय नपूर्वस्तिरतिर्वर्धनार्थः॥ त्वया प्रवर्धितमस्माकं तदायुः मित्रादयः षड् देवताः मामहंतां पूजयंतां रक्षंतित्यर्थः॥ मित्रः प्रमीते
स्त्रातावरुणः अवशिष्टानानि वारायतीति अदितिः अदीना अखंडनीया वा देवमाता सिंधुः स्यंदनशीलोदकात्मा देवता पृथिवी प्रथिता भूदेवता
उत अपि च द्यौः प्रकाशमाना द्युलोकात्मा देवता एताश्च सर्वा अग्निना प्रवर्धितमायुः मम हंतामिति पूर्वेणान्वयः सौभगत्वस्य सुभगस्य

भा॰ प॰ १७०

भावः सौभगं सौभगत्वमित्यर्थः उद्गात्रादिषु पाठात् भावे अञ् पुनरपि भावप्रत्ययोत्पत्तिश्छांदसी मम हन्ताम महः प्रजायां भोः वाजिनः कोटि वहुलं छंदसीति नपः श्लुः तुजादित्वात् अभ्यासस्य दीर्घत्वं ॥ ॥ इति प्रथमस्य षष्ठे द्वात्रिंशो वर्गः ॥ ॥ ३० ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके षष्ठोऽध्यायः ॥ ॥ यादृशमितिन्यायान्नरो मे दोषः ॥ श्रीगुरुः गजाननार्पणमस्तु ॥ ॥७ ७ ७ ७ ७॥

श्रीगणेशाय नमः ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ ३० प्रथमे मंडले पंचदशेनुवाके प्रथमं सूक्तं व्याख्यानं ॥ द्वे विरूपे इत्येकादशर्चं द्वितीयं सूक्तं अत्रानुक्रम्यते ॥ द्वे एकादशोपसाय चाग्नये पि इति ॥ ऋषिश्चान्यस्येति परिभाषया कुत्सस्यानुवृत्तेरांगिरसः कुत्स ऋषिः अनादेशपरिभाषया त्रिष्टुप् छंदः उपसि प्रातःकाले हविर्भिर्योग्निस्तोसौ देवता। यद्वा अग्ने पंनृद्धिति पूर्वोक्तत्वात् तुह्यादि परिभाषया उदमादीनि पंच सूक्तानि केवलाग्निदैवत्यानि अतोस्य सूक्तस्योपसगुण विशिष्टोग्निः शुद्धाग्निर्वा देवतेति द्रष्टव्यं अर्थः प्रातरनुवाकस्याग्नेये क्रतौ त्रिष्टुभे छंदसि उदमादिकं इदं सूक्तं ॥ ॥ तथा च सूत्रितं। अथैतस्या इति द्वे विरूपे इति सूक्ते इति ॥ आश्विनशस्त्रे चैतं प्रातरनुवाकन्यायेनैतस्य वसमाम्नायस्यैत्यतिदिष्टत्वात् ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥ द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुपधापयेते ॥ हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥ स्वर्थे सुष्ठु अरणं शोभनं गमनागमनं यस्य तादृशमर्थः प्रयोजनं शोभनप्रयोजनोपेते विरूपे शुक्लकृष्णतया नानारूपे द्वे अहोरात्रे चरतः पुनः पुनः पर्यावर्तेते ता अहोरात्रे अग्निः सूर्यस्य जनन्यौ तत्र रात्रेः पुत्रः सूर्यः सा हि गर्भवत् रात्रावंतर्हितः सन् तस्याश्चरमभागादुत्पद्यते। अन्हः पुत्रोग्निः स हि तत्र विद्यमानोपि प्रकाशराहित्येनासंकल्पः सन् तस्मादन्हः सकाशान्निर्मुक्तः प्रकाशमानः स्वात्मानं लभते अनयो रतयोरनयोः पुत्रत्वं च तैत्तिरीयैराम्नायते। तयो रेतौ वत्सौ अग्निश्चादित्यश्च रात्रेर्वत्सः श्वेत आदित्यः अन्होग्निः ताम्रो अरुण इति ते चाहोरात्रे वत्सं स्वं स्वं पुत्रौ अन्यान्या परस्परस्यति हारेण उपधापयेते स्वकीयं रसं पाययतः यद्वा व्याकर्तव्यं स्वपुत्रस्यादित्यस्य परस्य रसपायनं तदहः करोति यद्वा कर्तव्यं स्वपुत्रस्याग्नेरसस्य पायनं तद्रात्रिः करोति एतच्च सायंप्रातः कालीनाहुत्यभिप्रायं श्रूयते च। तस्माग्नये सायं हूयते। सूर्याय प्रातरग्निरिति यस्मादेवं तस्मादन्यस्यां स्वजनन्या अन्यस्या हररात्रिकायां अग्नेर्जनन्यां हरिः रसहरणशील आदित्यः स्वधावान् हविर्लक्षणान्नवान् भवति शुक्रः निर्मलदीप्तिरग्निः स्वजनन्यां अन्यस्यां रात्र्यामसावादित्यस्य जनन्यां सुवर्चाः शोभनदीप्तियुक्तः सन् ददृशे दृश्यते। स्वर्थे ऋगतौ उषिकुषिगार्तिभ्यः स्थन्निति भावे कर्मणि वा थन् प्रत्ययः निद्वादाद्युदात्तत्वं शोभनार्थे। ययोः ते आद्युदात्तं स्वं च छंदसीत्युत्तरपदाद्युदात्तत्वं अन्या अन्या कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं। समासवच्च बहुलमिति द्विर्भावः बहुलग्रहणात् समासवद्भावेन स्य परमाम्रेडितमिति परस्याम्रेडितसंज्ञायामनुदात्तं चेत्याम्रेडितानुदात्तत्वं ॥ धापयेते। धेट् पाने आदेच उपदेशेऽशितीति धातोः ण्यंतात् तो हेतुमति णिच् अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुगिति पुगागमः तत्र ह्निलक्षणप्रतिपदोक्तपरिभाषा नास्तीति ज्ञापितं शाछासाह्वाव्यावेपां युक् इत्याद्य १७०

नोनिर्देशनात् सहितत्र युक् प्राप्तिस्थापनार्थः। यदि तत्र लक्षणप्रतिपदोक्तपरिभाषायाः प्रवृत्तेन प्राप्नोति सानर्थकः स्यादस्यान्तत्स्यादधापयतीत्यादावपि धापयेते इत्यत्रापि पुगागमः। सिधः निगरणचलनार्थेति प्राप्तस्य परस्मैपदस्य पादिषु धेट उपसंख्यानमिति प्रतिषेधादात्मनेपदं हरिः हृञ् हरणे औणादिक इन् प्रत्ययः इनित्यादिर्नित्यमित्याद्युदात्तत्वं भवति एकान्याभ्यां समर्थाभ्यामिति प्रथमस्याप्ति ईपदाद्युदात्तत्वं ॥ ॥ द्वितीयामृचमाह ॥ दशेमं त्वष्टुर्जनयंत गर्भमतंद्रासो युवतयो विभृत्रं ॥ तिग्मानीकं स्वयशसं जनेषु विरोचमानं परि षीं नयंति ॥ ॥ अतंद्रासः स्वकार्ये जागरूकाः अनलसाः आलस्यरहिताः जागरूका इत्यर्थः। युवतयः नित्यतरुणाः अजराः मेघं दशांगुलयः सर्वदा इमं जनयंत वै घृतं मग्निं उत्पादयंति। यद्वा दश संख्याका अंगुलयः त्वष्टुः दीप्तस्य वायोर्गर्भस्य कारणभूतस्य वायोर्गर्भरूपेण वर्तमानं अग्नेर्हि वायुः कारणं। वायोरग्निरिति श्रुतेः। एवंभूतमिममग्निं अरण्योः सकाशाज्जनयंत उत्पादयंति कीदृश्योंगुलयः अतंद्राः पुनः करणे अलस्यरहिताः युवतयः अपृथक्त्वेन वर्तमानाः एकस्मिन् पाणौ संहत्यावस्थिता इत्यर्थः। कीदृशमग्निं विभृत्रं सर्वेषु भृत्येषु विहृतं तान्तररूपेण विभज्य वर्तमानमित्यर्थः। तिग्मानीकं तीक्ष्णमुखं तीक्ष्ण तेजसं अत एव हि वेघृताग्निदर्शने दृष्टिः प्रहतिपकारकमित्यर्थः। जनेषु जनपदेषु देशेषु विरोचमानं विशेषेण दीप्यमानं बहूनां मुन्त्यते ऋत्विग्भिः इत्यादिना तृणादिषु लग्नं तानि पातितः अतानित्वाद्युदात्तत्वं विभृत्रं। हृञ् हरणे अस्मात् कर्मणि निष्ठाछांदसं रेफ आकृतं चातिमक् अन प्राणने। अनिदिताभ्यां चेति कन तिग्मं तीक्ष्णमनीकं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। परियांपूर्वपदाद्धीति पत्वं ॥ ॥ तृतीयामृचमाह ॥ ॥ त्रीणि जाना परि भूषंत्यस्य समुद्र एकं दिव्येकमप्सु ॥ पूर्वामनु प्रदिशं पार्थिवानामृतून्प्रशासद्वि दधावनुष्ठु ॥ ॥ अस्याग्नेस्त्रीणि त्रिसंख्याकानि जाना जननानि जन्मानि परिभूषति परितः सर्वतोलंकुर्वंति यद्वा परितो वसमित्येतस्य स्थाने अस्याग्नेस्त्रीणि जन्मानि संभवंति। समुद्रे अब्धौ वडवानलरूपेणैकं जन्मादिवि द्युलोके आदित्यात्मना एवी अप्सु आपइत्यंतरिक्षनामा अंतरिक्षे वैद्युताग्निरूपेणैकं एवमग्निस्त्रिधात्मानं विभज्यात्रिषु स्थानेषु वर्तत इत्यर्थः तत्रादित्यात्मना वर्तमानः सोग्निः ऋतून् वसंतादीन् अनुष्ठु उपलक्षितं सम्यक् शब्दसामानार्थं च इति यथा सम्यगनुक्रमेण विदधात् कृतवान् स्वतो भेदरहितयोः स्वदयादिकाकयोः प्राच्यादिभेदो वसंतादिभेदश्च सूर्यगत्या निष्पद्यते। अतः सूर्य एव तयोः कर्तेत्यर्थः। जानाजनी प्रादुर्भावे घञ् कपात

355
1924

भा० अ० तडुत्यंतोदात्तत्वं प्राग्दिश्यादित्याकृतिगणत्वादाद्युदात्तत्वं श्रेष्ठं छंदसीव बहुलमिति विलोपः भूषंति। भूष अलंकारे भौवादिकः। यद्वा
भव तेर्लेटि बहुलं लेटीति सिप् आगमानुशासनस्यानित्यत्वात् इडभावः। संज्ञापूर्वकस्य विधेरनित्यत्वात् गुणाभावश्च। सिब् अक उभय
चतुरि इत्यनिति विभक्तेरुदात्तत्वं पार्थिवानां पृथिव्या आ आगिति प्राग्दीव्यतीय आञ् प्रत्ययः प्रशासनशासः अनुशिष्टो अस्मात्कुः
१८० शासन्निक्षित्यादयः पद्गिति अभ्यस्तानां आदिरिति नुमप्रतिषेधः कृदुत्तरपदप्रकृतिस्वरत्वं। अनुष्टुप्। अप दुःस्पृशः इति द्वितीयः
मानाः बुध्नस्य बहुलवचनात् इत्वेतरनुपूर्वादिवि भवति॥ ॥ चतुर्थीमृचमाह॥ ॥ कुह इमं वो निण्यमा चिकेत वत्सो मातॄर्जनयत स्वधाभिः
। बह्वीनां गर्भो अपसामुपस्थान्महान्कविर्निश्चरति स्वधावान्॥ हे ऋत्विग्यजमाना निण्यं निर्णीतं अंतर्हितं नामैनं अवादिषु गर्भरूपे
णांतर्हितं यात्र मंत्रोक्त गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथामिति। एवंभूतमिमम् अग्निं युष्माकं मध्ये क आचिकेत को
ज्ञानाति न कोपीत्यर्थः। सोयमग्निर्वत्सः मेघस्थानामपां वैद्युतानिरूपेण पुत्रस्थानीयः सन् मातॄः तस्य मातृस्थानीया यान्युदकानि स्वधा
भिः हविर्लक्षणैरन्नैर्जनयत उत्पादयति। तथा चाम्नायते अग्नौ प्रस्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं तत
तनः प्रजा इति। अपि च बह्वीनां मेघस्थानामपां गर्भः वैद्युतरूपेण गर्भस्थानीयः सोग्निः अपसामुपस्थान् समुद्रान्निश्चरति। ओष
ध्यात्मिकरूपेण आदित्यः संनिर्गच्छति। कीदृशो महान् तेजसा प्रौढः कविः क्रांतदर्शी स्वधावान् हविर्लक्षणान्नवान् एकोऽग्निर्होमनिष्पादक
लक्षणेन पार्थिवरूपेण वैद्युतात्मना ओषधरूपेण आदित्यात्मना च विभज्य वर्तत इत्यर्थः। चिकेत चित ज्ञाने छांदसो लिट् इति जनयत अंकिरे
पुरुःसकरोश मंताश्चेति मत्याग्निता अस्वत्वं। पूर्ववत्साभ्यासदीर्घत्वं बह्वीनामित्यत्र छंदसि बहुलमिति नाम
उदात्तत्वं। अपसा अपस्याम्यो अपः कर्माख्यायां ह्रस्वश्च नुट् च इति बहुलवचनात् कर्माख्यायामपि अभावात् रसि प्रत्यये स्वरः। उपस्था
त् उपतिष्ठंत्यापो अस्मिन् परः आतश्चोपसर्गे इति ल्यप् घञर्थे कविधानं बहुलमिति वचनादधिकरणे कप्रत्ययः। मरुद्वृधादित्वात्। पूर्वपदांतोदात्तत्वं॥ ॥
पंचमीमृचमाह॥ आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे। उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रति जोषयेते॥ आयमग्निः
स्थास्व प्रकृतासु अप्सु वर्तमानोग्निः चारुः शोभनदीप्तिः सन् आविष्ट्यो वर्धते आविर्भूतः प्रकाशमानो रश्मिभिः प्राप्नोति किं कुर्वन् जिह्मानां कुटिला
नां मेघपुलतिर्यग्गच्छतां तासामपां उपस्थे उत्संगे स्वयशाः सोऽयमग्निः ऊर्ध्वः ऊर्ध्वज्वलनः सन् स्वकारणात् तिर्यग्गच्छितास्वपि सु
य मूर्ध्वं ज्वलनमित्यर्थः। तदुक्तं वैशेषिके भवति ऊर्ध्वज्वलनं वायोस्तिर्यक्पवनं अणुमनसोराद्यं कर्मेति। अन्य दृष्टकारितानीति। अपि च उभे द्यावा
पृथिव्यौ त्वष्टुर्दीप्तात् जायमानात् तस्मादग्नेर्बिभ्यतुः भयं प्रापतुः। तदनंतरं उत्पन्नं हिंसं सहनशीलं अभितो नर्तनं मार्गिं प्र
तीची प्रत्यंचं त्वां प्रतिगच्छंत्यौ आभिमुख्येन प्राप्नुवंत्यौ जोषयेते सेवेते यास्कस्त्वाह। आविरावेदनात् त्वां वर्धते चारुः चारुरसः चारु चरंतोर्ज्ञि १८०
स्त्रि जिह्मानि ऊर्ध्वं उच्छ्रिताभावति। स्वयशा आत्मयशा उपस्थे उपस्थाने उभे त्वष्टुर्बिभ्यतुर्जायमानात् प्रतीची सिंहं प्रति जोषयेते। उभे
द्यावापृथिव्याविति वा अहोरात्रे वा अरणी इति वा प्रत्यक्ते सिंहं सहनं प्रत्यासेवेते इति। आविष्ट्यः आविः शब्दात् छंदसीति

कस्य पदस्यादौ तद्धित इति षत्वं। आसु इदमोऽन्वादेशे शानुदात्तः विभक्तिश्च कस्मादनुदात्तेनेति सर्वानुदात्तत्वं नचोदिदमिति 357/1924
विभक्तेरुदात्तत्वं। ग्रंकनीयां अतो दानादि इमनां अव्यक्तित द्विधीयते। प्रतीची प्रतिपूर्वादंचतेः ऋत्विगित्यादिना क्विन् अनिदितामिति नलोपः
अंचतेश्चोपसंख्यानमिति ङीप् अच इत्यकारलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं वाछंदसीति पूर्वसवर्णदीर्घः जो
षयेते। जुषी प्रीतिसेवनयोः स्वार्थे णिच्॥ ॥ इति प्रथमस्य सप्तमे प्रथमो वर्गः॥ ॥ षष्ठीमृचमाह॥ उभे भद्रे जोषयेते न मेने गावो न वाश्रा
उप तस्थुरेवैः। स दक्षाणां दक्षपतिर्बभूवांजंति यं दक्षिणतो हविर्भिः॥ ॥ उभे अहश्च रात्रिश्च यद्वा द्यावापृथिवी अरणी वा भद्रे भजनीये शोभ
नांग्ये मेने स्त्रियौ जोषयेते न सेवेते इव यथा शोभने स्त्रियौ चामरहस्ते राज्ञां उभयतः सेवेते एवं द्यावापृथिव्यौ एनमग्निं उभयतः सेव
त इत्यर्थः। अपि च वाश्राः शब्दं कुर्वत्यः गावो न गावो यथा एवैः स्वकीयैश्चरितैः आदरातिशयेन स्वकीयान् वत्सान् अनुवत्सानुपतस्थुः संगच्छंते
तथैममग्निं द्यावापृथिव्या उपस्थिते भवातः पूर्वं सवनमात्रमुक्तं इदानीं गोनिदर्शनेन तत्रैवादरातिशयो द्योत्यते अतः सोग्निः दक्षाणां सर्वे
षां बलानां दक्षपतिर्बभूव आसीत् बलानामध्येयादतिशयितं बलं तस्याधिपतिर्भवत्यर्थः। यमग्निं दक्षिणतः आहवनीयस्य दक्षिणभाग
व स्थिता ऋत्विजः हविर्भिश्चरुपुरोडाशादिभिः अंजंति अक्ती कुर्वंति तर्पयंति सोऽग्निरिति पूर्वेणान्वयः। वाश्रा वाशृ शब्दे स्फायितंचीत्यादिना
रक्। एवैः इण गतौ इणशीङ्भ्यां वन्निति भावे वन्प्रत्ययः॥ ॥ सप्तमीमृचमाह॥ ॥ उद्यंयमीति सवितेव बाहू उभे सिचौ यतते भीम ऋंजन्॥ उ
च्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति॥ ॥ सवितेव सर्वस्य प्रेरकः आदित्यो यथा बाहू बाहुस्थानीयान् रश्मीनुद्गमयति। तथा
अयमीव सोऽग्निः स्वकीयानि तेजांसि उद्यंयमीति भृशं उद्यतानि ऊर्ध्वाभिमुखानि करोति। तदनंतरं भीमः सर्वेषां भयंकरोग्निः उभे सिचौ
उभे द्यावापृथिव्यौ ऋंजन् प्रसाधयन् स्वतेजसा अलंकुर्वन् यतते स्वव्यापारे प्रयतते। तदनंतरं सिमस्मात् सर्वस्मात् भूतजातात् शुक्रं दी
प्तं अत्कं सारं भूतं रसं इज्जते रश्मिभिः ऊर्ध्वमादत्ते अपि च मातृभ्यः स्वमातृस्थानीयेभ्यो रक्ष्यरक्षकेभ्यः सकाशात् नवानि प्रत्यग्राणि वस
नानि सर्वस्य जगत आच्छादकानि तेजांसि जहाति उद्गमयति। यंयमीति यमु उपरमे। अस्माद्यङ्लुकि नुगतोनुनासिकांतस्येत्यभ्यासस्य नुगा
गमः। एतच्चानुसारेण लक्षणार्थं सिचौ सिचिर्क्षरणे सिंचतः फलेन संयोजयत इति सिचौ द्यावापृथिव्यौ क्विप् चेति क्विप्। अत्कं अत सातत्य
गमने इण्भीकापाशल्यतिमर्चिभ्यः कन्निति कन् नित्वादाद्युदात्तत्वं सिम शब्दः सर्वशब्दपर्यायः। न चावसना उभयत्र शेश्छंदसि
बहुलमिति शेर्लोपः। जहातिः हा कल्यागे ओहाक् त्यागे जौहोत्यादिकः॥ ॥ अष्टमीमृचमाह॥ ॥ त्वेषं रूपं कृणुत उत्तरं यत्संपृंचानः सदने गोभि
रद्भिः। कविर्बुध्नं परि मर्मृज्यते धीः सा देवताता समितिर्बभूव॥ सदने अंतरिक्षे गोभिरद्भिः गच्छंतीभिः मेघस्थाभिः संपृंचानः वैद्युतरूपेण सं
युक्तः सन् त्वेषं दीप्तं सर्वैः ईक्षणीयं उत्तरं उत्कृष्टतरं रूपं वैद्युतं प्रकाशयं घ्राकृणुते करोति तदानीं कविः क्रांतदर्शी धीः सर्वेषां धारकः सो
ग्निर्बुध्नं सर्वस्योदकस्य मूलभूतमंतरिक्षं परिमर्मृज्यते परितो मार्ष्टि स्वतेजसा आच्छादयतीति तस्याग्नेः सा देवताता देवनशीलेनाग्निना ततावि
स्तारिता दीप्तिः अस्माभिः स्तूयमाना सती समितिर्बभूव तत्संगता भवतीत्यर्थः। संपृंचानः पृची संपर्के रौधादिकः अस्माल्लटः शानच् असो

र्जा परत्वकारलोपः सीदंत्यस्मिन गंधर्वादय इति सदनं मंतरिक्षं अधिकरणेल्युट् मर्मृज्यतेम ज्यू शुद्धौ अस्माद्यङि मर्मृज्यमाना सउपसंख्या
न मितिनिपातनाद्भ्यासस्य रुगागमः। देवताता देवनतता देवताता तनोतेः कर्मणिघाअनुदात्तोपदेशेत्यादिनानुनासिकालोपः व्यत्ययेना
तं तत्ताया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥ ॥नवमीमृचमाह॥ ॥उरुते ज्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम। विश्वेभिरग्ने स्वयशो
भिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान॥ महिषस्य महतः तव ज्रयः राक्षसादीनामभिभावुकं विरोचमानं विशेषेण दीप्यमानं महिषस्य महतो
बुध्नं मर्यामूलभूतं अंतरिक्षं पर्येति परितो व्याप्नोति। हे अग्ने इद्धः अस्माभिः प्रज्वलितः सन विश्वेभिः सर्वैः स्वयशोभिः स्वकीयैरात्मीयैर्यशोभिः
अस्मान पाहि रक्ष कीदृशैः अदब्धेभिः राक्षसादिभिः रहिंसितैः पायुभिः पालनैस्तेजोभिः ज्रयः ज्रि अभिभवे असुन अदब्धेभिः दभु दंभे नि
ष्ठायां यस्य विभाषेतीट्प्रतिषेधः अनिदितामिति नलोपः। स्वयशोभिः इति धत्वं न त्रसमासे व्ययपूर्वपदप्रकृतिस्वरत्वं बहुलं छंदसी
ति भिस ऐसभावः॥ ॥दशमीमृचमाह॥ ॥धन्वन्स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षाम्। विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु
चरति प्रसूषु॥ धन्वन्धन्वनि निर्जलप्रदेशे गातुं गमनशीलमूर्मिं ऊर्मिमुदकसंघं आयमाग्निः स्रोतः कृणुते स्रोतसा प्रवाहरूपेण युक्तं करोति शु
क्रैः ऊर्मिभिः तेजःसंघैः क्षां भूमिं अभिनक्षति अभिव्याप्नोति स्वतेजोभिरंतरिक्षे जलतुं संघमुत्पाद्य तेन सर्वां भूमिमभिव्याप्नोतीत्यर्थः
पश्चात विश्वा सनानि अन्ननामैतत सर्वाण्यन्नानि जठरेषु धत्ते अवस्थापयति तदर्थं नवासु सस्यनंतरमुत्पन्नासु प्रसूषु प्रसवित्रीषो
षधीषु कार्थं मंतश्चरति मध्ये वर्तते अंतस्थितेन भौमाग्निना सर्वा ओषधयः पच्यंते धन्वन धिवि इत्यर्थः। इदिता नुम कनिन्युवृषीत्यादिना क
निन प्रत्ययः सुपां सुलुगिति सप्तम्या लुक्। धन्वांतरिक्षं धन्वंत्यस्मादापः इति यास्कः। नित्वादाद्युदात्तत्वं गातुं गाङ् गतौ कमिमनिजनीत्यादिना तुप्रत्ययः ऊर्मि
अर्तिरत्यते तिमिप्रत्ययः। नक्षतिनक्षगतौ॥ ॥एकादशीमृचमाह॥ ॥एवानो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि। तन्नो मित्रो वरु
णो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥ हे पावक शोधकाग्ने समिधा अस्माभिर्दत्तेन समिदादिद्रव्येण एव एवमुक्तप्रकारेण वृधा
नो वर्धमानः सन् रेवत् रयिमत् धनयुक्ताय भो अस्माकं श्रवसे नाय विभाहि विशेषेण दीप्यस्व अस्माकं तादृगमनं प्रयच्छेत्यर्थः। तोस्मा
कं तदन्नं मित्रादयो मामहंतां पूजयंतां रक्षंत्वित्यर्थः। उतशब्दः समुच्चये पृथिवी च द्यौश्चेत्यर्थः। एतानि पातीनश्चेति संहितायां दीर्घः। वृ
धानः वृधेर्लभावित व्यत्ययेनात्मनेपदं कानच्छांदसत्वादुलुक्वासीति शपो लुक चानशः सर्वधातुकत्वेन ङित्त्वात् लघूपधगुणाभावः। सार्वधा
तुकत्वाभावेन अनुदात्तत्वाभावे चित्स्वर एव शिष्यते। रेवत् रयिशब्दान्मतुप् रयेर्मतौ बहुलमिति संप्रसारणं छंदसीतिर इति मतुपो व
त्वं। रेशब्दाच्चेति मतुप उदात्तत्वं सुपां सुलुगिति चतुर्थ्या लुक्॥ ॥इति प्रथमस्य सप्तमे द्वितीयो वर्गः॥ ॥स प्रत्नथेति नवर्चं तृतीयं सूक्तं कुत्स
स्यार्षं त्रैष्टुभं द्रविणोदस्त्वगुणविशिष्टोऽग्निः शुद्धाग्निर्देवता तथा चानुक्रांतं स प्रत्नथा नव द्रविणोदस इति प्रातरनुवाकाश्विनशस्त्रयोः पूर्व
सूक्तेन सहोक्तः सूक्तविनियोगः। व्यूढस्य दशरात्रस्य षष्ठेऽहन्याग्निमारुतमारुतसूक्तं सूक्तं तान वेदस्यनिविद्धानं सूक्तं चेदिति खंडे सूत्रितं
। स प्रत्नथा वैश्वानरस्याग्निमारुतमिति। स प्रत्नथा सहसा जायमान इति जातवेदस्यं समानोदर्कमित्यादि ब्राह्मणमहाव्रत यत्रसिषस्त तस्थानी
यस्याग्नेः कुत्सवाहनस्य प्रत्नथेत्येषा याज्या दक्षिणाग्नेरिति खंडे सूत्रितं। स प्रत्नथा सहसा जायमान इत्यग्निः स्विष्टकृत कुत्सवाहन इति

॥ तासमेतस्य सूक्तेषु प्रथमामृचमाह॥ ॥ स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा। आपश्च मित्रं धिषणा च साधन देवा अग्निं धा 359
रयन्द्रविणोदां॥ सहसा बलेन जायमानेन निर्मथनेन जायमानः सोऽग्निः सद्यः तदानीमुत्पत्त्यनंतरमेव प्रत्नथा प्रत्नइव चिरंतनइव विश्वानि 1924
सर्वाणि काव्यानि कवेः क्रांतदर्शिनः प्रगल्भस्य कर्माणि बट् सत्यं अधत्त अधारयत पूर्वं विद्यमान इव अग्निरयत्नेः समकालमेव स्वकीयं ह
विर्वहनादिकं सर्वं कार्यमकरोदित्यर्थः। इममग्निं येषु जलरूपेण वर्तमानं मेघे व्यवस्थिता आपश्च धिषणा च या माध्यमिका वाक् मा च मित्रं स
खिभूतं साधन साधयंति कुर्वंति तमिमं द्रविणोदां द्रविणस्य धनस्य दातारमग्निं देवाः ऋत्विजो धारयन गार्हपत्यादिरूपेण धारयंदेवाः ए
वं ऋत्विजः इममग्निं द्रविणोदां हविर्लक्षणस्य दातारं स्थानादुत्थे धारयन धारयंति। प्रत्नथा प्रत्नपूर्वविश्वेमाश्चात् संदसीति थाल् प्रत्नयः
काव्यानि कवेः कर्म काव्यं गुणवचनब्राह्मणादिभ्य इति ष्यञ् जित्वादाद्युदात्तत्वं साधन संराधी णिचि तिं ध्याते रयारल्लौकिकत्वात्। लोप
द्वागमः। इतश्च लोपइतीकारलोपः छंदस्युभयथेति आर्धधातुकत्वात णेरनिटीति णिलोपः। द्रविणोदां द्रविणानि ददातीति द्रविणोदाः
दुदाञ् दाने डुदाञ्क्विप्यभिनन्नकांदसः पूर्वपदस्य लुक् अन्येभ्योपि दृश्यंत इति ददातेर्विच सकारांतं तु असाक्षिरनिष्पन्नं॥ ॥द्वितीयामृचमाह
॥ ॥ स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनां। विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदां॥ सोऽग्निः पूर्वया प्र
थमया अग्निर्देवेद्धइत्यादिकया निविधा कव्यता गुणनिष्ठगुणाभिधानलक्षणां स्तुतिं कुर्वता आयोः मनोः संबंधिना उक्तेन वस्तूयमानः सो
ऽग्निर्मनुमां संबंधिनीरिमाः प्रजा अजनयत उत्पादयत उदपादयत मनुनास्तुतः सन्मानवीः सर्वाः प्रजा अजनयत इत्यर्थः। तथा विवस्वता विवा
सनवता तादृशेन आच्छादयता चक्षसा आत्मीयेन तेजसा द्यां द्युलोकं अपश्च अंतरिक्षं च व्याप्नोतीति शेषः अन्यत्समानं कव्यता कुशब्द अव्या
दिति भावयत कव्यं कवनं स्तुतिं करोति नकारोंतीति णिचि पवृद्द मन्यत्रापि संज्ञा छंदसोरिति लुक्तस्त कृधातेस्वरेणांतोदात्तत्वं। आयोः इ
णु गतौ छंदसीणउणप्रत्ययः॥ ॥तृतीयामृचमाह॥ ॥तमीळत प्रथमं यज्ञसाधं विश आरीराहुतमृञ्जसानं। ऊर्जः पुत्रं भरतं सृप्रदानुं दे
वा अग्निं धारयन्द्रविणोदां॥ हे विशः सर्वे मनुष्याः आरीः अग्निं स्वामिनं गच्छंत्यो यूयं तमग्निं मीळत स्तुध्वं। कीदृशं प्रथमं सर्वेषु देवेषु मुख्यं
यज्ञसाधं यज्ञस्य दर्शपूर्णमासादेः साधकं निष्पादकं आहुतं हविर्भिस्तर्पितं ऋंजसानं स्तोत्रैः प्रसाध्यमानं ऊर्जः अन्नस्य पुत्रं भुक्तेनान्नेन तज्ज
ठराग्नेर्वर्धनादग्नेरन्नपुत्रत्वं। भरतं हविषो भर्तारं यद्वा प्राणरूपेण सर्वासां प्रजानां भर्तारं। श्रूयते चास्य श्वदेहे वा एष प्राणो भूत्वा प्रजा बिभ
र्ति तस्मादेष भरत इति। सृप्रदानुं सर्पणशीलं दानुं युक्तं अविच्छेदेन धनानि प्रयच्छंतमित्यर्थः। देवाइत्यादि गतं ईळत ईड स्तुतौ अदादित्वाच्छपो
न परस्मैपदं बहुलं छंदसीति शपो लुगभावः। यज्ञसाधं यज्ञं साधयंतीति यज्ञसात्तसाधयंतेः क्विपूणेरनिटीति णिलोपः। आरीः ऋगतौ सृ
वीर्य्यः। व्यादिभ्यः शाचि वेति चरा क्विप् अनर्वल्लुग्रहणानुकर्षणानकर्षणादेनैमिति कोलुक्। प्रत्ययलक्षणेनाद्भावः। उरहल इत्यादिना वोरुत्वं
को च कुकीति रक। ऋगुतालोणादिकः प्रत्ययः। यणादेशो रोरीति रेफलोपः। ढ्रुलोपे पूर्वस्याणो दीर्घत्वं हृ इकारादनिन इति ऊनिवृत्तसिचाछंद
सीति पूर्वसवर्णदीर्घत्वं व्यत्ययेनाद्युदात्तत्वं॥ ऋंजसानं ऋंजतिः प्रसाधनकर्मा ऋंजिवृधिमंदिसहिभ्यः कृदिति कर्मण्यसानच् भरतं भृ
ञ् भरणे भृमृदृशीत्यादिनात च सृप्रदानुं सृप्लृ गतौ सृप्रादयितं वल्यादिना रक सृप्र दानुर्यस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥

भा०प्र०
१८२

चतुर्थीमृचमाह॥ ॥मातरिश्वा पुरुवारपुष्टिर्विदद्गातुं तनयाय स्वर्वित्॥ विशां गोपा जनिता रोदस्योर्देवा अग्निं धारयन्द्रविणोदां॥ सोऽग्निस्तन
यायास्मदीयाय पुत्राय गातुं अनुष्ठानमार्गं विदत् लंभयतु। कीदृशः मातरिश्वा सर्वस्य जगतो निर्माता अंतरिक्षे श्वसन् वर्तमानः पुरुवा
रपुष्टिः पुरुभिर्बहुभिः धारा वरणीया पुष्टिरभिवृद्धिर्यस्य स तथोक्तः। स्वर्वित् स्वः स्वर्गस्य यागद्वारेण लंभयिता विशां सर्वासां प्रजानां
गोपाः गोपायिता रक्षिता रोदस्योः द्यावापृथिव्योः जनयिता उत्पादयिता देवा इत्यादि गतं। मातरिश्वा तु श्वन्नित्यादौ मातरि उपपदात्
श्वसप्राणने इत्यस्मात्कनिन्प्रत्ययांतो निपात्यते। विदत् विद्लृ लाभे अस्माद्लंभावितण्यर्थात् छंदसि लुङ्लङ्लिट इति लुङ् गुणादेशः पाद्य
श्च सप्राणने इत्यस्मात्कनिन्प्रत्ययांतो निपात्यते। विदत् विद्लृ लाभे [illegible] पंचमीमृचमाह॥ ॥नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं
समीची॥ द्यावाक्षामा रुक्मो अंतर्वि भाति देवा अग्निं धारयन्द्रविणोदां॥ ॥नक्तोषासा रात्रिरहश्च वर्णं स्वकीयं रूपं आमेम्याने परस्परं पु
नः पुनर्हिंसंत्यौ समीची संगते संश्लिष्टे एवंभूते अहोरात्रे एकं शिशुं अग्निं धापयेते। हविः पाययतः रुक्मो रोचमानः
सोऽग्निः द्यावाक्षामा द्यावापृथिव्योरंतर्मध्ये विभाति विशेषेण प्रकाशते। अन्यत्पूर्ववत्। नक्तोषासा नक्तेति रात्रिनाम नक्तं उषाश्च नक्तो
षासा सुपां सुलुगिति विभक्तेराकारः। अन्येषामपि दृश्यत इति सांहितिकमुपधादीर्घत्वं। देवताद्वंद्वे चेति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम्।
आमेम्याने मीङ् हिंसायां। अस्माद्यङ्गतात् व्यत्ययेन शानच् अदादिवच्चेति वचनाच्छपो लुक्। एरनेकाच इति यण्। अभ्यस्तानामादिरित्या
द्युदात्तत्वं। उत्तरपदप्रकृतिस्वरत्वं। धापयेते धेट् पाने अस्माण्णिजंतान्निगरणचलनेति प्राप्तस्य परस्मैपदस्य पादिषु धेट उपसंख्यानमिति वच
नात्। प्रतिषेधः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते। पादादित्वान्निघाताभावः। समीची संपूर्वादं
चतेः ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। समः समीति सम्यादेशः। अंचतेश्चोपसंख्यानमिति ङीप्। अच इत्यकारलोपे च्यौ
चेति दीर्घत्वम्। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं। पदकारस्य त्वयमभिप्रायः ईदूदेद्द्विवचनमिति प्रगृह्यत्वं विधीयमानमीत्वं। समेत्युत्तरस्यार्थे वर्तते यस
येनभवतीति। वाछंदसीति पूर्वसवर्णदीर्घत्वं॥ ॥इति प्रथमस्य सप्तमे त्रयोविंशो वर्गः॥ ॥षष्ठीमृचमाह॥ रायो बुध्नः संगमनो व
सूनां यज्ञस्य केतुर्मन्मसाधनो वेः॥ अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदां॥ ॥योऽग्निः रायो धनस्य बुध्नो मूलभूतः
सूनां यज्ञस्य केतुर्मन्मसाधनो वेः। संगमनः संगमयिता वसूनां धनानां प्रापयिता यज्ञस्य केतुः प्रज्ञापकः सर्वेषां धनानां कारणत्वात् वसूनां निवासानां
आहुतीनां द्वारा सर्वेषां धनानां कारणत्वात्। वसूनां निवासकानां धनानां संगमनः संगमयिता। मन्मसाधनः मननीयस्याभिलषितस्य साधयिता।
मासाद्य कृतः कर्तयिता लापयिता वेः आत्मानमभिगच्छतः पुरुषस्य मन्मसाधनः मननीयस्याभिलषितस्य साधयिता
अमृतत्वं रक्षमाणासः पालयंतो देवाः एनं धनस्य दातारमग्निं धारयंति। रायः ऊडिदमिति विभक्तेरुदात्तत्वं। संगमनः नद्यादित्वा
ल्ल्युट्। वेः वीत्यादिषु अस्माद्दौणादिकः प्रत्ययः दिलोपश्च॥ ॥सप्तमीमृचमाह॥ ॥नू च पुरा च सदनं रयीणां जातस्य च जाय १८२
मानस्य च क्षां॥ सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन्द्रविणोदां॥ ॥ नू चेति निपातसमुदायः अद्यत्वस्यार्थे निरि
तिनिपातः पूरणान्वयार्थं चेतिया स्कः। नू च अद्यास्मिन् काले पुरा च पुरा रयीणां सर्वेषां रयीणां सर्वेषां धनानां सदनं आवासस्थानं जा
तस्य कार्यजातस्य जायमानस्य उत्पद्यमानस्य च सतश्च भूतजातस्य गोपयितारं रक्षितारं द्रविणोदां धनं प्रदमेवं गुणविशिष्ट

361/1924

मग्निं देवा धारयन् हविर्विर्दादित्वेन धारयंति। चक्षुर्नि षु धृतिदीर्घः। रयीणां नामन्यतरस्यामिति नाम उदात्तत्वं। क्षां क्षि निवासगत्योः अस्मात्
णिजंतद्वयात्। ग्रीष्णंतात् पणरानिर्दर्शितेति णिलोपः वरप्रत्ययेलोपाद्धलिकोपावल्यानिति पूर्वं कोपोर्व्योर्वलीति यलोपः। न चण्व
स्य स्थानिवत्वां न पदांताद्विर्वचनवरे यलोपेति प्रतिषेधात् षड्भा। श्रेषेः सर्वेषां अस्मात् क्विप अदेव इत्याल्वं। सतः अस्तेः शतरि अदादि
त्वाच्छपो लुक्। श्नसोरल्लोप इत्यकारलोपः। ऋतुरनुम इति विभक्तेरुदात्तत्वं॥ ॥अष्टमीमृचमाह॥ ॥द्रविणोदा द्रविणसस्तुरस्य द्रविणो
दाः सनरस्य प्रयंसत्॥ द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः॥ ॥द्रविणोदाः द्रविणस्य धनस्य बलस्य दाता
ऽग्निः तुरस्य त्वरमाणस्य बलतो जंगमस्य द्रविणसाधनस्य बलस्य भागमेकदेशं प्रयंसत्। अस्मभ्यं प्रयच्छतु। तथा द्रविणोदाः सनस्य स
ननीयस्य संभजनीयस्य स्थावररूपस्य धनस्य एकदेशं प्रयच्छतु। अपि च द्रविणोदाः वीरवतीं वीरैः पुत्रादिभिर्युक्तां इषं नोऽस्मभ्यं प्रयच्छ
तु। तथा द्रविणोदाः दीर्घमायुः अस्मभ्यं रासते प्रयच्छतु। तुरस्य तुर त्वरणे इगुपधलक्षणः कः सनरस्य वन षण संभक्तौ रूनकारश्छांद
सः। रनप्रत्ययः यंसत् यम उपरमे लेट्यडागमः सिब्बहुलं लेटीति सिप्। रासते रा दाने पूर्ववल्लेटीति प्रत्ययमनात्मनेपदं॥ ॥नवमीमृचमा
ह॥ ॥एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि॥ तन्नो मित्रो०॥ व्याख्यातमियं पूर्वसूक्ते अक्षरार्थस्तु हे राधक अग्ने एवम
स्माभिर्दत्तेः समिदादिद्रव्यैः वृधानो वर्धमानः सन् नोऽस्माकं धनयुक्ताय अन्नाय विशेषेण प्रकाशस्व अस्माकं तदर्कं मित्रादयो ममहंतां
पूजयंतां रक्षंतित्यर्थः। तथा सिंधुरप्यदेवता द्यावापृथिव्यौ च ममहंतां॥ ॥इति प्रथमस्य सप्तमे चतुर्विंशो वर्गः॥ ॥अप नः शोशुचदिति चतुर्थ
सूक्तं कुत्सस्यार्षं गायत्रं अग्निगुणकाग्निः ऋषिरग्निर्देवता तथा चानुक्रांतं॥ अप नोऽष्टौ कुत्सः एव गायत्रमिति। विनियोगो लैंगिकः। अत्रे व्या
ख्यानं। दीर्घजिह्वी नाम राक्षसी सर्वाण्यन्नानि बबाधे तां हंतुं इंद्रः सन् सर्वस्य मित्रभूतं कुत्समब्रवीत्। एतां मायां नाशयितु चापधीत तथा गम्य
चेत अनुचितमिदं त्वया चरितं यत्त्वं सर्वेषां मित्रभूतः सन् क्रूरं अकार्षीरिति। तस्मिन् विशोकः प्रायश्चित्तार्थी पुनः सन्नेनेन अग्निं स्तुत्वा शोकम
पागमयत। तथा च तांडकांदीर्घजिह्वी नाम राक्षसी यज्ञान्न लिहत्यचरत् तामिंद्रः कयाच मायया हंतुं नाशंसन् तथा हि सुमित्रः कुत्सः कल्याण
नाम सूक्तं इत्यादिना अस्मादेतत्सूक्तं अप नः शोशुचदघमित्यस्मात्पूर्वं यत्परायाणविनियोगः। अत एव ब्लिसत्रकारेण भारद्वाजेन दशमे हनि कर्तव्ये शांति कर्मणि यजुर्वेदेप
ठितं मंत्रकं विनियुज्यते। नवचस्थलाहुतीरप नः शोशुचदघमिति॥ ॥तत्र प्रथमामृचमाह॥ ॥अप नः शोशुचदघमग्ने शुशुग्ध्या र
यिं॥ अप नः शोशुचदघं॥ हे अग्ने नोऽस्माकं अघं पापं अप शोशुचत् अस्मत्तो निर्गत्य अस्मदीयशत्रून् शोचयतु गृहान् अस्मदीयं पापं शोशुचत् शो
कयस्त्वं मद्विनश्यतु अपि चास्माकं रयिं धनं आ समंतात् शुशुग्धि प्रकाशय उक्तार्थमपि वाक्यं आदरातिशयद्योतनाय पुनः पठ्यते। अघं शं म
स्माकं अघं विनश्यति। शोशुचत् शुच शोके अस्माद्यङ्लुगंतात् लेटि अडागमः। अदादिवच्चेति वचनाच्छपो लुक्। अभ्यस्तानामादिरित्याद्युदात्त
त्वं। आ रयिं शोशुचतु रयिं शुशुग्धि चेति चार्थ प्रतीतेश्चादिलोपे विभाषेति निघात प्रतिषेधः। शुशुग्धि शुच दीप्तौ लोटि बहुलं छंदसीति शपः श्लुः
तुजादीनां दीर्घोऽभ्यासस्येति व्यत्ययः हुझल्भ्यो हेर्धिः चोः कुः इति कुत्वं॥ ॥द्वितीयामृचमाह॥ ॥सुक्षेत्रिया सुगातुया वसूया च यजामहे॥ अप नः शोशुचदघं॥ ॥सुक्षेत्रिया
शोभनक्षेत्रेच्छया सुगातुया शोभनमार्गेच्छया वसूया धनेच्छया निमित्तभूतया च यजामहे अग्निं हविर्भिः पूजयामः। यद्वा सुक्षेत्रिया

भा॰ प्र॰ देवयजनलक्षणं शोभनं देशं संबंधिनाहविषा अग्निं यजामहे नोस्माकमघं अपशोशुचत् विनश्यतु। सुक्षेत्रिया शोभनं क्षेत्रं सुक्षेत्रं तदिच्छया
सुक्षेत्रियया। सुक्षेत्रियामपआत्मनः क्यच् न छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः। व्यत्ययेनेत्वं क्यजंतात् प्रत्ययादिति भावे अकारप्रत्ययः। ततष्टाप्। सुगा
१८३ तुया गातु कृपेत्वमुत्तरत्र। सुतरां सुखं गतिः सुगातुः गमनं तदिच्छया सुगातुया। सुक्षेत्रिया सुगातुया। सुपां सुलुगित्यादिना तृतीयाया याजादेशः
॥ ॥ द्वितीयामृचमाह॥ ॥ प्रयद्भंदिष्ठ एषांप्रास्माकासश्च सूरयः। अप नः शोशुचदघं॥ ॥ यद्यस्मात् एषां स्तोतॄणां मध्ये अयं यजमानः प्र भंदिष्ठः प्रकर्षेण
स्तोतृतमः। एवमस्माकासः अस्मदीयाः सूरयः स्तोतारश्च प्रकर्षेण स्तोतृतमा भवंति। अन्यत्समानं। भंदिष्ठः भंदिरत्र स्तुतिकर्मा। भंदिनं भंदिष्ठं। भंद कल्याणे सुखे
चेति तु धातुः। अस्मात् तृजंतात् तुश्छंदसीति इष्ठन्। तुरिष्ठेमेयस्स्विति तृलोपः। अस्माकासः। अस्माकं संबंधिनः अस्माकाः। तस्मिन्नणि च युष्माकास्मा
कावित्यस्माकादेशः। छंदसोण्प्रत्ययस्य लोपः। आगमानुशासनस्यानित्यत्वाद्वृद्ध्यभावः। आज्जसेरसुक्। स्तोतारो यस्मात् देवता संबंधिनो भवंति। एवं सूरयः स्तोता
रस्योदात्तत्वं। यद्वा षष्ठी बहुवचने अस्माकं शब्दस्य मध्योदात्तस्य वृत्त्यातः स एव स्वरः प्रत्ययस्वरेणादिति भवति॥ ॥ चतुर्थीमृचमाह॥ ॥ प्र यत्ते अग्ने सूर
योजायेमहिप्रतेवयं। अप नः शोशुचदघं॥ ॥ हे अग्ने यद्यस्मात्ते तव सूरयः स्तोतारः प्रजायंते पुत्रपौत्रादिरूपेण बहुविधा भवंति। तस्मात्
यं ते तव स्तोतारः संतः प्रजायेमहि पुत्रादिरूपेण भवेम। जायेमहि प्रार्थनायां लिङ्। अर्थस्य व्याख्यानिति तु जनी प्रादुर्भावे इति जादेशः। अनुदात्तेत्वान्नुम्
त्वे। व्यत्ययेन यदुसादत्तं॥ ॥ पंचमीमृचमाह॥ ॥ प्र यदग्नेः सहस्वतो विश्वतो यंति भानवः। अप नः शोशुचदघं॥ ॥ सहस्वतः बलवतः
शत्रूनभिभवतोग्नेः भानवो दीप्तयः विश्वतः सर्वस्मादपि प्रदेशात् प्रयंति प्रकर्षेण गच्छंति यस्मादेवं तस्मात् नाशितेन तेनाग्निना अस्मदीयमघं
नश्यतु। यंति इणो यण्णिति यणादेशः॥ ॥ षष्ठीमृचमाह॥ ॥ त्वं हि विश्वतोमुख विश्वतः परिभूरसि। अप नः शोशुचदघं॥ ॥ हे अग्ने त्वं हि
खलु विश्वतोमुख सर्वतोमुख ज्वालारूपमुखस्थानीयानां ज्वालानां न कुत्रापि प्रतिहतिरस्ति। अतो हे विश्वतोमुखाग्ने विश्वतः सर्वस्मादपि परिभूः
परिभूरसि। अस्माकं परिग्रहीता भव रक्षको भवेत्यर्थः। अन्यत्समानं॥ ॥ सप्तमीमृचमाह॥ ॥ द्विषो नो विश्वतोमुखाति नावेव पारय। अप नः शो
शुचदघं॥ ॥ हे विश्वतोमुख सर्वतोमुखाग्ने नावेव नावा नदीमिव द्विषः शत्रून् नोस्मानतिपारय अतिक्रम्य शत्रुरहितं प्रदेशं प्रापय। नावाशब्दः
सावेकाच इति विभक्तेरुदात्तत्वं। पारयपारतिः कर्मसमाप्तौ॥ ॥ अष्टमीमृचमाह॥ ॥ स नः सिंधुमिव नावयाति पर्षा स्वस्तये। अप नः शोशुचद
घं॥ ॥ पूर्वोक्तएवार्थः पुनरपि प्रार्थ्यते। हे अग्ने स त्वं नोस्मान् नावया नावा सिंधुमिव नदीमिव नदीमिव स्वस्तये क्षेमाय अतिपर्षा
शत्रूनतिक्रम्य पालय शत्रुरहितं प्रदेशं अस्मान् प्रापयेत्यर्थः। त्वत्प्रसादान्नोस्माकं अघं पापं अपशोशुचत्। अस्मत्तोपक्रम्य नश्यतु। नावया
नौभवतं। नावया अयाजयाराचोपसंख्यानमिति तृतीयाया याजादेशः। उदात्तमर्यादीतीत्यकारस्योदात्तत्वं। पर्षपृपालनपूरणयोः। लेटि वृदुकंच्छंदः
सीति शप्क्लोरभावः। सिब्बहुलं लेटीति सिप्। हुल्लवबनातिपगुणः। कास्त्युत्तिदीर्घत्वं॥ ॥ इति प्रथमस्य सप्तमे पंचमो वर्गः॥ ॥ वैश्वानरस्येति
त्वं चं पंचमं सक्तं कुत्सस्यार्षं त्रैष्टुभं वैश्वानरगुणः कोग्निः शुद्धोग्निर्वा देवता। तथा चानुक्रांतं। वैश्वानरस्य त्र्युचं वैश्वानरीयमिति। व्यूढस्य चतु १८३
र्थेहन्याग्निमारुतं इदं सूक्तं वैश्वानरीयनिविद्धानं व्यूढश्चेति खंडे सूत्रितं। वैश्वानरस्य सुमतौ स्यामाकरिष्यकाराति॥ ॥ तत्र प्रथमामृचमाह॥ ॥
वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः। इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण॥ वैश्वानरस्य विश्वेषां नराणां

368
1924

नेतृत्वेन स्वामित्वेन वा संबंधिनोग्नेः सुमतौ शोभनायां अनुग्रहात्मिकायां बुद्धौ स्याम। अनुग्राह्यत्वेन वर्तमाना भवेम। हिरवधारणे। कमित्य
पि वाक्यार्थः। स हि वैश्वानरः अभिश्रीः अभिश्रयणीयः अभिमुख्येन सेवितव्यः सन् भुवनानां सर्वेषां भूतजातानां राजा स्वामी भवति। यो वै
श्वानरोग्निः इतोस्मादरणी द्वयात् जातमात्र इदं सर्वं जगत् विचष्टे विशेषेण पश्यति प्रातरग्निहोत्रकाले सूर्येण च यतते संयतते संगच्छते।
उद्यंतं वा आदित्यमग्निरनुसमारोहतीति तैत्तिरीयकं। यद्वा पार्थिवस्याग्नेस्तेजांसि उद्गच्छंति सूर्यकिरणाश्चाधोमुखं प्रसरंति तयोः सं
गमनं द्रष्टव्यं वैश्वानरो यतते सूर्येण। विभूतं तथा च यास्कः। अमुतो मुष्यरश्मयः प्रादुर्भवंति तोस्यार्चिषस्तयोर्भासोः स संसर्ग
मवक्ष्यदिति एवंभूतस्य महानुभावस्य वैश्वानरस्य सुमतौ स्यामेति संबंधः। वैश्वानरस्य विश्वेषां नराणां संबंधी नरे संज्ञायामिति
पूर्वपदस्य दीर्घत्वं। तस्येदमित्यण्। सुमतौ शोभना मतिः। नाडीर्वेतिज्ञगतेः प्रकृतिस्वरे प्राप्ते मन्क्तिन्व्याख्यानेत्यादिनोत्तरपदांतोदात्तत्वं
ननु तत्र कारकादित्यनुवृत्तौ गतेरनंतरस्य क्तिनो न प्राप्नोति। एवं तर्हि मतिर्मननं भावे क्तिन् शोभनं मननं यस्यां बुद्धौ सा सुमतिः। नञ्
सुभ्यामित्युत्तरपदांतोदात्तत्वं। चष्टेः चक्षिङ् व्यक्तायां वाचि अयं पश्यति कर्मा च अदादित्वाच्छपो लुक्। स्कोः संयोगाद्योरिति कलोपः। यत
ते। यती प्रयत्ने। चातुर्मास्यान्तारंभणीयायां वैश्वानरपार्जन्यां तस्यां वैश्वानरस्य हविषः पृष्टो दिवीति याज्या। चातुर्मास्यानीति खंडे
सूत्रितं। पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पर्जन्याय प्रगायतेति॥ ॥ तामेतां द्वितीयामृचमाह॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो वि
श्वा ओषधीरा विवेश। वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तं॥ ॥ अयं वैश्वानरोग्निर्दिवि द्युलोके आदित्यात्मना
पृष्टः संस्पृष्टः वर्त्मानिष्पिको निहितो वर्तते। तथा पृथिव्यां भूमौ गार्हपत्यादिरूपेण पृष्टः संस्पृष्टो निहितो वा। तथा विश्वाः सर्वा ओष
धीः पृष्टः संस्पृष्टः सोग्निः अविवेश। व्याकार्थमंतः प्रविष्टवान्। अंतः प्रविष्टेन पार्थिवेनाग्निना हि सर्वा ओषधयः पच्यंते। सहसा प
रेषामसाधारणेन बलेन पृष्टः संस्पृष्टः पृशसंभत्रीनि छांदसा वैश्वानरः नोस्मान् दिवा अह्नि रिषो हिंसतः शत्रोः पातु रक्षतु। तथा स
वैनश्वानरो नक्तं रात्रावप्यस्मान् हिंसकात् पातु। पृष्टः पृशसंस्पर्शने छांदसः सकारलोपः। यद्वा पृषु सेचने निष्ठायां यस्य विभाषेती
विषः। दिवि इदिदमिति विभक्तेरुदात्तत्वं। पृथिव्यां उदात्तयण इति विभक्तिरुदात्ता। रिषिः रिष हिंसायां क्विप् चातिक्विप्। सावेकाच इति षं
चम्या उदात्तत्वं॥ ॥ तृतीयामृचमाह॥ ॥ वैश्वानर तव तत्सत्यमस्त्वस्मान् रायो मघवानः सचंतां तन्नो मित्रो॥ हे वैश्वानर तव तत्त्वदीयं त
तअस्माभिः क्रियमाणं कर्म सत्यमस्तु अवितथफलं भवतु। ततो अस्मान् मघवानो धनवंतो रायो धनवद्रतिप्रियाः पुत्राः से
वंतां। एवं यदस्माभिः प्रार्थितं नो अस्मदीयं तत् मित्रः अहरभिमानी देवो वरुणो रात्र्यभिमानी। अदितिः अदीना देवमाता
सिंधुः स्यंदनशीलो दकाभिमानी देवः उत द्यौः समुच्चयेन तेसर्वे मित्रादयो मामहंतां पूजयंतां पालयंतामित्यर्थः॥ ॥ इति प्रथ
मस्य सप्तमे षष्ठो वर्गः॥ ॥ जातवेदसे इत्येकर्चं षष्ठं सूक्तं मरीचिपुत्रस्य कश्यपस्यार्षं त्रैष्टुभं जातवेदोगुणकोग्निः शुद्धोग्निर्वा दे
वता। तथा चानुक्रांतं। जातवेदसे मेतदादीत्येकभूयांसि सूक्तं सहस्रमेतत्कश्यपार्षमिति। अहर्गणेषु द्वितीयादिषु अहःसु अग्नि
मारुते जातवेदस्यनिविद्धानात्पूर्वमेषामंसनीया। सूत्रितं च। जातवेदसे सुनवाम सोममित्याग्निमारुते जातवे

ग॰ प॰ दस्यतामिति॥ ॥तामेतां प्रथमामृचमाह॥ जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः॥ स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्य
ग्निः॥ ॥जातवेदसे जातानां इत्यत्रि मतां सर्वेषां वेदित्रे ज्ञात्रे। सर्वैः प्राणिभिः ज्ञायमानाय जातप्रज्ञाय वाग्नये एतादृशायाग्नये सोमं सुनवाम अभिषुण
१८४ वाम जातवेदोगुणकमग्निमुद्दिश्य सोमाभिषवं करवामेत्यर्थः। सोग्निः अरातीयतः शत्रुमिवास्मानाचरतः शत्रोर्वेदो धनं नि दहाति नितरां दहतु। अतिक्रम्य
मप्यदुःखरहितं सुखं प्रापयतु। तत्र दृष्टांतः। नावेव सिंधुं यथा कश्चित् कर्णधारो नावा सिंधुं दुस्तरां नदीं तारयति। तद्वत् तथा
दुरिता दुरितानि दुराचरणानि पापानि अस्मानग्निरति तारयतु सर्वाणि दुःखानि अतिपात्य पारं प्रापय्य तारयत्वित्यर्थः॥ अत्र निरुक्तं। जातवेदाः
कस्माज्जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो वा जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविंदतेति तज्जात
वेदसो जातवेदस्त्वमिति ब्राह्मणमित्यादि। जातानि वेत्तीति जातवेदाः। जातिकरकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात् पूर्वार्धे तरसनप्र
र्ये पदप्रकृतिस्वरत्वं। अरातीयतः अरातिर्दानं न मम्नेति नित्यरातिः शत्रुः तमिवास्मानाचरति। उपमानादाचारे उपमानानां भूतात् कर्मणः
क्यच्। क्यच्यचोर्लुक् लुङः। आगतमनुमदतिशासउदात्तत्वं। दहाति दह भस्मीकरणे लेट्याडागमः। बिघ्नतेर्लभ्यते इति वेदो धनं विद्लृ लाभे औणादि
कः कर्मण्यसुन्। पर्षत् पृ पालनपूरणयोः अस्माद्ण्यंतस्य लेट्यडागमः सीबहुलं लेटीति सिप्। दुर्गाणि दुःखेन गम्यंते दुर्गाणि। सु
दुरोरधिकरणे इत्यतिगमेर्डः॥ ॥इति प्रथमस्य सप्तमे सप्तमो वर्गः॥ ॥स यो वृषेत्येकोनविंशत्यृचं सप्तमं सूक्तं। अत्रानुक्रम्यते। स यो वृषेको
ना वार्षागिरा ऋज्राश्वांबरीषसहदेवभयमानसुराधस इति। वृषागिरो महाराजस्य पुत्रा ऋज्राश्वादयः पंच राजर्षयः समेताः सूक्तं ददृशुः
। अतस्ते अस्य सूक्तस्य ऋषयः। उक्तं त्वार्षानुक्रमण्यां। सूक्तं स यो वृषेत्येतत् पंच वार्षागिरा विदुः नियुतानामधेयैः स्वैरपि चैव सत्यतिश्रवीति
अनादेशात् पाश्चात्यात् त्रिष्टुभिः। इंद्रो देवता। दशरात्रस्य पंचमेहनि मरुत्वतीये इदं सूक्तं तथा च सूत्रितं। पंचमस्य रथमिंद्र स यो वृषेंद्र मरुत्व इति निष्के
वल्यमरुत्वतीय इति॥ ॥तत्र प्रथमामृचमाह॥ ॥स यो वृषा वृष्ण्येभिः समोका महो दिवः पृथिव्याश्च सम्राट्॥ सतीनसत्वा हव्यो भरेषु मरुत्वान्नो
भवत्विंद्र ऊती॥ ॥य इंद्रो वृषा कामानां वर्षिता वृष्ण्येभिः वृष्णि भवैर्वीर्यैः समोकाः सम्यक् समवेतः संगतः महो महतो दिवो द्युलोकस्य पृथिव्याः प्रथि
ताया भूमेश्च सम्राट् ईश्वरः सतीनसत्वा सतीनमिति उदकनाम उदकस्य सत्वा सादयिता भरेषु संग्रामेषु हव्यः सर्वैः स्तोतृभिराह्वातव्यः एवंभूतो मरुत्वा
न् मरुद्भिः स इंद्रो नास्माकं ऊती ऊतये रक्षणाय भवतु। वृष्ण्येभिः वृषन्शब्दान्नभवार्थे इत्ययत् अल्लोपोनः इत्यकारलोपः ये चाभावकर्मणोरिति प्र
कृतिभावः स्वरव्यत्ययेन भवतिः महः महच्छब्दात् यांप्रत्ययस्य छांदसो लुक्। तु इत्युदात्तत्वं सावेकाच इति विभक्तेरुदात्तत्वं। सम्राट् मो राजि समः क्वाविति मत्वं
अलुक्। उत्तरपदस्य मकारस्य मकारादेशः मकारस्य च मकारवचनमनुस्वारबाधनार्थं सतीनसत्वा सतीनसत्वा द्वितीयस्य षट् सन्तस्य सा हि सदने पितरि
दर्शितः सतीनं सत्वनं उदकं आणादिकः। तत्सत्वयस्य क्वचित् स्तदेशश्च। यद्वा सती माध्यमिका वाक् साइनार्द्दीश्वरा यस्य तस्मिन्सतीनं व्यत्ययेन पुंवत् भावा १८४
भावः। तत्सत्वा सदेर्वान्तर्भावितण्यर्थात् इ्रसत्वोपह इत्यौणादिको वनिप् तुडागमश्च मरुद्वधाद्वितीय पदप्रकृतिस्वरत्वं। मरुत्वान् इति मतुपोयुत्वम्।
ऊती ऊतिपूतत्वादिनान्तिनुदात्तत्वं सुपां सुलुगिति चतुर्थ्याः पूर्वसवर्णदीर्घः॥ ॥द्वितीयामृचमाह॥ ॥यस्यानाप्तः सूर्यस्येव यामो भरे भरे
वृत्रहा शुष्मो अस्ति॥ वृषंतमः सखिभिः स्वेभिरेवैर्मरुत्वान्नो भवत्विंद्र ऊती॥ ॥यस्येंद्रस्य यामो गतिः अनाप्तः परैरप्राप्तः सूर्यस्येव यथा सूर्य

स्य गतिः अन्यैर्न प्राप्तुं शक्यते तद्वत् स्वैर्भिरात्मीयैरेवैर्गमनशीलैः सखिभिर्मित्रभूतैर्मरुद्भिः सह वृषंतमः अतिशयेन कामानामावर्षिता भरे भरे सर्वेषु
संग्रामेषु वृत्रहा शत्रूणां हंता शुष्मः सर्वेषामसुराणां शोषकः एवंभूतोयमिंद्रोस्ति विद्यते मरुत्वानिंद्रोस्माकं रक्षणाय भवतु। यामः या प्रापण
णे। अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् इति मनप्रत्ययः। नित्वादाद्युदात्तत्वं। शुष्मः शुष शोषणे अविसिविसिशुषिभ्यः किदिति मन्प्रत्ययः। नित्वादाद्युदा
त्तत्वं। अस्ति यद्वृत्तयोगादनिघातः। वृषंतमः वृषन्शब्दादुत्तरस्य तमपो नाद्घस्येति नुट् ऋत्वे। उणगतौ दृणशीङ्भ्यवन॥ ॥तृतीयामृच
॥ ॥दिवो न यस्य रेतसो दुघानाः पंथासो यंति शवसापरीताः॥ तरद्द्वेषाः सासहिः पौंस्येभिर्मरुत्वान्नो भवत्विंद्र ऊती॥ ॥यस्येंद्रस्य पंथासो
रश्मयः रेतसो वृष्ट्युदकानि दुघानाः दुहंतः प्रवर्षतः यंति निर्गच्छंति क्वचिदप्यंतः प्रसरंति। तत्र दृष्टांतः। दिवो न पंथा द्योतमानस्य सूर्यस्य
किरणाः वृष्टिं कुर्वतो नभस्थलान्निर्गच्छंतिं तद्वत्। कीदृशाः रश्मयः शवसा बलेन सहिताः अपरीताः प्राप इत्यर्थः। सोयमिंद्रः तरद्द्वेषाः द्वे
षणसीयाश्चत्रून् तरन्तिरस्कुर्वन् शत्रुरूरुह्यर्थः। पौंस्येभिः बलैः ससहिः शत्रूणामभिभविता एवंभूतो मरुत्वानिंद्रो नोस्माकं रक्षणाय भवत्विति सः
रेतः विशेषं कुर्वत्नामेति प्रथमेन गच्छतीति रेतः रीगतिरेषणयोः। मस्तिभ्यां तुड्स्य सुतुडागमश्च। शवस्यादित्येनेन इत्यसादेशः। दुघानाः दुहप्रपूरणे कर्त
रि लट् शानच् अदादित्वाच्छपो लुक्। व्यत्ययेन घत्वं। वृषादेरीकृतिगणत्वादाद्युदात्तत्वं। पंथासः पततेर्निरिपंथानोर रश्मयः। एतस्मात् निरीयते इति प्र
त्ययः। आक्रांतंतादेशाश्चासे पथिमथ्यर्भुक्षामात् इति व्यत्ययेनात्वं। आज्जसेरसुक्। यद्वा पंथान इत्यत्र वर्णव्यापत्त्या नकारस्य सकारः।
पथिमथोः सर्वनामस्थाने इत्याद्युदात्तत्वं। ससहिः षह अभिभवे उत्सर्गश्छंदसीति वचनात् दादिगमिसहन इति किप्रत्ययः। लिड्वद्भावाद् द्विर्वच
नं॥ ॥चतुर्थीमृचमाह॥ सो अंगिरोभिरंगिरस्तमो भूद्वृषा वृषभिः सखिभिः सखा सन्। ऋग्मिभिर्ऋग्मी गातुभिर्ज्येष्ठो मरुत्वान्॥ ॥स इंद्रः अं
गिरोभिः अंगतिगत्यर्थः अंगिरसो गंतारः तेभ्योपि अंगिरस्तमः अतिशयेन गंतावृषभिः वृष्टिकर्तृभिः सखा सन्। एवंभूतः सन् ऋग्मिभिः ऋचोऽर्चनीयेभ्यो
पि ऋग्मी अर्चनीयो भवति। गातुभिः गातव्येभ्योपि ज्येष्ठः अतिशयेन स्तोतव्यः। एवंगुणविशिष्टो मरुत्वानिंद्रो रक्षणाय भवतु। अंगि
रोभिः अंगिरसां गत्यर्थः। अंगिरा अप्सरा इत्यणादिको मन्प्रत्ययो निपात्यते। इदमादिषु सर्वत्र पंचम्यर्थे तृतीया। रश्मिभिः अंकुच
कृतो सपदादिलक्षणाभावः ऋङ्मवर्थ शोभितैः पदत्वात् कुत्वं जश्त्वं च। गातुभिः गायतेः कमिमनिजनिगाभायाहिभ्यश्चेत्यादिना कर्मणि तुप्रत्ययः॥ ॥
पंचमीमृचमाह॥ ॥स सूनुभिर्न रुद्रेभिर्ऋभ्वा नृषाह्ये सासह्वाँ अमित्रान्॥ सनीळेभिः श्रवस्यानि तूर्वन्मरुत्वान्॥ ॥सूनुभिर्न
पुत्रैरिव रुद्रेभिः रुद्रपुत्रैर्मरुद्भिः युक्तः ऋभ्वा महान् एवंभूतः स इंद्रः नृषाह्ये नृभिः पुरुषैः सोढव्ये संग्रामे अमित्रान् शत्रून् ससह्वान् अभि
भूतवान्। अपि च सनीळेभिः समाननिलयैर्मरुद्भिः सह श्रवस्यानि श्रवः इत्यन्ननाम तद्धेतुभूतान्युदकानि तूर्वन् मेघात् प्रच्यावयन् मरु
त्वानिंद्रोस्माकं रक्षणाय भवतु। नृषाह्ये षह मर्षणे शाकिसहोश्चेति कर्मणि यत् अन्येषामपि दृश्यत इति संहितायां धात्वकारस्य दीर्घ
त्वं। यतोनाव इत्याद्युदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं ससह्वान् षह अभिभवे लिटः क्वसुः अभ्यासदीर्घत्वं छांदसं॥ अमित्रान् अमित्रा
णामुत्तरपदस्य मित्रादेशाः अमित्रमुत्तरपदाद्युदात्तत्वं। सनीळेभिः समानं नीळं येषां ते सनीळाः समानस्य च्छंदसीति स
भावः॥ ॥इति प्रथमस्य सप्तमे अष्टमो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥स मन्युमीः समदनस्य कर्तास्माकेभिर्नृभिः सूर्यं सनत्। अस्मि

365
1924

भा॰ प्र॰ ऋः। हतमस्तिः पुरोहितां मरुतां शत्रुभिरपहतास्रु गोष्ठैः। स हि युधार्थं निगच्छंतः अङ्क्ताश्चाद्यो येन सूक्तेनेंद्रमस्तवन स इंद्रः मन्युमीः
मन्योः क्रोधस्य निर्माता। यद्वा अभिमन्यमानस्य शत्रोर्हिंसकः अपि च। समदनस्य संग्रामस्य कर्ता सत्पतिः सतां पालयिता पुरुहूतः बहु
१८५ भिः यजमानैराहूतः। एवंगुणविशिष्टः सः अस्मिन्नहन् अस्मिन्दिवसे अस्माकेभिः अस्माकैः अस्मदीयैर्नृभिः पुरुषैः सूर्यं सूर्यप्रका
शं सनत संभजंतां करोतु शत्रुपुरुषेस्तु दृष्टिनिरोधकमंधकारं संयोजयतु। स च मरुत्वानिंद्रोस्माकं रक्षणाय भवतु। मन्युमीः। मन्युः
मिनातीति मन्युमीः। मीञ् हिंसायां क्विप्। समदनस्य सहमाद्यंत्यस्मिन्निति समदनः संग्रामः मदी हर्षे अधिकरणे ल्युट् सहस्य सः
संज्ञायामिति सभावः। अस्माकेभिः तस्मिन्नाणि च युष्माकास्माकाविति अस्मच्छब्दस्यास्माकादेशः। संज्ञापूर्वकस्य विधेरनित्यत्वा
द्वृध्यभावः। बहुलं छंदसीति भिस ऐसभावः। स्वरस्तु आस्माका स्य पूरयइत्यन्तोदात्तः सनत। वन षण संभक्तौ लेड्यागमः। अडुत्सल्लु
गिति ससस्यालुक् सत्पतिः पत्यावैश्वर्यं इति पूर्वपदप्रकृतिस्वरत्वं॥ ॥सप्तमीमृचमाह॥ ॥तमूतयो रणयंछूरसातौ तं क्षेमस्य क्षि
तयः कृण्वत त्रां। स विश्वस्य करुणस्येश एको मरुत्वां॰॥ तमिंद्रं शूरसातौ शूरैर्वीरपुरुषैः संभजनीये संग्रामे ऊतये तर्पयितारो मरुतः
रणयन् रमयंतेति यद्वा प्रहर भगवो जहि वीरयस्वेत्येवंरूपया वाचेमिंद्रमुपदिश्य कुर्वंतीति अपि च क्षितयो मनुष्यास्तमिंद्रं क्षेमस्य रमणी
यस्य सर्वस्य धनस्य त्रातारं कृण्वत कुर्वंति देवतांतरादस्य कोतिशय इति चेत् उच्यते। स इंद्रो विश्वस्य सर्वस्य करुणस्य अभिमत
फलनिष्पादनरूपस्य कर्मणः एकोसहाय एव ईशे ईष्टे॥ अन्यत् पूर्ववत् ऊतयः अवतेर्गत्यर्थात् कृत्यल्युटो बहुलमिति कर्तरि क्ति
न्। ऊतीङ्प्रतिषेधः स्वरत्वरल्या क्षिना वकारस्योपधायाश्च ऊठ् ऊतियूतीत्यादिना क्तिन उदात्तत्वं यद्वा कर्तरि क्तिन् रणयन्रम
ते हेतुमण्णिजंताल्लङ्मानेच्छांदसो लुङ् अत्याविकरण च्छांदसः यद्वा रणतिः शब्दार्थः अस्माण्णिजंतात्पूर्ववल्लङ् त्रैवलङ् पालन त्रायंत
इति त्रायतेः क्विप्। चातिग्रहणेनादेहि ग्रहणानुकर्षणात् इत्यपदादेः क्विप्। करुणस्य डुकृञ् करणे कृदृदारिभ्य उनन्निति भावे उनन्
व्यत्ययेन प्रत्ययाद्युदात्तत्वं। ईशे ईश ऐश्वर्ये लोपस्त आत्मनेपदेष्विति तलोपः॥ ॥अष्टमीमृचमाह॥ ॥तमप्संत शवस उत्सवेषु
नरो नरमवसे तं धनाय। सो अंधे चित्तमसि ज्योतिर्विदन्मरुत्वां॰॥ ॥नरो नेतारः स्तोतारः शवसो बलस्योत्सवेषु उत्सवेषु संग्रामेषु न
रं जयस्य नेतारं तमिंद्रं अप्संत आप्नुवंति किमर्थं अवसे अवनार्थं रक्षणार्थं वा। तथा धनाय धनार्थं च तमिंद्रं प्राप्नुवंति। यस्मात्स इं
द्रः तमसि दृष्टिप्रतिबंधके अंधे चित् अध्यानरहिते चित्तस्य मोहकरेपि संग्रामे ज्योतिः विजयलक्षणं प्रकाशं विदत् लंभयति तस्मा
त्तमेव प्राप्नुवंतीत्यर्थः॥ अन्यत्समानं। अप्संत आप्लृ व्याप्तौ लुङि व्यत्ययेनात्मनेपदं व्यत्ययेन क्सप्रत्ययः व्यत्ययेन धातोर्ह्रस्वत्वं। वि
दत विद्लृ लाभे छंदसि लुङ्लङ्लिट इति वर्तमाने लङ् छांदसो लुङ् लृदित्वाच्च्लेरङादेशः। बहुलं छंदस्यमाङ्योगेपीत्यडभावः॥ ॥नवमीमृ
चमाह॥ ॥स सव्येन यमति व्राधतश्चित्स दक्षिणे संगृभीता कृतानि। स कीरिणा चित्सनिता धनानि मरुत्वांनो भवत्विंद्र ऊती॥ ॥स इंद्रः १८५
सव्येन वामहस्तेनैक हस्तेनैव व्राधतश्चित् अतिमहतो महतः शत्रून् नियममाति नियमयति तथा स इंद्रः दक्षिणे दक्षिणपा
र्श्वस्थेन हस्तेनैव यजमानैः कृतानि हवींषि संगृभीता संगृहीता संगृह्णाति अपि च स इंद्रः कीरिणा चित् कीर्तयित्रा स्तो

त्रा च स्तुतः सन् धनानि सनिता प्रदानशीलो भवति॥ हविप्रदातृणामिव स्तोतॄणामपि धनं प्रयच्छतीत्यर्थः। व्राधतः स्यमति। यम उपर 367
माणि च अमंतत्वात् च मितेमितां ह्रस्व इति ह्रस्वत्वं। छंदस्युभयथेति शप्। आर्धधातुकत्वात् णेरनिटीति णिलोपः। व्राधतः वृधु वृद्धौ अस्मा 1929
दतिप्रत्ययः औणादिकः आगमश्चास्य पदादित्वादाद्युदात्तत्वं। संगृभीता ग्रह उपादाने लङि बहुलं छंदसीति विकरणस्य लुक् लिङः सलोपः। ग्रहीज्या
दिना संप्रसारणं। हृग्रहोर्भश्छंदसि इति भत्वं चात स्लिङि इति दीर्घः सनिता षण दाने तांछीलिकस्तृन् न लोकाव्ययेति षष्ठी प्रतिषे
धः॥ ॥दशमीमृचमाह॥ ॥स ग्रामेभिः सनिता स रथेभिर्विदे विश्वाभिः कृष्टिभिर्न्वद्य। स पौंस्येभिरभिभूरशस्तीर्मरुत्वांनो भवत्विंद्र
ऊती॥ ॥स इंद्रः ग्रामेभिः मरुत्संघैः सह सनिता फलानां प्रदाता भवति। स च अस्मिन्नहनि नु क्षिप्रं विश्वाभिः कृष्टिभिः सर्वैर्मनुष्यैः
रथेभिः इंद्रसंबंधितैरथैः करणभूतैः विदे विज्ञायते अपि च स इंद्रः पौंस्येभिः स्वकीयैः बलैः अशस्तीः अशंसनीयान् शत्रून्
अभिभूः अभिभविता तादृशः मरुत्वान् स इंद्रो नोस्माकं रक्षणाय भवतु॥ ग्रामेभिः बहुलं छंदसीति भिस ऐसभावः। ग्रामादीनां चेत्याद्यु
दात्तत्वं। विदे विद ज्ञाने कर्मणि लङ् बहुलं छंदसीति विकरणस्य लुक् लोपस्त आत्मनेपदेष्विति तलोपः॥ ॥इति प्रथमस्य सप्तमे न
वमो वर्गः॥ ॥एकादशीमृचमाह॥ ॥स जामिभिर्यत्समजाति मीळ्हे जामिभिर्वा पुरुहूत एवैः। अपां तोकस्य तनयस्य जेषे मरुत्वांनो॰
॥ ॥पुरुहूतो बहुभिः यजमानैराहूतः स इंद्रः मीळ्हे संग्रामे मीळ्हमिति धननाम तद्धेतुत्वात् संग्रामोपि मीळ्हशब्देनोच्यते जामिभिः बंधु
भिः अजामिभिर्वा बांधवरहितैर्वा एवैः युद्धार्थं मरुद्भिः सह यत् यदा समजाति संगच्छते तेषामुभयविधानामपां इंद्रः प्राप्नुवतां पु
रुषाणां तोकस्य पुत्रस्य तनयस्य तत्पुत्रस्य च जये पजयप्राप्तये स इंद्रो भवतीति किमु वक्तव्यं। अस्माकं स्तोतॄणां जयाय भवतीति अन्य
त्समानं समजाति अज गति विभक्तेरुदात्तत्वं॥ ॥द्वादशीमृचमाह॥ ॥स वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋ
भ्वा॥ चम्रीषो न शवसा पांचजन्यो मरुत्वांनो भवत्विंद्र ऊती॥ ॥स इंद्रः वज्रभृत अन्यैर्धर्तुमशक्यस्य वज्रस्य भर्ता दस्युहा दस्यूना
मुपक्षपयितॄणां असुराणां हंता भीमः सर्वेषां भयहेतुः उग्रः उद्गूर्णतेजाः सहस्रचेताः बहुविज्ञानः सर्वज्ञ इत्यर्थः शतनीथः बहुस्तु
तिर्बहुविधप्रापणो वा ऋभ्वा उरुभासमानो महान्वा चम्रीषो न चम्वां चमसे रसात्मना अवस्थितः सोम इव शवसा बलेन पांचजन्यः
गंधर्वाप्सरसो देवा असुररक्षांसि पंच जनाः निषादपंचमाश्चत्वारो वर्णा वा तेषु रक्षकत्वेन भव स मरुत्वानिंद्रो नोस्माकं रक्षणाय भव
तु। दस्युहा बहुलं छंदसीति हंतेः क्विप्। भीमः ञिभी भये भीमादयोपादाने इत्यपादाने भियः षुग्वा इति मक्। शतनीथः णीञ् प्रापणे हनिकुषिनीर
मिकाशिभ्यः थक्निति थक्प्रत्ययः। पूर्ववद्रेफः। पांचजन्यः भवार्थे बहिर्देवपंचजनेभ्यश्चेति वक्तव्यमिति ञ्यप्रत्ययः ञित्वादाद्युदा
त्तत्वं॥ ॥त्रयोदशीमृचमाह॥ ॥तस्य वज्रः क्रंदति स्मत्स्वर्षा दिवो न त्वेषो रवथः शिमीवान्॥ तं सचंते सनयस्तं धनानि मरुत्वां॰॥ तस्येंद्रस्य
वज्रः कुलिशः स्मत भृशं क्रंदति शत्रूणां क्रंदयति रोदयतीत्यर्थः। यद्वा स्वर्षाः शोभनस्यारुकस्य दाता दिवो न दिवः संबंधी सूर्य
इव त्वेषो दीप्तः रवथः शब्दस्य गर्जनेन लक्षणस्य कर्ता शिमीवान् शिमीति कर्मनाम लोकानुग्रहकेन कर्मणा युक्तः स्तमिंद्रं सनयो
धनस्य दानानि सचंते सेवंते तथा धनानि च सेवंते मरुत्वानिंद्रो नोस्माकं रक्षणाय भवतु। क्रंदति क्रदि ह्रादि कृदि आह्वाने रोदने च दस्यूभ
यथेति शप् आर्धधातुकत्वाण्णेर्नासिकयेत्यादि स्यात्। मनोतेरन इति षत्वं। त्वेषः त्विषः दीप्तौ पचाद्यच्। रवथः रु शब्दे [illegible]

भा॰प्र॰

१८६

मिनोतिनिपाणिभ्यो थ इत्यथप्रत्ययः। गुणाभावश्छान्दसः। सनयः सनोतेर्नयविः औणादिकः॥ चतुर्दशीमृचमाह॥ ॥ यस्यानूनं शवसा मानमुक्थं परिभुजद्रोदसी विश्वतः सीं। स पारिषत्क्रतुभिर्मन्दसानो मरुत्वान्॥ ॥ यस्येंद्रस्य उक्थं प्रशस्यं शवसा बलेन सर्वस्य परिच्छेदकं सर्वेषां बलस्योपमानभूतं वा रोदसी द्यावापृथिव्यौ विश्वतः सीं अज्ञस्य मनवरं परिभुजत् परितः सर्वतो भुनक्ति पालयति स इंद्रः क्रतुभिः अस्माभिः कृतैर्यागैर्मदमानो मोदमानः स नृणः रिषतः अस्मान् दुरितात् पारयतु। इत्थं वचः परिभावेण पालनं दुरिवची त्यादिना कर्मणि थकु। परिभूरिभीत्यादिना संप्रसारणं परितः भुजत् पालनस्यवहार्यो नेति अयशागमः। स्यत्ययेन शपः परिषत् पारस्यतिरिव मंसमामोत्ते इयशागमः। सिब हुलं लेटि इति सिप्। तरर्थे धातुकत्वादीडभावः। स्यत्ययेन णिलोपः। मंदसानः मदिमुद्वति मादमद्वस्वप्नकांतिषु ऋञ्जिवृधिमंदिसहिभ्यः कित् इत्यसानचप्रत्ययः॥ ॥ पंचदशीमृचमाह॥ ॥ न यस्य देवा देवता न मर्ता आपश्चन शवसो अंतमापुः। स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो०॥ ॥ देवता देवस्य दानादिगुणयुक्तस्य यस्येंद्रस्य शवसो बलस्यांतमवसानं देवाः वसवो द्योतमाना देवगणा नापुः न प्राप्नुवन् तथा मर्ताः मनुष्याः आपश्चन अपोपि न प्रापुः स तादृश इंद्रः त्वक्षसा शत्रूणां तनूकर्त्रा आत्मीयेन बलेन क्ष्मः पृथिव्याः दिवश्च स्वर्गश्च च प्ररिक्वा प्रकर्षेण रेचकोभवति। लोकद्वयमप्यस्य बलमतिरिच्यत इत्यर्थः। मरुद्भिः युक्तः स इंद्रः नोस्माकं मर्ताऊतये रक्षणाय भवतु। देवता देवएव देवता देवात्तल् इति स्वार्थे तल् सर्वो मरुत् गिति पल्याद्युकमतीः मन्त्र प्रणत्याः। गो अंमिहासीत्वादिना तल्प्रत्ययः। नित्वादाद्युदात्तत्वं प्ररिक्वा रिचिर् विरेचने अन्येभ्योपि दृश्यंते इति क्वनिपु अंत्यविकारः। छांदसः त्वक्षसा तनूकरणे असुन् नित्वादाद्युदात्तत्वं। क्ष्मः क्ष्मेति पृथिवीनाम अतोधातोरित्यत्र आत इति योगविभागादियुसिद्धिरित्यभिधानात् इसि भसंज्ञायामाकारलोपः। यद्वा क्ष्मा शब्दोविधुनने अस्मात् क्षिपचेति क्विपचेरएतलोपात् पूर्वं वलिलोपः अन्यतसमानं। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं॥ ॥ इति प्रथमस्य सप्तमेदशमोवर्गः॥ ॥ षडशीमृचमाह॥ ॥ रोहिच्छ्यावा सुमदंशुर्ललामीर्द्युक्षा राय ऋज्राश्वस्य। वृषण्वंतं बिभ्रती धूर्षु रथं मंद्रा चिकेत नाहुषीषु विक्षु॥ ॥ रोहित् रोहितवर्णा श्यावा श्यामवर्णा उभयोः पार्श्वयोः उभयविधवर्णयुक्तेत्यर्थः। सुमदंशुः सुमत् स्वतः प्रांशुः ऊर्जं च वाहेन। सुमत्स्वयमित्यर्थ इति आतिरी धातुयया। ललामीः पुण्ड्ररती अश्वभूषणयुक्ता वा ललामानि विपुलोकलतानि वा साऋज्राश्वस्य एतत्संज्ञस्य राजर्षेः रायो धनार्थं रथं यणं इत्यासक्तं द्वारायनं रथं धूर्षु युगसंबंधिपुरहंतम इंद्रं पुवितिर्नवि इति मं द्रासंत्यवामांद्रकरी श्वेअपंक्तिः नाहुषीषु नहुषः मनुष्यास्तत्संबंधिनीषु सेनालक्षणासु प्रजासु प्राज्ञाभज्ञायते। इंद्रस्य अश्वपंक्त्या युक्तः इंद्रः संग्रामेषु अनुग्रहकर्तया प्रादुर्भवतीत्यर्थः। ललामीः ललामशब्दात् छंदसावनिपातितमत्वर्थस्य ईकारः अभ्यस्तलोपो भावः। द्यु क्षा क्षिनिवासगत्योः औणादिकप्रत्ययः। ततोरुपत्यय ऋज्राश्वस्य ऋजगतिस्थानार्जनोपार्जनेषु ऋजेंद्रेत्यादिना रक्प्रत्ययांतो निपातितः। ऋज्रागतिमंतो अश्वायस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वृषण्वंतं अनोनुडिति मनुपो नुट् चिकेत कित ज्ञाने छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लिट् व्यत्ययेन तिप्॥ ॥ सप्तदशीमृचमाह॥ ॥ एतत्यत्त इंद्र वृष्ण उक्थं वार्षागिरा अभिगृणन्ति राधः। ऋज्राश्वः प्रष्टिभिरंबरीषः सहदेवो भयमानः सुराधाः॥ ॥ हे इंद्र वृष्णः कामानां वर्षितुस्ते तव त्यत् तत् प्रसिद्धमेतत् उक्थं स्तोत्रं राधः संसाधकं वृत्रीतिहेतुं वार्षागिराः वार्षागिरा ऋज्राश्वादयः अभिगृणन्ति अभिमुख्येन वदंति। वार्षागिरा इत्येतत्तद्रूणांति ऋज्राश्व एतत्संज्ञो राजर्षिः प्रष्टिभिः पार्श्वस्थैरन्यैर्ऋषिभिः सहइंद्रमस्तौत्। केते पार्श्वस्थाः अंबरीषादयश्चत्वारो राजर्षयः वार्षागिराः तस्यापत्यं इत्यण् प्रत्ययः। गृणन्ति गृशब्दे क्र्यादीनां ह्रस्व इति ह्रस्वत्वं॥ १८६

राधः राध साध संसिद्धौ इति समर्थो भवत्यनेनेति राधः। करणे असुन् ऋज्राश्वः ऋज्रा गतिमंतो अश्वा यस्य स तथोक्तः अंबरीषः अंबिशब्दे औणादिकः ईषन्प्रत्ययः। सहदेवः देवैः सह वर्तत इति तेन सहेति तुल्ययोग इति बहुव्रीहिः। उपसर्जनस्येति विकल्पनात् सभावाभावः। भयमानः ञिभी भये अस्माद्धेतुभावे व्यत्ययेनात्मनेपदम् शपः श्लोरभावः। भयमानः ञिभी भये अस्माद्। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते सुराधाः शोभनं राधो यस्य सोमं नसौ अत्वसंतस्य चाधातोः इत्युत्तरपदांतोदात्तत्वं॥ ॥ अष्टादशीमृचमाह॥ ॥ दस्यूञ्छिम्यूंश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत्। सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः॥ ॥ पुरुहूतः बहुभिः यजमानैः आहूतः इंद्रः एवैर्गमनशीलैः मरुद्भिर्युक्तः सन् पृथिव्यां भूमौ वर्तमानान् दस्यून् उपक्षयितॄन् शत्रून् शिम्यूंश्च राक्षसांश्च हत्वा प्रहत्य न इनं तं रंभ्रावो हिंसकेन वज्रेण निबर्हीत् अवधीत् निबर्हयतिर्वधकर्मा एवं शत्रून्निरस्याश्वित्येभिः श्वेतवर्णैः अलंकारेण दीप्यमानैः सखिभिः मित्रभूतैः सह क्षेत्रं शत्रूणा स्वभूतां भूमिं सनत् समभाक्षीत् तथा सूर्यमपि तिरोहितं पर्वतस्य वृत्रहननेन सनत्। अभजत प्राप्तवानित्यर्थः। तथा सुवज्रः शोभनवज्रयुक्तः इंद्रः वृत्रेण निरुद्धा अपो वृष्टयुदकानि सनत् समभजत् दस्यून् दसु उपक्षये यजिमनिशुन्धिदसिजनिभ्यो युः इत्यादित्वाद्युदात्तत्वं। शिम्यून् शमु उपशमे शमयंति सर्वं तिरस्कृत्य तेतिराक्षसाः शिमि शिम्युः औणादिको युच्प्रत्ययः वर्णव्यापत्या आकारस्येकारः यद्वा शिम् इति हिंसायां अन्येभ्योपि दृश्यंते इति क्विप् शिमां कर्तुमिच्छति सुप आत्मनः क्यच्। क्याच्छंदसि उः। सनत् षण संभक्तौ लङि बहुलं छंदस्यमाङ्योगेपीत्यडभावः। श्वित्न्येभिः श्विता वर्णे औणादिको यन्प्रत्ययः श्वित्यं वर्णमर्हंतीति श्वित्न्याः छंदसि चेति यः। सुवज्रः आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं॥ ॥ एकोनविंशीमृचमाह॥ ॥ विश्वाहेंद्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजं। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥ ॥ विश्वाहा सर्वकालं नोस्माकमिंद्रः अधिवक्तास्तु अधिकवचनं पक्षपातेन वचनं यथा भवति तथा वक्तास्तु सर्वकालं नोस्माकमिंद्रः पक्षपातवचनयुक्तो भवतु वयं च अपरिह्वृताः अकुटिलगतयः संतो वाजं हविर्लक्षणमन्नं सनुयाम संभजेमहि दद्याम। सनुयाम सनोतिर्नाशिष्टोदत्तेन अस्माभिः प्रार्थितं तन्मित्रादयो मामहंताम् पूजितं कुर्वंतु विश्वाहा विश्वान्यहानि विश्वानि अत्यंतसंयोगे द्वितीया शेश्छंदसि बहुलमिति लोपः। उपधायां दीर्घत्वं नलोपः। मरुद्वृधादित्वात् पूर्वपदांतोदात्तत्वं॥ ॥ अपरिह्वृताः ह्वृ कौटिल्ये निष्ठायामपरिह्वृताश्चेति निपातनात् भावाभावः। अन्ययपूर्वपदप्रकृतिस्वरत्वं सनुयाम षणु दाने लिङि तनादित्वादुप्रत्ययः वनषण संभक्तावित्यस्मादाशिषि प्रभः। प्रिया मामहंतां मह पूजायां शपः श्लुः। नुगभ्यासस्य दीर्घत्वं॥ ॥ इति प्रथमस्य सप्तमे एकादशो वर्गः॥ ॥ प्र मंदिन इत्येकादशर्चं सप्तमं सूक्तं आंगिरसस्य कुत्सस्यार्षं संप्तदश्च तस्य त्रिष्टुभः छंदाः समन्ना जगत्यः इंद्रो देवता। तथा चानुक्रांतं प्र मंदिने एकादश कुत्सः चतुस्त्रिष्टुबंतं। आद्या गर्भस्राविण्युपनिषत्। दशमे नात्रस्य चाये कृष्णगर्भानिरहन्नृजिश्वना॥ अवस्यवो वृषणं वज्रदक्षिणं मरुत्वंतं सख्याय हवामहे॥ ॥ तत्र प्रथमामृचमाह॥ ॥ प्र मंदिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना। अवस्यवो वृषणं वज्रदक्षिणं मरुत्वंतं सख्याय हवामहे॥ ॥ हे ऋत्विजः मंदिने स्तुतिमते स्तोतव्याय इंद्राय पितुमत् हविर्लक्षणान्नेनोपेतं वचः स्तुतिलक्षणं वज्रदक्षिणं मरुत्वंतं सख्याय हवामहे। हे ऋत्विजः मंदिने स्तुतिमते स्तोतव्याय इंद्राय पितुमत् हविर्लक्षणान्नेनोपेतं वचः स्तुतिलक्षणं वचनं प्रार्चत प्रकर्षेणोच्चारयत। य इंद्रः ऋजिश्वना एतत्संज्ञकेन राज्ञा सख्या सहितः सन् कृष्णो नाम कश्चिदसुरः तेन निषिक्ता गर्भाः तदीया भार्याः निरहन् अवधीत् कृष्णस्य सकलं तत्पुत्राणामप्यनुत्पत्त्यर्थं गर्भिणीस्तस्य भार्या अपि अवधीदित्यर्थः॥ अवस्यवः रक्षणेच्छावो वयं वृषणं कामानां वर्षितारं वज्रदक्षिणं वज्रयुक्तेन दक्षिणहस्तेनोपेतं तं मरुत्वंतं इंद्रं सख्याय सख्युः कर्मणे हवामहे आ 369 1924

भा॰ अ॰ च्यावयामहे मंहिष्ठं मंहिष्ठं महिष्ठमतिशयेन प्रवृद्धं स्तुतिगतिषु ओणादिकः इनिप्रत्ययः तदुक्तं यास्केन मंदी मंदतेः स्तुतिकर्मण इति स्वसृतु ऋभ्यामतुश्लितिम
तुपउदात्तस्तमः कृष्णगर्भाः कृष्णेन निषिक्ता गर्भा यासां तास्तथोक्ताः परादिः छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । अत्र स्वनः अवशेषाणादिकाभा
१८ १ व अप्रतन अवदृश्य वस्यातिकूप आत्मनास्यत स्याछंदसीति प्रत्ययः एव पर्णवार्यपूर्वस्यनिगमइतिविकल्पनादीर्घाभावः । सख्याय सख्युः कर्म सः
ख्यं सख्युर्य इति यप्रत्ययः हवामहे ह्वेञो लिटि बहुलं छंदसीति संप्रसारणं ॥ द्वितीयामृचमाह ॥ ॥ यो व्यंसं जाहृषाणेन मन्युना यः शंबरं यो अहन्
पिप्रुमव्रतं ॥ इंद्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वंतं । यः इंद्रः जाहृषाणेन प्रवृद्धेन मन्युना क्रोधेन व्यंसं विगतभुजं वृत्रं अहन् व्रवधीत् । अपि च
य इंद्रः शंबरं एतन्नामकमसुरं च अवधीत् तथा अव्रतं व्रतरहितं कर्मणां विरोधिनं पिप्रुं एतन्नामकं च यः इंद्रः अवधीत् किंच य इंद्रः अशुषं शो
षकरहितं शुष्णं सर्वस्य जगतः शोषकं एतन्नामकमसुरं न्यवृणक् न्यवर्जयत सम्यक् हतवानित्यर्थः । तं मरुत्वंतमिंद्रं सख्याय आह्वयामहे व्यंसं विगत
ता अंसा यस्मात् बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । यण उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं । जाहृषाणेन हृषु तुष्टौ । अत्र व्यत्ययेनास्य शपः श्लुः
हृषिलिड्लिटः कानच् तिनस्य कानञादेशः अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं । चित्वादंतोदात्तत्वं । अशुषं शुष्णं शुष
शोषणः कः शुषाः शोषकाः न संत्यस्येत्यशुषः परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । अरणं वृजी वर्जने रौधादिकः ॥ ॥ तृतीयामृच
माह ॥ ॥ यस्य द्यावापृथिवी पौंस्यं महद्यस्य व्रते वरुणो यस्य सूर्यः । यस्येंद्रस्य व्रते नियमरूपे कर्मणि वरुणो वर्तते वरुणोपीद्रस्य नियमं नातिक्रामतीत्यर्थः । अपि वा सूर्यो
पि यस्येंद्रस्य व्रते वर्तते । तथा यस्य इंद्रस्य कृतं कर्म सिंधवो नद्यः सश्चति च नश्चत्ययः । गच्छतिसश्चतिर्गतिकर्मा इंद्रेणानुज्ञाताः प्रवहंती
त्यर्थः । तं मरुत्वंतमिंद्रं सख्याय आह्वयामहे । द्यावापृथिवीति स्वरत्वं । वा छंदसीति पूर्वसवर्णदीर्घः ॥ ॥ चतुर्थीमृचमाह ॥ ॥ यो अश्वानां यो गवां
गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः । वीळोश्चिदिंद्रो यो असुन्वतो वधो मरुत्वंतं । य इंद्रो अश्वानां प्रतिरधिपतिः न केवलमेकस्या गोः किंतु सर्वासा
मित्याह गवामिति । सर्वासां गवामधिपतिर्भवति । वशी अपराधीनः स्वतंत्र इत्यर्थः । अपि च य इंद्रः कर्मणि सर्वेषु कर्मसु स्थिरो नैश्चल्येनावति
ष्ठमानः आरितः स्तुतिभिः प्रकृतः प्राप्तो भवति आरितः प्रत्यक्षतो मानितो निरतं । यश्चेंद्रः असुन्वतः सुन्वतोऽयागानुष्ठानरहितस्य विरोधिनो वीळो
श्चित् दृढस्यापि शत्रोः वधः हंता तं मरुत्वंतमिंद्रं सख्याय आह्वयामहे । गवां न गोश्वन्सावर्णेति विभक्तेरुदात्तत्वस्य प्रतिषेधः । गोपतिः पत्यावैश्वर्य इ
ति पूर्वपदप्रकृतिस्वरत्वं । आरितः ऋ गतौ अस्माण्यंतान्निष्ठा आगमानुशासनस्यानित्यत्वादिडभावः । यद्वा सत्यसिकत्रिमस्याद्युपलक्षणं नेति
निमित्तविहितस्य यकुप कोचिवेत्यत्र च उदात्तनवहुलग्रहणानुकर्षणाद्नैमित्तिकं लुकि प्रत्ययलक्षणेन सनयङोरिति कृदुपसंतस्याद्वित्व
तेउरदत्वहलादिशेषयोः सतोः दृष्टिश्च लुक्तिनिवृत्तानिष्ठायामीदृसद्गम इयागमः । ऋकारस्य याणादेशः । रेरित्यभ्यासरेफलोपः । ढलो
पे पूर्वस्य दीर्घत्वं यण इति दीर्घत्वं ॥ वधः हन्तेर्बहुलवचनात् हनश्च वधः इति कर्तव्यं पूर्वधादेशः ॥ स वाद्यंतः अतो लोपे उदात्तनिवृत्ति
स्वरेण प्रत्ययस्योदात्तत्वं ॥ ॥ पंचमीमृचमाह ॥ ॥ यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविंदत् । यो विश्वस्य जगतः प्राणनस्य तिर्यगास्त्वणजातिभ्यो गिरोभ्यः प्रथमः अन्येभ्यो देवेभ्यः पूर्व
भावि सन् पणिभिरपहृता गाः ॥ अविंदत् अलभत अन्येभ्यो देवेभ्यः पूर्वमेव तैरसुरैः युधा गाः स्वयमलभतेत्यर्थः ॥ अपि च यः इंद्रो १८ १
दस्यून् अधरान् अपातयत् ॥ अस्य तु पश्यपितृन् असुरान् बाधते तान् दस्यून् अवातिरत् अवधीत् अवतिर्वधकर्मा तं मरुत्वंतमिंद्रं सख्याय आह्वयामहे । जगतः गम्लृ
सृप्लृ गतौ वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्चेति प्रत्ययांतो निपातितो जगच्छब्दः आद्युदात्तः प्राणतः अन प्राणने अनच । अस्मात् तुदः शतृ अदा

371/1924

दिभ्यो लुक् नानुदात्तमदिति विभक्तेरुदात्तत्वं षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं ॥ ॥ षष्ठीमृचमाह ॥ ॥ यः शूरेभिर्हव्यो यश्च भीरुभिर्यो धाव
द्भिर्हूयते यश्च जिग्युभिः । इंद्रं यं विश्वा भुवनाभि संदधुर्मरुत्वंतं । यः इंद्रः शूरेभिः शौर्योपेतैः पुरुषैः हव्यः यो धुमाह्वातव्यः यश्च भरद्भिः भयदर्शि
कातरैः पुरुषैः सहायार्थमाह्वातव्यः अपि च यः इंद्रो धावद्भिः पराजयेन पलायमानैर्हूयते रक्षार्थमाहूयते । यश्च जिग्युभिः प्राप्तजयैरा
हूयते । यश्चेंद्रं विश्वा भुवना सर्वाणि भूतजातानि स्वेषु स्वेषु कार्येषु अभिसंदधुः अभिमुख्येन स्थापयंति । तं मरुत्वंतमिंद्रं सख्याय आह्वयामहे । शूरेभिः
प्राप्तजयैः बहुलं छंदसीति भिस ऐस भावः हव्यः ह्वयतेरचो यदिति यत् प्रत्ययः नुरत्वो बहुलं छंदसीति संप्रसारणं गुणो धातुस्थमिति न स्वं चेत्यवा
देशः भीतभिः भियः कुक् क्लुकनादिति क्रुप्रत्ययः सगतो सर्वे यगणितायांनादिप्राप्तस्यादिना थाथादेशः उपपदपित्वादनुदात्तत्वे सतिधातुस्वरःसावधात
कस्वरेण धातुः स्वरः शिष्यते । जिग्युभिः जि जये लिटः क्वसुः द्विर्वचने संलिटोर्जेरिति अभ्यासादुत्तरस्य जकारस्य कुत्वं भिस अस्मभ्ययादिश्चे
नभत्वात् वसोः संप्रसारणं छंदसो यलोपः ॥ ॥ इति प्रथमस्य सप्तमे द्वादशो वर्गः ॥ ॥ सप्तमीमृचमाह ॥ ॥ रुद्राणामेति प्रदिशा विचक्षणो रु
द्रेभिर्योषा तनुते पृथु ज्रयः । इंद्रं मनीषा अभ्यर्चति श्रुतं मरुत्वंतं सख्याय हवामहे ॥ विचक्षणः सर्वस्यात्मा प्रकाशमान इंद्रः रुद्राणां रुद्र
पुत्राणां अध्यात्मं प्राणरूपेण वर्तमानानां मरुतां च द्वारो द्विपदणां प्राणानां प्राणादि द्वारोपनिर्गताः संतो बंधुजनान् रोदयंति प्रदिशा प्रदे
नेन मनुष्येभ्यः प्रदानेन सह पत्यं नरिक्षे गच्छति । तथा चाम्नायते यो सौ न पन्नु देति । स सर्वेषां भूतानां प्राणानादाय उदेतीति अपि च रुद्रेभिः
अधिभूतवर्तमानैः रुद्रेभिः रुद्रपुत्रैर्मरुद्भिः योषा माध्यमिका वाक् पृथु विस्तीर्णः ज्रयो गंतनुते विस्तारयति प्रसंगाद्वत्र मरुतां स्तुतिर्नेमरु
द्भिः सह वर्तमानं श्रुतं प्रख्यातं सर्वात्मानमिंद्रं मनीषा स्तुतिलक्षणा वाक् अभ्यर्चति आभिमुख्येन स्तौति तं मरुत्वंतमिंद्रं वयं सख्याय आह्वयामहे प्र
दिशा दिश अतिसर्जने संपदादिलक्षणो भावे क्विप्‌ ज्रयः ज्रि अभिभवे ज्रीयते अभिभूयते तेनेति ज्रयो वेगः करणे असुन् मनीषा ईष
षाअसाद्विवाद्यकृतिभावः ॥ ॥ अष्टमीमृचमाह ॥ ॥ यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजने मादयासे । अत आ याह्यध्वरं नो अच्छा त्वाया
हविश्चकृमा सत्यराधः । हे मरुत्वः मरुद्भिर्युक्त इंद्र परमे उत्कृष्टे सधस्थे सहस्थाने गृहे यद्वा यदि वा मादयासे मत्तो वर्तसे यद्वा यदि वा अवमे अर्वा
चीने वृजने वृज्यते छिद्यते निधिः धनमिति वृजनं गृहं । तस्मिन् मादयासे अतोऽस्मादुभयविधात् स्थानात् अस्माकमध्वरं यज्ञं अच्छ अभिमुख्येन
आयाहि आगच्छ हे सत्यराधः सत्यधन त्वाया त्वत्कामनया वयं हविश्चकृम अकुर्म । मरुत्वंतः मरुत्वः मतुवसो रुरिति संबुद्धौ नकारस्य रुत्वं । सधस्थे
पिस्थ इति कप्रत्ययः । सधमादस्थयोः छंदसीति सहस्य सधादेशः । मादयासे मदतृप्तियोगे चुरादिरात्मनेपदी लेट्याडागमः । त्वाया त्वामात्म
न इच्छति क्यच् आत्मनः क्यचि प्रत्यययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः व्यत्ययेन दकारस्याल्लं । अप्रत्ययादिति अकारप्रत्ययः सुपां सुलुगि
ति तृतीया याया लुक् ॥ ॥ नवमीमृचमाह ॥ ॥ त्वायेंद्र सोमं सुषुमा सुदक्ष त्वाया हविश्चकृमा ब्रह्मवाहः । अधा नियुत्वः सगणो मरुद्भिरस्
मिन्यज्ञे बर्हिषि मादयस्व ॥ ॥ हे सुदक्ष शोभनबल इंद्र त्वाया त्वत्कामनया सोमं सुषुम अभिषुतवंतो वयं हे ब्रह्मवाहः ब्रह्मणा मंत्ररूपे
ण स्तोत्रेण वाह्यमाना प्राप्यमाणा इंद्र त्वाया त्वत्कामनया सवनीयपुरोडाशलक्षणं हविश्चकृम अकुर्म । नियुत्वः हे नियुत्वः नियुतोऽश्वास्तद्वन्निंद्र अ

भा॰ प्र॰ थानंतरं मरुद्भिः समरुद्भिः एतत्संज्ञैर्देवैः सगणाः गणसहितः सन् अस्मिन् वर्तमाने यज्ञे बर्हिषि आस्तीर्णे दर्भे उपविश्य मादयस्व मत्तो
भव। कस्य पुत्र अभिषुतेन कौशिकादिनियमप्राप्तस्येदः अनित्यमागमशासनमिति वचनाद् भावः॥ ॥द्वादशीमृचमाह॥ ॥ मादयस्व ह-
१८८ रिभिर्ये त इंद्र विष्यस्व शिप्रे वि सृजस्व धेने॥ आ त्वा सुशिप्र हरयो वहंतु उशन् हव्यानि प्रति नो जुषस्व॥ ॥हे इंद्र हरिभिः अश्वैः सह मादयस्व
तृप्तो भव। ये ते तव स्वभूताः तदर्थं शिप्रे हनुसंज्ञे विष्यस्व सोमपानार्थं विवृते कुरु तथा धेनी पानसाधनभूते जिह्वे प्रति विसृजस्व
सोमप्रार्थनाय विसृष्टे कुरु हे सुशिप्र शोभनहनो नासिके वा शोभन हरयो अश्वाः त्वा वहंतु अस्मदीयं यज्ञं प्रापयंतु त्वं च उशन् अस्मान्का-
मयमानोऽस्माकं हव्यानि हवींषि प्रतिजुषस्व प्रत्येकं सेवस्व माध्यंदिनीः॥ विष्यस्व षो अंतकर्मणि व्यत्ययेन आत्मनेपदं दिवादित्वात् श्यन्
ओतः श्यनीत्योकारलोपः॥ उपसर्गात्सुनोतीति षत्वं॥ ॥एकादशीमृचमाह॥ ॥ मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिंद्रेण सनुयाम वा-
जं॥ तन्नो वो॰॥ मरुत्स्तोत्रस्य मरुद्भिः सह स्तोत्रं यस्य स मरुत्स्तोत्रः तस्य वृजनस्य शत्रूणां वर्जयितुरिंद्रस्य संबंधिनो गोपाः गोपायितारो रक्ष-
णीया वर्तनेन इंद्रेण वाजमन्नं सनुयाम लभेमहि। यदेतस्माभिः प्रार्थितं नोऽस्मदीयं तन्मित्रो इत्याद्या द्यावापृथिव्यौ च मामहंतां पूजितं कुर्वंतु वृजन-
स्य वर्जयितृ वर्तनं॥ सनुयाम षणु दाने इति धातोः स्युरिति षु प्रत्ययः॥ ॥इति प्रथमस्य सप्तमे त्रयोदशो वर्गः॥ ॥इमां त इत्येकादशर्चं नवमं सू-
क्तं कुत्सस्यार्षमैंद्रं अंत्या त्रिष्टुप् शिष्टा जगत्यः॥ तथा चानुक्रांतं। इमां ते त्रिष्टुबंतेति विनियोगो लैंगिकः॥ ॥तत्र प्रथमामृचमाह॥
इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे। तमुत्सवे च प्रसवे च सासहिमिंद्रं देवासः शवसामदन्ननु॥ ॥हे इंद्र मह-
महतस्ते तव इमां इदानीं महीं महतीं स्तुतिं अंत्यां धियं बुद्धिं प्रभरे प्रकर्षेण संपादयामि। ते तव धिषणा नदी या बुद्धिः अस्य मम स्तोत्र-
कर्तो यस्मात् आनजे अक्ता संश्लिष्टाऽसीत् तस्मात्प्रियां स्तुतिं करोमीत्यर्थः॥ उत्तरोर्धर्चः परोक्षकृतः सासहिं शत्रूणां दातारं युधि अभि-
भावितारं पूर्वोक्तं इमं इंद्रं देवासः कर्मसक्तदीव्यंतः ऋत्विजः शवसा स्तुतिभिः कीर्तितेन बलेन अन्वमदन् अनुक्रमेण हर्षं प्रापयन् किम-
र्थं उत्सवे च उत्सवार्थं अभिवृद्ध्यर्थं प्रसवे च धनानां रक्षकानां वा उत्पत्त्यर्थं च आनजे अंजू व्यक्तिम्रक्षणगतिषु अस्मात्कर्मणि लिट्
द्विर्वचनात् परिणाम अत आदेरित्यभ्यासस्यात्वं तस्मान्नुड् द्विहल इति नुट् व्यत्ययेनोपधानकारलोपः॥ उत्सवे प्रसवे करणे घञर्थे भावे
अप् निमित्तात्कर्मसंयोगे इति सप्तमी। थाथादिनोत्तरपदांतोदात्तत्वम्॥ सासहिं षह अभिभवे आदृगमहनजन इत्यत्र उत्सर्गः॥ छंदसीति वच-
नात् किप्रत्ययः लिड्वद्भावात् द्विर्वचनं अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं॥ अमदन् मदी हर्षे हेतुमति णिच् मदादित्वे लोप
येरिति वचनात् पुगागमे वृद्ध्यभावः॥ छंदस्युभयथेति शप आर्धधातुकत्वाण्णेरनिटीति णिलोपः॥ ॥द्वितीयामृचमाह॥ अस्य श्र-
वो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः॥ अस्मे सूर्याचंद्रमसाभिचक्षे श्रद्धे कमिंद्र चरतो वितर्तुरं॥ ॥अस्य श्रवो यशो भृ-
शं लोपेतान् प्रकटयंतीत्यर्थः॥ अपि च द्यावाक्षामा द्यावापृथिव्यौ पृथिवी अंतरिक्षनाम अंतरिक्षं च अस्य सूर्यात्मना वर्तमानस्येंद्रस्य दर्- १८८
शनीयं सर्वैः प्राणिभिः दर्शनीयं वपुः रूपं नाम तत्प्रकाशात्मकं रूपं धारयंतीति किंच हे इंद्र अस्मे अस्माकं अभिचक्षे संदर्शनाय सूर्या-
चंद्रमसौ अभिचक्षे संदर्शनाय प्रकाशनार्थं श्रद्धे कं श्रद्धार्थं च कथा वितर्तुरमिति विस्तरं सत्यमिति श्रद्धोत्पत्त्यर्थं॥ ॥कमित्येतस्य पूरणं

द्युभयार्थं सूर्याचंद्रमसौ वितर्तुरं परस्परव्यतिहारेण तरणं पुनः पुनर्गमनं यथा भवति तथा चरतो वर्तेते त्वमेव तद्रूपेण वर्तत इत्यर्थः। अस्मदु-
दात्तमिति भक्तेरुदात्तत्वं। द्यावाक्षामा द्यौश्च क्षामा च दिवो द्यावा देवताद्वंद्वे च सुपां सुलुगिति विभक्तेर्डादेशः देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। दर्शतं
भृमृदृशीत्यादिना अतच् सूर्याचंद्रमसा सूर्यश्च चंद्रमाश्च अतो देवताद्वंद्वे चेति प्राप्तस्य उभयपदप्रकृतिस्वरत्वेनोत्तरपदमुदात्तादाव पृथिवीति प्रतिषेधः
प्रकाशनार्थं बालसंपदादिलक्षणो भावे क्विप् नादर्थे चतुर्थी श्रद्धे दधातेर्ग्रहणात् दधातेर्भावे। विभक्ति चतुर्थ्यर्थ कवचनं अतो धातोरित्याकारलो-
पः उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं॥ वितर्तुरं तरतेर्यङ्लुगंतादौणादिकः। कारश्च बहुलं छंदसीति कृतं॥ ॥तृतीयामृचमाह॥ ॥तं स्मा
रथं मघवन्प्राव सातये जैत्रं यं ते अनुमदाम संगमे। आजा न इंद्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः॥ ॥हे मघवन् धनवन् इंद्र स्मा
तं अस्माकं धनलाभाय तं स्म तमेव रथं प्राव प्ररक्ष वर्तय ना अस्माकं मनसा बुद्ध्या पुरुष्टुत बहुभिः स्तुत इंद्र ते तव स्वभूतं जैत्रं जयशीलं यं रथं सं-
गमे शत्रुभिः सह संगमने शत्रुभिः संगमने आजौ युद्धे सति अनुमदाम वयमनुक्रमेण स्तुमः अपि च हे मघवन् त्वायद्भ्यः त्वां कामय-
मानेभ्यो नः अस्मभ्यं शर्म सुखं यच्छ देहि प्रयच्छ अव रक्षणगतिकांतीत्यत्र कृतादरित्यर्थः॥ संगमे इति निश्चितमस्येति कर्मणि पथा
द्वितीयोत्तरपदांतोदात्तत्वं। आजा सुपां सुलुगिति सप्तम्या डादेशः त्वायद्भ्यः आत्मनः क्यच् प्रत्ययोत्तरपदयात्तरपदस्याश्च तिमपर्यंत
श्च त्वादेशः व्यत्ययेन दकारस्याल। क्यजंताद्वः शतृ अदुपदेशाल्लसार्वधातुकानुदात्तत्वे भिसि तिक्यच्चास इदेकादेशे एकादेश उदात्तेनोदात्त
स्योदात्तत्वं॥ ॥चतुर्थीमृचमाह॥ ॥वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे॥ अस्मभ्यमिंद्र वरिवः सुगं कृधि प्र शत्रूणां मघवन्वृष्ण्या-
रुज॥ ॥हे इंद्र युजा अस्माभिर्युक्तेन सहायभूतेन त्वया वृतं आवृण्वंतं शत्रुं वयं स्तोतारो जयेम अभिभवेम॥ अपि च भरे संग्रामे अस्माकमंशं
अस्मदीयं भागं उदव उत्कृष्टतया परिहारेण संरक्ष। तथा हे इंद्र वरिवो धनं अस्मभ्यं सुगं सुगमं सुप्रापं कृधि कुरु तथा हे मघवन् शत्रूणां
अस्मदुपद्रवकारिणां वृष्ण्या वीर्याणि प्ररुज प्रभंग्धि बाधस्वेत्यर्थः॥ भरेभरे नित्यवीप्सयोरिति द्विर्वचनं सुगं सुदुरोरधिकरण इ-
ति गमेर्डप्रत्ययः॥ कृधि श्रुशृणुपॄकृवृभ्यश्छंदसीति हेर्धिः रुज तो भंग इति दादिकः॥ ॥पंचमीमृचमाह॥ ॥नाना हि त्वा हवमाना जना इमे धना-
नां धर्तरवसा विपन्यवः॥ अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हींद्र निभृतं मनस्तव॥ ॥हे धनानां धर्तः गोहिरण्यादिरूपाणां द्रव्याणां धारयितः
इंद्र विपन्यवः स्तोतारो नाम ततः स्तोतारः इमे जनाः अवसा रक्षणेन हेतुना त्वा हवमानाः त्वां आह्वयंतः नाना हि विभिन्नाः खलु तेषां मध्ये अ-
स्माकं स्म अस्माकमेव सातये धनमादाय रथमातिष्ठ आरोह हे इंद्र निभृतं अव्याकुलं तव मनश्चित्तं जैत्रं हि जयशीलं खलु शत्रून् जित्वा अ-
स्मभ्यं धनं दातुं समर्थमित्यर्थः॥ सातये षणु दाने क्तिनि जनसनखनां सन्झलोरित्यात्वं॥ ॥इति प्रथमस्य सप्तमे चतुर्दशो वर्गः॥ ॥षष्ठीमृ-
चमाह॥ ॥गोजिता बाहू अमितक्रतुः सिमः कर्मन्कर्मञ्छतमूतिः खजंकरः॥ अकल्प इंद्रः प्रतिमानमोजसाथा जना वि ह्वयंते सिषासवः॥ ॥
हे इंद्र तव बाहू गोजितौ गोजितौ यतः भविता त्वं च अमितक्रतुः अपरिच्छिन्नज्ञानः सिमः श्रेष्ठः तथा च सायणेन कं सिम इति बंधकः सिमा
बध्नाति। यद्वा सिमः शत्रूणां बंधकः॥ कर्मन्कर्मन् स्तोतॄणां कर्मणि कर्मणि उपस्थितः शतमूतिः बहुविधरक्षणो यतः खजंकरः खजानि संग्रामः
[illegible] ओजसा सर्वेषां प्राणिनां यद्बलं तद्बलमतिक्रम्य सर्वेण प्रति

373
1924

भा॰ प्र॰ निधिं वनमीयस्मादेवंगुणविशिष्ट इंद्रः तथा नः करणात्सिषासवः संभक्तुकामा जनाः। विह्वयंते विविधमाह्वयंति। गोजिता गा जयत इति गोजितौ। सुपांसु
लुगिति विभक्तेराकारः। खिजं धने अस्मादीनादिको मकृत्स्वतंकरः खजमं घर्षने पत्या च। क्षेमप्रियमद्रेष्वेति च शब्दस्यानुनासिकः समुच्चयार्थस्तात
१८९ शब्दोपपदविनश्रोते: खचं अरुर्द्विषदजंतस्येति मुमागमः उत्तरपदकृत्प्रकृतिस्वरत्वं अकल्पः अत्र सत्यांनिलुत्तरपदं दांतो दात्तनतास्तिपास्तवः बनय
णं संभक्तौ सनिममीतिनेट्। इति विकल्पनादिड्भावः। अत्र सन स्वनीं स्मसस्त्वोरित्यातं द्विर्वचनादि सिनाद्विः सभिश्च इति क्तनत्ययः सतिशिष्टत्वात्प्र
स्वरः शिष्यते॥ ।। सप्तमीमृचमाह॥ ।। उत्ते शतान्मघवन्नुच्च भूयस उत्सहस्राद्रिरिचे कृष्टिषु श्रवः॥ अमात्रं त्वा धिषणा तित्विषे मह्यधा वृत्राणि
जिघ्नसे पुरंदर॥ ।। हे मघवन् धनवन्निंद्र कृष्टिषु मनुष्येषु त्वया दीयमानं श्रवोन्नं कीर्तितत शतात् शतसंख्याकाद्धनादुद्रिरिचे उद्रिक्तमधिकं
भवति भूयसो बहुशः शतसंख्याकादपि किं च बहुतराधनात उद्रिरिचे अधिकं भवति। किंच हुनात सहस्रात्सहस्रसंख्याकादस्मादपि उद्रिरिचेत
याद्दत्तं तदन्नमक्षय्यमित्यर्थः। अपि च अमात्रं मात्रया इयत्तया रहितं परिगणितुमशक्यं सर्वैर्गुणैरधिकं त्वां महि महती धिषणा अस्मदीया
स्तुतिलक्षणा वा कृतिर्विषयं धीण्यातिल संबंधिनां गुणानां प्रकाशयति हे पुरंदर शत्रूणां पुरां दारयितरिंद्र अध अनंतरं वृत्राणि अवरकान् शत्रू
न् जिघ्नसे हंसि विनाशयसि। रिरिचे रिचिर् विरेचने कर्मणि लिट्। तितिषे पालिषदी मेत जिघ्नसे हंतेर्लटि व्यत्ययेनात्मनेपदं। छंदसि उदात्तस्वरा
मः। बहुलं छंदसीति शपः श्लुः गमहनेत्यादिनोपधालोपः हनि च हो घ्नादिर्वचनादिबहुलं छंदसीत्यभ्यासस्येत्वं पुरंदर पूः सर्वयोर्दारि सहोरि
ति खच् वचनि हस्व इति हस्वत्वं। वाचंयम पुरंदरौ चेति निपातनात्सम्॥ ।। अष्टमीमृचमाह॥ ।। त्रिविष्टिधातु प्रतिमानमोजसस्तिस्रो भूमी
र्नृपते त्रीणि रोचना॥ अतीदं विश्वं भुवनं ववक्षिथाशत्रुरिंद्र जनुषा सनादसि॥ ।। हे नृपते नृणां पालयितरिंद्र त्वं ओजसः सर्वेषां प्राणिनां
बलस्य प्रतिमानं प्रतिनिधिरसि किंभूतं प्रतिमानं त्रिविष्टिधातु धातुशब्दो त्रभागवचनः यथा त्रिधातु पंचधातु वा फलं करोतीति यथा
त्रिविष्टिः त्रिगुणिता रज्जुर्धीयते असौ एवमिंद्रोपि दृढतर इत्यर्थः। किंच त्वं तिस्रो भूमीः त्रील्लोकान् त्रीणि रोचनानि त्रीणि तेजांसि इत्यास्यं अंतरिक्षे
वैद्युतरूपं अग्निं पृथिव्यामाहवनीयादिरूपेण वर्तमानं पार्थिवमग्निं एवं त्रीन् लोकान् त्रीणि तेजांसि च अतिवक्षिथ। अतिशयेन वो
ढुमिच्छसि अपि च इदं विश्वं सर्वं भुवनं भूतजातं च अतिवोढुमिच्छसि सर्वस्य जगतः पालनेन त्वमेव सर्वेषां निर्वाहको भवसीत्यर्थः। यस्मा
त् हे इंद्र त्वं सनात् चिरकालादारभ्य जनुषा जन्मना जन्मप्रभृति अशत्रुः सपत्नरहितोसि। त्रिविष्टिधातु त्रिधा त्रिप्रकारेण वृत्या प्रवेशनेनावि
धीयते क्रियते इति त्रिविष्टिधातु त्रिगुणितरज्जुः विशेर्भावे क्तिन् धाञ्मितनिगमिमसीत्यादिना कर्मणि तुन्प्रत्ययः कृदुत्तरपदप्रकृतिस्व
रत्वं। अत्र इव शब्दः गम्यते इंद्राल्लक्ष्यते तद्गतिप्रतिमानं वर्तते यथा माणवकमग्निं ब्रूयात् तिस्र शसि त्रिचतुरोः स्त्रियामिति तिसृ
आदेशो विभाषा अचिरऋत इति रेफादेशः शसि नयणो हलपूर्वादिति विभक्तेरुदात्तत्वं। ववक्षिथ वह प्रापणे इत्यस्मात् इच्छामनिदव कृतबलानिस
न्यत इति वा भावः। छांदसत्वादेअमंत्र इति निषेधात् आमप्रत्ययाभावः तनुपाजने रसि॥ ।। नवमीमृचमाह॥ ।। त्वां देवेषु प्रथमं हवाम १८०
हे त्वं बभूथ पृतनासु सासहिः॥ सेमं नः कारुमुपमन्युमुद्भिदमिंद्रः कृणोतु प्रसवे रथं पुरः॥ ।। हे इंद्र देवेषु प्रथमं श्रेष्ठं त्वां हवामहे यागार्थमा

ह्वयामहे। तथा त्वं पृतनासु संग्रामेषु सासहिर्बभूथ शत्रूणामभिभविता असि॥ उत्तरार्धः परोक्षकृतः स इंद्रो नोस्माकं कारुं स्तोतारं कर्तारं मुपमन्युं उ
पमंतारं सर्वज्ञं उद्भिदं शत्रूणामुद्भेत्तारं इमं मे गुणविशिष्टं पुत्रं कृणोतु करोतु अपि च प्रसवे युद्धे अस्मदीयं पुरस्थं पुरः अन्येभ्यो रथेभ्यः
पुरतो वर्तमानं करोतु। यद्वा कारुं भूमित्यादिनि रथविशेषणनिकारं युद्धस्य कर्तारं उपमन्युं उपगतेन मन्युना क्रोधेन युक्तं उद्भिदं मार्गे च स्थितानां च
श्मादीनां उद्भेत्तारं अतिशयेन भक्तारं बभूत् थ। बभूथात्ततंथ वव्भेति वर्थ इति निगमे इति निपातनादिड्भावः। सः इमं सोचि लोपे चेत्पाद
पूरणमिति सुलोपः। प्रसवे प्रसुः प्राणिप्रसवे ऋदोरप्। थाथादिनोत्तरपदांतोदात्तत्वम्॥ ।। दशमीमृचमाह॥ ।। त्वं जिगेथ न धना रुरोधिथा
र्भेष्वाजा मघवन्महत्सु च॥ त्वामुग्रमवसे सं शिशीमस्यथा न इंद्र हवनेषु चोदय॥ ।। हे इंद्र त्वं जिगेथ शत्रून् जयसि। तथा च नाशत्रुभ्यो पहृता
नि धनानि न रुरोधिथ नावरणात्सि स्तोतृभ्यः प्रयच्छसीत्यर्थः। हे मघवन् धनवन्निंद्र अर्भेषु अल्पेषु आजा आजिषु संग्रामेषु महत्सु च प्रौढेषु
च अवसे अस्माकं रक्षणार्थं उग्रं उद्गूर्णमधिकबलं त्वां संशिशीमसि स्तोत्रैस्तीक्ष्णीकुर्मः अथानंतरं हे इंद्र त्वं न अस्मान् हवनेषु युद्धार्थमाह्वानेषु सत्सु आ
गत्य नोस्मान् चोदय संग्रामेषु प्रेरय जयं प्रापयेत्यर्थः। जिगेथ जितेर्लट्यात् लिटि च द्विनियमात् इडभावः सन्लिटोर्जेरिति अभ्यासाद्
ति षेधः संलिटोर्जेरित्यभ्यासादुत्तरस्य जकारस्य कुत्वं। रुरोधिथ क्रादिनियमानिट्। अजा सुपां सुलुगिति सप्तम्या बहुवचनस्य डादेशः॥
शिशीमसि शो तनूकरणे बहुलं छंदसीति विकरणस्य श्लुः आदेच उपदेशे इत्यात्वं। द्विर्वचने बहुलं छंदसीति अभ्यासस्येत्वं। ई हल्यघोरितीकारा
देशः॥ ।। एकादशीमृचमाह॥ ।। विश्वाहेंद्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजं॥ तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥ (?) व्याख्याते यत्रो द्विस्यावेतिव
र्गो इंद्रः सर्वेष्वहःसु अस्माकं पक्षपातेन वक्ता भवतु वयं। अकुटिलगतयः संतः इंद्रेण दत्तमन्नं लभामहे। यदस्माभिः प्रार्थितमस्मदीयं तन्
मित्रादयः पूजितं कुर्वंतु॥ ।। इति प्रथमस्य सप्तमे पंचदशो वर्गः॥ ।। तत इत्यष्टर्चं दशमं सूक्तं कुत्सस्यार्षमैंद्रं त्रैष्टुभं तथा चानुक्रांतं तत्त इति
त्रीयच्छं दामानि चकृते इंद्रे सूक्तं निविधानं विधानं विश्वजित इति खंडे सूत्रितं। तत्र इंद्रीयमिति निविकल्प्यामिति॥ ।। तत्र प्रथमामृचमाह॥ ।।
तत्त इंद्रियं परमं पराचैरधारयंत कवयः पुरेदं॥ ...क्रांतदर्शिनः स्तोतारः पराचैः पराचीनं पराङ्मुखं यद्वा पराचैः परांचने परागमने युक्तं यद्वा अभिमु
खिमेव अधारयंत धृतवंतः अपि वास्येंद्रस्य अन्ये दैकं इदमन्यास्यं ज्योतिः क्षमा क्षमायां भूमौ वर्तते अन्यद्देकं सर्यास्यं दिवि द्युलोके इत
दिदं लभ्यविधामिंद्रस्य ज्योतिः संपद्यते परस्परं संयुज्यते भात्राबाद्दीममग्निना संयुक्तो भवति। अग्निं वा आदित्यः सायं प्रविशति तस्मादग्नि
र्दूरान्नक्तं ददृशे इति श्रुतेः। अहरहिलग्निः सूर्येण संगच्छते उद्यंतं वावादित्यमग्निरनुसमारोहति। तस्मात् धूम एवाग्नेर्दिवा ददृशे इति श्रुतेः। अ
नयोः परस्परं संगमने दृष्टांतः समनेव केतुः समशब्दः संग्रामवाचीय था समने संग्रामे युध्यमानयोरुभयोः केतुर्ध्वजो लक्ष्यत्वात् ध्वजांत
रेण संयुज्यते तद्वत्। इंद्रियं इंद्रस्य लिंगं वा इंद्रियमिंद्रलिंगमिति घच् प्रत्ययांतो निपात्यते॥ पराचैः अव्ययमेतत् उच्चैर्नीचैरिति यथा
स्वरसाहपराचैः पराचनेगतिक्षमासुपांसुलुगिति सप्तम्या लुक् उ मोमलोपः सांहितिक श्लोदृ सुः समानाद्वयमष्टम अचेतको अन्येभ्या
पिदृश्यत इति युक् सुपांसुलुगिति सप्तम्या आकारः उचनाविभक्तेर्लोपः। पूर्वपदप्रकृतिस्वरत्वे नेति समासः॥ ।। द्वितीयामृचमाह॥ ।।
स धारयत्पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज॥ अहन्नहिमभिनद्रौहिणं व्यहन्व्यंसं मघवा शचीभिः॥ ।। स इंद्रः पृथिवीमस्म

375
1924

र्यादिना भूमिं धारयत् च धृतवान् पीडारहितेन स्थितामकारोदित्यर्थः॥ तदनंतरं पप्रथत् च तां भूमिं विस्तीर्णामकरोत् अपि च वज्रेण युधेन हंत
भा०प्र० व्यान् वृत्रादीन् हत्वा अपः अंतरिक्षस्थान्युदकानि निः ससर्ज मेघान्निर्गमयामास॥ एतदेव स्पष्टीक्रियते। अहिमंतरिक्षे वर्तमानं मेघं अहन् वज्रेण वर्ष
णार्थं मताडयत् रौहिणं रौहिणनामकं कंचिदसुरं तं च व्यभिनत् व्यदारयत् अपि च मघवा धनवानिंद्रः शचीभिः आत्मीयैर्युद्धकर्मभिः व्यं
१०१ सं विगतांसं भुजं व्यंसं असुरं अहन् अवधीत् पप्रथत् पृथुं करोति प्रथयति तत्करोतीति णिच् णाविष्ठवत् प्रातिपदिकस्य कार्यं भवतीति वचनात्
ऋतो हलादेर्लघोरिति ऋकारस्य रत्वं टेरिति टिलोपः चङस्य स्थानिवद्भावात्। दीर्घाभावः प्रथयतेर्लुङि चङि णिलोपः द्विर्वचनं अभ्यासस्येत्वाभावः
तिच उः पूर्वस्यादात्त्वं॥ न णिलोपः स्थानिवत्त्वं न पादांतेत्यादिना अचः परविधिं प्रति तन्निषेधात् पूर्वपदस्याभ्यासानुनासिक्य स्थानिघातः
भावः॥ ॥तृतीयामृचमाह॥ ॥स जातूभर्मा श्रद्दधान ओजः पुरो विभिंदन्नचरद्वि दासीः॥ विद्वान्वज्रिन्दस्यवे हेतिमस्यार्यं सहो वर्धया
द्युम्नमिंद्र॥ ॥जातूभर्मा जातु इत्यव्ययं निपातमाचक्षते॥ भर्मा युद्धं अजातिरूपमायुद्धं तस्य स तथोक्तः॥ यद्वा जातानां प्रजानां भर्ता ओजः
ओजसा बलेन निष्पाद्यं कार्यं दधानः आदरातिशयेन कामयमानः एवंभूतः स इंद्रः दासीः दासस्य संबंधीनि पुरः पुराणि विभिंदन् विना
शयन् व्यचरत् विविधमगच्छत्। हे वज्रिन् वज्रवन्निंद्र विद्वान् जानन् त्वं अस्य स्तोतुर्दस्यवे उपक्षयकारिणे शत्रवे हेतिमायुधं
विसृजेति शेषः अपि च हे इंद्र आर्यं सहः आर्याः विद्वांसः स्तोतारः तदीयं बलं वर्धय अतिप्रवृद्धं कुरु तथा द्युम्नं तदीयं यशश्च प्रवर्ध
य॥ जातूभर्मा जनी प्रादुर्भावे अन्येष्वपि दृश्यत इति डः ... सर्वेषां धियव्यभिचरार्थत्वात् बलादपि डप्रत्ययः॥ जातस्य भर्तीति
जातुः तुर्बिहं सार्थः ... विपराल्लोप इति बलोपः॥ भ्रियत इति भर्म अन्येभ्योऽपि दृश्यंत इति मनिन् जातूभर्म यस्य छंदसीरेफलोपः॥
बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं वर्णव्यात्यया आकारस्य ऊकारः॥ चतुर्थीमृचमाह॥ ॥तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघ
वा नाम बिभ्रत्॥ उपप्रयन्दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे॥ ॥नामशत्रूणां नामकं तदिंद्रस्य बलं ऋत्विजस्तवंतः स्तुव
ते यजमानाय कीर्तेन्यं कीर्तनीयं स्तुत्यं नामकं तत् बलं बिभ्रत् धारयन् मघवा धनवानिंद्रः मानुषा मनुष्याणां संबंधीनि इमा इमानि
दृश्यमानानि युगानि अहोरात्रसंबंधीनि ... निर्वर्तितवान् सूर्यात्मना निष्पादयतीति शेषः किं पुनः तन्नाम दस्युहत्याय द
स्यूनां शत्रूणां हननाय उपप्रयन् गुहसमीपात् निर्गच्छन् वज्री वज्रवान् सूनुः शत्रूणां प्रेरयिता इंद्रः प्रद्रवति बलनामशत्रूणां ना
मकं श्रवसे ... अन्नाय यशसे दधे धृतवान् ऊचुषे ... अभ्यकात्सीं वाचि ब्रुवो वचिः लिटः क्वसुः वचिस्वपि यजादीनां संप्रसारणं च
तुर्थ्येकवचने भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं शासिवसिघसीनां चेति षत्वं क्वसुप्रत्ययाद्युदात्तत्वं॥ कीर्तेन्यकृतसंज्ञाबन्धेत्वर्थ
तवै केन्येत्वन्प्रत्ययः॥ मघवा मघवाञ्छंदसीति वनिपा वर्तीमतोर्वा भ्यायां निपातितः उभृञ् धारणपोषणयोः ज्ञानरिजुहोत्यादिभ्यः
श्लुः भृञामित्इत्यभ्यासस्येत्वं नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ ॥पंचमीमृचमाह॥ १०१
तदस्येदं पश्यता भूरि पुष्टं श्रदिंद्रस्य धत्तन वीर्याय॥ स गा अविंदत्सो अविंददश्वान्स ओषधीः सो अपः स वनानि॥ ॥हे ऋत्विग्य
जमानलक्षणा जनाः अस्येंद्रस्य तदिदं वीर्यं पुष्टं प्रवृद्धं अत एव भूरि विस्तीर्णं पश्यत आलोकयत तस्मै वीर्याय युष्माकं धनं बहुमानं

कुरुत किं पुनस्तद्वीर्यमिति चेत् उच्यते स इंद्रः पणिभिरपहृता गाः येन वीर्येणाविंदत् तथा तैरपहृतान् अश्वान् स इंद्रो येनाविंदत् अपि च स 377
इंद्रः ओषधीः ओषध्युपलक्षितान् सर्वान् भूमिं येन वीर्येणालभत। तथा रश्मेर्निरुद्धाः आपः उदकानि स इंद्रो येनालभत। तथा भूतानि व 1924
ननीयानि संभजनीयानि स इंद्रो येन वीर्येण प्राप्नोत्। धत्तन तप्तनप्तनथनाश्चेति तस्य तनादेशः अविंदन् विद्लृ लाभे शो मुचादीनामिति नु
म्॥ ॥इति प्रथमस्य सप्तमे षोडशो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमं॥ य आदृत्या परि
पंथीव शूरोऽयज्वनो विभजन्नेति वेदः॥ ॥भूरिकर्मणे बहुविधकर्मणे वृषभाय श्रेष्ठाय सत्यशुष्माय सुनवाम सोमं। कर्मणा युक्ताय वृषभा
य वृषभवत्सर्वश्रेष्ठाय वृष्णे सेचनसमर्थाय सत्यशुष्माय अवितथबलाय इंद्राय तदर्थं सोमं सुनवाम सोमाभिषवं कुर्मः तस्य वृषभ
स्य शौर्योपेताय इंद्र आदृत्य धनविषयमादरं कृत्वा अयज्वनो अयजमानस्य वेदो धनं विभजन् तस्माद्यजमानादिभ्यो कुर्वन् अपहर
न् एति यजमानेभ्यस्तु उन्नतं ददातु गच्छति। तत्र दृष्टांतः। परिपंथीव यथा मार्गरोधकश्चोरो गच्छतां पांथपुरुषधनं बलात्कारेणापहृत्य ग
च्छति तद्वत् आदृत्य दृङ् आदरे समासेन अपूर्वोक्तोऽप्यपत्यस्थानिवद्भावेन कृत्वसहित स्वस्यापि पिति कृतीति तुक्॥ परिपंथीव छंदसीप
रिपंथिपरिपरिणौ पर्यवस्थातरीति इनिप्रत्ययः सोऽनिपात्यते॥ ॥सप्तमीमृचमाह॥ ॥तदिंद्र प्रेव वीर्यं चकर्थ यत्ससंतं वज्रेणाबोध
योऽहिं॥ अनु त्वा पत्नीर्हृषितं वयश्च विश्वे देवासो अमदन्ननु त्वा॥ ॥हे इंद्र तद्वीर्यं वीरकर्म प्रेव चकर्थ प्रख्यातमिवाकरोः किं पुनः तद्वीर्यं स
संतं स्वपंतं मन्यमानमहिं त्वं वज्रेण कुलिशेन यद्येन वीर्येणावबोधयः प्रबुध्य स न मया सह युद्धं करोतीति इति जागरितवानसि इषितं
तादृशस्य च बहुस्य हननेन प्राप्तहर्षं त्वा अनु पश्चात् पत्नीर्देवपत्न्यः अमदन् हर्षं प्राप्ताः अपि च वयः अगमनशीला मरुतः पितृभ्यश्च वि
श्वेदेवासः अन्ये च सर्वे देवाः त्वां अनु पश्चादमदन् अमादन् ससंत षस स्वप्ने अदादित्वाच्छपो लुक् पत्नीः वा छंदसीति पूर्वसवर्णदी
र्घत्वं॥ अमदन् मदी हर्षे व्यत्ययेन शप्॥ ॥अष्टमीमृचमाह॥ ॥शुष्णं पिप्रुं कुयवं वृत्रमिंद्र यदावधीर्वि पुरः शंबरस्य॥ तन्नो हे इंद्र त्वं
शुष्णादींश्चतुरोऽसुरान् यदावधीः हतवानसि तदानीं शंबरस्यासुरस्य पुरः पुराणि विदारितवानसि असुराणां मुख्येषु एतेषु
अन्यान्यपि असुरपुराणि विदीर्णान्यासन्नित्यर्थः॥ यदनेन सूक्तेन प्रार्थितं अस्मदीयं तन्मित्रादयो ममहंतां पूजितं कुर्वंतु शुष्णं शुषणं
। अंतर्भावितण्यर्थात् शुष शोषणे शुषिरसिभ्यः कित्येति नप्रत्ययः नित्त्वान्नुदात्तत्वं। पिप्रुं पाल्रु पूरणयोः पृ इत्यस्मात् औणादि
कः कुप्रत्ययः। इत्यभ्यस्त तस्य सार्वधातुके सति अपत्तौ होत्यादित्वात् श्लुः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं॥ कुयवं यस्य कुत्सितं यवं
श्वनं कुत्सितं यवनं यस्य निबद्धुर्बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ शंबरस्य शम यतीति शंबरः आयुधदाम्बर्वनन्तत्वात् तालव्यैर्भ्यो प्रत्ययः
॥ ॥इति प्रथमस्य सप्तमे सप्तदशो वर्गः॥ ॥७॥ योनिष्ट इति नवर्चं एकादशं सूक्तं कुत्सस्यार्षं त्रैष्टुभमैंद्रं योनिष्टे इत्यनुक्रांतं सूक्तविनियो
गो लैंगिकः॥ ॥प्रथमामृचमाह॥ ॥योनिष्ट इंद्र निषदे अकारि तमा नि षीद स्वानो नार्वा॥ विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्र
पित्वे॥ हे इंद्र योनिः ते स्थानं स्थानं तव निषदनाय उपवेशनाय अकारि कृतं वास्माभिः प्रकल्पितमभूत्। तं योनिं आ निषीद आगत्य प्रा
प्तवानसि अभिगमने दृष्टांतः स्वानो नार्वा अभिवर्धयंश्वाश्वयाअश्वः स्वनः हेषाशब्दं कुर्वन् स्वकीयं स्थानं शीघ्रमागच्छति

भा॰ अ॰ नइन। निरुक्तावयः अश्वबंधनार्थान् एनान्विमुच्य रथाद्विश्लिष्य तथा अश्वानरथे योजितांश्च तुरगान् वसावपि मुच्य अत्र निरुक्तं। अवसायाश्वानि
तिस्यतिरुपसर्गान्निमोचने इति कीदृशान् प्रपित्वे सायंकाले प्राप्ते। प्रपित्वे प्राप्ते निकिंम्यरतियास्कः दोषा रात्रौ। वस्तोरहनि च वदीयसः आ सातिशयेन
१९१ वोढॄन्। निषदं इन्द्र सदः संपदादिलक्षणो भावे क्विप्। स्थानं स्यमु स्वन ध्वन शब्दे नवकुन्वनात् कृतं घनं कर्मान्वितदर्शितोदात्तत्वं वयः वयतिरर्थेन सदसंण
गच्छंत इति विग्रहेन स्वयं उच्यते। वीगत्यादिषु औणादिकः इप्रत्ययः दिलोपश्च द्वितीयार्थे प्रथमा। अवसाम अवोइन कर्मणि। आदेङ्गुणलात् समासे
नञ्पूर्वो वाल्यपवादेन्द्राः वहीयसः वह प्रापणे। कृत्तं तादृशो दृशग्रन्यानुकं द्वसीतिसेयेन तुरिष्मय स्थिति वलोपश्चकर्तव्य इदलक्ष्वनदलोपानामसिद्धता
तद्वाश्विन स्योत्वस्याप्यभावे तल्लोपनयक्रियते॥ द्वितीयामृचमाह॥ ॥ ओ त्ये नर इन्द्रमूतये गुर्नू चित्तान्त्सद्यो अध्वनो जगम्यात्। देवासो मन्युं दा
सस्य श्चम्नन्ते न आ वक्षन्त्सुविताय वर्णं। त्ये ते नरो यत्तास्ते नेतारो यजमानाः अंतये रक्षणाय इंद्रं आ उ इत्येतत् निपातद्वयसमुदाय आकारार्थः। आगुः
आगच्छंति सर्व इंद्र आगतांस्तान् नु चित्क्षिप्रं मघस्तदा मीमेव अध्वनानुष्ठानमार्गान् जगम्यात् गमयतु प्रापयतु देवासः दासस्य उपक्षपयितुरसुरस्य
मन्युं क्रोधं श्चमन्न भक्षयंतु हिंसंत्वित्यर्थः। अपि च ते देवाः नोस्माकं सुविताय सुष्ठु प्राप्तव्याय यज्ञाय वर्णं निवारकं इमं इंद्रं अवक्षन् आवहंतु। जग
म्यात् गमेर्यङ्लुगंतात् णिजर्थान्तर्भावितण्यर्थाल्लिङि बहुलं छंदसीति शपः श्लुः श्चम्नन् शुच अदने लोडिव्यत्ययेनाभ्रकप्रत्ययः छांदसः। घट्टाश्च लामिः प्र
त्ययांतरस्य इमार्थं द्रष्टव्यं वक्षन् वह प्रापणे लेटि बहुलं छंदसीति शपः कत्वणत्वानि सुपूर्वादितेः कर्मणि निष्ठा। तन्वादित्वादुत्तरपदमान्तोदात्तत्वं
नरपदांततत्वं। वर्णः वृञ् वरणे अस्मादंतर्भावितण्यर्थान्कृवृजसिद्धपण्यनिलिखिभ्यो नित् इति नप्रत्ययः। नित्त्वादाद्युदात्तत्वं॥ ॥ तृतीयामृचमाह
॥ ॥ अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन्। क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः॥ केतवेदाः अयमसुरः इदन् उदके अंतर्वर्तमानः
सन् फेनं फेनयुक्तमुदकं आत्मना स्वयमेवाव भरते। अपहरति क्षीरेण रणज्ञीलेनतेनापहृतेनोदकेन कुयवस्यासुरस्य योषे भार्ये स्नात
स्नानं कुर्वाते ताहृशोत्क्रियोशिफानाम नदी तस्याः प्रवणे निम्ने प्रदेशे हुते अगाधप्रदेशे इदतेन पुरस्यातां भवेतां इंद्र त्वं परेषां धनमप
हृत्य अन्ये दुःखगाहे उदकस्य मध्ये वर्तमानं कुयवं सकुटुंबं अवधीरित्यर्थः। त्मनात्मन्श्रोशातापादे आत्मन उत्याकारलोपः। भरते हृग्रहोर्भः छंदसि
भंइति भत्वं केतवेदाः विदत्रानेकर्माणिघञ् बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं उदनपदन्नित्यादिना उदकशब्दस्योदनादेशः सर्वे सुपांसुलुगितिसप्तम्या
लुक्॥ ॥ चतुर्थीमृचमाह॥ ॥ युयोप नाभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः। अञ्जसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरन्ते
॥ ॥ उपरस्य उदकमध्ये सुप्तस्य वलिनस्य आयोः परेशामुपद्रवार्थमितस्ततो गच्छतः कुयवस्यासुरस्य नाभिः सन्नह्यमावसनस्थानं
युयोप गूढमासीत् यथान्यैर्न दृश्यते सोसुरस्तथा अकारीदित्यर्थः। अपि च पूर्वाभिः पूरयित्रीभिः आत्मना पहताभिरद्भिः प्रतिरते सो
सुरः प्रवर्धते स च शूरः शौर्योपेतो राष्टि राजते च आत्मिनेशौर्येण कोक प्रख्यातो भवतीत्यर्थः। तदुमं मसुरं अंजसी अंजस्या पेताकु
लिशी कुलं इयतत्त्वं तीवीरपत्नी वीरस्य पालयित्री एतत्संज्ञिकास्तिस्रो नद्यः पयः पयसा तत्संबंधिना सारभूतेनोदकेन हिन्वानाः प्रीणयंत्यः १९१
उदभिः आत्मीयेरुदकैः भरंते धारयंति युयोप युप विमोहने। नाभिः नहो भश्चेत्ति इञ् प्रत्ययः तष्टि राजतेश्चेमो वहुलं छंदसीति शपो लुक् अंजसा
दित्वे सुलोपाय वः सुपां सुलुगिति तृतीयायालुक्। हिन्वानाः हिवि प्रीणनार्थः इदित्वान्नुम् अस्मात्ताच्छीलिकश्चानश्। आगमानुशासन

स्यनित्यत्वान्नुम्भावः चामशंकलसार्वधातुकत्वाभावात्स्वराभावे चित्स्वरएवशिष्यते॥ ॥पंचमीमृचमाह॥ ॥ प्रति यत्स्या नीथादर्शि दस्योरोको 379/1924
नाच्छा सदनं जानती गात्। अध स्मा नो मघवञ्चर्कृतादिन्मा नो मघेव निष्षपी परा दाः॥ ॥ यद्यदा नीथा नयनहेतुभूता स्या सापदवी प्रत्यदृश्यत
नाच्छा सदनं ज्ञानतीगात्। अध स्मा नो मघवं चर्कृतादिन्मा नो मघेव निष्षपी परा दाः ॥ यत् यदा नीथा नयनहेतुभूता सा पदवी प्रत्यदृश्यत दस्यु
भिःजानती गौः इत्कोननिवासस्थानां स्वकीयं गोसंघं यथा का तु स्थानाति तदृगामीपि अस्करस्य इह प्राप्य इत्यर्थः। अध स्म अथानंतरं मघवन्
धनवन् इंद्र चर्कृतात् पुनः पुनः करेताकारेण कृतात् उपद्रवान्नोस्माकं न क्षतिआघः इहिद्यचधारणे अस्मान् देवो नोस्मान् मा परा दाः मा परित्याक्षीः
अस्माभिर्जायतेन मार्गेण गत्वा अस्मदुपद्रवकारिणमसुरं जहीति तात्पर्यार्थः। तत्र व्यतिरेक दृष्टांतमभिधीयते मघेव निष्षपी यथा विनिर्गतप
सा विनिर्गतरेतो यो यथो शावारीदासीपतिः मघा इव यथा धनानि अरक्षन्परित्यजति तथा अस्मान्मापरित्याक्षीरित्यर्थः। अत्र निरुक्तं नि
ष्षपी स्त्रीकामो भवति विनिर्गतपसाः पसः सपतेः स्पृशतिकर्मणो मानो मघवन्निव निष्षपी परादाः स यथा धनानि विनाशयते मा नस्त्वं तथा
परादाः इति। नीथा णीञ् प्रापणे हनिकुषिनीरमिकाशिभ्यः क्थन् इति करणे क्थन् प्रत्ययः। गात् एतेर्लुङि इणो गा लुङि इति गादेशः गातिस्था इति सिचो लुक्। च
र्कृतं करोतेर्यङ्लुगंतात् भावे क्तः। चर्कृत्यत करोतेर्यङ्लुगंतान्निष्ठेति क्त प्रत्ययः। मघा इव बहुलं छंदसीति डालोपः। निष्षपी षप समवाये सपतिः सम
वैति योन्यसंगच्छते इति सपः पचाद्यच् निर्गतां नित्योद्वतः सपः शेपो यस्य स्त्रीव्यसनी निष्षपः वर्णव्यापत्त्या ईकारः। दाः दाणो दाने लुङि गाति स्थेति
सिचो लुक्। नमाङ्योगे इत्यडभावः॥ ॥इति प्रथमस्य सप्तमे षोडशो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥ स त्वं न इन्द्र सूर्ये सो अप्स्वनागास्त्व आ भज जीवशंसे। मांत
रामुजा मा रिरिषो नः श्रद्धितं ते महत इंद्रियाय॥ ॥ हे इंद्र स त्वं नोस्मान् सूर्ये सर्वस्य प्रेरके आदित्ये आ भज अभाजय आभिमुख्येन भक्तान्
कुरु तथा स त्वं अप्सु उदकेषु अनागास्त्वे अपापत्वाय रहितोसमानाभाजय अपि च जीवशंसे जीवैः प्राणिभिः शंसनीये कमयितव्ये अनागस्त्वे अपापत्वाय राहित्ये अ
स्मानाभाजय। अपि च नोस्माकं अंतरां गर्भरूपेण तद्वर्तमानां भुजं पालयित्रीं प्रजां आ समंतात् मा रिरिषः मा हिंसीः ते तव महते प्रभूताय इं
द्रियाय बलाय श्रद्धितं। अस्माभिः श्रद्धानं कृतं तदीयं बलं बहुमानपूर्वकं स्तौपर इत्यर्थः। तस्मात् तादृशबलयुक्तस्त्वं मा रिरिष इति पूर्वेण संबंधः
। अनागास्त्वे न विद्यते आगः पापं यस्य सोनागाः तस्य भव स्तत्त्वं। छांदसउपधादीर्घः। जीवशंसे शंसु स्तुतौ कर्मणि घञ् थाथादिनोत्तरपदां
तोदात्तत्वं। भुजं भुनक्ति पालयतीति भुक् भुजज्ञाभिषक्रिरिषः रिषहिंसायां स्वार्थे ण्यंतात् इत्माल्लुङि णिलोपे उपधाह्रस्वत्वादीनि छांदसं पदकालीन
भ्या सस्य नरुत्वं श्रद्धितं श्रद्धस्यतु यां हिलादिति निंतरइति पूर्वपदप्रकृतिस्वरत्वं॥ ॥सप्तमीमृचमाह॥ ॥ अधा मन्ये श्रत्ते अस्मा अधायि
वृषा चोदस्व महते धनाय। मा नो अकृते पुरुहूत योनाविंद्र क्षुध्यद्भ्यो वय आसुतिं दाः॥ ॥ हे इंद्र अधानंतरं मन्ये त्वां मन्ये साहाय्यामि तवास्मै
बलाय श्रद्धापि अस्माभिः श्रद्धा तथा त्वदीयबलविषयमादरातिशयेन स्तोत्रं कृत्यं तमित्यर्थः। वृषाकामानां वर्षिता स त्वं महते प्रौढाय
धनाय चोदस्व अस्मान्प्रेरय हे पुरुहूत पुरुभिर्यजमानैराहूत इंद्र अकृते अनिष्पादितधनस्त्रये यो नौ गृहनामैतत् गृहे अस्मान्मा धाः निधेहि
धनधान्यपूर्णगृहेस्मांश्च समयेत्यर्थः। अपि च हे इंद्र क्षुध्यद्भ्योपि स्तोतृभ्यो वयो अन्नं आसुतिं पेयं क्षीरादिकं च यः दाहि अधा श्रिद्धातेः कर्मणि
दि ... ॥ ॥अष्टमीमृचमाह॥ ॥ मा नो वधीरिंद्र मा परा दाः

र्थः। अपि च मा परा दाः मा परित्याक्षीः। परादानं परित्यागः। अस्माकं तां प्रजां स ह्यमह्णेत्यर्थः। अपि च नोऽस्माकं प्रिया प्रियाणि भोजनानि उ
भा॰प्र॰ पभोग्यानि धनानि मा प्र मोषीः। मा मुषाण। अस्मान् यथा धनानि न स्पृशन्ति तथा कुर्वित्यर्थः। तथा हे मघवन् धनवन् इन्द्र सर्वं कार्यमन्तं क्रमेणा
१९२ स्माकं आण्डा अण्डसंबन्धीनि गर्भरूपेणावस्थितान्यपत्यानि मा भेत् मा भिन्धि। गर्भरूपेणावस्थितान् अस्मत्पुत्रान् मा क्षेत्स्य इत्यर्थः। तथा नोऽस्माकं सहजा
नु पात्राणि आधानसहायान्यन्नानि पात्राणि पात्राणि स्रुचादीनि मा निर्भेत् मा भिन्धि। वधीः हन्तेर्माङि लुङि वा लिंवधादेशः। सर्वादेशः। सिच अतो लो
प इत्यकारलोपः। तस्य स्थानिवद्भावादतो हलादेर्लघोरिति वृद्ध्यभावः। इट ईटीति सिचो लोपः। मोषीः मुष स्तेये लुङि सिचि इडागमः। नेटीति वृद्धिप्रति
षेधः। भेत् भिदिर् विदारणे लुङि सिपि बहुलं छन्दसीति विकरणस्य लुक्। लघूपधगुणः। हल्ङ्याब्भ्य इति सिलोपः। माध्यंदिने सवने वा ऊर्वीत्येषा। आतुः प्र
स्थितयाज्या सूत्रितं च अर्वाङेहि सोमकामं त्वाहुरित्युपयंसा मरुत्वतीयेऽर्वाङिति॥ ॥तामेतां सप्तमीं नवमीमृचमाह॥ ॥अर्वाङेहि सोमकामं त्वाहुरयं सु
तस्तस्य पिबा मदाय। उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः॥ ॥हे इन्द्र त्वं अर्वाङ् अस्मदभिमुखः सन् एहि आगच्छ। किं कारणमिति
चेत् यस्मात् त्वां सोमविषयाभिमुखं सोमं पिब एतदेवस्यार्थिष्यते उरुव्यचाः उरुव्यचाः उरु विस्तीर्णं व्यचो व्यापनं येन तादृशो महान् सन् जठ
रे आत्मीय उदरे आ वृषस्व सोमम् अस्मिन् आसमन्तात् सिञ्चेत्यर्थः। एवंभूतस्त्वं हूयमानः स्तुतिभिराहूयमानः सन् पितेव पुत्राणां वाक्यानि शृणोति
तथा नोऽस्माकं वाक्यानि शृणु। सोमकामं सोमविषयः कामोऽभिलाषो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। आहुः ब्रुवः पञ्चानामादित आहो ब्रुव इति
नरसादेशो ब्रुवः आहादेशश्च। तस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। मदाय मद हर्षे। मदोऽनुपसर्ग इति भावे अप्
उरुव्यचाः व्यच व्याजीकरणे। औणादिकोऽसिप्रत्ययः। व्यचः कुटादित्वमनसीति वचनात् ङित्वाभावेन संप्रसारणाभावः। परादिश्छन्दसि ब
हुलमित्युत्तरपदाद्युदात्तत्वं। यद्वा उरुव्यचा इत्यात्प्रातीतिकरुव्यधाः। ऋदुत्तरपदप्रकृतिस्वरत्वं। वृषस्व वृष सेचने व्यत्ययेनात्मनेपदं द्वाप्रत्ययौ।
शृणुहि श्रुवः शृ चेति हिः॥ ॥इति प्रथमस्य सप्तमे एकोनविंशो वर्गः॥ ॥चन्द्रमा इत्येकोनविंशत्यृचं सप्तदशं सूक्तं आप्त्यपुत्रस्य त्रितस्य कुत्सस्य
वार्षं तथा चोभयोः। कूपपातनं आम्नायते। त्रितः कूपे वहितः। कोटिनिबालप्रधिराहूत इति च त्रितस्याप्त्यपुत्रत्वं तैत्तिरीयाः समामनन्ति। अनय
कतो जायत स द्वितीयमभ्यपातयत्। ततो द्वितो जायत। स तृतीयमभ्यपातयत्। ततस्त्रितो जायत। यदद्भ्यो जायन्त तदाप्त्यानं। आप्त्यत्वमिति
तमेतमाप्त्यं त्रितस्तदेदायइतितकृतापिडनेनवयमधीमहे इति। अन्त्यात्रिष्टुप्सं सं मा तपन्तीत्येषा यवमध्या महाबृहती। आप्रो द्वादश
क्षरौ पादौ द्वादशाक्षरस्तृतीयः ततो द्वाविंशत्यक्षरौ सा यवमध्या महाबृहती। चत्वारोऽष्टकाः आगतश्च महाबृहती लक्षणं। मध्ये च यवमध्ये
त्यकलक्षणोपेतत्वात्। शिष्टाः पङ्क्तयः। विश्वे देवा देवता। यथा चानुक्रान्तं चन्द्रमा एकोनाप्त्यस्त्रितो वा वैश्वदेवं हि याकं सं त्वा त्रिष्टुब्यवमध्या म
हाबृहती मध्येति। ॥इति तल्लिङ्गाभिधानात् इदमादीनि त्रीणि सूक्तानि वैश्वदेवानि विनियोगः। अत्र शाट्यायनिन इति हासमाचक्षते। एकतो
द्वितस्त्रितइति पुरा त्रयऋषयो बभूवुः। ते कदाचिन्मरुभूमावरण्ये वर्तमानाः पिपासया संतप्यमानाः संतः एकं कूपमविन्दन् तत्र त्रितः १९२
स्वयमेकोऽदकपानाय कूपं प्राविशत्। स स्वयं पीत्वा इतरयोश्च कूपादुदकमुद्धृत्य प्रादात्। तौ तदुदकं पीत्वा त्रितं कूपे पातयित्वा तदीयं धनं स
र्वमपहृत्य कूपं चरथचक्रेण धारयमाणौ जग्मतुः। ततः कूपपतितः स त्रितः कूपादुत्तरणं अगमत् कुर्वन् सर्वे देवा मामुद्धरन्त्विति मनसा सस्मा

381
1924

रतत्तेषां स्वपक्षमिदं सूक्तं ददर्शनक्तं रात्रौ कूपस्यान्तश्चन्द्रमसोरश्मीन् पश्यन् परिदेवते॥ ॥तत्र प्रथमामृचमाह॥ ॥चन्द्रमा अप्स्वन्तरा
सुपर्णो धावते दिवि। न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी॥ अस्य अन्तरिक्षस्य उदकमये मण्डले अन्तर्मध्ये वर्तमानः
सुपर्णः शोभनपतनः यद्वा सुपर्ण इति रश्मिनाम सुषुम्नाख्येन सूर्यरश्मिना युक्तश्चन्द्रमा दिवि द्युलोके आ धावते आ ऊर्ध्व यात्रायाम् के नैव प्रका
रेण धावतेऽशीघ्रं गच्छति तादृशस्य चन्द्रमसः संबन्धिनो हि हिरण्मयेन मयः सर्वं विद्यतिमदीयानीन्द्रियाणि कूपेनावृतत्वात् न लभन्ते अत इदमनु
चितं तस्मात्कूपान्मामुत्तारयतेत्यर्थः। अपि च हे रोदसी द्यावापृथिव्यौ मे मदीयं कूपपतनरूपं यदिदं दुःखं तत्र च गच्छतं। मदीयं स्तोत्रं च
श्रुत्वा मदीयं दुःखं ज्ञात्वा अस्मान् कूपान्मामुत्तारयतमित्यर्थः। चन्द्रमाः चन्द्रमाह्लादनं सर्वस्य जगतो निर्मिमीत इति चन्द्रमोमास्त्वोदिहि
सुन्दसी भावादिषु पाठात् पूर्वपदप्रकृतिस्वरत्वं। धावते स्नगतौ। पाघ्रेत्यादिना वेगितायां धावादेशः। व्यत्ययेनात्मनेपदं विन्दन्ति विद
तेर्लेटि अडागमः इत्याद्युपरि। पा झाहितान्ति ङिति निघाताभावः। अस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठीउ
दिदमिति विभक्तेरुदात्तत्वम्॥ ॥द्वितीयामृचमाह॥ ॥अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम्। तुञ्जाते वृष्ण्यं पयः परिदाय रसं दु
हे वित्तं मे॥ अर्थिनो धनमपेक्षमाणाः पुरुषा अर्थमिद्वै अपेक्षितधनं प्राप्नुवन्त्येव नाहं प्राप्नोमि। उ इत्येतत् पदपूरणं। अपि च जाया
भार्या जायाभार्या पतिं स्वपतिं आ युवते आभिमुख्येन प्राप्नोति मदीया तु मद्विरहाद्दूरतासीत्॥ अपि च संयुक्तौ तौ जायापती वृष्ण्यं वीर्यरूपं
पयः उदकं तुञ्जाते प्रजननाय अन्योन्यसंघटनेन प्रेरयतः। तदनन्तरं रसं पुरुषस्य सारभूतं वीर्यं परिदाय गर्भाशये आदाय। गर्भरूपेण धृत्वा दु
हे दुग्धे पुत्ररूपेण जनयति मम तु पुत्रोऽपि नोत्पद्यते। अत इदं मदीयं दुःखं हे द्यावापृथिव्यौ जानीतं तु उ अ इति क्राकल्यस्य मतेन प्रग
ह्यत्वात् प्लुतप्रगृह्या अचीति प्रकृतिभावः। युवते यु मिश्रणे व्यत्ययेनात्मनेपदं शपो लुक्। प्रामव्यत्ययेन उः। तुञ्जाते तुजि पिजि हिंसाबलदा
ननिकेतनेषु पुरादित्वान्नुममव्यत्ययेन श्नम् श्नान्नलोपः। दुह दुह प्रपूरणे लोपस्त आत्मनेपदेष्विति तलोपः॥ ॥तृतीयामृचमाह
॥ ॥मो षु देवा अदः स्वरव पादि दिवस्परि। मा सोम्यस्य शंभुवः शूने भूम कदा चन वित्तं मे॥ हे देवाः स्वः स्वर्गे वर्तमानं अदः तदस्मदी
यं पितृपितामहादि आत्मकं संतानं दिवस्परि दिवः स्वर्गाद्यथा परिवर्तमानं मो षु मैवाव पादि अपपन्नं विपन्नं प्रभ्रष्टं मा भूत्। पुत्रेणाल्लोकान् ज
यति नापुत्रस्य लोकोऽस्तीति श्रुतेः। अतो वंशो सोम्यस्य सोमपानार्हस्य तित्र गतस्य शंभुवः सुखस्य भावयितुः पुत्रस्य शूने अपग
मने कदा चन कदाचिदपि मा भूम युष्मत्प्रसादात् मम पुत्रो जायतां अतो मामस्मात् दुःखादुत्तारयतेत्यर्थः। हे द्यावापृथिव्यौ युवा
वमदीयं विज्ञापनं जानीतं। मो मा उ इति निपातद्वयस्य समुदायो मेत्यस्यार्थे। रूढ इत्येतदेव धारणं पुत्र इति पदं पादादिपदात्परत्वात् निपर
तेपदवद् इति विसर्जनीयस्य सत्वं। सोम्यस्य सोममर्हतीति य इति प्रत्ययः। शंभुवः भवतेरन्तर्भावितण्यर्थत्वात् क्विप्। शूने उनिघ्गति
वृद्धि भावे निष्ठा वादितो निष्ठायामितीडप्रतिषेधः। वाच्छिः स्वपीत्यादिना संप्रसारणं ओदितश्चेति निष्ठानत्वं व्यत्ययेनाद्युदात्तत्वं। व्या
दिवादि द्रष्टव्यः॥ ॥चतुर्थीमृचमाह॥ ॥यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति। क्व ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो वित्तं मे॥ ॥य
ज्ञं यज्ञनीयं अवमं सर्वेषां देवानामादिभूतं अग्निमुखं प्रथमो देवतानामिति श्रुतेः। अग्निर्वै देवानामवम इति ब्राह्मणाच्च तमग्निं प

ज्ञामि यज्ञमायाएषु तत्र देवानां दूतः सोऽग्निः विधोच निविविध्य कथयतु किं पुनस्तत्प्रत्यतद इति तदुच्यते हे अग्ने त्वदीयं पूर्वं कालीनं रक्षं भद्रं स्तो
भा॰ त्र॰ त्रभ्यः कृतं धेयः क्व गतं कुत्र इदानीं वर्ततं नूतनो नूतनतरस्तताम्यः कः पुरुषः तद् इदं विभर्ति धारयति त्वं वर्तयतम म इदं त्रीदानीं इदानीमपि नाभ
विध्यत अततस्त्वगतामिति कथयतु वाच परिभाषणे कृत्य इगमः वच इमिति त्य यन धातोरगाभ गमः क्रिकिमादीनिति समस्यार्थे अत यामी
१०३ ति विमः क्राहस्तः तिस्रः रितामिति स्वरितत्वं परेणसह एकत्वकृ इति प्रकृतिभावः॥ ॥पंचमीमृचमाह॥ ॥अमी ये देवाः स्थन त्रिष्वा रोचने दिवः
॥कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे॰॥ हे देवाः त्रिषु पृथिव्यादिषु स्थानेषु ये अमी यूयं स्थन वर्तमाना भवत यानि स्थानानि दिवा द्योतमानस्य सूर्य
स्य आरोचने दीप्तिविषये वर्तन्ते सूर्यप्रकाश्येषु स्थानेषु इत्यर्थः। ते यूयं वो युष्माकं संबंधि सत्यं विषयमृतं सत्यं क्व कुत्रास्मिन्देशे वर्तते अनृतं ऋतविप
ययमसत्यं च क्व कुत्र गतं अपि च प्रत्ना चिरकालीना वो युष्माकं संबंधिनी आहुतिः मया पूर्वमनुष्ठितो यागः क्व कुत्रास्ति अभिद्रुह इदं कूपे पतितः दुःखानुभवा
न पूर्वमनुष्ठितो यागस्सम्यक् युष्माभिर्न प्राप्तो ऽस्तीत्यनुमिमे अन्यत्पूर्ववत् स्थन तमन तनप तनथनाश्चेति तादेशः स्य थनादेशः क्व कु इत्यस्य वर्णव्यापत्त्या क
द्वादेशः॥ ॥इति प्रथमस्य सप्तमे विंशो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणं। कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वि
त्तं मे॰॥ ॥ हे देवाः वो युष्माकं संबंधि ऋतस्य सत्यस्य अभिमतस्य फलप्रापणस्य धर्णसि धारणं क्व कुत्र गतं वरुणस्य निवारकस्य दे
वस्य चक्षणं अनुग्रहदृष्ट्या दर्शनं क्व कुत्र गतं महो महतो महानुभावस्य अर्यम्णः अरीणां नियंतुः एतत्संज्ञकस्य देवस्य संबंधिना पथा शोभनो
मार्गेण एषु देवेषु प्रापणं क्व गतं एतत्सर्वं युष्मासु वर्तते न कुत्रापि गतं अतो वयं दूढ्यः दुर्धियः पापबुद्धीन् अस्मद्हिंसकान् परानशक
न अतिक्रमेण अतिक्रमेम अतिरेमेति कूपात् अस्मात्कूपपातलक्षणात् दुःखात् उत्तीर्णा भवेम हे द्यावापृथिवी मदीयामिदं जानीतं धर्णसि ध्रियतेऽस्मिन्निति धारणं
साननिघर्णसि धर्णसीत्यादिना असिच्प्रत्ययांतो निपात्यते अर्यम्णः षष्ठ्येकवचने अल्लोपोऽनः इत्याकारलोपः उदात्तनिवृत्तिस्वरेण विभक्तेर
दात्तत्वं महः महतो छदलोपो छांदसः दूढ्यः दुःशब्दात् ध्यायतेः क्विप् उभयत्रापि सावेकाच इति विभक्तेरुदात्तत्वं। दूढ्यः पूर्वा दाशेति तत्र पातादु
रकत्वोत्तरपदादेशुत्वं उदात्तस्वरितयोर्यण इति स्वरितत्वं॥ ॥सप्तमीमृचमाह॥ ॥अहं सो अस्मि यः पुरा सुते वदामि कानि चित्। तं मा
व्यंत्याध्यो वृको न तृष्णजं मृगं वित्तं मे॰॥ ॥ यः पुरा पूर्वस्मिन्काले सुते अभिषुते सोमे अभिषुते कानि चित् कतिपयानि स्तोत्राणि वा
ह वदामि उक्तवानस्मि सोऽहं अस्मि अन्यः कश्चिन्न तस्मात् किमर्थं मां परित्यजथ तं तादृशं मां आध्यः आधि आभिपुत्राद्युत्पन्नाः मानसपीडाः
व्यंति भक्षयंति तत्र दृष्टांतः तृष्णजं जातं तृष्णापिपासं तं उदकं प्रतिगच्छंतं मृगं वृको न यथा आरण्यश्वा मध्ये मार्गे भक्षयति तद्वत् व्यंति वीगत्यादि
षु अदादित्वात् लुक् अन्तादेशौ छंदसि बहुलमुपसंख्यानमिति बहुलवचनात् यण् आध्यः आधीयते मनसि आप्यत इत्याधिः उपसर्गे घोः किः
आतोलोप इति वेत्याकारलोपः ग्रासादिषु छंदसि वा वचनमिति जसि चेति गुणस्य विकल्पनात् अभावे यणादेशः तृष्णजं तृषेर्हिंसायां त्रसित
यो नलितिनिजिङ् परस्मैपदमन्यत्रेऽन्य अपि दृश्यत इति दृशिग्रहणस्य सर्वोपाधि व्यभिचारार्थत्वात् केवलादपि नजिङ् प्रत्ययः तस्माज्ञा १०३
तायस्वत्याः पोः संज्ञा छंदसो बहुलमिति कृत्यमृतमम॥ ॥अष्टमीमृचमाह॥ ॥सं मा तपंत्यभितः सपत्नीरिव पर्शवः। मूषो न शिश्ना व्यदंति मा
ध्यः स्तोतारं ते शतक्रतो वित्तं मे॰॥ ॥ एषा हे इंद्र पर्शवः पार्श्वास्थीनि अत्र सामर्थ्यात् पर्शुस्थानीयाः कूपभित्तयः मां मां अभितः सर्वतः

संतपंति सम्यक्पीडयंति तत्र दृष्टांतः सपत्नीरिव समानएकः पतिर्यासां ताः सपत्न्यो यथा एकं पतिं अभितः पीडयंति परस्परं पीडयंते हे शतक्र 383
तो बहुविधकर्मन् बहुविधप्रज्ञ वा इंद्र ते तव स्तोतारं मा मां आध्यः असंप्रधमाने यागज्ञानादिभिरसाहिताः मानस्य पीडाः व्यदंति विविधं भक्ष 1924
यंति तत्र दृष्टांतः मूषो न यथा मूषिकाः शिश्नानि कुविंदेन वायिताभिः अंतरसेन आलिप्तानि सूत्राणि भक्षयंति यद्वा शिश्नशब्देन प्रजननमेवोच्यते।
तत्रोपचारात् पुच्छे वर्तते यथा स्वकीयानि पुच्छानि घृतादिलिप्तानि भांडे प्रक्षिप्य। ऊर्ध्वमुत्कृष्य दंतैर्लिहंतीत्यर्थः। एवं मां आध्यो भक्षयंति
वितनुते हे इंद्र तव स्तोतुर्न्याय्यं न स्मात्कूपान्मामुत्तारय अन्यत्समानं अत्र निरुक्तं। संतपंति मा अभितः सपत्न्य इव इमाः पर्शवः कूपपर्शवो मूषिका
इव स्नातानि सूत्राणि व्यदंति स्वांगाभिधानं वा स्यात् शिश्नानि व्यदंतीति सपत्नीनित्यं सपत्न्यादिष्विति पतिशब्दस्य नकारो देशः ङीप् वा
दसीपूर्वसवर्णदीर्घत्वं मूषः मूषस्तेये किपि छांदसो दीर्घः तथा च यास्कः॥ मूषो मूषिका इत्यर्थो मूषिकाः पुनर्मुष्णाते मूषो ऽप्यतस्मादेवेति
। शिश्नाः पुरुषस्य अर्थकविधानामिति कः स्त्रास्त्रा गत्यावधि हनियुध्यमामिति कः वर्णव्यापत्त्या सकारस्य शकारः कृत्यादीनां के इति भवत इति
वचनत्वमिति अदि भक्षणे बहुलं छंदसीत्यभ्यासस्येत्वं॥ ॥नवमीमृचमाह॥ ॥अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता। त्रितस्तद्वेदाप्त्यः स जा
मित्वाय रेभति वित्तं मे॰॥ ये अमी द्युलोके वर्तमानाः सप्तसंख्याका रश्मयः सूर्यकिरणाः संति तत्र तेषु सूर्यरश्मिषु अध्यात्मं सप्तप्राणरूपे
ण वर्तमानेषु मे मदीया नाभिः आतता संबंधा कृपिरात्मानमेव परोक्षतया निर्दिशति। त्रितः तीर्णतमः शिरस्कः ताः तान् आप्त्यः अपां पुत्रः क
षिः पूर्वोक्तं तत्तां वेद जानाति नान्यः सज्ञानन्सृषिः जामित्वाय कूपान्निर्गत्य वाय रेभति तान्स्तौति अन्यत्समानं आततान् तनोतेः कर्मनि
ष्ठा अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं जामित्वाय जनेर्विच् इति कमीजगतिगच्छतीति जामि भी
णादिक उणप्रत्ययः तस्य भावस्त्वं रेभति रेभशब्दे भौवादिकः॥ ॥दशमीमृचमाह॥ ॥अमी ये पंचोक्षणो मध्ये तस्थुर्महो दिवः। देवत्रा नु प्र
वाच्यं सध्रीचीना नि वावृतुर्वित्तं मे॰॥ ॥उक्षणः सेक्तारः कामाभिवर्षकाः पंच तेन इंद्रस्तद्वरुणस्तदग्निस्तदर्यमा भर्गश्चैते प्रतिपादिताः पंच सं
ख्याका देवताः यद्वा अग्निर्वायुः सूर्यश्चंद्रमा विद्युदित्येवं पंचसंख्याकाः तथा शाट्यायनकं एतान्येव पंच ज्योतींषि यान्येषु लोकेषु दीप्यंते अ
ग्निः पृथिव्यां वायुरंतरिक्षे आदित्यो दिवि चंद्रमा नक्षत्रे विद्युदप्स्विति। नक्षत्रे नक्षत्रलोके अप्सु मेघस्थोदकेषु तैत्तिरीये ऽप्येवमाम्नातं। अग्निः
पृथिव्यां वायुरंतरिक्षे सूर्यो दिवि चंद्रमा दिक्षु नक्षत्राणि स्वर्लोके इति। ये अमी पंचसंख्याका देवाः महो दिवो महतो विस्तीर्णस्य द्युलोकस्य म
ध्ये तस्थुः तिष्ठंति। आसन्त देवत्रा देवेषु नु क्षिप्रं प्रवाच्यं प्रशंसनीयं देवानां योग्यं मदीयं स्तोत्रं प्रति सध्रीचीनाः सहांचंतो युगपद्गच्छ
तस्ते देवाः मदीयं परिचरणं स्वीकुर्वंतीति तदनंतरं निववृतुः तत्मात् संतान् निवर्तते च अन्यत्समानं उक्षणः वा सपूर्वस्य निगमे इत्युपधा
दीर्घाभावः देवत्रा देवमनुष्येत्यादिना सप्तम्यर्थे त्राप्रत्ययः प्रवाच्यं वाचयतेः स्त्रो यत् अचिति यत् णेरनिटीति णिलोपः यतो नाव इत्याद्युदात्त
त्वे कृदुत्तरपदप्रकृतिस्वरः सध्रीचीनाः सहांचंतीति सध्र्यंचः त एव सध्रीचीनाः सहस्य पूर्वोदितेषु तेक्रलिगित्यादिना क्विप् अनिदितामिति
नलोपः सहस्य सध्रिरिति सध्र्यादेशः विभाषांचेरदिक्स्त्रियामिति स्वार्थिकः ख प्रत्ययः ववृतुः वृतु वर्तने छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्
व्यत्ययेन परस्मैपदं। अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं॥ ॥इति प्रथमस्य सप्तमे एकविंशो वर्गः॥ ॥एकादशीमृ॰

भा॰प्र॰ सुपर्णा एत आसते मध्य आरोधने दिवः ॥ ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे० ॥ ॥ सुपर्णाः रश्मिनामैतत् शोभनपतनाः एते सूर्यर
श्मयः ॥ आरोधने सर्वस्यावरकत्वात् मेघैर्लोकान् आरुन्धत्याः मध्ये आसते वर्तन्ते ते सूर्यरश्मयः पथो मार्गात् वृकं मरण्यश्वानं सेधन्ति निषेधन्ति
१९५ निवारयन्ति कीदृशं यह्वतीर्महतीरपः ॥ तरन्तं अतिक्रामन्तं कूपपतनात् पूर्वं त्रितं दृष्ट्वा एतं भक्षयितुं कश्चिदरण्यश्वा महतीं नदीं ती
र्णः रात्रौ गामस्तत्र सूर्यरश्मीन् दृष्ट्वा भयप्रयुक्तेन भवतीति निवर्तते अतो रश्मयो वृकं निषेधन्तीत्युच्यते । यास्कपक्षे तु अपकृत्य तारक
नामयह्वतीर्व्याम सहृन्तारिक्षं पश्य्थः यद्वोर्थादन्तराश्यात्मरूध्यते आध्रियते नेन्नेत्यारोधनं करणल्युट् सेधन्ति षु धुगत्यां अपनेकलोपि निपु
र्वार्थे द्रष्टव्यः ॥ पथः पञ्चम्येकवचने भस्य टेर्लोप इति टिलोपः ॥ उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं ॥ यास्कपक्षे तु तत्र यार्थे व्यत्ययेन
न पञ्चमी यह्वतीः ॥ यह्व इति महन्नाम अस्मादाचारार्थे सर्वप्रातिपदिकेभ्य इति क्विप् ततो लटः शतृ उगितश्चेति ङीप् आम्गमान्वागस
नस्यानित्यत्वान्नुमभावः शतुरनुम इति नद्या उदात्तत्वं व्यत्ययेन वर्तते ॥ ॥ द्वादशीमृचमाह ॥ ॥ नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनं ॥ ऋतं
मर्षन्ति सिन्धवः सत्यं तातान सूर्यो वित्तं मे० ॥ ॥ हे देवासो देवाः नव्यं नवतरं उक्थ्यं प्रशस्यं स्तुत्यर्हं सुप्रवाचनं ॥ ऋतं मुदकं वा यज्ञं
वा एवंभूतं तदुत्कृष्टं बलं हितं युष्माकं निहितं अतो युष्मदीयेन बलेन सिन्धवः स्यन्दनशीला नद्यः ऋतमुदकं अर्षन्ति आलस्यराहित्ये
न सर्वदा प्रेरयन्ति अर्शोण्यास मन्व च हतात्यर्थः ॥ तथा सूर्यः सत्यं सर्वदा विद्यमानं स्वकीयं तेजः ततान आतनोति विस्तारयति । अन्यत्समा
नं । सुप्रवाचनं वचपरिस्थापणे अन्येभ्योपि दृश्यत इति खल्प्रत्ययो वचेश्च । अर्षन्ति अर्तेर्लेटि सिब्बहुलं लेटीति सिप् गुणः ॥ ततान अन्येषा
मपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं ॥ ॥ त्रयोदशीमृचमाह ॥ ॥ अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यं ॥ स नः सत्तो मनुष्वदा देवा
न्यक्षि विदुष्टरो वित्तं मे० ॥ ॥ हे अग्ने तेभव उक्थ्यं प्रशस्यं तत् श्रुतिषु प्रसिद्धं त्वं नोऽस्माकं यज्ञे सत्तो निषण्णः सन् देवान् यक्षि यजसि अ
शास्त्रे मर्यादायां यथा यज्ञ हविर्भिः पूजयसि तत्र दृष्टान्तः ॥ मनुष्वत् यथा मनुनाम राजर्षेः यज्ञे तद्वत् । अन्यत्सर्वं तत् । आप्यं आप्तव्यं असा
र्यत्ता न इति प्रत्ययः ॥ ब्राह्मणादित्वात् ष्यञ् सत्तः निषण्णः इति निपातः अनिष्टानत्वाभावः छान्दसो निष्ठायां लोपो द्रष्टव्यः ॥ मनुष्वत्
मनो रौणादिक उसि प्रत्ययः तत्र तस्येवेति षष्ठ्यर्थे वतिः । न भोगिरामनुषां नकारस्य संख्यानमिति भत्वेन तिपद्त्वाभावात् सत्वाभ
भावः ॥ यक्षि बहुलं छन्दसीति शपो लुक् व्रश्चादिना षत्वं कुत्वं षत्वं । विदुष्टरः विद्वत्छब्दात्तरपि अयस्मयादित्वेन भत्वात् वसोः संप्रसार
णमिति संप्रसारणं शासिवसिघसीनां चेति षत्वं ॥ ॥ चतुर्दशीमृचमाह ॥ ॥ सत्तो होता मनुष्वदा देवां अच्छा विदुष्टरः ॥ अग्निर्ह
व्या सुषूदति देवो देवेषु मेधिरो वित्तं मे० ॥ ॥ मनुष्वत् मनोरिवास्माकं यज्ञे सत्तो निषण्णः होता देवानामाह्वाता विदुष्टरो विद्वत्तरः दे
वो दानादिगुणयुक्तः देवेषु सर्वेष्विन्द्रियादिषु मध्ये मेधिरो मेधावी एवंभूतोऽग्निः तान् देवान् अच्छाभिमुख्येन हव्या हव्यानि स्मद्दी
यानि सुषूदति मर्यादायामाकार । शास्त्रमर्यादया यथाशास्त्रं सूदति प्रेरयतु ॥ अन्यत्समानं । सूद इति स्मृतिक्षरणे लेटि यडाग
मः बहुलं छन्दसीति शपः श्लुः ॥ मेधिरः मेधा रथाभ्यामिरन्निरचौ वक्तव्याविति मत्वर्थीय इरन् ॥ ॥ पञ्चदशीमृचमाह ॥ ॥ ब्रह्मा २०५
कृणोति वरुणो गातुविदं तमीमहे । व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे० ॥ ॥ यो वरुणः अनिष्टनिवारयिता देवः ब्रह्मपं
रिवृढं तद्रक्षणरूपं कर्म कृणोति करोति तं तादृशं गातुविदं गातो मार्गस्य दुःखाभिचारकस्य लम्भयितारं वरुणं ईमहे अभिमत

385
1924

प्रार्थयामहे इमहे इति याञ्चाकर्मा । तस्मै वरुणाय अयमस्मदीयः स्तोता हृदा हृदयेन मतिं मननीयां स्तुतिं व्यूर्णोति विवृणोति प्रकाशयति उच्चार
यतीत्यर्थः ॥ सोयं नव्यः स्तुत्यो वरुणः अस्माकमृतं जायतां सत्यभूतोस्तु । ब्रह्म अन्येषामपि दृश्यत इति सांहितिको दीर्घः ॥ गातुविदं विदुलाभे
अन्तर्भावितण्यर्थात् क्विप् । इमहे ईङ् गतौ व्यत्ययेन बहुलं छन्दसीति विकरणस्य लुक् । हृदा पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः ॥ ॥ इति प्रथमस्य सप्त
मे द्वाविंशो वर्गः ॥ ॥ षोडशीमृचमाह ॥ ॥ असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः ॥ न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोद
सी ॥ ॥ पन्थाः सततगामी यद्वा ब्रह्मलोकं गच्छतामुपासकानां मार्गभूतः सूर्यद्वारेण ते विरजाः प्रयान्तीति श्रुतेः एवंभूतोऽसावादित्यो दिवि द्यु
मान् इत्यर्थः ॥ हे देवाः सोऽयमादित्यो युष्माभिरपि न अतिक्रमे अतिक्रमितुं न शक्यः युष्मज्जीवनस्य तदायत्तत्वात् सतिदिति सूर्यः सततगत्यः का
लान् निष्पादयन्ते काले च यागाः क्रियन्ते । यागेषु च सत्सु भवतां जीवनं अतो युष्माभिरपि असौ नातिक्रमितव्यः ॥ एवं च सति हे मर्तासः पापकृतो मनु
ष्याः तं महानुभावं सूर्यं न पश्यथ यूयं न जानीथ एतच्च कूपपातयितारो निर्गतायां कृतघ्नतो प्रतिनिदितं अहमेव मन्त्र इष्टानां सम्यक् ज्ञानाद्विपापकृतो यु
यं न जानीथ इति यथानः पन्था गतौ पतेस्थ चेति इनि प्रत्ययः ॥ पथिमथ्यृभुक्षामात् इत्यात्वं इतोत्सर्वनामस्थाने इत्यात्वं सकारस्य लोपः ॥ पथिमथोः स
र्वनामस्थाने इत्याद्युदात्तत्वं प्रवाच्यं वचेर्ण्यत् ऋदुपधादिति भावे यत् यतोनाव इत्याद्युदात्तत्वं । अतिक्रमे क्रमु पादविक्षेपे कृत्यार्थे तवैकेनिति के
न प्रत्ययः नित्वादाद्युदात्तत्वं ॥ ॥ सप्तदशीमृचमाह ॥ ॥ त्रितः कूपेऽवहितो देवान् हवत ऊतये ॥ तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे० ॥ अव
हितः पातितस्त्रितः एतन्नामक ऋषिः तद्रक्षणाय देवान् हवते स्तुतिभिराकारयति तदेतत् त्रितस्याह्वानं बृहस्पतिः बृहतां देवानां रक्षकस्तत्त्वं श्रोतृदे
वतां द्रव्यानां शुश्राव श्रुतवान् किं कुर्वन् अंहूरणात् अंहसः पापरूपादस्मात् कूपपाताद्धेतोरुरु विस्तीर्णं शोभनं कृण्वन् । हवते ह्वयतेर्लटि
बहुलं छन्दसीति संप्रसारणं आद्गुणः वा छन्दसीति तयोर्दीर्घः ऋतिधृतित्यादिनाऽऽद्युदात्तत्वं । बृहस्पतिः तद्बृहतोः करपत्योरिति पारस्करादिषु
पाठात् । सुट्तलोपौ उभे वनस्पत्यादिषु युगपदिति पूर्वोत्तरपदयोर्युगपत् प्रकृतिस्वरत्वं । अंहूरणात् अहि गतौ उदित्वान्नुम् । खर्जिपिञ्जादिभ्यो द्
रदूलचाविति भावे ऊरच् प्रत्ययः ॥ दुःखप्राप्तिहेतुभावात् निरस्याः स्रीतिपामादिलक्षणो मत्वर्थीयो नः ॥ आद्यन्तृपूर्वो दीर्घत्वं वा रूपमुन्नेयं ॥ ॥ अष्टा
दशीमृचमाह ॥ ॥ अरुणो मा सकृद्वृकः पथा यन्तं ददर्श हि ॥ उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे० ॥ ॥ अरुणवर्णो लोहितवर्णः एकारण्यश्वा
सकृदेकवारं पथा यन्तं ददर्श हि । मार्गेण गच्छन्तं मां दृष्टवान् खलु ॥ हिः पादपूरणः ॥ निचाय्य दृष्ट्वा च मां हि दृष्टः सन् उज्जिहीते उद्गच्छति स्मात्तत्र
दृष्टान्तः तष्टेव पृष्ट्यामयी यथा तक्षणजनितपृष्ठरोगः कृच्छ्रः तष्टा च धकीः तदपनोदनाय ऊर्ध्वाभिमुख्यो भवति । तद्वत् हे द्यावापृथिवी मदीयं दुःख
वित्तं जानीतं । यद्वा षडविति विरुतां यातिषु श्वः इत्युच्यते अरुण अरोचनः कृत्स्नस्य जगतः प्रकाशकः मासकृत् मासार्धमासनिर्वर्तयन् संवत्सरादी
न् कुर्वन् । तिथिविभागस्तावत्स्य चन्द्रगत्याधीनत्वात् स चन्द्रमा आकाशमार्गे यन्तं गच्छन्तं नक्षत्रगणं ददर्श हि वृकश्च धारयो नक्षत्रगणं मे दर्शनकू
पपतितमित्यनादरो व्यज्यते । यदि मां पश्येत् उद्धरेत् कूपात् नि चाय नक्षत्रगणं दृष्ट्वा च उज्जिहीते येन क्षत्रेण संयुक्तस्तेन सह उद्गच्छति तस्मात् अभि
गच्छतीत्यर्थः ॥ अन्यत् पूर्ववत् अत्र मासकृदिति यास्कः ॥ एकं पदं मन्यते शाकल्यस्तु पदद्वयं । तस्मिन्पक्षे अयमर्थः ॥ दक्षप्रजापतेर्दुहितृभूताः
स्वभार्या आश्विन्याद्यास्तकारैः पुनः पुनर्ददर्श मासं कृद्वै वपश्यतीति सकृद्दृष्टवान् उज्जिहीते तारकाभिः सह ऊर्ध्वमेव गच्छति मां कूपादुत्तारयति अ

भा० २० न दुद्राम नुचितं हूं द्यावापृथिव्यो म दियमिदं रूपं नांतं जानितं अत्र निरुक्तं न्यक्षं दृमा भवति। वृद्दत प्रोति क्रोचाविदूतद्द्योति क्रोचानि क्रांत यो
१०५ ति क्रोचा अरण अरत्नो मासर्वनमासानां चार्धमासानां वक्ता भवति। चंद्रमा स्वः पथा यं तं दद्र्शनक्षत्रगणमभिव्रिहीति चायं यन्य
नायो श्यमाणे भवति। चंद्रमा स्व क्षवृंविरूप्र्गीति। सरुत यं व स्य सरूचे ति क्रियाभ्यावृतिगणनेन निपातितः। द्यवः वृं वरणे सदृपिभृउ
षि मृषिभ्यः क्विदितिकप्रत्ययः। जिहीते ओ हाङ् गतो जुहोत्यादित्वः भजामितित्याभ्यासस्य त्वं नि च याव प्रपद्ज्ञानिशामन योः अत्र दर्शनार्थः
धातुनामनेकार्थत्वात समासेनञ्पूर्वे कृत्यप एस्याम्पियिस्पृश स्पर्शने स्पृश्यते अनेन निरुष्टिः छांदसोवरणलोपः। एको आमयः एस्यामयः
मयः तद्धानस्थामयी॥ ॥एकादशीमृचमाह॥ ॥यनांगा पेण व यमिं द्रवंता भिष्याम रूजन सर्ववीराः तन्नो० घोः॥ ॥एना अनेन आंगूषे
ण अघोषेण यागेन स्तोत्रेण हेतुभूतेन इंद्रवंतः अनुग्राहकेनेंद्रेण युक्ताः सर्ववीराः सर्ववीरैः पुत्रपौत्रादिभिः श्वोपेताः संतो वयं वृजने
याम अभिष्याम शत्रु नाभिभवेम तदेतदस्मदीयं वचनं मित्रादयो मम हंतां पूजयंतो पालयंतित्यर्थः। उत द्यौरुदेवता समुच्चये अन्न याः
स्माः आंगूष स्तोम आघोषः अनेन स्तोमेन वयमिंद्रवंतमिति यना द्वितीयाद्येकस्तन इति। तृतीयायाइदमयना देशः। सपांसलुगिति विभ
क्तेर्डादेशः। चित्स्वरेणांतोदात्ततं आंगूषेण आघुवीन घुषेः कर्मणि घञ् आंजन कारस्य लोपाभावः छांदसः छोपश्याच्स्य गुण भावश्च प्रया
दरादित्वात तथा थाह्रिनो मरपदांतोदात्तत्वं स्यामा अस्तेः प्रार्थनायां लिङ् अजिलोपारलोप इत्यकारलोपः। उपसर्गप्रादुर्भ्यां इति मस्तियत्र परइ
तिषत्वं॥ ॥इति प्रथमस्य सप्तमे त्रयोविंशो वर्गः॥ ॥इंद्रं मित्रं सप्तत्रिष्टुभं तमिति अंत्या त्रिष्टुबंत परिभाषया जगत्यः विश्वेदेवा देवता कुत्स
निर्योगालिंगिकः॥ ॥तत्र प्रथमामृचमाह॥ ॥इंद्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे॥ रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो
अंहसो निष्पिपर्तन॥ ॥उत ये रक्षणाय मिंद्रादीन मारुतं शर्धो मरुतम् हरूपं बलं च हवामहे आह्वयाम हे वसवा निवासउतारः सुदानवः शोभ
मानाः विश्वस्मात् सर्वस्मात् अंहसः पापात् अस्मान् निष्पिपर्तन निर्गमय्य पालयत तत्र दृष्टांतः। रथं न दुर्गात् यथा शक्यान् निम्नोन्नतस्थानात् रथं योद्धारो यथा
रथं पालयंति तद्वत् पिपर्तन पृ पालनपूरणयोः जुहोत्यादित्वः पिपर्तनः आ ज्ञेयः पिति वदिता भावात गुणः अर्तिपिपर्त्योश्चेत्यभ्यासस्ये
त्वं॥ ॥द्वितीयामृचमाह॥ ॥त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्ये शंभुवः॥ रथं न दुर्गाद्वसवः०॥ ॥हे आदित्याः अदितेः पुत्रा देवाः
ते यूयं सर्वतातये सर्ववीरपुरुषे सर्वतातये विस्तारिताय यज्ञाय युष्मत्साहाय्यं कर्तुमित्यर्थः। आगत आगच्छत अपि च वृत्रतूर्ये पुसंयामना
मेतत संग्रामे शंभुवः सुखस्य भावयितारो भूत भवत। आगत गमेर्लोटि बहुलं छंदसीति शपो लुक्॥ ॥तृतीयामृचमाह॥ ॥अवंतु नः पि
तरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा॥ रथं न दुर्गा०॥ ॥नोस्मान् पितरः अग्निष्वात्तादयो वंतां रक्षंतु कीदृशाः सुप्रवाचनाः सुखेन प्रव
क्तुं स्तोतुं शक्या उत अपि च देवपुत्रे देवाः सर्वे पुत्रस्थानीया ययोस्ते ऋतावृधा ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारौ देवी दिव्यौ ताहशगुण
युक्ते द्यावापृथिव्यौ अस्मान् रक्षतं। अन्यतमानं देवी वा छंदसीति पूर्वसवर्णदीर्घत्वं ऋतावृधा ऋधु वृद्धौ अंतर्भावितण्यर्थात् क्विप् सुपांसुलुगिति १०६
विभक्तेराकारः॥ ॥चतुर्थीमृचमाह॥ ॥नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे॥ रथं न दुर्गा०॥ ॥नराशंसं नरैः शंस
नीयं वाजिनं अन्नवंतमग्निं वाजयन् उपचारयन् प्रज्वलयन् इहास्मिन् काले स्तोमीति शेषः। तथा क्षयद्वीरं अतिबलिनं यस्मिन् सर्व

वीराः क्षीयंते एवं भूतं पूषणं पोषकं देवं सुम्नैः सुखकरैः स्तोत्रैः हेतुभूतैरीमहे याचाम हे अभीष्टं प्रार्थयाम हे नराशंसं उभे वनस्पत्यादिषु इति 387/1924
युगपदुभयप्रकृतिस्वरत्वं नरशब्दोक्ष्णशंसे चिवत्तं आद्युदात्तः निपातनदीर्घः। शंसशब्दो घञंत आद्युदात्तः वाजयन। वज व्रज गतौ अ
स्मात् ण्यंत क्षयद्वीरं क्षि क्षये। लटः शतृ शपः आन्यत्वं येन शः तस्य छंदस्युभयथेत्यार्धधातुकत्वात् ङित्त्वाभावात् गुणावादेशौ। अदु
पदेशाल्लसार्वधातुदात्तत्वं विकरणस्वरः अतो गुण इति पररूपत्वे एकादेश उदात्तेनोदात्त इति एकादेश उदात्तः क्षयंतो वीरा यस्मिन् बहुव्रीहौ
पूर्वपदप्रकृतिस्वरत्वं॥ ॥पंचमीमृचमाह॥ ॥बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे॥ रथं न दुर्गा०॥ ॥बृहस्पते सद
मित् सदैव नोस्माकं सुगं सुखेन गमनीयं सुखं कुधि कुरु। अपि च तेन वस्य भूतं शं शमनीयानां रोगाणामुपशमनं योः पृथक्करणं तेषां च भया
नां यावनं पृथक्करणं मनुर्हितं मनुना अस्मत्पित्रा हितं प्रण्य वस्थापितं यदुक्तं मनुष्याणामनुकूलं एवं विधं शमनं यावनं च यत्ते तव तदीम हे याचा
महे। सुगं सुपूर्वात गम्यते स्मिन्निति सुगं सुदुरोरधिकरण इति गमेर्डः शं योरिति वेतत्पद द्वयं यास्केनैवं व्याख्यातं शमनं च रोगाणां यावनं च भ
यानामिति। मनुर्हितं मनेः रोणादिक उसिप्रत्ययः तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं॥ ॥षष्ठीमृचमाह॥ ॥इंद्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाढ ऋषिरह्वदूतये॥ रथं न०॥ ॥काट इति कूपनामैतस्मिन् निबाल्हः निपातितः कुत्स ऋषिः सू नवे रक्षणाय इंद्र म अह्वत
आह्वयति स्म कीदृशं वृत्रहणं शत्रूणां हंतारं शचीपतिं शचीति कर्मनाम सर्वेषां कर्मणां पालयितारं यद्वा शची देव्या भर्तारं। शची
पतिं वनस्पत्यादिषु पाठादुभयपदप्रकृतिस्वरत्वं। शची शच व्यक्तायां वाचि खरादिङीप् नल आद्युदात्तः निबाल्हः बाल्हः प्रयत्नेनीरूप सर्गप्रा
तयतनेन तयानि बायामनित्यमागमशासनमिति डभावः दल घत्वादीनि यद्वा क्षम्बस्वांतत्यादीभ्रशार्थे इभावो निपात्यत अत्र च भ्रश
त्वो पातपातनसामर्थ्याद् इर्तते। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। अह्वत लिपिसिचिह्वश्चेति लुङि च्लेरङ् आदेशः अतो लोप इति के या
कारलोपः॥ ॥सप्तमीमृचमाह॥ ॥देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन्॥ तन्नो० घोः॥ ॥देवी दानादिगुणयुक्ता
अदितिरखंडनीया अदीना वा देवमाता देवैर्दानादिगुणयुक्तैः स्वकीयैः पुत्रैः सह नोस्मान्निपातु नितरां रक्षतु देवो दीप्यमानस्त्राता
सर्वेषां रक्षकः अप्रयुच्छन् अप्रमाद्यन् अस्मद्रक्षणेनाग अरूकुः सन् त्रायतामस्मान्पालयतु यदनेनसक्तेनास्माभिः प्रार्थितं नोस्म
दीयं तन्मित्रादयः प्राप्ते देवता ममहंता पूजयंतु॥ त्रायतां त्रैङ् पालने भौवादिकः। अप्रयुच्छन् युच्छ युच्छ प्रमादे अस्मात् लटः श
तृ नञ् समासे व्ययपूर्वपदप्रकृतिस्वरत्वम्॥ ॥इति प्रथमस्य सप्तमे चतुर्विंशो वर्गः॥ ॥७॥ यज्ञो देवानामिति सप्तर्चं द्वितीयं सूक्तं कुत्स
स्यार्षं त्रिष्टुभं वैश्वदेवं यज्ञो देवानामित्यनुक्रांतं विनियोगो लैंगिकः॥ ॥तत्र प्रथमामृचमाह॥ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो
भवता मृळयंतः॥ आ वोर्वाची सुमतिर्ववृत्याद् अंहोश्चिद्या वरिवोवित्तरासत्॥ ॥अस्माभिः क्रियमाणो यज्ञो देवानामिंद्रादिदेवानां सुम्नं सुखं
प्रतिगच्छति प्राप्नोति। अपि चाहे आदित्यासः आदित्याः मृळयंतो अस्मान् सुखयंतो भवत तथा वो युष्माकं सुमतिः शोभना मतिः भक्तानुग्रह
परा बुद्धिः अर्वाची अस्मदभिमुखी अववृत्यात् आवर्ततां या मतिः अंहोश्चित् दरिद्रस्यापि पुरुषस्य वरिवोवित्तरा वरिव
ति धननाम अतिशयेन धनस्य लंभयित्री असत् भवेत् सेयं मतिरस्मान् रक्षितुं वर्तमानेत्यर्थः। भवत आमंत्रितं प्रथममि

धमानता अतिशयेन धनस्य लंभयित्री असत् भवेत्। वद्धिति आशिष्यास इति षाडा ऽऽद्यौ वर्तमानस्यामंत्रितस्याविद्यमानवत्त्वे अस्य पाद्यादित्वात् अ
ना-प- पवादाविति पर्युदासान्निघाताभावः। सत्यत्वं। सदुस्तृणसंने ण्यंतात् लुङि च्लेः चङ् स्यनिस्फभयथे णिश्रतुरार्धधातुकत्वेनादुपदेशात् सार्व
धातुकानुदात्तत्वाभावेन धातुस्वरः शिष्यते। यवृत्त्यात् अनुवर्तनं लङि यत्त्वान्यपरं समेपदं। बहुलं छंदसीति अपः श्लुः अजुः अशिष्यतो
१०६ इत्यान्तुमा। औणादिक उप्रत्ययः वरिवाविनरायित्रु लाभा अस्मा ईत भावितण्यर्थात् क्विप्। तत अतिशयेन किरत्वरप अंसत अस
भूवति ऽस्याडागमः॥ ॥द्वितीयामृचमाह॥ ॥आ नो देवा अवसा गमंतु अंगिरसां सामभिः सामाभिः स्तूयमानाः॥ इंद्र इंद्रियैर्मरुतो मरु
द्भिरादित्यैर्नो अदितिः शर्म यंसत॥ ॥देवा दानादिगुणयुक्ताः सर्वे देवाः अवसा रक्षणेन अस्मभ्यं दानव्येनाभं नो अस्मानन्नानम्
स्तोत्रेन उपगमनं उपगच्छंतु प्राप्नुवंतु कथंभूताः अंगिरसां एतत्संज्ञकानां महर्षीणां संबंधिभिः सामभिः प्रगीतैर्मंत्रैः स्तूयमानाः अ
पि चेंद्रः इंद्रियैः धननामैतत् स्वबंधुभिरस्मभ्यं दातव्यैर्धनैः सह अस्मानागच्छतु। तथा मरुतः सप्तगणरूपाः कानपेक्षा इत्यसंख्या
कादिदुः चैत्यव मातृ आदिनारादेवमाता आदितिः स्वकीयैः पुत्रैः सह नोस्मभ्यं शर्म सुखं यंसत प्रयच्छतु गमंतु गन्तिवु बहुलं छंदसीति
शपो लुक् छंदस्युभयथेति सार्वधातुकत्वेन ङित्वाभावादनुमनस्नेत्यादिना उपधालोपाभावः यंसत् यम उपरमे लङि अडागमः। सिव
बहुलं लेटीति सिप्॥ ॥तृतीयामृचमाह॥ ॥तन्न इंद्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात्। तन्नो मित्रो०॥ ॥यदस्माभिः प्रार्थ्य
मानमन्नं यस्ति चनइत्यन्ननाम तत्तादृशं चनो अन्नमस्मभ्यं इंद्रो धात दधातु नाददातु। एवं तद्वरुण इत्यादावपि योज्यं तदिमं दाक्षिभिः इ
नमस्मादीयमन्नं मित्रादयो ममहंतां पूजयंतु पालयंतु इत्यर्थः। चनः। चायृ पूजानिशामनयोः चायतेरस्न्हस्वश्चेत्यसुन् नुडागमश्च धा
तो ह्रस्वत्वं च बालिलोपः निपातनात् आद्युदात्तत्वं। धातृ धंदसि लुङ्लङ्लिट इति प्रार्थनायां लुङ् गातिस्थेति सिचो लुक्॥ ॥इति प्रथमः
स्य सप्तमे पंचविंशो वर्गः॥ ॥७॥ य इंद्राग्नी इति त्रयोदशर्चं तृतीयं सूक्तं कुत्सस्यार्षं त्रैष्टुभमैंद्राग्नं तथा चानुक्रांतं॥ ॥य इंद्रा
ग्नी सप्तोनैंद्राग्नमिति विनियोगो लैंगिकः॥ ॥तत्र प्रथमामृचमाह॥ ॥य इंद्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे
॥तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य॥ ॥हे इंद्राग्नी चित्रतमः अतिशयेन चायनीयः वां युवयोः संबंधी यो रथः
।विश्वानि भुवनानि भूतजातानि आभिमुख्येन पश्यति सवर्णमयत्वात् रत्नस्वचितत्वाच्च स्वप्रभाभिः प्रकाशयतीत्यर्थः।
तेन रथेनायात मस्माद्यज्ञमागच्छतं किं पर्यायेण नेत्याह सरथं समानमेकं रथं तस्थिवांसा युगपदेवाधितिष्ठंतौ युवामागच्छतं न पर्यायि
णेत्यर्थः। अथागमनानंतरं सुतस्याभिषुतं सामस्य सोमं स्यात् लक्षणं तदेकदेशं वा पिबतं। वां युष्मदस्मदोः षष्ठीचतुर्थीद्विती
यास्थयोर्वान्नावाविति वामादेशः सर्वानुदात्तत्वं च। चष्टे चक्षिङ् व्यक्तायां वाचि अत्र प्रकाशनार्थः। अदिप्रभृतिभ्यः शपः स्कोः संयोगाद्योरिति क
लोपः। तास्यनुदात्तेदिति लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः। सरथं समानस्थो सोस्य १०६
अस्ति सरथः समानस्य छंदसीति सभावः पराद्दिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। तस्थिवांसा गातिस्थेति निष्ठांतो लिटः क्वसुः
द्विर्वचनं शर्पूर्वाः खयः अभ्यासस्य चर्त्वं। वस्वेकाजाद्धसामिति इडागमः। अतो लोप इति च इत्याकारलोपः सुपां सुलुगित्याकारः। सोमस्य क्रियाग्रहणं

कर्तव्यमिति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी॥ ॥द्वितीयामृचमाह॥ ॥यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरं। तावाँ अयं पातवे सो
मो अस्त्वरमिंद्राग्नी मनसे युवभ्यां॥ विश्वं सर्वमिदं भुवनं जगत् यावत् इयत्परिमाणं भवति। कीदृशं उरुव्यचाः विस्तीर्णव्यापनं सर्वव्यापकमित्य 389
र्थः। तथा वरिमता वरिष्ठाणुरुत्वेन आत्मीयेन गौरवेण गरीयं गांभीर्योपेतं हे इंद्राग्नी पातवे सत्वाभ्यां पातुं सोमस्तावान् कृतावदश्वमाणो भवतु। 1924
तथा मनसे युवयोरंतःकरणाय अरं सोमः पर्याप्तो भवतु। उरुव्यचाः व्यचा व्याजीकरणे असुन् सर्वसने कृगादित्वम् मस्रीति वचनात् डित्वा
भावेन संप्रसारणाभावः। स्वमोर्नपुंसकादिति सोर्लुक् प्राप्ते सुपां सुलुगिति व्यत्ययेन डादेशः। वरिमता पृथ्वादिभ्य इमनिच् प्रियोरुवादिना उरुशब्दस्य वरादेशः।
भावद्रव्यर्थ इमनिच्। यत्किंचित्यादिना उरुशब्दस्य वरादेशः पुनरपि भाव प्रत्ययोत्पत्तिः छांदसी। सुपां सुलुगिति तृतीयायालुक् याडाल् तीया
यास्थ्योर्दसलङागमः। तावत् तत्परिमाणस्य यत्तदेतेभ्यः परिमाणे वतुप्। आसर्वनाम्न इत्यात्वं पातवे तुमर्थे सेसेनिति तवेन् प्रत्ययः
नित्यादिराद्युदात्तत्वं। अरं वालमलङ्कृत्य मंगुलीनावारोलमापयन् इति वक्तव्यमिति लत्वविकल्पः युवाभ्यां व्यत्ययेनाभावो लोपे लोपइति
दकालोपः॥ ॥तृतीयामृचमाह॥ ॥चक्राथे हि सध्र्यङ्नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः। ताविंद्राग्नी सध्र्यंचा निषद्या वृष्णः सोमस्य
वृषणा वृषेथां॥ ॥हे इंद्राग्नी भद्रं कल्याणं नाम स्वकीयं नामधेयं सध्र्यक् सहगतं इंद्राग्नी इत्येवं संयुक्तं चक्राथे युवां कृतवंतौ। उत अपि च
हे वृत्रहणौ वृत्रस्यासुरस्य हंतारौ इंद्राग्नी सध्रीचीना सहांचंतौ वृत्रवधार्थं संगतौ स्थो भवथः। यस्मादेवं तस्मात् हे वृषणौ कामानां वर्षि
तारौ इंद्राग्नी ता युवां सध्र्यंचौ सहितावेव संतौ निषद्य वेद्यां उपविश्य वृष्णः सेक्तुः सोमस्यात्मीयं भागं अवृषेथां स्वकीये उदरे अभिषिंचतं स
ध्र्यक् सह इत्यस्योपपदे अंचतेर्क्विन् ऋत्विगित्यादिना क्विन् अनिदितामिति नलोपः। सहस्य सध्रिः अद्रिसध्र्योरंतोदात्तत्वं निपातनात् स्वरनिरूत्यर्थमित
ि वचनात् सध्र्याद्युदात्तता। उदात्तः। यणादेशः उदात्तस्वरितयोर्यण इति स्वरितत्वं। सध्रीचीना अपि भावे चप्रत्ययः छांदसः। सुपां सु
लुगिति विभक्तेराकारादेशः वृत्रहणौ संहितायां भावादेशलोपः। शाकल्यस्येति वलोपः। वृषेथां वृषु सेचने व्यत्ययेनात्मनेपदं च॥
चतुर्थीमृचमाह॥ ॥समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा। तीव्रैः सोमैः परिषिक्तेभिरर्वागेंद्राग्नी सौमनसाय यातं॥ ॥
अग्निष्वाहवनीयादिषु अन्वाधानादिना समिद्धेषु दीप्तेषु सत्सु आनजाना हवींषि आज्येनांजंतौ यतः स्रुचा ततः स्रुचा यागार्थं यतस्रुक्
तौ बर्हिर्वेद्यां बर्हिः परिस्तिराणौ अस्तीर्णं कुर्वंतौ अध्वर्युप्रतिप्रस्थातारावेवंभूतावभूतां तथा सति हे इंद्राग्नी तीव्रैः क्षिप्रं मदकरैः परिषिक्तै
भिः परितः सर्वतो ग्रहचमसादिषु आसिक्तैः सोमैर्हेतुभूतैः अर्वाक् अस्मदभिमुखमायात गतं। किमर्थं सौमनसाय सौमनस्याय अस्मासु
नुग्रहायेत्यर्थः। आनजाना अंजू व्यक्तिम्रक्षणकांतिगतिषु। लिटः कानच् अनिदितामिति नलोपः। द्विर्भावे अत आदेरित्याभ्यासस्य दीर्घः
तस्मान्नुड् द्विहल इति नुट्। स्तिलोपो व्यत्ययेन नुट्। तिस्तिराणा स्तृञ् आच्छादने पूर्ववत् कानच् ऋत इद्धातोरितीत्वं द्विर्वचने शर्पूर्वाः खयः सुपां
सुलुगिति सर्वत्र विभक्तेराकारः। चित्वादंतोदात्तत्वं॥ ॥पंचमीमृचमाह॥ ॥यानींद्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि। या वां प्र
त्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य॥ ॥हे इंद्राग्नी यानि वीर्याणि वृत्रवधादिरूपाणि चक्रथुः कृतवंतौ युवां यानि च रूपा
णि निरूप्यमाणानि गवाश्वादीनि भूतजातानि कृतवंतौ। इंद्राग्निभ्यां हि सर्वं जगत् उत्पन्नं। इंद्रः सूर्यात्मना वृष्टिं सृजति तया वृक्ष

ना॰ त्र॰
१०७

सादयः शंभः सकाशात्सर्वं प्राणिन उत्पद्यंते। इन अपि च यानि वृष्ण्यानि वृष्ण्यानि अभिभवानि वृत्रघ्नादीनि पाणि कर्माणि कृतवंतौ तथा यानि च
युवयोः संबंधीनि प्रत्नानि चीर्णनानि शिवानि शंसनानि या यानि सख्यानि शिवानि संगतानि भिः तैः सर्वैः सहितौ युवां तस्य सोमस्य अभिषुतस्य
मपिबतं। सख्या सख्युर्भावः सख्यं सख्युर्य इति यप्रत्ययः इतिश्नः कंदसि बहुलमिति डल्लोपः। तभिः बहुलं छंदसीति भिस ऐस् अभावः सख्य
च इति प्राप्तस्य विभक्त्युदात्तस्य न भाष्च न सावर्णदिति प्रतिषेधः॥ ॥ इति सप्तमपादशो वर्गः॥ ॥ पंचमीमृचमाह॥ ॥ यदब्रवं प्रथमं वां वृ
णानो यं सोमो असुरैर्नो विहव्यः॥ तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य॥ ॥ हे इंद्राग्नी प्रथमं वां मां णिकं मत्वं वां युवां वृ
णानः संभजमानाः यदब्रवं सोमेन प्रीणयिष्यामीति यद्वचनं संयथार्थां तां श्रद्धां श्रद्धया आदरातिशयेन कृतां स्तुतिं अभिलक्ष्य आहि
यातं आगच्छतमेवेनोद्दासार्थाः अथागमनानंतरं अभिषुतं सोमं पिबतं तथा सति असुरैः हविषां प्रदैः पकैः कैश्चिन्निरसनीयस्य
सोमो विहव्यो विशेषेण ह्वातव्यो भवति इतरथा व्यर्थः स्यात् तस्मादिंद्राग्नी आगच्छतमित्यर्थः वृणानः वृङ् संभक्तौ क्रादिः शानच् व्यत्ययेन
ग्रावृ इत्याकारलोपः। असुरैः असु क्षेपणे अस्यति रश्मिन्नित्यसुन् रनप्रत्ययः विहव्यः हुञ् आदाने यो ऽभावपन गुणाधातोर्लिंगितत्वात्
अन्ये बाहुल्याः यतोनावइत्याद्युदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥ सप्तमीमृचमाह॥ यदिंद्राग्नी मदथः स्वे दुरोणे यद्ब्रह्मणि राजनि
वा॥ अतः परिष्वमा याहि यातमथा सोमस्य पिबतं सुतस्य॥ ॥ यज्ञत्रायवश्या हे इंद्राग्नी स्वे दुरोणे स्वकीये गृहे यद्वदीवास्माने यद्वदि
मदथः हृष्यथः यद्वा ब्रह्मणि ब्राह्मणे अस्मिन्यजमाने हविः स्वीकरणाय आगत्य हृष्यथः यद्वा राजनि क्षत्रिये युद्धसाहाय्यं कर्तुं
मानायहृष्यथः। अतः परि परितो स्थानस्थानात् हे वृषणौ कामानां वर्षितारौ इंद्राग्नी आयातं आगच्छतमेव इदानीमन्यमा कार्षं अन्यत्र
वर्तनं मदथः मदी हर्षग्लेपनयोः। यज्ञत्रा अभिक्षीत्यादिनायज्ञतेः कर्मण्यत्रन् सुपां सुलुगिति विभक्तेराकारः॥ ॥ अष्टमीमृचमाह
॥ ॥ यदिंद्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः॥ अतः परि॰॥ ॥ अत्र यदुत्वित्यादीनि पंच मनुष्यनामानि हे इंद्राग्नी यद्यपि यदुषु नियंत्र
पुपरस्थामहिंसकेषु मनुष्येषु स्थो भवथ वर्तेथे यद्वा तुर्वशेषु हिंसकेषु मनुष्येषु वर्तेथे यद्वा द्रुह्युषु द्रोह करेषु वा गुपद्रवकारिषु मनु
ष्येषु वर्तेथे यद्वा अनुषु प्राणेषु सत्सु प्राणेषु तेषु जातेषु अनुषु मनुष्येषु अन्येषां प्राणानिष्यत्काः ज्ञानबीजानि अनुज्ञानाभा
ज्ञातेषु यद्वा भवथ। तथा पूरुषु कामैः पूरयितव्येषु अन्येषु पुरुषेषु तेन युद्धाद्भवथः अतः परि सर्वस्मात् हे कामाभिवर्षकाविंद्राग्नी
आगच्छतं अनंतरमभिषुतं सोमं पिबतं यदुषु यम उपरमे गतिकर्मणि तदिंद्राग्न्योर्भिरिति यद्वः यमेर्दुकिति प्रत्ययः दुगागमश्च अ
नुदात्तोपदेशेत्यादिना अनुनासिकलोपः। तुर्वशेषु तुर्वि हिंसार्थः। औणादिको अंश प्रत्ययः। द्रुह्युषु द्रुह जिघांसायां संपदादिलक्ष
णो भावे क्विप्। द्रुहं परेषामिच्छंतीति इच्छायां अपीति क्यच् क्याच्छंदसीति उप्रत्ययः। अनुषु अन प्राणने अनश्चानि विधीयमानः
उप्रत्ययो बहुलवचनात्स्माद्यपि भवतीति नित्त्वात् आद्युदात्तत्वं पूरुषु पूरी आप्यायने। पॄभिदिव्यधिगृधिधृषिभ्य इति पॄ धातोः औणादिक उप्रत्य
यः॥ ॥ नवमीमृचमाह॥ ॥ यदिंद्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः॥ अतः॰। प्रस्य॰॥ हे इंद्राग्नी अवमस्यां पृ
थिव्यां सन्निकृष्टायामस्यां भूम्यां यद्यपि वर्तमानौ भवथः यद्वा मध्यमस्यां पृथिव्यां अंतरिक्षलोके अवरपृथिवीत्वात्मकलोकदृष्टिकोण

१०८

यवर्तनं यथा यद्वा तृतीयस्यां पृथिव्यामस्यामुषाग्नावेति इन अपि च परमस्यां उत्कृष्टायां दूरे वर्तमानायां पृथिव्यां द्युलोके यद्वा वर्तेथे अ
तः सर्वस्मात्स्थानात् हे वृषणौ आगच्छतं आगमनानंतरं सोमं पिबतं। अवमस्यां अवम शब्दात् दूरस्थ्ये इत्यतः एन श्वाडागमः एव मुत्तरत्रा
पि॥ ॥ दशमीमृचमाह॥ ॥ यदिंद्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः॥ अतः परि॰॥ ॥ पूर्ववद्व्याख्येयं येनाचां व्यत्यासेन विशेषः पू
र्वं भूम्यादिषु त्रिषु लोकेषु यावदिंद्राग्नी तावद्गच्छतमित्युक्तं इंद्राग्नी नानुष्ठानभूतिषु भवरोहक्रमेण वर्तमानेषु त्रिषु लोकेषु वा विंद्राग्नी वर्तेते तत्रा
वगच्छतमिति॥ ॥ एकादशीमृचमाह॥ ॥ यदिंद्राग्नी दिवि ष्ठो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु॥ अतः परि॰॥ ॥ हे इंद्राग्नी दिवि द्युलोके य
द्यपि स्थो भवथः यद्वा पृथिव्यां भूलोके यद्वा पर्वतेषु मेघेषु गिरिषु वा तथा ओषधीषु तिलमाषव्रीह्यादिषु अप्सु उदकेषु अनुयाजतया
यद्विषयाः स्थो हे कामाभिवर्षकौ युवामतः सर्वस्मात्स्थानादागच्छतं। आगत्य च अभिषुतं सोमं पिबतं। पृथिव्यां उदात्तयणा इति विभक्तेरुदात्तत्वं ओ
षधीषु आपः पाकः आसु धीयत इति ओषधयः कर्मण्यधिकरणे चेति किप्रत्ययः दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं। तत्र ये अंतादायु
दात्तत्वं ओषधेश्च विभक्तावप्रथमायामिति दीर्घः॥ ॥ द्वादशीमृचमाचेरु॥ ॥ यदिंद्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे॥ अतः
परि वृषणा वा हि यातमथा सोमस्य पिबतं सुतस्य॥ ॥ हे इंद्राग्नी उदिता उदितस्य उदयं प्राप्तस्यादित्यस्य संबंधिनि दिवा यात्मानंत्यतिरि
क्षस्य मध्ये मध्यमभागे स्वधया आत्मीयेनान्नेन सा हविर्लक्षणेनान्नेन वायस्मात्कारणात् मादयेथे तृप्तौ भवतः तस्मात्कारणात्स्वतः सर्वस्मा
दंतरिक्षः स्थानात् हे कामाभिवर्षकाविंद्राग्नी आगच्छतं। आगमनानंतरमभिषुतं सोमं पिबतं उदिता सुपां सुलुगिति पष्ठ्या डादेशः उदितः
इति इदमिति विभक्तेरुदात्तत्वं। मादयेथे मद तृप्तियोगे चुरादिरात्मनेपदी॥ ॥ त्रयोदशीमृचमाह॥ ॥ एवेंद्राग्नी पपिवांसा सुतस्य वि
श्वास्मभ्यं सं जयतं धनानि॥ तन्नो॰॥ हे इंद्राग्नी सुतस्याभिषुतं सोमं एवमुक्तप्रकारेण पपिवांसौ पीतवंतौ युवां अस्मभ्यं विश्वा सर्वाणि धनानि संजय
तं प्रयच्छतं यद्वेतेनास्मत्कृतेन प्रार्थितं तन्मित्रो वरुणो मामहंतां पूजयंतु। पपिवांसा पा पाने लिटः क्वसुः यस्वेकाजाद्घसामिति इडागमः॥ ॥ इति प्रथ
मस्य सप्तमे सप्तमो वर्गः॥ ॥ विहीत्यष्टर्चं चतुर्थं सूक्तं अनुक्रांतं च विस्यष्टाविति। कुत्स्या ऋषिः पूर्ववत्। सूक्तविनियोगो लैंगिकः॥ ॥ तत्र प्रथमा
मृचमाह॥ वि ह्यख्यं मनसा वस्य इच्छन्निंद्राग्नी ज्ञास उत वा सजातान्॥ नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयंतीमतक्षं॥ हे इंद्राग्नी
ज्ञासः प्रज्ञा स्वले घने इच्छंच कामयमानो ऽहं ज्ञातान् उत चासंज्ञातान् समान जन्मनो ज्ञातीन् अपितिरिक्तान् वांधवान्वा स्तोमन स्तु बुध्या विख्यं युवां
मन्तारेति रूपेणावधुरूपेण वा व्याख्यामि यतो विधनस्य दातारो भवंति अपि च युवाभ्यां अन्या अन्येन कृताविकाषद्दत प्रमतिप्रकृष्टा बुधिनोस्तिम
दीयायाः पावमृसा बुद्धिः सा युवाभ्यामेव दत्तासती दृश्या बुध्या युक्तो ऽहं वां युवयोः संबंधीनि वाजयंती अस्मभ्यं अन्नमिच्छंती धियं ध्यानेन निष्पन्नां स्तु
तिं अतक्षं अकार्षं अख्यं लुङि अस्यातिवक्तिख्यातिभ्योङ्लेरडादेशः॥ वस्यः वसु शब्दादीयसुन् टेरिति टिलोपः। छांदसाईकारलोपः। ज्ञासः
ज्ञा अव बोधने औणादिकः असुन् प्रत्ययः विभक्तेरुदात्तत्वं। युवत् सुपां सुलुगिति विभक्तेर्लुक्। कार्था
भिधाय कृतात् युवयोर्वहुवचनइति युष्मदामपर्यंतस्य मुवादेशः॥ ॥ द्वितीयामृचमाह॥ ॥ अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्या
लात्॥ अथा सोमस्य प्रयती युवभ्यामिंद्राग्नी स्तोमं जनयामि नव्यं॥ ॥ हे इंद्राग्नी वां युवां भूरिदावत्तरौ अतिशयेन बहुधनस्य दातारौ

391
1934

भा॰१॰ श्रवं हि अश्रौषं खलु कस्मात् विजामातुः श्रुतामिरूप्यादिभिर्गुणैर्विहीनो जामाता यथा कन्यावते बहु धनं प्रयच्छति कन्यालाभार्थं ततोप्यतिशयेन दा
१०८ तारा विंद्राग्नी इत्यर्थः ॥ उत वा अपि च स्यालात् अस्यंश्च येन लाजानावपति विवाहकाले इति स्यालः कन्याभ्राता सयथा भगिनीप्रदानार्थं बहु धनं प्रय
च्छति ततोप्यतिशयेन दातारा विंद्राग्नी घ इति पदद्वयपूरणः ॥ तथा च सति अथानंतरं हे इंद्राग्नी युवाभ्यां सोमस्य प्रयती अभिषुतस्य सोमस्य प्रदाने
न सह नव्यं नवतरं प्रत्यग्रं स्तोमं स्तोत्रं जनयामि निष्पादयामि । अश्रवं निरुक्तं । अश्रौषं हि बहुदातरौ वा विजामातुरसुसमाप्ताज्जामातुर्विजामातेति
दाक्षिणात्याः क्रीतापतिमाचक्षते । असुसमाप्त इव वरोभिप्रेतो जामाता अपत्यं वा निर्माता न वा घास्यालादपि च स्यालात् स्यालात् स्याल अस
नः संयोगेनेति नैदानाः स्यः स्याल्लाजानावपतीति वा लाजा लाजतेः स्यः शूर्पं स्यतेः शूर्पमशनपवनं शृणातेः ॥ अथ सोमस्य प्रदानेन
युवाभ्यामिंद्राग्नी स्तोमं जनयामि नव्यं नवतरमिति । अश्रवं शृणोतेर्लुङि उत्तमपुरुषैकवचने बहुलं छंदसीति विकरणस्य लुक् । भूरिदावत्तरा
इत्यत्र दान अतिशयेनेति तरप् भूरिदावा भूरिदावत्तरा भूरिदावत्तरा वनिषि उदात्त इति तरपरत्वात् । घ इति संहितायां सानुनासिकः पशुः
ऋत्यतिरिभंगो काकार एवात् । वितुनुधस्त्वादिना संहितायां दीर्घत्वं ॥ अथ निपातस्य चेति प्रथमायमड परमनि मनि प्रनु दात्तोपद्दगंत्यादिनानुनासि
कालोपः ॥ ॥ तृतीयामृचमाह ॥ ॥ मा छेद्म रश्मीरिति नाधमानाः पितृणां शक्तीरनुयच्छमानाः । इंद्राग्निभ्यां कं वृषणो मदंति ता ह्यद्री धिषणाया
उपस्थे ॥ ॥ रश्मीन् रश्मिशब्देन रज्जुवाचिना यथा रश्मयो दीर्घा अविच्छिन्ना भवंति एवमविच्छिन्नान् पुत्रपौत्रादीन् मा छेद्म मा विच्छिन्नान् कुर्म इति
बुध्या नाधमानाः इंद्राग्न्योः सकाशात् तन्नाशविधानपुत्रादीन् याचमानाः तदनंतरं पितृणां शक्तीः शक्त्या उत्पादितान् वीर्यात्पादितान् पुत्रादीन्
अनुयच्छमानाः अनुक्रमेण नियतान् कुर्वंतः वृषणः सेक्तारः पुत्रोत्पादनसमर्थाः सपत्नीका इत्यर्थः । एवंभूता यजमानाः इंद्राग्निभ्यां कं सुखं यथा
भवति तथा मदंति हि यस्मात् अद्री ग्राव्णा दृणतो हिंसंतौ विदारयंतौ ताविंद्राग्नी धिषणायाः स्तुत्या उपस्थे उपस्थाने समीपे भवथः त
स्मात् स्माद्भ्यां वयस्तु वर्तामिति भावः । यद्यपि निपातानामनेकार्थत्वात् लिशब्दोपदेहेत्यर्थोपि दातारोविंद्राग्नी उदिश्य अद्रिभिः अपनसा
धनभूतया ग्राव्णः धिषणाया उत्सधिषणा अधिषवणचर्मतस्यापरिष्ठात् इंद्राग्न्यर्थं सोममभिषुण्वंति तदात दाययजमानाः स्तुवंतीति
योज्यानीयं छ अच्छिद्र रश्मीकरणे लुङि बहुलं छंदसीति विकरणस्य लुक् छं दसः भयथेत्यर्थधातुकत्वेन ङित्वाभावात् लघूपधलक्षणो गुणः नमा
ङ्योग इत्यडभावः । रश्मीनदीर्घा दृप्यमानपाद इति संहितायां नकारस्य रुत्वे ॥ अत्रानुनासिकः पूर्वस्य तु वेति ईकारः सानुनासिकः । नाध
मानाः नाधयाच्ञयां पितृणां नामन्यतरस्यामिति नाम उदात्तत्वं मदंति मदि स्तुतौ । आगमानुशासनस्यानित्यत्वात् नुमभावः गाः श्यनो य
नपदं पदं ॥ ॥ चतुर्थीमृचमाह ॥ ॥ युवाभ्यां देवी धिषणा मदायेंद्राग्नी सोममुशती सुनोति । ताव्श्विना भद्रहस्ता सुपाणी आ धा
वतं मधुना पृंक्तमप्सु ॥ ॥ हे इंद्राग्नी युवाभ्यां मदाय युवयोर्हर्षार्थं देवी द्योतमाना उशती युवां कामयमाना धिषणा मंत्ररूपा वाक् सोम
माभिषुणोति यद्वा धिषणा अधिषवणपात्री चर्म द्योतमानं युवयोर्मदं कामयमानं सत् सोमं अभिषुणोति ग्रावभिः नत्विति हे अश्वि १०८
यवा नस्य व्याप्तिवचनत्वं । अश्विना अश्ववंतौ भद्रहस्ता शोभनहस्ता दोर्दंडौ सुपाणी मणिबंधादूर्ध्वभागः पाणिः शोभनपाणी एवंभ
तौ हे इंद्राग्नी तौ हे इंद्राग्नी तौ युवां आ धावतं शीघ्रमागच्छतं आगत्य च अप्सु उदकेषु वर्तमानेन मधुना माधुर्योपेतेन सरसेन पृंक्तं ।

अस्मदीयं सोमं संयोजयतं यद्वा अप्सु वसतीवरीषु मधुमंतं मधुर्यं संयोजयतं विभक्तिव्यत्ययः । युवाभ्यामिति चतुर्थी । इज्याती वक्रांतौ भ 393
द्रहस्ता छपा लुक् यहीत्यादिना संप्रसारणं इगंतश्चेति प्रिपूर्वपदप्रकृतिस्वरत्वं । नाधाइ दाने । अप्सु पृंधी संपर्के । धातुकः लोटि थस लस्थ सोरसे 1924
पः । अनुस्वारपरसवर्णो । न वाचः परस्मिन्नित्यलोपस्य स्थानिवत्त्वं न प्रतिषेधात् ॥ ॥ पंचमीमृचमाह ॥ ॥ युवामिंद्राग्नी
वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये ॥ तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥ वसुनो धनस्य विभागे स्तोतृभ्यो
दातुं विभजने तात्पर्येण वर्तमानौ युवां वृत्रहत्ये वृत्रस्यासुरस्य हनने तवस्तमा अतिशयेन बलिनौ प्रवृद्धतमौ वां शुश्रव अश्रौषं खलु चर्ष
णी सर्वस्य द्रष्टारौ इंद्राग्नी तौ युवां अस्मदीये अस्मिन्यज्ञे बर्हिषि वेद्यामास्तीर्णे दर्भे आसद्योपविश्य सुतस्याभिषुतस्य पानेन प्रमादयेथां
प्रकर्षेण हृष्टौ भवतं । विभागे भज सेवायां भावे घञ् वसोः कुधिण्य इति कुत्वं यथादिनोत्तरपदांतोदात्तत्वं । तवः स्तमा तवइति बल
नाम तुस्मत्वर्थीयपादेत स्माद्रातिशायनिकस्तमप्यय इति बतिर्वत्यर्थः । सान्तोधातुः तस्मादौणादिकः कर्तरि असिप्रत्ययः । सुपां सुलुगिति
विभक्तेः पूर्वसवर्णदीर्घत्वं । वृत्रहत्ये हनस्त च इति हंतेर्भावे क्यप् तत्संनियोगेन तकारांतादेशश्च । कृदुत्तरपदप्रकृतिस्वरत्वं ॥ १०
इति प्रथमस्य सप्तमे षाविंशो वर्गः ॥ ॥ प्रचर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च । प्र सिंधुभ्यः प्र गिरिभ्यो महित्वा प्रेंद्राग्नी विश्वा भुवनात्यन्या ॥ ॥ प्रचर्षणिभ्यः पृतनाहवेषु अथ पृथिव्यामग्नि आगतवंतौ युवां चर्षणिभ्यः सर्वेभ्योपि मनुष्येभ्यः । महित्वा महत्त्वेन प्ररिरिचाथे अतिरिक्तौ सर्वाधिकौ भवथ इत्यर्थः । अत्रो
पसर्गो वशाधातुः स्वाभिधेयविपरीतमर्थमाचष्टे । यथा प्रसरणं प्रस्थानमीति । तथा पृथिव्याः सर्वस्या भूमेश्च प्ररिरिचाथे ॥
एवं स्कंप्रभृतिभ्योपि सिंधवः स्यंदनशीलस्या आपः गिरयः पर्वताः अपि च हे इंद्राग्नी विश्वा विश्वानि सर्वाण्यामभूतानि भूतजाता
नि अन्या इतराण्यनिरिक्तानि यानि संति तान्यतीत्य प्ररिरिचाथे अधिकौ भवथः । पृतनाहवेषु पृतनाः सेनाः हूयंते भावे तु पसर्गस्य
त्य पूर्वं संप्रसारणं व्यत्ययेन थाथादिस्वराभावेन कृदुत्तरपदप्रकृतिस्वरत्वम् । रिरिचाथे । रिचिर विरेचने छंदसि लुङ्लङ्लिट इति वर्त
मानलिट् । यद्वा लघवबहुलं छंदसीति विकरणस्य श्लुः । महित्वा महपूजायां औणादिक इत्नप्रत्ययः । तस्याभावो महित्वं सुपां सुलुगिति
तृतीयाया आदेशः । पूर्ववत् ऊवप्रत्यय आभरतमित्येषा पुरोडाशस्यानुवाक्या । सूत्रितं च । आभरतं शिक्षतं वज्रबाहू भावामिंद्राग्नी
र्यस्य येभिः स पित्वं पितरो न आसन् ॥ ॥ हे वज्रबाहू वज्रहस्ताविंद्राग्नी अस्मांड इंद्राग्नी अवतं शचीभिः उ मनुतरश्च यः सू
स्य सूर्यं नं शिक्षा विहीनकर्मा । अपि चास्माननुपालन शचीभिः कर्मनामेतत् आभरतं अस्मदर्थं धनमाहरतं आहृत्य च शिक्षतं अ
स्य येभिः रश्मिभिः नोस्माकं पितरः पूर्वपुरुषाः स पित्वं सहप्राप्तव्यं स्थानं आसन् अभीक्षतां किं च सूर्य आत्मनः इ इः
कमुपासकाय गच्छति तथा च श्रूयते नेर्णिक्षमस्मि ... आसन् प्राप्ताः मार्गमनुगच्छन् अर्चिरादिमार्गेण दिवं ...

छनवः उभे नु इंद्राग्नी ममाभिईयमाना तत्र खलु सर्वात्मनं इंद्रस्यैन श्वयरत्न आम्नेन पितथा चक्षु यंते अग्निं शत्रार्दितः सायंप्रविशाशितस्मा
मा·प्र· दग्निर्दृशान्नकृत दृशे उतितस्मात्सूर्य रश्मीनां स्तवनं इंद्राग्न्यार भर्योरपिस्कृतिः निश्चाभरतं हृत्य हार्भे इतिभनं शिक्षतं नाशश्च विधापादानं भद्
पदेशालिसार्वधातुकानुदात्तत्वं लोपः पित्वादनुदात्तत्वं धातुस्वरः निष्यतेतिङः परत्वान्नि घाताभावः सपिलं आहूय्यासो अस्मात्मद्वाचोप
१०९ पदादनुत्वार्थे नित्येकेनिति त्वनप्रत्ययः पृषोदरादित्वाद्धातोः पिभावः यद्वापयसमवायस्य सर्वधातुभ्य इनिनसपर्भावेः सपितं आसनअस
गतिर्दीप्यादाने षुलङि अडागमः उदात्तः यद्वृत्तान्नित्यमिति निघाताभावः॥ ॥अष्टमीमृचमाह॥ ॥पुरंदरा शिक्षतं वज्रहस्तास्माँ इंद्राग्नी
अवतं भरेषु॥ तन्नो मि॰ द्यौः॥ ॥हे वज्रहस्ता हस्तेन गृहीत वज्रौ पुरंदरा असुरपुराणां दारयितारौ इंद्राग्नी शिक्षतं अस्मदपेक्षितं पुरंदरा
शिक्षतं धनं प्रयच्छतं अपि च भरेषु संग्रामेषु अस्मान् अवतं रक्षतं यदेतेन मया कृतं प्रार्थितं तदस्मदीयं मित्रादयो ममहंतां पूजयंतु पुरंदरा
पुः सर्वत्वादीशिताशिति त्वचनाच्यमपुरंदरे चेति निपातनात् दपसर्गामलुगिति विभक्तालकारः॥ ॥इति प्रथमस्य सप्तमे एकोनत्रिंशो व
र्गः॥ ॥ ततं म इति नवर्चं पंचमं सूक्तं कुत्सस्यार्षं ऋभुदेवताकं पंचमी निवृत्त्याद्या त्रिष्टुभो जगत्यः तथा चानुक्रांतं ततं नवार्भवं तु पंच
म्यंत्या त्रिष्टुभाविति अभिप्लवषडहस्य चतुर्थेहनि वैश्वदेवशस्त्र इदमार्भवं निविद्धानं सूत्रितं च तृतीयस्येति खंडे ततं मे अपइति वैश्वदेवानीति॥
॥ ॥तत्र प्रथमामृचमाह॥ ॥ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णु
त ऋभवः॥ ॥हे ऋभवः मम आपः अग्निष्टोमादिरूपं कर्म ततं विस्तारितं बहुशः पूर्वमनुष्ठितं तत्पुनस्तायते विस्तार्यते अनुष्ठी
यत इत्यर्थः तत्र स्वादिष्ठा स्वादुतमा अतिशयेन प्रीतिकरी धीतिः स्तुतिश्च उचथाय स्तवनीयाय युष्मत्समूहाय शस्यते पठ्यते अपि च इह अस्मिन्यागे
समुद्रः समुद्रवत्प्रभूतोऽयं सोमरसः विश्वदेव्यः सर्वेभ्यो देवेभ्यः पर्याप्तो यथा भवति तथा संपादितः तस्य स्वाहाकृतस्य स्वाहाकारेणाग्नौ प्रक्षि
प्तस्य पानेन समुतृप्णुत सम्यक् तृप्ता भवत। ततं तनु विस्तारे निष्ठायां यस्य विभाषेति प्रतिषेधः अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः अ
पः अप इत्याप आपः कर्मण्यायां न स्वानुष्ठवत्सकन धातोः स्वश्च। तायते तनोतेर्यकि आत्वं। स्वादिष्ठा स्वादुशब्दादातिशायनिके इष्ठन्
पः। उचथाय वचपरिभाषणे औणादिको अथक्प्रत्ययः। वचिस्वपीत्यादिना संप्रसारणं समुद्र उदीकुंदन स्कायितं चेत्यादिना रक् अनित्वा
मितिन लोपः। विश्वदेव्यः देवा हैभागा देव्यः यत् इति वर्तिय प्रत्ययः विश्वं सर्वदेव्याय स्मिन सोमव हुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं स्वा
हाकृतस्य स्वाहाशब्दस्य न ईर्षादित्वेन गतिरनंतरः इति पूर्वपदप्रकृतिस्वरत्वं। तृप्णुत पप्रीणने स्वादिभ्यश्नुः ऋभवः इत्यनेन संहितायामत्युक
तिप्रकृतिभावः॥ ॥द्वितीयामृचमाह॥ ॥आभोगयं प्र यदिच्छंत ऐतनापाकाः प्रांचो मम के चिदापयः सौधन्वनासश्चरितस्य भूमनागच्छत सवि
तुर्दाशुषो गृहं॥ ॥हे ऋभवः अपाकाः अपरिपक्वज्ञानाः प्रांचः पूर्वकालीनाः आपयः प्रापयितारो मदीया ज्ञातयः केचिदेवं भूताये केचन
यूयं आभोगयं उपभोग्यं सोमं इच्छंतः यद् यदा प्रैतन तपश्चरितुमरण्यं गतवंतः ऋभवो हि सुधन्वन आंगिरसस्य पुत्रा तदुक्तं यास्केन १०९
ऋभुर्विभ्वा वाज इति सुधन्वन आंगिरसस्य त्रयः पुत्रा बभूवुरिति कुत्सोप्यांगिरसः अतस्तेन मदीया ज्ञातय इत्युक्तं। हे सौधन्वनासः सुधन्वनः
पुत्राः तदानीं चरितस्य सनुयाज्ञिंतस्य तपसः भूमना भूम्ना बहुत्वेन दाशुषः हविर्दत्तवतः सवितुः सोमाभिषवं कुर्वतो यजमानस्य गृहं सोम

यज्ञगृहमागच्छत तपमालब्धसोमाः संतः कृतयाना यूयं गतवंतः यद्वा दाशुषः प्रातःसवनादिष्वग्न्यादिभिरपसारितेभ्यः सोमपानं दत्तवंतः सवितु 395
र्गृहं निवासनं तृतीयसवनाख्यं आगच्छत प्रासाः एतत्सर्वमार्भवं संवत्सरं तीत्यादौ विस्पष्टमाख्यातं। आभोगयं आसमंताद्भोग आभोगः तदर्हं आ 1924
भोगयः छंदसि चेति यः यस्येति च लोपाभावश्छांदसः व्यत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वं। यद्वा आङ् पूर्वाद्भुजेरौणादिकः पूर्वकर्मणि इप्रत्ययः
कुत्वं च। अभिव्यत्ययेन गुणः एतन इण्गतौ लङि मध्यमबहुवचनस्य तादेशः तप्तनप्तनथनाश्चेति तस्य तनबादेशः अडागमः इधिश्च आ
पयः आप्नोतेरौणादिक इप्रत्ययः भूमना बहुत्वात् पृथ्वादिलक्षण इमनिच् बहोर्लोपो भू च बहोः भूभावश्च संज्ञापूर्वकत्वात् विधेरनित्यतादल्लो
पाभावः॥ ॥तृतीयामृचमाह॥ ॥तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयंत ऐतन। त्यं चिच्चमसमसुरस्य भक्षणमेकं संतमकृणुता चतुर्व
यं हे ऋभवस्तदानीं सविता सर्वस्य प्रेरको देवो वो युष्माकं अमृतत्वं देवत्वं आसुवत आभिमुख्येन प्रेरितवान् दत्तवानित्यर्थः यद्यदा यूयं अगोह्यं
हितुमशक्यं सर्वैरीक्ष्यमाणं सवितारं श्रवयंतः अपेक्षितं सोमपानं विज्ञापयंतः संतः एतन आगच्छत तदानीमिति पूर्वेणान्वयः यस्माद्यूयं देवैरा
ज्ञापिताः संतः असुरस्य त्वष्टुः संबंधिनं तेन निर्मितमित्यर्थः भक्षणं सोमपानसाधनं त्यं तं चमसं एकं चित् असहायमेव संतं चतुर्वयं चतुर्व्यूहं अकृ
णुत कृतवंतः। त्वष्ट्रा देवत्वष्ट्राहृतं चमसं होम समादिमुख्यं च मसच तुष्टयरूपेण ऋभवः कृतवंत इत्यर्थः। असुवत षूप्रेरणे तौदादिकः। श्रवयंत श्रुश्र
वणे छांदसो ग्भ भावः। एतन लङि मध्यमबहुवचनस्य तादेशे तप्तनप्तनथनाश्चेति तनबादेशः। कृणु करणे ल्युट् अकृणुत कृहिंसाकरणयोश्च ल
ङि मध्यमबहुवचने धिन्वि कृण्व्योर चेत्युप्रत्ययः। चतुर्वयं चत्वारो अवयवाः चत्वारो वयवा यस्य सतथोक्तः॥ ॥चतुर्थीमृचमाह॥ ॥विष्ट्वी शमी तरणित्वे
न वाघतो मर्तासः संतो अमृतत्वमानशुः सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यंत धीतिभिः वाघतः ऋत्विङ्नामैतत् अत्र च तत्सामर्थ्यात्
तद्वंतो लक्ष्यंते ऋत्विग्निरूपेता ऋभवः शमी कर्मनामैतत् यागदानादीनि कर्माणि अन्यान्यपि एकं चमसं चतुरः कृणोतनेत्यादिनोक्तानि कर्मा
णि तरणित्वेन क्षिप्रनामाक्षिप्रत्वेन ऋत्विग्ध्येणा चिस्त्वायि घष्येत कर्मनाम तथाप्यन्ते क्रियापरं व्याप्य कृत्वेत्यर्थः एवं कर्माणि कृत्वा मर्तासो मनुष्या
अपि संतः अमृतत्वं देवत्वं आशत आनशिरे कतोः कर्मभिः कौशिरे देवत्वं प्राप्य च सौधन्वनाः सुधन्वः न पुत्राः सूरचक्षसः सूर्यसमानप्रकाशाः
सूर्यसदृशज्ञाना वा ते ऋभवः संवत्सरे संवत्सरावयवभूतेषु संनादिकालेषु अनुदेयैर्धीतिभिः अग्निष्टोमादिकर्मभिः समपृच्यंत संयुक्ता अभवन्
हविर्भागा हविर्भुज इत्यर्थः। अत्र निरुक्तं ऋत्वाकर्माणि क्षिप्रत्वेन वोळ्हारो मेधाविनो वा मर्तासः संतोऽमृतत्वमानशिरे सौधन्वना ऋभवः सूरख्या
ना वा सूरप्रज्ञा वा संवत्सरे समपृच्यंत धीतिभिः कर्मभिः ऋभुर्विभ्वा वाज इति सुधन्वन आंगीरसस्य त्रयः पुत्रा बभूवुरिति विष्ट्वी विष्लृ व्याप्तावित्याद
यश्चेति क्त्वाप्रत्ययस्य ईकारांतादेशः शमी सर्वकर्मणां सुपां सुलुगिति पूर्वसवर्णदीर्घः सुपो लुक् आनशुः अश्नोतेर्व्यत्ययेन परस्मैपदं अश्नोतेश्चेत्यभ्यासादुत्तरस्य नुडागमः
। अपृच्यंत पृची संपर्के कर्मणि लङ्॥ ॥पंचमीमृचमाह॥ ॥क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानं उपस्तुता उपमं नाधमाना अमर्त्येषु
श्रव इच्छमानाः॥ ॥उपस्तुताः समीपस्थैः ऋत्विग्भिः स्तुताः ऋभवः हे हमानं होमक्रियां प्रति प्रयतमानं एकमसहायं पात्रं पानसाधनं त्वष्ट्रानि
र्मितं चमसं मानदंडेन क्षेत्रमिव भूमितिवत् तेजनेन तीक्ष्णेन शस्त्रेण च मसं चतुष्टयरूपेण कर्तुं विममुः विशेषेण मानं कृतवंतः किमिच्छंतः उप
मं सर्वेषु उपमानभूतं प्रशस्तं सोमलक्षणमन्नं नाधमानाः याचमानाः एतदेवाविवृणोति अमर्त्येषु मरणरहितेषु देवेषु मध्ये श्रवो हवि

कृशणमृन्वंतु उभमानाः इष्टंतः देवैः सह सोमपानं कामयमानाः तत्प्राप्य च तुरथ्यमसान कार्षुरित्यर्थः ॥ समृःमाद्भ्यमाने ऽाद्वेन्व्यत्ययेनपर
भा॰ प्र॰ स्मैपदं तत्र अनेन अणोप्रगृह्यस्यानुनासिक इत्यवमानेव्यत्ययेनाकारस्यानुनासिकः इ्या अक्षाद्विलात्वकृतिभावः ॥ ऊं हमानं वं हतेलेहवाह्म
यत्नभावादिकः अनुदात्तेत्वादात्मनेपदं उपस्कृताः गातिरनंतरं इति गतेः प्रकृतिस्वरत्वं इपमंमाद्भमाने आ तश्चोपसर्गइति कप्रत्ययः इ
२०० ह्माना व्यत्ययेनात्मनेपदं ॥ ॥इति प्रथमस्य सप्तमे त्रिंशो वर्गः ॥ ॥ षष्ठीमृचमाह ॥ ॥आ मनीषामंतरिक्षस्य नृभ्यः स्रुचेव घृतं जुह
वाम विद्मना ॥ तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः ॥ ॥अंतरिक्षस्य अंतरिक्षलोकस्य मध्यमस्थानस्य संबंधिभ्यो
नृभ्यः यज्ञस्य नेतृभ्यः ऋभुभ्यः ऋभवो ह्ययज्ञस्य नेतारः तेन ह्येते देवत्वं प्राप्ताः यद्वा अंतरिक्षलोकस्य नेतृभ्यः मध्यमस्थाने हि तेषां पक्रांते ता
दृशेभ्यः स्रुचेव यथा स्रुचा जिह्वा घृतं क्षरणशीलमाज्यं तथा हविः आजुहवाम समर्याद्यामाकारः यथा शास्त्रं प्रयच्छाम एवं मे वमनीषां
स्तुतिं विद्मना वेदनेन कुर्म इति शेषः अपि च ऋभवः पितुः सर्वस्य जगतः पालकस्य सर्यस्य तरणित्वानि तरणक्रीडालानि सश्चिरे सेवं क्षि
भूताः संतः प्रापुः तदुक्तं आदित्यरश्मयोप्यृभव उच्यंत इति । ते ऋभवः दिवो रजः रजः द्यो कलोकवाची धातमानस्य सूर्यस्य स्यलो
कस्य संबंधिनं वाजं सोमलक्षणमन्नं अरुहन् यागदानादिभिः कर्मभिः अन्ये च देवा ऋभवमस्य च तुष्टयकरणादिकैः प्रापुवन् सञ्चारयामास
काच इति विभक्तेर दात्तत्वं ॥ जुहवाम हुदानादनयोः लोटि आडुत्तमस्य पिच्चेत्यडागमः विक्रमैनाविद्दत्वान आणादिकोमनिः न संयोगा
द् मंतादित्यलोप्यभावः तरणित्वा प्लवमानतरणयोः अतिंस्भवः धस्य श्वविन भ्योनिरिति कर्तयनि प्रत्ययः तस्य भावस्तरणित्वं ओ
छंदसि बहुलमिति ओर्लोपः ॥ सश्चिरे सश्चगता वित्यत्र सश्चिमप्येके पठंति व्यत्ययेनात्मनेपदं द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यः
मिति वचनाद्विर्वचनाभावः ॥ इरन्नश्चित्वादंतोदात्तत्वं । यदृत्तान्नित्यमिति निघात प्रतिषेधः अरुहन्न रुहबीजजन्मनि प्रादुर्भावे लुङि इरम
दुरस्त्विभ्यश्छंदसीतिरुरडा दृशः द्विवं इउदिदमित्यादिना विभक्तेरदात्तत्वं । रजः रंज रागे रंजत्यस्मिन्निति रजो लोकाः ॥ तदुक्तं लोका रजांस्यु
च्यंत इति औणादिकोधिकरणे असुन नरलक र लो न रजः सुपसंख्यान मिति नलोपः सुपां सुलुगिति षष्ट्या लुक् ॥ ॥ सप्तमीमृचमाह
॥ ॥ऋभुर्न इंद्रः परमेश्वरः अस्माकं रक्षक इत्यर्थः ॥ यद्वा इंद्र एव संमगादुरुभात्तिनिरुक्तव्युत्पत्त्या ऋभुरिति स्तूयते । अपि च वाजेभिः वा
जिरस्मभ्यं दातव्यैरन्नैः वसुभिः निवासहेतुभिः धनैश्च सः ऋभुर्वसुः अस्माकं निवासयिता अत एव ददिः तेषामन्नानां धनानां च दातास
वतु । परोक्षं च प्रत्यक्षकृतः हे देवाः दानादिगुणयुक्ताः ऋभुप्रभृतयः युष्माकं संबंधिनां ऋभूणां पतस्तीः सेनाः अभितिष्ठमनवीया
नूनं वयाख्यातिनीयनिकृष्टयसतः वाजेभिः बहुलं छंदसीति भिस ऐस भावः वसुः वसनिवासे अस्मादंतर्भावितण्यर्थात् शृस्वृस्निहीत्या
दिना उप्रत्ययः ॥ निनियनुवृत्तेराद्युदात्तत्वं ददिः ददातेः अ दाने अदगमहन इति किप्रत्ययः लिट्वद्भावाद्द्विर्भावादि आतोलोप इटि चेत्याकार
लोपः ॥ ॥अष्टमीमृचमाह ॥ ॥निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः ॥ सौधन्वनासः स्वपस्यया नरो जिव्री यु
वाना पितराकृणोतन ॥ ॥ पुराकस्यचिदृषेर्धेनुर्मृतासः ऋषिस्तस्याधेनोर्वत्सं दृष्ट्वा ऋभूनस्तावक ऋभवस्तदेतसौदाम्यां धेनुं कल्पी २००
तवंतः तद्धर्मणा सा वायतनुवत्सेनसमयोजयन्निति अयमर्थः पूर्वार्धे प्रतिपाद्यते ॥ हे ऋभवः यूयं चर्मणा त्वचा तनीयार्थं पिंशी ॥ गां
धेनुं निरपिंशत निःशेषेणापिंशत संयुक्तामकुरत तदनंतरं तां गां पुनर्वत्सेन समसृजत संसृष्टामकुरुत समगमयत वेति यावत् ॥

अपि च हे सौधन्वनासः सुधन्वन आंगिरसस्य पुत्राः नरो यज्ञस्य नेतारः ऋभवः स्वपस्यया शोभनकर्मेच्छया यागज्ञानाचरणेनातिमात्रवज्जि 397 / 1924
व्रीजीर्णौ वृद्धौ पितरा मातापितरौ युवाना पुनर्यौवनोपेतौ अकृणोतन यूयमकुरुध्वं । अपिंशत पिश अवयवे तौदादिकः इमुचादीनां
मिति नुम । सौधन्वनासः पुत्राः सौधन्वनाः अमिति प्रकृतिभावः आज्जसेरसुक् आमंत्रितस्य च षाष्ठमाद्युदात्तत्वं । स्वपस्यया शोभनमपः स्वपः
तदिच्छन्त्यात्मन इच्छायां क्यच् अप्रत्ययादिति भावे अकारप्रत्ययः ॥ जिव्री ज्या वयोहानौ ज्यश्च जोऽभ्यः क्विन् जृभावश्च इतौ ऋत्वा ऋत्वीत्यारेफ
वकारयोस्थानविपर्ययः बहुलवचनात्लिंगेन दीर्घाभावः ॥ निलादाद्युदात्तत्वं । सुदानाः सुपां सुलुगिति विभक्तेराकारः पिता च माता च पित
रौ पितामातेति पिता द्विष्यते । पूर्ववद्विभक्तेराकारः अकृणोतन कृवि हिंसाकरणयोश्च इति इदित्त्वान्नुमधिन्वि कृण्व्योरुच्चेत्युप्रत्ययः तत्संनियोगे
नवकारस्य चाकारः । अतो लोपे सति तस्य स्थानिवद्भावाल्लघूपधगुणाभावः ॥ लङ्मध्यमबहुवचनस्य तप्तनप्तनथनाश्चेति तनबा
देशः ॥ तस्य पित्त्वेन ङित्त्वाद्गुणाभावः ॥ ॥नवमीमृचमाह ॥ ॥वाजेभिर्नो वाजसातावविड्ढ्यृभुमाँ इंद्र चित्रमा दर्षि राधः ॥ तनो मित्रो॰ ॥ ॥
हे ऋभुमान् ऋभुर्विभ्वा वाज इति त्रयोप्यभ्रव ऋभवो पञ्चादत्रोच्यंते । तैर्युक्तस्त्वं वाजसातौ वाजस्यान्नस्य संभजननिमित्तभूते सति वाजेभि
रन्नैरविड्ढि अस्मान् व्याप्नुहि । यद्वा वाजसातिरिति संग्रामनाम वाजसातौ संग्रामे वाजेभिः वेजनयुक्तैरश्वैः अविड्ढि अस्मान् रक्ष अपि च चित्रं
चायनीयं राध्यो धनं आदर्षि अस्मभ्यं दातुमाद्रियस्व । तृतीयसवने ऋभुभिः सहेंद्रस्यावस्थानात्प्रसंगादत्रेंद्रस्तुतिः यद्वा इंद्रस्याभिः प्रार्थि
तं अस्मदीयं तं तु मित्रादयो ममहंतां पूजयंतां । वाजसातौ । वनषणसंभक्तौ भावेन्क्तिन् जनसनखनां सनझलोः इत्यात्त्वं । वाजानां सातिय
स्मिन् यदुत्तरपदप्रकृतिस्वरत्वं । अविड्ढि विष्लृ व्याप्तौ लोटो हिः बहुलं छंदसीति शपो लुक् । बहुलं छंदसि हेधिः पुत्वं श्रात्वं ढत्वं दस्य पिट्ढ्यत
इति हेर्धिग्रहणाडस्यडागमः ॥ ऋद्धा अवनेतर्लोटि सिब्बहुलं छंदसीति बहुलवचनात् विकरणः सिप् तस्यार्धधातुकत्वादिड् आदेशप्रत्यययोरिति
षत्वं धत्वादि पूर्ववत् हूस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं दर्षि दृङ् आदरे लोट्व्यत्ययेन परस्मैपदं बहुलं छंदसीति विकरणस्य लुक् ॥ ॥९॥
इति प्रथमस्य सप्तमे एकत्रिंशो वर्गः ॥ ॥तक्षन्निति पंचर्चं पंचमं सूक्तं कुत्सस्यार्षमार्भवं पंचमीत्रिष्टुप् शिष्टाश्च जगत्यः तथा चानुक्रांतं
तक्षन्नंत्यांत्यास्त्रिष्टुप् । अग्निष्टोमे वैश्वदेवशस्त्र इदं सूक्तमार्भवं निविद्धानं सूत्रितं च । तक्षन्रथमयं वेनश्चोदस्त्यगिनर्गभाँ इति ॥ ॥तत्र प्रथमामृ
चमाह ॥ ॥तक्षन्रथं सुवृतं विद्मनापसस्तक्षन्हरी इंद्रवाहा वृषण्वसू ॥ तक्षन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं सचाभुवं ॥ ॥विद्म
नापसः उत्कृष्टेन ज्ञानेन निष्पादनकर्मणा वा ऋभवः रथं अश्विनोरारोहणार्थं सुवृतं शोभनवर्तनं सुचक्रं वा तक्षन्न कुर्वन् । तथा इंद्रवाहौ इं
द्रस्य वाहनभूतौ हरी हरणशीलावश्वौ तक्षन् कृतवंतः कीदृशौ वृषण्वसू सेचनसमर्थेन दृढतरेण यौवनेन बलेन वा युक्तौ ॥ अ
पि च पितृभ्यां स्वकीयाभ्यां मातापितृभ्यां युवत् यौवनोपेतं वयः आयुः ऋभवः तक्षन्कृतवंतः तथा वत्साय मातरं गां सचाभुवंस
ह वर्तमानं तक्षन् कुर्वन् ॥ तक्षन् तक्ष त्वक्ष तनूकरणे लङि बहुलं छंदसीत्यमाङ्योगेपीत्यडभावः ॥ सुवृतं शोभनं वर्तनं इति सुवृता सु
वर्तनं वृतु वर्तने इति किप् ॥ विद्मनापसः विदज्ञाने । अन्येभ्योपि दृश्यंत इति दृशिग्रहणाज्ज्ञाने मनिन् संज्ञापूर्वकस्यानित्यत्वाद्गुणाभावः ॥

भा॰ प्र॰ बहुलवचनात्कु। यद्वा नि उक्ष सेचने ओणादिको भावे मक्। ततः पामादिलक्षणो नप्रत्ययः। विभ्वना वाजमवतः कर्म येषां बहुव्रीहौ पूर्वपदप्रकृतिस्वर
त्वं। छांदसः पूर्वसवर्णदीर्घः। इंद्रवाहा इंद्रस्य वहनं इंद्रवाहौ। वहश्चेति ण्विप्रत्ययः। अत उपधाया इति वृद्धिः। मत्यांसुक्षितिविभक्तेराका
२०१ रः। वृषण्वसू वृषसेचने कनिन्युवृषितक्षीत्यादिना कनिन्। निचादाद्युदात्तत्वं। वृषाण्वस्वश्वयोरिति संख्यानमिति वसुशब्दे उत्तरपदे वृषण
भावः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। युवत। अत्र युवन्शब्दः सामर्थ्यात्प्रतिनिमित्तं युवत्वमात्रमाचष्टे तदस्मिन्नस्तीति युवत्छां
दसो वर्णलोपः॥ ॥द्वितीयामृचमाह॥ ॥आ नो यज्ञाय तक्षत ऋभुमद्वयः क्रत्वे दक्षाय सुप्रजावतीमिषं। यथा क्षयाम सर्ववीरया विशा तन्नः
शर्धाय धासथास्विंद्रियं॥ हे ऋभवः नोस्माकं यज्ञाय यज्ञार्थं ऋभुमत् ऋभुमतभीसमानं युक्तं वयो हविर्लक्षणमन्नं आतक्षत आ समंतादुत्पाद
यत एतदेवाविष्क्रियते क्रत्वे अस्मदीयाय कर्मणे दक्षाय च बलाय च तादर्थ्ये चतुर्थी। एतदुभयार्थं सुप्रजावतीं शोभनाभिः पुत्रपौत्रा
दिलक्षणाभिः प्रजाभिर्युक्तां इषं अन्नं अतक्षतेति शेषः। अपि च सर्ववीरया सर्वैर्वीरैः पुत्रादिभिरुपेतया विशा प्रजया सह यथा येन
प्रकारेण क्षयाम सुखेन निवसाम तत्तादृशमिंद्रियं धननामैतत् धनं नोस्मभ्यं शर्धाय बलार्थं सुधात्पृथक् स्थापयत इत्यर्थः। ऋभुम
त उरुभातीति निरुक्त्युत्पत्त्या ऋभुशब्दः प्रकाशमात्रवाची ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। क्रत्वे सादिपु छंदसि वावचनादिति ने
रल्लोपे द्वितीतिगुणाभावे यणादेशः। क्षयाम क्षि निवासगत्योः व्यत्ययेन शप्। धासथ। धाञो लेट्याडागमः। सिब्बहुलं छंदसि लेटीति सि
प् अन्येषामपि दृश्यत इति संहितायां दीर्घः॥ ॥तृतीयामृचमाह॥ ॥आ तक्षत सातिमस्मभ्यमृभवः सातिं रथाय सातिमर्वते नरः। साति
नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिं॥ हे नरः यज्ञस्य नेतारः ऋभवः अस्मभ्यमनुष्ठातृभ्यः सातिं संभजनीयमन्नं धनं वा आ स
मंतात्तक्षत तथा अस्मदीयाय रथाय रमणशीलाय पुत्रादये रथाय वा सातिं संभजनीयं धनं आतक्षत तथा अर्वते अश्वाय सातिं संभजनीयम
न्नं धनं वा अश्वयोग्यं आतक्षतत्वे वा किंच विश्वहा सर्वदा नोस्माकं जैत्रीं जयशीलां अपरिमितत्वेन सर्वाधिकां सातिं संभजनीयं धनं सं महेत सर्वत्र
नः सम्यक् पूजयत यत्तु वयं च पृतनासु संग्रामेषु जामिं सहजां अजामिं असहजां शत्रुं वा सक्षणिं अस्मानभिभवंतं युष्मत्प्रसादादभिभ
वेमेति शेषः। सातिं षणु दाने क्तिनि जनसनखनां सञ्झलोरित्यात्वं। ऊतियूतिजूतिसातीत्यादिनांतोदात्तत्वं। महत मह पूजायां। सक्षणिं सह अभिभवे औणादिकः सनिप्रत्ययः। दलवकृतपता
॥ ॥चतुर्थीमृचमाह॥ ॥ऋभुक्षणमिंद्रमा हुव ऊतय ऋभून्वाजान्मरुतः सोमपीतये। उभा मित्रावरुणा नूनमश्विना ते नो हिन्वंतु सातये धिये जि
षे। ऋभुक्षणं महांतमिंद्रमाहुवे आह्वयामि किमर्थं ऊतये रक्षणार्थं तथा ऋभून्वाजान् ऋभुर्विभ्वा वाज इति त्रयः सुधन्वनः पुत्राः तत्र प्रथमोत्तमाभ्या
बहुवचनाभ्यां मध्यमोपि लक्ष्यते। अतः शब्दद्वयेन त्रयोप्युच्यंते। तदुक्तं यास्केन। प्रथमोत्तमाभ्यां बहुवन्निगमा भवंति न मध्यमेनेति। एषां पा
तृन्मरुतश्च सोमपीतये सोमपानाय आह्वयामि तथा उभा उभौ युगलरूपेण संहत्य वर्तमानौ मित्रावरुणौ अश्विनौ च नूनं अवश्यं सोमपानायाह्व
यामीति शेषः। अपि च प्रख्याताश्चैते देवा नोस्मान् हिन्वंतु प्रेरयंतु गमयंत्वित्यर्थः। किमर्थं सातये संभजनीयाय धनाय धिये धनसाध्याय क २०१
र्मणे जिषे जयाय शत्रूणां जयार्थं च। ऋभुक्षणं। उरु भासमानाः स्यानो क्षीयति निवसतीति ऋभुक्षाः। उरुपूर्वात् भातेर्भवादयश्चेति प्रत्ययः। अ
तो लोप इत्याकारलोपः। पूर्वपदस्य ऋभवश्च ऋभुशब्दोपपदात् क्षि निवासगत्योरित्यस्मात् पतेश्चेति विधीयमान इति प्रत्ययो बहुलव

नात् भवतीति टिलोपः। इतोत्सर्वनामस्थाने उपत्वं इकारस्य नायापूर्वस्य निगम इति विकल्पनात् उपधादीर्घभावः। यद्वा अर्तेर्भुक्षि तु कित्वात् गुणाभा 399
वः। अतएव नावग्रहः। सोमपीतये पा पाने स्थागापापचो भावे इति भावे क्तिन्। घुमास्थेतीत्वं दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वं। हिन्वंतु हिवि 1924
गतौ धाचे अस्मादंतर्भावितण्यर्थात् इदित्वान्नुम्। जिषे जि जये तुमर्थे सेसेनिति क्से प्रत्ययः॥ ॥पंचमीमृचमाह॥ ॥ऋभुर्भराय सं शि
शातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु तन्नो॥ ॥ऋभुस्त्वः प्रथमोस्माकं यातिं संभजनीयं धनं भराय संग्रामार्थं संशिशातु सम्यक् ती
क्ष्णीकरोतु संग्रामोचितं धनमस्मभ्यं प्रयच्छत्वित्यर्थः। तथा समर्यजित् समर्या मनुष्यास्तैः सह वर्तत इति समर्यः संग्रामः तत्र शत्रूणां जे
ता संग्रामस्य वाजः अस्मान् अविष्टु अवतु संग्रामात् रक्षत्वित्यर्थः। यदनेन सम्यक् प्रार्थितं अस्मदीयं तन्मित्रादयो मामहंतां पूजयंतु। शिशा
तु शो तनूकरणे बहुलं छंदसीति विकरणस्य लुक्। अभ्यासस्य इत्त्वं बहुलं छंदसीत्यभ्यासस्येत्त्वं। अविष्टु अवतेर्लोटि
सिब्बहुलं लेटीति बहुलग्रहणात्। सिप इडागमः। षत्वष्टुत्वे॥ ॥इति प्रथमस्य सप्तमे द्वात्रिंशो वर्गः॥ ॥ईळे इति पंचविंशत्यृचं सप्तमं सूक्तं
आंगिरसस्य कुत्सस्यार्षं चतुर्विंशीपंचविंश्यौ त्रिष्टुभौ शिष्टा जगत्यः। आद्यः पादो द्यावापृथिव्योः द्वितीय अग्नेः शिष्टस्य सूक्तं
सूत्रितं च। अगन्मदंताश्विनौ द्यावापृथिवी इत्यागतमिति प्रवर्ग्याभिप्लवयोस्तत्सूक्तं सूत्रितं चेति। ग्रावाणेवेळे द्यावापृथिवी इत्याग
तमिति। आश्विनशस्त्रेप्येतस्यांतरनुवाक्या यागेनेत्यतिदेशात् तथा भार्यामसंतिचलायेति रिक्तौ घातलाघवात् अतिरिक्तौ वस्ये एतत्सूक्तं
यस्य पुत्रस्य इति खंडे सूत्रितं। ईळे द्यावापृथिवी उभा उ नूनमिति॥ ॥तत्र प्रथमामृचमाह॥ ॥ईळे द्यावापृथिवी पूर्वचित्तये अग्निं घर्मं सु
रुचं यामन्निष्टये। याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतं॥ ॥अहं द्यावापृथिवी द्यावापृथिव्यौ ईळे स्तौमि किमर्थं पू
र्वचित्तये पूर्वमेवाश्विनोः प्रज्ञापनाय ते पश्विनोः प्रत्यासन्ने यद्वा द्यावापृथिव्यौ अश्विनौ स्तौमि पूर्वचित्तये अन्यदीयात् स्तोत्रात् पूर्वमेवास्मदीयस्य
स्तोत्रस्य प्रबोधनाय। तथा चोक्तं। तत्काव अश्विनौ द्यावापृथिव्यावित्येक इति। अपि च यामन् यामनि अश्विनोरागमने सति इष्टये तदीययागा
र्थं आहवनीयरूपेण स्थापितमग्निं स्तौमीति शेषः। कीदृशमग्निं घर्मं प्रदीपनेन दीप्तं सुरुचं अतएव शोभनकांतियुक्तं। हे अश्विनौ भरे
संग्रामनामैतत् संग्रामे अंशाय युष्मदीयभागाय जयप्राप्त्यर्थं याभिरूतिभिः पालनैः सह गत्वा कारं कारशब्दः शंखवाद्याभिधायकः सं
ग्रामे कारं शब्दकारिणं शंखं जिन्वथः मुखेन पूरयथः मुखेना पूरयथः॥ ताभिः तादृशीरूतिभिः पालनैः सह ईति समुच्चयोस्मानपि सु
सु आगतमागच्छतं ईळे ईड स्तुतौ उत्तमैकवचनमिड् अदादित्वाच्छपो लुक् अनुदात्तेत्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। द्यावापृथिवी
द्यौश्च पृथिवी च द्यावापृथिव्यौ दिवो द्यावेति द्यावादेशः। आद्युदात्तो निपातितः पृथिवी ङीबंतोंतोदात्तः देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वम्।
अपृथिवीति पर्युदासान्नोत्तरपदेनुदात्तादाविति निषेधाभावः। वा छंदसीति पूर्वसवर्णदीर्घत्वं। पूर्वचित्तये चिती संज्ञाने अस्मादंतर्भावितण्य
र्थात् भावे क्तिन्। मंत्रे वृषेष्यादिना क्तिन उदात्तत्वं। सुरुचं रुच दीप्तावभिप्रीत्या च संपदादिलक्षणो भावे क्विप् शोभना रुक् यस्य नञ्सुभ्या
मित्युत्तरपदांतोदात्तत्वं। यामन्। या प्रापणे आतो मनिन्निति रस्य तयो बहुलमिति बहुलवचनाद्भावे मनिन् कारं क्रियते तेनेति कारः क
रणे घञ् कर्षात्वत इत्यंतोदात्तत्वं। जिन्वथः जिवि प्रीणनार्थः। अत्र प्रीणनहेतुभूतमापूरणं लक्ष्यते धननापूरिताद्धि पुरुषः प्रीतो भ

वति। इति ल्युट्। भौवादिक उपः। पितात् इत्यनुदात्तत्वं। तिङो अदुपदेशात् लसार्वधातुस्वरः। धिप्यते। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः॥ तत्र
भा॰पु॰ द्विव्यवहितेपि कार्यमिष्यत इत्युक्तं। ईषु इक्षः। मत्वर्थीति दीर्घत्वं। मत्त्व इति षत्वं। उषा अक्षीत्यादिना मत्वउकारस्य प्रकृतिभावः॥ इति मिथ अवंतमौ
२०२ वतिन स्वरत्व इत्यादिना वकारस्योपधायाश्च ऊठ् ईतीय तीत्यादिना निपातनान्नित्ति उदात्तत्वं गतं। गमेर्लोडि बहुलं छंदसीति विकरणस्य
लुक् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः॥ ॥द्वितीयामृचमाह॥ ॥युवोर्दानाय सुभरा अन्यत्रानासक्ताः स्तोतारः हे अश्विनौ युवा
युवयोः रथं आतस्थुः आतिष्ठंति प्राप्नुवंति। किमर्थं दानाय युष्मत्कर्तृकदानार्थं धनलाभायेत्यर्थः॥ तत्र दृष्टांतः॥ न च संतं यथा न्यायोप
तनवाक्येन युक्तं विपश्चितं मंतारं बुभुत्सितार्थं प्रतिपत्तये स्तोतारः प्राप्नुवंति तद्वत्। अपि च कर्मन्निष्टये यागार्थं प्रवृत्तानां धियः कर्मा
त्मनविघ्नसमाप्तानि पतान याभिरूतिभिः पालनैः अवथः रक्षथः। ताभिरित्यादि पूर्ववत्। वच सं अशु आदित्यान्नमानर्थे यस्य अत्र मंस
दृमतत्वानक मिमनिजनत्यादिना तु प्रत्ययः॥ ध्यायंतीति धियः स्तोतारः ध्यै चिंतायां। क्विप्प्रति क्विप्। वचिप्रच्छ इति दीर्घ ग्रहणानुवृत्तेः पूर्णात्संप्रसा
णं कर्मन् सुपां सुलुगिति सप्तम्या लुक् न ङिसंबुध्योरिति नलोपप्रतिषेधः॥ ॥तृतीयामृचमाह॥ ॥युवं तासां दिव्यस्य प्रशासने विशां क्षयथो
अमृतस्य मज्मना। याभिर्धेनुमस्वं पिन्वथो नरा ताभिरू षु॰ तं॥ ॥हे नरा नेतारावश्विनौ दिव्यस्य दिविभवस्य स्वर्गस्य मृत्यंमृतस्य अमृतस्य
सोमस्य पानेनोत्पन्नेन मज्मना बलेन युक्तौ युवं युवां तासां त्रिषु लोकेषु वर्तमानानां सर्वासां विशां प्रजानां प्रशासने प्रकृष्टानुशासने
शिक्षणे क्षयथः। ऐश्वर्यकर्मायं। दुशासने समर्थौ भवथः। मज्मना अन्येषामसाधारणेन बलेन विशां प्रजानामीश्वरौ भवथः। अमृत
स्य दृढस्य दृढस्य प्रशासन प्रदानयथः ईश्वरौ भवथः। अपि च याभिरूतिभिः रक्षाभिः अस्वं प्रसवासमर्थां धेनुं गां शयुनाम्न ऋषये
पिन्वथः। सिंचथः। पयसापूरितवंताविति अर्थः। ताभिरूतिभिरित्यादि पूर्ववत्। अस्वं। षूङ् प्राणिगर्भविमोचने। सवनं सूः। संपदादिलक्ष
णो भावे क्विप्। नास्ति सूः यस्याः इति असूः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। अस्मिन् अस्वमपीति यणादेशः। उदात्तस्वरितयोर्यण इति पर
स्यानुदात्तस्य स्वरितत्वं। पिन्वथः। पिवि सेचने। इदितो नुम्। भौवादिकः॥ ॥चतुर्थीमृचमाह॥ ॥याभिः परिज्मा तनयस्य मज्मना द्विमा
ता तूर्षु तरणिर्विभूषति। याभिस्त्रिमंतुरभवद्विचक्षणस्ताभि॰ तं॥ ॥परिज्मा परितो गंता वायुः तनयस्य आत्मीयस्य पुत्रस्याग्नेः
अग्निर्ह्यात्मरूपात्मना वर्तमानेन वायुना मथ्यमानः सन् जायते तथा च श्रूयते। अथवा यस्य आत्मीयस्य पुत्रस्याग्नेः अग्निर्हि यावन्न
स्यात्मनि वर्तमानेन वायुना मथ्यमानः सन् जायते तथा च प्राणापानयोः संधिः सव्यानः अतो यान्यन्यानि वीर्यवंति कर्माणि यथाग्नेर्मंथ
नमाजेः सरणं दृढस्य धनुष आयमनं ममिर्यत्प्राणं नयपानं स्तातिकरोति यत्किंच दृढादी वायुसकाशादुत्पन्नत्वादग्नेः पुत्रत्वं। आम्नायते च
। वायोरग्निरिति। एवं स्वपुत्रस्याग्नेर्मज्मना बलेन युक्तः सन्। द्विमाता द्वयोर्लोकयोर्द्विमाता अग्निः पृथिवीस्थानः वायुरंतरिक्षस्थानः उभ
योर्मिलितयोरंभयोर्निर्माता वा मुत्पत्तौ। यद्वा द्विमाता तेन रयस्य विशेषेण रूपां स्कलुगिति षष्ठ्यः सः द्विमातृत्यस्य द्वाभ्यामरणीभ्यां जात
स्य एवंभूतो वायुः हे अश्विनौ युतिभिर्हेतुभूतैः वाजिनः तूर्षु तरणिः तूर्षु त्वरमाणेषु मध्ये तरणिः अतिशयेन तरिता शीघ्रगामी विभूषति विभ २०२
वतिव्याप्तो भवति। यद्वा विशेषेण सर्वमलंकरोति अपि च त्रिमंतुः त्रयाणां मंता अभिविणक यज्ञ हविर्यज्ञ सोमयज्ञ पाकयज्ञात्मकाना

नयाभिर्युष्मदीयाभिरूतिभिः विचक्षणः विशिष्टज्ञानयुक्तो भवत्। ताभिः सर्वाभिरूतिभिः अस्मानागच्छतं। परिज्मा परिपूर्वादज गति
क्षेपणयोरित्यस्मात् श्वन्नुक्षन्नित्यादिना निपात्यते। तूर्षु त्वर संभ्रमे त्वरणयोः बहुलं छंदसीति पुयुक्तं हलि चेति दीर्घः। यद्वा तरतेः क्विप् तर
त्वरत्यादिना वकारोपधयोरूठ् इत्सावेकादेश उतिविभक्तेः उदात्तत्वं। विभूषति भव तेर्लेट् इग्गमः सिबहुलं लेटीति सिपूर्य इत्युभू पभलुक्
गौ भौवादिकः। विचक्षणः अनुदात्तेतश्च हलादेरिति युच्॥ ॥पंचमीमृचमाह॥ ॥याभी रेभं निवृतं सितमद्भ्य उद्वंदनमैरयतं स्वर्दृशे।
याभिः कण्वं प्रसिषासंतमावतं ताभि॰ तं॥ हे अश्विनौ याभिरूतिभिः रेभं एतत्संज्ञमृषिं निवृतं असुरैः कूपे प्रक्षिप्य निपातितं सितं बद्धं पि
पाशैर्बद्धं एवंभूतं ऋषिं अद्भ्यः सकाशात् उदैरयत उद्गमयतं तथा वंदनमेतत्संज्ञं ऋषिं च तथाभूतमुदैरयत्। किमर्थं इति स्वरा
दित्यं दृशे द्रष्टुं अतीव कृष्णं भस्करं अंधकारं प्रक्षिप्तं सिषासंतं संभक्तुं आलोकमिच्छंतं। याभिरूतिभिः प्राबलं प्रकर्षेण रक्षतं। ताभि
रित्यादि समानं रेभ रेभृ शब्दे रेभते स्तौतीति रेभः पचाद्यच्। निवृतं वृञ् वरणे अस्मात् तर्भावितण्यर्थात्कर्मणि निष्ठायां तिरतं
रउतिगतेः प्रकृतिस्वरत्वं सितं षिञ् बंधने। अद्भ्यः उडिदमित्यादिना विभक्तेरुदात्तत्वं। तं वंदनं वदि अभिवादनस्तुत्योः वंदते स्तौतीति वंद
नः। नंद्यादिलक्षणो ल्युः लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं। स्वरित्येन तदिव श्वादित्य श्व च साधारणनामधेयं। तदुक्तं यास्केन स्वरा
दित्यो भवति सु अरणः कईरणदृति स्वरादि निपातमित्यव्ययत्वात् सुपो लुक्। दृशे दृशे विख्ये चेति दृशेः तुमर्थे क प्रत्ययांतो निपात्य
तामिषासतं। वन षण संभक्तौ सनि सनीयंतर्धेत्यादिना विकल्पनादिट् भावः। जनसनखनां सनझलोरित्या त्वं। द्विर्भावे अभ्यासस्य
हस्वत्वं सन्यत इत्वं॥ ॥इतिप्रथमस्य सप्तमे त्रयस्त्रिंशो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥याभिरंतकं जसमानमारणे भुज्युं याभिरव्य
थिभिर्जिजिन्वथुः। याभिः कर्कंधुं वय्यं च जिन्वथस्ता॰॥ ॥अरणमगाधं तदुक्तगाधादिकूपादिनात असुरैः प्रक्षिप्तं जसमानं अंतकं नाम राजर्षिं
ह एतत्संज्ञं राजर्षिं हे अश्विनौ याभिरूतिभिः अवथः रक्षथः तथा भुज्युं सर्वस्य पालकं एतत्संज्ञं समुद्रमध्ये निमग्नं तुग्रपुत्रं राजर्षिं याभिरव्य
थिभिः रक्षणहेतुभूताभिः अव्यथिभिः व्यथारहिताभिः नौभिः जिजिन्वथुः युवामतर्पयतं। एतच्च मंत्रांतरेणुग्राह भुज्युमश्विना इमे धरत्यादिके
। यद्विसमाप्तमुल्ययन्न उप। आरण्य आद्युपूर्वादर्तेरुर्यु इज्जिन्वथुः जिवि प्रीणनार्थः लिट्युसि रूपं॥ ॥सप्तमीमृचमाह॥ ॥याभिः शुचंतिं
नसांसपंस दंत सघर्मं वा स्योनं मत्रयं। याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु॰॥ ॥हे अश्विनौ धनसाधनस्य संभक्तारं एतत्संज्ञमृषि
मानं सपंसदंत्यादि त्यस्मिन्निति संपदद्दृंशो भनस्य संस दया भिरूतिभिरकुरुत। तथा अत्रये याभिश्चोतिभिस्तमं प्रवृंजननंससतघंमसमिहावीरे
प्रौ ओम्या वतं सकरवत मकुरुतं। यथाग्निमसुखं भवति तथा हि। मेनादकेवत मग्निमवारयथा। यास्कपक्षेतु। अत्रये हविषामत्रयस्येयह
च अवलमरससंताभिः सर्वाभिरूतिभिरस्माना गच्छतं गच्छतं। कवदीनो ओ णादिकालिव धन सांजनसनखनमगनाविडबिड्वोरनु

भा॰प्र॰ नासिकृत्स्यादित्यातं। कृपदं शोभनसंसपस्य। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। ओम्यावंतं। आवतेस्त्वरथ्योपि दृश्यंत इति मनिन् अवतेरत्यादिनाव
कारो स्योपधायाश्च नु ऊगुणः। छंदसि चेत्यर्थेय प्रत्ययः। न स्त्विति इतिक्लोपः। येवाभावे कर्मणोतिरिति प्रकृतिभावस्तत्व्यत्ययेन न प्रवर्तते पृश्निगुंप्र
भ यो नानानर्णा गावो यस्य तं तं तथोक्तः। गोस्त्रियोरुपसर्जनस्येति गोशब्दस्य ह्रस्वत्वं। ॥ अष्टमीमृचमाह॥ ॥ याभिः शचीभिर्वृषणा परावृजं प्रां
२०३ धं श्रोणं चक्षस एतवे कृथः। याभिर्वर्तिकां ग्रसिताममुंचतं ताभि॰॥ ॥ हे वृषणा कामानां वर्षितारावश्विनौ याभिः शचीभिः कर्मभिः प्रज्ञाभिर्वा परा
वृजं एतन्नामकमृषिं परं गुसंसमयं गुप्तकृतं। तथा अंधं दृष्टिरहितं संतमृज्राश्वमृषिं चक्षसे प्रकाशाय सायणवेन दर्शनाय याभिरूतिभिः
प्रकृथः प्रकर्षेण कृतथः याभिश्च श्रोणां विगुणजानुकमेव संतमृषिं एतवे गंतुं प्रकृथः प्रकर्षेण कृतवंतो अपि च याभिरूतिभिः वर्तिकां चटकसदृशस्य
पक्षिणः स्त्रियं ग्रसितां वृकेण ग्रस्तां अमुंचतं वृकस्यास्यान्निर्मुक्तामकुरुतं। यास्कपक्षे तु वृकेणावि रतत्योतिवृक्षेण सूर्येण याभिर्ग्रस्तां वर्तिकां प्रत्यह
वर्तमानामुषसं तस्मादमोचयतमिति यो ऽयं। भिः सर्वाभिरूतिभिरूतिभिः रस्मान्प्यागच्छतां वृषणा वृषसेचने। कनिन्युवृषसंतस्माद्मारचयतमि
ति योत्तराभिः सर्वाभिरूतिभिर्जातिभिरस्मान प्यागच्छतां वृषणा वृषसेचने। कनिन्युवृषीत्यादिना कनिन्। परावृजं वृत्वा वर्जनं परावरणानि तपसापा
पं विनाशयतीति परावृक् क्विप्‌ चेति क्विप् कृदुत्तरपदप्रकृतिस्वरत्वं। एतवे तुमर्थे से सेनिति तवेन्प्रत्ययः। कृथः। डु कृञ् करणे। बहुलं छंदसीति वि
करणस्य लुक्॥ ॥ नवमीमृचमाह॥ ॥ याभिः सिंधुं मधुमंतमसश्चतं वसिष्ठं याभिरजरावजिन्वतं। याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभि॰॥ ॥ हे अश्वि
नौ सिंधुं स्यंदनशीलां नदीं मधुमंतं मधुसदृशेनोदकेन पूर्णां याभिरूतिभिरसश्चतं अगमयतं प्रावाहयतमित्यर्थः हे अजरौ जरारहितावश्विनौ
वसिष्ठमृषिं याभिरूतिभिः अजिन्वतं अप्रीणयतं याभिश्च कुत्सादीन् ऋषीन् आवतमरक्षतं ताभिः सर्वाभिरूतिभिरस्मानपि सम्यगागच्छतं। मधुमंतं मधु
मंतं मधुशब्दाद्भूम्नि मतुप्‌ लिंगव्यत्ययः। असश्चतं सश्चतिर्गतिकर्मा असमादंतं भाविन प्यर्थात् लुङ्॥ ॥ दशमीमृचमाह॥ ॥ याभिर्विश्पलां धनसा
मथर्व्यं सहस्रमीह्ळ आजावजिन्वतं। याभिर्वशमश्व्यं प्रेणिमावतं ताभि॰॥ ॥ हे अश्विनौ धनसाधनसंभजमानां अथर्व्यं अगच्छंतीं छिन्नजंघात्वेन
मंतुमसमर्थां अथर्वीतिर्गतिकर्मा विश्पलां एतत्संज्ञामागस्त्यपुरोहितः स्य खेलस्य संबंधिनीं सहस्रमीह्ळे मीळमिति धननामबहुधनोपेते आजौ सं
यामे याभिरूतिभिरजिन्वतं गंतुं समर्थां अकुरुतं। एतच्चरितं चरित्रं हि वेरिवाच्छेदि पर्णमित्यत्र विस्पष्टमभिहितं याभिश्च अश्व्यं अश्वाख्यस्य पुत्रं प्रे
णिं स्तुतेः प्रापयितारं वशं एतत्संज्ञमृषिं आवतमरक्षतं ताभिः सर्वाभिरूतिभिः सहास्मानभ्यागच्छतं प्रेणिं प्रेरयति प्रेरणप्रेषणे पृ औणादिक
प्रत्ययः॥ ॥ इति प्रथमस्य सप्तमे चतुर्स्त्रिंशो वर्गः॥ ॥ एकादशीमृचमाह॥ ॥ याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधुकोशो अक्षर
न्। कक्षीवंतं स्तोतारं याभिरावतं॥ ॥ उशिक्‌ कक्षीवतो दीर्घतमसः पत्नी तस्याः पुत्रो दीर्घश्रवा नाम कश्चिदृषिः अनावृष्ट्यां जीवनार्थं कराद्वाणिज्य
स चकार पर्जन्यार्थं अश्विनौ तुष्टावतौ चाश्विनौ मेघं प्रेरितवंतौ अयमर्थः पूर्वार्धे प्रतिपाद्यते। हे सुदानू शोभनदानावश्विनौ औशिजाय उशिक्पुत्राय
वणिजे वाणिज्यं कुर्वते दीर्घश्रवसे एतत्संज्ञाय ऋषये युष्मदीयाभिरूतिभिः हेतुभूताभिः कोशो मेघः मधु माधुर्योपेतं वृष्टिलक्षणं
रतमक्षरत् अभिचतयुष्मत्सामर्थ्यादपेक्षिताद् वृष्टिर्जातेत्यर्थः। अपि च औशिजः पुत्रं स्तोतारं कक्षीवंतं एतत्संज्ञमृषिं याभिरूतिभिरावतमरक्षतं ता २०३
भिः सर्वाभिरूतिभिः सहास्मानभ्यागच्छतं। कक्षीवत् कक्ष्या रज्जुरश्वस्य तया युक्तः कक्षीवान् आसंदीवदष्ठीवच्चक्रीवत्कक्षीवदिति निपात

403
1924

नाम्नुपोचसंप्रसारणं॥ ॥ द्वादशीमृचमाह॥ ॥ याभी रसां क्षोदसोद्नः पिपिन्वथुरनश्वं याभी रथमावतं जिषे। याभिस्त्रिशोक उस्रिया उदाजत
ताभिरुत्तरसानदीभवतिरसतेः शब्दकर्मण इति यास्कः हे अश्विनौ याभिरूतिभिर्हेतुभूताभिः रसादीनं अनारम्भ्याजलरहितां शीघ्रसावृत्तानि
मपि उनात् उद्नः उदकेन पिपिन्वथुः युवां पूरितवंतौ तथा अनश्वं अनद्भवं अश्वैर्वियुक्तं आनीयरथं जिषे जेतुं याभिरूतिभिरावतमगमयतां अपि च
याभिरूतिभिः कण्वपुत्रस्त्रिशोकऋषिः उस्रियाः अपहृताः गाः उदाजत उदगमयत अस्मरसकानगाः शोभाः ताभिः सर्वाभिरूतिभिः सहास्मा
नाथागच्छतं क्षोदसा क्षुदिर संप्रेषणे औणादिकः असुन् उद्नः तृतीयैकवचनस्य पांसपोभवंतीति आसादेशः॥ पद्दन्नित्यादिना उदकशब्द
स्योदन्भावः। भसंज्ञाया अल्लोपेनइत्याकारलोपः पिपिन्वथुः पिवि सेचने इदितान्नुम् जिपंतिजयेतुमर्थे सेसेनिति क्सप्रत्ययः। उदाजत अज
गतिक्षेपणयोः॥ ॥ त्रयोदशीमृचमाह॥ ॥ याभिः सूर्यं परियाथः परावति मंधातारं क्षैत्रपत्येष्वावतं। याभिर्विप्रं प्र भरद्वाजमावतं ताभि॰
॥ ॥ हे अश्विनौ परावति दूरदेशे स्थितं सूर्यं तमोरूपेण स्वर्भानुना वृतमादित्यं तस्मात्तमसो मोचयितुं याभिरूतिभिः परियाथः युवां परितोग
च्छथः तथा मंधातारमृषिं क्षेत्रपत्येषु क्षेत्राणां पतिरधिपतिः तत्संबंधिषु कर्मसु आवतमरक्षतां। अपि च याभिरूतिभिर्विप्रं मेधाविनं
भरद्वाजमृषिं अन्नप्रदानेन प्रावतं प्रकर्षेणारक्षतं ताभिः सर्वाभिरूतिभिस्सह रक्षणार्थं अस्मानभ्यागच्छतं। क्षेत्रपत्येषु ब्राह्मणादिषु गुण
तिगणत्वात् कर्मण्यर्थे ष्यञ्॥ ॥ चतुर्दशीमृचमाह॥ ॥ याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शंबरहत्य आवतं। याभिः पूर्भिद्ये त्रस
दस्युमावतं ताभिरू षु ऊतिभिरश्विनागतं॥ ॥ हे अश्विनौ महां महांतं अतिथिग्वं अतिथिभिर्गंतव्यं कशोजुवं असुरभीत्या उदकं प्रवेष्टुं
गंतारं एवंभूतं दिवोदासं एतत्संज्ञकं राजर्षिं शंबरहत्ये शंबरः आयुधं तस्य शंबरासुरः तस्य हननविषयभूते सति याभिरूतिभिरावतं
मरक्षतं अपि च याभिरूतिभिः पूर्भिद्ये पुराणि नगराणि भिद्यंते तस्मिन्निति पूर्भिद्यः संग्रामः तस्मिन् त्रसदस्युमेतत्संज्ञमृषिं पुरुकु
त्सपुत्रं आवतमरक्षतं। ताभिरित्यादि पूर्ववत् महां महांतमित्यस्य छांदसं वर्णलोपः कशोजुवं कशः इत्यनकनाम कशा गतिशातयोः अ
सन् कशासक उदकानि तु वर्तीति कशोजुः जुरिति सौत्रो धातुर्गत्यर्थः। क्विब्वचीत्यादिना क्विप् दीर्घः दिवोदासं दिवश्च दासे षष्ठ्या अलुग्वक्त
व्य इति अलुक् दिवोदासादीनां छंदस्युपसंख्यानमिति पूर्वपदाद्युदात्तत्वं शंबरहत्ये हनस्त च इति हंतेर्भावे क्यप् तत्संनियोगेन तकारां
तादेशश्च कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥ पंचदशीमृचमाह॥ ॥ याभिर्वम्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः। याभि
र्व्यश्वमुत पृथिमावतं ताभिरू षु॰॥ ॥ हे अश्विनौ वम्रं विखनसः पुत्रं एतत्संज्ञकमृषिं विपिपानं विविधं सोमं पिबंतं याभिरूतिभिरस्स
नदीदृशं उपस्तुतं समीपस्थैः सस्यकस्तुतमती स्तूयमानं तथा वित्तजानिं लब्धभार्यं कलिं एतत्संज्ञकमृषिं याभिरूतिभिः दुवस्यथः रक्ष
थः उत अपि च व्यश्वं पृथिं एतन्नामकं वेनं राजर्षिं याभिरूतिरावतमरक्षतं अन्यत्पूर्ववत्। विपिपानं पापानं ताच्छीलिकश्चानश्च बहुलं छंद
सीति शपः श्लुः बहुलं छंदसीत्यभ्यासस्येत्वं। उपस्तुतं स्तौतेः कर्मणि निष्ठा गतिरनंतर इति प्रकृतिस्वरत्वं वित्तजानिं वित्ता लब्धा जाया
या येन स तथोक्तः। जायाया निङिति समासांते निङादेशः लोपो व्योर्वलीति वलोपः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं व्यश्वं विगताश्वाय
स्मात् स तथोक्तः॥ बहुव्रीहिस्वरेण पूर्वपदस्योदात्तत्वं उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं॥ ॥ इति प्रथमस्य सप्त

प्रथमे पंचत्रिंशोवर्गः॥ ॥षोडशीमृचमाह॥ ॥याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः॥ याभिः शारीराजतं स्यूमरश्मये॥ हे नरा नेतारावश्विनौ पुरा पूर्वस्मिन्काले शयवे एतत्संज्ञकाय महर्षये याभिरूतिभिरीषथुः युवयं गमा

भा॰ प॰ ह। छितवंतौ हतवंतावित्यर्थः। किंतत सामर्थ्यं ज्ञायते चिन्नासः स्यात् विप्रतिपादितां तथात्रये महर्षये शतद्वारे यंत्रगृहे असुरैः पीड्य

२०४ मानाय संतापकारिणोग्नेः शीतेनोदकेन शीतकरणलक्षणं गातुं दुःखनिर्गमनहेतुभूतं मार्गं याभिरूतिभिर्युवामीषथुः। तथा पुन

त्रिःदिमेनाग्निं घंसमवारयथामिति त्वा दीप्रसिद्धं तथा मनवे एतत्संज्ञकाय राजर्षये याभिरूतिभिर्बीजवापादिधान्योत्पत्त्यादिरूपं गातुं दारि

द्र्यनिर्गमनहेतुं मार्गं युवां कृतवंतौ तथा च मंत्रांतरं। यवं वृकेणाश्विना वपंतेति। अपि च स्यूमरश्मये स्यूमः संबंधः रश्मिभिर्यस्य

तस्मै एतत्संज्ञकाय ऋषये याभिरूतिभिः शारीः शारो नाम वेणुविशेषः तद्विकारः भूता इषुः अजतं शत्रून् प्रति प्रेरयंतं ताभिरूति

भिरित्यादि पूर्ववत्। नरा नरे नयतेर्ऋदोरप् पुरस्कृत्वां कृत्य वुगिति विभक्तेराकारः शयवे शीङ् स्वप्ने भृमृशीतृ चरित्सरितनिधनिमिमस्जिभ्य उः। ईषथुः

इषु इच्छायां लिट् थसि असवर्णे इति यणे प्राप्ते अभ्यासस्येयङ्ङादेशाभावे सवर्णदीर्घः। शारीः विकारार्थे ज्ञारङ्शादनुदात्तेत

दिट्टाणञिति ङीप्। स्यूमरश्मये पुतंतुसंतानेति च रोणादिको मन्प्रत्ययः॥ बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥सप्तदशी

मृचमाह॥ ॥याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना॥ याभिः शर्यातमवथो महाधने ताभिरू षु॥ ॥हे अश्विना

जठरस्य जठरं उदरं भवति जग्धमस्मिन्ध्रियत इति यास्कः। जठरोपलक्षितस्य शरीरस्य मज्मना बलेन युक्तः सन् पठर्वा एतत्संज्ञो

राजर्षिः अज्मन् संग्रामनामैतत्। अज्मनि संग्रामे युष्मदीयाभिर्याभिरूतिभिरासमंतात् अदीदेत्। अदीप्यत दृष्टांतः। चितः काष्ठै

रभिचित इद्धः यज्ञगृहे ऋत्विग्भिः प्रज्वालितः अग्निर्यथा अग्निः प्रकाशते तद्वदित्यर्थः। अपि च शर्यातिमानवमीदृशं महत्स्वधर्मा

णं महाधने संग्रामनामैतत् महता धनेनोपेते संग्रामे याभिरवथो रक्षथः। ताभिरित्यादि गतं अदीदेत्। दीदेतिः दीप्तिकर्मा॥

अज्मन्। अज गतिक्षेपणयोः अजंति क्षिपंत्यस्मिन् बाणानिति अधिकरणे औणादिको मनिन् वलबाधर्धातुके विकल्पमिष्यत

इति वचनाद्वीभावाभावः सुपां सुलुगिति सप्तम्या लुक्। महाधने। आत्मतृतस्व इत्यात्वं॥ ॥अष्टादशीमृचमाह॥ ॥याभिरंगिरो मन

सा निरण्यथोग्रं गच्छतो विवरे गोअर्णसः॥ याभिर्मनुं शूरमिषा समावतं ताभिरू षु॥ ॥अंगिर इत्येतदामंत्रितवाक्यादिर्भूतं

नेवा त्मानं संबोध्य स्तोतारमेव प्रेरयति। हे अंगिरः अंगिरसां गोत्रजस्त्वमश्विनौ स्तुहि हे अश्विनौ मनसा मननीयेन स्तोत्रेण त्रीतौ सं

तौ युवां याभिरूतिभिर्निरण्यथः स्तोतॄन्नितरां रमयथः। यद्वा मनसैव करणभूतेन रमयथः। तथा गोअर्णसः गोरूपस्य अरणी

यस्य धनस्य पाणिभिः गुहायां निहतस्य विवरे विवरणे गुहाद्वारस्योद्घाटनेन प्रकाशनेन प्रकाशने विषयभूते सति याभिरूतिभिः २०४

सह युवामग्रं सर्वेभ्योदेवेभ्यः पुरस्ताद्गच्छथः। अपि च शूरं वीरं मनुं इषा पृथिव्या गुप्तेन यवादिधान्यरूपेणान्नेन याभि

रूतिभिः समावतं सम्यगरक्षितं ताभिः सर्वाभिरूतिभिः सहास्मान्याग्रच्छतं निरण्यथः निरमयथ इत्यस्य वर्णव्यापत्त्या एतद्रूपं

विवरे गह इत्यस्मिन्गमाम्श्वेति भावे अप्। थ्यथादिनोत्तरपदांतोदात्तत्वं॥ ॥एकोनविंशीमृचमाह॥ ॥याभिः पत्नीर्विमदाय न्यू

हथुरा घ वा याभिररुणीरशिक्षतं। याभिः सुदास ऊहथुः सुदेव्यं ताभि॰॥ ॥हे अश्विनौ विमदाय एतन्नाम्ने ऋषये याभिर्युष्मदीया

भिरूतिभिः पत्नीः भार्याः पुरुमित्रस्य दुहितॄन्न्यूहथुः नितरां युवां प्रापितवंतौ घेति पादपूरणः। तथा याभिरूतिभिः अरुणीः अ

रुणवर्णा अरोचमाना गा आभिमुख्येनाशिक्षतं अदत्तं तथा पिजवनपुत्राय सुदासे कल्याणदानाय राज्ञे सुदेव्यं प्रशस्तं धनं याभिरू

तिभिः ऊहथुः प्रापितवंतौ ताभिरित्यादि गतं पत्नीः अमो व्यत्ययेन शसादेशः। न्यूहथुः वह प्रापणे अयजादित्वात्संप्रसारणं।

द्विर्वचनादिः सुदासे शोभनं ददाति इति सुदाः। असुन् शुद्धे संस्थितादिता यज्ञतित्स्वरितं॥ ॥विंशीमृचमाह॥ ॥याभिः शंताती भवथो

ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुं॥ ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु॥ ॥हे अश्विनौ ददाशुषे हवींषि दत्तवते यजमा

नाय याभिरूतिभिः शंताती सुखस्य कर्तारौ भवथः। याभिश्चोतिभिर्भुज्युं तुग्रस्य पुत्रमवथः। याभिश्चाध्रिगुं अध्रिगुर्देवानां शमिता अध्रिगुर्वा

पायुश्च। उभौ देवानां शमितारौ इति श्रुतेः। अपि च। ऋतस्तुभं ऋतं सत्यं स्तोमस्तुभं धारयती ऋतस्तुभः तत्संज्ञं ऋषिं ओम्यावतीं ओम्येति सुखना

मतद्युक्तां सुभरां सुखेन भरणीयामिषं याभिरूतिभिः प्रापयथः ताभिः सर्वाभिरूतिभिः सहास्मान्याग्रच्छतं शंताती शिवशमरिष्टस्य कर इति

तातिल् प्रत्ययः लिति प्रत्ययात्पूर्वस्योदात्तत्वं ददाशुषे दाश्वान्साह्वानिति क्वसुः वसोः संप्रसारणमिति संप्रसारणं शासिवसिघसीनां चेति सत्वं।

॥ ॥इति प्रथमस्य सप्तमे षट्त्रिंशो वर्गः॥ ॥एकविंशीमृचमाह॥ ॥याभिः कृशानुमसने दुवस्यथो जवे याभिर्यूनो अर्वंतमावतं॥ मधु प्रियं भर

थो यत्सरड्भ्यस्ताभिरू॰॥ ॥स्वर्गादिषु सोमपालेषु मध्ये कृशानुर्नाम कः सोमपालः तथा चैतिरीयकं। कृशानुः सुरशान वै तेश्वः सोमक्रयणा इति

तं कृशानुं असने इषूणां क्षेपणे निमित्तभूते असनः संग्रामः तस्मिन्संग्रामे हे अश्विनौ याभिरूतिभिः दुवस्यथो रक्षथः तथा याभिश्च जवे वेगे प्रवृत्ते

यूनस्तरुणस्य पुरुकुत्सस्य अर्वंतमश्वं अनतमरक्षतां अपि च यन्मधु क्षौद्रं प्रियं सर्वेषामनुकूलं वेधं तत्सरड्भ्यो मधुमक्षिकाभ्यः याभिश्चोति

भिर्भरथ संपादयथः ताभि सर्वाभिरूतिभिः सहास्मान्याग्रच्छतं असने असु क्षेपणे करणाधिकरणयोश्चेत्यधिकरणे ल्युट्। सरड्भ्यः सरंतीत्य

र्थे रड्॥ ॥द्वाविंशीमृचमाह॥ ॥याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः॥ याभी रथाँ अवथो याभिरर्वतस्ता॰॥ ॥हे अश्वि

नौ गोषुयुधं गोविषयं युधं कुर्वंतं नरं यज्ञस्य नेतारं यजमानं याभिरूतिभिर्नृषाह्ये नृभिः सोढव्ये संग्रामे जिन्वथः प्रीणयथ रक्षथ इत्यर्थः। तथा

क्षेत्रस्य गृहादिरूपस्य तनयस्य अपत्यधनवतां तनयस्य धनस्य च साता सातये लाभं जनार्थे याभिर्यजमानं रक्षथः याभिश्च यजमानानां रथान्

रक्षथः तदीयान् अर्वतोश्वांश्च याभिरवथः ताभिः सर्वाभिरूतिभिः सहास्मानथो याग्रच्छतं। गोषुयुधं युध संप्रहारे गोषु युध्यत इति गोषु

युतत्पुरुषे कृति बहुलमिति लुक्। नृषाह्ये षह मर्षणे अन्येभ्योपि दृश्यत इति साह्यः। अन्येषामपि दृश्यत इति संहितिको दीर्घः। कृदुत्तरपदप्रकृतिस्वरत्वं। सा

तावन पण संभक्तौ भावे क्तिन्। जनसनखनां सञ्झलोरित्यात्वं। सुपां सुलुगिति चतुर्थ्या डादेशः।

त्रयोविंशीमृचमाह॥ ॥याभिः कुत्समार्जुनेयं शतक्रतू प्रतुर्वीतिं प्र च दभीतिमावतं॥ याभिर्ध्वसंतिं पुरुषंतिमावतं ताभिरू षु॰॥ ॥

अ०७०
२०७

हे शतक्रतू बहुविधकर्माणावश्विनौ आर्जुनेयं तद्गिरस्यनाम । तथाच वाजसनेयकं । एतद्वा इंद्रस्य गुह्यं नाम यदर्जुन इति । तस्य पुत्रं कुत्सं याभिरूति-
भिः प्रावतं प्रकर्षेण रक्षतं तथा तुर्वीतिं दभीतिं च याभिरूतिभिः प्रावतं । अपिच याभिर्ध्वसंतिं पुरुषंतिं [illegible] आवतं रक्षतं
ताभिः सर्वाभिरूतिभिः सहास्मानपि सु आगच्छतं । आर्जुनेयं ऋज्वादिभ्यश्चेति चशब्दोनुक्तसमुच्चयार्थः इत्यनत्वात् ढक् । तुर्वीतिं तुर्वी हिंसार्थः
[illegible] तूर्वतीति तुर्वीतिः । औणादिक ईप्रत्ययः । दभीतिं दंभु दंभने औणादिकः क्तिप्रत्ययः । ध्वसंतिं ध्वनसः गतौ औणादिकः [illegible]
नि अनिदितामिति नलोपः । [illegible] पुरुषंतिं पुरु सनोति ददातीति पुरुषंतिः । [illegible] वसंतौ च संज्ञायामिति [illegible] नातिर्विदीर्घश्चेति अनुनासिक-
लोपाय धातोर्दीर्घो निषेधः ॥ ॥ चतुर्विंशीमृचमाह ॥ ॥ अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषां । अद्यूत्येवसे नि ह्वये वां वृ-
धे च नो भवतं वाजसातौ ॥ ॥ हे अश्विनौ अस्मे अस्माकं वाचं अप्नस्वतीं अप्न इति कर्मनाम विहितैः कर्मभिः संयुक्तां कृतं कुरुतं । तथा [illegible]
षां वृद्धिं [illegible] दस्रौ शत्रूणामुपक्षपयितारौ अश्विनौ वेदार्थज्ञानसमर्थां कुरुतं । अपिच । [illegible]
[illegible] युवां अवसे रक्षणाय नि ह्वये नितरामाह्वये । कदा । अद्यूत्ये द्योतनरहिते प्रकाशनरहिते रात्रेः पश्चिमे यामे । [illegible]
[illegible] आहूतौ च युवां वाजसातौ वाजस्यान्नस्य संभजने । यद्वा संग्रामे [illegible]
अप्नस्वतीं अपः कर्माख्यायां ह्रस्वो नुट् चेत्यसुन् नुडागमश्च तदस्यास्तीति मतुप् । मादुपधाया इति मतुपो वत्वं । [illegible]
तरूलोपाभावः । अस्मे सुपां सुलुगिति षष्ठ्याः शे आदेशः । कृतं करोतेः लोटि बहुलं छंदसीति विकरणस्य लुक् । [illegible]
[illegible] भावे ण्यत् [illegible] द्युत्यं प्रकाशशून्यमित्यर्थः [illegible] स्वरितत्वं ॥ नि ह्वये निसमुपविभ्यो ह्वः
इत्यात्मनेपदं ॥ वृधे वृधु वृद्धौ संपदादिलक्षणो भावे क्विप् सावेकाच इति विभक्तेरुदात्तत्वं ॥ ॥ पंचविंशीमृचमाह ॥ ॥ द्युभिरक्तुभिः
परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ॥ हे अश्विना द्युभिरहोभिः
अक्तुभी रात्रिभिश्च अस्मान् [illegible] परिपात परितो रक्षतं सर्वदास्मान् रक्षतमित्यर्थः । तथा अरिष्टेभिः अहिंसितैः सौभगेभिः सुभग-
त्वादिकैर्धनैरस्मान् रक्षतं [illegible] अस्माभिः प्रार्थितं तन्नो मदीयं तन्मित्रादयः [illegible] मामहंतां [illegible]
भिः [illegible] इति [illegible] विभक्त्युदात्तस्य प्रतिषेधः । अरिष्टेभिः रिष हिंसायां निष्ठायां [illegible] नञ्समासे अव्यय-
पूर्वपदप्रकृतिस्वरत्वं । बहुलं छंदसीति भिस ऐस भावः । अश्विना सुपां सुलुगिति विभक्तेराकारः । आमंत्रितस्य चेति सर्वानुदात्तत्वं । सौभगे-
भिः शोभनो भगः श्रीर्यस्यासौ सुभगः तस्य भावः सौभगं सुभगान्मंत्र इत्युद्गात्रादिषु पाठादञ्प्रत्ययः । हृद्भगसिंध्वंते पूर्वपदस्य चेत्यु-
भयपदवृद्धिर्न भवति । तस्य सर्वे विधयश्छंदसि विकल्प्यंत इति विकल्पितत्वात् । पूर्वपदे सभावः । नित्यादिर्नित्यमित्याद्युदात्तत्वं ॥ २५ ॥ २०७
इति प्रथमस्य सप्तमे सप्तत्रिंशो वर्गः ॥ ॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके सप्त-
मोध्यायः ॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

श्रीगणेशाय नमः ॥ ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योखिलं जगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ ॐ इत्थं सप्तममध्यायं
व्याख्याय अष्टमोध्यायो व्याख्यातुमारभ्यते ॥ ॥ श्री ॥ ॥ प्रथमे मंडले षोडशेनुवाके सप्त सूक्तानि गतानि । इदमिति विंशत्यृचमष्टमं सू-
क्तं । अत्रानुक्रम्यते । इदं विंशतिरुषस्यं द्वितीयोर्धर्चो रात्र्याश्चेति । ऋषिश्चान्यस्मादिति परिभाषयानुवृत्तेराङ्गिरसः कुत्स ऋषिः अनादेश-
परिभाषया त्रिष्टुप् छंदः उषो देवता द्वितीयस्यार्धर्चस्य रात्रिरपि । प्रातरनुवाक उषस्ये क्रतौ त्रैष्टुभे छंदस्येतत्सूक्तं । सूत्रितं च इदं श्रे-
ष्ठं पृथू रथ इति सूक्ते इति । आश्विनशस्त्रे चेदं सूक्तं प्रातरनुवाकातिदेशात् ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चि-
त्रः प्रकेतो अजनिष्ट विभ्वा । यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् ॥ ॥ ज्योतिषां नक्षत्रादीनां द्योतमानानां मध्ये इदमुषआ-
ख्यं ज्योतिः श्रेष्ठं प्रशस्यतमं अभ्यर्कातिशायि इति चेत् । उच्यते । नक्षत्रादिकं ज्योतिः स्वात्मानमेव प्रकाशयति नान्यत् । चंद्रस्य [illegible]
काशयति तथापि न विस्पष्टप्रकाशः । [illegible] ज्योतिर्युगपदेव सर्वस्य जगतोंधकारनिवारणेन विस्पष्टेन प्रकाशकं अतः प्रशस्यतममि-
त्यर्थः । तादृशं ज्योतिरागात् पूर्वस्यां दिश्यागमत् । आगते च तस्मिन् चित्रश्चायनीयः प्रकेतः अंधकारावृतस्य सर्वस्य पदार्थस्य प्रज्ञाप-
कः तदीयो रश्मिः विभ्वा विभुर्व्याप्तः सन् अजनिष्ट प्रादुरभूत् । किंच यथा रात्रिः स्वयं सवितुः सूर्यस्य सकाशात् प्रसूता उत्पन्ना सूर्योपि
[illegible] गच्छन् रात्रिं जनयति । तस्मिन्नस्तमिते रात्रेरुत्पत्तिभावात् एवमेव रात्रिरपि उषसे सवाय उषस उत्पत्तये तदर्थं योनिं स्थानं स्वकी-
यापरभागलक्षणं आरैक् आरेचितवती कल्पितवतीत्यर्थः । यद्वा प्रसूता रात्रिसकाशात् उत्पन्ना उषाः सवितुः सूर्यस्य सवाय प्रस-
वाय जन्मने यथा भवति एवं रात्रिरपि उषसो जन्मने तदर्थं योनिं स्वापरभागलक्षणं स्थानं क्षतवती । आत्मा निरुक्तं । इदं श्रेष्ठं ज्योतिषां ज्यो-
तिरागमत् चित्रं प्रकेतनं प्रज्ञाततमम् अजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरुषसे योनिमरिचत् स्थानं [illegible] श्रेष्ठं प्रश-
स्यशब्दादिष्ठनि [illegible] प्रशस्यस्य श्र इति श्रादेशः । प्रकेतः प्रज्ञानमिति [illegible] भावादिलोपाभावः । अगात् एतेर्लुङि इणो गा लुङि इति
गादेशः गातिस्थेति सिचो लुक् । प्रकेतः कित ज्ञाने अंतर्भावितण्यर्थात् कर्मणि घञ् थाथादिनोत्तरपदांतोदात्तत्वं । अजनिष्ट जनी प्रादुर्भावे लु-
ङि सिच इडागमः । विभ्वा विप्रसंभ्यो ड्वसंज्ञायामिति भवतेर्डुप्रत्ययः सुपां सुलुगित्यादिना सोराकारादेशः । कपांति यणादेशस्य नभूसुधियोरिति प्र-
तिषेधाभावश्छंदस्युभयथेति यणादेशः । [illegible] यद्वा विपूर्वात् [illegible] तेरौणादिकोऽन्प्रत्ययः नित्यादिरुदात्तत्वं । प्रसूता षूङ् प्राणिप्रसवे क-
र्मणि निष्ठा गतिरनंतर इति गतेः प्रकृतिस्वरत्वं सवाय [illegible] नानार्थ [illegible] अण् [illegible] अनुनासिक
इति संहितायां मकारः सानुनासिकः एवेति निपातस्य चेति संहितायां दीर्घः । रात्रीरात्रेश्चाजसाविति ङीप् तस्य चेति इकारलोपः । वर्णव्यापत्त्या [illegible]
नपकारस्य [illegible] ॥ ॥ द्वितीयामृचमाह ॥ ॥ रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ॥ समानबंधू अमृते अनूची द्यावा वर्णं चरत
आमिनाने ॥ ॥ श्वेत्या [illegible] उषा नामधेयं रुशती दीप्यमाना श्वेतवर्णा वा रुशद्वत्सा रुशन् दीप्यः सूर्यो वत्सो यस्याः सा तथोक्ता यथा मातुः समीपे वत्सः सं-
चरति एवं उषसः समीपे सूर्यस्यावस्थानात् [illegible] यथा वत्सो मातुः स्तन्यरसं पिबति एवमुषस्यो रश्मिरसं पिबन् वत्स इव
[illegible] तादृशी सती अगात् आगतवती आगता [illegible] अस्याः उषसः कृष्णा कृष्णवर्णा रात्रिः सदनानि स्थानानि स्वकीयात्स्थानात्पश्चिमभागलक्षणानि अ-

407
1924

भा॰प्र॰ रेकुआरेचितवतीकल्पियतवतीदत्तवतीत्यर्थः। उक्त्येनसदृपूरणं। अपि चित्रेण नानाविधेन वत्सेन समानवर्णेन सूर्येण सहगोप्याः उक्ता
द्यासूर्येण सह संबध्नीय था उषा उदेष्यतः सूर्येण संबद्धा एवं रात्रिरप्यस्तं यतः सूर्येण संबद्धा अमृते मरणरहिते काले कृतयानि आचरती
२०६ अर्वचीप्रथमं रात्रिः पश्चादुपाइत्येनेन क्रमेण गच्छंत्यौ यद्वा सूर्यगत्यनुसारेण गच्छंत्यौ एवंभूते वर्णं सर्वेषां प्राणिनां रूपं लक्ष्यं यत्ताविवे तस्यां द्या
वा द्योतमाने चरतः प्रतिदिनं समावर्तेते। यद्वा द्यावा नभसांतरिक्षमार्गेण चरतः प्रतिदिनं संगच्छथः अत्र निरुक्तं। रुशद्वत्सा सूर्यवत्सा रुशदिति व
र्णनाम रोचतेर्ज्वलतिकर्मणः सूर्यमस्या वत्समाह साहचर्याद्रसहरणाद्वा रुशती श्वेत्यागात्श्वेतते रचित्रूकृष्णा सद्मान्यस्याः कृष्णवर्णारात्रिः
कृष्णं कृष्यतेर्निकृष्टो वर्णो थिने संस्मेति समानबंधू समानबंधने अमृते अमरणधर्माणौ अनूची अनूच्याविति रेतरमभिप्रेत्य द्यावावर्णं च
रतस्ते एव द्यावौ द्योतना अपि वा द्यावा चरतस्तया सह चरत इति स्यादामिनाने अमिन्वाने अन्योन्यस्याध्यात्मं कुर्वाणे इति श्वेत्या श्वेता वर्णे
अस्मात्यंतात् अचोदयति भावे यतृणिलोपः। अत्रो आदित्यान्म त्वर्थीयो अच अमृते मृतं मरणमनयोर्नास्तीति बहुव्रीहौ नञ
रमरभिन्नमृता इत्यु दात्तत्वं। अनूची अनुपूर्वादंचतेः ऋत्विगित्यादिनाक्विन् अनिदितामिति नलोपः। अचंते श्वोपसंख्यानमिति ङी
प अचइत्यकारलोपे चौ इति दीर्घः। अनुदात्तस्य च यत्रोदात्तलोप इति ङीप उदात्तत्वं। कपीं सकलुगिति विभक्तेर्लुक्। आमिनाने मीङ्
हिंसायां क्रैयादिकः शानच् मीनातेर्निगम इति ह्रस्वत्वं॥ ॥ तृतीयामृचमाह॥ ॥ समानो अध्वा स्वस्रोरनंतस्तमन्यान्या चरतो
देवशिष्टे॥ न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे॥ ॥ स्वस्रोर्भगिन्योरात्र्युषसोः अध्वा संचरणसाधनभूतो मार्गः
समान एक एव येनाकाशमार्गेण उषा निर्गच्छति तेनैव रात्रिरपि स च मार्गो अनंतः अवसानरहितः तं मार्गं देवशिष्टे देवेन द्योतमाने
न सूर्येणानुशिष्टे अनुशिष्टे ते सत्य सत्ये अन्यान्या एकैका चरतः क्रमेण गच्छतः अपि च सुमेके शोभनमेहने सर्वेषामुत्पादकत्वा
तयोभनप्रतननेन नक्तोषासा रात्रिरपि च विरूपे तमः प्रकाशलक्षणाभ्यां विरुद्धरूपाभ्यां युक्ते अपि च समनसा समानमनसा एक
मत्यं प्राप्ते सत्यौ न मेथेते परस्परं न हिंस्तः तथा न तस्थतुः कदाचिदपि न तिष्ठतः सर्वदा लोकानुग्रहार्थं गच्छत इत्यर्थः। अन्यान्या
कर्मव्यतिहारे सर्वनाम्नो द्विर्भवत इति वक्तव्यं समासवच्च बहुलमित्यन्याशब्दस्य द्विर्भावः। तस्य परमाम्रेडितमित्याम्रेडितसंज्ञायां
अनुदात्तं च इत्याम्रेडितानुदात्तत्वं देवशिष्टे शासु अनुशिष्टौ अस्मात्कर्मणि निष्ठा यस्य विभाषेतीट्प्रतिषेधः। शास इद् हलोरिति
उपधाया इत्वं शासिवसिघसीनां चेति षत्वं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। मेथेते मिथ मेधृ मेथृ मेधृ
हिंसनयोः भौवादिकः अनुदात्तेत् कर्मकर्मि हसेन भावे घञ् शोभना मेहा ययोस्ते व्यत्ययेन ककारः। उत्तरपदस्य निन्त्वस्वरेणाद्यु
दात्तत्वं। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। नक्तोषसा कपीं सकलुगिति विभक्तेराकारः। अन्येषामपि दृश्यत इति संहितायां
मुपधा दीर्घः॥ ॥ चतुर्थीमृचमाह॥ ॥ भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः। प्रार्प्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुव २०६
नानि विश्वा॥ ॥ भास्वती विशिष्टप्रकाशेन युक्ता सूनृतानामिति वाङ्नाम सूनृतानां वाचां नेत्री उत्पादयित्री उषसः प्रादुर्भावानंतरं हि पक्षिप
मृगादयः सर्वे शब्दं कुर्वंति एवंभूता उषाः अचेति अस्माभिः रज्ञायि चित्रा चयनीयाज्ञानासौ नास्माकं दुरो द्वाराणि तमसा तिरोहिता

निच्याः व्यवृणोत यथास्माभिर्दृश्यते तथा तमांसि वार्यप्रकाशयतीत्यर्थः। अपि च जगत्सर्वं भुवनं प्राप्य प्रकाशं गमयित्वा नोऽस्माकं रायो धनानि
नानि व्यख्यत विशिष्टप्रकाशेन युक्तान्यकरोत् उत्येतेसदपूरणं सेषोषाः विश्वा भुवनानि सर्वाणि भुवनानि तमसा तिरोहितानि आविष्य 409
मानकल्यानि अजीगः उद्गिरति स्वमुखान्निर्गमयति स्वकीयेन प्रकाशेन तमांसि सार्यपुनरप्यर्चनिकरोतीत्यर्थः। नेत्राणी अप्रापण 1924
तत्त्व ऋन्नेभ्यो ङीप् उदात्तं यणोदयपूर्वादिति ङीप उदात्तत्वं। अचेति चिती संज्ञाने दुःखः द्वारस्य च स्वरयोर्मतो वहुलमिति चुनाः संप्रसा
रणं। आवः वृञ् वरणे लुङि मंत्रे घसेति च्लेर्लुक् गुणः हल्ङ्याभ्य इति लोपः। छंदस्यपि दृश्यत इत्याडागमः। प्राप्या जगतो णत्वसिंहीत्यादि
नायुकूसमासेन त्रपूर्वलोप्यप। अरव्यत ख्या प्रकथने लुङि अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः अजीगः गॄ निगरणे लङि तिपि बहुलं छ
दसीति विकरणस्य श्लुः द्विर्वचनोरदत्वहत्वादिशेषाः अर्तिपिपर्त्योश्च बहुलं छंदसीत्यासस्येत्वं। छांदसत्वाकारः। यद्वा अस्माण्यं
तालुदिङ्ग्भिर्भान सन्वत् इत्विलदीर्घः छांदसत्वात्लोपः॥ ॥ पंचमीमृचमाह॥ ॥ जिह्मश्ये३ चरितवे मघोन्याभोगय इष्टये राय उ त्वं॥
दभ्रं पश्यद्भ्य उर्विया विचक्ष उषा अजीगर्भुवनानि विश्वा॥ ॥ मघोनी धनसोनमघो मघोनी धनवती उषाः जिह्मश्ये जिह्मं वक्रं
स यितायपुरुषाय चरितवे चरितुं गमनाद्युत्थाय स्वापेक्षितं प्रति गंतुं व्युच्छंती भवति त्वं अयमेकशब्दपर्यायः सर्वनामशब्दः य
द्वा हल इति विनिपहार्थयं सर्वनामानुदात्तत्वमिति। त्वमेकं प्रति आभोगये आभोग्याय ज्योतिष्टोमविषयार्थं तथा अन्यं प्रति इष्टये यागार्थं त
था अन्यं प्रति राये धनार्थं व्युच्छंतीति शेषः। दभ्रार्थं अपि च दभ्रं अल्पं पश्यद्भ्यः अंधकारवृतत्वेनईषद्दृग्भ्यो मनुष्येभ्यः विचक्षे वि
शिष्टप्रकाशाय व्युच्छंती उर्विया विस्तीर्णा उषाः सर्वाणि भूतजातानि तमसा तिरोहितानि प्रकाशेनोद्गीर्णानि चकरोति जिह्मश्ये जिह्मं
जिह्मं शेते इति जिह्मशीः शीङ् स्वप्ने क्विप् कृदुत्तरपद प्रकृतिस्वरत्वं। एरनेकाच इति यण् उदात्तस्वरितयोर्यण इति विभक्तेः स्वरि
तत्वं अभोगय ग्रस्थे तुमर्थे वचनप्रकारोपजनः छांदसः यद्वा आङ्पूर्वात् भुजो बहुलवचनादौणादिकः किप्रत्ययः कृत्वं। उर्विया
इयाडियाजीकाराणामुपसंख्यानमिति उर्वी इत्यस्या दुत्तरस्य सो इयाजादेशः विचक्षे चक्षिङ् व्यक्तायां वाचि चक्षिधातोरस्मात्संपदादिल
क्षणा भावे क्विप्॥ ॥ इति प्रथमस्याष्टमप्रथमो वर्गः॥ ॥ षष्ठीमृचमाह॥ ॥ क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै॥
विसदृशा जीविताभिप्रचक्ष उषा अजीगर्भुवनानि विश्वा॥ ॥ क्षत्राय धननामैतत् धनार्थं त्वमेकं प्रति उषाः व्युच्छंतीति शेषः। तथा श्रवसे अन्नार्थं
त्वमेकं प्रति व्युच्छंती तथा महीयै महत्यै इष्टये अग्निष्टोमादिमहायज्ञार्थं त्वमेकं प्रति व्युच्छंती तथार्थमिव अपेक्षितमर्थं प्रति इत्यै गमनार्थं त्वमेकं प्रति
व्युच्छंती अपि च विसदृशा विलक्षणानि नानारूपाणि जीवितानि जीवनोपायभूतानि कृषिवाणिज्यादीनि अभिप्रचक्षे अभिमुख्येन प्रकाशयितुं
व्युच्छंती उषाः सर्वाणि भूतजातानि तमसा निगीर्णान्यजीगः प्रकाशेनोद्गीर्णानि अकरोत्। त्वं त्व सममसिमन्मे मत्यनुज्ञानीति सर्वानुदात्तत्वं छांद
संईकारोपजनः यद्वा महीशब्दादुत्तरस्य चतुर्थ्येकवचनस्य यकारेत्यस्य च नयादागमः छांदसमन्वात्यं च सदृशात् दृशिषु दृशोना लो
चने कञ्च्यत्र समानान्ययोश्चेति चकारात् दृशेः कञ्च समासे विसदृशानि नञ्चिसदृशानि सभावः विगतसादृश्यानि विसदृशानि डोः छंदसि बहुलमि
ति लोपः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अभिप्रचक्षे चक्षेस्तुमर्थे सेसेनसेति सेन्प्रत्ययः ख्यांसंयोगाद्योरिति कलोपः इत्युत्तर॥

ऋ०प्र०
२०७

॥ ॥सप्तमीमृचमाह॥ ॥एषा दिवो दुहिता प्रत्यदर्शि व्युच्छंती युवतिः शुक्रवासाः॥ विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ॥ ॥दिवो दु
हिता स्वर्गादुत्पन्ना यातस्य हि पूर्वार्धे दृश्या उत्पद्यते। सेषा व्युच्छंती तमो वर्जयंती प्रत्यदर्शि सर्वैः प्राणिभिर्दृष्टाभूत् वा दृश्येता युवतिः याव
यित्री फलानां पुरुषैः प्रापयित्री नित्यं यौवनोपेता शुक्रवासाः श्वेतवसना निर्मलदीप्तिर्वा नतथा विश्वस्य सर्वस्य पृथिव्याः संबंधिनो वस्वो धन
स्य ईशाना ईश्वरी हे सुभगे शोभनधने उषः ता दृशी त्वं अद्यास्मिन्काले इहास्मिन्देवयजनदेशे व्युच्छ तमो विवासय वर्जयेत्यर्थः॥ दिवः॥ ऊ
दृमितिविभक्तेरुदात्तत्वं। व्युच्छंती उच्छि विवासे विवासो वर्जनं तौदादिकः युवतिः यूनस्तिः शुक्रवासाः वस आच्छादने वस्ते सर्वमाच्छादयतीति
प्रकाशो वासः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। ईशाना ईश ऐश्वर्ये अदादित्वाच्छपो लुक्। अनुदात्तत्वात्सार्वधातुकस्वरः। पार्थिवस्य पृथि
व्या अञ् जाविति प्राग्दीव्यतीयः अञ् प्रत्ययः वस्वः लिंगव्यत्ययः। घेर्ङितीति गुणस्य जसादिषु छंदसि वा वचनमिति विकल्पितत्वाद्भाव
यणादेशः॥ ॥अष्टमीमृचमाह॥ ॥परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनां॥ व्युच्छंती जीवमुदीरयंत्युषा मृतं कंचन बोधयंती॥
धयंति॥ ॥परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनां व्युच्छंती जीवमुदीरयंत्युषा मृतं कंचन बाधयंती ॥ परा यतीनां परागच्छंती
नामतीतानामुषसां संबंधि पाथः॥ अंतरिक्षे उदकलक्षणं स्थानं पाथोंतरिक्षं पथा व्याख्यातमिति यास्कः अयतनी उषाः अन्वेत्यनुगच्छति
ता उषसो यथा व्युष्टा एवं सैषा पि व्युच्छतीत्यर्थः॥ तथा आयतीनामागमिष्यंतीनां बह्वीनां उषसां प्रथमा आद्या भवति ए पा यथा वर्तत एवमेव
गामिन्योप्युषस इत्यर्थः॥ तादृशी व्युच्छंती तमो वर्जयंती तमो यतीं व प्राणिनं जीवात्मानं उदीरयंती शयनादूर्ध्वं प्रेरयंती उषाः मृत सा पसमये
प्रलीनेंद्रियत्वात् मृतमिव संतं कंचन कमपि पुरुषं बोधयंती पुनरिंद्रियप्रवेशेन चेतनं कुर्वती प्रवर्तते इति परायतीनां इणगतौ लटः शत
णायण उगितश्चेति ङीप् उपस्थं दृसि वहुलमिति नामुदात्तत्वं॥ ॥नवमीमृचमाह॥ ॥उषो यदग्निं समिधे चकर्थ वि यदावश्चक्षसा सूर्यस्य
॥यन्मानुषान्यक्ष्यमाणां अजीगस्तद्देवेषु चकृषे भद्रमप्नः॥ ॥हे उषस्त्वं अग्निं गार्हपत्यादिरूपं समिधे समिंधनाय प्रज्वलनाय यत् चकर्थ कृत
वती उषः काले ह्यग्नयो होमार्थं उषसमिध्यंते अपि च तमसा तिरोहितं जगत् सूर्यस्य चक्षसा प्रकाशेन यदावः वृणोः तमसा विश्लिष्ट
मकरोः तथा मानुषान् मनोः पुत्रान् मनुष्यान् यक्ष्यमाणान् यागं करिष्यतः यत् त्वं अजीगः पूर्वं तमसाच्छन्नान् प्रकाशेनोद्गीर्णान्विवा
करोः हे उषो देवेषु मध्ये तमेव भद्रं भजनीयं तदेतत् त्रिविधमप्नः कर्म चकृषे कृतवती आवः वृञ् वरणे लुङि मंत्रे घसेति च्लेर्लुक् गुणो हल्
ङ्याब्भ्य इति सलोपः। अ ॥ दस्य पिट्ट्यत इत्याडागमः मानुषान् मनोर्जाताव्यती षुक् चेत्यञ् पुगागमश्च॥ ॥दशमीमृचमाह॥ ॥कियात्याय
त्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान्॥ अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषमन्याभिरेति॥ ॥समया त्वं व्यूषुर्या उषाः समया भ
वाति समीपस्थान भवतीति यदतत्तलिकायति काले प्रवृत्तं परिसमाप्तं वा आकारः प्रश्नार्थः। एतद्दुर्लभं भवति। उषाः येन कालेन संयुक्तास कालः कि २०७
यांस्तस्य कालस्य किं परिमाणमिति अनेन उषसो नानात्वमुक्तं तदेवस्पष्टं करोति पुरा या उषसो व्यूषुः व्युष्टाः संजाताः नूनं मवश्यमितः
परं याश्चोषसो व्युच्छान् व्युच्छिष्यंतः प्राभविष्यंति। तत्र पूर्वाः पुरा अतीता उषासः वावशाना कामयमाना इदानीं वर्तमाना उषाः अनुकृपते अ
नुकल्पते तत्समर्था भवति अतीतउषसां यथा प्रकाशमनीभि विश्लिष्टवत् इति परंविधानसामर्थ्यात् किंतु अन्या आपि परिमाणार्थं च तु प

ककारस्य षत्वं इदं विभोरीशिति किमर्कश्चादेशः घस्यादेशोयस्येति लोपः प्रत्ययाक्षरत्वात् छांदसः सांहितिको दीर्घः भवातिलेटपाडागमः व्यु
षुः विपूर्वो वस निवासे छंदसि वर्तते लघुमिकि लेयजादित्वात् संप्रसारणं द्विर्वचनान्नादि व्युच्छान् उच्छि विवासे विवासो वर्जनं लेटपाडागमः। संयोगांतस्य
लोपः कृपते कृप सामर्थ्ये व्यत्ययेन शः वावशाना वश कांतौ अस्माद्यङ्लुगंताच्छानच् प्रदीध्याना दीधीङ् दीप्तिदेवनयोः कद
शानच् अदादित्वाच्छपो लुक् शिप्यादयः षड् इत्यभ्यस्तसंज्ञायां अभ्यस्तानामादिरित्याद्युदात्तत्वं। गतिसमासे कृदुत्तरपदप्रकृतिस्व
रत्वं॥ ॥इति प्रथमस्याष्टमे द्वितीयो वर्गः॥ ॥एकादशीमृचमाह॥ ॥ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छंतीमुषसं मर्त्यासः॥ अस्माभिरू नु
प्रतिचक्ष्याभूदो ते यंति ये अपरीषु पश्यान्॥ ॥ये मर्त्याः मरणधर्माणो मनुष्याः व्युच्छंती विवासयंती पूर्वतरां अतिशयेन पूर्वां चिर
मुषसमपश्यन् दृष्टवंतः ते न मनुष्याः ईयुः गताः। तथा अस्माभिरपि तु इदानीं प्रतिचक्ष्या प्रकर्षेण द्रष्टव्या अभूत् जातात्या अपरीषु भा
विनीषु रात्रिषु ये मनुष्याः एतामुषसं पश्यान् पश्यंति ते आ उ इति निपातद्वयसमुदायः तत्र उ इत्येन देवधारणेवयंतीति आगच्छंत्येव
कालक्रमेण व्याप्ताख्यवर्तंत इत्यर्थः। ईयुः इण् गतौ लिटि उसि इणो यणिति यणादेशः द्विर्वचने चीति तस्य स्थानिवद्भावाभावे दीर्घ उणः कित्वात्
सस्य दीर्घत्वं तेयुषामनंतलक्षणं यादमिति सकारस्य पत्वमर्त्यासः आज्जसेरसुक्॥ ॥द्वादशीमृचमाह॥ ॥यावयद्द्वेषा ऋतपा ऋतेजाः
सुम्नावरी सूनृता ईरयंती॥ सुमंगलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ॥ ॥यावयद्द्वेषाः यावयंति असमतः पृथक्कुर्वंति द्वेष्यां
सि द्वेष्टॄणि द्वेष्याणि तथोक्तानि उषसि जातायां रक्षसां राद्याविति प्रतिष्ठते यतस्तेनिशाचराः ऋतपाः ऋतस्य यज्ञस्य पालयित्री ऋतेजाः यज्ञार्थे
प्रादुर्भूता तस्यामुषसि अग्निहोत्रादयो अनुष्ठीयंते अतो यज्ञार्थं जातमुच्यते। सुम्नावरी सुम्नमिति सुखनाम तद्वती सूनृताः वाङ्नामैतत्
पशुपक्षिमृगादीनां वाचा सि ईरयंती उत्पादयंती प्रेरयंती सुमंगलीः सोमंगल्योपेता पत्या कदाचिदपि न वियुक्ता इत्यर्थः। देववीतिं देवैः
काम्यमानं यज्ञं बिभ्रती धारयंती उषः श्रेष्ठतमा उक्तेन प्रकारेण अतिप्रशस्ता त्वं इहास्मिन् देवयजनदेशे अद्यास्मिन्यागसमये व्युच्छ
विवासय यावयद्द्वेषाः यु मिश्रणामिश्रणयोः अस्माण्यंतात् लटः शतृ तस्य छंदस्यभयथेत्यार्धधातुकत्वात् दुपदेशात् लसार्वधातु
कानुदात्तत्वाभावात्प्रत्ययः स्वरः शिष्यते पुनर्बहुव्रीहौ स एव स्वरः छांदसः पदकालिनो ह्रस्वः ऋतपाः ऋतपा ति रक्षतीत्यृतपाः पारक्ष
णेविच् ऋतेजाः ऋते निमित्तभूते जायत उत्पद्यत इति ऋतेजाः जनी प्रादुर्भावे जनसनखनक्रमगमो विट् विड्वनोरनुनासिकस्यादित्यात्वं॥ तत्पुरु
षे कृति बहुलमिति सप्तम्या अलुक्। सुम्नावरी छंदसी वनिपौ वा वक्तव्यौ इति मत्वर्थीयो वनिप् वनो र चेति ङीप् रकारश्चांतादेशः अन्येषामपि दृश्यत इति दीर्घः। व्यत्ययेन
न्यत्वयापकृशानं च सुमंगलीः सुमंगलात्संज्ञायामिति गौरादिषु पाठात् ङीष् सर्वे विधयः छंदसि विकल्प्यंत इति हल्ङ्याब्भ्य इति सलोपस्य
विकल्पितत्वादभिभावे रुत्वविसर्गौ देववीतिं वी गति प्रजनकांत्यसनखादनेषु देवैर्वीयते काम्यत इति देववीतिः यत्तः कर्मणि क्तिन् दासीभाग
दित्वात् पूर्वपदप्रकृतिस्वरत्वं॥ ॥त्रयोदशीमृचमाह॥ ॥शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी॥ अथो व्युच्छादुत्तरां अनु द्यूनजरा
मृता चरति स्वधाभिः॥ ॥देवी द्योतनशीला उषाः पुरा पूर्वस्मिन्काले शश्वत् नित्यं संततं व्युवास व्यौच्छत् अथानंतरं अद्यास्मिन्काले मघोनी धनव
ती उषाः तमसा तिरोहितं इदं सर्वं जगत् व्यावः विवासितं प्रकाशनेन तमसा वियुक्तमकरोत् अथानंतरं उत्तरान् ऊर्ध्वतरान् भाविनः ऊनादिव

411
1924

माननु त्वस्या आगामिनश्चापि दिवसे पुच्छुच्छन्त्युच्छति विवासयति अतः कालत्रयव्यापिनी सोषाः अजरा जरारहिता सर्वदैकरूपा अमृतामरण
ना॰ ग्र॰ रहिता चरन्ती स्वधाभिः आत्मीयैः तेजोभिः सह चरति वर्तते उच्छा मानिवासे लिटि घस्यास्य सोर्भयेषामिति अभ्यासस्य संप्रसारणं आवः तस्मात्स्व
२०८ धातोर्लिङ्गि बहुलं छंदसीति विकरणस्य लुकू दरुड्याभ्य उतिलोपः छंदस्यपि दृश्यत इत्याडागमः उछ्मत्ले त्याडागमः उत्तरान्दीर्घो दृढिसमान
पादइति नकारस्य रुत्वं। आतोटि नित्यमिति सानुनासिकः आकारः अनुर्दैःस्त णोइति अनोः कर्मप्रवचनीयत्वे अत्र राअमृतानऋ बहुव्रीहौ नञोज
रमरमित्र मृताइत्युत्तरपदाद्युदात्तत्वं ॥ चतुर्दशीमृचमाह ॥ ॥ व्यंजिभिर्दिवअतास्वद्योदपरुशनिर्णा देव्यावः। प्रबोधयंत्यरुणेभिरश्वैरोषाया
तिसुयुजारथेन॥ ॥दिवोनभसः संबंधिनि षुअतासु दिङ्नाम तत आतता सुविस्तीर्णासु दिक्षु उषाः अंजिभिः व्यंजकैः प्रकाशकैस्तेजोभिः व्यद्यो
तयिद्योतनं प्रकाशनं सोषा देवीदिवनशीलाकृष्णांनिर्णिग्निर्णागरूपना मावाविकृतं कृष्णरूपं अपावः अपावृणोत प्रकाशेन तिरस्कृतवती अपिचअ
रुणाभिररुणैर्लोहितवर्णैरश्वैर्व्यापनशीलैः स्वकीयैः किरणैः तुरगैर्वा सुयजा सम्यक् युक्तेन रथेन उषा आयात्यागच्छति प्रबोधयंती सुप्तान् प्राणिनः
प्रबुधान् कुर्वती अघोनाकृनदीमोलुङ् घुश्लोलुङ्गीति यस्मिपदे व्यत्ययेन लुंक् गुणे प्राप्ते ब्रह्मश्विंछंदसीत्यडाद्धाः अभिगमने आङाड्कः अतो रुधिः लु
किहलीति रद्धिः देवानां इविहविश्यु आवाहत्वे योषयोषा आसन्निरंतं चा अघोत नोषिरश्मिभिरावहंतीपोष्यावार्याणि नता अर्वारेणुकथाहोअः
श्रुतइति॥ ॥तामेतांपंचदशीमृचमाह॥ ॥आवहंती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना। ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा
व्यश्वैत्॥ ॥पोष्यायावत्सीवपोषणसमर्थानि वार्याणि वरणीयानि धनानि आवहंती अस्मभ्यमानयंती चिकितुनासर्वं जनं प्रज्ञापयंती उषाः चित्रं वि
चित्रं विचित्रं आश्चर्यभूतं वानि यंवा केतुं प्रज्ञापकं रश्मिंकृनज्ञगत्प्रकाशनसमर्थं कृणुते स्वात्मनः प्रकाशात्कुरुते सेयं पाईयुषीणां गमनवतीनां पूर्व
निष्पन्नानां शश्वतीनां बह्वीनां मुषसामुपमा उपसमीपे निर्मिता उपमानभूता वा विभातीनां विशेषेण प्रकाशमानानामागामिनीनां उषसां प्रथमा
एवं भूतोषाः व्यश्वैत तत्र सा प्रकटसीतपोष्यापुपुषेर्लोपोषणं पोषः भावे घञ तत्र भावानि भयेषुछंदसीति यत् यतोनावइत्याद्युदात्तत्वं। श्वेतंदसि
बहुलमिति लोपः वार्याणि वृञ संभक्तौ अ हलोण्यत् इदं वदश्वासदुहृण्यत इत्याद्युदात्तत्वं। चेकिताना कितज्ञाने अस्माद्यङ् नालुकः शानच्यज्
दस्यांभ यथेतनास्यार्धधातुकत्वात् हतोलोपयलोपौ अभ्यस्तानामादिरित्याद्युदात्तत्वं ईयुषीणां इणगतो लिटः क्वसुः द्विर्भावादि उगितश्चेति ङीप
वसोः संप्रसारणं यणोर्याणितियणादेशः दीर्घइणः किति त्यभ्यासस्य दीर्घत्वं शासिवसिघसीनां चेति षत्वं उपसर्गेपि तादनुदात्तो विभातीनां
भादीप्ती अस्मात्शत्रंता तपूर्वं वतः उगुपऊछंदसीबहुलमिति नामउदात्तत्वं। अश्वैत् टुओश्विगतिवृद्ध्योः बहुलं छंदसीति विकरणस्य लुक् गुणश्चा
मिव्यत्ययेनैत्वं॥ ॥इति प्रथमाष्टमे तृतीयो वर्गः॥ ॥षोडशीमृचं॥ ॥उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति। आरैक्पंथां
यातवे सूर्यायागन्म यत्र प्रतिरंत आयुः॥ ॥हे मनुष्याः उदीर्ध्वं उद्यच्छत परित्यउच्छत नो अस्माकं आसुः शरीरस्य प्रेरयिता जीवो जीवात्मा आ
गात आगतवान् तमः अपप्रागात् अपक्रांतं उषसः प्रकाशसत्ति सर्वजीनव्यापारयोगः तस्मात् परमात्मारूपतया सचतीवः तद्देवज्योति २०८
आज्योति आगच्छति सूर्याय सूर्यस्यपंथां मार्गं अयरे कृतिविरेकितां करोति यातवे गमनाय वयमिन्दो देशमगच्छामः यत्र यस्मिन् देश आयुः अन्न
नामैतत्। अन्नं प्रतिरंत प्रवर्धयंति तिरतिवर्धनार्थः। उदारः दानेन प्रवर्धयंति। ईर्ध्व ईरगतौ अदादिकोनुदात्तेत्। आरैक् रिचिर् विरेचने लङि बहुलं
छंदसीति विकरणस्य लुक् गुणेव्यत्ययेनैत्वं। पंथां द्वितीयायामपि पथिमथ्यृभुक्षामादिति व्यत्ययेनात्वं। अगन्म गमेर्लङि बहुलं छंदसीति वि 413
करणस्य लुक् म्वोश्चेति मकारस्य नकारः॥ ॥सप्तदशीमृचमाह॥ ॥स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः॥ ॥अद्या तदु 1924
च्छ गृणते मघोन्यस्मे आयुर्नि दिदीहि प्रजावत्॥ वह्निः स्तोत्राणां वोढा रेभः स्तोता नामैतत्। स्तोता उषसो विभातीः तमसोपनोदनेन प्रकाश
मानाउषसः स्तवानः स्तुवन् वयोवेदरूपायाः संबंधीनि स्यूमनास्यूमानि अनुस्यूतान्युक्थानि उदियर्ति उद्गमयति उच्चारयति अतो हे
मघोनि मघवत्युषः अद्यास्मिन् समये गृणते स्तुवते तस्मै पुरुषाय तदुच्छ तमिस्र निरोधकृतं याप्रसिद्धं तेनैतं मा विवासय वर्जय अस्मे अस्म
भ्यंच नः प्रजावत् प्रजाभिः पुत्रपौत्रादिभिर्युक्तं आयुरन्नं निदिदीहि नितरां प्रकाशय दीदेतिश्छांदसो दीप्तिकर्मा प्रयच्छेत्यर्थः स्यूमना विवुतुं सूतौ ने
अन्येभ्योपि दृश्यंत इति मनिन् गुणस्य सर्वोपाधिव्यभिचारार्थत्वात् कर्मणि मनिन् छः शूट् ऊठ् अयाड्याजावांछापसंख्यानमिति विभक्तेराजादे
शः यद्वा औणादिको भावे मक् पासादि लक्षणो मत्वर्थीयो नः वंधनयुक्तानीत्यर्थः शश्छंदसि बहुलमिति शलोपः व्यत्ययेन आद्युदात्तत्वम्॥
वाचः सा चैकाच इति ङस उदात्तत्वं उदियर्ति ऋगतौ जौहोत्यादिकः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं स्तवानः ष्टुञ् स्तुतौ शानचि अदादित्वाच्छपो लुक्
तस्य छंदस्युभयथेत्यार्धधातुकत्वेन ङित्वाभावाद्गुणावादेशौ व्यत्ययेनाद्युदात्तत्वं। विभातीः शतुरनुमोनद्यजादी इति ङीप उदात्तत्वं। गृणते
गॄ शब्दे क्र्यादिकः प्वादीनां ह्रस्वः प्रत्ययोके नसर्वनाम स्थाने विभक्तेरुदात्तत्वं। अस्मे सुपां सुलुगिति चतुर्थ्याः शे आदेशः॥ ॥अष्टादशीमृचमाह॥
या गोमतीरुषसः सर्ववीरा व्युच्छंति दाशुषे मर्त्याय। वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा॥ ॥दाशुषे हविर्दत्तवते मर्त्याय
मनुष्याय यजमानाय गोमतीः गोमत्यः बहुभिः गोभिर्युक्ताः सर्ववीराः सरणसमर्थैर्वीरैर्युक्ताः या उषसो व्युच्छंति तमो वर्जयंति वायोरिव
वायुवच्छीघ्रं वर्तमानानां सूनृतानां स्तुतिरूपाणां वाचामुदर्के समाप्तौ अश्वदाः अश्वानां दात्रीस्ता उषसः सोमसुत्वा सोमाना मभिषोता य
जमानोश्नवद्याप्नोतु दाशुषे दाशृ दाने दाश्वान् साह्वानितिक्वसुप्रत्ययांतो निपात्यते चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं शा
सिवसिघसीनां चेति षत्वं। अश्नवत् अशूव्याप्तौ व्यत्ययेन परस्मैपदं। लेट्याडागमः इतश्च लोपइति इकारलोपः सोमसुत्वा सुञ् अभिषवे अन्येः
भ्योपि दृश्यंत इति क्वनिप् ह्रस्वस्य पितिकृति तुक्॥ ॥एकोनविंशीमृचमाह॥ ॥माता देवानामदितेरनीकं यज्ञस्य केतुर्बृहती वि भाहि। प्रशस्तिकृद्ब्रह्म
णे नो व्युच्छा नो जने जनय विश्ववारे॥ ॥हे उषस्त्वं देवानां माता जननी उषसि सर्वे देवाः स्तुत्या प्रबोध्यंते अतः सा तेषां जननवतीत्युच्यते अतएव
अदितिर्देवानां मातुरनीकं प्रतिस्पर्धनीयमित्यर्थः। यद्वा दीव्यंतीति देवा रश्मयः तेषां निर्मात्री अदितेरखंडनीयायाः भूमेः अनीकं मुखं
यथा इंद्रियाश्रयत्वात् मुखं प्रकाशकं एवमुषाः भूमेः प्रकाशयित्रीत्यर्थः यज्ञस्य केतुः केतयित्री ज्ञापयित्री बृहती महती विभाहि प्रकाशस्व अपि
च प्रशस्तिकृत् सम्यक्कृतमिति प्रशंसनं कुर्वती नोस्माकं ब्रह्मणे मंत्ररूपाय स्तोत्राय व्युच्छ विवासय तदनंतरं हे विश्ववारे विश्वैर्वरणीये उषो
नोस्मान् जने जनपदे आजनय आभिमुख्येन प्रादुर्भावय अवस्थापयेत्यर्थः बृहती बृहन्महतोरुपसंख्यानमिति ङीप उदात्तत्वं। प्रशस्ति
कृत् शंसु स्तुतौ भावे क्तिन् तितुत्रेतीड्प्रतिषेधः अनिदितामिति नलोपः तस्मिन्नुपपदे करोतेः क्विप् चेति क्विप् जनय जनी प्रादुर्भावे णिच्युप
धायाः वृद्धिः जनीजृष्क्नसुरंजोमंताश्चेति मित्वे मितां ह्रस्व इति ह्रस्वत्वं॥ ॥विंशीमृचमाह॥ ॥यच्चित्रमप्न उषसो वहंतीजानाय शशमानाय भ

भा०प्र०

२००

इंत ओष्ठः ॥ चित्रं चायनीयं स्वप्नः आमन्त्र्यं भद्रं उपसो इवं तिङ् आनाय्य इविभिर्भिरिष्टवै नेत्राशमानायस्तुतिभिः संभजमानाय पुरुषाय भद्रं
भद्रं भजनीयं तद्वतीति शेषः यद्दत्तेन सूक्तेनास्माभिः प्रार्थितं तन्निमित्तादयं यद्देवताममसंतां प्रतिनंकुर्वंतु अमृः आरव्यातो आपः कर्मा
ख्यायां द्रवखोनु इंचबेतिच इत्यच लक्षणाद कर्मास्य्ययामथ रुन धातोर्मरुखोनुडागमश्चईज्ञानां यज्ञे तेऽश्चांदसिके इलिङः कान जवा च क्षिपी
त्यादिनां संप्रसारणं आशमानायद्वारा प्रत्युतगतोतालिकस्थानभूतस्य लसार्वधातुकत्वाभावादुपदेशाल्लसार्वधातुस्वराभावे चिल्लरस
बविष्यते ॥ ॥इतिप्रथमस्याष्टमे च तुर्थोवर्गः॥ ॥इमा रुद्राय त्यकादशर्चेन वमंससं कुत्सस्यार्षं देश म्यकादश्यो त्रिष्टुभो त्रिष्टानवं
जगत्यः रुद्रोदेवता। तथाचानुक्रांतं। इमा एकादश रौद्रं त्रिष्टुबंतमिति भूलग बाहिपुरं इदं बल्येषु कर्मसु अनेनसूक्तेनाज्ये पुरोल्याज्ययात्या
सृत्रितं च ॥ कद्रुद्रायेमा रुद्रायेतेपितरिमा रुद्राया स्थिरधन्वने गिर इति सर्वेषु रुद्रयज्ञेषु दिशामुपस्थान इति ॥ ॥ तत्र प्रथमामृचं
॥ ॥इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ॥ यथा द्रामसद्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरं ॥ ॥रुद्राय
रोदयति सर्वमंतकाले इति रुद्रः। यद्वा रुतं संसारारव्यं दुःखं तत् द्रावयति अपगमयति विनाशयतीति रुद्रः। यद्वा रुतः शब्दरूपा उपनिषदः ता
भिद्रूयते गम्यते प्रतिपाद्यत इति रुद्रः। यद्वा रुत् शब्दात्मिका वाणी तत्प्रतिपाद्यात्मविद्या वा तामुपासकेभ्यो ददातीति रुद्रः। यद्वा रुणद्धि आवृ
णोतीति रुत् अंधकारादि तं दृणाति विदारयतीति रुद्रः। यद्वा कदाचिद्देवासुरसंग्रामे अग्न्यात्मकं रुद्रं देवैर्निक्षिप्तं धनं मपहृत्य निरगात् असु
रान्जित्वा देवा एनमन्विष्य दधुः द्रायन्ममपहरन्तदानीमरुदत् तस्माद्रुद्र उत्याख्यायते तथा तैत्तिरीयकं सोरोदीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वमि
ति तस्मै रुद्राय मती मननीया इमाः स्तुतीः प्रभरामहे प्रकर्षेण निष्पादयामः कीदृशाय तवसे प्रवृद्धाय कपर्दिने जटिलाय क्षयद्वीराय क्ष
यंतो विनश्यंतो वीरा यस्मिन्नतादृशाय यद्वा क्षयतिरैश्वर्यकर्मा क्षयंतः प्राप्तैश्वर्या वीरा मरुद्गणाः पुत्रा यस्य तस्मै यथा येन प्रकारेण स्तुती :
कर्म इत्यर्थः। अतोऽस्मिन्मदीये ग्रामे वर्तमानं विश्वं सर्वं प्राणिजातं अनातुरं आतुरस्तृष्णः तेर रहितं सत् पुष्टं प्रवृद्धं भवतु। रुद्राय रोदयति विक्रु
चंतिर कृत तवसे तवतिर्वृद्ध्यर्थः सौत्रो धातुः णादिको असि प्रत्ययः क्षयद्वीराय क्षि क्षये लटः शतृ छंदस्य भयथेति शतरार्धधातुकत्वेन अद
पदेशाल्लसार्वधातुकानुदात्तत्वाभावात् स्येव स्वरः शिष्यते बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। असतः असभुवि लेट्याडागमः इतश्च लोप इति का
रलोपः द्विपदे द्वौ पादावस्य संख्यासुपूर्वस्येति पादस्यांतलोपः समासांतः चतुर्थ्येकवचने भसंज्ञायां पादः पदिति पद्भावः एकादेश
कृतस्यान्यत्वात् द्विस्त्रिभ्यां पादन्मूर्धसु बहुव्रीहौ विकल्पनरपदाद्युदात्तत्वं। रुद्रदेवत्ये पशौ वपापुरोडाशयोर्मृडानो रुद्रेत्याद्विके द्वे अनुवाक्ये
तथाच सूत्रितं मृडानो रुद्रोत नो मयस्कृधीति द्वे आ ते पितर्मरुतां सुम्नमेत्विति ॥ ॥तयोराद्यां सूक्तेद्वितीयामृचमाह ॥ ॥मृडानो रुद्रोत नो मयस्कृधि क्ष
यद्वीराय नमसा विधेम ते ॥ यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ ॥हे रुद्र नोऽस्मभ्यं अस्मदर्थं मृडसुखय उत अपि च २००
पि च तदनंतरं नोऽस्माकं मयः सुखं कृधि कुरु वयं च क्षयद्वीराय क्षपितसर्ववीराय प्राप्तैश्वर्याय मरुद्भिः युक्ताय ते त्वां नमसा हविर्लक्षणेनान्नेन नमस्का
रेण वा विधेम परिचरेम विधतिः परिचरणकर्मा अपि च पिता पितृवत्पालको मनुः सर्वाभ्यः प्रजाभ्यः शंरोगाणां शमनं योश्च भयानां च यु
वनं यद्दत्तवान् आयेजे देवेभ्यः सकाशात् प्राप्य दत्तवान् हे रुद्र तव प्रणीतिषु प्रकृष्टनयनेषु सत्सु तत्सर्वमस्य मथ्यामसुयामाम रुकमरुकखनो तो

415
1924

दंशकः अयं चोत स्थिरु इति संहितायां दीर्घः रुधिकरोति रौधि बहुलं छंदसीति विकरणस्य लुक् श्रु शृणु पृ कृ वृभ्यश्छंदसीति हेर्धिः अतः कुकमीति
य सो विसर्जनीयस्य सत्वं। क्षयद्वीराय क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वात् चतुर्थी विधेम विधातिधाने तौदादिकः। आयजे तयजदेवपूजा
संगतिकरणदानेषु लिट् संज्ञापूर्वकस्य विधेरनित्यत्वात् संप्रसारणाभावे एताभ्यासलोपो अश्याम अश्याम सोब्यत्ययेन परस्मैपदं बहुलं छंदसी
ति विकरणस्य लुक् ॥ ॥तृतीयामृचमाह ॥ ॥अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ॥ सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जु
हवाम ते हविः ॥ ॥हे मीढ्वः सेक्तः कामाभिवर्षक नित्यतरुण वा रुद्र क्षयद्वीरस्य क्षपितप्रतिपक्षस्य मरुद्भिः युक्तस्य वा तव तव सुमतिं शोभनां कल्
याणीं अनुग्रहात्मिकां बुद्धिं ते तादृशं तत्त्वं संधिनो वयं देवयज्यया देवयागेन तद्देवत्येन यज्ञेन अश्याम प्राप्नुयाम तं चास्माकं विशः प्रजा अभिलक्ष्य आ
चर आगच्छ किं कुर्वन् सुम्नायन् नित्सुम्नमिति सुखनाम तासां प्रजानां सुखमिच्छन् एव सम्प्रे संदेश वत्यर्थः। ततो वयं अरिष्टवीराः वीर्यो जायंता इति वी
राः प्रजा अरिष्टा अहिंसिता वीरा येषां तथाभूताः संतः तेतुभ्यं हविः चरुपुरोडाशादिकं जुहवाम चोदिते आधारे प्रक्षिपाम सुमतिं मतिमनं शोभनं म
ननं यस्यां बुद्ध्यां सा सुमतिः अत्र सुम्न्यामितः उत्तरपदांतोदात्तत्वं। देवयज्ययाच्छंदसि निष्टक्र्येत्यादिना यजेर्यप्रत्ययो निपात्यते। स्त्रीलिंगाग चमीढ्वः मिहसे
चने दाश्वान्साह्वान्मीढ्वांश्चेति क्वसुप्रत्ययांतो निपातितः संबुद्धौ मतुवसो रुसंबुद्धौ छंदसीति रुत्वं। सुम्नायन्सुम्नं परे षामिच्छति छंदसि परेच्छायामपीति क्यच्
न छंदस्य पुत्रस्येतीत्वदीर्घयोर्निषेधः। देवसुम्नयोर्यजुषि काठक इति विधीयमानत्वं व्यत्ययेनात्रापि द्रष्टव्यं ॥ ॥चतुर्थीमृचमाह ॥ ॥त्वेषं वयं रुद्रं
यज्ञसाधं वंकुं कविमवसे नि ह्वयामहे ॥ आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥ ॥अवसे रक्षणाय रुद्रं महादेवं निह्वयामहे नितरा
माह्वयामः कीदृशं त्वेषं दीप्यं यज्ञसाधं यज्ञस्य साधयितारं एष हि यज्ञं स्विष्टं करोति। तथा च तैत्तिरीयकं। देवा वै यज्ञाद्रुद्रमंतरायन्नित्युपक्रम्याम्नातं स्वि
ष्टं वै वरदं भविष्यति यद्विमाधयिष्यामः इति तत्स्विष्टकृतः स्विष्टकृत्वमिति। वंकुं कुटिलगंतारं कविं क्रांतदर्शिनं सचरुद्रः देवसंबंधि यस्य धानमानस्य संबंधि
नं हेळः क्रोधं अस्मदारे अस्मत्तो दूरदेशे अस्यतु प्रक्षिपतु अस्य महादेवस्य सुमतिमित् शोभनामनुग्रहरूपां बुद्धिमेव वयमावृणीमहे। आभिमु
ख्येन संभजामहे यज्ञसाधं यज्ञं साधयतीति यज्ञसाधन विधूसंराधो सिध्यतेर पारलौकिके इत्यात्वं। यद्वा राध साध संसिद्धौ अस्मात् ण्यंतात्
क्विप् वंकुं वंकि कौटिल्ये पुनादिके उप्रत्ययः निह्वयाम ह्वा नि समुपविभ्यो ह इत्यात्मनेपदं। दैव्यं देवाद्यञ्ञौ इति प्राग्दीव्यतीयो यञ्। अस्यतु आ
सु क्षेपणे दैवादिकः वृणीमहे वृङ् संभक्तौ क्रयादिकः ॥ ॥पंचमीमृचमाह ॥ ॥दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ॥ हस्ते बि
भ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥ ॥वराहं वराहारं सुलभभाजनं यद्वा वराहं दंगं अरुषमरोचमानं कपर्दिनं जटाभियुक्तं त्वेषं तेजसा दीप्य
मानं रूपं निरूपणीयं वदन्तेरधिकगम्यं एवं भूतं रुद्रं नमसा हविर्लक्षणेनान्नेन नमस्कारेण वा दिवो द्युलोकसकाशान्निह्वयामहे नितरामाह्वयामः स
आहूतो रुद्रः हस्ते स्वकीये वार्याणि वरणीयानि भेषजानि भेषज्यानि रोगनाशनहेतुभूतानि बिभ्रत् धारयन् अस्मभ्यं स्तोतृभ्यः शर्म अरो
ग्यलक्षणं सुखं वर्म आयुधानां निवारकं कवचं छर्दिर्गृहं नमे तत्सर्वं यंसत् प्रयच्छतु बिभ्रत् डुभृञ् धारणपोषणयोः जुहोत्यादिकः शतृ
नाभ्यस्ताच्छतुरिति नुमभावः अभ्यस्तानामादिरित्याद्युदात्तत्वं यच्छते लेटि अडागमः सिब्बहुलं लेटीति सिप्। यमरमनमातां सक्चेति सगिडागमौ
बहुलमिति शर्मेयः वार्याणि वृञ् संभक्तौ ऋहलोर्ण्यत् ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं छर्दिः उच्छृदिर् दीप्तिदेवनयोः अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः

भा०७० काव्यनदुतिछर्दिःसदेअर्चिभिर्विदूसपिफाशिछर्दिर्भ्यासिःयंमतयमउपरमेलेड्याग्रगमःसिवदुलकेदीर्तिसिपराजश्चलोपपूर्ताकारलोपः॥ ॥इतिप्र
थमस्याष्टमेपंचमोवर्गः॥ ॥षष्ठीमृचमाह॥ ॥इदंपित्रेमरुतामुच्यतेवचःस्वादोःस्वादीयोरुद्रायवर्धनं॥ रास्वाचनोअमृतमर्तभोजनंत्मनेतोकायतन
२२० वायमृळ॥ ॥इदंस्तुतिलक्षणंवचःमरुतांपित्रेकोनपंचाशत्संख्याकानांदेवानांपितृभूतायविद्येतनकामरुद्रायेश्वरायउच्यतेद्वास्यतेस्वा
दोःस्वादीयःस्वादुतमंमधुघृतादेरपिस्वादुतरंअतिशयेनहर्षजनकमित्यर्थःवर्धनंस्तुत्यस्यप्रवर्धकंस्तोत्रेणहिदेवनाहर्षागतवाप्रवर्धयंते
रुद्रस्यचमरुतांपितृत्वमेवमाम्नायतेपुराकदाचिदिंद्रोमरुतांजननीदितिंसमाप्तगर्भामुदरेहननसमर्थंपुत्रंकामयमानांज्ञात्वाभर्तृ
कायाउदरेगर्भेरूपेणंतामवगच्छन्निंद्रोवज्रहस्तःसन्सूक्ष्मरूपोभूत्वाउदरंप्रविश्यतंगर्भंसप्तधाव्यभिनत्पुनरप्येकैकंसप्तसप्तधाअकरोत्तेसर्वे
गर्भैकदेशाःयोनेर्निर्गत्यअरुदन्एतस्मिन्नेवसमयेलीलार्थंगच्छंतौपार्वतीपरमेश्वरौउमानदृष्ट्वाप्राहपरमेश्वरप्रतिपार्वत्येवमवोचत्इमेमांसख
ंडायथाप्रत्येकंपुत्राःसंपद्यंतांएवंत्वयाकार्यंमयिचेत्तवप्रीतिरस्तीतिपरमेश्वरःतान्समानरूपान्समानवयसःसमानालंकारान्पुत्रानक
त्वागौर्यैप्रददौतवैमेपुत्राःसंत्वितिअतःसर्वेषुमारुतेषुमरुत्सुमरुतोरुद्रपुत्राइतिस्तूयंतेरोदेषुचमरुतांपितारुद्रइतिअपिचहेअमृतमरण
रहितरुद्रमर्तभोजनंमर्तानांमनुष्याणांभोगपर्याप्तमन्नंनोस्मभ्यंरास्वप्रयच्छतथात्मनेआत्मानेद्वितीयार्थेचतुर्थीमांनाकोयतोकपुत्रंत
नयायतनयंतत्पुत्रंचमृळसुखयपित्रेइदानयणइतिविभक्तेरुदात्तत्वं।रास्वरादानेव्यत्ययेनात्मनेपदंत्मनेमंत्रेष्वाङ्यादेरात्मनइत्याकारलोपः
पिछंदसिदृश्यतइतिवचनादात्मनेअकारलोपः॥ ॥सप्तमीमृचमाह॥ ॥मानोमहांतमुतमानोअर्भकंमानउक्षंतमुतमानउक्षितं॥मानो
वधीःपितरंमोतमातरंप्रियामानस्तन्वोरुद्ररीरिषः॥ ॥हेरुद्रनोस्माकंमध्येमहांतंवृद्धंमहांतंवृद्धंमावधीर्माहिंसीउतअपिचनोस्माकं
अर्भकंबालंमाहिंसीःतथानोस्माकंमध्येउक्षंतंसेक्तारंमध्यवयस्कंयुवानंमावधीःउतअपिचनोस्माकंअर्भउक्षितंगर्भरूपेणस्थितमपि
पितृकमपत्यंमावधीःतथानोस्माकंपितरंजनकंमावधीःउतअपिचमातरंजननींमावधीः।तथानोस्माकंप्रियाःस्नेहविषयाःतन्वःशरीरा
णितनूःपुत्रादीन्वाप्रजावाहेरुद्रमारिरिषःमाहिंसीःवधीरितेर्माङिलुङिचेतिवधादेशःसत्वादिनःसिचर्इट्अतोलोपस्यस्थानिवद्भावाद्वृद्ध्यभा
वःरिरिषःरिषहिंसायांण्यंतात्लुङिचङिणिलोपोपधाह्रस्वत्वादीनिधातोःसःपरकालीनोभ्यासहस्वः॥ ॥अष्टमीमृचमाह॥ ॥मानस्तोके
तनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः॥वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्त्वाहवामहे॥ ॥हेरुद्रनोस्माकंतोकेविषये
यमारिरिषःमाहिंसीःतोकशब्दःपुत्रवाचीतनयस्तत्पुत्रःअयुरित्यंतोदात्तोमनुष्यनामपुत्रपौत्रव्यतिरिक्तायोस्मदीयास्मदीयामनुष्य
स्तस्मिन्हिंसांमाकृथाःतथाहेरुद्रवीरान्विक्रांतान्शौर्योपेतानस्मदीयान्भामितःक्रुधःसन्मावधीःमाहिंसीःवयंतुहविष्मंतो
हविर्भिर्युक्ताःसंतःसदमितसर्वदैवत्वाहवामहेआह्वयामहेआयौउणगतौछंदसीणउत्यणप्रत्ययः।भामितःभामक्रोधेक्रोधि
करणेचेतिकर्तरिक्तः हवामहे ह्वेञ्स्पर्धायांशब्देचबहुलंछंदसीतिसंप्रसारणंहेवसक्तावहविकरुद्रस्यपशुपतेर्यागउपतेस्तोमानित्यादिया
ज्यानुवाक्येसूत्रितंउपतेस्तोमान्पशुपाइवाकरमितिद्वेइति॥ ॥नवमीमृचमाह॥ ॥उपतेस्तोमान्पशुपाइवाक ২২০
रंरास्वापितर्मरुतांसुम्नमस्मे॥भद्राहितेसुमतिर्मृळयत्तमाथावयमवइत्तेवृणीमहे॥ ॥स्तोमान्स्तोत्ररूपान्मंत्रान्तुभ्यमुपाक

रंउपकल्पितसमर्थितसम्यगितिचदृष्टांतःपशुपाइवयथापशूनांपालयितागोपःप्रातःकालेस्वामिसमर्पितागाःसायंकालेस्वामिभ्यःप्रत्यर्पयतिएवं
त्वत्सकाशाल्लब्धान्स्तुतिरूपान्मंत्रान्स्तुतिसाधनतयातुभ्यंप्रत्यर्पयामीत्यर्थः ... ख्यानातिनातिस्थ्यंतेउत्यादिकंपंक्तिनातिस्थ्यंतत
थाचपारमर्षंसूत्रंचासमूत्रंद्वितायाध्यायपादप्रथमआत्मसूर्ययोरैक्यंप्रतिपादयति।तस्यत्वमारंभणत्वाद्यादिभ्यःइतिसूत्रेब्रह्मणः
गमात्मकस्यसर्वप्राणिज्ञानस्यजीवात्माउदितेहिसूर्येमृतप्रायंसर्वंजगत्पुनश्चेतनयुक्तंसदुपलभ्यतेतथाचश्रूयतेयोसौतपन्नुदेति
ससर्वेषांभूतानांप्राणानादायोदेतीति।आप्राःआपूरणेलुङिपुरुषव्यत्ययःअदादित्वाच्छपोलुक्जगतःगमेर्ड्वेचेतिक्विप्द्विर्वचनंचगमःक्वा
वित्यनुनासिकलोपःतिष्ठतेर्लिटःक्वसुःद्विर्वचनेशपूर्वाःखयःषष्ठ्येकवचनेवसोःसंप्रसारणमितिसंप्रसारणंआतोलोपइटिचेत्याकारलो
पःशासिवसीतिषत्वं॥ ॥द्वितीयामृचमाह॥ ॥सूर्योदेवीमुषसंरोचमानांमर्योनयोषामभ्येतिपश्चात्॥यत्रानरोदेवयंतोयुगानिवितन्व
तेप्रतिभद्रायभद्रं॥ ॥सूर्योदेवींदानादिगुणयुक्तांरोचमानांदीप्यमानांउषसंपश्चादभ्येतिउषसःप्रादुर्भावानंतरंतामभिलक्ष्यगच्छ
तितत्रदृष्टांतःमर्योनयोषांयथाकश्चिन्मनुष्यःशोभनावयवांगच्छंतीयुवतिस्त्रियंसततमनुगच्छतितद्वत्यत्रयस्यामुषसिजातायांदेवयंतः
अग्निहोत्रादीनिकर्माणिवितन्वतेविस्तारयंतियद्वादेवयंतोदेवयागार्थंधनंआत्मनइच्छंतोयजमानपुरुषाःयुगानिहलानियत्रभूतानिकर्षणा
देवकामायजमानाःयुगानियुग्मानिभूत्वापत्नीभिःसहिताःसंतोभद्रंकल्याणमग्निहोत्रादिकंकर्मभद्रायतत्फलार्थंप्रतिप्रत्येकंयस्यांउषसि
र्मणिवजयुगशब्दःकालविशेषरथावकपकरणेनेत्यंताद्यादिपावाद्गुणाभावोंतोदात्तत्वं।यतेनावइत्याद्युदात्तत्वं।युगानियुतेःक
गातति...समासेमतिसमासस्येत्यंतोदात्तत्वं॥ ॥तृतीयामृचमाह॥ ॥भद्राअश्वाहरितःसूर्यस्यचित्राएतग्वाअनुमाद्यासः॥नमस्यं
तोदिवआपृष्ठमस्थुःपरिद्यावापृथिवीयंतिसद्यः॥ ॥भद्राःकल्याणाअश्वाएतग्वाइत्येतदुभयमश्वनामतत्रैकंक्रियापरंयोजनीयंअश्वास्तु
रंगाःव्यापनशीलावाहरितोहर्तारःचित्राविचित्रावयवाअनुमाद्यासःअनुक्रमेणसर्वैस्तुत्याःमाद्यतिर्नीनेएवंभूताःसूर्यस्यएतग्वाःअश्वाः
द्वाएतंगंतव्यंमार्गंगंतारोश्वाःएतंशबलवर्णंनीलवर्णंवाप्राप्नुवंतोश्वाःनमस्यंतोस्माभिर्नमस्यमानाःसंतःदिवोंतरिक्षस्यपृष्ठमुपरिप्रदेशं
पूर्वभागलक्षणंआअस्थुःआतिष्ठंतियद्वाहरितोरसहरणशीलारश्मयःभद्राःदिविनोपेणाविशिष्टाःदिवःपृष्ठंनभस्तलमातिष्ठंतिआस्थाय
चद्यावापृथिवीद्यावापृथिव्योःसद्यस्तदानामेवएकेनाह्नापरियंतिपरितोगच्छंतीत्यामुवंतीत्यर्थःअश्वाःअशूव्याप्तौअशेनिद्ग्रीवादिनावलस
तग्वाःइणगतौअसिहसीत्यादिनाकर्मणितन्प्रत्ययःगमेरोणादिकोभावेडुप्रत्ययःएतंएतव्यंप्रतिग्गोगमनंयेषांतेतथोक्ताःबहुव्रीहौपूर्व
पदप्रकृतिस्वरत्वं।अनुमाद्यासःमदस्तुतौअस्माण्यंतादचोयत्यतोनावइत्याद्युदात्तत्वं।नमस्यंतःनमोवरिवइतिपूजार्थेक्यच्व्यत्ययेनत

417
1924

र्मणि क्तप्रत्ययः। असुः निघते श्वान्‌संबर्तमाने लुङ् गातिस्थेतिसिचो लुक् आत इति जुस्॥ ॥चतुर्थीमृचमाह॥ ॥तन्मर्यस्य देवनं नाहितं मध्या कर्तोर्वि
ततंसंजभार॥ यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै॥ ॥सूर्यस्य प्रेरकस्यादित्यस्य तद्देवत्वं तन्मीश्वरत्वं स्यात् अमिति यावत् महित्वं तन्महत्वं
च तदेतत् उभयं अत्यद्भुतं सूर्यः अस्तमयवेलायां कर्तोः कर्मणो मध्या मध्ये अपरिसमाप्तमेव विततं कर्म
णि विततं विस्तीर्णं स्वकीयं रश्मिजालं अस्तं गच्छन् सूर्यः नव मीस्च संजभार अस्त्यर्थः। देम रतांपितः मरतां तानां देवानां मुख्यानकर्तृत्वं आसं
स्मं समस्तं संहृत्य अपि च तत्वदीयाः समतिः कल्याणि बुद्धिः स कल्पत मा अतिशयेन सख्यित तमा अत एव भद्रा भजनीया शिवकरा देवं तस्मात्
रं च यं तं वदीयम वो रक्षणं वृणीमहे। संभजामहे अक्रूरं छंदसि लुङ् कृङ् इति वर्तमाने लुङ्। मन्त्रे घसह्वरेत्यादिना च्लेर्लुक्। गुणः। पित
मरुतां परमे पितृछंदसि परस्याः षष्ठ्याः पूर्वामंत्रितानुप्रवेशोऽसतीति पितर्मरुतां चेति पदद्वयमप्यनुदात्तं। अस्मे सुपां सुलुगिति चतुर्थ्या बहुवचनस्य शे
आदेशः। मरुयनमा। मऽइमस्त्वेन अस्माण्यंतालुखः। ततस्य छंदस्युभयथेत्यार्धधातुकत्वात् सार्वधातुकानुदात्तत्वं। भावप्रत्ययस्वरः। [illegible]
॥ ॥दशमीमृचमाह॥ ॥आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु॥ मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः॥ ॥
हे क्षयद्वीर राक्षसिता सर्वशत्रुं तनरुद्र ते त्वदीयं गोघ्नं गवां हननसाधनमायुधं उत अपि च पुरुषघ्नं पुरुषहननं तत्साधनमायुधं तत्
उभयं आरे दूरे अस्मत्तो विप्रकृष्टे देशे भवतु अस्मे अस्माकं तव दीयं सुम्नं सुखं अस्तु भवतु अपि च नास्माकं मृळ सुखय मिलयं प्रसन्नो भव हे देवा
धीनमानरुद्र नो अस्मान् अधिब्रूहि च अधिवचं पक्षपातेन यत् वचनं ब्राह्मणायाधिब्रूयादिति यथा अथ च अस्मानं स्वां द्विबर्हा द्वयोः स्थानयोः पृथिव्या
मंतरिक्षे च परिवृढः यद्वा द्वयोर्दक्षिणोत्तरमार्गयोः ज्ञानकर्मणोर्वा परिवृढः स्वामी स त्वं नोऽस्मभ्यं शर्म सुखं यच्छ देहि। गोघ्नं हनः हिंसागत्योः अ
स्मादुन्नर्थे कविधानमिति भावे करणे वा कप्रत्ययः। गमहनेत्युपधालोपः। हो हंतेरिति घत्वं द्विबर्हाः वृह वृद्धौ। द्वयोः स्थानयोः वर्हतं प्रवर्धनं इ
ति द्विबर्हाः। असुनन्न(?) उत्तरपदप्रकृतिस्वरत्वं॥ ॥एकादशीमृचमाह॥ ॥अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान्॥ तन्नो
मि॰ धीः॥ ॥अवस्यवः अवो रक्षणं वांछंतो वयं अवोचाम एतत्सूक्तरूपं स्तोत्रमवादिष्म अस्मै रुद्राय नमो नमस्कारं मरुत्वान् मरुद्भिर्युक्तो
रुद्रः पुत्रैर्युक्तो रुद्र स च नोऽस्माकं हवमाह्वानं शृणोतु स्वीकरोतु यदस्माभिर्निरंतरं समदीयं तत्तथैव मित्रादयः षड्देवतास्मदीयं पूजयंतु। अवस्यवः अवो
वाममन्न(?)... [illegible] अस्यात्यन्यत्वात् क्यचि इनादिना छंदसि। बच उमित्यमागमः। अवस्याव अवरक्षणं भाव अक्षनं क्य आत्मनः
क्यच् क्याच्छंदसि इत्युप्रत्ययः। वहवं भावे नुपसर्गस्येत्यप्रसारणं च। मरुत्वान् तदस्यास्तीति मतुप् यत्र तं मत्वर्थ इति भसंज्ञया पदत्वाभावाज्जश्त्वाभावः
॥ ॥इति प्रथमस्याष्टमे षष्ठो वर्गः॥ ॥चित्रमिति षळृचं दशमं सूक्तं आंगिरसगोत्रं कुत्सस्यार्षं त्रिष्टुभं सूर्यदेवताकं तथा चानुक्रांतं। चित्रं षट् सौर्यमिति आश्विने शस्त्रे सूर्योदयादूर्ध्वं सौर्याणि सूक्तानि शंसनीयानि तत्रेदं सूक्तं शंसनीयं सूत्रितं च चित्रं देवानां नमो मित्रस्येति आश्विनि
सूत्रं चः सौर्य पशौ वपायाः पुरोडाशस्य हविषां क्रमेणानुवाक्याः तताद्वपायाः पुरोडाशस्यार्थाः स्येत याच सूत्रितं चित्रं देवानामुदगादनीकमिति पंच
ग्नो भव चक्षसा अग्नौ अरुचिति अतिमूर्तिना ह्येकाहे रूढा सौर्यपर्वणि च सौर्यस्य हविषा श्वि चित्रं देवानामित्यपायास्या स्त्रितं च। तरणिर्विश्वदर्शत इति चित्रं देवानामुदगादनीकमिति याज्यानुवाक्ये। तामेतां सूक्ते प्रथमामृचमाह॥ ॥चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा २११

द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥ ॥देवानां दीव्यंतीति देवा रश्मयः तेषां देवतानामेव वा अनीकं समूहरूपं चित्रं आश्चर्यकरं सूर्यमंडलं
प्राप्तं च सकलेंद्रियस्थानीयं वा उदयं प्राप्य उदगात्। उदयाचलं प्राप्तमासीत्। कीदृशं। मित्रस्य वरुणस्याग्नेश्च उपलक्षितं तत्। एतदुपलक्षितानां जग
तां चक्षुः प्रकाशकं च द्यावापृथिवी अंतरिक्षं च आप्राः स्वकीयेन तेजसा समंतादापूरयन् ईदृग्भूतमंडलांतर्वर्ती सूर्यः अंतर्यामितया सर्वस्य प्रेर
कः परमात्मा आत्मा। अगन्म ज्योतिरुत्तमं। इत्याह असौ वा आदित्यो ज्योतिरुत्तमं मादित्यस्यैव सायुज्यं गच्छतीति। जगतो जंगमस्य चिकोर्जगत्त्रि(?)
सर्विभागत्वं तस्थुषः स्थावरस्य च आत्मा स्वरूपभूतः नानारूपवान् नानामात्रेण भिन्नः कारणं कारणात् कार्यं पृथक् स्वं व्याख्यातं पूर्वस्माल्लोका
त्स्वात्मनि उपसंहरति कर्म कर्तुः प्रवृत्तं अपरिसमाप्तमेव विसृजति अस्तपर्यंतं सूर्य इत्यादौ दानं स्वातंत्र्यं महिमा च सर्वस्यान्यनिरूपकस्यास्तिन
कस्यापि सूर्य एव दृश्यस्वातंत्र्यं। महिमानं चावगाहन अपि च उदितस्य वधारणं यदेतयस्मिन्नेव काले हरितारस सरणशीलान्स्वरश्मीन् हरितव
र्णान् श्वान्वा सधस्थात् सहस्थानादस्मात् पार्थिवाल्लोकाद् आदाय अयुक्त अन्यत्र संयुक्तान्तदा रात्रि रात्रीणां। दिवसांविभागः सूर्यगत्यधीनः
रथात् अश्वविमुंचकरणेन अन्यत्र मुक्तं इद्मवस्नातं त्यां करोति यद्वा युनक्तिः केवलो विपूर्वार्थो द्रष्टव्यः। यदेवासौ स्वरश्मीन् हरितवर्णान्
स्थानं वा सधस्थान सहस्थिता पृथ्वी इत्यस्मिन्निति सधस्था रथः तस्मादयुक्त अमुंचत आत अनंतरमेव रात्री निजावासः आच्छादयित् तमः सिमस्मै
सर्व शब्दः सर्व शब्द पर्यायः सप्तम्यर्थे चतुर्थी सर्वस्मिल्लोके तनुते विस्तारयति यद्वा वासो वासरमहस्तत्सर्वस्मादस्माल्लोकादनीय रात्रीतमस्त
नुते॥ अत्र निरुक्तं। तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत्कर्मणां क्रियमाणानां विततं संह्रियते यदेदा साययुक्त हरणादीनादित्य रश्मीन् हरिता
श्वानिति वा अथ रात्री वासस्तनुते सिमस्मै वेसरमहरवयुनां सर्वस्मादिति। महित्वं महप्रजायां औणादिक इत्न प्रत्ययः तस्य भावस्त्वतल्लोम ध्याम ध्यवा
व्यत्ययेन सुपां सुलुगिति डादेशः। कर्तोः कृ करोतेः औणादिकस्तोसुन्प्रत्ययः। विततं चतुर्थे ध्यायेऽकादशखंडे उदमुक्तं पूर्वोत्तरं तनोतेः कर्म
णि निष्ठा उदित्वेनत्का प्रत्यये इडो विकल्पनानयस्य विभाषेति इट् प्रतिषेधः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं संजभार हृग्रहोर्भ इति भत्वं। अयुक्त
युजेर्लुङि झलो झलीति सिचो लोपः। सधस्थात् घञर्थे कविधानमित्यधिकरणे कप्रत्ययः। सधमादस्थयोश्छंदसीति सहस्य सधादेशः। दासीभारादित्वात्पू
र्वपदप्रकृतिस्वरत्वं। रात्रीरात्रेश्चाजसाविति ङीप्॥ ॥पंचमीमृचमाह॥ ॥तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे॥ अनंतमन्यद्रु
शदस्य पाजः कृष्णमन्यद्धरितः संभरंति॥ ॥तत्तदानीमुदयसमये मित्रस्य वरुणस्य तदुभयोपलक्षितस्य सर्वजगतः अभिचक्षे आभिमुख्येन
द्योर्नभस उपस्थे उपस्थाने मध्ये सूर्यः सर्वस्य प्रेरकः सविता रूपं सर्वस्य निरूपकं प्रकाशकं तेजः कृणुते करोति अपि चास्य सूर्यस्य हरितः रसहरणशीला
रश्मयः हरिद्वर्णा अश्वा वा अनंतं अवसानरहितं रुशत् दीप्यमानं श्वेतवर्णं पाजः बलनामैतत् अतिबलस्यापि नैशस्य
ध्वंतमसो निवारणे समर्थं अन्यत्तमसो विलक्षणं तेजः संभरंति अह्नाहनि स्वकीयगमनेन निष्पादयंति तथा रुशत् कृष्णवर्णमन्यत्तमः स्वकीयापगम
नेन राचो भस्य रश्मयो यं कुर्वतिकि मुवत् तत्वं तस्य महात्म्यमिति सूर्यस्य स्तुतिः अभिचक्षे संपदादिलक्षणो भावे क्विप् कृदुत्तरपदप्रकृतिस्वरत्वं। द्योः
इति उसि उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ... [illegible] ... पाजः पातिरक्षतीति पाजा बलं पातेर्बलेजुट्‌ चेत्यसुन्
जुडागमश्च नन्दमासामर्थाद्यस्य विलोपः॥ ॥षष्ठीमृचमाह॥ ॥अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात्॥ तन्नो॰ धीः॥ ॥हे देवाः

419
1924

यतोयद्दिरमस्माभिरजं नो मदीयं तन्मित्रादयः षड्देवताः मामहंतां पूजयंतु अनुमन्यतां रक्षंतित्यर्थः तत्र मित्रः प्रमीतेस्त्रायकः अहरभिमानी देवः व
भा॰ प॰ रुणानिशाभिमानी वारयिता रात्र्यभिमानी अदितिरखंडनीया अदीना वा देवमाता सिंधुः स्यंदनशील उदकाभिमानिनी देवता पृथिवी भूलोकस्याधिष्ठा
त्री द्यौः द्युलोकस्य उतशब्दः समुच्चये अष्टनिपातस्य चेति संहितायां दीर्घत्वं ॥ उदिता उद्गतं वीर्यं तन्भावितन्नित्रोषां सकलुगिति उभावदेवः नारोदितवृत्ति
२३४ गतः प्रकृतिस्वरत्वं पिपृताम् पालनपूरणयोः ऋदुपधत्वेऽपि लुङ्यपि वाक्यरूपं श्लुः छंदसीशेषः अर्तिपिपर्त्योश्च इत्यभ्यासस्येत्वं सा
र्वधातुकमपिदितिनकब्यस्य इत्येसति कृन्तितुनुप्रेत्याह्रिना संहितायां दीर्घः ॥ ॥ इति प्रथमस्याष्टमे सप्तमो वर्गः ॥ ॥ इति सायणाचार्यविर
चिते माधवीये वेदार्थप्रकाशे ऋग्संहिताभाष्ये प्रथमे मंडले षोडशोनुवाकः ॥ ॥ सप्तदशेनुवाके पंच सूक्तानि ॥ तत्र नासत्याभ्यामिति पंचविंशत्य
र्चं प्रथमं सूक्तं उश्रिक संज्ञायां मंगराजस्य महिष्यां दीर्घतमसा उत्पादितः कक्षीवानस्यर्षिः त्रिष्टुप्छंदः अश्विनौ देवता तथा चानुक्रांतं नास
त्याभ्यां पंचाधिका कक्षीवान् दैर्घतमस उशिजः प्रसूत आश्विनं वा इति तुह्यादि परिभाषया इदमादीनि पंचसूक्तान्याश्विदैवत्यानि प्रातरनु
वाकस्याश्विनेक्रतौ त्रैष्टुभे छंदसि इदमादीनि त्रीणि सूक्तानि अथा आश्विनं इति खंडे सूत्रितं प्रारोचणे तु नासत्याभ्यामिति त्रीणि आश्विनशस्त्रेचै
तानि शंस्यानि प्रातरनुवाकन्यायेन त्यतिदिष्टत्वात् ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥ नासत्याभ्यां बर्हिरिव प्र वृंजे स्तोमां इयर्म्यभ्रियेव वातः ॥ याव
र्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥ ॥ बर्हिरिव यथा कश्चिद्यजमानो यागार्थं बर्हिः प्रवृंक्ते प्रकर्षेण अन्यूनातिरिक्तं यागाय य
र्थोचितं भवेत्तथा छिनत्ति संपादयतीति यावत् एवमहं नासत्याभ्यामश्विभ्यां स्तोमान् स्तुतीः संपादयामि एतदेव विशदीक्रियते अभ्रियेव यथा अ
भ्रियाणि अभ्रेषु मेघेषु भवानि उदकानि वातो वायुर्वर्षणार्थं बहुशः प्रेरयति एवमहं अश्विभ्यां स्तोत्राणि इयर्मि बहुशः प्रेरयामि कीदृशावश्वि
नौ अर्भगाय बालाय स्वयंवरलब्धभार्याय विमदाय एतन्संज्ञाय राजर्षये मध्ये मार्गे स्वयंवरार्थमागतैः कामं लभमानैरन्यैर्नृपैः सह युद्धमकुर्वत
कुर्वते पितस्मै सेनाजुवा सेनायाः प्रेरकेन शत्रुभिर्दुःप्रापणेन रथेन याववश्विनौ जायां भार्यां परैरनुक्रांतां न्यूहतुः नितरां जित्वा तदीयगृहं
प्रापयामासतुः ताभ्यामित्यर्थः नासत्याभ्यां सत्यभावः सत्यौ न असत्यौ असत्यौ न भवत इत्यन्नपादित्वात् इति नामतः प्रकृतिभावः । अव्ययपूर्वपदप्रकृति
स्वरत्वं । वृंजे वृजी वर्जने आदादिकः इदित्वान्नुम् सलोपश्च आत्मनेपदेष्वनतः इति लोपः इयर्मि ऋ गतौ जौहोत्यादिकः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । अभ्या
सस्य असवर्णे इति यङ् अभ्रियाः इव समुद्राभ्राद्घ इति भवार्थे घः घस्येयादेशः छंदसि बहुलमिति शेर्लोपः । अर्भगाय अर्तिगृभ्यां भन्नित्यनेन
भन अर्भ एवार्भकः संज्ञायां कन् छांदसो गाकारः । अपर आह अर्भमल्पं मायति गच्छतीत्यर्भगः कैगैशब्देगापोष्टक् अतोलोप इति बेल्या
कारलोपः तदेतत्प्रकृतः शाकल्यस्याभिमतमेनानुवा जूइति गतौ धातुः गत्यर्थः अस्माकं इंतर्भावितण्यर्थो द्विवचप्रच्छीत्यादिना क्विप्
पदीर्घोसवर्णान्तत्वाद् उवङ् न्यूहतुः वह प्रापणे लिट् वचिस्वपियजादित्वात् संप्रसारणं य इत्यन्तस्य मिति निघातप्रतिषेधः ॥ ॥ द्वितीयामृचमाह ॥ ॥
वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना । तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय ॥ ॥ वीळुपत्मभिः वीळु इति बल
नाम बलवदुत्पतनैः आशुहेमभिः शीघ्रगमनैः वाशब्दः समुच्चये हे नासत्या अश्विनौ एवंभूतैरश्वैः देवानामिंद्रादीनां जूतिभिः प्रेरणैश्च शा २३२
शदाना शाशदाना भृशमनयो अत्यर्थं प्रेर्यमाणौ युवयोर्वाहनभूतो रासभः प्रजापतिना दत्तः यमस्य यमस्य तस्य प्रीतिकरे कर्मप्रधने प्र
कीर्णधनोपेते आजौ आजौ संग्रामे तत्र शत्रूणां सहस्रं जिगाय जितवान् वैवस्वताद्विवस्वतो मरणहेतुना संग्रामेण तुष्टो भवति । यद्वा जेतव्येन

प्रजापतिना नहितमर्कुसहस्रं शीघ्रमनयुक्तोरासभः जिगाय जयेन लब्धवान् अन्येभ्यो देवेभ्यः पूर्वमेवाजिं प्राप्य युवां यज्ञं प्रापयामास । तथाच 421
स्मिन्नर्थे प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्राय च्छत्सूर्यामित्यादिकं ब्राह्मणमनुसंधेयं वीळुपत्मभिः वीळु बलं च तत्पतंतीति वीळुपत्मानः आशुहेमभिः 1924
आशु शीघ्रं हिन्वंति गच्छंतीति आशुहेमानस्तैः । धोवा अन्येभ्योपि दृश्यंत इति मनिन् कृदुत्तरपदप्रकृतिस्वरत्वं । जूतिभिः जूतियूतीत्यादिना
क्तिन उदात्तत्वं । शाशदाना शद्लृ शातने अत्र गत्यर्थः । धातूनामनेकार्थत्वात् ॥ अस्माद्यङ्लुगंतात् शानच् तस्य छंदस्युभयथेत्या र्धधातुक
त्वात् श्यन् भावः अतो लोपयलोपौ अभ्यस्तानामादिरित्याद्युदात्तत्वं सुपां सुलुगिति पूर्वसवर्णदीर्घः आजौ अजेर्णेच् सूत्रेण इण् ॥ जि
गाय जितवान् सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कुत्वं गकारः ॥ ॥ तृतीयामृचमाह ॥ ॥ तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः ।
तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ॥ ॥ अत्रेयमाख्यायिका तुग्रो ह अश्विनोः प्रियः कश्चिद्राजर्षिः स च द्वीपांतरव
र्तिभिः शत्रुभिरत्यंतमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं शीघ्रमश्विनौ तुष्टाव स्तोत्रं च सेनया सहितं आत्मीयाः सुनौ ध्वारोप्य पितुस्तुग्रस्य
समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति । अयमर्थः इदमाख्यानं तु अनेन प्रतिपाद्यते । हशब्दः प्रसिद्धौ खलु पूर्वं शत्रुभिः पीडितः सन्
तज्जयार्थं उदमेघे उदकैर्मिह्यते सिच्यत इत्युदमेघः समुद्रः तस्मिन् भुज्युं एतत्संज्ञं प्रियं पुत्रं अवाहाः नावा गंतुं पर्यत्याक्षीत् । तत्र दृष्टांतः म
मृवान् म्रियमाणः सन् धनलोभी कश्चिन्मानुषः रयिं न यथा धनं परित्यजति तद्वत् हे अश्विनौ तं च भुज्युं मध्ये समुद्रं निमग्नं नौभिः पितु
समीपं आ ऊहथुः युवां प्रापितवंतौ कीदृशीभिः । आत्मन्वतीभिः युवयोः स्वभूताभिरित्यर्थः । यद्वा धृतिरात्मा धारणवतीभिरित्यर्थः । उदमेघे मि
ह सेचने कर्मणि घञ् न्यङ्क्वादीनां चेति कुत्वं उदकस्योदः संज्ञायां माथान्तदिनोत्तरपदांतोदात्तत्वं । ममृवान् मृङ् प्राणत्यागे लिटः क्वसुः
क्रादिनियमप्राप्तस्येटो वस्वेकाजाद्घसामिति नियमादभावः अवाहाः तुह त्यागे लुङि तिपि च्लेः सिच् आगमानुशासनस्यानित्यत्वात् सर्गिटो
न क्रियते बहुलं छंदसीति ईडभावः हल्ङ्याब्भ्य इति लोपः रुत्वविसर्गौ मंत्रे घसेति च्लेर्लुक् सत्यां त्वादिना क्रियते नौभिः सावेकाच इति विभ
क्तेरुदात्तत्वं आत्मन्वतीभिः आत्मनो मतुप् आदुपधायाः इति वत्वं अनो नुडिति नुट् नलोपः ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं अंतरि
क्षप्रुद्भिः प्रुङ् गतौ क्विप् चेति क्विप् ॥ ॥ चतुर्थीमृचमाह ॥ ॥ तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतंगैः ॥ समुद्रस्य धन्व
न्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः ॥ ॥ हे नासत्यौ सेनया सह द्वीपे निमग्नं भुज्युं तिस्रः क्षपः त्रिसंख्याका रात्रीः त्रिवारमार
त्रान्यहानि अतिव्रजद्भिः अतिक्रम्य गच्छद्भिः एतावंतं कालं अतिव्याप्य वर्तमानैः पतंगैः पतद्भिः त्रिभिः त्रिसंख्याकैः रथैः ऊहथुः युवा
मूढवंतौ कुत्रेति चेदुच्यते समुद्रस्याम्बुराशेर्मध्ये धन्वन् धन्वति जलवर्जित प्रदेशे आर्द्रस्य उदकेनार्द्रीभूतस्य समुद्रस्य पारे तीरदेशे
चं कथंभूतैः रथैः शतपद्भिः शतसंख्याकैश्चक्रलक्षणैः पादैरुपेतैः षळश्वैः षड्भिरश्वैर्युक्तैः तिस्रः त्रिचतुरोस्त्रियामिति तिसृभावः स्यति
स्यादेशः सर्वां तोदात्तः अचि र ऋत इति रेफादेशः उक्तादात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं । क्षपः विभक्त्यंतं तस्य छांदसं ह्रस्वत्वं
ह्रस्वाहानि आत इतियोगविभागाद्धातोराकारलोपः अहान्यश्वं छंदसि बहुलमिति शेर्लोपः । पतंगैः पतलुगतौ पतेरंगच् । धन्वन् धावि
गत्यर्थः इत्यस्मात् कनिन् पृषोदरादिना कनिन् सुपां सुलुगिति सप्तम्या लुक् । शतपद्भिः शतमनंतः पादा येषां संख्यासु पूर्वस्येति पा

भा०प्र० दशब्दस्यांत्यलोपः समासांतः अयस्मयादित्वेन भत्वात्पादः पदिति पद्भावः। पद्भ्यां दसमार्थः पच्छब्दः प्रकृत्यंतरं द्रष्टव्यं॥ ॥पंचमीमृ-
चमाह॥ ॥अनारंभणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे। यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसं॥ ॥हे अश्विनौ अ-
२१३ नारंभणे आलंबनरहिते समुद्रे तत्कर्म अवीरयेथां विक्रांतं कृतवंतौ युवां अनारंभणत्वमेव स्पष्टीकरोति। अनास्थाने अस्थीयते स्थितिः
आस्थानं भूप्रदेशः तद्रहिते स्नातुमशक्यतरे इत्यर्थः अग्रभणे हस्तेन ग्राह्यं शाखादिकमपि यत्र नास्ति तस्मिन्नित्यर्थः किं पुनस्तत्कर्म भुज्युंस-
मुद्रे मग्नं शतारित्रां बह्वरित्रां ... पार्श्वतो बद्धैर्जलोत्क्षेपणे सति नौः शीघ्रं गच्छति तानि अरित्राणि ... अतिष्ठितवांसं अस्थितवंतं
... कृत्वा असंग्रहनामेन तत्पितुरस्तमस्य गृहं प्रतियत् ऊहथुः तद्वहनं तत्प्रापणमन्येद्दुः शक्यं युवां समुद्रमध्ये कृतवंतावित्यर्थः अना-
रंभणे आरभ्यते इत्यारंभणं कृत्यल्युटो बहुलमिति कर्मणि ल्युट् नञ्समासः अव्ययपूर्वपदप्रकृतिस्वरत्वं। अवीरयेथां वीर विक्रांतौ चुरादिरात्मनेपदी अ-
नास्थानाग्रभणयोः पूर्ववल्ल्युट् ... अग्रभणे हस्य भः ... इति भत्वं ... अस्यतेश्छिन् सर्वमित्यस्तं अस्थिरसीत्यादिना ...
यः शतारित्रां ऋगतौ अर्तिलूधूसूखनसहचर इत्रः करणे इत्यत्र प्रत्ययः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ॥इति प्रथमस्याष्टमे अष्टमो वर्गः॥ ॥षष्ठी-
मृचमाह॥ ॥यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति। तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः॥ ॥हे अश्विनौ अघा-
यते पेदुर्नाम कश्चिद्राजा आश्विनौ तु ... प्रीतौ कंचिच्छ्वेतवर्णमश्वं दत्तवंतौ स चाश्वः तस्य पेदोर्जयं चकार एतच्चेदं प्रतिपाद्यते हे अश्विनौ युवां
अघं ... यं अश्वं शश्वद्बहुतरं ... श्वेतवर्णमश्वं ददथुः दत्तवंतौ सोऽश्वः तस्मै स्वस्तिजयलक्षणं मंगलं ... नित्यमेव चकार वां युवयोः
दानं महि महत् अतिगंभीरं अत एव कीर्तेन्यं सर्वैः कीर्तनीयं प्रशस्यं भूत् अभूत् तस्मात् पैद्वः पेदोः संबंधी ... वाजी शीघ्रगामी अर्यः शत्रूणां प्रेरयिता
... वाजी ... सदमित् सदैव हव्यः ... दात्रं ददातेर्भावे ... प्रत्ययः ... महि महत् ...
इति कीर्तेन्यं कृत संज्ञाद्व ... केन्यप्रत्ययः ... ऋतइद्धातोरिति इत्वं ... बहुलं छंदसीति ... दस्य ... इत्यद्भावः ... पेदुः पेदोः सं-
बंधी तस्येदमित्यण् छांदसो वर्णलोपः हव्यः ह्वेञ् ... बहुलं छंदसीति संप्रसारणं गुणः ... अर्यः ऋगतौ
अर्यः स्वामि ... ण्यत् ... स्वरितत्वं॥ ॥सप्तमीमृचमाह॥ ॥युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिं। कारोतराच्छफादश्व-
स्य वृष्णः शतं कुंभाँ असिंचतं सुरायाः॥ ॥अत्रेयमाख्यायिका कक्षीवानृषिः पुरा तमसि ... स्वनार्थमाश्विनौ तुष्टाव तस्मादश्विनौ प्रभूतां धियं दत्तवंताविति तदाहो हे नरौ नेतारावश्विनौ युवं युवां पज्रियाय पज्रा इत्यंगिरसामाख्या पज्रा वा अंगिरस इत्याम्नानात्तेषां
कुले जाताय कक्षीवते कक्ष्या रज्जुरश्वस्य तद्वते ... स्तुवते युवयोः स्तुतिं कुर्वते महर्षये प्रभूतं पुरंधिं प्रभूतां धियं बुद्धिं अरदतं ... यया
सर्वार्थगोचरा भवति तथा कृतवंताविति अर्थः॥ अपि च कारोतरात् यथा सुरायाः संपादकाः तां स्रावयंति एवमेव युवां ... सेचनसमर्थस्य वृ-
षादीत्याश्वस्य शफात् खुरात् सुरायाः शतं कुंभान् असंख्यान् घटान् असिंचतं अक्षारयतं। यद्वा सिंचतिः पूरणार्थः ... खुरात्
... असंख्यातघटान् असिंचतमपूरयतं। यज्ञमाना सौत्रामण्यां कर्मणि ... सुरां ...
स्यर्थः स्तुवते ... इति शतृ आदादिकत्वाच्छपो लुक् ... तुरनुम इति विभक्तेरुदात्तत्वं पज्रियाय पज्र ... कक्षीवते असंदीवद

पीत्यादिना कक्षीवदिति निपातनात् कक्ष्याशब्दस्य संप्रसारणं वत्वं च। अरदतं रद विलेखने पुरंधिं बहुधीरिति यास्कः पृषोदरादित्वात्पुरंधिभावः 423/1924
यद्वा पुरस्थिततत्त्वं सर्वविषयत्वात् तस्यां धीयते ... इति पुरंधिर्बुद्धिः कर्मण्यधिकरणे चेति दधातेः किप्रत्ययः। तत्पुरुषे कृति बहुलमिति बहु-
लवचनादलुक् ... पृषोदरादिरेव। असिंचतां सिच क्षरणे तौदादिकः शे मुचादीनामिति नुम्॥ ॥अष्टमीमृचमाह॥ ॥हिमे-
नाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तं। ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति॥ ॥अत्रेदमाख्यानं अत्रिरृषिः ...
असुरैः शतद्वारे पीडायंत्रगृहे प्रविश्य तुषाग्निना अबाधि ... तदानीं तेन ऋषिगणा स्तुतावश्विनौ अग्निमुदकेन प्राशमयतस्मात्पीडायंत्रादेरिकले-
... तं निर्गमयतामेतत्तदनेन प्रतिपाद्यते हे अश्विनौ हिमेन हिमवता शीतेनोदकेन घ्रंसं दीप्यमानं अत्रेर्बाधनार्थमसुरैः प्रक्षिप्तं तुषाग्निं अ-
वारयेथां युवां निवारितवंतौ शीतीकृतवंताविति अर्थः॥ अपि चास्मा अत्रये पीडया कार्श्यं प्राप्ताय अत्रये पितुमतीं अन्नामन्नयुक्तां ऊर्जं बलप्रदं रसात्मकं क्षी-
रादिकं आधत्तं पुष्ट्यर्थं प्रयच्छतं। ऋबीसे अपगतप्रकाशे पीडायंत्रगृहे अवनीतं अवाङ्मुखं नयात् असुरैः प्रापितमत्रिं सर्वगणं गणाः सम्यक् सर्वे या-
स्मिं इंद्रियाणां पुत्रादीनां वा गणे ... हादुद्रूगमप्य युवां स्वगृहं प्रापितवंतौ यद्वा हिमेन शीतेन ... केन अग्निं अग्निवत् तीक्ष्णं घ्रंसं अहर्नामैतत् सामर्थ्यात्
निदाघकालीनमहः अवारयेथां तस्यान्हस्तैक्ष्ण्यं निवारितवंतौ अपि चास्मा अग्नये अपि पुरोडाशादिलक्षणान्नोपेतं ऊर्जं बलकरं रसात्मकमुपस्तरणा-
भिघारणात्मकं घृतं अधत्तं अग्नेर्यागार्थं हविर्निष्पादितवंताविति अर्थः॥ ऋबीसे अपगततेजस्के पृथिवीद्रव्ये अवनीतं ओषधीनामुत्पादनाय अध-
स्तान्नीतं पार्थिवाग्निना परिपक्वादुदकेन क्लिन्नाः ओषधिवनस्पतयो विरोहंति अत्रिं हविषामत्तारं तु पृथिवीवनस्पत्यादीनां वा एवंविधमग्निं सर्वगणं व्रीह्या-
द्योषधिगुणोपेतं हे अश्विनौ युवां स्वस्ति अविनाशो यथा भवति तथा उन्निन्यथुः व्रीह्याद्योषधिवनस्पतिरूपेण भूमेरुपरि उन्नीतवंतौ करणा-
त्मना पार्थिवाग्नौ वर्तमानं सर्वमोषधिवनस्पत्यादिकं अश्विनौ प्रकर्षेण व्यक्तीकृतवंताविति अर्थः॥ अयं पक्षो यास्केन हिमेनोदकेनेत्यादिनोक्तः पितु-
मती अन्नवती ... मतुपि ... ऋबीसे अत्र यास्कः। ऋबीसमपगतभासमपह्नुतभासमपहृतभासं वेति पृषोदरादित्वादभिमतरूप-
सिद्धिः। अत्रिं अद भक्षणे अदेस्त्रिनिश्चेति त्रिन्प्रत्ययः अवनीतं गतिरनंतर इति गतेः प्रकृतिस्वरत्वं स्वस्ति असाक्षाद्विभाषितेन छंदस्युभयथेति
सार्वधातुकत्वात् ... भावाभावः॥ ॥नवमीमृचमाह॥ ॥परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मबारं। क्षरन्नापो न पायनाय राये सहस्रा-
य तृष्यते गोतमस्य॥ ॥अत्रेदमाख्यानं कदाचिन्मरुद्भूमौ वर्तमानस्य तोतुर्गोतमस्य ऋषेः समीपं देशांतरे वर्तमानं कूपमुत्पाट्याश्विनावप्रापयेथां
प्रापय्य च तं कूपं स्नानादिभोगार्थाय उपरि मूलं अधो बिलमवस्थाप्य तथामिति तदेतत्प्रदर्शयते हे नासत्यासत्यस्वभावौ सत्यनेतारौ नासिकाप्रभवौ वा
एतत्संज्ञावश्विनौ युवां अवतं कूपनामैतत् अधस्तात्तं कूपं परामुदेथां गोतमस्य ऋषेः समीपं प्रापयाथां अनंतरं कूपं उच्चाबुध्नं उच्चैरुपरिष्टाद्बुध्नो
मूलं यस्य स तथोक्तः जिह्मबारं जिह्मं अधस्ताद्वर्तमानतया वक्रं बारं द्वारं यस्य स तथोक्तः एवंगुणविशिष्टं चक्रथुः युवामकृषाथां तस्मात्कूपात् तृष्यते पि-
पासते गोतमस्य पायनाय पानार्थं आपो न आपश्च अयन शब्दश्चार्थे क्षरन् प्रवाहरूपेण निरगमन् ... तस्य राये धनाय हविर्भिर्दत्तवतः सहस्राय
... संख्याकाय ... धनाय ... आर्थं ... तेषां ...

दिवादेशः । क्षरन् क्षर संचलने । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । शपः पित्वादनुदात्तत्वं तिङश्च सार्वधातुकस्वरेण धातुस्वरः । पादादित्वान्निघातहेतु
मिति णिच्यभ्यासस्येति युक्भावे … उदात्तत्वं ॥ ॥ दशमीमृचमाह ॥ ॥ जुजुरुषो नासत्यो
त वव्रिं प्रामुंचतं द्रापिमिव च्यवानात् ॥ प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनां ॥ ॥ अत्रेदमाख्यानं । वलीपलिताभिरुपे
तो जीर्णांगः पुत्रादिभिः परित्यक्तश्च्यवनाख्य ऋषिः अश्विनौ तुष्टाव स्तुतावश्विनौ तस्मै … जरामपगमय्य पुनर्यौवनमकुरुतामितीदं तद्
दाह ॥ हे नासत्यावश्विनौ जुजुरुषो जीर्णान्निश्च्यवमानाच्च्यवनाख्यात् ऋषेः सकाशाद्वव्रिं रूपं शरीरमावृत्य वर्तमानां जरां प्रामुंचतं प्रकर्षेण
मोचयतं । तत्र दृष्टांतः । द्रापिमिव । द्रापिरिति कवचस्याख्या यथा कश्चित्कवचं कृत्स्नशरीरव्यापकं धृत्वा पश्चात् शरीरात् पृथक् करोति तद्वत् ॥ उत
अपि च हे दस्रा दर्शनीयावश्विनौ जहितस्य पुत्रादिभिः परित्यक्तस्य ऋषेः आयुः जीवनं प्रातिरतं प्रावर्धयतं प्रपूर्वस्तिरतिर्वर्ध
नार्थः । आदित अनंतरमेव युवानं संतं कनीनां कन्यानां पतिं भर्तारं अकृणुतं अकुरुतं प्रपूर्वस्तिरतिर्वर्धनार्थः आदित अनं
तरमेव युवानं संतं कनीनां कन्यानां पतिं भर्तारं अकृणुतं जुजुरुषः जॄष् वयोहानौ लिटः क्वसुः बहुलं छंदसीत्यकित्वाद्गुणाभावः पंचम्येकवचने वसोः
संप्रसारणमिति संप्रसारणं … तिपत्वं वव्रिं वृञ् वरणे आदृगमहनजन इति किप्रत्ययः । जहितस्य … कर्मणि निष्ठा
स्य छंदस्युभयथेति सार्वधातुकत्वात् … बहुलं छंदसीति … कनीनां … बहुलवचनात् कन्याशब्दस्या
च संप्रसारणं ॥ ॥ इति प्रथमस्याष्टमे नवमो वर्गः ॥ ॥ एकादशीमृचमाह ॥ ॥ तद्वां नरा शंस्यं राध्यं चाभिष्टिमन्नासत्या वरूथं यद्विद्वांसा
निधिमिवापगूढमुद्दर्शतादूपथुर्वंदनाय ॥ ॥ अत्रेदमाख्यानं । वंदनो नाम कश्चिदृषिः स चासुरैः कूपे निखातः उत्तरीतुमशक्तस्तमश्विनौ
कूपादुन्निन्यतुरिति । तदाह । नरा नेतारौ हे नासत्यावश्विनौ वां युवयोः संबंधि अभिष्टिमत् अभ्येषणयुक्तं आभिमुख्येन प्राप्तव्यं
तथा वरूथं वरणीयं कामयितव्यं तत्कर्म शंस्यं अस्माभिः प्रशंसनीयं राध्यं … किं च पुनस्तत्कर्म विद्वांसा जानंतौ युवां निधिमिव निक्षिप्तं
धनमिव अपगूढं अरण्ये निर्जने देशे कूपस्य मध्ये असुरैर्निगूढं वंदनाय वंदनमृषिं दर्शनात् … पिपासुभिर्द्रष्टव्यात् कूपात् उदूपथुः
उद्धृतवंतौ एवं यदेतत् कूपादुद्धरणं तदित्यर्थः । शंस्यं शंसु स्तुतौ … अभिष्टमत् अभि
षगतावित्यस्माद्भावे क्तिन् मंत्रे वृषादिना उदात्तत्वं … उत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । शकंध्वादित्वात् पररूपत्वं । तादौ चेति तु गति
स्वरस्य सर्वविधीनां छंदसि विकल्पितत्वात् प्रकृतिः । ततो मतुप् । अंतोदात्तादुत्तरपदादन्यतरस्यामिति … उदात्तत्वं । वरूथं वृञ् उथन् विद्वांसा सुपां सु
लुगिति विभक्तेराकारः । अपगूढं गूहू संवरणे कर्मणि निष्ठायस्य विभाषेतीट्प्रतिषेधः ढत्वधत्वष्टुत्वढलोपदीर्घाः । गतिरनंतर इति ग
तेः प्रकृतिस्वरत्वं । दर्शतात् भृमृदृशियजि … इत्यादिना अतच् । ऊपथुः वप बीजतंतुसंताने लिट्यभ्यासस्योभयेषामिति संप्रसारणं द्विर्वचनादि वंदना
य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ॥ ॥ द्वादशीमृचं ॥ ॥ तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिं २३४
दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच ॥ ॥ अत्रेयमाख्यायिका । इंद्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदी
मामन्यस्मै वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच । ततोऽश्विनावश्वस्य शिरश्छित्वा दधीचः शिरः प्रछिद्यान्यत्र निधाय तत्राश्व्यं शिरः प्रत्य

धत्तां तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास तदिंद्रो ज्ञात्वा वज्रेण तच्छि
रश्छिनत् अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तमिति शाट्यायनकं । … प्रतिपाद्यते हे नरा नेतारावश्विनौ वां 425
युवयोः संबंधि उग्रं उद्गूर्णं मनुष्यैर्दुःसाध्यं दंसः कर्म नाम … सनये … तत्कर्म समनंतरं धनलाभार्थं आविष्कृणोमि प्रकटीकरोमि त 1924
त्र दृष्टांतः । तन्यतुर्न यथा मेघः शब्दं वृष्टिं मेघांतर्वर्तमानं उदकं प्रकर्षेण सर्वत्र प्रकटयति तद्वत् । किं तत्कर्म अथर्वणः पुत्रो दध्यङ् एतत्सं
ज्ञ ऋषिः अश्वस्य शीर्ष्णा युष्मत्सामर्थ्येन प्रतिहितेन शिरसा वां युवाभ्यां उ ईं मां मधुविद्यां यद्यदा खलु प्रोवाच प्रोक्तवान् तदानीं अश्वस्य
शिरसः संधानलक्षणं पुनर्मानुषस्य शिरसः प्रतिसंधानलक्षणं च यद्भवदीयं कर्म तदाविष्कृणोमीत्यर्थः । सनये षणु दाने …
असिवसिध्वनिसनिवनिरिनिग्रंथिचरिभ्यश्चेति इप्रत्ययः । तन्यतुः तनु विस्तारे । … इत्यादिना यतुच् … बाहुलकाद्घलुक् च
छांदसः सलोपः । वृष्टिं … सिच्यतेऽनेनेति वृष्टिः । मंत्रे वृषेत्यादिना क्तिन् उदात्तत्वं । अथर्वणः अपत्यार्थे अण् … प्रकृतिभा
बाहुलकाभावः … शीर्ष्णा शिरःशब्दपर्यायः शीर्षन्शब्दोऽन्तोदात्तो निपात्यते । अल्लोपोऽन इति उदात्तनिवृत्तिस्वरेण विभक्तेरु
दात्तत्वम् ॥ ॥ त्रयोदशीमृचमाह ॥ ॥ अजोहवीन्नासत्या करा वां महे यामन्पुरुभुजा पुरंधिः ॥
॥ ॥ वध्रिमती नाम कस्यचिद्राजर्षेः पुत्री नपुंसकभर्तृका पुत्रलाभार्थमश्विना … श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तं ॥
स्यं पुत्रं ददतुः तदेतदाह । पुरुभुजा बहूनां पालकौ प्रभूतहस्तौ वा हे नासत्यावश्विनौ महे महनीये … श्रुत्वा अश्विनावागत्य तस्यै हिरण्यहस्ता
… अभिमतफलस्य कर्तारौ वां युवां पुरंधिः बहुधीः वध्रिमती … यामन् यामनि यातिगच्छतीति यामः
त पुनः पुनस्तुत्वा पुत्रलाभार्थं आहूतवती युवां च वध्रिमत्यास्तदाह्वानं … एतत्संज्ञा राजपुत्री अजोहवी
… श्रुत्वा च हे अश्विनौ तस्यै हिरण्यहस्तं सुवर्णमयं पाणिं … शासुरिव यथा शासकस्याचार्यस्य वचनं शिष्यो बहुशः
… यङ्लुगंतात् … करा करोतेः पचाद्यच् सुपां सुलुगिति विभक्तेराकारः । यामन् अतो मनिन् … अजोहवी
नि सुपां सुलुगिति सप्तम्या लुक् श्रुतं … बहुलं छंदसीति विकरणस्य लुक् बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । शासुः शासु
अनुशिष्टौ … भावः छांदसस्तलोपः ॥ ॥ चतुर्दशीमृचमाह ॥ ॥ आस्नो वृकस्य वर्तिकामभीके
युवं नरा नासत्यामुमुक्तं ॥ उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥ ॥ वर्तिका चटकसदृशस्य पक्षिणः स्त्री नाम अरण्ये वर्तमा
ना … अश्विनावमोचयतां तदेतदाह । हे नरा नेतारौ नासत्यावश्विनौ युवं युवां अभीके अभिगते वृकवर्तिकयोः संग्रामे वृक
स्य विकर्तकस्य … आस्नः आस्यात् वर्तिकां चटकसदृशीं अमुमुक्तं अमोचयतं … पुनः पुनर्वर्तते प्रतिदिवसमावर्तत इति वर्तिका उषाः
तां वृकेण वारकेण सर्वजगत्प्रकाशस्याच्छादयित्रा सूर्येण ग्रस्तां आसतः आस्यात् यदुषा अश्विनावादित्येनाभिग्रस्तां तामश्विनौ प्रमुमुचतुरित्याख्या
नं … विकर्तनादित्य … अस्यस्यासन्नादेशः अल्लोपोऽन इति … उदात्तनिवृत्तिस्वरेण … विभक्तेरुदात्तत्वं । अ
मुक्तं मुच्लृ मोचने … बहुलं छंदसीति विकरणस्य श्लुः कृपमाणं कृपिः स्तुतिकर्मा … विकरणस्वरे प्राप्ते …

त्वायुदात्तत्वं चित्र इत्येतुमर्थे रसे सेनिति सेन प्रत्ययः स्कोः संयोगाद्योरिति कलोपः॥ ॥पंचदशीमृचमाह॥ ॥चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य
भा०पृ० परितक्म्यायां। सद्यो जंघामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तं॥ ॥अगस्त्यस्य पुरोहितः खेलो नाम राजर्षिः तस्य संबंधिनी विश्पला नाम स्त्री सं
ग्रामे शत्रुभिश्छिन्नपादासीत् पुरोहितेनागस्त्येन स्तुताविश्विनौ रात्रावागत्य अयोमयं पादं समधत्तां तदेतदाह। आजा आजौ संग्रामे अगस्त्यपु
२१५ रोहितस्य खेलस्य संबंधिन्या विश्पलाख्यायाः चरित्रं चरणं पादं वेः पक्षिणः पर्णं पतत्रमिव अच्छेदि पुरा छिन्नमभूत् खलु। हे अश्विनौ
युवां अगस्त्येन स्तुतौ संतौ परितक्म्यायां परितक्म्या रात्रिः परित एनां तक्म तक्मेति रूपनाम तत्करोतीति यास्कः एतामुभयतः सर्वतो रात्रितत्त्वा
र्थं॥ रात्रावागत्य सद्य इदानीमेव हिते शत्रुभिर्निहिते धने तन्निमित्तभूते विषयभूते सति सर्तवे सर्तुं गंतुं विश्पलायै आयसीं अयोमयीं जंघां
पादलक्षितं पादं प्रत्यधत्तं संधानमेकीकरणं कृतवंतावित्यर्थः। चरित्रं अर्तिरुधृत्रेत्यस्य सह चरु उत्यचरित्रं इति करणे इत्रः आजा सुपांसुलुगि
तिविभक्तेराकारः आयसीं अयःशब्दात् परस्यद्धाद्धिकारार्थे प्राणिरजतादिभ्योऽजिति अञ् डीप्॥ ॥इति प्रथमस्याष्टमे दशमो वर्गः॥
षोडशीमृचमाह॥ ॥शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितांधं चकार तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन्॥ ॥वृषागि
रः पुत्रः ऋज्राश्वो नाम राजर्षिः तस्य समेषाः अश्विनोर्वाहनभूतायाः रासभ्या वृक्याः भक्षणार्थं आहारार्थं शतसंख्यान् पौरजनानां मेषान्
छिन्नीकृत्य प्रददौ ऋज्राश्वः ज्ञातमेवं च मे पानिमित्तं शतस्य दर्शनात् एवं पौराणां महितं प्रदत्तं पिता यो येन नेत्रहीनकरोत। तेन स्तूयमानावश्विनौ
अस्माद्धाहननिमित्तं अंधं जातमिति ज्ञात्वा तेन स्मा अक्षिणीप्रायच्छतामिति तदेतदाह। अत्र लक्ष्मकृत वृक्यैतद्वक्ष्याहारः सत्क्रऋज्राश्वः शतं
तसंख्याकान् मेषान् वृक्ये आत्मना पोषिताय वृक्यै वृकस्त्रियै चक्षदानं शकली कृत्य प्रदत्तवंतं चक्षदानं क्षददतेरतिकर्मा अत्र तदकलीकरणार्थः। शकलीकृत्य दृ
तवंतं तं ऋज्राश्वं पिता शापेन अंधं दृष्टिहीनं चकार कृतवान्। हे नासत्यावसत्यस्य भावो असत्यं स्यानेतारौ वा अभिषजौ देवानां वैद्यभूतावश्विनौ
वै देवानां भिषजाविति श्रुतेः। हे दस्रौ दर्शनीयौ एतन्नामकौ वा हे अश्विनौ अनर्वन् अनर्वणि हिंसारहिते अप्रतिपित शापानि गमनरहिते अक्षी चक्षु
षी विचक्षे विविधं द्रष्टुं समर्थे तस्मै ऋज्राश्वाय आधत्तं धत्तं अकुरुतं। वृक्ये वृकोरण्यश्वा तस्य स्त्री वृकी जातेरस्त्रीविषयादिति ङीष् असादि
षु छंदसि वा वचनमिति चतुर्थ्येकवचनस्यादुभावे दृश्यनाय उदात्तस्वरितयोर्यणइति पुरस्यानुदात्तस्य स्वरितत्वं। चक्षदानं क्षद इदितः कानच
चित्स्वरः अक्षी ईर्च द्विवचन इति परत्वाद् अक्षशब्दस्य इकारांतादेशः सचोदात्तः तस्मिन्न् तेमवद्भतोप्रतिषेध इति परिभाषया पुनर्नुम्न भव
ति। विचक्षे चक्षो संपदादिलक्षणो भावे क्विप्। अनर्वन् ऋ गतौ अस्मादन्येभ्योऽपि दृश्यंते इति दृशिग्रहणस्य विध्यंतरोपसंग्रहार्थत्वात् भाव
वनिप् अर्वगमनं विपर्ययं यस्य न यो नास्तीति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। सुपां सुलुगिति द्वितीयैकवचनस्य लुक् छंदसीनलोपाभा
वः॥ ॥सप्तदशीमृचमाह॥ ॥आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयंती। विश्वे देवा अन्वमन्यंत हृद्भिः समु श्रिया नासत्या सचेथे॥
सविता दुहितरं सूर्याख्यां सोमाय राज्ञे प्रदातुमैच्छत् तां सूर्यां सर्वे देवा वरयामासुः ते अन्योन्यमब्रुवन् आदित्यमवधिं कृत्वा आजिं धावाम यो
ऽस्माकं मध्ये उज्ज्योतिष्यंति तस्येयं भविष्यतीति तत्राश्विनावुदजयतां सा च सूर्याश्विनौ वृतवती तयो रथमारुरोह अत्र सूर्या पतिर्वै सोमाय राज्ञे दु २३५
हितरं प्रायच्छत् इत्याधिकं ब्राह्मणमनुसंधेयं इदं वाख्यानं सूर्याविवाहस्य प्रस्तावकेन सलिलेनोक्ताभिता भूमिरिति सूक्तेन विस्पष्टयिष्यते। हे अ

श्विनौ वां युवयोः रथं काष्मेव काष्मशब्दः काष्ठवाची यथा काष्ठं आजिधावनस्य अवधिताया निर्दिष्टलक्ष्यं आशुगामी कश्चिन् सर्वेभ्यो धावद्भ्यः 427
पूर्वं प्राप्नोति एवमेव सर्वेभ्यो देवेभ्यः पूर्वं अर्वता शीघ्रमवधि प्राप्नुवता युष्मदीयेनाश्वेन कारणभूतेन युवाभ्यां जयंती जीयमाना सूर्यस्य 1924
सवितुर्दुहिता तिष्ठत् आरूढवती रणभूतेन युवाभ्यां जयंती यजमाना सूर्यस्य सवितुर्दुहिता तिष्ठत् तदा विश्वे सर्वे इतरे देवाः एतदारो
हणरथं हृद्भिः हृदयैः अन्वमन्यंत अन्वजानन्त तदानीं हे नासत्यावश्विनौ श्रिया कक्षं सहस्त्रलाभरूपया संपदा कांत्या वा युवां संसच
ते संगच्छेथे। जयंती व्यत्ययेन कर्मणि शतृ प्रत्ययः हृद्भिः पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः सचेथे षच समवाये स्वरितेत्वादात्मनेपदं
॥ ॥अष्टादशीमृचमाह॥ ॥यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयंता। रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च
युक्ता॥ ॥हे अश्विनौ हयंता स्तुतिभिराहूयमानौ युवां भरद्वाजाय संभ्रियमाणहविर्लक्षणान्नाय यजमानाय दिवोदासाय एतः
त्संज्ञाय राजर्षये अभीष्टफलं दातुं वर्तिः स्वदीयं गृहं यद्यदा अयातं अगच्छतं तदानीं रेवत् धनेन युक्तं मंनं वां युवयोः सचनः सेचनो रथः उ
वाह तत् सर्वं दिवोदासाय प्रापयामास। अपि च तस्मिन् रथे वृषभो नंदुनान्शिशुमारोग्रहश्च परस्परविरुद्धावपि स्वसामर्थ्यप्रकटना
य युक्तौ वाहनतया संयुक्तौ वास्तां दिवोदासाय दिवश्च दासः पृष्ठ्या अलुग्वक्तव्यः उत्य लुक्। दिवोदासादीनां छंदस्युपसंख्यानमिति पूर्वपदा
द्युदात्तत्वं। भरद्वाजाय भृञ् भरणे। अस्माद् व्यत्ययेन कर्मणि कर्तृ प्रत्ययः। छंदस्युभयथेत्यार्धधातुकत्वेन सार्वधातुकानुदात्तत्वा
भावात्प्रत्ययाद्युदात्तत्वं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। हयंता कयः कर्मणि कर्तृ व्यत्ययेन शतृ बहुलं छंदसीति संप्रसारणं। अपि गुणाभा
द्दसौ अयातं इणः रेवत् रयिशब्दान्मतुप् रयेर्मतौ बहुलमिति संप्रसारणं छंदसीर इति मतुपो वत्वं रयिशब्दाच्चेति मतुप उदात्तत्वं॥
सचनः षचेल्युट् वने। अनुदात्ते तश्च हलादेरिति युच् युक्ता सुपां सुलुगिति विभक्तेराकारः॥ ॥एकोनविंशीमृचमाह॥ ॥रयिं सुक्षत्रं
स्वपत्यमायुः सुवीर्यं नासत्या वहंता। आ जह्नावी समनसोप वाजैस्त्रिरह्नो भागं दधतीमयातं॥ ॥हे नासत्यावश्विनौ सुक्षत्रं शो
भनबलं रयिं धनं स्वपत्यं शोभनैः पुत्रादिभिरुपेतं सुवीर्यं शोभनवीर्योपेतं आयुः अन्ननामैतत् एवंगुणविशिष्टमन्नं च वहंता धारयं
तौ युवां समनसो समानमनस्कौ संतौ जह्नावीं जह्नोर्महर्षेः संबंधिनी प्रजां अयातं अभिमुख्येनागच्छतं कीदृशीं वाजैः हविर्लक्षणैरन्नैरुपेतां अ
ह्नः अत्र अहः शब्देन तत्रानुष्ठेयः सोमयागो लक्ष्यते तस्य प्रातःसवनादिरूपेण त्रिविधा विभक्तं भागमंशं दधतीं बिभ्रतीं अनुस्व
वनं हविर्भिर्यजमानामित्यर्थः। सुक्षत्रं बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। सुवीर्यं वीरवीर्यौ चेति बहुव्रीहौ उत्तरपदा
द्युदात्तत्वं। जह्नावी जह्नुशब्दात्तस्येदमित्यर्थे अण् टिड्ढाणञिति ङीप् जह्नावीत्र स्वदीर्घयोर्विनियमः पृषोदरादित्वात् उकं च वर्णाग
मो वर्णविपर्ययश्चेति। अत एव मध्योदात्तं॥ ॥विंशीमृचमाह॥ ॥परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः। विभिंदु
ना नासत्या रथेन विपर्वताँ अजरयू अयातं॥ ॥जाहुषो नाम कश्चित् राजा विश्वतः सर्वतः परिविष्टं शत्रुभिः परिवेष्टितं राजानं हे
नासत्यावश्विनौ अजरयू जरारहितौ नित्यतरुणौ युवां विभिंदुना विद्वेषसर्वस्य भेदकेनात्मीयेन रथेन नक्तं रात्रौ सुगेभिः सुगमं

शारोदुमशक्यान् बिलं च्यवानस्य यातां विशेषणं गच्छतं पाराविशं विश प्रवेशने कर्मणि निघातः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं सर्ग्गतिः
भा॰प॰ सकृदुत्तरधिकरण इति गमेर्डुः । विभिंदुना भिदिर् विदारणे कृण्वादिकः उप्रत्ययोऽनुमागमश्च ॥ अजरयूः नंजरा आजरातामात्मानदु
२३६ तः सूर्य आत्मनः च्यवनस्य पुत्रस्य तत्विदीर्घयोर्निषेधः छांदसीलृ प्रत्ययः ॥ ॥ इति प्रथमस्याष्टमे एकादशो वर्गः ॥ ॥
एकविंशीमृचमाह ॥ ॥ एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा । निरहतं दुच्छुना इंद्रवंता पृथुश्रवसो वृषणावरातीः
॥ ॥ हे अश्विनौ वशमेतन्नामकमृषिं एकस्या वस्तोः एकस्यान्हः रणाय रमणीयाय सहस्रा सहस्रसंख्याय सननाय लाभाय आवतम
रक्षतं स ऋषिः प्रत्यहं यथा सहस्रसंख्यधनं लभते तथा रक्षितवंताविव्यर्थः ॥ अपि च हे वृषणौ कामानां वर्षितारावश्विनौ इंद्रवंता इंद्रेण सं
युक्तौ युवां दुच्छुनां दुष्टफलाः दुःखस्य कर्तॄन् पृथुश्रवसः विस्तीर्णयशसः अरातीः शत्रून् निरहतं निःशेषेण अतवधिष्टं । यद्वा कानीनस्य पृथुश्र
वः संज्ञकस्य राज्ञः शत्रूनिति योज्यं । सहस्रा सुपां सुलुगिति न लुक् आद्यो दादन्रुः अहतं लङि यासस्र अनुदात्तोपदेशेत्यादिनानुनासिकलोपः दुच्छुनाः
शुनमिति सुखनाम दुष्टं सुखं यासां तास्तथोक्ताः परादिश्छंदसि बहुलमिति नञ्ञपदस्योत्तरपदाद्युदात्तत्वं ॥ ॥ द्वाविंशीमृचमाह ॥ ॥ शरस्य चिदार्चत्कस्या
वतादा नीचादुच्चा चक्रथुः पातवे वाः । शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गां ॥ ॥ आर्चत्कस्य ऋचत्कपुत्रस्य शरस्य एतन्नामकस्या
पिपासितस्य पातवे पानार्थं नीचात् अवतात् कूपात् उच्चा उच्चैः परिस्थाता वाः उदकं हे अश्विनौ युवां आचक्रथुः आभिमुख्येन कृतवंतौ
तथा हे नासत्यावश्विनौ शचीभिः युष्मदीयैः कर्मभिः परिचरणैः तत्फलरूपं श्रांताय शयवे चित्त शयुनामकृषये जसुरये निरुत्प्रसवाभावा अभिवृद्धा
र्थं स्य यस्य सोढा गां पयसा पिप्यथुः पयसा युवामापूरितवंतौ पानं यत्पानं तु समर्थं संतर्पितवंतौ स्तर्यं प्रसवसामर्थ्यरहितां
नस्तर्यं स्तीर्यते आच्छाद्यते प्रसवसामर्थ्याभावेनेति स्तरीः अरत्तृभ्यई इति ईप्रत्ययः यार्थे छंदसीत्यपि पूर्ववत् स्यात् विकल्पितत्वादभावे यणादेशः
उदात्तस्वरितयोर्यण इति परस्यादनुदात्तस्य स्वरितत्वं पिप्यथुः प्यायी वृद्धौ लिटि व्यत्ययेन परस्मैपदं लिड्याङोश्छंदसि पी भावः ॥ ॥ त्रयोविंशी
मृचमाह ॥ ॥ अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः । पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय ॥ ॥ अवस्यते अवनं
रक्षणमात्मन इच्छते स्तुवते कृष्णियाय कृष्णनाम्न ऋषेः तस्य पुत्राय ऋजूयते आर्जवमिच्छते विश्वकाय एतन्नामकाय हे नासत्यौ युवां शची
भिः आत्मीयैः कर्मभिः विष्णाप्वं नाम विनष्टं पुत्रं दर्शनाय दर्शनार्थं ददथुः दत्तवंतौ तत्र दृष्टांतः पशुं न नष्टमिव एक उपमार्थीयः पूरकः यथा
कश्चिद्विनष्टं पुत्रं दर्शनाय पशुं स्वामिनो दृष्टिपथं प्रापयंति तद्वत् । अवस्यते अवसशब्दात्सुप आत्मनः क्यच्छातुरनुमहतिविभक्तिरुदा
त्तत्वं । ऋजूयते ऋजुशब्दात् अर्थे धातोः सार्वच ॥ ॥ चतुर्विंशीमृचमाह ॥ ॥ दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्वंतः । विप्रु
तं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥ ॥ पुरा खलु रेभमृषिमसुराः बध्वा कूपे सायंकाले प्राक्षिपन् स चाश्विनौ तु
ष्टाव दश रात्रीर्नव चाहानि च कूपमध्ये तथैवावतस्थे ततस्तमश्विनौ रक्षितवंतौ तं कूपादुद्धृतवंतावित्युक्तमिति ॥ तदाह । अप्सु कूपांतर्वर्तमानासु अंतः
मध्ये असुरैः पातितं अशिवेन दुःखहेतुना दाम्ना अवनद्धं श्नथितं हिंसितं दशरात्रीः दश संख्याकाः निशाः नव द्यून् नव संख्याका
न्यहानि च अत्यंतसंयोगे द्वितीया एतावंतं कालं तत्रैव कूपे स्थितं अत एव उदनि उदके विप्रुतं विप्लुतं व्याप्तं सर्वांगं प्रवृक्तं सुप्तं

मेतं प्रवर्जनेन संतप्तं घर्ममिव यथा संतप्यमानं एवंभूतं रेभं हे अश्विनौ युवां उन्निन्यथुः तस्मात्कूपात् उन्नीतं ऊर्ध्वं कृतवंतौ तत्र दृष्टांतः 429
सोममिव यथा अग्निहोत्रहोमार्थमभिषुतं सोमरसं कूपसदृशे अग्निहोत्रस्थाल्या मध्ये वर्तमानं स्रुवेणाध्वर्युरुन्नयति ऊर्ध्वं नयति
तद्वत् अवनद्धं णह बंधने कर्मणि निष्ठा नहो धः झषस्तथोर्धोधः इति निष्ठातकारस्य धत्वं गतिरनंतर इति गतेः प्रकृतिस्वरत्वं श्नथितं श्न 1924
थ हिंसार्थो निष्ठा विप्रुतं प्रुङ् गतौ अवनद्धवत्प्रत्ययस्वरौ कपिलकादित्वाल्लत्वविकल्पः उदनि पद्दन्नित्यादिना उदकशब्दस्योदन्भावः ॥
॥ ॥ पंचविंशीमृचमाह ॥ ॥ प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः । उत पश्यन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणं
जगम्यां ॥ ॥ एवमनेन सूक्तेनाश्विनोर्महिमानं प्रशस्याधुना मंत्रद्रष्टा स्वाभीष्टं प्रार्थयते । अत्र हे अश्विनौ वां युवयोः दंसांसि पुराकृ
तानि कर्माणि प्रावोचमित्युक्तवानस्मि सोऽहं सुगवः शोभनगोयुक्तः सुवीरः शोभनवीरैः भृत्यैः युक्तः अस्य राष्ट्रस्य पतिरधिपतिः स्यां
भवेयं उत अपि च पश्यन् अक्षिभ्यां पश्यन् उपलक्षणमेतत् सर्वैरिंद्रियैः स्वस्वविषयं दर्शने समर्थैः दीर्घं बहुकालरूपेण स्थापितं आयु
र्जीवितं अश्नुवन् प्राप्नुवन् प्राप्नुवन् इव अस्तमिव यथा स्वगृहं गृहनिकटं प्रति गच्छति एवं जरिमाणं जरां जगम्यां कुटकारादिसेन प्राप्नुयां दृढ
संस्थिर कालं नियसेयमित्यर्थः । अश्नुवन् प्रार्थनायां लिङ्याशिष्यङ् लोप इत्यकारलोपः अश्नुवन् अश्नोतेः व्यत्ययेन श्नुः जरिमा
णं पृथ्वादिभ्य इमनिच् । जगम्यां गमेः प्रार्थनायां लिङि बहुलं छंदसीति विकरणस्य श्लुः ॥ ॥ इति प्रथमस्याष्ट
मे द्वादशो वर्गः ॥ ॥ मध्व इति पंचविंशत्यृचं द्वितीयं सूक्तं ऋषिजस्य कक्षीवत आर्षं त्रैष्टुभमाश्विनं मध्व इत्यनुक्रांतं ॥ प्रातरनुवाकाश्विन
योः पूर्ववत् सूक्तस्य विनियोगः ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥ मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वां । बर्हिष्मती रातिर्विश्रि
ता गीरिषा यातं नासत्योप वाजैः ॥ ॥ हे अश्विनौ मध्वः मधुनः माधुर्योपेतस्य सोमस्य सोमेन मदाय युवयोर्मदार्थं प्रत्नः चिरंतनो हो
ता होमनिष्पादकः यजमानः वां युवां आ विवासते विवासतिः परिचरणकर्मा आज्यादिदातव्यं परिचरति दातव्यं हविः ब
र्हिष्मती आस्तीर्णेन बर्हिषा युक्ता युष्मदर्थं बर्हिष्या सादितमित्यर्थः । तथा गीः स्तुतिरूपा वाणी विश्रिता वि श्रिता समवेता स्तुति
रपि क्रियते इत्यर्थः । अतो हे नासत्यावश्विनौ इषा अस्मभ्यं दातव्येनान्नेन वाजैः बलैः अश्वैः सह युवां उप यातं अस्मत्समीपं प्राप्नुतं मध्वः
सुपां सुपो भवंतीति षष्ठ्यर्थे पंचमी छंदसीति वचनमिति घेर्ङितीति गुणाभावे यणादेशः मदाय मदी हर्षे मदोऽनुपसर्ग
इत्यप् रातिः रा दाने कर्मणि क्तिन् मंत्रे वृषेष्य इत्यादिना उदात्तत्वं विश्रिता श्रिञ् सेवायां कर्मणि निष्ठा गतिरनंतर इति गतेः प्रकृतिस्वर
त्वं ॥ ॥ द्वितीयामृचमाह ॥ ॥ यो वामश्विना मनसो जवीयान्रथः स्वश्वो विश आजिगाति । येन गच्छथः सुकृतो दुरोणं तेन नरा व
र्तिरस्मभ्यं यातं ॥ ॥ हे अश्विनौ वां युवयोः स्वभूतः मनसो जवीयान् मनसोऽपि जवेन वेगवान् स्वश्वः शोभनाश्वः एवंभूतो यो रथः
विशः प्रजाः आजिगाति आभिमुख्येन गच्छति येन रथेन सुकृतः शोभनं यागं कुर्वतो यजमानस्य दुरोणं गृहं यज्ञलक्षणं गच्छथः
हे नरा नेतारावश्विनौ तेन रथेन अस्मभ्यं अस्माकं वर्तिः वर्तनाधिकरणं गृहं यातं आगच्छतं जवीयान् जवोऽस्यास्तीति जववान् तदस्यास्मी
ति वर्णयतिनिकृते यसुन विन्मतोर्लुक् टेरिति टिलोपः जिगाति गा स्तुतौ जौहोत्यादिकः गतिकर्मसु पाठो दृष्टव्य गत्यर्थः । एव हु छंदसी

ऋ·भा·
२१७

त्यभ्यासस्येत्वं॥ ॥तृतीयामृचमाह॥ ॥ऋषिं नरावंहसः पांचजन्यमृबीसादत्रिं मुंचथो गणेन मिनंता दस्योरशिवस्य माया अनुपूर्वं वृषणा चोदयंता॥ ॥हे नरा नेतारावश्विनौ युवां पांचजन्यं पंचजनेभ्यो हितं पंचजनाः अत्र अत्रयो अत्रेः पुनः प्रकारांतरेणानयाप्रतिपाद्यते। अत एवार्कं सर्वमित्रापि द्रष्टव्यं। अक्षरार्थस्तु। हे नरौ नेतारौ वृषणौ कामानां वर्षितारावश्विनौ पांचजन्यं पादार्थं वर्णाः पंचजन्याः तेषु भवं स्वभूतानुनाम इंहीतम मुंस र्वमाच यत्नविः सर्वेषां हितावरणात्तत्र भवं इत्युच्यते। तादृशमृषिं अंहसः पापरूपादृबीसात् अग्निसदनात् अतोद्वारे यंत्रगृहे अत्रेः पीडार्थं असुरैः प्रक्षिप्तात् तुषाग्नेः सकाशाद्गणेन स्वकीयवर्गेण पुत्रपौत्रादिगणेन वा सह मुंचथः अमोचयथः किंकुर्वंतौ मिनंतौ बाधमानौ हिंसंतौ दस्योः उपक्षपयितुः अशिवस्य दुःखकारिणोसुरस्य संबंधिनीः मायाः प्रयुक्ताः मायाश्च अनुपूर्वं अनुपूर्वेण अनुक्रमेण चोदयंता प्रेरयंतौ निवारयंतौ पांचजन्यं पंचजनेभ्यः श्रेष्ठ तमत्यमिति भावार्थे अयः मिनं तामी आहिंसायां क्र्यादिकः च्छदः भ्रात मीनातेर्निगमे इति ह्रस्वत्वं॥ ॥चतुर्थीमृचमाह॥ ॥अश्वं न गूळ्हमश्विना दुरेवैरृषिं नरा वृषणा रेभमप्सु। सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यंति पूर्व्या कृतानि॥ ॥नरा नेतारौ वृषणा कामानां वर्षकौ हे अश्विनौ दुरेवैः दुष्प्रापैः असुरैः अप्सु कूपोदकेषु गूळ्हं निगूढं अश्वं न निखातं रेभमृषिं कूपादुन्नीयविप्रुतं विश्लिष्टावयवं तं अश्वं न व्याधितमश्वमिव दंसोभिरात्मीयैर्भेषजादिभिः कर्मभिः सं रिणीथः समधत्तं संधेरवयवैर्योजनमकुरुतमित्यर्थः। वां युवयोः संबंधीनि पूर्व्याणि चिरंतनानि कृतानि कर्माणि न जूर्यंति न हीयंते। तानि भवंति दुरेवैः दुरपसादेतेः ईषुदुःसिधेतिखल् रीणीथः री गतिरेषणयोः क्र्यादिकः प्वादीनां ह्रस्वः जूर्यंति जूर्यतेः हानौ दैवादिकः ज्ञाव्यनयदलकांक्षरसीकत्वं हलिचेति दीर्घः॥ ॥पंचमीमृचमाह॥ ॥सुषुप्वांसं न निर्ऋतेरुपस्थे सूर्यं न दस्रा तमसि क्षियंतं शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वंदनाय॥ ॥निर्ऋतिरिति भूनाम निर्ऋतेः पृथिव्या उपस्थे उत्संगे सुषुप्वांसं सम्यक् निद्रां प्राप्तमिव कूपमध्ये शयानं सर्वं न सूर्यमिव तमसि कूपांतर्गते ध्वांते क्षियंतं निवसंतं यंमिव तेनाश्विना मिलत्वं शुभे शोभनार्थं निर्मितं रुक्मं न रोचमानं स्वर्णमयाभरणमिव दर्शतं दर्शनीयं वंगुणविशिष्टं कूपे असुरैर्निखातं वंदनाख्यं वंदनामृषिं हे दस्रौ दर्शनीयावश्विनौ युवामुदूपथुः उद्धृतवंतौ सुषुप्वांसं स्वपेः क्वसुः वचिस्वपीत्यादिना संप्रसारणं द्विर्वचनादि पूर्ववत् उपपूर्वात् धिपतेर्थे कविधानमित्यधिकरणे कप्रत्ययः मरुद्धादित्वात् पूर्वपदांतोदात्तत्वं वंदनाय क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी॥ ॥इति प्रथमस्याष्टमे त्रयोदशो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन्। शफादश्वस्य वाजिनो जनाय शतं कुंभाँ असिंचतं मधूनां॥ ॥हे नरा नेतारौ नासत्यावश्विनौ परिज्मन् परिगमने अभिलषितस्य प्रापणे निमित्ते सति पज्रियेण पज्राणां अंगिरसां कुले जातेन कक्षीवता मया वां युवयोः संबंधितत्कर्म शंस्यं प्रकर्षेण शंसनीयं तदेवाह तेषु छंदो अध्याहरः यत् जनाय अपेमाणाय पुरुषाय शतं वाजिनो वेगवतः स्वकीयाश्वस्य शफात् निर्गतैर्मधूनां मधुभिः शतसंख्याकान् कुंभान् असिंचतमपूरयतं सर्वेषां पूरणार्थं यदनेन अधुना प्रशंस्यं तत् शंस्यमित्यर्थः॥ ॥सप्तमीमृचं॥ ॥युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय। घोषायै चित् पितृषदे दुरोणे पतिं जूर्यंत्या अश्विनावदत्तं॥ ॥हे नरा नेतारावश्विनौ युवं युवां स्तोत्रं कुर्वते कृष्णस्यापत्याय विश्वकाय विष्णाप्वं नाम विनष्टं पुत्रं दत्तवंतौ घोषानाम ब्रह्मवादिनी कक्षीवतो दुहिता सा कुष्ठिनी सती कस्मैचिद् दुराचारा तत्पितृगृहे निषण्णा जीर्यमाणासीत् अश्विनावनुग्रहादकुष्ठा सती पतिं लेभे तदेतदाह। हे अश्विनौ २१०

पितृषदे पित्रा सं बद्धे दुरोणे स्वकीये गृहे कन्यकायहे कुष्ठरोगेण भर्तारमप्राप्य पितृषदे पितृसमीपे निषण्णायै जूर्यंत्यै जरां गच्छंत्यै घोषायै चित् पत्नसंज्ञायै त्वमचादित्या अपि रोगे यज्ञामनेन पतिं भर्तारं अदत्तं युवां दत्तवंतौ पितृषदे पद्गुविंद्धारणादि पुक्त्वय चेतिक्विप् जूर्यंत्यै जूष्वयोहानौ दैवादिक शानू दिवादिभ्यः शुन् बहुलं छंदसीत्यत्वं हलि चेति दीर्घः अदत्तं दशाल्लुसार्वधातुकमनुदात्तत्वे श्यनो निघाताद्युदात्तत्वं॥ ॥अष्टमीमृचं॥ ॥युवं श्यावाय रुशतीमदत्तं महः क्षोणस्याश्विना कण्वाय। प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तं॥ ॥हे अश्विनौ युवं युवां श्यावाय कुष्ठरोगेण श्यामवर्णाय कस्मैचिदृषये रुशतीं दीप्तां स्त्रियं अदत्तं प्रायच्छतं अपि च क्षोणस्य क्षोणाय दृष्टिराहित्येन गंतुमशक्ताय तस्मिन्नेव स्थाने निवसते कण्वाय ऋषये महः तेजः नेत्रसंबद्धं चक्षुरिंद्रियं अदत्तमिति शेषः। तथा हे वृषणा कामानां वर्षितारौ वां युवयोस्तत् कृतं कर्म प्रवाच्यं प्रकर्षेण वाचनीयं शंसनीयं नार्षदाय नृषदः पुत्राय बधिराय ऋषये श्रवः श्रवणेंद्रियं यदध्यधत्तं दत्तवंतौ स्थ इति यत्तदित्यर्थः। अपर आह श्यावाय क्षत्रियस्य च वरीसार्थं मरुतः कण्वमृषिं ददतमसिनिदध्युः अत्र वर्णितः सन् वृष्णामुपसंवादज्ञानी दिव्यदृष्टिं ब्राह्मणो लेभे तमश्विनावागत्य कुशेन नुःयुष्णायां हम्यः सोपारवीणां बादयं ता वा वामागमिष्यावः तत्र वयं कृत्वा युष्मामुपसंबाह्येत देत प्रतिपाद्यते। हे वृषणा कामानां वर्षितारौ अश्विनौ वां युवयोस्तत् कृतं कर्म प्रवाच्यं प्रशंसनीयं यत् नार्षदाय नृषदः पुत्राय कण्वाय क्षोणस्य क्षोणः स्वाध्यकारी वीणाविशेषः महः महतः क्षोणस्य श्रवः शब्दं अध्यंतेषु सात्तिताना अर्थं अधिकमकुरुतं। महः महच्छब्दात् अस्मादेणादिको मिप्रत्ययः। पक्षांतरे तु महच्छब्दात् अपस्रुक्कवचनं छांदसो लोपः। ह्रूदमहतो रूपसंख्यानमिति विभक्तेरुदात्तत्वं। यद्वा अग्निवं तायस्रेकवचनं क्षोणस्य क्षिनिवाससरयोः इत्यस्य युरोच इत्यमिति कर्तरि युट् वृषोदरादिको नप्रत्ययः नार्षदाय कृष्णं धक् व्यण॥ ॥नवमीमृचमाह॥ ॥पुरु वर्पांस्यश्विना दधाना नि पेदव ऊहथुराशुमश्वं। सहस्रसां वाजिनमप्रतीतमहिहनं श्रवस्यं तरुत्रं॥ ॥हे अश्विना अश्विनौ पुरु पुरूणि बहूनि वर्पांसि रूपनामैतत् आत्मीयैः कर्मभिः कृतानि रूपाणि दधाना धारयंतौ युवां आशुं शीघ्रगामिनमश्वं पेदवे पेदुनाम्ने राजन्यूहथुः नितरां प्रापितवंतौ दत्तवंतावित्यर्थः। कीदृशमश्वं सहस्रसां संख्याकस्य धनस्य सनितारं दातारं वाजिनं बलवंतं अत एव अप्रतीतं शत्रुभिरप्रतिगतं अहिहनं अहीनामागत्य हंतारं शत्रूणां हंतारं वा श्रवस्यं श्रवः श्रवणीयं स्तोत्रं तत्र भवं स्तुतिप्रियमित्यर्थः तरुत्रं नितारं वा यांसि वरणे शीङ्श्यां ह्रपस्यां गपायुपवत्स मनयुगागमश्च दधाना दधातेर्लटः शानच् अभ्यस्तानामादिरित्याद्युदात्तत्वं सहस्रसां पण दाने जनसनखनेति विट्विडुनोरनुनासिकस्यात् इत्यात्वं श्रवस्यं श्रवःशब्दात् भवेछंदसीति यत् तित्स्वरितं तरुत्रं प्लुवनततरणयोः अशित्रादिभ्य इत्रोत्रावित्यत्र प्रत्ययः व्यत्ययेनाद्युदात्तत्वं। पदसि तस्कभिते स्यादौ निपातनात् निंतात्र रूढ्यादिमिमं तापूर्वं कस्यविधेरनित्यत्वात् गुणाभावे यणतित्स्वरेणाद्युदात्तत्वं॥ ॥दशमीमृचमाह॥ ॥एतानि वां श्रवस्या सुदानू ब्रह्मांगूषं सदनं रोदस्योः॥ यद्वां पज्रासो अश्विना हवंते यातमिषा च विदुषे च वाजं॥ ॥हे सुदानू शोभनदाना वश्विनौ वां युवयोः संबंधीनि एतानि समनंतरोक्तानि वीर्याणि श्रवस्या श्रवणीयानि सर्वैः तानि भवंति तदर्थं गादस्याः द्यावापृथिव्यात्मना वर्तमानयोः देवंचयास्कन। तत्रांगूषं ब्रह्म अश्विनो द्यावापृथिव्याविति यत्उक्तं तथा च नैरुक्तं उस
अश्विनाः सर्वतः रागाग्निर्वैश्वानर इति तयोर्यद्वयोः सदनं लोकः समीपे द्यावापृथिव्या

431
1924

पञ्जासः अंगिरसां गोत्रोत्पन्नाय स्तुमाना हे अश्विनौ वां युवां हवं तं स्तुतिभिरभ्यरक्षणार्थमावर्त्यामि तदानीं दुपाद्दात्यनान्वेन सह यात मार्गं छतं च
ना॰प्र॰ विदुषे युष्मादृक्पर्यंत स्तोत्रं ज्ञानेन मसंचवा तेन मनवलं वा प्रयच्छतमिति शेषः ॥ यातं चवायो गे प्रथमेति विधानं प्रतिषेधः ॥ विदुषे विद्वाननिविदः श
तुर्वसुः वसोः संप्रसारणमिति संप्रसारणं आसिवमिघसी नां च निपत्यं ॥ ॥ इति प्रथमस्याष्टमे चतुर्दशो वर्गः ॥ ॥ एकादशीमृचमाह ॥ ॥ सूनोर्मा
२१८ नेनाश्विना गृणाना वाजं विप्राय भुरणा रदंता ॥ अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतं ॥ ॥ भुरणा भर्तारौ पोषकौ नासत्या
सत्यस्वभावौ अश्विनौ स नोः कुंभात्प्रसूतस्यागस्त्यस्य खलु पुरोहितस्य संबंधिना मे नस्तुत्यस्य परिच्छेदकेन स्तोत्रेण गृणाना स्तूयमानौ विप्रा
य मेधाविने भक्तरुद्धाय कृपयेवान्नं मन्नं रदंता विलिखंतौ निष्पादयंतौ युवां विश्पलां संग्रामे छिन्नजंघां खेलस्य संबंधिनीं स्त्रियं समरणीतः
पुनरस्या जंघया समयोजयतं तृतीयेन पादेन प्रथमपादोक्तार्थो विव्रियते अगस्त्येन ब्रह्मणा मंत्ररूपेण वृधाना प्रवर्धितौ ॥ गृणाना
गृणातेः कर्मणि कर्तृप्रत्ययः छांदसो नाम स्वः भुरणधारणपोषणयोः कंड्वादिः पचाद्यच् अतो लोपयलोपौ मर्पासकुगिति विभक्ते
राकारः ॥ आमंत्रितनिघातः ॥ विप्रायेत्यस्य रस्तेत्यनेन सामर्थ्यान्निघरा गतत्वं ॥ वधाना वृधेर्लिटः कानच् संहितायां छांदसमभ्यासदीर्घ
त्वं तुजादित्वाहितं तुजानामित्यस्य दकारलोपश्चात ॥ अरिणीतं रीगतिरपयोः क्र्यादिकः प्वादीनां ह्रस्वः ॥ ॥ द्वादशीमृचमाह ॥ ॥ कुह यांता
सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा ॥ हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥ ॥ पुरा खलु रेभनामा स्तुतिं श्रानुगच्छे
तावश्विना मार्गमध्ये कूपे पतितं रेभं दृष्ट्वा तं कूपादुदतारयतां तदानीं अश्विभ्यां गतव्यं काव्यस्य निवासस्थानमज्ञानं च कूपे अश्विनौ दृष्टवती
इह दिवो नपाता द्योतमानस्य सूर्यस्य पुत्रौ वृषणा कामाभिवर्षकौ अश्विनौ कुह कुत्र शयुत्रा शयानेन निवासस्थानं वर्तमानस्य काव्यस्य भार्गवस्य
सुष्टुतिं शोभनां स्तुतिं श्रोतुं यांता गच्छंतौ युद्धाश युवयेयतद्दश्विनौ विद्यापण शयु नाम स्त्रायकौ युवां हिरण्यस्येव कलशं यथा हिरण्यपूर्ण
तं कलशं भूम्यां निक्षिप्तं सर्वे दृष्टा तं कश्चिद्भक्तउद्धरति एवमसुरैः कूपे निखातं दशरात्रीर्नवरात्रीर्व्यतीत्य तत्रैव संतं रेभं गत्य दशमे अहन्य
हनि उदूपथुः कूपादुन्नीतवंतौ किं तन्निवासस्थानमिति प्रश्नः रेभस्य नु कावपि द्वारा त्राश्विनाविमं त्रांत रसामर्थ्यात्प्रतीतिः यद्वा काव्यस्य
स्तुतिं प्रति गच्छंतौ युवां कुह कस्मिन् स्थाने रेभं युवामुन्निन्यथुरिति प्रश्नः ॥ कुह वाहलं च छंदसीति हप्रत्ययः दिवो नपाता । सुबामं
त्रितेपरांगवत्स्वरइति परांगवद्भावेन पस्यंत स्यामंत्रितानुप्रवेशादामंत्रितस्य चेति पदद्वयस मुदायस्य पाष्ठिकमाद्युदात्तत्वं । पादादित्वा
द्याद्यकृमिकनिघाताभावः ॥ नपातं न पातयितृ ना मनपांतृ पततीति नपातं भ्रातन पादितिनञः प्रतिभावः मृपां सुलुगिति विभक्तेराका
रः ॥ शयुत्रा अडित्रादिभ्य इत्याविति शीङ उन्नः पर्यंतोदात्तानस्थात तत्र्यवृसुं वायते इति शयुत्रा इति इ ॥ पाल नआदच उत्वं अतो
नुपसर्गेकः ॥ अत एव त्यं प्रत्ययनवधारणादनवग्रहः ॥ निखातं खनु अवदारणे अस्मात् कर्मणि निष्ठा यस्य विभाषेतीट्प्रतिषेधः जन
सनखनां सञ्झलोरित्यात्वं गतिरनंतर इति गतेः प्रकृतिस्वरत्वं अहन् सप्तम्याः सुलुगिति सप्तम्या लुक् नाङिसंबुद्ध्योरिति नलोपप्रतिषेधः ॥ ॥ २३८
त्रयोदशीमृचमाह ॥ ॥ युवं च्यवानमश्विना जरंतं पुनर्युवानं चक्रथुः शचीभिः ॥ युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥
॥ ॥ हे अश्विनौ युवं युवां शचीभिः शक्तिभिः भेषजलक्षणैः कर्मभिः जरंतं जीर्यंतं च्यवनं स्तुतीनां च्यावयितारं एतत्संज्ञमृषिं युवानं पु

नर्युवानं पुनस्तरुणं चक्रथुः अपि च हे नासत्यावश्विनौ युवोर्युवयोः रथं सूर्यस्य दुहिता सूर्या स्वाश्रिया सह रक्तहस्तलक्षणायां संपाद 433
कांत्या वा सह अवृणीत संभजत आगत्यारूढवतीत्यर्थः ॥ आवां रथं दुहितेत्यत्रालिखितमाख्यानमत्रापि द्रष्टव्यं जरंतं जृष् वयोहानौ 1924
व्यत्ययेन शप् ॥ युवोः युष्मच्छब्दात् षष्ठीद्विवचने व्यत्ययेन योचीतिवलाभावे सति शेषे लोप इति दकारलोपः ॥ अतो गुणइति पररू
पत्वं ॥ एकादेशः उदात्तेनोदात्तः ॥ अवृणीत वृङ् संभक्तौ क्र्यादिकः ॥ ॥ चतुर्दशीमृचमाह ॥ ॥ युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभव
तं युवाना ॥ युवं भुज्युमर्णसो निः समुद्राद्विभिरूहथुरृज्रेभिरश्वैः ॥ ॥ हे युवाना दुःखानां यावयितारावश्विनौ युवं युवां पूर्व्येभिः पुरा
णनामैतत्पूर्वकालीनैः एवैः स्तुत्यं प्रतिगंतृभिः स्तोत्रैः तुग्राय भुज्योः जनिकस्य संबंधिभिः पुनर्मन्यामथा भुज्योः समुद्रगमनात्
पूर्वं युवां स्तोतव्यौ तथा पुनरपीदानीं स्तोतव्यावभवतं ॥ यद्वा युवां समुद्रमध्ये सेनया सह निमग्नं भुज्युं तुग्रस्य पुत्रं अर्णसः अर्णस्वतः
प्रोदोदकयुक्तात् समुद्रात् अंबुराशेः सकाशात् द्विभिर्गंतृभिः ऋज्रेभिः शीघ्रगतियुक्तैः अश्वैश्च निरूहथुः निर्गम्य स्थितं समीपं प्रा
पितवंतौ तदानीं पुनरपि तत्र यानि स्तोतव्यौ जातावित्यर्थः ॥ युवं ह भुज्युमित्यत्रोक्तमाख्यानमत्राप्यनुसंधेयं एवैः इण् गतौ इण्शीङ्भ्या
वान् पुनर्मन्यौ मन्तान अत्र स्तुत्यर्थः मन्यते स्तोतीति मनास्तुतिः प्रचायच छंदसि चेत्य हार्थे यः ॥ युवाना ॥ युमिश्रणामिश्रणयोः कनिन्
युवृषीत्यादिना कनिन् सुपां सुलुगिति विभक्तेराकारः ॥ अर्णसः अर्ण सदाद्वादस्यन्तस्य मत्वर्थीयस्य बहुलं छंदसीति बहुलग्रहणा
ल्लोपः सर्वे विधयश्छंदसि विकल्प्यंत इति विभक्त्युदात्तस्य विकल्पनात् भावः ऋज्रेभिः ऋज गतिस्थानार्जनोपार्जनेषु ऋज्रेंद्राग्रे
त्यत्र यत्नात् निपातितः बहुलं छंदसीति भिस ऐस भावः ॥ ॥ पंचदशीमृचमाह ॥ ॥ अजोहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्र
मव्यथिर्जगन्वान् ॥ निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ॥ ॥ हे अश्विनौ वां युवां तौग्र्यः तुग्रपुत्रः प्रोळ्हः पित्रा प्रापि
तः समुद्रमजगन्वान् भुज्युः उदके निमग्नोपि अव्यथिः व्यथां पीडां अप्राप्तः सन् अजोहवीत् स्तुतिभिराह्वयत तमाह्वातारं हे मना
जवसा मनोवद्वेगयुक्तौ वृषणा कामाभिवर्षकावश्विनौ सुयुजा सुष्ठु शोभनैः अश्वैर्युक्तेन रथेन स्वस्ति क्षेमं यथा भवति तथा निरू
हथुः जलान्निर्गमस्य युवां पितृगृहं प्रापितवंतौ जगन्वान् गमेर्लिटः क्वसुः विभाषा गमहनविदविशामिति विकल्पनादिडभावः मा
श्वेति मकारस्य नकारः निष्टं युष्मतत्ततक्षुषु अंतःपादमिति मूर्धन्यः ॥ मनोजवसा मनसो जव इव जवो ययोः योस्तौ तथोक्तौ सुपां सुलुगिति वि
भक्तेराकारः पादादित्वादामंत्रितनिघाताभावः षाष्ठिकमाद्युदात्तत्वं ॥ ॥ इति प्रथमस्याष्टमे पंचदशो वर्गः ॥ ॥ षोडशीमृचमाह ॥
अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुंचतं वृकस्य ॥ वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण ॥ ॥ आस्नोर्वक
स्येत्यर्थः चयुद्धेन इव प्रवाधेन प्रतिपाद्यते वर्तिका चटकस्य पक्षिणः स्त्री वृकेनारण्यपश्वनाग्रस्ता सती हे अश्विनौ वां युवां तदा अ
जोहवीत् आह्वतवती यस्मीयदा खलु वृकस्य अस्नः आस्यात् अमुंचतं वर्तिकाममोचयतं अपि च युवां जयुषा जयशीलेन रथेनाद्रेः प
र्वतस्य सानुं समुच्छितप्रदेशं विययथुः ...

क्षेदेन अहतं युवां हतवंतौ। यद्वा वर्तनं प्रातर्दिवसमावर्तनं तद्वतिर्वर्तिका उषाः स्वकार्ये तिष्ठति गच्छति इति वर्तिका सूर्येणोच्यते तेन युक्ता सती साहं अश्विनौ
भा.प. युवामजोहवीत्। आह्वयत् यदा खलु युवां वृकस्य सूर्यस्य आस्नः आस्यस्थानीयान्मंडलात् अमुंचतं अमोचयतं सूर्येण निर्भूतां मुपसं प्रकृत्य
उद्धावसूर्य गत्वर परभागे आवर्तमानाविपर्थः तथा च यास्कः। आदित्यापि वृक उच्यते यदा वृक आदत्ते उपा अश्विनावादित्येनाभिग्र
२१० स्तां ताम् अश्विनौ प्रमुमुचतुरित्याख्यानमिति। अपि च विजयुषा जयनशीलेन रथेन अद्रेः मेघस्य सानु समुच्छ्रितप्रदेशं विष्विचि
र्ययाविषोषेणाय यथुः युवां गमनवंतौ गत्वा च विष्वाचो विविधागतियुक्तस्य मेघस्य सानुसमुच्छ्रितप्रदेशं संबंधिनां विषेण उदके
न जातं पुत्रं संबंधिभूतं जातं अहतं अगमयतं वृष्टिरूपेण जातवंतावित्यर्थः। अजोहवीत् ह्वयतेर्लङि लुगंतालुङि तिपि यङो चाचितीत्याग
मः। अभ्यस्तस्य चेति द्विर्वचनात् पूर्वं संप्रसारणं आस्नः पद्दन्निति आसन्नादेशः अल्लोपोन इत्यकारलोपः
जयुषा जियते औणादिक उसि प्रत्ययः विष्वाचः विषु नाम आभिमुख्येन अंचतीति विष्वक् ऋत्विगित्यादिना क्विन् अच इत्यकारलोपः
चाविति दीर्घः उदात्तनिवृत्तिस्वरेण विभक्तेः उदात्तत्वं यामस्वाविश्यतां दात्तत्वं अहतं हनो हिंसागत्योः लङि अदादित्वात् शपो लुक् अनु
दात्तोपदेशेत्यादिना अनुनासिकलोपः॥ ॥ सप्तदशीमृचमाह॥ ॥शतं मेषान् वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा आक्षी ऋज्राश्वे अ
श्विनावधत्तं ज्योतिरंधाय चक्रथुर्विचक्षे॥ ॥शतं मेषान् वृक्ये चक्षदानमित्यत्र यदाख्यानमवादि दिष्पतदत्राप्यनुसंधेयं शतं शतसं
ख्यान मेषान् वृक्ये वृकीरूपेणावस्थितायाश्विनोर्वाहनायरासभाय मनवानं प्रत्तिं वंतं आहारार्थं समर्पितवंतं अतएव अशुभ
कारिणा पित्रा स्वकीयेन जनकेन तमः दृष्टिः नाशेन कृतमांध्यं प्रापितं ऋज्राश्वं चक्षुष्मंतमश्विना चक्रतामिति शेषः एतदेव विशदयति हे अ
श्विनौ अक्षी पितृशापान्नष्टे चक्षुषी ऋज्राश्वे एतत्संज्ञके राजर्षौ आधत्तं पुनर्दर्शनसमर्थे अकुरुतं एतदेवाह। अंधाय दृष्टिहीनाय ज्योतिः प्र
काशकं चक्षुः विचक्षे विविधं जगद्द्रष्टुं चक्रथुः युवां कृतवंतौ। मामहानं मह पूजायां लिटः कानच संहितायामभ्यासस्य दीर्घत्वं प्रणीतं
प्रपूर्वात्नयतेः कर्मणि निष्ठा गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। पित्रा उदात्तयणइतिविभक्तेरुदात्तत्वं। अक्षी। अक्षि शब्दाद्द्विवचनेनुमाग
मश्च प्राप्नोति च्छंदस्यपि दृश्यत इत्यनंकादेशश्च परत्वादीकारादेशः कृतेतस्मिन् सकृद्गतपरिभाषायापुनर्भवति। उदात्तस्य निपातनाकारस्य
उदात्तत्वं॥ ॥अष्टादशीमृचमाह॥ ॥शुनमंधाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति॥ जारः कनीन इव चक्षदान ऋज्राश्वः शतमेकं च मेषा
न्॥ ॥शुनमिति सुखनाम भरं पोषणहेतुभूतं च सुखं। रश्मिं रूपेण निष्पाद्यं सुखं अंधाय दृष्टिहीनाय तस्मा ऋज्राश्वाय दत्तं नीसा वृकी अश्विनावश्च
युक्तौ रासभमातरमप्रयुक्तौ। वृषणा हे वृषणौ कामानां वर्षितारौ इत्येवं संबोधयन्ती नेतारावश्विनौ आह्वयत् आहूतवती आह्वयत् तस्याः
काभिप्राय इति चेत् उच्यते कनीनाइव यथा प्राप्तयौवनः कामुकः जारः पारदारिकः स्वस्त्रिये सर्वं धनं प्रयच्छति एवमज्राश्वामदास्यशतमे
कं च एकाधिकशतसंख्याकान्मेषान् पौरजनानां स्वभूतान् पशून् चक्षदानः शकलीकुर्वन् प्रादात् तेनहंतुर्धीदुर्दशां प्राप्तमिति। कानीनः युवशब्दा २१०
दिभिः युवाल्पयोः कन्नन्यतरस्यामिति युवशब्दस्य कनादेशः स्वल्पयेन उ प्रत्ययः स्वादेशः युद्धा कृतदीर्घत्वे कनतिगतिषु अस्मादौणादिक ईनिप्र
त्ययः॥ ॥एकोनविंशीमृचमाह॥ ॥मही वामूतिरश्विना मयोभूरुत स्रामं धिष्ण्या सं रिणीथः॥ अथा युवामिदह्वयत्पुरंधिरागछतंसी

वृषणावर्णाभिः॥ ॥हे अश्विनौ वां युवयोः मही महती ऊतिः पालनं मयोभूः मयसः सुखस्य भावयित्री उत अपि च हे धिष्ण्यौ धिषणास्तुति 435
लक्षणावाक् तत्पात्रभूतौ स्रामं व्याधितं पुरुषं विकलांगमद्यादिकं संरिणीथः संगतावयवं कुरुथः उत अपि च युवामिति युवामेव पुरं 1924
धिर्बहुधी घोषा विश्वलावा अह्वयत् रोगोपशमनार्थं आहूतवती हे वृषणा कामानां वर्षितारावश्विनौ ऊतीभिः रक्षणैः सह आगच्छतं आ
भिमुख्येन सामनीप्रापयतं। मही महती छांदसो वर्णलोपः। यच्छामहेरौणादिके रक्षरिकारदतिनि ऊती अपां मयोभूः भवतेर्भोः
चितण्यं चानुक्त्विपूरिणीथः री गतिरेषणयोः क्र्यादिकः प्वादीनां ह्रस्व इति ह्रस्वत्वं॥ ॥विंशीमृचमाह॥ ॥अधेनुं दस्रा स्तर्यं विषक्ताम
पिन्वतं शयवे अश्विना गां युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषां॥ ॥हे दस्रौ दर्शनीयावश्विनौ स्तर्यं विगतप्रसवां विषक्तां
चयचाक्षशायवे बालमित्यर्थः अतएव स्तर्यं निरुद्धप्रसवां अतएव अधेनुं अदोग्ध्रीमेवंभूतां गां शयवे एतत्संज्ञाय ऋषये अपिन्वतं पय
सा अपूरयतं अपि च पुरुमित्रस्य पुरुमित्रो नाम कश्चिद्राजा तस्य योषां कुमारं शचीभिः आत्मीयैः कर्मभिः विमदाय एतत्संज्ञाय ऋषये
युक्तिभिः सह योधस्तमदाय तस्मै युवां न्यूहथुः विमदस्य गृहं प्रापितवंतौ स्तर्यं स्त्रिञ्छादने अवितृस्तृतंत्रिभ्य ईरिति ईकारस्य प्रत्ययः बाहुलकात् सी
त्यमिपूर्वस्य विकल्पादंभावयण्यादेशः उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं विषक्तां षंज संगकर्मणि निष्ठा अनिदिता
मिति नलोपः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं अपिन्वतं पिवि सेचने इदितो नुम् भ्वादिकः पुरुमित्रस्य पुरूणि मित्राणि यस्य अज्ञायां
मित्राजिनयोरिति बहुव्रीहौ उत्तरपदांतोदात्तत्वं॥ ॥इति प्रथमस्याष्टमे पादशो वर्गः॥ ॥एकविंशीमृचमाह॥ ॥यवं वृकेणाश्विना व
पंतेषं दुहंता मनुषाय दस्रा अभि दस्युं बकुरेणा धमंतोरु ज्योतिश्चक्रथुरार्याय॥ ॥आर्याय विदुषे मनुषप्रत्यो मनुर्नाम्नः पर्यायः मनु
षाय मनवे मनोरर्थं दस्रा दर्शनीयावश्विनौ वृकेण लांगलेन कर्षकैः कर्षणादयं वृकः यवं धाय्युपलक्षितं सर्वधान्यजातं वपंता वापयंतौ तथार
यं अन्नं नामैतत् करणभूतं दस्युदकं च दुहंतौ मेघात् क्षारयंतौ तथा दस्युं उपक्षयकारिणं असुरपिशाचादिकं बकुरेण बकुरो भास
मानो वज्रः तेन अभिधमंता धमतिर्वधकर्मा अभिघ्नंतौ एवं त्रिविधं कर्म कुर्वंतौ युवां उरु विस्तीर्णं ज्योतिः स्वकीयं तेजः महांतं च क्रथुः
कृतवंतौ दर्शितवंतावित्यर्थः। यद्वा त्रिविधकर्मचरं जनायां यो विदुषे मनवे विस्तीर्णं सूर्याख्यं ज्योतिश्चक्रथुः कृतवंतौ ज्योतिर्वन्हिः सूर्यं पश्यतिते
ऽनुभूतान् त्रीणि कर्माणि युवाभ्यां कृतानीति भावः। अत्र निरुक्तं। बकुरो भास्करो भयंकरो भासमानो द्रवतीति वा। यवमिव वृकेणाश्वि
नौ निवपंतौ वृकोलांगलं भवति विकर्तनात् इत्यादि क्रमनुसंधेयं मनुषाय मनेरौणादिक उषन् प्रत्ययः॥ ॥द्वाविंशीमृचमाह॥ ॥आथ
र्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतं॥ स वां मधु प्र वोचदृतायन्त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वां॥ ॥तद्वां नरा सनये इत्यत्रोक्तं आख्यान
मित्राप्यनुसंधेयं। हे अश्विनौ आथर्वणाय अथर्वणः पुत्राय दधीचे दध्यङ् नाम्ने महर्षये अश्व्यं अश्वस्य संबंधि शिरः प्रत्यैरयतं प्रत्य
धत्तं तच्छीर्यमानुषं शिरः। प्रच्छिद्यान्यत्र निधाय अश्वेन शिरसा तमृषिं समधत्तमित्यर्थः। स च वां युवाभ्यां मधुविद्यां प्रवर्ग्यविद्यां च
प्रवोचत् प्राब्रवीत् ऋतायन् सत्यामात्मन इच्छन् मधु निधीत्वाष्ट्रं त्वष्टुर्दध्यंग्प्रवोचत् प्रोक्तवान् हे दस्रा दर्शनीयावश्विनौ वां

त्यर्थः ॥ दधीच अंचलेकंचिद्गित्यादिनाहि त्र अनिदितामिति नलोपः चतुर्थ्येकवचनं अत्य इत्यकारलोपे बाधिते दीर्घत्वं इदानी निकृंतिद्व
भा·अ· रणान्विभक्त्युदात्तत्वं वांक्षितिविभक्तेः पूर्वस्यादात्तत्वं आम्रेत्स्यप्युपयमपवादः अचश्छंदस्य सर्वनामस्थानमितियमनयदातत्वं ॥ त्र
२२० योविंशीमृचमाह ॥ ॥ सदा कवीसमतिमाचके वांविश्वाधियो अश्विना प्रावतंमे अस्मेरयिनासत्या बृहंतमपत्यसाचंश्रुत्यं रराथां ॥ ॥ हे कविको
तदाश्विनौ मेधाविनौ नासत्या अश्विनौ युवयोः कमतिं कल्याणीमनुग्रहात्मिकां बुद्धिं सदा सर्वदा आचके आभिमुख्येन प्रार्थये मदीया विश्वाधियः सर्वा
णि कर्माणि युवां प्रावतं प्रकर्षेण रक्षतं अपिच अस्मे अस्मभ्यं हे नासत्यावश्विनौ बृहंतं अपत्यसाचं अपत्येन पुत्रादिभिः समवेतं श्रुत्यं प्रशंस
नीयं रयिं धनं रराथां प्रयच्छतं । आचके कगे रवेत्यस्य यङ्लुगंतस्य पदव्यत्ययेनात्मनेपदं लिटिरूपं अस्मे सुपां सुलुगिति चतुर्थ्या बहुवचनस्य शे
आदेशः अपत्यसाचं अपत्यैः सह सचते संगच्छत इत्यपत्यसाचं छंदस्याण्विः श्रुत्यं श्रुतिः तत्र भवं श्रुत्यं भवे छंदसीति यत् यतोनाव इत्या
द्युदात्तत्वं रराथां रादाने लिटि थस्य थस्य व्यत्ययेनात्मनेपदं बहुलं छंदसीति लुपः श्लुः ॥ ॥ चतुर्विंशीमृचमाह ॥ ॥ हिरण्यहस्तमश्विना रराणा पुत्रं नरा व
ध्रिमत्या अदत्तं । त्रिधा ह श्यावमश्विना विकस्तमुज्जीवस ऐरयतं सुदानू ॥ ॥ रराणा रममाणौ दातारौ वा नरा नेतारौ हे अश्विनौ हिरण्यहस्तं
नाम पुत्रं वध्रिमत्याः एतत्संज्ञाया ब्रह्मवादिन्यै अदत्तं प्रायच्छतं हे अपिच हे सुदानू शोभनदानावश्विनौ त्रिधा त्रिधा विकस्तं विच्छिन्नं श्यावनाम
र्षिं जीवसे जीवितुं उदैरयतं अकारयतं अधा अस्य इति शरीरं पुनरेकीकृत्य उद्गमयतमित्यर्थः ॥ रराणा रमतेः शानचि बहुलं छंदसीति शपः श्लु
व्यत्ययेन मकारस्यात्वं । रातेर्वा व्यत्ययेन शानच् पूर्ववत् श्लुः वध्रिमत्याः चतुर्थ्यर्थे बहुलं छंदसीति षष्ठी जीवसे जीव प्राणधारणे तुमर्थे से
यसे प्रत्ययः ॥ ॥ पंचविंशीमृचमाह ॥ ॥ एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन् । ब्रह्म कृण्वंतो वृषणा युवभ्यां सुवीरासो विदथ
मा वदेम ॥ ॥ अश्विनौ हे अश्विनौ वां युवयोः संबंधीनि पूर्व्याणि प्रत्नानि एतानि इदानीमयोक्तानि वीर्याणि वीरकर्माणि आयवो मनुष्या अ
दीयाः पितरादयः प्रावोचन् उक्तवंतः वयमपि हे वृषणा कामानां वर्षकावश्विनौ युवाभ्यां ब्रह्म मंत्रात्मकं स्तोत्रं कृण्वंतः कुर्वंतः सुवीरासः शोभन
वीरैः पुत्रादिभिर्युक्ताः संतः विदथं यज्ञं आवदेम आभिमुख्येन स्तुतीरुच्चारयामः यद्वा विदथं वेदितव्यं मतिथिं तद्वा यो प्रदानेन आवदे
म अभिमुख्येन प्रियपूर्विकां वाचमुच्चारयामहे कृण्वंतः कृवि हिंसाकरणयोश्च इदितो नुम्धातोः धिन्विकृण्व्योरच उप्रत्ययः अतो
लोपः सुवीरासः शोभनवीराः येषां ते तथोक्ताः आज्जसेरसुक् वीरवीर्यौ च इत्युत्तर
पदाद्युदात्तत्वं विदथं विदेर्विदिभ्यां कित् इत्यथ प्रत्ययः ॥ ॥ इति प्रथमस्याष्टमे सप्तदशो वर्गः ॥ ॥ १ ॥ आ वामित्येकादशर्चं तृतीयं सूक्तं कक्षीव
त आर्षं त्रिष्टुभं माश्विनं अनुक्रांतं च । आ वामेकादश त्रिष्टुप्सत्यग्न्याश्विनं प्रातरनुवाके आश्विनशस्त्रे चास्य विनियोगः ॥ ॥ तत्र प्रथमामृचमाह
॥ आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववां यात्वर्वाङ् । यो मर्त्यस्य मनसो जवीयान्त्रिवंधुरो वृषणा वातरंहाः ॥ ॥ हे अश्विनौ वां युवयोः
स्वभूतो रथः अर्वाङ् अस्मदभिमुखं आयातु आगच्छतु कीदृशो रथः श्येनपत्वा श्येना इत्यश्वनामानि श्रुत्वाश्वनीयगमनेन श्येनपतनगमनसदृशाश्व
नः पक्षी सदृशशीघ्रपतनमस्य सुमृळीकः शोभनसुखयुक्तः स्ववान् धनवान् हे वृषणा कामानां वर्षितारावश्विनौ यो रथः मनुष्यस्य मनसोऽपि जवीयान् २२०
अतिशयेन वेगवान् वेगेन गच्छन् यथा प्रीतिमनसोऽप्यतिशयेन क्षणमात्रादेव सर्वत्र प्रसर्पतीत्यर्थः त्रिवंधुरः वंधुरं बंधितं सारथेः
स्थानं त्रिप्रकारेण वंधुरेण युक्तः वातरंहाः वातस्यवायोरिंहोवेगइववेगोयस्यसतथोक्तः अनेनाप्रतिहतगतित्वमुच्यते मरथइतिपूर्वेण

नं दंसनाभिरद्रेभंदस्मावृषणाशचीभिः ॥ निष्टौग्र्यं पारयथः समुद्रात्पुनश्च्यवानं चक्रथुर्युवानं ॥ ॥ हे अश्विनौ वां दंसनाभिः
भा·प० सनाभिः तात्कालिकैः कर्मभिः कूपादुदैरयतं उद्गमयतं हे दस्मा दर्शनीयौ वृषणा कामानां वर्षितारावश्विनौ शचीभिः कर्मभिः तं रेभ
२२१ मृषिं च इत्यासुरैर्निबाहानिचकूपे निवसंतं तस्मादुदैरयतं तथा तौग्र्यं तुग्रस्य पुत्रं भुज्युं समुद्रे निमग्नं आत्मीयाभिर्नौभिः समुद्रात्
निष्पारयथः तीरदेशं प्रापितवंतौ तथा च्यवानं च्यवनमृषिं जीर्णं पुनर्युवानं यौवनोपेतं चक्रथुः कृतवंतौ ऐरयतं ईरगतौ कंपने
ण्यंतात् लुङि छंदस्युभयथेति शपः आर्धधातुकत्वण्णेरनिटीति णिलोपः ॥ ॥ सप्तमीमृचमाह ॥ ॥ युवमत्रयेऽवनीताय तप्तमूर्जमोमा
नमश्विनावधत्तं । युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा ॥ ॥ अश्विना हे अश्विनौ युवं युवां अवनीताय असुरैः पीडार्थं
त्र्यग्रे इत्यत्रस्थानीताय अत्रये तप्तं पीडार्थं प्रक्षिप्तं तुषाग्निं ऊर्जं उदकेन वारयेथाः अपि च अस्मा अत्रये ओमानं सुखं ऊर्जं रसवदन्नं अधत्तं
प्रायच्छतं तथा सुष्टुतिं शोभनस्तुतिं जुजुषाणा सेवमानौ युवां अपरिप्ताय असुरैः अन्धकूपे परिक्षिप्तार्थं इत्यासीत् स नक्षत्रमुपसंज्ञानीद
ति अंधकारान्तिरुद्धेः प्रचेष्टिताय कण्वाय ऋषये चक्षुः व्युष्टायाउषसः प्रकाशकं वीणावादं प्रत्यधत्तं कृतवंतौ यद्वा अपिरिप्ताय पटले
नपिहितदृष्टये एवं विधाय कण्वाय चक्षुरिंद्रियं प्रत्यधत्तं प्रत्यस्थापयतं ओमानं अवतेरौणादिको मनिः ज्वरत्वरेत्यादिना कारस्यो
पधायाश्च ऊठ् गुणः अपिरिप्ताय लिपउपदेहे अस्मात् कर्मणि निष्ठा कपिलकादित्वाल्लत्वविकल्पः गतिरनंतर इति गतेः प्रकृतिस्वरत्वं
जुषाणा जुषी प्रीतिसेवनयोः छांदसो लिट् लिटः कानच् सुपां सुलुगिति विभक्तेराकारः ॥ ॥ अष्टमीमृचमाह ॥ ॥ युवं धेनुं शयवे नाधि
तायापिन्वतमश्विना पूर्व्याय । अमुंचतं वर्तिकामंहसो निः प्रति जंघां विश्पलाया अधत्तं ॥ ॥ अश्विना हे अश्विनौ युवं युवां पूर्व्याय पु
रातनाय नाधिताय याचमानाय शयवे एतत्संज्ञाय ऋषये धेनुं निवृत्तप्रसवां मरोगधीं अपिन्वतं पयसा असिंचतं सर्वदा पयस्विनीं कृ
तमित्यर्थः अपि च वर्तिकां वृकेण ग्रस्तां चटकपक्षिणीं कृच्छ्रात् अंहसः वृकास्यलक्षणात् पापान्निरमुंचतं निरमोचयतं यद्वा पुनः पुन
र्वर्तत इति वर्तिका उषाः तामादित्येनाभिग्रस्तां युवाममोचयतं । तथा विश्पलाये संग्रामे छिन्नजंघायै अगस्त्यपुरोहितस्य खेलस्य सं
बंधिन्यै एतत्संज्ञायै स्त्रियै आयसीं जंघां प्रत्यधत्तं प्रत्यस्थापयतं संग्रामे गमनायेत्यर्थः ॥ ॥ नवमीमृचं ॥ ॥ युवं श्वेतं पेदव इंद्रजूत
महिहनमश्विनादत्तमश्वं । जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीड्वंगं ॥ ॥ अश्विना हे अश्विनौ पेदवे पेदुनाम्ने राजर्षये युवां
श्वेतवर्णं कंचिदश्वं अदत्तं प्रायच्छतं कीदृशं इंद्रजूतं इंद्रेण युवाभ्यां गमितं दत्तमित्यर्थः । अहिहनं शत्रूणां हंतारं जोहूत्रं अतिश
येन संग्रामे स्पर्धमानानां आह्वातारं अर्यः अरेः शत्रोः अभिभूतिं अभिभावुकं उग्रं उद्गूर्णवीर्यवंतमित्यर्थः । सहस्रसां सहस्रसंख्याकस्य धनस्य
संभक्तारं दातारं वृषणं सेक्तारं यद्वा वानमित्यर्थः । वीड्वंगं दृढांगं ईड्वंगं इत्युत्तरस्मात्रत्वं धातुस्वरः अस्माद्धंत भावितण्यर्थाकर्मणिनिष्ठा
तीयाकर्मणीति पूर्वपदप्रकृतिस्वरत्वं । जोहूत्रं ह्वयतेर्यङ्लुगंताद्दौणादिकः त्रप्रत्ययः प्रत्ययस्य पित्वादनुदात्तत्वे धातुस्वरः । अभिभू २२१
ति अभिभूयते अनेनेत्यभिभूतिः करणे क्तिन् तादौ च निति गतेः प्रकृतिस्वरत्वं । सहस्रसां सनोतेः सनतेर्वा जनसनखनेति विट् विड्वनो
रनुनासिकस्यात्त्वं ॥ ॥ दशमीमृचमाह ॥ ॥ ता वां नरा स्ववसे सुजाता हवामहे अश्विना नाधमानाः ॥ अनु उपवसु मे तौ

न्वयः श्येनपत्वा कृगतोऽन्येभ्योऽपि दृश्यत इति विनिप शर्मा आगाद्भिः यद्वा हृत्रिय हृ क्त्वपविश्वं तरोपसंग्रहार्थत्वात भाव वनिपतनो बहुव्रीहौ पू 437/1924
र्वपदप्रकृतिस्वरत्वं तवीयान् जवीयान् अतिशयेन तवान् तवीयान् अतिशायनिक ईयसुन् विन्मतोर्लुक् टेरिति टिलोपः ॥ ॥
द्वितीयामृचमाह ॥ ॥त्रिवंधुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् । पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥ ॥त्रिवंधुर
णं वंधुरं सारथिस्थानं त्रिप्रकारं यं धुरोपेतेन त्रिवृता त्रिधावर्तमानेन त्रिचक्रेण चक्रत्रयोपेतेन सुवृता शोभनं मयता अर्वाक् अस्मदभिमुखमा या
तं आगच्छतं आगत्य च अस्मदीया गाः पिन्वतं पयसा पूरयतं नोऽस्माकं अर्वतोऽश्वान् जिन्वतं प्रीणयतं अपि च हे अश्विनौ अस्मे अस्माकं वीरं
पुत्रादिकं वर्धयतं प्रवृद्धं कुरुतं त्रिचक्रेण त्रीणि चक्राणि यस्य स तथोक्तः त्रिचक्रादीनां छंदस्येकपसंख्यानमित्युत्तरपदान्तोदात्तत्वं ॥ ॥ तृतीयामृ
चमाह ॥ ॥प्रवद्यामना सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ॥ किमंग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥ ॥ हे दस्रौ दर्शनीया
वश्विनौ प्रवद्यामना प्रवद्गमनेन शीघ्रगामिना सुवृता शोभनवर्तनेन रथेनागत्य अद्रेः आदरं कुर्वतः स्तोतुः इमं श्लोकं स्तुतिलक्षणामिमां वाचं शृ
णुतं अंग अश्विना हे अश्विनौ पुराजाः पूर्वजाः चिरंतनाः विप्रासो मेधाविनः वां युवां अवर्तिं स्तोतॄणां दारिद्र्यं प्रति गमिष्ठाहुः गमिष्ठा गंतृतमा आहुः क
थयंति किं उ आश्चर्यं आगमनप्रश्ने वर्तते वर्तिं वर्तनं वृत्तिं कथयंति कथयंत्येव सर्वतः आगत्यागंतव्यमिति । प्रवद्यामना प्रवत्पूर्वात् यातेर्वर्तमानप्रत्ययाद्वा दुपस
र्गां छंदसि धात्वर्थ इति वतिः या प्रापणे अतो मनिन्निति मनिन् तस्य च वा दाय भमिन तत्तो वहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं अद्रेः दृङ् आदरे आङ्पूर्वाद्द्रिया
दौणादिकः क्रिप्रत्ययः आडोह्रस्वश्छ गमिष्ठा गंतृ शब्दात् तुश्छंदसीति इष्ठन् तुरिष्ठेमेयःस्विति तृलोपः सुपां सुलुगिति विभक्तेराकारः आद्युदात्त
यत्स्वरः पादादित्वान्निघाताभावः ॥ ॥चतुर्थीमृचं ॥ ॥आ वां श्येनासो अश्विना वहंतु रथे युक्तास आशवः पतंगाः ॥ ये अप्तुरो दिव्यासो न गृ
ध्रा अभि प्रयो नासत्या वहंति ॥ ॥हे अश्विनौ रथे युक्तासः सारथिना वहनप्रदेशे योजिताः आशवः व्याप्नुवंतः पतंगाः पतनसमर्थाः श्येनासः
शंसनीयगमनाः अश्वाः वां युवां आवहंतु अस्मत्समीपमानयंतु ये अश्वाः अप्तुरः आपइवत्वरोपेताः दिव्यासो न गृध्रा अंतरिक्षे वर्तमाना
गृध्रास्याः पक्षिण इव शीघ्रं गच्छंतो हे नासत्यौ युवां अभि प्रयो हविर्लक्षणमन्नं अभिलक्ष्य वहंति प्रापयंति तादृशा इति पूर्वेण संबंधः अप्तु
रः त्वरत्वरणे अप्पूर्वात् अपपदादस्मात् क्विप्वेति क्विप् ॥ ॥पंचमीमृचमाह ॥ ॥आ वां रथं युवतिस्तिष्ठदत्र जुष्ट्वी नरा दुहिता सूर्यस्य ॥ परि वामश्वा
वपुषः पतंगा वयो वहंत्वरुषा अभीके ॥ ॥ हे नरौ नेतारावश्विनौ युवतिस्तरुणी सूर्यस्य दुहिता जुष्ट्वी प्रीता सती वां युवयोः अत्र इमं रथं आ
तितिष्ठत आरूढवती तया सहितौ वां युवां अश्वाः अप्तुरः आपइव त्वरोपेताः दिव्यासो न गृध्रा अभीके गृहसमीपे तं रा दुहिता जुष्ट्वी प्रीता
सती वां युवयोः अत्र इमं रथं अतितिष्ठत आरूढवती तया सहितौ वां युवां अश्वाः अभीके गृहसमीपे तं रथं परिहर्तुं प्रापयंतु कीदृशा अ
श्वाः वपुषाः वपुरिति रूपस्य शरीरस्य वा नामधेयं तद्वंतः छांदसो मत्वर्थीयस्य लोपः पतंगाः उत्पतनसमर्थाः वयो गच्छंतः अरुषा आरो
चमानाः हिंसकारहिता वा अत्र इतराभ्योऽपि दृश्यत इति दृश्यिग्रहणात् इच्छार्था यागपि उदमङ्गात्तद्विभक्त्यर्थे त्रल्प्रत्ययः जुष्ट्वी जुषी प्रीति
सेवनयोः औणादिकः क्वनिप्प्रत्ययः । वोतो गुणवचनादिति ङीप् ॥ ॥इति प्रथमस्याष्टमे पंचदशो वर्गः ॥ ॥षष्ठीमृचमाह ॥ ॥उद्वंदनमैर

थं नासत्या शचीभिः । उद्रेभं दस्रा सुषुवथुः पञ्च ... अन्तर्हितानुषाणां सुवियथा तं ॥ ॥ नरा नेतारौ हे अश्विनौ सुजाता शोभनजन्मानौ मामी वां अश्विनौ नाधमानाः यचमानाः स्तोतारः अवसे र 439/1924
क्षणार्थं सुहवा रोनु महत् शोभनमाह्वयामहे गिरः स्तुतीः जुषाणा सेवमानौ युवां च सुमता धनयुक्तेन रथेन नोऽस्मानुपयातं उपग
च्छतं किमर्थं सविताय सुष्ठु प्राप्तव्याय धनाय सुखाय च सुजाता शोभनजातेजन्मयोः सुजातौ सुपां सुलुगिति विभक्तेराका
रत्वं भस्मभ्यामित्युत्तरपदान्तोदात्तत्वं नाधमानाः नाधृ याच्ञायां जुषाणा जुषी प्रीतिसेवनयोः तच्छीलकश्चानश् तुदादित्वात् श पूर्व
वद्विभक्तेराकारः सविता सुपूर्वादितेः कर्मणि निष्ठा तत्र चादित्वादिड्भू रूपमाना त् उत्पत्त्युत्तरपदान्तोदात्तत्वं ॥ ॥एकादशीमृचं ॥ ॥ आ
श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः ॥ हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ ॥ ॥ हे नासत्यावश्विनौ
सजोषाः सजोषसौ समानप्रीतियुक्तौ श्येनस्य शंसनीयगतेः श्वस्य नूतनेन नवतरेण प्रत्यग्रेण जवसा वेगेन सहितौ युवां अस्मे
अस्मान् अभि यातम् आगच्छतं वा युवाभ्यां दातव्येन हविषा युक्तः सन् शश्वत्तमायाः कालात्मकतया नित्यायाः उषसः व्युष्टौ विनाशकालो
युवां हवे आह्वयामि हि ईन्हा हि यस्मादेवं तस्माद्यातामित्यर्थः अस्मे सुपां सुलुगिति शे सः शे आदेशः सजोषाः तेनेव व्युष्टिवचसे
सुआदेशः हवे ह्वेञ् आलंडुत्तमैकवचनेव बहुलं छंदसीति संप्रसारणं शप् गुणाव्यादेशाः शश्वत्तमाया उत्तमशश्वत्तमौ सर्वत्र व्युष्टावि
षुपाडादेतो दात्तत्वम ॥ ॥इति प्रथमस्याष्टमे एकोनविंशो वर्गः ॥ ॥ आ वां रथमिति दशर्चं चतुर्थं सूक्तं दीर्घतमस एकश्चित्त्रिष्टु
प् आगतामाश्विनं तथा वानुक्रांतं ॥ आ वां रथं दश जागतमिति प्रातरनुवाकस्याश्विनक्रतौ जागते छंदसीदं सूक्तं माश्विनशस्त्रे च
तथा च सूत्रितं ॥ ॥आ वां रथमभूदिदं यो वां परिज्मेति त्रीणि ॥ ॥तत्र प्रथमामृचमाह ॥ ॥आ वां रथं पुरुमायं मनोजुवं जीराश्वं य
ज्ञियं जीवसे हुवे ॥ सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः ॥ ॥ हे अश्विनौ वां युवयोः रथं जीवसे जीवनार्थं प्रायो
हविर्लक्षणमन्नमभिलक्ष्य अवहे आह्वयामि कीदृशं पुरुमायं बहुविधाश्चर्यं च बहुविधा कर्माणि वा मनोजुवं मनइव वेगेन गच्छंतं
जीराश्वं जवनदश्वोपेतं यज्ञियं यज्ञाहं तु मर्हंसं सहस्रकेतुं अनेकध्वजं सहस्रस्य धनस्य केतयितारं ज्ञापयितारं वा वनिनं वनमि
त्युदकनाम तद्वंतं शतद्वसुं शतसंख्याकधनेर्युक्तं श्रुष्टीवानं क्षिप्रनामैतत् क्षिप्रं अभजमानं यद्वा सुखवंतं वरिवोधां वरिव इति धनना
म । वरिवसो धनस्य दातारं पुरुमायां बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । यज्ञियं यज्ञर्त्विग्भ्यां घखञाविति अर्हार्थे घप्रत्ययः
इवे ह्वेञो लटि बहुलं छंदसीति संप्रसारणं उवङ् शतद्वसुं छांदसस्तुकारोपजननः ॥ ॥द्वितीयामृचमाह ॥ ॥ऊर्ध्वा धीतिः प्रत्यस्य प्र
यामन्यधायि शस्मन्त्समयंत आदिशः ॥ स्वदामि घर्मं प्रति यंत्यूतय आ वामूर्जानी रथमश्विनारुहत् ॥ ॥अस्य रथस्य प्रया
मनि प्रयाणे आगमने प्राप्ते सति अश्विनोः शंसने स्तवने धीतिः अस्मदीया बुद्धिः ऊर्ध्वा उन्मुखा प्रत्यधायि प्रत्यस्थापित इन्द्रं
तरं दृशः हे सव्यः स्तुतयोऽपि समयंते अश्विभ्यां संगच्छते आकारः समुच्चये अहं च स्तोता यमं मद्दा वा रक्षेव्ह्यायक्षुरणाशी
त्याआदिकं हविः स्वदामि स्वादुकरोमि ऊतयः अवितारो रक्षकाः ऋत्विजश्च प्रतियंति धर्मं प्रति गच्छंति संस्कारार्थं अपि च हे अश्वि
नौ वां युवयोः रथं ऊर्जानी सूर्यस्य दुहिता आरुहत् आरूढवती प्रयामनि यां प्रापणे आतो मनिन्निति कृत्यल्युटो बहुलमिति

वहुलं वचनाद्भवेमानिनद्दासीभा रादित्वात्पूर्वपदप्रकृतिस्वरत्वं ऽश्मन्दीक्षत्सुतो अन्येभ्योपिदृश्यंत इतिमनिन् दृशिग्रहणस्य विध्यंतरोपसंग्रहा

भा॰ म॰ र्थत्वादुपधानकारलोपः सुपां सुलुगितिसमम्यालुक् अयंत अयपगतौभौवादिकोनुदात्तेत उत यःक्विवकौच मंतायामितिअववेः कर्मणिनिष्ठा

२२२ रस्य रत्वादिनाकृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते नञो जरमरमित्रमृता इति उत्तरपदाद्युदात्तत्वं ॥ ॥तृतीयामृचमाह॥ ॥ संयन्मिथः पस्पृधानासो अग्मत शुभे मखा

अमिता जायवो रणे युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरं ॥ ॥मखाः मखवन्तो यज्ञवन्तः अमिताः अपरिमिता अश्विनौ युवाभ्यां यष्टुकामा

नुष्याः रणे संग्रामे युद्धे शुभे शोभनाय धनाय तदर्थं मिथः परस्परं पस्पृधानाः अन्योन्यस्पर्धमानाः यत् यदा समगत संगच्छंते तदानीं हे अश्विनौ अश्वि

नौ युवोरह युवयोरेव रथः प्रवणे प्रकर्षेण संभजनीये भूतले चेकिते ज्ञायते देवेषु मध्ये युवमेव रक्षणार्थं शीघ्रं रथेनागच्छथः इत्यर्थः यत् यदा येन

रथेन सूरिं स्तोतारं प्रति वरं श्रेष्ठं धनं आवहथः प्रापयथः सरथ इत्यर्थः पस्पृधानासः स्पर्धसंघर्षे छांदसोलिटः कानच् द्विर्भावहलादिशेषौ

दसोरेफस्य संप्रसारणं आकारलोपश्च अग्मत गमेर्लुङि छांदसो मंत्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेरिति च्लेर्लुक् गमहनजनखनघसां लोप इत्यु

पधालोपः मखाः मखोयत्तः अर्शआदिभ्योऽच् जायवः जिजयेकृवापाजिमिस्वदिसाध्यशूभ्य उण् इत्युण् प्रत्ययः अस्मा अपि द्रष्टव्यम् वर्तमाने लिट्

अतो लोप यलोपौ च यन् सुपां सुलुगिति लुक् वहथः ॥ ॥चतुर्थीमृचमाह॥ ॥युवं भुज्युं भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहंता पितृभ्य आ। या

सिष्टं वर्तिर्वृषणा विजेन्यं दिवोदासाय महि चेति वामवः ॥ ॥वृषणा कामानां वर्षितारौ हे अश्विनौ युवं युवां भुरमाणं विभिः अश्वैः प्रियमाणं गतं

समुद्रनिमग्नं भुज्युं तुग्रपुत्रं स्वयुक्तिभिः स्वयमेव युज्यमानैरश्वैर्नौभिर्निवहंता निर्गमयन्तौ पितृभ्य आ मर्यादायां स्वपितरः तुग्रादा

य अयासिष्टं अगच्छतं तथा विजेन्यं दूरस्थं वर्तमानं वर्तिः गृहं प्रति यासिष्टं आगच्छतं अपि च दिवोदासाय राज्ञे युवयोः सं

बंधि अवो रक्षणं महिमहत् चेति अस्माभिर्ज्ञायते भुरमाणं भृञ् धारणपोषणयोः कर्मणि लटः शानच् व्यत्ययेन शपः

श्लुः छंदसीति अभ्यासस्य अमर्यादायामाङ् कर्मप्रवचनीयसंज्ञा पंचम्याङ्परिभिरिति पंचमी यासिष्टं याप्रापणे यमरमनमातां सक् चेति

सगागमः सिच इडागमः विजेन्यं विजनो दूरदेशः तत्र भवं विजेन्यं भवे छंदसीति यत् तित्स्वरितमिति स्वरितत्वं ॥ ॥पंचमीमृचं॥ ॥युवोरश्वि

ना वपुषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यं। आ वां पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती॥ ॥अश्विनौ हे अश्विनौ युवोः युवयोर्वा

णी वर्णनीया प्रज्ञस्याश्वा युवायुजं युवाभ्यां युज्यमानं रथं आभिधावनसमये अस्य रथस्य यत् शर्ध्यं प्राप्यं आदित्यस्य असंसिद्धां वधिश्र

तं लक्ष्यं वपुषे शोभार्थं येमतुः सर्वेभ्यो देवेभ्यः पूर्वं प्रापयामासतुः तदनंतरं च अग्रजग्मुषी आगतवती सूर्या आभिधावने जीयमाना योषा

सर्वोत्तमस्य सख्याय वां युवयोः पतित्वं अवृणीत अस्य तममपुत्रामेव पती भर्तारौ वृणीते युवां पतीं इत्येवं नयो चाति यस्य त्यस्य सर्वविधेर्नाति

इति विकल्पितत्वात् भावः शपलोपः इति दकारलोपः अतो गुण इति पररूपत्वं युवायुजं युवाभ्यां युज्यत इति नेऽधर्थाभिधायकस्य युष्मच्छब्दस्य

भक्तावपि स्यात् येन युवादेशः शर्ध्यं शधु प्रसहने स्मात् ण्यत् चादयः इयति यतौ नावप्रत्यापूर्वं इति तत्रत्वं जग्मुषी गमेर्लिटः क्वसुः उगितश्चेति ङी

प वसोः संप्रसारणमिति संप्रसारणं गमहनेत्युपधालोपः जेन्या जितेर्यप्रो णादिक न्यप्रत्यय इति लोपश्च॥ ॥इतिप्रथमस्याष्टमाधि

ऽष्टो वर्गः॥ ॥षष्ठीमृचमाह॥ ॥युवं रेभं परिषूतेरुरुष्यथो हिमेन घर्मं परितप्तमत्रये। युवं शयोरवसं पिप्यथुर्गवि प्र दीर्घेण वंदनस्ता

र्यायुषा॥ ॥ २२२

हे अश्विनौ युवं युवां रेभमृषिं परिषूतेः परितः प्रेरकादुपद्रवात् पतनाद्वा उरुष्यथोः रक्षथः रेभ इत्यर्नाः रक्षाकर्मेति यास्कः तथा अत्रये ऋषये परितप्तं 441

परितप्तं तं घर्मं असुरैः पीडार्थं प्रक्षिप्तं दीप्यमानं तुषाग्निं हिमेन शीतेनोदकेन अवारयेथां इदं हविपामात्रये भाश्रं भगत ये परितप्तं स्वर्येहि 1924

णः संतप्तं घर्मं अहनाम्नेन अहिः हिमेन वस्तुदकेन हविः संपादकत्वात् शत्यर्थमवारयेथां अपि च शयोः एतन्नामकस्य ऋषेर्गवि निवृत्तप्रसवा

यां धेनौ अवसं रक्षकं पयाप्तं युवां पिप्यथुः प्रवर्धितवंतौ तथा त्यौ गोविंदनऋषिः दीर्घेण युषाप्रतारि युवाभ्यां प्रवर्धितः प्रपूर्वस्तिरतिवर्धनार्थः

अयसं अवतेरौणादिको असच्प्रत्ययः पिप्यथुः प्यायीवृद्धौ व्यत्ययेन परस्मैपदं लिट्यभ्यासस्येति पीभावः॥ ॥सप्तमीमृचमाह॥ ॥युवं वंदनं निर्ऋतं जर

ण्यया रथं न दस्रा करणा समिन्वथः। क्षेत्रादा विप्रं जनथो विपन्यया प्र वामत्र विधते दंसना भुवत्॥ ॥हे दस्रावश्विनौ युवं युवां जरण्यया जरया निर्ऋ

तं जरण्यतिः श्रेणप्राप्तं वंदनमृषिं करणा कर्मणां कर्तारौ शिल्पकुशलौ युवां समिन्वथः समधत्तं पुनर्युवानमकुरुतं तत्र दृष्टांतः रथं नायथा अ

श्विनौ शिल्पी जीर्णं रथं पुनरभिनवं करोति तद्वत् अपि च विपन्यया स्तुत्या गर्भस्थं वामदेवं ऋषिं क्षेत्राद् आकारः समुच्चये मातुरुदरलक्षणात् स्था

नात् विप्रं मेधाविनं तमृषिं जनथो जनयथः तथा वां युवयोः दंसना रक्षणात्मकं कर्म अत्रास्मिन् विधते परिचरते यजमानाय प्रभुवत् रक्षितुं सम

र्थं भवतु निर्ऋतं जगतौ कर्मणि निष्ठा गतिरनंतर इति गतेः प्रकृतिस्वरत्वं जरण्यया जरणक्रियार्हा जरण्या अत्र विसर्जनं छंदसि चेति यः करणा करोतेरन्ये

भ्योपि दृश्यंत इति युच् इन्यथः इति व्याप्तौ इदितो नुम् भौवादिकः जनथः जनी प्रादुर्भावे णिच्यपि च धातुर्भिः जनी जृषु क्नसु रंजः इति मित्संज्ञा हस्व

इति ह्रस्वत्वं छंदस्युभयथेति शप आर्धधातुकत्वात् णेरनिटीति णिलोपः विपन्यया पन स्तुतौ अघ्न्यादयश्चेति भावे यत् व्यत्ययेनांतोदात्तत्वं वि

धते विधविधाने तौदादिकः लटः शत् शतुरनुम इति विभक्तेरुदात्तत्वं भुवत् भवतेर्लेट् अडागमः बहुलं छंदसीति शपो लुक् भूसुवोस्तिङीति गुण

प्रतिषेधः॥ ॥अष्टमीमृचं॥ ॥आगच्छतं कृपमाणं परावति पितुः स्वस्य त्यजसा निबाधितं। स्वर्वतीरित ऊतीर्युवोरह चित्रा अभीके अभवं

न्नभिष्टयः॥ ॥हे परावति दूरे देशे समुद्रमध्ये स्वस्य पितुः तुग्रस्य त्यजसा त्यागेन निबाधितं पीडितं भुज्युं कृपमाणं युवां स्तुवंतं अगच्छतं युवां र

क्षणार्थं गतवंतौ यस्मादेवं तस्मात् हे अश्विनौ स्वर्वतीः स्वर्वत्यः शोभनगमनयुक्ताः इतः इतो मुखात् चित्र आश्चर्यनीयाः युवोरह युवयोरेव

ऊती ऊतयो रक्षा अभीके समीपे अभिष्टयः सर्वैः प्राणिभिरन्वेषणीया अभवन् भवंति कृपमाणं कृपतिः स्तुतिकर्मा अयं च तुदादिर्द्रष्ट

व्यः स्वर्वतीः सुपूर्वादर्तेर्भावे विच् ततो मतुप् छंदसीर इति मतुपो वत्वं अभिष्टयः इषु धाया भावे क्तिन् शकंध्वादित्वात् पररूपत्वं॥ ॥

नवमीमृचमाह॥ ॥उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति। युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं

वदत्॥ ॥उत अपि च अश्विनौ मधुमत् मधुमंतौ वां युवाभ्यां सा मक्षिका अरपन् मदे सोमस्यौशिजो हुवन्यति। युवं दधीचो मन आ विवासथो

थाशिरः सरघा मधुकामा सती अरपत् अस्तौत् तथा औशिजः उशिजः पुत्रः कक्षीवान् सोमस्य पानेन युवयोर्मदे हर्षनिमित्तभूते

सति हुवन्यति युवामाह्वयति युवं युवां च तस्यै मक्षिकायै मधुदानं मधुविद्यार्थिनौ सतौ दधीचः आथर्वणस्य ऋषेर्मनश्चित्तं अरुश्रुष

[illegible]

भा.प. धामवदतसकृषिराश्वेनशिरसा उपदिष्टवानित्यर्थः। मधुमत सुपांसुलुगिति विभक्तेर्लुक्॥ अरपनरपलव्यक्तायां वाचि॥ मदेमदीर्घम
दीनुपसर्गे इति भावे अप्। इवस्यति स्वेज स्पर्धायां। व्याघ्नेनस्युर्धेति भावे क्युद्॥ हुलं छंदसीति संप्रसारणं इचमान्मन इच्छति सुप आत्मनः
२२३ क्यच् अंत्यलोपः छांदसः वर्णव्यापत्त्या ऽत्वं अश्वे भवमश्व्यं भवे छंदसीयत्॥ ॥ दशमीमृचमाह॥ ॥ युवं पेदवे पुरुवारमश्विना स्पृधां
श्वेतं तरुतारं दुवस्यथः॥ शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिंद्रमिव चर्षणीसहं॥ ॥ अश्विना हे अश्विनौ पेदवे पेदुनाम्ने राज्ञे पुरु
वारं बहुभिर्वरणीयं स्पृधां संग्रामेषु स्पर्धमानानां शत्रूणां तरुतारं तारकं श्वेतं श्वेतवर्णं इदृशं अश्वं युवं दुवस्यथः दत्तवंतौ पुनरपि कीदृशं
शर्यैः शीर्यंत इति शर्या योद्धारः तैः पृतनासु संग्रामेषु दुष्टरं तरीतुमशक्यं अभिद्युं अभिगतदीप्तिं चर्कृत्यं सर्वेषु कार्येषु पुनः पुनः प्रयो
ज्यं इंद्रमिव चर्षणीसहं इंद्रो यथा शत्रूनभिभवति एवं शत्रुजननामभिभवितारमित्यर्थः। स्पर्धा स्पर्ध संघर्षे क्विप् चेति क्विप् संज्ञायां इ
ति यदृशानुकर्षणात् स्यच्चविध्यंतरोपसंग्रहार्थत्वाद् आकारस्य लोपो रेफस्य च संप्रसारणं सावेकाच इति विभक्तेरुदात्तत्वं। तरुतारं तृप्ल
वनतरणयोः तस्माल्लुचि ग्रसित स्कभित स्तभित्यादौ निपातनादुपसिद्धिः चर्कृत्यं करोतेर्यङ्लुगंतादृभावात् अचोयदिति क्यप्तनुक्॥
॥ ॥ इति प्रथमस्याष्टमे एकविंशो वर्गः॥ ॥ कारा धद्धितिद्वादशर्चं पंचमं सूक्तं। अत्रानुक्रम्यते। काराधं द्वादशौत्याद्युः स्वप्ननाशिन्योष्टा
गायत्री द्वितीया ककुप् तृतीया चतुर्थी काविराङ्रूपा पंचमी तनुशिरा षष्ठ्या श्वरसिम्भिरा बृहती इति विराड्गायत्र्या इति अ
स्यायमर्थः। अनुवृत्तेः सीदितादि ऋषिमतसः कक्षीवान् ऋषिः आद्या गायत्री विद्वांसाविद्विमिया ककुम्मध्यपादस्य द्वादशाक्षरत्वात् मध्यम
श्चेत्ककुबिति हि तल्लक्षणं तृतीया ता विद्वांसेति या काविराड्॥ नवकयोर्मध्ये त्रिगतः काविराडित्यक्तलक्षणोपेतत्वात् चतुर्थी विपृच्छामीति या
प्रारूपीनवैराजत्रयोदशीनि रूपी त्यक्तलक्षणोपेतत्वात्। श्रुतं गायत्रमिति षष्ठीयत्पिबाद संख्यया उष्णिङ् न भवति तथाप्यक्षर
संख्यया उष्णिक् युवं ह्यासीति सप्तमी विष्टारबृहती अपि नौ मध्ये दशकौ विष्टारबृहतीति तल्लक्षणोपेतत्वात् माकस्मा इत्याद्यमेकृतिः आग
तारथ कथ्व कृतिरित्युक्तलक्षणसद्भावात् दुहीयन्मित्रेति नवमी विराड्दशम्या द्यावृत्ति ऽ गायत्र्यः आश्विनवेद इति वैनाट्य प्रयोगात् सादि
परिभाषया इदमपि सूक्तमाश्विनं अधरलप्रस्येत्यं तया दुःस्वप्ननाशनं प्रतिपाद्यते। अतो यातनोच्यते सा देवतेति न्यायेन तद्देवदे
तास्तकविनियोगो लैंगिकः। धर्माभिप्लवे आदितो नवर्चो विनियुक्ताः। सूत्र्यते हि। काराधद्धोत्राश्विना वामिति नवाभामित्यग्निरिति का
राधद्धोत्राश्विना वामिति नवविष्णुं दसइत्यादिकं ब्राह्मणमनुसंधेयं॥ ॥ तत्र प्रथमामृचमाह॥ ॥ का राधद्धोत्राश्विना वां को वां जोष उ
भयोः। कथा विधात्यप्रचेताः॥ ॥ अश्विना हे अश्विनौ वां युवां का होत्रा वाक् नाम एतद्वाक् की दृशी स्तुतिलक्षणा वाक् राधत् आराधयति
प्रीतौ करोति युवयोर्महात्म्यानुरूपा स्तुतिर्नास्तीत्यर्थः। किंनु वां युवयोः उभयोः जोषः योषणे सेवने प्रीणने वा समर्थः कः स्तोता विबितयु २२३
मद्गुणाभिज्ञः कश्चिद्पि नास्तीत्यर्थः। अप्रचेताः युवयोर्महात्म्यमजानंश्च कथा केन प्रकारेण विधाति युवां परिचरति युष्मद्विषयं
परिचरणमपि नकर्तुं शक्यमित्यर्थः। राधत राध साध संसिद्धौ लेट्यडागमः। जोषः जुषी प्रीतिसेवनयोः भावे घञ् अभिता द्वाक्षहात्तत्वं।
कथा थाहेतौ च छंदसीति किं शब्दात् थाकारवचनेयाप्रत्ययः किमः क इति कादेशः विधाति विध विधाने तौदादिकः लेट्याडागमः॥

अप्रचेताः प्रकृष्टं चेतो ऽस्यास्तीति प्रचेताः न प्रचेताः नञ् समासे व्यत्ययेन पूर्वपदप्रकृतिस्वरत्वं॥ ॥ द्वितीयामृचं॥ ॥ विद्वांसाविद्दुरः पृच्छेदविद्वानित्था 443/1924
परो अचेताः। नू चिन्नु मर्ते अक्रौ॥ ॥ इत्था इत्थमानेन पूर्वोक्तप्रकारेण अविद्वान् अतः स्तोता विद्वांसाविति सर्वं ता अश्विनावेव दुरो द्वाराणि
स्तुतिपरिचरणयोरुपायभूतान् मार्गान् पृच्छेत प्रश्नं कुर्यात् अपरः अश्विभ्यामन्यः सर्वोपि अचेताः यस्मात् ज्ञानेन रहितः तस्माद
श्विनावेव पृच्छेदित्यर्थः। इदम इत्थं एतेतौ रथोरिति इद्भावः। यद्विथाहसौ तौ चाक्रोशनैरभिरनाक्रांतो अश्विनौ नूचिन्नु क्षिप्रमेव मर्त्यम
नुष्ये स्तोतरि भक्त्यानुग्रहकतया संलिनेथ इत्यथ्याहारः। इथाथाहेतौ च छंदसीति थाप्रत्ययः। इदम इत्थं एतेतौ रथोरिति इद्भावः य
द्विथाहेतौ चेत्यत्र इदमशब्दस्य नानुवृत्तिः तदानीं इदम इमुः एत इतौ तार्वस्या विभक्तेर्व्यत्ययेन सुपां सुलुगिति डादेशः। अक्रौ
क्रमु पादविक्षेपे अस्मात्स्वप पदरुत्यल्युट्‌बहुलमिति बहुवचनात् कर्मण्यपि तन्नसनचन क्रमगमाधिति विहृविदुनोरनुनासिकः
स्यादित्यानञ्समासे व्ययपूर्वपदप्रकृतिस्वरत्वं॥ ॥ तृतीयामृचमाह॥ ॥ ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य। प्रा
र्चद्दयमानो युवाकुः॥ ॥ हे अश्विनौ विद्वांसा सर्वज्ञौ तादृशौ युवां हवामहे आह्वयामहे तादृशौ विद्वांसा अभिज्ञौ युवां नो ऽस्मभ्यं मन्म
मननीयं स्तोत्रं अद्यास्मिन्काले वोचेतं ब्रुवाणौ भवतां सर्वदाहं युवाकुः युवां कामयमानः हविः संयोजयन् दयमानः युवा
भ्यां हविः प्रयच्छन् प्रार्चत प्रकर्षेण स्तौमि तासु पांसुलुगिति विभक्तेराकारः। वोचेतं ब्रूञ् व्यक्तायां वाचि ब्रुवो वचिः लिङ्‌याशिष्यङ्ग व
चउमित्यागमः। आर्चत अर्च पूजायां भौवादिकः तिङतिङ इति निघातः। दयमानाः दय गतिरक्षणहिंसादानेषु
। आपः पिबादनुदात्तत्वं शानचो लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते युवां कामायत इति युवाकुः मितिश्वादिभ्य उपसंख्यानमी
ति द्रुप्रत्ययः। अविभक्तावपि व्यत्ययेन युवादेशो द्विवचन इति युवादेशः। आत्वं च युष्मा युमिश्रणे औणादिकः काकुप्रत्ययः॥ ॥ चतुर्थी
मृचमाह॥ ॥ वि पृच्छामि पाक्या न देवान्वषट्कृतस्याद्भुतस्य दस्रा। पातं च सह्यसो युवं च रभ्यसो नः॥ ॥ हे अश्विनौ युवां विपृच्छामि किं
नु युवामेव सर्वतः पृच्छामीत्यर्थः। हे दस्रा दर्शनीयौ तौ युवां वषट्कृतस्य वषट्कारेणाग्नौ हुतस्य अद्भुतस्य आश्चर्यभूतस्य महतः
सह्यसः अतिशयेन बलवतः बलोत्पादकस्य सोमस्य स्वांशलक्षणमेकदेशं पातं च। नोऽस्माकं च रभ्यसः अतिशयेन रभस्विनः प्रौ
ढो धमान् कुरुतं। पाक्या पचेः रूक्षोर्ण्यत्वजोः कुधिण्यतोरिति कुत्वं तिस्वरिः सुपां सुलुगिति विभक्तेर्डादेशः वषट्कृतस्य वषट्
शब्दस्योर्यादित्वेन गतिरनंतर इति गतेः प्रकृतिस्वरत्वं पातं पापाने बहुलं छंदसीति शपो लुक् सह्यसः सहते अभिभवत्यनेनेति स
हो बलं असुन् तदस्यास्तीति सह्वी मत्वर्थीयो विनिः तत आतिशायनिके ईयसुन् विन्मतोर्लुक् छांदसईकारलोपः। रभ्यसः रभ
सा भस्येरा भस्यं कार्योपक्रमः पूर्ववत्प्रक्रियात्तया॥ ॥ पंचमीमृचं॥ ॥ प्र या घोषे भृगवाणे न शोभे यया वाचा यजति पज्रियो वां॥ प्रै
षयुर्न विद्वान्॥ ॥ हे अश्विनौ प्रभवति समर्था भवति सा वाक् या वाक् युष्मत्कृतिरूपा घोषे घोषाख्यायाः पुत्रे सुहस्त्याख्ये भृगवाणे न भृगोच
शोभे शोभनेयया स्तुतिलक्षण्या वाचा पज्रियः पज्रा आंगिरसः तेषां कुलोत्पन्नः कक्षीवान् वां युवां यजति स्तौति सा विशोभत इत्यर्थः। इषयुर्न इष

भा॰ प्र॰

२२४

नीकक्षीवतः पुत्री अश्रोषत्वा रानद्वाचकं प्रातिपदिके पुत्रवत्तंतं भृगवाणा चरतनाभ्युरवाचरातस्वधातिपदिक स्वः कृपधातुमेताद्यत्ययमिलकः मानच्शब्दादि आम मानुशासनस्यानित्यत्वान्नुमभावः ऋपादिः शोभेश स्मो कोपरत आत्मनेपदे घितितत्कायः इयायुः इयगतौ इष्यतिगत्यर्थ इत्यस्य दुगुपधलक्षणः । यद्वा उषु इत्यां दृष्यतेसर्वैः प्राणिभिरितीपायमन्त्र्यत्ययेन कर्मणि कर्तृप्रत्ययः मन्त्रा येन संहितायाम्प्र दुहीद्दीर्घ पद्ध पुराश्चिर्वस्तु ऋतिच्छिः ॥ इति प्रथमस्याष्टमे द्वाविंशो वर्गः ॥ ॥ षष्ठीमृचमाह ॥ ॥ श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वां ॥ आक्षी शुभस्पती दन् ॥ ॥ हे अश्विना अश्विनौ गायत्रं गातव्यं गायत्रीयुक्तं वा यत्साम स्तोत्रं तकवानस्य तकवान इति ऋषेः स्तोत्रं श्रुतं श्रृणुतं अहं चिदहमपि वां सहि रिरेभ स्तुतवानस्मि हे शुभस्पती शोभनकर्मणः पालयितारौ युवाभ्यां दत्ते चक्षुषी आदन आददानः तस्मादुपमह्यमपि अभिमतफलं प्रयच्छतमिति भावः श्रुतं श्रु श्रवणे लङि बहुलं छन्दसीति विकरणस्य लुक् नकवानस्य तकतीति अत्र गतिसामान्यवाचिनात्स्थितेर्योमं इगतिलक्षणे औणादिक प्रत्ययः भृगवाण इति वत्पञ्चतोयादि रिरेभ रेभृ शब्दे अक्षी इन्द्रियं मक्षिणाकृत्यस्य ईकारादेशः सचोदात्तः शुभस्पती सम्बोधने आमन्त्रितपरांगवत्स्वर इति षष्ठ्यन्तस्य परांगवद्भावात् पदद्वयसमुदायस्याष्टमिकमामन्त्रितानुदात्तत्वं दन आङ्पूर्वाद्ददाते शानच् अदादीनां व्यत्ययेन शपः श्लुः द्विर्वचन प्रकरणे छन्दसि वेति वक्तव्यमिति वचनाभावः छन्दस्युभयथेत्यार्धधातुकत्वात् श्नाभ्यस्तयोरात इत्याकारलोपः ॥ ॥ सप्तमीमृचं ॥ ॥ युवं ह्यास्तं महो रन्युवं वा यन्निरततंसतं ता नो वसू सुगोपा स्यातं पातं नो वृकादघायोः ॥ ॥ हे अश्विनौ महो महतो धनस्य रं दातारौ युवां युवं ह्यास्तं अभवतं यद्वा युवं वा निरततंसतं धनानि निर्गमयतं ता नो वसू वासयितारौ युवां सुगोपा सुष्ठु गोपायितारौ रक्षितारौ स्यातं भवतं अपि च नोऽस्मान् अघायोः अघं पापफलं अस्माकमिच्छतः वृकात् स्तेनात् पातं रक्षितं महः महतः इमो छन्दस्युभयथेत्यार्धधातुकत्वाल्लोपः रन्दानिति वत्य्यक्रियान्तेपा व्यत्ययेनैकवचनं निरततंसतं तसि अलंकारे अस्माण्यन्तात् लुङि णिश्रिद्रुस्रुभ्य इति च्लेश्चङ् द्विर्वचनादि चङि उपरे संज्ञायां लघुसंज्ञायां बाधितत्वात् सन्वद्भावाभावः ॥ कर्णोपामुपामुयुगोतिवि भक्तेर्लुक् अघायोः अघं परेषामिच्छति छन्दसि परेच्छायामिति क्यच् अश्वाघस्यात् इत्यात्वं क्याच्छन्दसीत्युप्रत्ययः ॥ ॥ अष्टमीमृचमाह ॥ ॥ मा कस्मै धातमभ्यमित्रिणे नो माकुत्रा नो गृहेभ्यो धेनवो गुः ॥ स्तनाभुजो अशिश्वीः ॥ ॥ अश्विनौ अमित्रिणे अमित्रं मित्ररहितं शत्रुं कस्मैचिदपि शत्रवे नोऽस्मान् माभिधातं आभिमुख्येन मा स्थापयतं अपि च नोऽस्माकं गृहेभ्यः सकाशात् स्तनाभुजः स्तनैर्वत्सान् मनुष्यांश्च पालयन्त्यो धेनवो गावः अशिश्वीः शिशुना वत्सेन विरहिता अस्मदीयगृहे अवस्थानाभावात् वत्सैः अकुर्वत्यः अस्माभिरगम्ये प्रदेशे मा गुः मागच्छन्तु धातं धा धारणे आमादि लुङि गातिस्थेति सिचो लुक् नमाङ्योगे इत्यडभावः ॥ माकुत्र परगादिः छन्दसिवहुलमित्युत्तरपदाद्युदात्तत्वं ॥ गुः इण् गतौ इणो गा लुङि गातिस्थेति सिचो लुक् ॥ आत इति जेर्जुस् । स्तनाभुजः भुज पालनाभ्यवहारयोः । स्तनैर्भुञ्जंति पालयंतीति स्तनाभुजः । क्विप् अन्येषामपि दृश्यत इति सांहितिको दीर्घः ॥ अशिश्वीः सख्यशिश्वीति भाषायामिति छन्दस्यपि व्यत्ययेन निपातं ङ्प्रत्यययुक्तादिङ्छन्दस्यासीतिशिश्वी छन्दसीति वनिर्यमितलक्षणं यईकारः नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ वा छन्दसीति पूर्वसवर्णदीर्घः ॥ अथवा शिशुशब्दात् मत्वर्थे छन्दसीति विप्रत्ययः द्विर्वचनरस्वले एरनेकाच इति यण् छन्दसोनकारः पूर्ववत्समासस्वरो ॥ ॥ नवमीमृचं ॥ ॥ दुहीयन्मित्र

२२५

धितये युवाकु राये च नो मिमीतं वाजवत्यै ॥ इषे च नो मिमीतं धेनुमत्यै ॥ ॥ हे अश्विनौ युवाकु युवां कामयमानः स्तुतिभिर्याचयिता वा स्तोता अहमित्यर्थः मित्रधितये मित्राणां बंधुजनानां धारणार्थं दुहीयन् युष्मत्सकाशाद्धनानि दुग्धमिति प्राप्नुयां तस्मान्नोऽस्मान्वाजवत्यै वाजवत्यै अन्नयुक्तायै च राये धनाय मिमीतं कुरुतं तथा धेनुमत्यै धेनुभिर्युक्ताय इषे अन्नाय च नोऽस्मान्मिमीतं कुरुतं अस्मभ्यं स्तोतृभ्यः बहुयुक्तं धनं गोयुक्तमन्नं च प्रयच्छतमित्यर्थः ॥ दुहीयन् दुह प्रपूरणे दुहिरिह हि सुप धात्वादिति भावेऽप्रत्ययः ॥ दुहिमात्मन इच्छति दुहीयति सुप आत्मनः क्यच् दुहीयतेर्लटः शत्रादेशः इतश्च लोपः इतोकारलोपः ॥ यद्वा दुहेर्लुङि सस्यरन्धितिव्यत्ययेन रन्धाद्यभावे रपसे ततश्छान्दसो लोपः यद्वा नारदेशः तछान्दसो रेफस्य यकारः ॥ अत एव व्युत्पत्तव्यधारणा वाम्रण्हेति युवाकु कृपां सुप्तनिः स्तोता मिमीतं माङ् माने शब्दे च जौहोत्यादिकः व्यत्ययेन परस्मैपदं भृञामित्यभ्यासस्येत्वं नवा योगे प्रथमेति निघात प्रतिषेधः ॥ ॥ दशमीमृचं ॥ ॥ अश्विनोरसनं रथमनश्वं वाजिनीवतोः ॥ तेनाहं भूरि चाकन ॥ ॥ वाजिनीवतोः वाजोऽन्नं बहुलं यात इत्क्रियावतोरश्विनोः अनश्वं अश्वरहितं अश्वरहितेऽपि समर्थातिशयेन गच्छन्तं रथं असनं अहं स्तोतासमभजं तेन रथेन भूरि प्रभूतं चाकन कामये असनं वन षण संभक्तौ इत्यस्य लङि छान्दसो लिट् ॥ एकगलमेवेतेणितस्या विकल्पनाद्वृध्यभावः नुन्नादितादभ्यासदीर्घत्वं ॥ ॥ एकादशीमृचमाह ॥ ॥ अयं समह मा तनूह्याते जनाँ अनु ॥ सोमपेयं सुखो रथः ॥ ॥ हे समह धनेन सहितः रथ अयं पुरोवर्ती त्वं मा मां तनु विस्तारय पुत्रपौत्रादिभिः समृद्धिं कुरु यद्वा अयमानं तां प्राप्नुवंतं मामिति योज्यं स च सुखः शोभनकाशः सुखहेतुर्वा रथः जनां अनु स्तोतृजनेषु सोमपेयं सोमपानं प्रति ईयते गम्यते अश्विभ्यां नीयते अतोऽश्विभ्यां यद्यायते सर्वे रथस्यैव ददातीति रथं संबोध्य प्रार्थना अयं इदायपुंसिवहाअपवक्तोपस्य यच्च समह मह पूजायां महयति प्रज्ञयतीति महो धनं पचाद्यच् तेन सह वर्तते इति बहुव्रीहौ वोपसर्जनस्येति सहस्य सः ॥ मा ऋ गमः यजादित्वात्संप्रसारणं तस्य छान्दसो दीर्घः अदुपदेशात् सार्वधातुकानुदात्तत्वे यक्स्वरः शिष्यते सोमपेयं पानं अनाय्यादिति भावे यत् ई घुमास्थेति ईकारादेशः यतोऽनाव इत्याद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं ॥ ॥ द्वादशीमृचमाह ॥ ॥ अध स्वप्नस्य निर्विदेऽभुंजतश्च रेवतः ॥ उभा ता बस्रि नश्यतः ॥ ॥ अथ इदानीं प्रभातसमये स्वप्नस्य स्वप्नं प्रति निर्विदे निर्विण्णोऽस्मि तथा अभुंजतः परानरक्षतः रेवतो धनवतश्च पुरुषस्य एवंभूतं पुरुषं प्रत्यपि निर्विण्णोऽस्मि तथा अभुंजतः परानरक्षतः रेवतो धनवतश्च यत्स्वप्नमभिशिशमनश्यतानाशं यानुतेस्वप्नदृशः पदार्थः प्रातर्नोपलभ्यते कंदर्पस्य च धनं अभुंजतस्तं सत्किं प्रमं नश्यति न दुभयं विषयानि निर्विद्गोमां वाधत इत्यर्थः ॥ अत्र स्वप्नमात्रस्य असत्यप्रतिपादनेन दुःस्वप्नस्यापि असद्भावः प्रतिपादितः अश्विनौ तेपादुःस्वप्ननाशनाविति गुणदृष्ट्या स्वप्नस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी निर्विदे विद्लृ लाभे आगमानुशासनस्यानित्यत्वान्नुमभावः रेवतः रयिशब्दान्मतुपरयेर्मतौ बहुलमिति संप्रसारणं छन्दसीर इति मतुपो वत्वं रेशब्दान्मतुप उदात्तलोपितत्वा दात्तत्वं उभा ता उभयत्र सुपां सुलुगिति याकारः ॥ ॥ इति प्रथमस्याष्टमे त्रयोविंशो वर्गः ॥ ॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथममंडले सप्तदशोऽनुवाकः ॥ ॥ अष्टादशेऽनुवाके षड्सूक्तानि तत्र कादित्यादिति पञ्चदशर्चं प्रथमं सूक्तं अत्रानुक्रम्यते कादित्यादिति पञ्चदश वैश्वदेवमिति अनुवर्तमानः कक्षीवान् ऋषिः अनादेशे परिभाषया त्रिष्टुप् विश्वेदेवा विनियोगो लैङ्गिकः ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥ कदित्था नृ

445
1924

रः अनुतीः कनुकदा कस्मिन्काले श्रवत श्रवणदातइंद्रः हर्म्यस्य हर्म्योपलक्षितस्य गृहस्य यजमानस्य संबाधनाय ... आनम्
225 स्येन प्रानड् प्राप्नोति तदानीं अर्थं अस्मदीयं यज्ञं यज्ञाय प्रघः सनु इरलं बहुलं कसतं कमते सय मेवासज्जनइत्यर्थः ॥ कनवा आत्यकोपञ्चोदाः
नंः पार्थं नव इति संहितायां नाकारस्य रत्वं अत्रानुनासिकः पूर्वस्येतु वेत्याकारः सानुनासिकः पार्श्वं पारक्षणेतार्थात् कसतन समस्यैनमारमाद
संता पूर्वं कस्य विधेरनित्यतात् गुणाभावे यणदेशयस्तां सुप्आत्मनः क्यच् नतो लदः इत्यत उतुरनुमइतिविभक्तेरत्वं ॥ श्रवन श्रवश्रवणं अत्र आगम
मः बहुलं छंदसीति विकरणस्य लुक् तुरण्यन तुरण्यतेर्यायंकं द्वादिः आनड् अश्नोतेर्लिङि व्यत्ययेन परस्मैपदं श्रीधामस्यत्ययेन भमनिकरणःआ
दिष्य तं गरते अद्रागमः हर्म्यस्य हर्म्यं ड्रान्धादृर्शं आदितादुच कसंतं कमुपादृविक्षेपे वृत्तिसर्गतायेन पुत्र मइत्यात्मनेपदं कस्य आगमः सिबहुलं क
दीति सिपयतव्रः ॥ अमिनक्षीत्यादिनाय तेस्तन प्रत्ययः ॥ ॥ द्वितीयामृचमाह ॥ ॥ स्तंभीद्ध द्यां स धरुणं प्रुषायदृभुर्वाजाय द्रविणं नरो गोः ॥ अनु स्व
जां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः ॥ स इंद्रः पांसुलो स्तंभीद्धरुत्वातिरवत्तथा गोपणिभिरपहृतस्य गोसमूहस्य ... स्य निरव
समूहस्य दानशीलनेता इंद्रः ऋभुः सूर्यात्मना विस्तीर्णं भासमानः मनद्रविणं सर्वप्राणिभिः अभिद्रवणीयं धरुणं धनं मं ... धारकं उदक
... अन्नार्थं बलार्थं वा प्रुषायत प्रुष्णातिसिंचति प्रवर्षतीत्यर्थः ॥ अपि च महिषः महान्नामितत महानसूर्यः स इंद्रः ... समकालत
वृणोति तमसा सर्वं माच्छादयतीति वाराचिः यद्वा प्रकाशेन वृणोतीति भ्राडुषाः तामनु चक्षत चक्षति पश्यति कर्मा अनुपश्यति प्रकाशं ...
प्रकाशोपि ... गत्या निष्पादिता या रात्रेः उषसश्च पश्चात् उदेतीत्यर्थः ॥ अपि चेति परमाश्चर्यं पदयमश्वस्य मेनां स्त्रीनामैतत् ...
रत्नं नीपरिर्वेपरित्येविपरीतमकरोत् कदाचित् इंद्रोलीलया अश्वंयांगामुत्पादयामास ... प्रतिपाद्यं मात्रांतरे ...
गम्यते धरुणं धारंर्णिचुक् चेत्यप्रत्ययः प्रुषायत प्रुषप्रुष्णस्नेहसेचनपूरणे ... कः ... आगमः ... अपीत्य ...
यज्ञादेशः ॥ नरः नृनयेवहुलं वचनात् ... इति कर्तर्यपचक्षत ... बहुलं छंदसीति ... ॥ ॥ तृतीयामृ
॥ ॥ नक्षद्धवमरुणीः पूर्व्यं राट् तुराविशामंगिरसामनु द्यून् ॥ तक्षद्वज्रं नियुतं तस्तंभ द्यां चतुष्पदे नर्याय द्विपादे ॥ ॥ अरुणीः अरुणवर्णा आरोच
मानायाउषसः राट् राजमानः ... पूर्व्यं पूर्वैः ऋषिभिः प्रयुक्तं इदं इदानीमस्माभिः क्रियमाणमाह्वानं नक्षत् नक्षतु ...
राः अनुद्यून् अनुदिवसं विशां मनुष्याणामंगिरसां महर्षीणां ... तुरः ... प्रेरयिता अपि च इंद्रः वज्रं ... नियुतं ... येन सह
नितं संयुक्तं तक्षत् अकरोत् तथा द्यां द्युलोकं तस्तंभ अस्तंभयत् यथा अधोन पततितथाकरोदित्यर्थः ॥ किमर्थं नर्याय ... चतुष्पादे गवा
श्वादये द्विपदे मनुष्याय च ... अर्थमित्यर्थः ॥ नक्षत् नक्षगतौ लेट्यडागमः ॥ पूर्व्यं पूर्वैः कृतमिमा ... इति यप्रत्ययः राट् राजृ दीप्तौ ॥ अस्मा
... अन्येष्वपि दृश्यते इति क्विप् ॥ तुरः तुरत्वरणे इगुपधलक्षणः कः ॥ तक्षत् तक्षू तनूकरणे बहुलं छंदस्यमाङ्योगेपीत्यडभावः ॥ तस्तंभ स्तभि स्कभि
गति प्रतिबंधे अस्मात् ... रूपं ... मितिइ ... मम ... त्वं ॥ पूर्वपदस्य ... घाताभावः चतुष्पदे चत्वारः 225
पादा अस्य संख्या सुपूर्वस्येति पादस्य ... समासांतः चतुर्थ्येकवचने भसंज्ञायां पादः पदिति ... द्विपा ...

विल्कनरपदांतोदात्तत्वं ॥ ॥ चतुर्थीमृचमाह ॥ ॥ अस्य मदे स्वर्यं दा ऋताया पीवृतमुस्रियाणामनीकं ॥ यद्ध प्रसर्गे त्रिककुम्निवर्तदप द्रुहो मा
नुषस्य दुरो वः ॥ ॥ हे इंद्र अस्य सोमस्य पानेन मदे हर्षे सति ऋताय यज्ञार्थं स्वर्यं ... अपीवृतं पणिभिर्गुहासु निरुद्धं उस्रियाणां गवा 447
मनीकं संघं ... अदात् ... यद्ध यदा खलु प्रसर्गे युद्धे त्रिककुप् ... इंद्रः निवर्तत निरगं 7921
... मनुष्यस्य मनीः संबंधिनोऽसुरस्य पणेः संबंधीनि दुरो द्वाराणि गवां निर्गमनायापिहितानि अपवः अप
वृणोति उद्घाटयति ॥ स्वर्यं ... पालययोः ... पूर्णं ... विधेरनित्यत्वात् ... अपीवृतं अपिपूर्वात् वृणोतेः
कर्मणि निष्ठा ... पूर्वपदस्य ... गतिरनंतर इति गतेः प्रकृतिस्वरत्वं प्रसर्गे प्रकर्षेण सृज्यंते विमुच्यंते ... इति
प्रसर्गः ॥ अधिकरणे घञ् ... उत्तरपदप्रकृतिस्वरत्वं छंदसि ... स्वरभावः ॥ निवर्तत ... लङि ... आगमः ॥ व्यत्ययेन परस्मैप
दं ॥ वः वृञ्वरणे छंदसालुङि मंत्रे घसेति च्लेर्लुक् गुणे हल्ङ्यादिलोपः ॥ ॥ पंचमीमृचमाह ॥ ॥ तुभ्यं पयो यत् पितरावनीतां राधः सुरेत
स्तुरणे भुरण्यू ॥ शुचि यत्ते रेक्ण आयजंत सबर्दुघायाः पय उस्रियायाः ॥ ॥ हे इंद्र तुरणक्षिप्रकारिणे तुभ्यं भुरण्यू ... पर्ययो
पितरौ उत्पादयितारौ द्यावापृथिव्यौ यत्पयः सांनाय्यलक्षणं दधिः अनीतां ... अधिपतामित्यर्थः ॥ हविषः सकाशाद्धि ...
ते अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति ... द्यावापृथिवीभ्यां गोषु अनीतं शुचिरु
इं सबर्दुघायाः क्षीरस्य दोग्ध्या उस्रियायाः गोः पयः रेक्णः धननामैतत् धनवदतिप्रियं यद्धा ... एवंविधं हविः तुभ्यं आ
... यजमानाः प्राप्य ... दुरो मानुषस्य ... वृणोतीति पूर्वयासंबंधः अनीतां णीञ् प्रापणे लङि बहुलं
छंदसि ... भुरण्यू भुरण धारण पोषणयोः ... आदिः ... औणादिक उ प्रत्ययः ... ॥ इति प्रथमस्याष्टमे चतुर्विंशो वर्गः ॥ ॥ षष्ठी
मृचमाह ॥ ॥ अध प्र जज्ञे तरणिर्ममत्तु प्र रोच्यस्या उषसो न सूरः ॥ इंदुर्येभिराष्ट स्वेदुहव्यैः स्रुवेण सिंचञ्जरणाभि धाम ॥ ॥
... प्रजज्ञे ... अस्याः अस्माभिः प्रदृश्यमानायाः उषसः समीपवर्तमानाः सूरोन ... जरणा ... जीरणीयः
... आश्रितः ॥ आसीत ... मित्यर्थः ॥ ... प्रादुर्भावे लिङि ... मम नु ... बहुलं छंद
... आगम ... सनमिति ... प्रतिषेधः ॥ स्वेदु ... इदि परमैश्वर्ये औणादिक उप्रत्ययः
... हविर्ये ... इत्यर्थः ... अथवा
दीनामिति नु ... स्तुतिकर्मा अस्मात् कर्मणि ... शमु ...

ध्याम. हीमंविनधितिः यनेषेतस्येव्वक्षसमृ इनिधातव्याद्रा स्यी अपस्यात अपः विज्ञानात्मकं स्वकीयं कर्मकर्तुमिच्छेत तदानीमुरःश्रेरको
१-प्र. अध्वर्युः अध्वरे यज्ञे गाः यशो रोधनाय यूथे नियोजनाय परिभवतिसमर्थो भवतिच द्वाम्बिघ्नासूर्यकिरणैः महासावानधितिः यन
२२६ मुदकमस्यांधीयत इतिवनधितिर्मेघमालासायध्रद्रा अपस्यात अपः प्रवर्षणलक्षणं कर्मकरोतितदानीमुरः प्रेरकइंद्रः अध्वरे यज्ञ
स्यनिमित्तभूते अध्वर्तव्ये आहिंसिताव्यं तारिक्षे वर्तमानः सन् गाः रश्मीन् दकस्यशोधनाय्यावरणानिपरि पतिस्नानि वारयतीति ऊचे उत्तरार्क
प्रत्यक्षकृतः ३ हे इंद्र सूर्यमानाद्वर्तमानस्त्वं रूपान कृत्वाति कर्मनामक् र्मसुसाधन प्रनदिवसाननुलक्ष्यमद्रुयदास्वलु प्रभासिप्रकर्षेणदाप्यसनदा
नौ अनर्विशो अनमानोजवकेन इंधनाद्यारहरणाय अरण्यं प्रविशंत यदागतव्यं स्वकं प्रतिगंतुं मन्त्राक्तायपुर षायवश्चिषेपश्रृन्वरयंस्तुरा त्वरमणा
मभत्रगोपाकनायसिध्नं दृभिमतामिति वाक्यं द्रोषः स्विष्माजाभनं उध्वं दीमम स्यंदीमिवायस्या मातथा नः नन्त्र सकृष्याभित्युलरपदांतोदान
तं अपश्यात अपश्चात सप आत्मनः क्वचनल पाद्रागमः रोधनारक्षिर आचरणं न्युद्धतिभावेच्युद्धेषु शं इमिव हृत्वामति इलोपः आनिर्विशो अ
नमाविशतान्यानिर्विशविशतेः क्विप अहराद्दीनां पत्यादि पृ पस्यानामिति सकारस्य रेफादेशाः यद्वा अर्तिः कर्मणि विच अरं गंतव्यं प्रातिविशतीत्या
प्रातीति अर्विड् न आर्विड् अव्ययपूर्वपदप्रकृतिस्वरत्वं अतएव युष्मत्र्वेन विधारणार्दनयम हाः पश्चिमषड् यगतो अस्मादंत भावितण्यर्थो नाविः
प॥ ॥ अष्टमीमृचमाह ॥ अशाम हाविव अदा इर्राङ् इराद्ह घुम्नामाहमभियोधान रुक्मं ॥ हरियतमंदिनं दुष्कान्वधं गारसमाद्विभिर्वाताव्य॥
॥ हे इंद्र महा महतोदिवोमद करस्य सोमस्याप्यायाताशेहर्व स्वकीयस्वश्योइद्दाभिन्नमणि आदः पीतश्वो यं सोमं पाययंतं तथा धुम्नामाहं धुम्न।
ध्यामद्वीयस्यधनस्याभिभवितारं उत्तरु स्वाहिता रुद्धात्वा धनायो धनश्रीः कास्तं अभिभव। य य दात तवरथेवर्धनाय हारिमनोहरं मादिनंम
दकरंगोर भसं अत्र गोशब्दः पयसिवर्तनण्याविकृतइ इगाविवंतं वीर्यवंतमित्यर्थः वाता व्यवालेन प्राप्तव्यं वातेन तुल्येनद्रीघ्रकारिणा वा यायातव्यमि
त्यर्थः एवंविधं सोमं अद्रिभिर्ग्रावभिः धुक्षन दुहंतिकर्मविशेषुण्यातितदानीमष्टतिपूर्वत्र संबंधः अष्टा अश्रुभोजनेतस्मिन् अगमानुशासनस्यानि
यत्वादिडभावाधुक्षनपदकालानोभयूभावश्छांदसः॥ ॥नवमीमृचमाह॥ ॥त्वमायसं प्रतिवर्तयोगोर्दिवो अस्मानमुपनीतमभ्वा॥ कुत्साय
यत्रपुरहूतवन्वंशुष्णमनंतैः परियासिवधैः॥ ॥ हे इंद्र त्वं गोगंतुर्भूसमधमोम्यास्करस्य वधार्थं अयासं अयोमयं प्रतिवर्तयः आभिमुख्येन
यसिआः कीदृशं च त्वं दिवोद्युलोकात आभ्वाइमिनत्वष्टा उपनीतमानीतं अस्मानं शीघ्रं शत्रोः व्यापकं यत्र यदा हे पुरुहूत पुरुभिर्वहुभिस्तोत्र.
भिराहूतेंद्र कुत्सायएतत्संज्ञायऋषये शुष्णं गोपकमसुरं अनंतैर्निरवधिकैर्वधेः हननसाधनैरायुधैर्वनवन परियासि परितोगच्छसि तदा
नीतद्वधार्थं वज्रं प्रत्यवर्तय इत्यर्थः अश्मानं अश्नुव्यापि अन्ये व्याप्नोति दृश्यंतइति मनिन कुभ्वा त्वसादिपुच्छंदसि वा वचनमितिनाभावे स्वपितृः
ख्यितत्वादभावेयणादेशः वन्वन वनुयाचने अत्रहिंसार्थः तथा च यास्कः वनुष्यतिर्हंतिकर्मानवगतसंस्कारो भवतीतिवधेः हनश्चवध इति
हंतेः करणे अपतत्वनियोगेन विधादेशश्च समवाहंतोदात्तः तस्याकोपसति उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वं॥ ॥ दशमीमृचम्॥ ॥पुरा २२६
यत्सूरस्तमसोअपीतेस्तमद्रिवः फलिगं हेतिमस्य॥ शुष्णस्यचित्परिहितं यदोजोदिवस्परि सुग्रथितं तदादः॥ ॥ पुरा यत्सूर्यदासरसूर्यः
तमसः तमोरूपस्य शुष्णस्यासुरस्यापीतेः संग्रामात मुक्तोभवदितिशेषः तदानीद अद्रिवः आहणाभ्ननेनेत्वद्भिर्वत्रः तद्धनिंद्र तं फलिगं

मेघनामैतत् मेघरूपेणावृण्वंतं हेतिं हंतारं अस्य निरसितवानसि। यद्वा अस्य शुष्णस्यासुरस्य हेतिं हननसाधनमायुधं फलिगं मेघकक्षणं प्रभां 449
क्षीरितिशेषः। तथा शुष्णस्यचित् शोषयितुरसुरस्य च यदोजः अश्छादिकं बलं दिवस्परि घोतमानस्य सूर्यस्योपरिहितं आच्छादितं सुग्रथितं सुष्ठु
सर्वेसंवृतं दोतः तस्मात्सूर्यात् आदः आद्वणाः विच्छिन्नं कृतवानसीत्यर्थः अद्रिवः छंदसीर इति मतुपो वत्वं। मेतुवसोपितिनकारस्यरुत्वं। हेतिं हत्य 1924
युदो बहुलमिति बहुलवचनात् मतेः कर्तरि क्तिन ईनी यूतीत्यादौ निपातनाद्रूपसिद्धिरंतोदात्तत्वं च। अस्य असु क्षेपणे लट् सिप् तस्य व्यत्ययेः
नस्यादेशः अतो हेरिति लुक् दिवस्परि पंचम्याः परावध्यर्थ इति विसर्जनीयस्य सत्वं अदः दृविदार णे लङ् सिपि तस्य व्यत्ययेन स्यादेशः अतो हे
रितिलुक् बहुलं छंदसीति विकरणस्य लुक् गणे हनुद्व्याभ्य इति सिलोपः॥ ॥ इति प्रथमस्याष्टमे पंचविंशो वर्गः॥ ॥ एकादशीमृचमाह॥ ॥
अनुत्वामहीपाजसीअचक्रे द्यावाक्षामामदतामिंद्रकर्मन्॥ त्वंवृत्रमाशयानं सिरासुमहोवज्रेणसिष्वपोवराहुं॥ ॥ हे इंद्र मही महीमहत्योपाज
सीबलवत्यो अचक्रे अचक्रमणिसर्वत्रव्याप्य वर्तमाने द्यावाक्षामा द्यावापृथिव्यौ कर्मन् वृत्रवधादिलक्षणे कर्मणि प्रवर्तं त्वामकुरुतां। अन्वमन्ये
तां वा। तथा च तैत्तिरीयकं। स अब्रवीमेवं प्रसूतरुद्रोरुत्र महानिति तदनंतरं तां आन्द्रायानं आसमंताद्व्याप्य वर्तमानं वृत्रं वराहं वरा हारं वृत्रमसुरं
सिरासु सरणशीलासु अप्सु महो महता वज्रेण हत्वा सिष्वपः अस्वापयः पातितवानित्यर्थः महीसु यां सुलुगिति विभक्ते पूर्वसवर्णदीर्घः। या
उसीयात् समुच्चय बलवाचको लक्षणयात्र तद्वति वर्तते इयाड यालीकरणमुपसंख्यानमिति विभक्तेसीकारादेशः द्यावाक्षामा द्यौश्च क्षामा
चाद्दिवो द्यावेति द्यावादेशः देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं सुपांसुलुगिति विभक्तेर्डुक्। महंतामहीदर्श व्यत्ययेन द्यापः बहुलं छंदस्यमाङ्योगे
पीत्यडभावः महः महतिसंप्रसारणं क्रियते॥ ॥ द्वादशीमृच०॥ ॥ त्वमिंद्र नर्यो याँ अवो नृन्तिष्ठा वातस्य सुयुजो वहिष्ठान्॥ यं ते काव्य उशना
मंदिनं दाद्वृत्रहणं पार्यं ततक्ष वज्रं॥ ॥ हे इंद्र नर्यो नरेभ्यो हितः त्वं यान् नृन् नेतॄन् अश्वान् अवः अपसि रक्षसि तान् वातस्यानुयाना तद्वद्वेगवद्भ्यः
सुयुज्यमानान्वहिष्ठान् अतिशयेन वोढृन् अश्वान् तिष्ठ आरोहेत्यर्थः काव्यः कवेः पुत्र उशनामंदिनं मदकरं यं वज्रं ते तुभ्यं दात दत्तवान् तं च तव वज्रं
वृत्रहणं वृत्रस्यासुरस्य घातकं पार्यं शत्रूणां पारणे अतिक्रमणे समर्थं च ततक्ष तनूकृतवानसि। अवः अव तेर्लङ् अडागमः इतश्च लोप इतीकार
लोपः वहिष्ठान् वोढृशब्दात् तुश्छंदसीति इष्ठन् तुरिष्ठेमेयः स्विति तृलोपः। पार्यं पार तीरकर्मसमाप्तौ। अस्मादण्यंताद्चो यदिति यत् ततक्ष तातः
क्ष्णे तक्ष तनूकरणे पुरुषव्यत्ययः॥ ॥ त्रयोदशीमृ०॥ ॥ त्वं सूरो हरितो रामयो नॄन् भरच्चक्रमेतशो नायमिंद्र। प्रास्य पारं नवतिं नाव्यानामपि
कर्तमवर्तयोऽयज्यून्॥ ॥ हे इंद्र सूरः सूर्यात्मना वर्तमानस्त्वं हरितो हरिदूर्णा नेतॄन् नेतॄनश्वान् यद्वा रसहरणशीलान् रश्मीन् रमयः एतशोन
एतश इति सूर्याश्वस्याख्यानं तथा च श्रूयते एतशेन त्वा सूतो योदेवतां गमयन्निति। नशब्द चार्थे एतशश्च सूर्यरथस्य चक्रं भरत् अपिच तं नाव्या
नां नावा तार्याणां नदीनां नवतिं नवतिसंख्यां अतीत्य वर्तमानं पारं तीरदेशं समस्य अर्थे द्वितीया तीर दूरे अयज्यून् अयजमानान् वृत्रादीन् नास्तदा
दीन् प्राप्य प्रक्षिप्य तत्र वृत्तं कर्तव्यमवर्तयः कर्तव्यमपि कृत्वा तानवर्तयः प्रापयः रमयः रुढि च बहुलं छंदस्यमाङ्योगेपीत्यडभावः। अन्येषामपि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

यो वज्रवन्निंद्र त्वं नोस्मान् दुर्हणायाः दुःखेन हंतव्यायाः दुःखेन हंतव्यायाः अस्या दुर्गतेर्दारिद्र्यात् पाहि रक्ष तथा दुरितात् पापात् अभीके अभिगामे स
भा॰ प्र॰ मीपवर्तिनि संग्रामे अस्मान् रक्ष अपि च नोस्मभ्यं रथ्यो रथयुक्तान् अश्वबुध्यान् अश्वानां बोधकान् अश्वा यावद्भिर्बुध्यंते तावद्भिरित्यर्थः यद्वा अश्व
२२७ बुध्यान् छांदसो वर्णविकारः अश्वबुध्नान् अश्वमूलान् अश्वप्रमुखानित्यर्थः सर्वं हि धनं अश्वमूलं ग्रामप्रवर्गे च यदुक्तं ग्रामप्रवर्गे रथ्यमश्वबुध्यमिति
एवंविधान् वाजान् धनानि प्रयंधि प्रयच्छ किमर्थं इषे अन्नार्थं श्रवसे कीर्त्यर्थं च सूनृतायै सूनृता प्रिया सत्यात्मिका वाक् तदर्थं च दुर्हणायाः ईषद्दुःसु
ष्विति हंतेः खल् मणिखलयाहि षाखाढ्रित्वान्निघाताभावः वज्रोस्यास्तीति वज्री हस्वः नद्दुनव ञिवान छंदसीर इती मतुपो वत्वं संबुद्धौ मतुवसो रु
तिन कारस्य रत्वं रथ्यः छंदसीवनिपावितिरथशब्दाद्यत् वत्थ यद्वा इकारः यंधि यम उपरमे बहुलं छंदसीति विकरणस्य लुक् बाधुं छंदसीति हेरपित्वेन ङित्वा
भावादनुनासिकलोपाभावः ॥ ॥ पंचदशी ऋक् ॥ ॥ मा सा ते अस्मत्सुमतिर्विदसद्वाजप्रमहः समिषो वरंत ॥ आ नो भज मघवन् गोष्वर्यो मंहिष्ठास्ते सधमा
दः स्याम ॥ ॥ ०॥ हे वाजप्रमहः वाजैः धनैः प्रमंहनीयेंद्र ते त्वदीया सा सुमतिः शोभनानुग्रहरूपा बुद्धिः अस्मत् अस्मासु मा विदसत् मा विशुष्यतु त
था इषो अन्नानि अस्मान् संवरंत संवृतान् कुर्वंतु हे मघवन् धनवन्निंद्र अर्यो धनपतिस्त्वं नोस्मान् गोषु आभज तत्प्रापय वयं ते तव मंहिष्ठा अतिशयेन स्तुतिभिः प्रवर्धयि
तारो वयं सधमादः स्याम पुत्रपौत्रादिभिः सह माद्यंतो भवेम अस्मत् सप्तम्याः सुपां सुलुगिति सप्तम्या लुक् दसत् दसु उपक्षये माङि पुषादित्वादङ् वाजप्रमहः
वाजैर्धनैः प्रकृष्टं महनीयो यो जसस्य सतथोक्तः पादादित्वादाष्टमिकनिघाताभावः षाष्ठिकमामंत्रिताद्युदात्तत्वं वरंत वरणे व्यत्ययेन शप् गोषु सा
वेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य न गोश्वन्साववर्णेति प्रतिषेधः अर्यः अर्यः स्वामिवैश्ययोरिति निपात्यते अर्यः स्वाम्याख्याचेदित्यंतोदात्तत्वं
मंहिष्ठाः महि वृद्धौ इदित्वान्नुम् अस्मात्तृजंतात् आविष्ठवत्प्रत्ययो तृचः तुरिष्ठेमेयःस्विति तृलोपः सधमादः मदतृप्तियोगे चौरादिकः सह
मादयंते त इति सधमादः सधमादस्थयोश्छंदसीति सहस्य सधादेशः ॥ ॥ ०॥ इति प्रथमस्याष्टमे षड्विंशो वर्गः ॥ ॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १॥ ॥ ०॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्र
वर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधुरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे प्रथमाष्टके अष्टमोध्यायः ॥ ०, ०, ०॥

२२७